English :- This king had won his victory over this earth on his prowess and might and his four-fold army (which consisted of elephants, horses, charriots and soldiers) were just like a mere family, to him.

पुष्पदन्तीति तत्पत्नी, निःसपत्नगुणालया ॥
यल्लावण्यसुधाम्भोधौ, मकरो मकरध्वजः ॥११॥

अन्वय :- निःसपत्नगुणालया पुष्पदन्ती इति तत्पत्नी आसीत्। यल्लावण्यसुधाम्भोधौ मकरध्वजः मकरः क्रीडति ॥११॥

विवरणम् :- निर्गताः सपत्नाः येषां ते निःसपत्नाः निरुपमाः। अनुपमाश्च ते गुणाश्च निःसपत्नगुणाः। तेषां आलयः निधानं निःसपत्नगुणालया निरुपमगुणनिधानं पुष्पदन्ती इति तस्य भीमरथस्य पत्नी तत्पत्नी आसीत्। यस्याः लावण्यं यल्लावण्यम्। यल्लावण्यमेव सुधाऽमृतं यल्लावण्यसुधा। यल्लावण्यसुधायाः अम्भोधिः यल्लावण्यसुधाम्भोधिः तस्मिन् यल्लावण्यसुधाम्भोधौ तस्याः लावण्यसुधासागरे मकरः ध्वजे यस्य सः मकरध्वजः कामदेवः एव मकरः क्रीडति। यथा सागरे मकरः स्वैरं क्रीडति तथा तस्याः लावण्यसुधासागरे मकरध्वजः कामः क्रीडति रमते ॥११॥

सरलार्थ :- निरुपमगुणवती पुष्पदन्ती नाम तत्पत्नी आसीत्। तस्याः लावण्यसुधाम्भोधौ मकरध्वजः स्वैरं क्रीडति रमते ॥११॥

ગુજરાતી:- અનુપમ ગુણોના સ્થાનસમી પુષ્પદંતી નામની તેની રાણી હતી, કે જેના લાવણ્યરૂપી અમૃતના મહાસાગરમાં કામદેવ તો મગરમચ્છની પેઠે ક્રીડા કરતો હતો! ॥११॥

हिन्दी :- उनकी अनुपम गुणवाली पुष्पदंती नामक राणी थी, जिस के लावण्यरूपी महासागर में कामदेव तो मगरमच्छ के समान क्रीडा करता था! ॥११॥

मराठी :- अनुपम गुणांचे भांडार असलेली पुष्पदंती नावांची त्याची राणी होती, जिच्या लावण्यरूपी महासागरात कामदेव मगराप्रमाणे क्रीडा करीत होता. ॥११॥

English:- The queen of this Kingdom had non-pareil and peerless qualities, whose name was Puspadanti who had uncomparable beauty and in whose sea of beauty, Cupid used to love playing just as an alligator loves to play in the sea.

तयोर्निरुपमाङ्गश्रीः, समजायत पुत्रिका ॥
रूपस्वरूपव्याख्यापि, न यस्या गोचरे गिरः ॥१२॥

अन्वय :- तयोः निरुपमाङ्गश्रीः पुत्रिका समजायत। यस्याः रूपस्वरूपव्याख्या अपि गिरः गोचरे न ॥१२॥

विवरणम् - *तयोः भीमरथपुष्पदन्त्योः निर्गता उपमा यस्याः सा निरुपमा। अङ्गानाम् अवयवानां श्रीः शोभा अङ्गश्रीः अवयवशोभा यस्याः सा निरुपमाङ्गश्रीः अनुपमअवयवश्रीः पुत्रिका कन्यका समजायत समजनि। यस्याः रूपस्य स्वरूपं रूपस्वरूपम, रूपस्वरूपस्य व्याख्या निवेचनं वर्णनं वा यत्‌रूपस्वरूपव्याख्या। यस्याः रूपस्वरूपस्य वर्णनं गिरः वाचः गोचरे विषये न वाग्‌गोचरं नास्ति इत्यर्थः। अर्थात् सा अवर्णनीयरूपा आसीत् ॥१२॥*

सरलार्थ :- भीमरथपुष्पदन्त्योः तयोः निरुपमाङ्गशोभाशालिनी अवर्णनीयरूपा कन्यका समजायत ॥१२॥

ગુજરાતી :-તેઓને અનુપમ સૌંદર્યવતી પુત્રી થઈ, જેના રૂપનું વર્ણન કરવા સ્વયં સરસ્વતી પણ અસમર્થ હતી. ॥१२॥

हिन्दी :- उनके यहां एक अनुपम सौंदर्यवती पुत्री जन्मी, जिस के रूप की प्रशंसा करने में स्वयं सरस्वती भी असमर्थ थी ॥१२॥

मराठी :- त्यांना अत्यंत सुंदर एक मुलगी झाली, जिच्या सौंदर्याची प्रशंसा करण्याकरिता स्वतः सरस्वती सुद्धा असमर्थ होती. ॥१२॥

English :- She gave birth to an unprecented, beautiful daughter, of which even *Goddess Saraswati* was unable to have words of praises for such a beautiful.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मन्ये तवङ्गनिर्माणे, धातान्यः कोऽप्यजायत ॥
मृदप्यन्यैव सा काचित्, तूलिकाप्यपरैव सा ॥१३॥

अन्वय :- *तवङ्गनिर्माणे अन्यः कोऽपि धाता अजायत । सा मृद् अपि अन्या एव काचित् । सा तूलिका अपि अपरा, एव मन्ये ॥१३॥*

विवरणम् - *तस्याः अङ्गानि तवङ्गानि । तदङ्गानां निर्माणं तवङ्गनिर्माणं तस्मिन् तवङ्गनिर्माणे तस्याः अवयव निर्माणे । अन्यः अपरः एव कोऽपि धाता ब्रह्मा अजायत । सा मृद् अपि मृत्तिका अपि अन्या एव काचित् आसीत् । सा तूलिका अपि अपरा अन्या एव अभवत् इति अहं मन्ये ॥१३॥*

सरलार्थ :- सा दमयन्ती नाम पुत्रिका अनुपमलावण्यवती आसीत् । अतः तस्याः अवयवनिर्माणे कोऽपि अन्य एव ब्रह्मा अजायत । तथा यया मृदा सा निरमायि सा मृदपि काचित् अन्या एव आसीत् । तथा सा तूलिकाऽपि अपरैव विलक्षणा आसीत् इत्यहं मन्ये ॥१३॥

ગુજરાતી :-તેનું શરીર રચવા માટે પણ કોઈક નવીન વિધાતા જ ઉત્પન્ન થઈ હશે, તેનું શરીર ઘડવા માટે માટી પણ કોઈ બીજી જ જાતની હોવી જોઈએ, અને તૂલિકા પણ કોઈક જૂદા જ પ્રકારની હોવી જોઈએ, એમ હું માનું છું. ॥૧૩॥

हिन्दी :- उसके शरीर की रचना करने के लिए विधाता कोई दूसरा ही उत्पन्न हुआ होगा, मिट्टी भी कोई दूसरे प्रकार की होगी और वह चित्रकार की तुलिका भी अलग प्रकार की होगी ऐसा मैं मानता हूँ ॥१३॥

मराठी :- तिच्या शरीराची रचना करणारा ब्रह्मदेव ही कोणी दुसराच असावा, ती मातीसुध्दा दुसऱ्याच प्रकारची असली पाहिजे, इतकेच नव्हे तर त्या चित्रकाराची कुंचला सुध्दा निराळीच असेल असे मी मानतो. ॥१३॥

English :- The creator who has created this child must have been a different God (creator) who had the skill and power to create such child whose beauty was without compare. The mud too was of a different type and the brush used to paint the complexion must have been of a different type of a rare material.

P.P. Ac. Gunratnasuri M.S.

यदस्या दृश्यते रूपं, न त्रैलोक्येऽपि तादृशम् ॥
न चाप्याकर्ण्यते कर्णे, वर्ण्यते सा कथं ततः ॥१४॥

अन्वय :- यद् अस्याः रूपं दृश्यते तादृशं रूपं त्रैलोक्ये अपि न दृश्यते । कर्णे अपि न आकर्ण्यते ततः सा कथं वर्ण्यते ॥१४॥

विवरणम् - *यद् अस्याः दमयन्त्याः रूपं दृश्यते तद् इव दृश्यते इति तादृशं रूपं तत्सदृशं रूपं त्रयाणां लोकानां समाहारः त्रिलोकी । त्रिलोकी एव त्रैलोक्यं तस्मिन् त्रैलोक्येऽपि त्रिभुवनेऽपि न दृश्यते । तथा कर्णे अपि न आकर्ण्यते न श्रूयते । ततः तस्या रूपस्य दर्शनाऽऽकर्णनाभावात् सा दमयन्ती कथं वर्ण्यते वर्णयितुमशक्या, इत्यर्थः । यतः यस्य रूपं दृश्यते वाऽऽकर्ण्यते या तस्यैव वर्णनं कर्तुं शक्यते । नाऽन्यस्य । अवर्णनीयरूपा सा इत्यर्थः ॥१४॥*

सरलार्थ :- दमयन्त्याः रूपसदृशं रूपं त्रैलोक्येऽपि न दृश्यते । कर्णाभ्यामपि च नाऽऽकर्ण्यते । अतः सा कथं वर्णयितुं शक्यते । साऽवर्णनीया वर्तते ॥१४॥

गुजराती :- ત્રણે લોકમાં ક્યાંયે એના જેવું અનુપમ સૌંદર્ય દેખાતું નથી, તેના વિષે સંભળાતું પણ નથી, તો પછી કન્યાના રૂપનું વર્ણન તો ક્યાંથી થઈ શકે ? ॥૧૪॥

हिन्दी :- तीनो लोक में उनके जैसा अनुपम सौंदर्य न किसीने देखा न सुना, फिर उस कन्या के सौंदर्य का वर्णन कैसे किया जा सकता है ? ॥१४॥

मराठी :- तिच्या सौन्दर्यासारखे सौंदर्य तिन्ही लोकांत कुठेही पाहायला मिळत नाही आणि कानांनी ऐकू येत नाही, मग त्या कन्येचे वर्णन कसे करू शकणार? ॥१४॥

English :- There was not a single person in all the three worlds with such distinguishing beauty and when one hasn't heard about the child, then he or she will be unable to describe the endowing beauty when one hasn't had a glimpse of the child.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ललाटे तिलकस्तस्याः, स कोऽपि सहजः पुनः ॥
भास्वानपि पुरो यस्य, भाति खद्योतपोतवत् ॥१५॥

अन्वय :- तस्याः ललाटे सहजः कोऽपि पुनः तिलकः स्यात् । यस्य पुरः भास्वान् अपि खद्योतपोतवत् भाति ॥१५॥

विवरणम् - *तस्याः दमयन्त्याः ललाटे भालप्रदेशे सह जायते इति सहजः स्वाभाविकः कः अपि पुनः तिलकः स्यात् । यस्य तिलकस्य पुरः अग्रे भास्वान् दिवाकरः अपि खं द्योतयतीति खद्योतः । खद्योतस्य पोतः खद्योतपोतः । खद्योतपोतेन तुल्यं खद्योतपोतवत् । खद्योतइवाऽल्पतेजाः भाति भासते ॥१५॥*

सरलार्थ :- तस्या दमयन्त्या ललाटे सहजः स्वाभाविकः तेजस्वी तिलकः आसीत् । तस्य तिलकस्याऽग्रे भास्वान् सूर्योऽपि खद्योतपोत इवाऽल्पतेजाः भाति ॥१५॥

ગુજરાતી :- વળી તેના લલાટમાં જન્મથી જ કોઈક એવું તેજસ્વી તિલક હતું, જેની આગળ સૂર્ય પણ પતંગિયા જેવો લાગે. ॥૧૫॥

हिन्दी :- उसके जन्म के समय से ही ललाट पर ऐसा तेजस्वी तिलक था कि जिस के आगे सूरज भी जूगनु जैसा लगता है । ॥१५॥

मराठी :- तिच्या जन्मापासूनच तिच्या कपाळावर असा एक तेजस्वी टिळा आहे की ज्याच्यासमोर सूर्यसुद्धा काजव्या प्रमाणे वाटतो.

English :- When the child was born, her forehead seemed so bright and endowing that the sun itself seemed to be mere butterfly in front of it.

गर्भस्थितायां तस्यां च, दमिता दुर्दमा द्विषः ॥
दमयन्तीति तन्नाम, जनकेन व्यधीयत ॥१६॥

अन्वय :- तस्यां गर्भस्थितायां दुर्दमा द्विषः दमिताः । अतः तन्नाम जनकेन दमयन्ती इति व्यधीयत ॥१६॥

विवरणम् - तस्यां कनकायां गर्भे स्थिता गर्भस्थिता तस्यां गर्भस्थितायां सत्यां यदा सा कन्या गर्भे आसीत् तदा दुःखेन दम्यन्ते इति दुर्दमाः दमयितुमशक्याः अपि द्विषः शत्रवः दमिताः । अतः तस्याः नाम तन्नाम जनकेन पित्रा दमयन्ती इति व्यधीयत अक्रियत ॥१६॥

सरलार्थ :- यदा दमयन्ती मातुर्गर्भेऽतिष्ठत् तदा दमयितुमशक्या अपि शत्रवः पित्रा भीमरथेन दमिताः । अतः पित्रा तस्याः कन्यकायाः दमयन्ती इति नाम चक्रे ॥१६॥

ગુજરાતી :-વળી તે કન્યા ગર્ભમાં આવ્યા બાદ રાજાએ દુર્દાંત શત્રુઓને પરાજિત કર્યા, તેથી તેનું 'દમયંતી' નામ પાડ્યું. ॥१६॥

हिन्दी :- जब वह कन्या गर्भ में थी तब राजाने दुर्दांत शत्रुओं को भी पराजित किया । इसलिए उस कन्या का नाम 'दमयंती' रखा ॥१६॥

मराठी :- जेव्हां ती कन्या गर्भात होती तेव्हां राजाने दुर्दांत शत्रूवर सुध्दा विजय मिळविला. म्हणून तिचे नाव 'दमयंती' ठेवण्यात आले. ॥१६॥

English :- When the child was still in the womb, her father had inherited some invisible strength, through which he was able to win over many of invinicible enemies. Due to which she was named Damyanti.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ प्रवर्धमानासौ, राजलोकैः कुतूहलात् ॥
भाष्यते मन्मनालापैः, सभायामपि भूभुजः ॥१७॥

अन्वय :- अथ असौ प्रवर्धमाना भूभुजः सभायामपि राजलोकैः कुतूहलात् मन्मनालापैः भाष्यते ॥१७॥

विवरणम् - अथ प्रवर्द्धतेऽसौ प्रवर्द्धमाना दिने दिने वृद्धिमाप्नुवती असौ दमयन्ती भुवं भुनक्ति भुङ्क्ते वा भूभुक् तस्य भूभुजः नृपस्य सभायां अपि राजानः एव लोकाः राजलोकाः तैः राजलोकैः सभायां वर्तमानैः राजभिः कुतूहलात् कौतूकात् मन्मनाश्च ते आलापाश्च मन्मनालापाः तैः मन्मनालापैः मधुरवचनैः भाष्यते उद्यते ॥१७॥

सरलार्थ :- अनन्तरं दिने दिने प्रवर्धमानाऽसौ दमयन्ती यदा भूभुजः सभायामागच्छत् तदा तत्रापि सा राजलोकैः कुतूहलात् मधुरवचनैः भाष्यते ॥१७॥

ગુજરાતી :-હવે દિનપ્રતિદિન વૃદ્ધિ પામતી દમયંતીને રાજ્ય સભામાં પણ સૌ કુતૂહલથી વ્હાલભર્યા વચને બોલાવે છે. ॥૧૭॥

हिन्दी :- अब (दिनो दिन) बड़ी होती दमयंती को राजसभा के मंत्रीगण कुतूहल से प्यारभरे वचनो से बुलाते हैं ॥१७॥

मराठी :- दिवसेंदिवस मोठी होणाऱ्या दमयंतीला राजसभेतील मंत्रीगण कौतुकाने प्रेमळ शब्दानी बोलवीत होते. ॥१७॥

English :- As the child kept on growing, she won over the hearts of the members of the royal court, who used to talk and greet her in a loving, tender way.

निवेश्यतेऽङ्कपर्यङ्क - मास्यते करपङ्कजे ॥
उल्लापनैर्नवनवै - र्गीयते कलगीतिभिः ॥१८॥

अन्वय :- अङ्कपर्यङ्कं निवेश्यते । करपङ्कजे आस्यते । नवनवैः उल्लापनैः कलगीतिभिः गीयते ॥१८॥

विवरणम् - अङ्कः एव पर्यङ्कः अङ्कपर्यङ्कः तं अङ्कपर्यङ्कं निवेश्यते उपवेश्यते । करः एव पङ्कजं करपङ्कजं तस्मिन् करपङ्कजे हस्तकमले

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आस्यते। नवानि च तानि नवानि च नवनवानि तैः नवनवैः उल्लापन्नैः वचनैः आलापैः कलाश्च ताः गीतयश्च कलगीतयः ताभिः कलगीतिभिः मधुरगीतैः गीयते ॥१८॥

संस्कृतार्थ :- ते राजानः तामङ्के आसयन्। करकमले उपावेशयन्। नवैः नवैः आलापैः मधुरगीतिभिः तामगायन् ॥१८॥

ગુજરાતી :-તે દરબારીઓ તેને પોતાના ઉત્સંગરૂપી પલંગ પર બેસાડે છે, હાથરૂપી કમળ પર ધારણ કરે છે, તથા નવા નવા મનોહર ગીતો તેને સંભળાવે છે. ॥૧૮॥

हिन्दी :- वे मंत्रीगण दमयंती को अपने गोदरूपी पलंग पर बिठाते हैं, हाथरूपी कमल पर धारण कर नयी नयी मनोहर लोरीयां सुनाते हैं। ॥१८॥

मराठी :- ते राजेलोक दमयंतीला आपल्या उत्संगरूपी (मांडीरूपी) पलंगावर बसवून, (हातरूपी) कमलावर धरून, नवनवीन अंगाई गीत तिच्याजवळ गात असत.॥१८॥

English :- The members were very kind and concerned of Damyanti. They used to make her sleep on their laps folded like a softbed and hold her tenderly in their arms folded like a lotus and sing lalaby's for her.

नर्त्यते तालिकातालै - र्मध्यमाङ्गुष्ठवादनैः ॥
दोङ्कारोच्चारपादेन, नृत्य नृत्येति वादिभिः ॥१९॥

अन्वय :- तालिकातालैः मध्यमाऽङ्गुष्ठवादनैः दोकारोच्चारपादेन नृत्य नृत्य इति वादिभिः नर्त्यते ॥१९॥

विवरणम् - तालिकायाः तालानि तालिकातालानि तैः तालिकातालैः तालिकाताडनैः मध्यमा च अङ्गुष्ठश्च मध्यमाङ्गुष्ठौ मध्यमाङ्गुष्ठयोः वादनानि मध्यमाङ्गुष्ठवादनानि तैः मध्यमाङ्गुष्ठवादनैः (चुटकीवादनैः) दोङ्कारमुच्चारयतीति दोङ्कारोच्चारः। दोङ्कारोच्चारश्चासौ पादश्च दोङ्काराच्चारपादः तेन दोङ्कारोच्चारपादेन नृत्य नृत्य इति वादिभिः सा नर्त्यते ॥१९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- तत्र सा राजलोकैः तालिकाताडनैः मध्यमाङ्गुष्ठवादनैः दोष्टारच्चारपादेन नृत्य नृत्य इति वादिभिः नर्त्यते ॥१९॥

ગુજરાતી :-'થઈ થઈ...તુ નાચ ! નાચ !' એમ બોલતા તે દરબારીઓ તાળીઓના તાલે, તથા વચલી આંગળી અને અંગૂઠા વડે ચીપટી વગાડીને તેણીને નચાવે છે. ॥૧૯॥

हिन्दी :- 'थइ, थइ, तु नाचा तु नाचा' ऐसा बोलते हुए वे राजलोग तालीओं के ताल बजा कर, और बीच की उंगली और अंगूठे से चूटकी बजा कर उसे नचाते हैं ॥१९॥

मराठी :- 'थइ, थइ, तुं नाचा नाचा' असे म्हणत् ते राजेलोक टाळ्याच्या तालावर तसेच मधल्या बोटानी आणि अंगठयानी चुटकी वाजवीत तिला नाचवीत होते. ॥१९॥

English :- They used to clap their hand on a specific rythem and ask her to dance and snapping their fingers used to make her dance.

इत्थं सौभाग्यवन्द्रिः सा, स्वयं सौभाग्यसेवधिः ॥
नानाविधाभिः क्रीडाभिः, क्रीड्यते स्म स्मितानना ॥२०॥

अन्वय :- स्वयं सौभाग्यसेवधिः स्मितानना सा सौभाग्यवन्द्रिः नानाविधाभिः क्रीडाभिः क्रीड्यते स्म ॥२०॥

विवरणम् - स्वयं शोभनं भगः यस्य सः सुभगः सुभगस्य भावः सौभाग्यं सौभागस्य सेवधिः निधिः सौभाग्यसेवधिः सौभाग्यनिधानं स्मितं आननं यस्याः सा स्मिताननना सहासमुखी दमयन्ती सौभाग्यं येषां अस्ति इति सौभाग्यवन्तः तैः सौभाग्यवन्द्रिः सौभाग्यशालिभिः राजलोकैः नाना विविधाः विधाः यासां ताः नानाविधाः ताभिः नानाविधाभिः विविधप्रकाराभिः क्रीडाभिः क्रीड्यते रम्यते स्म ॥२०॥

सरलार्थ :- सा दमयन्ती स्वयं सौभाग्यस्य निधिः आसीत् । स्मिताननना चाऽभवत् । अतः सा सौभाग्यवन्द्रिः पुरुषैः नानाविधाभिः क्रीडाभिः लीलाभिः क्रीड्यते स्म ॥२०॥

ગુજરાતી :-એવી રીતે જન્મથી જ સૌભાગ્યના નિધાનસરખી, તથા હાસ્યયુક્ત મુખવાળી એવી દમયંતીને ભાગ્યશાળી રાજપુરુષો જાતજાતની ક્રીડાઓથી રમાડે છે. ॥૨૦॥

हिन्दी :- इस प्रकार जन्म से भाग्यवान तथा हास्ययुक्त मुखवाली दमयंती को भाग्यशाली राजपुरुष अनेक प्रकार की क्रीडा से खिलाते है ॥२०॥

मराठी :- अशाप्रकारे जन्मापासूनच भाग्यशाली आणि हास्ययुक्त मुखवटा असलेल्या दमयंतीला अनेक राजपुरुष नाना प्रकारची क्रीडा करून खेळवीत असत. ॥२०॥

English :- In this way, the fortunate royal courtiers had an opportunity to play about with the fortunate and ever-smiling Damyanti.

कलाग्रहणकाले च, बालां पार्थिवपुङ्गवः ॥
कलाचार्यं समाकार्य, तां कलानिधिरार्पयत् ॥२१॥

अन्वय :- *कलाग्रहणकाले कलानिधिः पार्थिवपुङ्गवः कलाचार्यं समाकार्य तां बालां आर्पयत् ॥२१॥*

विवरणं - *कलायाः कलानां वा ग्रहणं कलाग्रहणं कलाग्रहणस्य कालः कलाग्रहणकालः तस्मिन् कलाग्रहणकाले, विद्याभ्याससमये । कलानां निधिः कलानिधिः कलानिधानं पृथिव्याः ईश्वराः पार्थिवाः राजानः पार्थिवेषु पुङ्गवः श्रेष्ठः पार्थिवपुङ्गवः राजश्रेष्ठः भीमरथो राजा कलानाम् आचार्यः कलाचार्यः तं कलाचार्यं कलागुरुं समाकार्य आहूय तां दमयन्तीं बालां तस्मै आर्पयत् ॥२१॥*

सरलार्थ :- कलाग्रहणकाले कलानिधिः राजश्रेष्ठः भीमरथः कलाचार्यं आहूय तां दमयन्तीं बालां कलाग्रहणार्थं तस्मै समार्पयत् ॥२१॥

ગુજરાતી :-પછી કલાઓનો અભ્યાસ કરવાના સમયે, કલાના ભંડાર સમા તે મહાન રાજાએ કલાચાર્યને બોલાવીને તે બાલિકાને સોંપી. ॥૨૧॥

हिन्दी :- फिर कला का अभ्यास कराने के समय कलाओं के भंडार समझे जानेवाले ऐसे उस महान राजाने कलाचार्य को बुलाकर

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बालिका को सौंप दिया॥ ॥२१॥

मराठी :- नंतर कलेचा अभ्यास करण्याच्या वेळी, कलांचे भांडार समजल्या जाणाऱ्या महान राजाने कलाचार्यांना बोलावून त्यांना बालिका सोपविली. ॥२१॥

English :- When Damyanti came of age and was ready to take in the arts of studies, her great father who knew the meaning of being educated, placed her in the hands of a learned man, to teach her all the seventy two arts.

तदीयहृदयादर्शे, सङ्क्रान्ताः सत्वरं कलाः ॥
कलाचार्यः कलानां तु, केवलं दर्शकोऽभवत् ॥२२॥

अन्वय :- तदीयहृदयादर्शे सत्वरं कलाः सङ्क्रान्ताः । कलाचार्यः तु, केवलं कलानां दर्शकः अभवत् ॥२२॥

विवरणम् :- *तस्याः इवं तदीयं । तदीयं च तद् हृदयं च तदीयहृदयं । तदीयहृदयं एव आदर्शः दर्पणः तदीयहृदयादर्शः, तस्मिन् तदीयहृदयादर्शे तस्याः स्वान्तदर्पणे त्वरया सह यथा स्यात् तथा सत्वरं शीघ्रं झटिति कलाः सङ्क्रान्ताः प्रतिबिम्बिताः । कलानां आचार्यः कलाचार्यः तु केवलं कलानां दर्शकः अभवत् न पाठकः इत्यर्थः ॥२२॥*

सरलार्थ :- तस्याः स्वान्तदर्पणे शीघ्रं कलाः प्रतिबिम्बिताः । कलाचार्यः कलानां केवलं दर्शकः अभवत् ॥२२॥

गुजराती :-તેના હૃદયરૂપી આરીસામાં કલાઓએ તુરત પ્રવેશ કર્યો, કલાચાર્ય તો ફક્ત તેના માર્ગદર્શક જ બન્યા. ॥૨૨॥

हिन्दी :- उसके हृदयरूपी दर्पण में कलाओं ने तुरंत ही प्रवेश कर लिया, कलाचार्य तो उसे केवल कला दिखानेवाले ही रह गये। ॥२२॥

मराठी :- तिच्या हृदयरूपी आरशात कलांनी लवकरच प्रवेश केला, कलाशिक्षक तर तिला केवळ कला दाखविणारेच झाले. ॥२२॥

P.P.Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Damyanti had a fantastic grasping power. She used to capture all the teachings in her heart which was like a mirror. The teacher had absuloutly no problem in teaching her. He remained just a mere informer of the information imparted.

पुरापि कृतधर्मत्वाद्, बाला सुलभबोधिका।
धर्माचार्यं समासाद्य, सद्यः सम्यक्त्वमासदत् ॥२३॥

अन्वय :- पुराअपि कृतधर्मत्वाद् बाला सुलभबोधिका अभवत्। धर्माचार्यं समासाद्य सद्यः सम्यक्त्वं आसदत् ॥२३॥

विवरणम् - पुराअपि पूर्वस्मिन् जन्मनि अपि कृतः धर्मः यया सा कृतधर्मा। कृतधर्मायाः भावः कृतधर्मत्वं तस्मात् कृतधर्मत्वात् पूर्वं तया धर्मः कृतः आसीत् तस्मात् सा बाला दमयन्ती सुखेन लभ्यते इति सुलभः। सुलभः बोधः यस्याः सा सुलभबोधिका अभवत्। धर्मस्य आचार्यः धर्माचार्यः तं धर्माचार्यं समासाद्य सम्प्राप्य सा सद्यः शीघ्रं सम्यक्त्वं बोधिबीजं आसदत् प्राप्नोत् ॥२३॥

सरलार्थ :- पूर्वस्मिन् जन्मनि अपि बाला धर्माराधनां कृतवती आसीत्। तेन सुलभबोधा अभवत्। धर्माचार्यस्य समीपं गत्वैव शीघ्रं सम्यक्त्वं प्राप्तवती ॥२३॥

ગુજરાતી :-પૂર્વે પણ ધર્મારાધના કરી હોવાથી દમયંતી સુખરૂપ પ્રતિબોધ પામી. પછી ધર્માચાર્યનો સમાગમ થવાથી તે સમ્યક્ત્વ પામી. ॥૨૩॥

हिन्दी :- पहले भी उसने धर्माराधना की थी, उसके कारण दमयंती सुख और समाधान से प्रतिबोधित हुई, फिर धर्माचार्य का सहवास होने से वह सम्यक्त्व को प्राप्त हुई ॥२३॥

मराठी :- पूर्वी धर्मआराधना केल्यामुळे ती बालिका दमयंती सुखासमाधानाने ज्ञान प्राप्त करीत होती, नंतर धर्माचार्यांचे सान्निध्य प्राप्त झाल्यामुळे ती सम्यक्त्वाला प्राप्त झाली. ॥२३॥

English :- In the beginning too Damyanti had praticed religion in her past life which, she had attained ample

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

of happiness and vigil. And by her prudence and attaining knowledge from the teachers she wholly and entirely dipped herself into the practices and customs of jain religion. (Smayaktva)

ततः कर्मप्रकृत्यादौ, शास्त्रौघे दुर्गमेऽपि च ॥
बोधी च बोधयित्री च, साभूदद्भुतबुद्धिभाक् ॥२४॥

अन्वय :- ततः अद्भुतबुद्धिभाक् सा कर्मप्रकृत्यादौ दुर्गमे अपि शास्त्रौघे बोधी च बोधयित्री च अभूत् ॥२४॥

विवरणम् - ततः अद्भुता चासौ बुद्धिश्चाद्भुतबुद्धिः । अद्भुतबुद्धिं भजति इति अद्भुतबुद्धिभाक् । अद्भुतबुद्धिशालिनी सा बाला कर्मणां प्रकृतिः कर्मप्रकृतिः। कर्मप्रकृतिः आदौ यस्य सः कर्मप्रकृत्यादिः तस्मिन् कर्मप्रकृत्यादौ ।

दुःखेन गम्यते ज्ञायते इति दुर्गमः तस्मिन् दुर्गमे दुर्ज्ञेये अपि शास्त्राणां ओघः शास्त्रौघः तस्मिन् शास्त्रौघे शास्त्रसमूहे विविधशास्त्रेषु बोधी ज्ञात्री बोधयित्री ज्ञापयित्री च अभूत् अभवत् बभूव । सा दुर्गमाणि शास्त्राणि स्वयं अबुध्यत् अपश्यत् अपि च अबोधयत् ॥२४॥

सरलार्थ :- ततः अद्भुतबुद्धिशालिनी सा दमयन्ती कर्मप्रकृत्यादिषु दुर्गमेषु विविधशास्त्रेषु ज्ञात्री ज्ञापयित्री च अभूत् ॥२४॥

गुजराती :-પછી કર્મપ્રકૃતિ આદિ દુર્ગમ શાસ્ત્રોના સમૂહમાં પણ જાણકાર, તથા બીજાને પણ બોધ આપી શકે એવી દમયંતી આશ્ચર્યકારક બુદ્ધિશાળી થઈ. ॥૨૪॥

हिन्दी :- फिर कर्मप्रकृति आदि दुर्गम शास्त्रसमूह की जानकार, और दूसरों को भी बोध देनेवाली, ऐसी दमयंती आश्चर्यकारक बुद्धिशाली बन गई ॥२४॥

मराठी :- नंतर कर्मप्रकृति आदि दुर्गम शास्त्रांच्या समूहांना जाणणारी, आणि (दुसऱ्यांना पण) बोध देणारी अशी ही दमयंती आश्चर्यकारक बुद्धिशाली बनली. ॥२४॥

English :- Then in duecourse, Damyanti become the most suprising and brillant person to have attained the knowledge of the different books of Karmaprakruti and the difficult talks and speeches, on literature. She become so brillant that she was not only able to grasp knowledge faster but also had the tact to impart it to others.

प्रव्रज्यामथ सच्चर्यां, तया चार्थयमानया ॥
जनिता जनकस्यापि, जिनधर्मे परामतिः ॥२५॥

अन्वय :- अथ प्रवज्यां सच्चर्यां च अर्थयमानया तया जनकस्य अपि जिनधर्मे परामतिः जनिता ॥२५॥

विवरणम् - अथ अनन्तरं प्रवज्यां दीक्षां, सती चासौ चर्या च सच्चर्या तां सच्चर्या च अर्थयमानया इच्छन्त्या अभिलषन्त्या वा तया दमयन्त्या जनकस्य भीमरथस्य अपि जिनस्य धर्मः जिनधर्मः तस्मिन् जिनधर्मे परा उत्कृष्टा मतिः बुद्धिः जनिता उत्पादिता ॥२५॥

शब्दार्थ :- अथ दीक्षां सच्चर्यां अभिलषन्त्या तया दमयन्त्या जनकस्य भीमरथस्य अपि जिनधर्मे उत्कृष्टा मतिः कारिता ॥२५॥

गुजराती :-પછી ઉત્તમ આચારવાળી દીક્ષા લેવા માટે પ્રાર્થના કરતી દમયંતીએ પોતાના પિતામાં પણ જૈન ધર્મ પર ઉત્કૃષ્ટ રુચિ ઉત્પન્ન કરી. ॥૨૫॥

हिन्दी :- फिर उत्तम आचरणयुक्त दीक्षा लेने के लिए प्रार्थना करती ऐसी दमयंतीने अपने पिता में भी जैनधर्म के प्रति उत्कृष्ट रूचि उत्पन्न की॥ ॥२५॥

मराठी :- उत्तम आचरण असलेल्या आणि दीक्षा घेण्याकरिता प्रार्थना करणाऱ्या दमयंतीने आपल्या वडिलांची जैनधर्माप्रती रुचि उत्पन्न केली. ॥२५॥

English :- Then Damayanti, the girl who had a spotless character, had aspiring thoughts to become a priestess and also built in the liking and taste towards the jain religion in her father.

P. 10158

तद्भावरञ्जिता तस्यै, देवी निर्वृतिरार्पयत् ॥
दिव्याम् हिरण्मयीं शान्तेः, प्रतिमां भाविनोऽर्हत : ॥२६॥

अन्वय :- तद्भावरञ्जिता निर्वृतिःदेवी भाविनः अर्हतः शान्तेः दिव्यां हिरण्यमयीं प्रतिमां तस्यै आर्पयत् ॥२६॥

विवरणम् :- तस्याः भावः तद्भावः । तद्भावेन रञ्जिता तद्भावरञ्जिता तस्याः भावमवलोक्य प्रसन्ना, इत्यर्थः, निर्वृत्तिः देवी भाविनः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भविष्यतः अर्हतः तीर्थङ्करस्य भगवतः शान्तिनाथस्य दिव्यां विधि भवां हिरण्यमयीं सुवर्णमयीं प्रतिमां तस्यै बालायै आर्पयत् अवदात् ॥२६॥

सरलार्थ :- तद्भावरञ्जिता निर्वृतिः देवी दिव्यां हिरण्यमयीं भावितीर्थङ्करस्य शान्तिनाथस्य प्रतिमां तस्यै दमयन्त्यै आर्पयत् ॥२६॥

ગુજરાતી :-તેના ભાવથી ખુશી થઈ નિર્વૃતિ નામની દેવીએ તેને ભવિષ્યકાળમાં થનારા શ્રી શાંતિનાથભગવાનની સુવર્ણમય દિવ્ય પ્રતિમા અર્પણ કરી. ॥૨૬॥

हिन्दी :- उसके भाव से खुश हो कर निर्वृति नामक देवी ने उसे भविष्य में होने वाले श्री शांतिनाथभगवान की सुवर्णमय दिव्य प्रतिमा प्रदान की ॥२६॥

मराठी :- तिच्या उत्कृष्ट भावाने खुश झालेल्या निर्वृतिनावाच्या देवीने तिला भविष्यात होणाऱ्या श्री शांतिनाथ देवाची दिव्य प्रतिमा अर्पण केली. ॥२६॥

English :- Due to her utmost faith in religion, a Goddess named Nivruthti, being pleased, presented her a celestial and supernatural golden idol of the future Lord Shantinath.

अभाणीच्च यथा वत्से, पूज्येयमनिशं त्वया ॥
चिन्तामणिमिवासाद्य, सापि तां नित्यमर्चति ॥२७॥

अन्वय :- अभाणीच्च यथा वत्से चिन्तामणिम् इव आसाद्य त्वया अनिशम् इयं पूज्या सा अपि तां नित्यं अर्चति ॥२७॥

विवरणम् :- अभाणीत् च अवादीत् वत्से चिन्तामणिं रत्नम् इव आसाद्य प्राप्य त्वया अनिशम् अहर्निशम् इयं शान्तिनाथप्रतिमा पूज्या पूजनीया। सा दमयन्ती अपि तां शान्तिनाथप्रतिमां नित्यम् अर्चति। पूजयति ॥२७॥

सरलार्थ :- सा निवृत्तिदेवी अवादीत् - वत्से दमयन्ति! चिन्तामणिरत्नम् इव त्वया अहर्निशम् इयं प्रतिमा पूज्या। सा दमयन्ती अपि तां शान्तिनाथप्रतिमां नित्यम् अर्चति ॥२७॥

ગુજરાતી :-તથા તે દેવી એ કહ્યું કે, 'હે વત્સે ! આ પ્રતિમાનું તારે હમેશાં પૂજન કરવું.' દમયંતી પણ ચિંતામણિરત્ન સરખી તે પ્રતિમા મેળવીને તેની હમેશાં પૂજા કરવા લાગી. ॥૨૭॥

हिन्दी :- फिर उस देवी ने उसे कहा कि, 'हे वत्से! इस प्रतिमा का हमेशा पूजन करना।' दमयंती भी चिंतामणिरत्न समान वह प्रतिमा प्राप्त कर के उसकी हमेशा पूजा करती है ॥२७॥

मराठी :- नंतर ती देवी तिला म्हणाली की, हे वत्से! या प्रतिमेची नेहमी पूजा कर, ती दमयंती पण चिंतामणिरत्न समान ती प्रतिमा मिळवून नेहमी पूजा करीत असे. ॥२७॥

English :- Then the Goddess addressing her as a child asked her to worship the idol of the Lord. Then with utter concentration, like a Chitamani precjous stone she used to worship the idol of Lord Shantinath with great devotion and wholeheartedly.

अथ सा यौवनं प्राप, लीलाललितसुन्दरम् ॥
परिवर्तस्तनोर्यत्र, जन्मान्तरगताविव ॥२८॥

अन्वय :- अथ सा लीलाललितसुन्दरं यौवनं प्राप। यत्र जन्मान्तरगतौ इव तनोः परिवर्तः भवति ॥२८॥

विवरणम् :- अथ अनन्तरं सा दमयन्ती लीलया ललितं मनोहरं लीलाललितम्। लीलाललितं च तद् सुन्दरं च लीलाललितसुन्दरं यौवनं प्राप आप। यत्र यस्मिन् यौवने अन्यत् जन्म जन्मान्तरं। जन्मातरे गतिः जन्मातरगतिः तस्यां जन्मातरगतौ भवान्तरगतौ इव तनोः शरीरस्य परिवर्तः परिवर्तनं भवति। यथा यदा जीवः जन्मान्तरं गच्छति तदा शरीरस्य परिवर्तनं भवति तथैव यदा यौवनमायाति तदा शरीरपरिवर्तनं भवति ॥२८॥

सरलार्थ :- अथ सा दमयन्ती लीलाललितसुन्दरं यौवनं प्राप। यस्मिन् यौवने भवान्तरगतौ इव शरीरस्य परिवर्तनं भवति ॥२८॥

ગુજરાતી :-પછી દમયંતી ક્રીડાપૂર્વક મનોહર સૌંદર્યયુક્ત યૌવનવયને પ્રાપ્ત થઈ, કે જે યૌવનવયમાં ભવાંતરની ગતિની જેમ શરીરસંબંધી ફેરફાર થાય છે. ॥૨૮॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

हिन्दी :- फिर वह दमयंती क्रीडापूर्वक मनोहर सौंदर्यवाले योवन को प्राप्त हुई, जिस यौवनवय में भवांतर गति के समान शरीर में परिवर्तन होता है ॥२८॥

मराठी :- नंतर ती दमयंती क्रीडापूर्वक मनोहर सौंदर्य असलेल्या तारुण्याला प्राप्त झाली, ज्या यौवनात भवांतरगति प्रमाणे शरीरात हळू हळू बदल होतो. ॥२८॥

English :- Then Damyanti in no time at all became an adult. Just as a person changes its form from one life to another, in the same way Damyanti was changed, i.e. - from childhood to adulthood as time passed and in no time at all.

व्यमुञ्चेतां पदाम्भोजे, तरङ्गतरलां गतिम् ॥
सहेलं प्रतिपेदाते, लोचनेन्दिवरे पुनः ॥२९॥

अन्वय :- पदाम्भोजे तरङ्गतरलां गतिं व्यमुञ्चेतां लोचनेन्दिवरे पुनः तरङ्गतरलां गतिं सहेलं प्रतिपेदाते ॥२९॥

विवरणम् :- *तं शरीरपरिवर्तनं कविः वर्णयति पदौ अम्भोजे कमले इव पदाम्भोजे चरणकमले तरङ्गवत् तरला तरङ्गतरला तां तरङ्गतरलाम् ऊर्मिचञ्चलां गतिं व्यमुञ्चेताम् अत्यजताम् । चरणौ शैशवे वर्तमानां चञ्चलां गतिमत्यजताम् । लोचने एव इन्दिवरे लोचनेन्दिवरे नेत्रकमले पुनः तां तरङ्गतरलां गतिं हेलया सह यथा स्यात् तथा सहेलं सलीलं प्रतिपेदाते स्वीचक्राते । चरणाभ्यां त्यक्तां चञ्चलां गतिं लोचने लीलया प्रतिपेदाते । यौवने लोचने चञ्चले भवतः ॥२९॥*

सरलार्थ :- चरणकमले तरङ्गचञ्चलां गतिं अत्यजताम् । नेत्रकमले पुनः तां तरङ्गतरलां गतिं सलीलं स्वीचक्राते ॥२९॥

ગુજરાતી :-તેના ચરણકમલોએ જલતરંગસમાન ચંચલગતિનો ત્યાગ કર્યો, પરંતુ તેનાં નેત્રોરુપી કમલોએ આનંદપૂર્વક તે ચંચલગતિનો સ્વીકાર કર્યો. ॥૨૯॥

हिन्दी :- उसके चरणकमलो जलतरंग समान चंचल गति का त्याग किया, लेकिन उसके नेत्ररूपी कमलोने आनंदपूर्वक उस चंचलगति का स्वीकार किया ॥२९॥

मराठी :- तिच्या पदकमलांनी जलतरंगाप्रमाणे चंचलगतीचा त्याग केला, परंतु तिच्या नेत्ररुपी कमलांनी आनंदपूर्वक त्या चंचलगतीचा स्वीकार केला. ॥२९॥

English :- When Damyanti was a child, she had a volatile and a skittish nature just as the linsome, unsteady waves of the sea. But now, she having grown into an adult, she is no longer of a childish nature but, now her eyes have accepted the volatile and skitish nature of childhood. This shows that she was and will always be of a childish nature. The difference is just, it has just shifted from the playful way of childhood to the tactful eyes of adulthood.

अत्याक्षीत्तानवं श्रोणी, मध्यभागस्त्वसेवत ॥
दधौ वक्षः कुचद्वैत - मद्वैतं पुनराननम् ॥३०॥

अन्वय :- श्रोणी तानवम् अत्याक्षीत् । मध्यभागः तु तानवम् असेवत । वक्षः कुचद्वैतं दधौ आननं पुनः अद्वैतं दधौ ॥३०॥

विवरणम् :- श्रोणी नितम्बः तानवं तनोः भावः तानवं सूक्ष्मत्वम् अत्याक्षीत् तत्याज । मध्यश्चासौ भागश्च मध्यभागः कटिप्रदेशः तानवं कृशत्वम् असेवत । वक्षः कुचयोः स्तनयोः द्वैतं द्वयं कुचद्वैतं दधौ अधारयत् । आननं मुखं पुनः अद्वैतम् अनौपम्यं दधौ अदधात् ॥३०॥

सरलार्थ :- नितम्बः कृशत्वं अत्यजत् कटिप्रदेशः तद् तानवम् असेवत । वक्षः स्तनद्वयम् अधारयत् आननम् अनुपमं सुन्दरम् अभवत् ॥३०॥

ગુજરાતી :-તેના નિતંબોએ સૂક્ષ્મપણાનો ત્યાગ કર્યો, પરંતુ તેણીના કટીભાગે તે સૂક્ષ્મપણાનો સ્વીકાર કર્યો, વળી તેની છાતીએ બે સ્તનોરૂપી દ્વૈતભાવને ધારણ કર્યો, જ્યારે તેના મુખે અદ્વૈતભાવનો (અનુપમપણાનો) સ્વીકાર કર્યો. ॥૩૦॥

हिन्दी :- उसके नितंबोने सूक्ष्मता का त्याग किया, लेकिन उसके कटीभाग ने उस सूक्ष्मता का स्वीकार किया, फिर उनके वक्षःस्थलने दो स्तनोरूपी द्वैतभावको धारण किया, जब की उसके मुख ने अद्वैतभाव का (अनुपमता का) स्वीकार किया ॥३०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- तिच्या जितंबांनी सूक्ष्मपणाचा त्याग केला, परंतु कटीप्रदेशाने सूक्ष्मपणाचा स्वीकार केला, मग तिच्या छातीने दोन स्तनरूपी द्वैतभावाला धारण केले आणि तिच्या चेहऱ्याने अद्वैतभावाचा (अनुपम सौंदर्याचा) स्वीकार केला. ॥३०॥

English :- When she was a child she had pair of small buttucks. But now as she has grown, her buttucks has increased in size which means, she is no longer a child, but an adult. Her waist too has decreased in size, which also is the sign of a good-figured adult, Initially she was flat-chested, but as she grew into an adult, her breast has incerased in size and has attained duality, while her face has become extremely beautiful and beyond anyone's comparision, thus attaining monotheism.

साऽङ्गन्यासैः कुमारीणां, बिभर्त्यालेख्यमात्रताम् ॥
युवतीनां तु मृद्नाति, रूपगर्वततेरपि ॥३१॥

अन्वय :- सा अङ्गन्यासैः कुमारीणाम् आलेख्यमात्रतां बिभर्ति । रूपगर्वततेः अपि युवतीनां तु मृद्नाति ॥३१॥

विवरणम् :- - सा दमयन्ती अङ्गानाम् अवयवानां न्यासाः अङ्गन्यासाः तैः अङ्गन्यासैः अवयवन्यासैः कुमारीणां कन्यकानां शरीरं आलेख्यमात्रतां चित्ररूपतां बिभर्ति धारयति किन्तु युवतीनां रूपस्य गर्वाः रूपगर्वाः रूपगर्वाणां ततिः श्रेणिः रूपगर्वततिः तस्याः रूपगर्वततेः अपि मृद्नाति चूर्णीकरोति ॥३१॥

सरलार्थ :- सा दमयन्ती अङ्गन्यासैः कुमारीणां चित्रमात्रतां बिभर्ति । युवतीनां तु रूपगर्वश्रेणिम् अपि मृद्नाति चूर्णीकरोति ॥३१॥

ગુજરાતી :-દમયંતી પોતાનાં અંગોપાંગોનાં ઘાટ વડે કુમારિકાઓનાં શરીરને તો ફક્ત ચિત્રરૂપે જ ધારણ કરે છે, અને યુવાન સ્ત્રીઓનાં રૂપનાં ગર્વની હારમાળાને તો તે કચડી જ નાખે છે. ॥૩૧॥

हिन्दी :- दमयंती अपने अंगोपांग के घाट से कुंवारी कन्याओं के शरीर को केवल चित्रसमान धारण करती है और युवान स्त्रीओं के रूप के गर्व की कतार को कुचल डालती है ॥३१॥

मराठी :- ती दमयंती आपल्या शरीरच्या अंगोपांगानी कुमारी कन्यांच्या शरीराला केवल चित्ररूपाप्रमाणे धारण करते आणि तरुण

स्त्रियांचा रूपा बद्दल असलेला गर्व चिरडून टाकते. ॥३१॥

English :- Damyanti used to with the parts of her body which had attained youth, defy all the spinsters with her uncomparable beauty which used to look like mere pictures in front of her. While the girls who used to really have beauty still could not stand the glare of Damyanti's beauty as she was far beynd's anyone's comparision.

ततस्तां तादृशीं बालां, विलोक्याचिन्तयत्पिता ॥
अहो असदृशं रूपं, क्वैतस्याः सदृशो वरः ॥३२॥

अन्वय :- ततः तादृशीं तां बालां विलोक्य पिता अचिन्तयत् अहो असदृशं रूपम्। एतस्या सदृशः वरः क्व मिलिष्यति ॥३२॥

विवरणम् :- *- ततः तदनन्तरं सा इव दृश्यते इति तादृशी तां तादृशीम् अनुपमलावण्यवतीं तां बालां दमयन्तीं विलोक्य निरीक्ष्य पिताभीमरथः अचिन्तयत् व्यचारयत् - अहो! आश्चर्यम्! न विद्यते सदृशं यस्य तद् असदृशम् असमानं निरुपमं - रूपं एतस्याः दमयन्त्याः सदृशः समान वरः क्व मिलिष्यति, इति ॥३२॥*

सरलार्थ :- तादृशीं रूपयौवनसम्पन्नां ता बालां दमयन्तीं विलोक्य पिता भीमरथः अचिन्तयत् अहो। अस्या निरुपम रूपं। एतस्याः अनुरूपः वर क्व प्राप्यते ॥३२॥

ગુજરાતી :-દમયંતીને જોઈને તેના પિતા વિચારવા લાગ્યા કે, અહો! આ દમયંતીનું રૂપ તો અનુપમ છે ! એને યોગ્ય પતિ ક્યાંથી મળી શકશે ? ॥૩૨॥

हिन्दी :- दमयंती को देखकर, उसके पिताने विचार किया कि, अहो! इस दमयंती का रूप तो अनुपम है, फिर उसके अनुरूप वर कहां मिल सकेगा ? ॥३२॥

मराठी :- नंतर अश्याप्रकारच्या त्या दमयंती बालिकेला पाहून तिच्या वडिलांनी विचार केला की अहो। या दमयंतीचे सौंदर्य तर अवर्णनीय आहे। तर तिच्यासारखा योग्य वर कोठून मिळणार? ॥३२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then seeing at this utmost beautiful Damyanti, her father exclaimed that it would be tough to find an handsome husband to match his matchless Damyanti.

ततो विवाहनेऽमुष्या, अयोग्यवरयोजनात् ॥
माभूज्जनापवादो मे, तत्करोमि स्वयंवरम् ॥३३॥

अन्वय :- ततः अमुष्याः विवाहने अयोग्यवरयोजनात् मे जनापवादो मा अभूत् तत् स्वयंवरम् करोमि ॥३३॥

विवरणं :- ततः तस्मात् अमुष्याः दमयन्त्याः विवाहने लग्ने न योग्यः अयोग्यः । अयोग्यश्चासौ वरश्चाऽयोग्यवरः अयोग्यवरस्य योजनम् अयोग्यवरयोजनं तस्मात् अयोग्यवरयोजनात् मे मम जनानाम् अपवादः निन्दा जनापवादः मा अभूत् न भवतु । तत् तस्मात् कारणात् अहं तस्याः दमयन्त्याः स्वयं व्रियते वरः यस्मिन् स स्वयंवरः तं स्वयंवरं करोमि ॥३३॥

सरलार्थ :- ततः अमुष्या दमयन्त्या विवाहने अयोग्यवरसम्बन्धात् मम जनापवादः मा अभूत् । इति अहं तस्याः दमयन्त्याः स्वयंवरं करोमि ॥३३॥

ગુજરાતી :-અયોગ્ય વર સાથે સંબંધ કરવાથી જગતમાં મારો અપવાદ ન થાય માટે આ દમયંતીનો વિવાહ કરવા માટે હું સ્વયંવરમંડપની રચના કરું. ॥૩૩॥

हिन्दी :- यदि दमयंती का विवाह अयोग्य वर के साथ हो गया तो सारे जगत में मेरा अपवाद हो जायेगा, इसलिए मैं स्वयंवरमंडप की रचना करता हूं ॥३३॥

मराठी :- जर या दमयंतीचा विवाह अयोग्य वराशी झाला तर संपूर्ण जगात माझी नालस्ती होईल, म्हणून मी दमयन्तीचे स्वयंवरच करतो. ॥३३॥

English :- He thought to himself that, he would be degraded if would give his daughter to a man who doesnt befit her, so he thought of hoving a *swayamwar*

स्वेच्छया वरणे तत्र, न दोषः कश्चनापि मे ॥
आजूहवत्ततो दूतैः, सर्वतोऽपि स राजकम् ॥३४॥

अन्वय :- तत्र स्वेच्छया वरणे मे कश्चन अपि दोषः न स्यात् । ततः सः सर्वतः दूतैः राजकम् आजूहवत् ॥३४॥

विवरणम् :- *तस्मिन् स्वयंवरे स्वस्य निजस्य इच्छा स्वेच्छा तया स्वेच्छया वरणे मे मम कश्चन अपि दोषः न भवति । ततः तदनन्तरं स भीमरथः नृपः सर्वतः सर्वेभ्यः स्थानेभ्यः दूतैः सन्देशवाहकैः राज ज्ञां समूहः राजकं राजसमूहं आजूहवत् आकारयत् ॥३४॥*

सरलार्थ :- - तस्मिन् स्वयंवरे स्वेच्छया वरस्य वरणे मम कः अपि दोषः न स्यात् एव । इति विचिन्त्य सः भीमरथनृपः सर्वतः दूतैः राजकम् आहूवत् ॥३४॥

ગુજરાતી :-(કેમ કે) તે સ્વયંવરમંડપમાં પોતાની મરજી મુજબ વરને વરે તો મારા પર કોઈ પણ દોષ નહીં આવે, એમ વિચારી રાજાએ તમામ દિશાઓમાં દૂતો મોકલી રાજાઓના સમુદાયને બોલાવ્યો. ॥૩૪॥

हिन्दी :- (क्यों कि) उस स्वयंवरमंडप में खुद की इच्छा से अनुरूप वर के चुनने से मुझ पर कोई भी दोष नही आयेगा. (ऐसा सोचकर) राजाने सभी राज्यों में दूतों को भेजकर राजाओं के समूह को बुलाया ॥३४॥

मराठी :- (कारण) त्या स्वयंवरमंडपात स्वत:च्या मर्जीप्रमाणे योग्य वराला निवडल्यास माझ्यावर कोणत्याही प्रकारचा दोष येणार नाही. (असा विचार करून) मग त्या राजाने सर्व राज्यात दूतांना पाठवून राजांच्या समूहाला बोलाविले. ॥३४॥

English :- So that, he will not have a blemish of having appointed an unfit man for Damyanti, as she herelf will choose a man of her choice. So he sent ambassadors to all the kingdoms far and wide to invite the kings for the reception.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तद्राजपुत्रीसौभाग्य - गुणवागुरया धृतम् ।
मन्मथव्याधभल्लीभिः, शल्यमानं समन्ततः ॥३५॥
विवाहामन्त्रणागीती - विवशीभूतमानसम् ॥
आगमत्तत्र वेगेन, मृगयूथमिवाखिलम् ॥३६॥ युग्मम् ॥

अन्वय :- तद् राजपुत्रीसौभाग्यगुणवागुरया धृतं मन्मथव्याध भल्लीभिः शल्यमानं विवाहामन्त्रणागीति - विवशीभूतमानसम् अखिलं राजकन्तत्र मृगयूथम् इव समन्ततः वेगेन आगमत् ॥३६॥

विवरणम् :- *राज्ञः पुत्री राजपुत्री । राजपुत्र्याः सौभाग्यं राजपुत्रीसौभाग्यम् । राजपुत्रीसौभाग्यमेव गुणः (रज्जुः) राजपुत्रीसौभाग्यगुणः। सौभाग्यगुणग्रथिता वागुरा (जालं) सौभाग्यगुणवागुरा, तया सौभाग्यगुणवागुरया राजपुत्रीसौभाग्यगुणजालेन धृतं, मन्मथः कामदेवः एव व्याधः मन्मथव्याधः मन्मथव्याधस्य भल्लयः मन्मथव्याधभल्लयः, ताभिः, मन्मथ- व्याधभल्लीभिः शल्यमानं पीड्यमानं, विवाहस्य लग्नस्य आमन्त्रणा विवाहामन्त्रणा, विवाहामन्त्रणा एव गीतिः विवाहमन्त्रणागीतिः । न विवशम् अविवशम् अविवशं विवशं भूतं-विवशीभूतं विवाहामन्त्रणागीत्या विवशीभूतं विवाहमन्त्रणागीतिविवशीभूतं विवाहमन्त्रणागीतिविवशीभूतं मानसं यस्य तद् विवाहमन्त्रणागीतिविवशीभूतमानसं, राज्ञां समूहः राजकं । तद् अखिलं राजकं तदखिलराजकं तस्मिन् स्वयंवरे मृगाणां यूथं मृगयूथं, मृगसमूह इव वेगेन शीघ्रगत्या समन्ततः आगमत् ॥३६॥*

सरलार्थ :- राजपुत्र्याः दमयन्त्याः सौभाग्यगुणजालेन धृतं (बद्धम्) कामभल्लीभिः समन्ततः पीड्यमानं विवाहामन्त्रणागीतिविवशीभूतमानसं तदखिलं राजकं जालबद्धं व्याधभल्लीभिः समन्ततः पीड्यमानं गीतेन विवशीभूतमानसं मृगयूथमिव वेगेन तत्राऽऽगमत् ॥३६॥

ગુજરાતી :- પછી તે રાજકન્યાના સૌભાગ્યરૂપી ગુણથી (દોરીથી) ગૂંથેલી જાળમાં ફસાયેલું, કામદેવરૂપી શિકારીનાં બાણોથી વિંધાયેલું તથા વિવાહ માટેનાં આમંત્રણરૂપી ગાયનથી પરવશ થયેલાં મનવાળું, તે સઘળું રાજમંડળ મૃગોનાં ટોળાંની પેઠે ચારેકોરથી ઝપાટાબંધ ત્યાં દોડી આવ્યું! ॥૩૬॥

हिन्दी :- फिर उस राजकन्या के सौभाग्यरूपी गुण से (दोरी से) बूनी हुई जालमें फसे, कामदेवरूपी शिकारी के बाणों से घायल और

P.P. Ac. Gupratnasuri M.S. Jun Gun Aaradhak Trust

विवाह के आमंत्रणरूपी गायन से परवश मनवाला, वह पूरा राजमंडल हिरणो की टोली के समान चारों ओर से शीघ्र वहां दौड आया ॥३६॥

मराठी :- नंतर त्या राजकन्येच्या सौभाग्यरूपी गुणांनी (पक्षे - दोरींनी) गुंथलेल्या जाळ्यात फसलेला, आणि कामदेवरूपी शिकाऱ्याच्या बाणांनी जखमी झालेला, आणि विवाहाच्या आमंत्रणरूपी गायनांनी परवश झालेल्या मनाचा, असा हा सगळा राजसमूह हरिणाच्याटोळीप्रमाणे चोहोकडून वेगाने तिथे पावत आला. ॥३६॥

English :- The auspiciousness of Damyanti has created a trap in which all the princeses are being trapped and became dependent by the rythemic words of the proposal, and are injured by the arrow of Cupid. They came running from all directions just as a group of deer runs in all directons.

Note - This shows there is no difference between the deer and men. To trap a deer easily one should have luring music, a trap and an arrow. In the same way the princes are trapped by the luring music of the proposal, the trap are the auspicious qualities of Damyanti and the arrow is the arrow let out by cupid.

तवैक्ष्वाको महासत्त्व - स्तत्त्ववेदी कलानिधिः ॥
रूपन्यक्कृतकन्दर्प - स्तत्रायासीन्नलोऽपि च ॥३७॥

अन्वय :- तदा ऐक्ष्वाकः महासत्त्वः तत्त्ववेदी कलानिधिः रूपन्यक्कृतकन्दर्पः नलः अपि तत्र अयासीत् ॥३७॥

विवरणम् :- *तदा तस्मिन् समये इक्ष्वाकोः गोत्रापत्यं पुमान् ऐक्ष्वाकः इक्ष्वाकुकुलोत्पन्नः महत् सत्त्वं बलं पराक्रमः यस्य सः महासत्त्वः तत्त्वं वेत्तीत्येवंशीलः तत्त्ववेदी कलानां निधिः कलानिधिः कलागारः रूपेण न्यक्कृतः तिरस्कृतः रूपन्यक्कृतः। रूपन्यक्कृतः कन्दर्पः अन्यथः येन सः रूपन्यक्कृतकन्दर्पः नलः नृपः अपि तत्र तस्मिन् स्वयंवरे आयासीत् आगमत् ॥३७॥*

सरलार्थ :- तस्मिन् समये ऐक्ष्वाकः महापराक्रमः तत्त्ववेदी कलानिधिः रूपेण तिरस्कृतकन्दर्पः नलनृपः अपि तस्मिन् स्वयंवरे आयासीत्

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :-તે વખતે ઈક્ષ્વાકુ વંશમાં જન્મેલો, મહાપરાક્રમી, તત્ત્વોને જાણનારો, કલાઓનો ભંડાર, અને રૂપ વડે કામદેવને પણ મહાત કરનારો નળરાજા પણ ત્યાં આવ્યો. ॥૩૭॥

हिन्दी :- उस समय इक्ष्वाकु वंश का, महापराक्रमी, तत्त्वों का ज्ञानी, कला-निधान नलराजा, जो सौंदर्य स्पर्धामें कामदेव को भी परास्त कर सकता है, वह भी वहां आया ॥३७॥

मराठी :- त्या वेळेला इक्ष्वाकुवंशात जन्मलेला, महापराक्रमी, तत्त्वज्ञ आणि विविध कलागुणांचे भांडार असलेला व आपल्या सौंदर्याने कामदेवावर पण मात करणारा तो नलराजा पण तेथे आला. ॥३७॥

English :- During the ancestry of the Ishvaku, a king named Nal was born who had attained the knowledge of all arts, and of all the hypothesis and was very valiant and intrepid, and whose beauty and handsomeness even defeated the beauty of Cupid, also arrived there for the swayamwar.

विदर्भपतिना सर्वे, ते कृतप्रतिपत्तयः ॥
आवासाना वसन्तिस्म, कुण्डिनस्य चतुर्दिशम् ॥३८॥

अन्वय :- विदर्भपतिना कृतप्रतिपत्तयः ते सर्वे कुण्डिनस्य चतुर्दिशम् आवासान् आवसन्ति स्म ॥३८॥

विवरणम् :- विदर्भाणां पतिः विदर्भपतिः तेन विदर्भपतिना। भीमरथेन नृपेण कृता प्रतिपत्तिः सत्कारः येषां ते कृतप्रतिपत्तयः कृतसन्मानाः कृतसत्काराः ते सर्वे राजानः कुण्डिनस्य नगरस्य चतसृणां दिशां समाहारः चतुर्दिशं रचितां आवासान् आवसन्ति स्म ॥३८॥

सरलार्थ :- भीमरथनृपेन कृतसन्मानाः ते सर्वे राजानः कुण्डिननगरस्य चतुर्दिशम् आवासान् आवसन्ति स्म ॥३८॥

ગુજરાતી :-વિદર્ભદેશના ભીમરથ રાજાએ પધારેલા સર્વ રાજાઓનું સન્માન કર્યું, તે સર્વ રાજાઓ, કુંડિનપુરની ચારે દિશાઓમાં

બનાવેલા આવાસોમાં ઊતર્યા. ॥૩૮॥

हिन्दी :- विदर्भ देश के भीमरथ राजाने आये हुए सब राजाओं का सन्मान किया और वे सब कुंडिनपुरकी चारों दिशा में स्थित आवासोमें रहने लगे ॥३८॥

मराठी :- तेव्हा विदर्भदेशाच्या भीमरथ राजाने आलेल्या सर्व राज्यांचा सन्मान केला आणि ते सर्व राजे कुंडिनपुरच्या चारही दिशांना असलेल्या निवासस्थानात राह् लागले. ॥३८॥

English :- The King of the state of Vidarbha in a city of Kudunpur king Bhimrath had treated the kings with great respect and also with great pomp and style, and invited them to stay in the different guest houses in the different directions.

कार्यते स्म महाकायः, स्वयंवरणमण्डपः ॥
सुधर्मायाः प्रतिच्छन्द, इवातिक्रान्तवर्णनः ॥३९॥

अन्वय :- सुधर्मायाः प्रतिच्छन्द इव अतिक्रान्तवर्णनः महाकायः स्वयंवरमण्डपः कार्यते स्म ॥३९॥

विवरणम् :- सुधर्मायाः इन्द्रसभायाः प्रतिच्छन्दः प्रतिकृतिः इव वर्णनं अतिक्रान्तः अतिक्रान्तवर्णनः वर्णनातिगः महान् कायःयस्य सः महाकायः स्वयंवराय मण्डपः स्वयंवरमण्डपः कार्यते स्म ॥३९॥

सरलार्थ :- इन्द्रसभायाः प्रतिकृतिः इव अतिक्रान्तवर्णनः अत्यन्तशोभनीयो विराट् स्वयंवरमण्डपः कार्यते स्म ॥३९॥

ગુજરાતી :-સુધર્માસભાના પ્રતિબિંબ જેવો, તથા જેનું વર્ણન પણ ન થઈ શકે એવો વિશાલ સ્વયંવરમંડપ રચવામાં આવ્યો. ॥૩૯॥

हिन्दी :- सुधर्मासभा के प्रतिबिंब समान, तथा जिस का वर्णन भी न हो सके, ऐसा विशाल स्वयंवर-मण्डप बनाया गया ॥३९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- सुधर्मासभेच्या प्रतिबिंबासारखे आणि ज्याचे वर्णन करता येत नाही असा विशाल स्वयंवरमंडप रचण्यात आला. ॥३९॥

English :- Just as the royal court of Sudharma (Indra) this Swayamvar of Damyanti was arranged which was a way beyond compare.

मञ्चास्तस्मिन्नकार्यन्त, स्वर्विमानोपमानिनः ॥
ज्योतिर्जलसरांसीव, रत्नसिंहासनानि च ॥४०॥

अन्वय :- तस्मिन् स्वर्विमानोपमानिनः मञ्चाः अकार्यन्त। ज्योतिर्जलसरांसीव रत्नसिंहासनानि अकार्यन्त ॥४०॥

विवरणम् :- तस्मिन् स्वयंवरमण्डपे स्वः विमानानि स्वर्विमानानि स्वर्विमानानि उपमानानि येषां सन्ति इति स्वर्विमानोपमानिनः स्वर्विमानसदृशाः मञ्चाः अकार्यन्त। ज्योतिषा युतानि जलसरांसि ज्योतिर्जलसरांसि इव रत्नानां सिंहासनानि रत्नसिंहासनानि अकार्यन्त ॥४०॥

संस्कृतार्थ :- तस्मिन् स्वयंवरमण्डपे स्वर्गस्य विमानोपमानिनः विमानसदृशाः मञ्चाः अकार्यन्त ज्योतिर्जलसरांसि इव रत्नसिंहासनानि च अकार्यन्त ॥४०॥

ગુજરાતી :- તે મંડપમાં દેવવિમાનો જેવી ખુરશીઓ ગોઠવવામાં આવી, અને તેજરૂપી જળનાં સરોવર જેવાં રત્નોનાં સિંહાસનો રચવામાં આવ્યાં. ॥૪૦॥

हिन्दी :- उस मंडप में देवविमान के समान कुर्शीयां और तेजरूपी जल के सरोवर समान रत्नों के सिंहासन रचाए गये ॥४०॥

मराठी :- त्या मंडपात देवविमानासारख्या खुर्च्या ठेवण्यात आल्या, आणि तेजरूपी जलाच्या सरोवराप्रमाणे रत्नजडित सिंहासनाची रचना करण्यात आली. ॥४०॥

English :- In the royal court, the stage was arranged like a celestial aeroplane, viman and just as the brightness of the water that seems like gems spread on it, the thrones were prepared with such likeness with gems studded on it.

तत्रास्यत नृपैर्भूषा - रत्नभर्त्सितरोहणैः ॥
स्वस्वकान्त्या प्रसर्पन्त्या, तीरयब्धिरिवापरान् ॥४१॥

अन्वय :- तत्र भूषारत्नभर्त्सितरोहणैः प्रसर्पन्त्या स्वस्वकान्त्या अपरान् नीरयब्धिः इव नृपैः आस्यत ॥४१॥

विवरणम् :- *तत्र तस्मिन् स्वयंवरमण्डपे भूषासु अलङ्कारेषु जडितानि रत्नानि भूषारत्नानि । भूषारत्नैः भर्त्सितः तिरस्कृतः रोहणः रोहणरत्नाचलः यैः ते भूषारत्नभर्त्सितरोहणाः तैः भूषारत्नभर्त्सितरोहणैः । प्रसर्पन्त्या स्वस्त्या स्वस्य कान्तिः स्वस्वकान्तिः तया स्वस्वकान्त्या अपरान् अन्यान् तीरयब्धिः आच्छादयद्भिः इव नृपैः राजभिः आस्यत उपाविश्यत ॥४१॥*

संस्कृतार्थ :- तस्मिन् स्वयंवरमण्डपे अलङ्कारेषु जडितैः रत्नैः रत्नाचलं तिरस्कुर्वद्भिः, प्रसर्पन्त्या स्वस्वकान्त्या अपरान् आच्छादयद्भिः इव नृपैः आस्यत उपाविश्यत ॥४१॥

ગુજરાતી :- આભૂષણોમાં શોભતા રત્નો વડે રોહણાચલ પર્વતને પણ શરમાવે એવા, તથા પોતપોતાની વિસ્તાર પામતી કાંતિ વડે એકબીજાને આંજી નાખવાની સ્પર્ધા કરતા હોય એવા રાજાઓ તે મંડપમાં બેઠા ગયા. ॥૪૧॥

हिन्दी :- आभूषणोमें जड़े हुए रत्नोसे रोहणाचल पर्वत को भी शरमाए और अपनी-अपनी बढ़ती हुई कांति से मानो एकदूसरे को आच्छादित करते हुए राजाओने उस मंडपमें आ कर अपना स्थान ग्रहण किया । ॥४१॥

मराठी :- आभूषणात असलेल्या रत्नांनी रोहणाचल पर्वताचा तिरस्कार करणारे आणि स्वत:च्या विस्तारलेल्या कांतान जणू एकमेकांना आच्छादित करणारे राजे त्या मंडपात येऊन बसले. ॥४१॥

English :- The gems which were studded on the ornaments of the kings and princeses (who were seated) were more brighter and more attractive than the mount of gems (Rohanachal). And the lustre and gloss of the ornaments over-shadowed them mutually.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अत्रान्तरे स्फुरद्दिव्य - ज्योतिस्तिलकभूषिता ।।
प्राचीवाभ्रविनिर्मुक्त - रविबिम्बमनोहरा ।।४२।।

अन्वय :- अभ्रनिर्मुक्तरविबिम्बमनोहरा प्राची इव स्फुरद्दिव्यज्योतिस्तिलकभूषिता दमयन्ती मण्डपं समागमत् ।।४२।।

विवरणम् :- अभ्रेभ्यः मेघेभ्यः विनिर्मुक्तम् अभ्रविनिर्मुक्तम् । रवेः बिम्बं रविबिम्बम् । अभ्रविनिर्मुक्तम् च तद् रविबिम्बं च तद् अभ्रविनिर्मुक्तरविबिम्बं तेन । मनः हरति इति मनोहरा प्राची इवा स्फुरत् च तद् दिव्यं च स्फुरद्दिव्यज्योतिस्तिलकः । तेन भूषिता स्फुरद्दिव्यज्योतिस्तिलकभूषिता दमयन्ती मण्डपं समागमत् ।।४२।।

सरलार्थ :- यथा मेघविनिर्मुक्तेन सूर्यबिम्बेन प्राची दिग् मनोहरा वर्तते तथैव स्फुरद्दिव्यज्योतिषा तिलकेन मनोहरा दमयन्ती सभामण्डपं समागमत् ।।४२।।

ગુજરાતી :- એવામાં વાદળોમાંથી નીકળેલા સૂર્યના બિમ્બથી મનોહર થયેલી પૂર્વદિશાની પેઠે વિસ્તાર પામતા દિવ્ય તેજવાળા તિલકથી અલંકૃત થયેલી દમયંતી સભામંડપમાં આવી પહોંચી. ।।૪૨।।

हिन्दी :- इतने में बादलों से नीकले हुए सूर्यबिंब से सजी हुई पूर्व दिशा की तरह बढ़ते हुए दिव्य तेजवाले तिलक से अलंकृत दमयंती सभामंडप में आ पहुंची ।।४२।।

मराठी :- इतक्यात ढगांतून मुक्त झालेल्या सूर्यबिंबामुळें मनोहर दिसणाऱ्या पूर्व दिशेप्रमाणे कपाळावरील दिव्य तेज असलेल्या तिलकामुळे शोभणारी दमयन्ती सभामंडपात आली. ।।४२।।

English :- Just then the sun which had just come out of the clouds in the east, seemed so majestic and alluring and so bright. In the same way the diadem on the forehead seemed so bright and ornated, like the sun.

पूर्णेन्दुः पूर्णमासीव, हर्षपूरोज्ज्वलानना ॥
वर्षाश्रीरिव सुस्निग्ध - समुन्नतपयोधरा ॥४३॥

अन्वय :- पूर्णेन्दुः पूर्णमासीव हर्षपूरोज्ज्वलानना सुस्निग्ध-समुन्नतपयोधरा वर्षाश्रीः श्व सुस्निग्धसमुन्नत पयोधरा दमयन्तीमण्डपं समागमत् ॥४३॥

विवरणम् :- पूर्णः इन्दुः चन्द्रः यस्यां सा पुर्णेन्दुः पूर्णचन्द्रा । पूर्णः मासः यस्यां सा पूर्णमासी पौर्णिमा इव हर्षस्य आनन्दस्य पूरः हर्षपूरः । हर्षपूरेण उज्ज्वलं आननं यस्याः सा हर्षपूरोज्वलानना- आनन्दपूरविकसन्मुखी, सुष्ठु स्निग्धाः सुस्निग्धाः, सुस्निग्धाश्च ते समुन्नताश्च सुस्निग्धसमुन्नताः पयोधराः मेघाः यस्यां सा सुस्निग्धसमुन्नतपयोधरा वर्षायाः श्रीः वर्षाश्रीः इव सुष्ठु स्निग्धौ सुस्निग्धौ । सुस्निग्धौ च तौ समुन्नतौच सुस्निग्धसमुन्नतौ । सुस्निग्धसमुन्नतौ पयोधरौ स्तनौ यस्याः सा सुस्निग्धसमुन्नतपयोधरा सुस्निग्ध - समुन्नत - स्तना दमयन्ती मण्डपं समागमत् ॥४३॥

सरलार्थ :- यथा पूर्णेन्दुः पौर्णिमा तदैव हर्षेण उज्ज्वलानना, यथा वर्तते । वर्षाश्रीः समुन्नतसुस्निग्धमेघा वर्तते । तथा सुस्निग्धसमुन्नतस्तना दमयन्ती मण्डपं समागमत् ।

ગુજરાતી :- સંપૂર્ણ ચંદ્રવાળી પૂનમની પેઠે હર્ષના સમૂહથી ઉજ્જ્વલ મુખવાળી, વર્ષાકાળના વાદળોની જેમ શોભતા ઉન્નત સ્તનોવાળી દમયન્તી સભામંડપમાં આવી. ॥૪૩॥

हिन्दी :- पूनम के संपूर्ण चंद्रसमान हर्ष के समूह से उज्ज्वल मुखवाली, वर्षाकाल के बादलों के समान उन्नत स्तनोवाली दमयन्ती सभामंडप में आ पहुंची ॥४३॥

मराठी :- ज्या प्रमाणें पौर्णिमा पूर्ण चन्द्रामुळे हर्षभरित व उज्ज्वलानना दिसते त्या प्रमाणे हर्षभराने प्रफुल्लित मुख झालेली व वर्षाऋतूची शोभा ज्या प्रमाणे आकाशात उंचावर चढलेल्या स्निग्ध मेघांनी खुलुन दिसते त्या प्रमाणे उठावदार स्निग्ध स्तनांनी शोभून दिसणारी दमयन्ती स्वयंवर मंडपात आली. ॥४३॥

English :- Just as on the full-moon day, the moon seems so bright, in the same way Damyanti enters the hall

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

smiling and bright as the moon. And just as the splendour and the magnificence of the moonsoons, the breast seems so flexible and so flabby.

आताम्रनयनापाङ्ग - पाणिपादरदच्छदा ॥
कङ्केल्लितरुशाखेव, प्रोल्लसन्नवपल्लवा ॥४४॥

अन्वय :- प्रोल्लसन्नवपल्लवा कङ्केल्लितरुशाखेव आताम्रनयनापाङ्गपाणिपादरदच्छदा दमयन्ती मण्डपं समागच्छत् ॥४४॥

विवरणम् :- *नवाश्च ते पलवाश्च नवपल्लवाः। प्रोल्लसन्तः प्रकर्षेण उल्लसन्तः नवपल्लवाः नवकिसलयानि यस्यां सा प्रोल्लसन्नवपल्लवा कङ्केलिश्चासौ तरुश्च कङ्केलितरुः कङ्केलितरोः शाखा कङ्केलितरुशाखा अशोकवृक्षशाखा इव आसमन्तात् ताम्रं आताम्रं नयनयोः अपाङ्गे नयनापाङ्गेः नयनापाङ्गेच पाणी च हस्तौच पादौ चरणौच रदच्छेदौ औष्ठौच एतेषां समाहारः नयनापाङ्गपाणिपादरदच्छदम् । आताम्रं नयनापाङ्गपाणिपादरदच्छदं यस्याः सा आताम्रनयनापाङ्गपाणिपादरदच्छदा दमयन्ती मण्डपं समागमत् ॥४४॥*

संस्कार्य :- यथा प्रोल्लसद्भिः आताम्रैः नवकिसलयैः अशोकतरुशाखा शोभते तथैव आसमन्तात् ताम्रैः नयनापाङ्गपाणिपादौष्ठैः विराजमाना दमयन्ती सभामण्डपं समागमत् ॥४४॥

ગુજરાતી :- પ્રગટપણે જેના નવીન કુંપળો વિસ્તાર પામેલાં છે, એવી અશોકવૃક્ષની શાખાની પેઠે લાલ રંગના આંખોના છેડા, હાથ, પગ તથા હોઠ જેના એ, ॥૪૪॥

हिन्दी :- प्रकट रूपसे विस्तारित है नये अंकुर जिसमें ऐसी अशोकवृक्ष की शाखा के समान लाल रंग की है जिसकी आंखो की किनारी, हाथ, पैर और दांत जिसके ऐसी, ॥४४॥

मराठी :- नुकत्याच प्रकट झालेल्या लाल लाल नवीन अशी अशोकवृक्षाच्या शाखेप्रमाणे जिच्या ओळ्याचा कडा लाल आहे, तसेच हात, पाय आणि ओठ ही लाल आहेत. अशी ती ॥४४॥

P.P. Ac. Gunratnasuri M.S. Jun Gyanmandir

English :- Her hands, legs and the edge of the eyes are red as ever just as the new sprouted leaves of the branches of the Ashoka tree which are red when sprouted.

मुक्तालङ्कारसाराङ्गी, फुल्ल्लत्पुष्पेव मल्लिका ॥
संवीतविशदाच्छादा, द्यौरिवात्तशरद्घना ॥४५॥

अन्वय :- फुल्लपुष्पा मल्लिका इव मुक्तालङ्कारसाराङ्गी आत्तशरद्घना द्यौः इव संवीतविशदाच्छादा दमयन्ती सभामण्डपं समागच्छत् ॥४५॥

विवरणम् :- फुल्लन्ति विकसन्ति पुष्पाणि यस्यां सा फुल्लत्पुष्पा मल्लिका इव मुक्तानाम् अलङ्काराः मुक्तालङ्काराः मुक्तालङ्कारैः सारं श्रेष्ठं अङ्गं यस्याः सा मुक्तालङ्कारसाराङ्गी। शरदि घनाः शरद्घनाः। आत्ताः गृहीताः शरद्घनाः यया सा आत्तशरद्घना द्यौः इव विशदश्चासौ आच्छादश्च विशदाच्छादः । संवीतः विशदाच्छादः श्वेतवसनं यया सा संवीतविशदाच्छादा परिहितश्वेतवसना दमयन्ती मण्डपं समागता ॥४५॥

सरलार्थ :- मुक्तालङ्कारैः शोभमाना अत एव फुल्लत्पुष्पा मल्लिका इव भासमाना श्वेतवस्त्रपरिधानेन शरदृतेः आवृता द्यौः इव विराजमाना दमयन्ती मण्डपं समागमत् ॥४५॥

गुजराती :- વિકાસ પામેલાં પુષ્પોવાળી જાણે માલતીલતા હોય નહીં તેમ મોતીઓના આભૂષણોથી અત્યંત મનોહર શરીરવાળી, શરદ ઋતુના વાદળાંઓથી છવાયેલાં આકાશની પેઠે જેણે શ્વેતરંગની સાડી પહેરી છે એ, ॥૪૫॥

हिन्दी :- विकसित हुए फुलोंवाली मालतीलता हो वैसे मोतीओं के अंलकारो से मनोहर शरीरवाली, शरद ऋतु के बादलों से जैसे आकाश छा जाता है उसी तरह जिसने श्वेतरंग की साडी पहनी है ऐसी, ॥४५॥

मराठी :- उमलणाऱ्या फुलांनी शोभणाऱ्या मोगऱ्याच्या लतेप्रमाणे मोत्यांच्या अलंकारांनी सुंदर बनलेल्या शरीराने शोभणारी व शरद ऋतूतील मेघरूपी वस्त्र नेसलेल्या आकाशाप्रमाणे श्वेतवस्त्र परिधान केलेली दमयन्ती सभामण्डपात आली.॥४५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- The pearl ornaments on the body seemed like the creeper (Maltilata) decked on her and the white saree on herbody seemed like the white sky with no clouds during the autumn season.

लक्षं कटाक्षकोटीनां, कुर्वती मञ्च - भूभुजः।।
अब्धिवेलेव लहरी - शीकराणां - दिशां पतीन् ।।४६।।

अन्वय :- दिशां - पतीन् लहरीशीकराणां लक्षं कुर्वती अब्धिवेला इव मञ्चभूभुजः कटाक्षकोटीनां लक्षं कुर्वती दमयन्ती सभामण्डपं समागमत् ।।४६।।

विवरणम् :- दिशां पतीन् दिक्पालान् लहरीणां तरङ्गाणां शीकराः तुषारकणाः लहरीशीकराः तेषां लहरीशीकराणां तरङ्गतुषारकणानां लक्षं कुर्वती अब्धेः वेला अब्धिवेला समुद्रवेला इव भुवं भुअन्ति भुञ्जते वा भूभुजः राजानः मञ्चस्थाः भूभुजः मञ्चभूभुजः तान् मञ्चभूभुजः मञ्चस्थभूपतीन् मञ्चोपविष्टान् राज्ञःकटाक्षाणां कोट्यः कटाक्षकोट्यः तासां कटाक्षकोटीनां कोटिकटाक्षाणां इत्यर्थः लक्षं कुर्वती कोटिकटाक्षैः पश्यन्ती दमयन्ती मण्डपं समागमत्

सरलार्थ :- यथा समुद्रवेला दिक्पतीन् लहरीशीकराणां लक्षं करोति तथैव मञ्चोपविष्टान् नृपान् कोटिकटाक्षाणां लक्षं कुर्वती दमयन्ती मण्डपं समागमत् ।।४६।।

ગુજરાતી :- મહાસાગરની વીર (વેળ) મોજાંઓનાં જલકણો ફેંકીને જેમ દિગ્પતિઓને ચીંધી ચીંધીને મારે છે તેમ ખુરશીઓ પર બેઠેલા રાજાઓને પોતાના કોંડોગણા કટાક્ષો મારીને વીંધતી, ।।४६।।

हिन्दी :- महासागर का किनारा मोंजों के जलकण फेंककर जैसे दिग्पतिओं को चींध चींधकर मारते है वैसे ही कुर्सीओ पर बैठे हुए राजा खुद के क्रोडो कटाक्ष मारकर बींधती,।।४६।।

मराठी :- ज्याप्रमाणें समुद्राचा तट लाटांच्या तुषार कणांनीं दिक्पतींना लक्ष्य बनवितो. त्याप्रमाणें आपल्या कोटयवधी नेत्र कटाक्षांनीं मंचावर बसलेल्या राजांना घायाळ करणारी दमयन्ती सभामंडपात आली. ।।४६।।

English :- When there is an an high-tide in an ocean, the water rises, and big tidal waves are formed. And when the sun is about to set, it seems that, at the horizon, the big tidal waves are aiming and literally throwing itself on the Sun. In the same way, Damyanti's tactful eyes are literally throwing glimpses at each and every seated king or prince as she enters, and seems that with every steady look throws many signs of love.

अखण्डयन्ती तताज्ञां, मण्डयन्ती च मण्डपम् ।।
उत्कण्ठयन्ती भूपालान्, दमयन्ती समागमत् ।।४७।।

अन्वय :- तताज्ञां अखण्डयन्ती मण्डपं मण्डयन्ती भूपालान् उत्कण्ठयन्ती दमयन्ती समागमत् ।।४७।।

विवरणम् :- तातस्य पितुः आज्ञा ताताज्ञा, तां ताताज्ञां पितुः आज्ञां न खण्डयन्ती अखण्डयन्ती। मण्डपं मण्डयन्ती भूषयन्ती भूपालान् उत्कण्ठयन्ती उत्कान् कुर्वती दमयन्ती समागमत् ।।४७।।

संस्कृतार्थ :- पितुः आज्ञाम् अखण्डयन्ती मण्डपं भूषयन्ती नृपान् उत्कण्ठयन्ती दमयन्ती समागमत् ।।४७।।

ગુજરાતી :- પિતાની આજ્ઞાનું ખંડન નહીં કરતી, તથા તે સ્વયંવરમંડપને શોભાવતી, અને રાજાઓને ઉત્કંઠિત કરતી દમયન્તી ત્યાં આવી. ।।४७।।

हिन्दी :- पिता की आज्ञा का खंडन किये बिना, और उस स्वयंवरमंडप की शोभा वढाती ऐसी दमयन्ती (उस स्वयंवरमंडप में) आयी ।।४७।।

मराठी :- पित्याच्या आज्ञेचे खंडन न करता, स्वयंवरमंडपाला शोभवीत आणि राजांची उत्कंठा वाढवीत दमयन्ती त्या स्वयंवरमंडपात आली. ।।४७।।

English :- Respecting & honouring her father's wishes and increasing the splendour and grand of the swayamwar, Damyanti enters the hall.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वृष्ट्वा तां भूभृतस्तेऽपि, सर्वेऽपि युगद्व्यधुः ॥
वशीकर्तुं बहून् काम - विकारान् कार्मणोपमान् ॥४८॥

अन्वय :- ते सर्वे अपि भूभृतः तां: दृष्टवा युगपत् वशीकर्तुं कार्मणोपमान् बहून कामविकरान् व्यधुः ॥

विवरणम् :- ते सर्वे अपि भुवं बिभ्रतिइतिभूभृतः राजानः तां दमयन्तीं दृष्ट्वा अवलोक्य युगपत् एकस्मिन्नेव समये एकदा एव न वशा अवशा। अवशां वशां कर्तुं वशीकर्तुं कार्मणं वशीकरणं उपमा येषां ते कार्मणोपमा मास्तान् कार्मणोपमान् वशीकरणसदृशान् बहून् बहुलान् कामस्य विकाराः कामविकाशः तान् कामविकारान् कामचेष्टाः व्यधुः अकुर्वन् ॥४८॥

सरलार्थ :- ते सर्वे अपि राजानः तां दमयन्ती निरीक्ष्य एकस्मिन् एव समये वशीकर्तुं वशीकरणसदृशान् बहुलान् कामविकारान् कामचेष्टाः अकुर्वन् ॥४८॥

ગુજરાતી :- તેણીને જોઈને તે સર્વે રાજાઓ પણ એને વશ કરવા માટે કામણ સરખી ઘણી કામચેષ્ટાઓ કરવા લાગ્યા. ॥४८॥

हिन्दी :- उसे देखकर वे सर्व राजा अपने पर काबू पाकर दमयन्ती को वश में करने के लिए कामचेष्टा करने लगे। ॥४८॥

मराठी :- तिला पाहून ते सर्व राजे दमयंतीला वश करण्याकरिता एकाच वेळी अनेक कामचेष्टा करू लागले. ॥४८॥

English :- Seeing her all the kings and princes, keeping a good control on themselves and start beckoning her with the act of bewitching or impressing her intensely.

अन्तःपुरप्रतीहारी, ततः पुत्र्याः पितुर्गिरः ॥
आरेभे गदितुं भूप - स्वरूपपरिकीर्तनम् ॥४९॥

अन्वय :- ततः अन्तःपुरप्रतिहारी पुत्र्याः पितुर्गिरः भूपस्वरूपकीर्तनं गदितुम् आरेभे ॥४९॥

विवरणम् :- ततः तदनन्तरं अन्तःपुरस्य प्रतिहारी द्वारपालिका, अन्तःपुरप्रतिहारी पुत्र्याः दमयन्त्याः पितुः जनकस्य गिरः वचनात्

भुवं पान्ति इति भूपाः भूपानां स्वरूपाणि भूपस्वरूपाणि। भूपस्वरूपाणां परिकीर्तनं भूपस्वरूपपरिकीर्तनं गदितुं कथयितुं आरेभे प्रारब्धवती ॥४९॥

सरलार्थ :- तत्पश्चात् अन्तः पुरस्य द्वारपालिका पुत्र्याः दमयन्त्याः जनकस्य वचनात् भूपस्वरूपकीर्तनं कर्तुं आरेभे ॥४९॥

ગુજરાતી :- પછી અંત:પુરની પ્રતિહારી દમયંતીના પિતાની આજ્ઞાથી તે રાજાઓનાં વૃત્તાંતનું વર્ણન કરવા લાગી. ॥૪૯॥

हिन्दी :- फिर अन्तःपुरकी प्रतिहारी दमयन्ती के पिता की आज्ञा से उन राजाओं के स्वरूप का वर्णन करने लगी॥४९॥

मराठी :- नंतर अन्तःपुराची द्वारपालिका दमयन्तीच्या वडिलांच्या आज्ञेवरून त्या राजांच्या स्वरूपाचे वर्णन करू लागली. ॥४९॥

English :- The chambermaid with the permission of the king entered along with Damyanti and started introducing the kings and princes one by one.

अयं काशीपतिः रम्ये! रणस्फूर्जद्भुजाबलः।
यद्यशस्तटिनी गङ्गाव्याजात् त्रिपथवाहिनी ॥५०॥

अन्वय :- *हे रम्ये! रणस्फूर्जद्भुजाबलः अयं काशीपतिः अस्ति। यद्यशस्तटिनी गङ्गाव्याजात् त्रिपथवाहिनी अस्ति ॥५०॥*

विवरणम् :- *हे रम्ये! सुन्दरि दमयन्ति! रणे युद्धे स्फूर्जद् रणस्फूर्जद्। भुजयोः बलं भुजाबलम्। रणस्फूर्जद् भुजाबलं यस्य स रणस्फूर्जद्भुजाबलः अयं काश्याः पतिः काशीपतिरस्ति। यस्य यशो यद्यशः। यद्यश एव तटिनी नदी यद्यशस्तटिनी। गङ्गायाः व्याजो मिषं गङ्गाव्याजस्तस्मात् गङ्गाव्याजात् गङ्गामिषात्। त्रयाणां पथां समाहारस्त्रिपथम्। त्रिपथेन वहतीत्येवंशीला त्रिपथवाहिनी अस्ति। यथा गङ्गा त्रिभिः पथिभिर्वहति। तथैवाऽस्य काशीराजस्य यशोनदी त्रिभुवनवाहिनी वर्तते। तेनेयं गङ्गा न परं तन्मिषात् काशीराजयशोनद्येव वहतीत्यर्थः ॥५०॥*

सरलार्थ :- हे सुन्दरि! अयं यस्य भुजाबलं समराङ्गणे स्फूर्जति स काशीपतिरस्ति। तस्य यशस्तटिनी गङ्गामिषात् त्रिभुवनवाहिनी वर्तते। अस्य कीर्तिः त्रिलोक्यां प्रसृताऽस्ति ॥५०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- હે મનોહર દમયન્તી ! રણસંગ્રામમાં વિસ્તાર પામતું છે ભુજાબળ જેનું, એવો આ કાશીનગરનો રાજા છે. જેના યશની નદી ગંગાની જેમ ત્રણ માર્ગે (ત્રણે જગતમાં) ફેલાયેલી છે. ॥૫૦॥

हिन्दी :- हे सुन्दर दमयन्ति! यह काशीनगर का राजा है। इसके बाहुओं का बल रणसंग्राम में स्फुरण पाता है। इसकी यशरूपी नदी गङ्गा की तरह तीन मार्गोंमें (तीनों जगतमें) फैली हुई है। ॥५०॥

मराठी :- हे सुन्दर दमयन्ति! हा काशीनगरचा राजा आहे. संग्रामांत याचें बाहुबळ स्फुरण पावते. याची कीर्ति रूपी नदी गंगे सारखी तीन मार्गांत (तिन्ही लोकांत) पसरली आहे. ॥५०॥

English :- She say the king of Kashi who had spread his intrepidity and courage, throughout the battle field just by his mighty and mainly arms. Now just as the Ganges flow in three directions, in the same way his kudos and fame has flown into all the tree worlds.

तदेनं वृणु कल्याणि, क्रीडितुं यदि वाञ्छसि ॥
उपगङ्गं लक्ष्यमाणा, साक्षाद् गङ्गेव देवता ॥५१॥

अन्वय :- - हे कल्याणि! यदि साक्षाद् गङ्गा देवता इव लक्ष्यमाणा त्वं उपगङ्गं क्रीडितुं वाञ्छसि तद् एनं वृणु ॥५१॥

विवरणम्:- हे कल्याणि! यदि साक्षाद् गङ्गा देवता इव लक्ष्यमाणा अवलोक्यमाना त्वं गङ्गाया: समीपम् उपगङ्गं क्रीडितुं रन्तुं वाञ्छसि इच्छसि तद् एनं काशीपतिं वृणु । वरयस्व ॥५१॥

सरलार्थ :- हे कल्याणि! यदि साक्षाद् गङ्गा देवता इव लक्ष्यमाणा त्वं गङ्गाया: तीरं क्रीडिन्तु वाञ्छसि तद एनं काशीपतिं वृणु ॥५१॥

ગુજરાતી :- માટે હે કલ્યાણી! સાક્ષાત્ ગંગાદેવીની પેઠે દેખાતી એવી તું, જો ગંગાના કિનારા પર ક્રીડા કરવાની ઇચ્છા કરતી હોય, તો આ કાશીપતિને વર. ॥૫૧॥

हिन्दी :- इसलिए साक्षात् गंगादेवी के समान दिखनेवाली हे कल्याणी! अगर गंगा के किनारे पर क्रीडा करने की इच्छा हो, तो इस काशीपति राजा को वर ॥५१॥

मराठी :- यासाठी हे कल्याणि! साक्षात् गंगादेवी प्रमाणे दिसणारी तू, जर गंगेच्या काठावर क्रीडा करण्याची इच्छा असेल तर,

P.P.A.C. Gyanbhandar M.S. Jain Gyanmandir Trust

मराठी :- यासाठी हे कल्याणि! साक्षात् गंगादेवी प्रमाणे दिसणारी तू, जर गंगेच्या काठावर क्रीडा करण्याची इच्छा असेल तर, या काशीपति राजाशी लग्न कर. ॥५१॥

English :- So the chambermaid asked Damyanti who looks like the Goddess Ganga in all aspets, to marry this king of Kashi if she wishes to pass her leisure time ont he banks of the river Gangs.

दमयन्त्यवदद्भद्रे, श्रूयन्ते काशिवासिनः ।
परवञ्चनचातुर्य - चञ्चवस्तन्न मे मुदे ॥५२॥

अन्वय :- - दमयन्ती अवदत् हे भद्रे परवञ्चनचातुर्यचञ्चवः काशिवासिनः श्रूयन्ते तद् मे न मुदे ॥५२॥

विवरणम् :- दमयन्ती अवदत् अवादीत् उवाद - हे भद्रे ! द्वारपालिके ! परेषाम् वञ्चनानि परवञ्चनानि । चतुरस्य भावः चातुर्यम् । परवञ्चनेषु चातुर्यम् परवञ्चनचातुर्यम् । परवञ्चनचातुर्येण वित्ताः युक्ताः परवञ्चनचातुर्यचञ्चवः । काश्याम् वसन्ति काशिवासिनः श्रूयन्ते आकर्ण्यन्ते तत् मे मह्यं न मुदे आनन्दाय न भवति । मह्यं न रोचते ॥५२॥

सरलार्थ :- दमयन्ती अवदत् हे भद्रे ! काशिवासिनः परवञ्चनचातुर्येण युक्ताः श्रूयन्ते तत् मह्यं न रोचन्ते ॥५२॥

ગુજરાતી :- (ત્યારે) દમયંતી બોલી કે, હે ભદ્રે ! કાશીમાં રહેનારા લોકો બીજાને ઠગવાની કલામાં હોશિયાર હોય છે, માટે તેમ કરવામાં મને આનંદ થતો નથી. ॥૫૨॥

हिन्दी :- (तब) दमयंती बोली कि, हे भद्रे ! काशी में रहनेवाले लोग दूसरो को ठगने की कला में होशीयार होते हैं, इसलिए ऐसा करने में मुझे आनंद नहीं होता ॥५२॥

मराठी :- (तेव्हां) दमयंती म्हणाली भद्रे ! काशीत राहणारे लोक दुसऱ्यांना फसविण्यात हुशार आहेत. असे मी ऐकते. म्हणून मला काशीराजाला वरणे पसंद नाही. ॥५२॥

English :- Damayanti replied that the people of Kashi are skilled in Swindling others. And this quality does'nt give her any happiness.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साथ स्माहाग्रतो भूय, नन्वयं कौङ्कणाधिपः ॥
विहितानेकपापाङ्ग - भङ्गः स्वामिनि केसरी ॥५३॥

अन्वय :- - अथ सा अग्रतो भूय आह स्म-स्वामिनि ! ननु अयं विहितानेकपापाङ्गभङ्गः कौङ्कणाधिपः केसरी अस्ति ॥५३॥

विवरणम् :- अथ सा द्वारपालिका अग्रतः भूय भूत्वा आह वदति - स्म हे स्वामिनि ! ननु अयं न एकानि अनेकानि । अनेकानि च तानि पापानि च अनेकपापानि । अनेकपापानाम् अङ्गानि अनेकपापाङ्गानि अनेकपापाङ्गानां भङ्गाः अनेकपापभङ्गाः विहिताः अनेकपापाङ्गभङ्गाः येन सः विहितानेकपापाङ्गभङ्गः केसरी नाम कौङ्कणस्य अधिपः कौङ्कणाधिपः अस्ति ॥५३॥

सरलार्थ :- अथ सा प्रतीहारी अग्रतोभूय आह वदति स्म । हे स्वामिनि । ननु अयम् अनेकपापाङ्गानां भङ्गं विनाशं कुर्वन् केसरीनामा कौङ्कणाधिपः अस्ति । (अनेकपानां द्विपानाम् अपाङ्गानां गण्डस्थलानां भङ्गः अनेकपापाङ्गभङ्गः । विहितःअनेकपापाङ्गभङ्गः येन सः विहितानेकपापाङ्गभङ्गः - अनेकद्विपानां गण्डस्थलानां भेत्ता केसरी सिंह इव अनेकपापाङ्गानां भङ्गं कुर्वन् अयं केसरीनामा कौङ्कणाधिपः अस्ति) ॥५३॥

ગુજરાતી :- પછી તે પ્રતિહારી આગળ ચાલીને કહેવા લાગી કે, હે સ્વામિની ! અનેક પાપીઓનાં શરીરનો વિનાશ જેણે કરેલ છે, એવો આ ખરેખર કેસરી નામનો કોંકણદેશનો રાજા છે. ॥૫૩॥

हिन्दी :- फिर वह प्रतीहारी आगे चलकर कहने लगी कि, हे स्वामिनी ! जिसने अनेक पापीओं के शरीर का विनाश किया है, ऐसा ये सचमुच केसरी नामक कोंकणदेश का राजा है ॥५३॥

मराठी :- नंतर ती प्रतीहारी पुढे होऊन म्हण् लागली की, हे स्वामिनी ! ज्यांनी अनेक पाप्यांच्या शरीराचा विनाश केला आहे, असा हा खरोखर केसरी नावाचा कोंकणदेशाचा राजा आहे. केसरी सिंह ज्याप्रमाणें अनेक हत्तींच्या गण्डस्थळांचा नाश करतो. तसा याने अनेक पाप्यांच्या शरीराचा नाश केला आहे. ॥५३॥

English :- Then the chambermaid went ahead and greeting Damyanti as a ""mistress" told her that this king named Kesari who had destroyed many a sinners is from Konkan.

वृत्वामुं रम्यतापास्त - नन्दने कदलीवने ।
निदाघार्तिमविन्दाना, ग्रीष्मेऽपि स्याः सुखास्पदम् ॥५४॥

अन्वय :- - अमुं वृत्वा रम्यतापास्तनन्दने कदलीवने ग्रीष्मे अपि निदाघार्तिमविन्दाना त्वं सुखास्पदं स्याः ॥५४॥

विवरणम् :- *अमुं कौङ्कणाधिपकेसरिणं वृत्वा रम्यतया अपास्तं निराकृतं नन्दनं वनं येन तद् रम्यतापास्त नन्दनं तस्मिन् रम्यतापास्तनन्दने नन्दनवनादपि सुन्दरतरे कदलीनां वनं कदलीवनं तस्मिन् कदलीवने ग्रीष्मे ग्रीष्मर्तौ अपि निदाघस्य ऊष्मणः आर्तिं पीडां अविन्दाना न प्राप्नुवती अलभमाना निदाघार्तिमविन्दाना सुखस्य आस्पदं स्थानं सुखास्पदं स्याः भवेः ॥५४॥*

मरलार्थ :- अमुं कौङ्कणाधिपकेसरिणं वृत्वा नन्दनवनादपि सुन्दरतरे कदलीवने त्वं ग्रीष्मे अपि ऊष्मणः पीडां न प्राप्स्यसि । सुखास्पदं भविष्यसि ॥५४॥

गुजराती :- (भाटे) आ राजाने वरीने, मनोहरपणाथी तिरस्कारेल छे नंदनवनने जेणे, एवां केळनां वनमां, उनाळामां पण तापनी पीडाने नहीं अनुभववाथी तुं सुखना स्थानरुप था. ॥५४॥

हिन्दी :- (इसलिए) इस राजा को वरकर, मनोहरता से जिसने नंदनवनका तिरस्कार किया है, ऐसे केले के वन में, धूपकालमें भी धूप की पीडा का अनुभव न होने से तू सुख के स्थान रुप हो ॥५४॥

मराठी :- (यासाठी) या राजाशी लग्न करुन तू नंदनवनापेक्षाही सुन्दर, मनोहर असलेल्या केळीच्या वनात भर उन्हाळ्यात सुद्धा गर्मीचा अनुभव न घेता सुखाने रहा. ॥५४॥

English :- She continued that if she will accept this king as a husband than she will never have to experience the scroching heat, ever in summer as, this king has many and dense banana orchards which is far more beautiful that even the best of orchards called Nandanvan, in which the princes will experience extreme coolness even in summer.

737 63

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैम्यूचे कौङ्कणाः प्रायः, स्युर्निःकारणरोषणाः ॥
अनुकूलयितुं शक्ता, तदैनं न पदे पदे ॥५५॥

अन्वय :- - भैमी ऊचे - कौङ्कणाः प्रायः निःकारणरोषणाः स्युः । तद् एनं पदे पदे अनुकूलयितुं न शक्ता ॥५५॥

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी दमयन्ती ऊचे - अवोचत् - कौङ्कणाः कोङ्कणे भवाः कौङ्कणाः प्रायः निर्गतं कारणं यस्मात् यथा स्यात् तथा निःकारणं कारणं विनैव रोषणाः क्रोधनाः निष्कारणरोषणाः स्युः । तद् तेन कारणेन एनं पदे पदे अनुकूलयितुं सान्त्वयितुं अहं न शक्ता ॥५५॥

सरलार्थ :- भैमी अवोचत् - कौङ्कणाः कोङ्कणवासिनो जनाः प्रायः निष्कारणक्रोधनाः स्युः। कारणेन विनैव पदे पदे क्रुध्यन्ति। तद् एनं पदे पदे अनुकूलयितुं न शक्ता ॥५५॥

ગુજરાતી :- (त्यारे) दमयंती बोली के, कोंकणदेशना लोको प्रायः करीने कारणविना पण कोप करनारा होय छे, माटे डगले ने पगले तेने समजावीने शांत करवाने हुं समर्थ नथी. ॥५५॥

हिन्दी :- (तब) दमयंती बोली कि, कोंकण देशके लोग प्रायः बिनाकारण कभी भी गुस्सा करनेवाले होते है। इसलिए मैं उन्हे बार बार समझाकर शांत करने के के लिए समर्थ नहीं हूं ॥५५॥

मराठी :- (तेंव्हा) दमयंती म्हणाली की, कोंकणातील लोक कारणाशिवाय पदोपदी रागावतात. मी पदोपदी यांना शांत करू शकणार नाही. ॥५५॥

English :- At this Damyanti said that the people of Konkan get angry for no reason at all. That is why, she said that she is not capable nor quissant in making the king cool down his temper every now and then.

अथोचे साग्रतो गत्वा, देवि ! सारस्वतेश्वरम् ॥
महेन्द्रं वृणु काश्मीर - केदारेषु चिखेलिषुः ॥५६॥

अन्वय :- - अथ सा अग्रतः गत्वा ऊचे हे देवि ! काश्मीरकेदारेषु चिखेलिषुः सारस्वतेश्वरं महेन्द्रं वृणु ॥५६॥

विवरणम् :- अथ सा प्रतीहारी अग्रतः गत्वा व्रजित्वा ऊचे अवोचत् अकथयत् - हे देवि ! काश्मीरस्य केदाराणि उपवनानि उद्यानानि क्षेत्राणि - वा काश्मीरकेदाराणि तेषु काश्मीरकेदारेषु खेलितुं रन्तुं इच्छुः चिखेलिषुः काश्मीरकेदारेषु रन्तुमिच्छुः असि चेत् सरस्वत्याः इमे सारस्वताः विद्वांसः सारस्वतानां ईश्वरः सारस्वतेश्वरः तं सारस्वतेश्वरं विद्वत्पुङ्गवं महेन्द्रं वृणु वरयस्व ॥५६॥

सरलार्थ :- अथ सा प्रतिहारी अग्रतः गत्वा अवोचत् हे देवि । यदि त्वं काश्मीरोद्यानेषु रन्तुं इच्छुः असि तर्हि विद्वत्पुङ्गवं एनं महेन्द्रं वृणु ॥५६॥

ગુજરાતી :- પછી તે પ્રતિહારીએ આગળ ચાલી કહ્યું કે, હે દેવી ! કાશ્મીરદેશના બગીચાઓમાં જો તારી ક્રીડા કરવાની ઇચ્છા હોય તો વિદ્વાનોમાં શિરોમણિ એવા આ મહેંદ્ર નામના રાજાને વર.॥૫૬॥

हिन्दी :- फिर वह प्रतिहारी आगे चलकर कहती है कि, हे देवी ! काश्मीर देश के बागो में जो तेरी क्रीडा करने की इच्छा हो तो विद्वानो में शिरोमणि ऐसे महेंद्र नामक राजा से तू शादी कर ॥५६॥

मराठी अर्थ:- नंतर ती प्रतिहारी समोर चालून म्हणाली की, हे देवि । तुझी काश्मीरदेशाच्या बगीचात क्रीडा करण्याची इच्छा असेल तर विद्वानात शिरोमणि अशा महेंद्र नावाच्या राजाचा तू स्वीकार कर. ॥५६॥

English :- Then the chambarmaid went ahead and greeting her as a goddess introduced Damyanti to a king from Kashmir, named Mahendra who was the best among the most learned men. He had huge gardens too. She continues, that if Damyanti has a wish to play and pass her leisure time, in there gardens, then she might as well marry the king.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजाङ्गजा जगादेवं, भद्रे जानासि किं न मे ।।
वपुस्तुषारसम्भार - भीरुकं तद् व्रजाग्रतः ।।५७।।

अन्वय :- - राजाङ्गजा एवं जगाद-भद्रे ! मे वपुस्तुषारसम्भारभीरुकं न जानासि किं तद् अग्रतः व्रज ।।५७।।

विवरणम् :- अङ्गात् जायते इति अङ्गजा । राज्ञः अङ्गजा राजाङ्गजा राजपुत्री दमयन्ती एवं जगाद अवादीत् अवदत्-भद्रे ! मे मम वपुः शरीरं तुषाराणां सम्भारः तुषारसम्भारः । तुषारसम्भारात् भीरुकं कातरं बिभ्यत् तुषारसम्भारभीरुकं जलबिन्दुसमूहकातरं न जानासि किं ? न बोधसि किं ? तद् तेन कारणेन अग्रतः व्रज गच्छ ।।५७।।

संस्कृतार्थ :- राजपुत्री दमयन्ती एवं अवदत्-हे भद्रे । मम शरीरं जलबिन्दुसमूहात् भयशीलं अस्ति तद् त्वं न जानासि किं ? तेन कारणेन अग्रतः गच्छ ।।५७।।

ગુજરાતી :- (ત્યારે) તે રાજકુમારી દમયંતી એમ બોલી કે, હે ભદ્રે ! તું શું નથી જાણતી ? કે મારું આ શરીર બરફના સમૂહથી ડરનારું છે, માટે તું આગળ ચાલ. ।।૫૭।।

हिन्दी :- (तब) राजकुमारी दमयंती बोली कि, हे भद्रे ! तू क्या नहीं जानती कि मेरा यह शरीर बर्फ के समूह से डरनेवाला है, इसलिए तू आगे चल. ।।५७।।

मराठी :- (तेव्हां) ती राजकुमारी दमयंती म्हणाली की, हे भद्रे । तूं जाणत नाही काय ? की माझे हे शरीर बर्फाला घाबरणारे आहे, म्हणून तू पुढे हो. ।।५७।।

English :- At this, Princess Damyanti said to the chambarmaid, that she does'nt know that, her body will get frightened of an assemblage of ice, so she tells her to walk ahead.

P.P. Ac. Gunratnasuri M.S. Jun Gyaan Bhandar Trust

तथा कृत्वाथ सा स्माह, कौशाम्बीशोऽयमीश्वरि ॥
निजाङ्गनिर्जितानङ्गः, किं न ते हरते मनः ॥५८॥

अन्वय :- - अथ तथा कृत्वा सा आह स्म । हे ईश्वरि ! निजाङ्गनिर्जितानङ्गः कौशाम्बीशः अयं ते मनः न हरते किं? ॥५८॥

विवरणम् :- *अथ तथा कृत्वा अग्रे गत्वा सा भद्रा आह ब्रवीति स्म हे ईश्वरि ! निजस्य अङ्गं शरीरं निजाङ्गम् । निजाङ्गेन निर्जितः अनङ्गः कामदेवः येन सः निजाङ्गनिर्जितानङ्गः कौशम्ब्याः ईशः कौशाम्बीशः अयं ते तव मनः हृदयं न हरते किम्? ॥५८॥*

सरलार्थः- अथ सा भद्रा अग्रे गत्वा ब्रवीति स्म हे ईश्वरि । येन स्वशरीरेण कामदेवः जितः सोऽयं कौशाम्बीशः तव मनः न हरते किम्? ॥५८॥

ગુજરાતી :- પછી તેમ કરીને, એટલે આગળ ચાલીને તે પ્રતીહારી બોલી કે, હે સ્વામિની ! પોતાનાં શરીરથી જેણે કામદેવને પણ જીતેલો છે, એવો આ કોશાંબી નગરીનો રાજા શું તારું મન હરતો નથી? ॥૫૮॥

हिन्दी :- फिर वैसा कर के, याने आगे चलकर वह प्रतिहारी (दासी) बोली कि, हे स्वामिनी ! अपने शरीर से जिसने कामदेव को भी जीता है, ऐसा यह कोशांबी नगरी का राजा क्या तेरा मन नहीं हरता है? ॥५८॥

मराठी :- मग तसे करून, म्हणजे पुढे चालून ती प्रतिहारी (दासी) म्हणाली की, हे स्वामिनि । ज्याने स्वत:च्या शरीराने कामदेवाला जिंकले आहे, असा हा कोशांबीनगरीचा राजा काय तुझे मन हरण करीत नाही? ॥५८॥

English :- Then walking ahead, the chambarmaid introduced her to a king from Koshabi and told her that even Cupid was speechless in front of his beauty. Then she asked Damyanti if, he has won her heart, and is willing to marry him.

उवाच भैमी भद्रेऽसौ, वरमाला धृताभवत् ॥
तत् श्रुत्वाबोधि भद्रास्य, निरासोऽन्योक्तिरेव हि ॥५९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वय :- भैमी उवाच भद्रे ! असौ वरमाला द्रुता अभवत् - तत् श्रुत्वा भद्रा अस्य अन्योक्तिः एव निरासः इति अबोधि ॥५९॥

विवरणम् :- *भीमस्य अपत्यं स्त्री भैमी दमयन्ती उवाच अवोचत् - हे भद्रे ! असौ वराय माला वरमाला द्रुता शीघ्रम् उत्सुका उत्का अभवत् । बभूव । अभूत् । तत् श्रुत्वा तदाकर्ण्य निशम्य भद्रा अचिन्तयत् - अस्य अन्यम् उद्दिश्य उक्तिः अन्योक्तिः । अन्या चासौ उक्तिश्च अन्योक्तिः । एव निरासः निरसनं तिरस्कारः इति एवम् अबोधि अबोधत् बुबोध ।*

सरलार्थ :- भैमी दमयन्ती अकथयत् हे भद्रे । असौ वरमाला द्रुता अभवत् - तदाकर्ण्य भद्रा व्यचारयत् अस्य अन्योक्तिः एव निरासः इति अबोधि ॥५९॥

गुजराती :- (त्यारे) दमयंती बोली के, हे भद्रे ! आ वरमाला उतावळी थाय छे, ते सांभळीने प्रतिहारीए विचार्युं के, दमयंतीनी आ अन्योक्तिज खरेखर राजानां तिरस्कारयुक्त छे. ॥५९॥

हिन्दी :- (तब) दमयंती बोली कि, हे भद्रे ! यह वरमाला उतावली हो रही है, यह सुनकर प्रतिहारीने (दासीने) विचार किया कि, दमयंती की यह अन्योक्ति ही वास्तव में राजा के लिए तिरस्कार युक्त है ॥५९॥

मराठी :- (तेव्हां) दमयंती म्हणाली की, हे भद्रे । ही वरमाळा घाई करीत आहे, हे ऐकून प्रतिहारीने (दासीने) विचार केला की, दमयंतीची ही अन्योक्तिच खरोखर राजाचा तिरस्कार करीत आहे. ॥५९॥

English :- At this Damyanti said that, the garland is tenacious and restless to go ahead. At this reply, the chambarmaid understood that, Damyanti has rejected the king and wishes to walk ahead, by her stern words of rejection.

ततो भूयः पुरोभूय, साभ्यधाद्गुणरागिणि ॥
दानधर्मसमिद्धीरो - ऽवन्तीशः किं न रोचते ॥६०॥

अन्वय :- ततः भूयः पुराभूय सा अभ्यधात् हे गुणरागिणि ! दानधर्मसमिद्वीरः अवन्तीशः किं न रोचते? ॥६०॥

विवरणम् :- *ततः तदनन्तरं भूयः पुनरपि पुरा अग्रतः भूत्वा पुरोभूय सा भद्रा प्रतिहारी अभ्यधात् अवदत् - गुणेषु रागः अस्या अस्ति इति गुणरागिणी, तत्सम्बुध्दौ हे गुणरागिणि ! दानं च धर्मश्च समित् च दानधर्मसमितः दानधर्मसमित्सु वीरः दानधर्मसमिद्वीरः दानकर्मणि धर्मे युद्धे च वीरः शूरः अवन्त्याः ईशः अवन्तीशः किं तुभ्यं न रोचते? ॥६०॥*

सरलार्थ :- तदनन्तरं पुनरपि अग्रतः गत्वा सा भद्रा अवदत् हे गुणरागिणि । दानकर्मणि धर्मे युद्धे च वीरः अवन्तीशः किं तुभ्यं न रोचते? ॥६०॥

गुजराती :- પછી વળી આગળ ચાલીને તે પ્રતિહારી બોલી કે, હે ગુણોને વિષે રાગ ધરનારી દમયંતી ! દાનધર્મ તથા રણસંગ્રામમાં શૂરવીર એવો આ અવંતીદેશનો રાજા શું તને રુચતો નથી? ॥૬૦॥

हिन्दी :- फिर आगे चलकर प्रतिहारी बोली कि, हे गुणरागिनी हे दमयंती ! दानधर्म और रणसंग्राममें शूरवीर ऐसा यह अवंतीदेश का राजा क्या तुझे पसंद नहीं? ॥६०॥

मराठी :- नंतर ती प्रतिहारी (दासी) पुढे चालून म्हणाली की, हे गुणांवर प्रेम करणाऱ्या दमयंती । दानधर्म आणि रणसंग्रामात शूरवीर असा हा अवंतीदेशचा राजा तुला रुचत नाही काय ? ॥६०॥

English :- Then the chambarmaid greeting her as chaste woman introduced her to a king from Avanti, who is always giving away money in charity and who is very brave and courageous on the battle field and asked her if she has accepted him.

अभ्युचेऽस्मै नमस्तात - समानवयसे सरिव ॥
ततो भद्रा तमुल्लङ्घ्य, नृपान्तरमकीर्तयत् ॥६१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्वय :- भैमी ! ऊचे सखि ! तातसमानवयसे अस्मै नमः । ततः भद्रा तं उल्लङ्घ्य नृपान्तरम् अकीर्तयत् ॥६१॥

विवरणम् :- भीमस्य अपत्यं तनया भैमी ऊचे अकथयत् सखि भद्रे ! तातस्य जनकस्य समानं वयः यस्य सः तातसमानवयाः तस्मै तातसमानवयसे अस्मै अवन्तीशाय नमः अस्तु । ततः तत्पश्चात् भद्रा तम् अवन्तीशम् उल्लङ्घ्य अतिक्रम्य अन्यं नृपं नृपान्तरम् अकीर्तयत् अवर्णयत् ॥६१॥

सरलार्थ :- भैमी अकथयत् - हे सखि । जनकस्य समानवयसे अस्मै अवन्तीशाय नमः । तदनन्तरं भद्रा तम् अतिक्रम्य अन्यत् नृपम् अवर्णयत् ॥६१॥

ગુજરાતી :- (ત્યારે) દમયંતી બોલી કે, હે સખી ! મારા પિતાજી જેવડી ઉમરવાળા એવા આ રાજાને નમસ્કાર થાઓ. પછી ભદ્રા પ્રતિહારી તેને તજીને બીજા રાજાનું વર્ણન કરવા લાગી. ॥૬૧॥

हिन्दी :- (तब) दमयंती बोली कि, हे सखी ! मेरे पिताजी जितनी उमरवाले इस राजा को मेरा नमस्कार हो । फिर भद्रा प्रतिहारी (दासी) उन्हें छोडकर दूसरे राजा का वर्णन करने लगी ॥६१॥

मराठी :- (तेव्हां) दमयंती म्हणाली की, हे सखि । माझ्या पित्याच्या वयाइतके वय असलेल्या या राजाला माझा प्रणाम असो. मग ती भद्रा प्रतिहारी (दासी) त्यांना सोडून दुसऱ्या राजाचे वर्णन करू लागली. ॥६१॥

English :- Then Damyanti greeting her as a friend told her that, she bows down to the king, who is as old as her father. Then they walked ahead and the chambarmaid Bhadra started describing the next king.

गौडश्चूडामणिर्व्रणां, स्त्रीणां चिन्तामणिः पुनः ॥
वृत्वामुं देवि देवीव, चिन्तितार्थांभिभाग् भव ॥६२॥

अन्वय :- देवि ! गौडः व्रणां चूडामणिः । पुनः स्त्रीणां चिन्तामणिः अस्ति । अमुं वृत्वा देवी इव चिन्तितार्थांभिभाग् भव ॥६२॥

Jun Gun Aaradhak Trust

विवरणम् :- हे देवि ! गौडः गौडदेशस्य नृपः नृणां मनुष्याणां चूडामणिः शिरोभूषणम् अस्ति। स्त्रीणां चिन्तामणिः अस्ति। चिन्तामणिः इव स्त्रीणां मनःकामनापूरकः अस्ति। अमुं गौडेशं वृत्वा वरयित्वा देवी इव चिन्तिताश्च ते अर्थाश्च चिन्तितार्थाः चिन्तितार्थानां आप्तिः लब्धिः चिन्तितार्थाप्तिः चिन्तितार्थाप्तिं भजति इति चिन्तितार्थाप्तिभाग् भव। ईप्सितार्थप्राप्तिभाग् भव। इमं वरिष्यसि चेत् सकलान् ईप्सितार्थान् झटिति प्राप्स्यसि ॥६२॥

सरलार्थ :- हे देवि ! गौडेशः मनुष्याणां शिरोभूषणं स्त्रीणां च चिन्तामणिः अस्ति। अमुं गौडेशं वृत्वा देवी इव ईप्सितार्थप्राप्तिभाग् भव। ईप्सितानर्थान् लभस्व ॥६२॥

ગુજરાતી :- આ ગૌડદેશનો રાજા માણસોમાં મુકુટ સમાન છે, તથા સ્ત્રીઓને માટે ચિંતામણિરત્ન સમાન છે, માટે હે દેવી ! આ રાજાને વરીને, દેવાંગનાની પેઠે વાંછિત પદાર્થની પ્રાપ્તિવાળી તુ થા. ॥૬૨॥

हिन्दी :- यह गौडदेश का राजा मनुष्यों में मुकुट समान है, और स्त्रीओ के लिए चिंतामणिरत्न समान है, इसलिए हें देवी ! इस राजा को वरकर, देवांगना के समान वांछित पदार्थ को प्राप्त करनेवाली हो। ॥६२॥

मराठी :- हा गौडदेशाचा राजा माणसात मुकुटासमान आहे, तसेच स्त्रियांत चिंतामणिरत्न समान आहे, यासाठी, हे देवि ! या राजाला वरून, देवांगने सारखी वांछित पदार्थाची प्राप्ति करून ये. ॥६२॥

English :- Then the chambarmaid greeting her as a goddess, told her that this king was from Ghod and he was like the diadem in the crown among men and a Chintamani among woman. She continues that if she marries this king, she will receive anything she desires like the Gods.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ईदृक्कालकरालः किं, स्यान्मनुष्योऽपि सावदत् ॥
ततोऽतिक्रम्य तं भद्रा, कलिङ्गेशमदर्शयत् ॥६३॥

अन्वय :- सा अवदत् सः मनुष्यः अपि ईदृक्कालकरालः किं स्यात् । ततः भद्रा तम् अतिक्रम्य कलिङ्गेशम् अदर्शयत् ॥६३॥

विवरणम् :- सा दमयन्ती अवादीत् - अवदत् - सः मनुष्यः मानवः सन् अपि ईदृक् कालः यमः इव करालः भयङ्करः कालकरालः यमराजवत्भीषणः किं स्यात् ? इति दमयन्त्या वचनं श्रुत्वाऽयमस्यै न रोचते इति मत्वा ततः तदनन्तरं भद्रा तं गौडेशम् अतिक्रम्य उल्लङ्घ्य कलिङ्गेशं तस्मै दमयन्त्यै अदर्शयत् ॥६३॥

सरलार्थ :- सा दमयन्ती अकथयत् मानवः सन् अपि ईदृक् यमः इव भयङ्करः कथं दृश्यते । इति भैमीवचनं श्रुत्वा तन्मनोगतं ज्ञात्वा तं गौडेशम् उल्लङ्घ्य तस्मै कलिङ्गेशम् अदर्शयत् ॥६३॥

ગુજરાતી :- મનુષ્ય હોવા છતાં પણ આવો યમસરખો ભયંકર કેમ છે ? એમ દમયંતી બોલી, ત્યારે તેને છોડીને ભદ્રાએ તેને કલિંગદેશનો રાજા દેખાડ્યો. ॥૬૩॥

हिन्दी :- मनुष्य होते हुए भी यह यम के समान भयंकर क्यों है? ऐसा दमयंती के बोलने पर भद्राने उसे कलिंगदेश का राजा दिखाया ॥६३॥

मराठी :- माणूस असून सुद्धा यमासारखा भयंकर का आहे? अशी ती दमयंती म्हणाली, तेव्हां त्याला सोडून भद्रेने तिला कलिंगदेशचा राजा दाखविला. ॥६३॥

English :- Damyanti askes that even after being a man, how does he look so deadly, like the God of death (Yama)? Then Bhadra, leaving him, introduced her to a king from Kaling.

यस्यासिराहुराक्रम्य, द्विट्यशःशशिनोऽगिलत् ॥
देव्येनं तत्पतिं प्राप्य, स्याः सपत्नी जयश्रियः ॥६४॥

अन्वय :- यस्य असिराहुः आक्रम्य द्विट्यशःशशिनः अगिलत् हे देवि ! एनं वृत्वा त्वं जयश्रियः सपत्नी स्याः भवेः ॥६४॥

विवरणम् :- *यस्य असिः खड्गः एव राहुः असिराहुः आक्रम्य आक्रमणं कृत्वा द्विषां यशांसि द्विट्यशांसि । द्विट्यशांसि एव शशिनः द्विट्यशःशशिनः तान् द्विट्यशःशशिनः शत्रुयशश्चन्द्रान् अगिलत् अग्रसत् । हे देवि ! एनं वृत्वा त्वं जयस्य श्रीः जयश्रीः तस्याः जयश्रियः जयलक्ष्म्याः सपत्नी समानः पतिः यस्याः सा सपत्नी स्याः भवेः ॥६४॥*

संस्कृतार्थ :- यस्य असिराहु. आक्रम्य शत्रुयशश्चन्द्रान् अगिलत् । हे देवि ! एनं कलिङ्गेशं वृत्वा त्वं जयलक्ष्म्याः सपत्नी भवेः ॥६४॥

गुजराती :- જેનો ખડ્ગરૂપી રાહુ આક્રમણ કરીને શત્રુઓનાં યશરૂપી ચંદ્રને ગળી ગયો છે, એવા આ રાજાને પતિ તરીકે મેળવીને, તેને પ્રાપ્ત થયેલી જયલક્ષ્મીની તું શોક્ય થા. ॥૬૪॥

हिन्दी :- जिसका खड्गरूपी राहु आक्रमण कर शत्रुओं के यशरूपी चंद्रको निगल गया है, इसलिए हे देवी! इस राजा को पति बनाकर उसे प्राप्त हुई जयलक्ष्मी की तू सौतन बना॥६४॥

मराठी :- ज्याचा खड्गरूपी राहु आक्रमण करून शत्रूंच्या यशरूपी चंद्राला गिळून गेला आहे, यासाठी हे देवि। या राजाला पती म्हणून स्वीकार करून तू जयलक्ष्मीची सवत हो. ॥६४॥

English :- The king, whose sword of the saturn that eats of the moon, i.e.- the, courage and bravery and the name and fame of the enemy king, was there to accept her as the queen. Bhadra then says that she can marry the king and be a co-wife to the wealth he has obtained.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देव्यूचे पादचारेण, खिन्ना वक्तुं न हि क्षमा ॥
ततस्तमप्यतिक्रम्य, भद्रोचे देवि दृश्यताम् ॥६५॥

अन्वय :- देवी - ऊचे पादचारेण खिन्ना वक्तुं न क्षमा। ततः तं अपि अतिक्रम्य भद्रा ऊचे देवि ! दृश्यताम् ॥६५॥

विवरणम् :- देवी दमयन्ती ऊचे अवदत् - पादाभ्यां चारः चालनं पादचारः तेन पादचारेण खिन्ना अहं वक्तुं कथयितुं न क्षमा समर्था, इति। ततः तदनन्तरं तमपि अतिक्रम्य उल्लङ्घ्य भद्रा ऊचे अकथयत् हे देवि ! दृश्यतां ॥६५॥

सरलार्थ :- देवी दमयन्ती अवदत्-अहं पादचारेण खिन्नास्मि। अतः वक्तुं न समर्थास्मि। ततः तं अपि अतिक्रम्य भद्रा अकथयत् हे देवि। दृश्यतां ॥६५॥

गुजराती :- त्यारे दमयंती बोली के, हुं तो पगे चालीने थाकी गई छुं, माटे खरेखर मारामां बोलवानी शक्ति नथी. पछी ते राजाने पण छोडीने (आगळ चाली) भद्राए कह्युं के, हे देवी ! जुओ ! ॥६५॥

हिन्दी :- तब दमयंती बोली कि, मैं तो पैदल चलते चलते थक गई हूं, इसलिए वास्तव में मुझ में बोलने की शक्ति नहीं रही, फिर उस राजा को भी छोडकर (आगे चलकर) भद्राने कहा कि, हे देवि ! देखो ॥६५॥

मराठी :- तेव्हां दमयंती म्हणाली की, मी तर पायी चालत दमून गेली आहे, खरोखर माझ्यात बोलण्याची शक्ति नाही, मग त्या राजाला पण सोडून (पुढे जाऊन) भद्रा म्हणाली-हे देवि। पाहा ॥६५॥

English :- Then Damyanti said that she was tired of walking, so she had no strength to talk. Then they left that king and went ahead.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स एष सुगुणग्राम - ग्रामणी - र्निषधाधिपः ॥
यं पश्यद्भिर्दृशां देवैः, शशंसे निर्निमेषता ॥६६॥

अन्वय :- स एष सुगुणग्राम - ग्रामणीः निषधाधिपः यं पश्यद्भिः देवै : दृशां निर्निमेषता शशंसे ॥६६॥

विवरणम् :- *स एव शोभनाश्च ते गुणाश्च सुगुणाः । सुगुणानां ग्रामः समूहः सुगुणग्रामः । ग्रामं नयति इति ग्रामणीः सुगुणग्रामस्य ग्रामणीः सुगुणग्रामग्रामणीः निषधानां अधिपः निषधाधिपः अस्ति । यं निषधाधिपं पश्यद्भिः अवलोकयद्भिः देवैः अमरैः दृशां नेत्राणां निर्गतः निमेषः येषां ते निर्निमेषाः निर्निमेषाणां भावः निर्निमेषता निमेषरहितता शशंसे तुष्टुवे । नलस्यालौकिकं सौन्दर्यं दृष्ट्वा देवाः निजां निर्निमेषतां प्रशंसुः । निर्निमेषदृष्ट्या तमवलोकयामासुः ॥६६॥*

सरलार्थ :- सः एषः सुगुणसमूहग्रामणीः निषधाधिपः वर्तते । यं पश्यद्भिः देवैः दृशां निर्मेषरहितता शशंसे ॥६६॥

ગુજરાતી :- **ઉત્તમ ગુણોના સમુહોનો સરદાર તે આ નિષધદેશનો રાજા નલ છે, કે જેને જોનારા દેવોએ (પણ પોતાનાં) ચક્ષુઓનાં નિર્નિમેષપણાની પ્રશંસા કરેલી છે. ॥૬૬॥**

हिन्दी :- उत्तम गुणों के समूह का सरदार यह निषधदेश का राजा नल है, कि जिसे देखकर देवो ने (भी अपने) चक्षु के निर्निमेषपने की प्रशंसा की है ॥६६॥

मराठी :- **हा निषधदेशाचा राजा नल सद्गुणांनी सुशोभित आहे, त्याला पाहून देवांनी पण स्वतःच्या डोळ्यांच्या निर्निमेषपणाची प्रशंसा केली आहे. ॥६६॥**

English :- Then Bhadra said to her that the next king who is from Nished, named Nal, is a chef of a caboodle (group) of eminent quatties. The Gods praise themselves, for one unique feature of their's, i.e.- they do not flap the eyelids, they can see at one stretch. So they are glad, that they can see king Nal for a long period of time at a stretch.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दमयन्त्यपि तं दृष्ट्वा [illegible] विस्मितमानसा ॥
अहो लावण्यसौभाग्य[illegible]विलासानां निधिरयम् ॥६७॥

अन्वय :- विस्मितमानसा दमयन्ती अपि तं दृष्ट्वा वध्यौ । अहो ! अयं लावण्यसौभाग्यविलासानां निधिः अस्ति ॥६७॥

विवरणम् :- *विस्मितम् आश्चर्यचकितं मानसं मनः यस्याः सा विस्मितमानसा आश्चर्यचकितमनाः दमयन्ती अपि तं नलं दृष्ट्वा निरीक्ष्य वध्यौ व्यचिन्तयत् अध्यासीत् । अहो ! अयं लावण्यं च सौभाग्यं च विलासाश्च इति लावण्यसौभाग्यविलासाः तेषां लावण्यसौभाग्यविलासानां निधिः निधानं अस्ति ॥६७॥*

सरलार्थः- विस्मितचित्ता दमयन्ती अपि तं निषधाधिपं नलं दृष्ट्वा व्यचारयत् अयं लावण्यसौभाग्यविलासानां निधिः अस्ति ॥६७॥

गुजराती :- તે નલરાજાને જોઈને દમયંતી પણ મનમાં આશ્ચર્ય પામીને વિચારવા લાગી કે, અહો ! આ નલરાજા તો લાવણ્ય, સૌભાગ્ય તથા વિલાસનાં ભંડાર સરખો છે. ॥૬૭॥

हिन्दी :- उस नलराजा को देखकर दमयंती भी आश्चर्यचकित होकर मन में विचार करने लगी कि, अहो ! यह नलराजा तो लावण्य, सौभाग्य और विलासों का भंडार है। ॥६७॥

मराठी :- त्या नलराजाला पाहून दमयंती पण मनात आश्चर्यचकित होऊन विचार करू लागली की, अहो । हा नलराजा तर लावण्य, सौभाग्य आणि विलासाचे भांडारच आहे. ॥६७॥

English :- Seeing the king, even Damyanti was suprised and thought to herself that, this king Nal is a granary of being charming, fortunate and merry.

नलस्यैवं गुणग्राम्यं, विमृशन्ती वशङ्गता ॥
कण्ठपीठे न्यधात्तस्य, मालिका वरमालिकाम् ॥६८॥

अन्वय :- एवं वशज्ञता बालिका नलस्य गुणग्रामं विमृशन्ती तस्य कण्ठपीठे वरमालिकां न्यधात् ॥६८॥

विवरणम् :- एवं वशं अधीनं गता वशज्ञता बालिका दमयन्ती नलस्य गुणानां ग्रामः समूहः गुणग्रामः तं गुणग्रामं विमृशन्ती विचारयन्ती तस्य नलस्य कण्ठ एव पीठं तस्मिन् कण्टपीठे - वराय मालिका वरमालिका तां वरमालिकां न्यधात् चिक्षेप ॥६८॥

सरलार्थ :- नलं दृष्ट्वा तद्वशज्ञता बालिका दमयन्ती नलस्य गुणग्रामं विचारयन्ती तस्य नलस्य कण्ठपीठे वरमालां अक्षिपत् ॥६८॥

गुजराती :- એ રીતે નલરાજાના ગુણોનો સમૂહ વિચારતી, તથા તેને વશ થયેલી દમયંતીએ તેના કંઠમાં વરમાળા આરોપિત કરી. ॥६८॥

हिन्दी :- इस तरह नलराजा के गुणसमूह के बारे में पूछती, तथा उससे प्रभावित हुई दमयंती ने उस के कंठ में वरमाला पहना दी। ॥६८॥

मराठी :- या प्रमाणें नलराजाच्या गुणाविषयी विचार करीत प्रभावित झालेल्या दमयंतीने नलराजाच्या गळ्यात वरमाळा टाकली. ॥६८॥

English :- So asking the king about his qualities and deeds, Damyanti being charmed by king Nal, put the garland in his neck.

अहो सुवृत्तमित्युच्चै - र्वीप्सया वदतां तदा ॥
अभूत् कोलाहलः कोऽपि, ककुभः प्रतिशब्दयन् ॥६९॥

अन्वय :- तदा अहो सुवृत्तं । इति उच्चैः वीप्सया वदतां जनानां ककुभः प्रतिशब्दयन् कः अपि कोलाहलः अभूत् ॥६९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- तदा तस्मिन्समये अहो ! सुष्ठु वृत्तं सुवृत्तम् इति शोभनो वरो वृतः । इति उच्चैः स्वरैः वीप्सया द्विरुक्तया पुनः पुनः वदतां कथयतां जनानां ककुभः आशाः प्रतिशब्दयन् निनादयन् कः अपि अनिर्वचनीयः कोलाहलः अभूत् बभूव अभवत् ॥६९॥

सरलार्थ :- तस्मिन् समये अहो ! सुवृत्तम् इति उच्चैः स्वरैः द्विरुक्त्या वदतां जनानां ककुभः प्रतिशब्दयन् कः अपि अपूर्वः कोलाहलः अभवत् ॥६९॥

ગુજરાતી :- અહો ! આ દમયંતી પોતાની ઇચ્છાથી યોગ્ય વરને વરી છે, એમ તે વખતે મોટેથી બોલતા લોકોનો, દિશાઓને ગજવતો (આશ્ચર્યકારક) કોલાહલ થઇ રહ્યો. ॥૬૯॥

हिन्दी अर्थ:- आहा ! दमयंतीने स्वेच्छानुसार योग्य वर चुना है, ऐसे उच्च स्वर में कहते हुए लोगों का, चारों दिशाओं में गुंजता हुआ कोई (आश्चर्यकारक) कोलाहल होने लगा ॥६९॥

मराठी :- अहाहा ! दमयंतीने स्वइच्छेनुसार योग्य नवरा निवडला आहे. असा उच्च स्वरात पुन्हा कोलाहल करणाऱ्या लोकांनी आपल्या कोलाहलाने दहाही दिशा दुमदुमुन टाकल्या. ॥६९॥

English :- There was a big din and an uproar in all directions when Damyanti chose her proper suitor as per her choice.

अत्रान्तरे विकोशासिः, कृष्णराजो नलं प्रति ॥
जगाद सुभगम्मन्यः, शूरम्मन्यश्च मानयुक् ॥७०॥

अन्वय :- अत्रान्तरे सुभगम्मन्यः शूरम्मन्यश्च मानयुक् विकोशासिः कृष्णराजः नलं प्रति जगाद ॥७०॥

विवरणम् :- अत्रान्तरे अस्मिन् एव समये आत्मानं सुभगं मन्यते ऽसौ सुभङ्गमन्यः सुन्दरम्मन्यः आत्मानं शूरं मन्यते ऽसौ शूरम्मन्यः

च मानेन अहङ्कारेण युज्यते मानयुक् अभिमानशाली अहङ्कारी कोशात् विगतः विकोशः असिः खड्गः यस्य सः विकोशासिः कोशरहितखड्गहस्तः कृष्णश्चासौ राजा च कृष्णराजः नलं प्रति जगाद अवदत् ॥७०॥

सरलार्थ :- अस्मिन्नेव समये सुभगम्मन्यः शूरम्मन्यश्च मानयुक् अहङ्कारयुतः विगतकोशासिः कृष्णराजः नलं प्रति अवदत् ॥७०॥

ગુજરાતી :- એવામાં કૃષ્ણરાજ નામનો રાજા મ્યાનમાંથી તલવાર કાઢીને, પોતાને સૌભાગ્યવાન તથા શૂરવીર માનતો અભિમાનથી નલરાજાને કહેવા લાગ્યો કે, ॥૭૦॥

हिन्दी :- इतने में कृष्णराज नामक राजा म्यान में से तलवार निकालकर खुद को सौभाग्यवान और शूरवीर मानकर अभिमान से नलराजा से कहने लगा कि, ॥७०॥

मराठी :- इतक्यात स्वत:ला भाग्यवान व शूरवीर समजणारा अभिमानी कृष्णराजा म्यानातून तलवार काढून नलराजाला म्हणाला. ॥७०॥

English :- Just then a king named Krishnaraj came forward and taking out the sword from the scabbard and calling himself as a brave and a fortunate king called out to king Nal.

दमयन्तीयमुद्वोढुं, भो भो नल न लभ्यते ॥
योग्यो भर्ताहमेवास्याः, सीताया इव राघवः ॥७१॥

अन्वय :- भो भो नल ! इयं दमयन्ती उद्वोढुं न लभ्यते । अस्याः अहं योग्यः भर्ता सीताया इव राघवः ॥७१॥

विवरणम् :- भो भो नल ! इयं दमयंती उद्वोढुं परिणेतुं न लभ्यते । यतः अस्याः दमयन्त्याः अहं योग्यः भर्ता पतिः अस्मि । रघोः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गोत्रापत्यं पुमान् राघवः रामः यथा सीतायाः योग्यः पतिः आसीत् । तथाऽहमेव अस्या दमयन्त्याः योग्यः पतिः अस्मि । तस्मात् त्वमिमां वोढुं न शक्तोषि ॥७१॥

सरलार्थ :- भो भो नल । इवं दमवन्ती त्वया परिणेतुं न लभ्यते । यतः सीतायाः रामः इव अस्याः दमवन्त्याः अहमेव योग्यः पतिः अस्मि ॥७१॥

ગુજરાતી :- અરે નલરાજા ! તું આ દમયંતીને પરણવા પામીશ નહીં, કેમ કે સીતાના જેમ રામચંદ્ર, તેમ હું જ આ દમયંતીનો સ્વામી થવાને યોગ્ય છું. ॥૭૧॥

हिन्दी :- अरे नलराजा ! तू इस दमयंती से विवाह नहीं कर सकता, क्योंकि सीता के जैसे रामचंद्र, वैसे ही मैं इस दमयंती का स्वामी होने लायक हूँ ॥७१॥

मराठी :- अरे नलराजा ! तू या दमवंतीशी लग्न करू शकत नाही, कारणकी सीतेचा जसां रामचंद्र, तसेच मी या दमवंतीचा स्वामी होण्यास योग्य आहे. ॥७१॥

English :- Calling out to king Nal, he said to him that he cannot marry Damyanti, because, just as Sita and Ramchandra, he is also fit to be a husband to Damyanti.

नलोऽप्यूचे तमाक्षिप्य, किमरे कुलपांशन ॥
पिशाचकी वातकी वा, मूढस्त्वं यद्विकत्थसे ॥७२॥

अन्वय :- नलः अपि तं कृष्णराजं आक्षिप्य ऊचे किं अरे कुलपांशन ! पिशाचकी वातकी वा । यद् त्वं मूढः इव विकत्थसे ॥७२॥

विवरणम् :- नलः अपि तं कृष्णराजं आक्षिप्य ऊचे अवादीत्- किं रे! कुलस्य पांशनः कुलपांशनः तत्सम्बुद्धौ हे कुलपांशन कुलकलङ्क! त्वं पिशाचग्रस्तः पिशाचकी वातेन ग्रस्तः वातकी वा असि यद् मूढः मूर्खः इव विकत्थसे जल्पसि। आत्मानं श्लाघसे। ॥७२॥

सरलार्थ :- नलः अपि तं कृष्णराजं आक्षिप्य अवदत् किं रे। कुलकलङ्क। त्वं पिशाचग्रस्तः असि? वा वातग्रस्तः असि। यद् मूर्खः इव आत्मानं श्लाघसे ॥७२॥

ગુજરાતી :- (ત્યારે) નલરાજાએ પણ તેને તરછોડીને કહ્યું કે, અરે કુલકલંક ! તું કોઈક ભૂતના વળગાડવાળો, અથવા વાયુરોગવાળો બેભાન મૂર્ખ જણાય છે, કે જે આવો બકવાદ કરે છે. ॥૭૨॥

हिन्दी :- तब नलराजाने भी उसे कहा कि, अरे कुलकलंक ! तुं किसी भूत से ग्रासित अथवा वायुरोग से बेभान मूर्ख लग रहा है, कि जो ऐसी बकवास कर रहा है ॥७२॥

मसाठी :- तेव्हां नलराजा त्याला म्हणाला की, अरे कुलकलंका! काय तू कोणत्या तरी भूताने ग्रस्त किंवा वायुरोगाने बेभान झाला आहेस ? की, मूर्खाप्रमाणें आपली प्रौढी मिरवितोस. ॥७२॥

English :- At this outburst of king Krishnaraj, Nal replied saying that, probably a ghost has overpowered him or he has got hypochondria (a type of disease) or he would'nt have spoken such rubbish.

यद्दौर्भाग्यादभाग्यस्त्वं, दमयन्त्या वृतोऽसि न ॥
हन्त सन्तप्यसे तत्किं, न तपस्तप्यसे पुनः ॥७३॥

यद् दौर्भाग्यात् अभाग्यः त्वं दमयन्त्या न वृतः असि। हन्त! तत् किं सन्तप्यसे पुनः तपः न तप्यसे?॥७३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- यद् दुष्टं भगः यस्य सः दुर्भगः। दुर्भगस्य भावः दौर्भाग्यं तस्मात् दौर्भाग्यात् दुर्दैववशात् न विद्यते भाग्यं यस्य सः अभाग्यः भाग्यहीनः त्वं दमयन्त्या न वृतः असि! हन्त! खेदे तत् किं सन्तप्यसे ? पुनः तपः किं न तप्यसे ? दमयन्तीं लब्धुं पुनस्तपस्तप्त्वा भाग्यवान् भव ॥७३॥

सरलार्थ :- यद् दौर्भाग्यात् अभाग्यः त्वं दमयन्त्या न वृतः असि। हन्त। तत् किं सन्तप्यसे ? पुनः तपः न तप्यसे? ॥७३॥

ગુજરાતી :- તુ નિર્ભાગી છો અને તારા દુર્ભાગ્યથી દમયંતી તને ન વરી, તેથી તુ શા માટે બળી મરે છે ? ફરીને તપ શા માટે કરતો નથી? ॥૭૩॥

हिन्दी :- यह तेरा दुर्भाग्य है जो दमयंतीने तुझे नही चुना, इसलिए तु क्यों जलकर मरना चाहता है? फिरसे तप क्यों नहीं करता? ॥७३॥

मराठी :- अरे! तूं भाग्यहीन आहेस. तुझ्या दुर्भाग्यामुळेच दमयन्तीने तुला पसंत केले नाहीं. त्यासाठी अरे! तूं का बरं हेवा करीत आहे ? पुन्हा तप का करीत नाही ? ॥७३॥

English :- Nal adds that unfortunatly as Damyanti, has'nt chosen him, he feels jealious and envies him, so he is outrageous. He askes him to therefore to go and do some dire penances or religious austerites.

संप्रत्यर्थयमानस्तु, पापिन्नेतां परस्त्रियम् ॥
धर्म नाजीगणः किं त्वं, न कुलं वाप्यजीगणः ॥७४॥

अन्वय :- पापिन्! सम्प्रति एतां परस्त्रियं अर्थयमानः याचमानः त्वं किं धर्मं नाजीगणः कुलं अपि न अजीगणः ॥७४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणं :- *पापं अस्य अस्ति इति पापी तत्सम्बुध्दौ हे पापिन् ! एतां परस्य अन्यस्य स्त्री परस्त्री तां परस्त्रियं अर्थयमानः अभिलषन् त्वं धर्मं किं नाजीगणः न अगणयः । कुलं वंशमपि न अजीगणः ॥*

सरलार्थ :- पापिन् ! सम्प्रति एतां अन्यस्य स्त्रियं अर्थयमानः त्वं किं धर्मं न अजीगणः कुलं अपि न अजीगणः । धर्मं कुलं च किमर्थं न गणयसि ? ॥७४॥

ગુજરાતી :- અરે પાપી ! હમણાં આ પરસ્ત્રીની ઇચ્છા કરતાં તું ધર્મને કેમ ગણકારતો નથી ? અથવા તારા કૂળની પણ તું કેમ દરકાર કરતો નથી ? ॥૭૪॥

हिन्दी :- अरे पापी ! अभी इस पररस्त्री की इच्छा करते हुए धर्म की चिंता क्यों नहीं करता है? अथवा अपने कुल की भी चिंता क्यों नहीं करता है?॥७४॥

मराठी :- अरे पापी! आता परस्त्रीची कामना करतेवेळी तुला आपल्या धर्माची चिंता नाही ? अथवा तुला तुझ्या कुळाचा पण विचार येत नाही ? ॥७४॥

English :- Then king Nal addressing him as a sinner askes him whether, he does'nt feel bad to ask or fight for somebody else's wife and, does'nt he think about his race and his pedigree.

शिक्षणीयोऽसि तन्मे त्व - मित्यसिं कम्पयन् करे ।
उदस्थाद् भूमिमाहत्य, ज्वलत्कोपानलो नलः ॥७५॥

अन्वय :- *तत् मे त्वं शिक्षणीयः असि इति करे असिं कम्पयन् ज्वलत्कोपानलः नलः भूमिं आहत्य उदस्थात् ॥७५॥*

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

विवरणम् :- तत् तेन कारणेन मे मया त्वं शिक्षितुं योग्यः शिक्षणीयः असि ! इति एवं करे हस्ते असिं खड्गं कम्पयन् धूनयन् कोपः एव अनलः कोपानलः । कोपः अनलः इव वा कोपानलः । ज्वलन् कोपानलः यस्य सः ज्वलत्कोपानलः जाज्ज्वल्यमानक्रोधाग्निः नलः नृपः भूमिं आहत्य उदस्थात् आसनाद् उदतिष्ठत् ॥७५॥

सरलार्थ :- तत् मया त्वं शिक्षितुं योग्यः असि। इति करे असिं धूनयन् ज्वलत्कोपानलः नलनृपः भूमिं आहत्य उदस्थात् ॥७५॥

ગુજરાતી :- માટે મારે તને શિક્ષા આપવી જોઈએ, એમ કહી હાથમાં તલવારને કંપાવતો, જાજ્વલ્યમાન ક્રોધરુપી અગ્નિવાળો નલરાજા પૃથ્વી પર (પગ) પછાડીને ઊભો થયો. ॥૭૫॥

हिन्दी :- इसलिए मुझे तुम्हें शिक्षा देनी चाहिए, ऐसा कहकर हाथ में तलवार घूमाते हुए जाज्वल्यमान क्रोधरूपी अग्निवाला नलराजा पृथ्वी पर (पैर) पछाडकर खडा हुआ ॥७५॥

मराठी :- यासाठी मी तुला शिक्षा द्यावला पाहिजे, असे म्हणून हातात तलवार कांपवीत आणि जाज्वल्यमान क्रोधरुपी अग्निप्रमाणे झालेला नलराजा पृथ्वीवर (पाय) आपटून उभा राहिला.॥७५॥

English :- So king Nal says that he has to punish king Krishnaraj. So saying and oscillating his sword in his hand and blazing with anger and beating his feet in anger on the ground, king Nal stood up.

तयोः सैन्यानि सन्नह्य, द्वयोरपि ततस्तदा ॥
रोषाद्व्यस्तमनांसीव, मिथस्तानि दुढौकिरे ॥७६॥

अन्वय :- ततः तदा रोषात् व्यस्तमनांसि इव तयोः द्वयोः तानि सैन्यानि अपि सन्नह्य मिथः दुढौकिरे ॥७६॥

विवरणम् :- ततः तत्पश्चात् तदा तस्मिन् समये रोषात् क्रोधात् व्यस्तानि व्यग्राणि मनांसि येषां ते व्यस्तमनांसि इव तयोः कृष्णराजनलराजयोः द्वयोः तानि सैन्यानि अपि सन्नह्य सज्जीभूय मिथः परस्परं दुढौकिरे सम्मुखम् आजग्मुः ॥७६॥

संस्कृतार्थ :- ततः तस्मिन् समये क्रोधात् व्यस्तमनांसि इव तयोः द्वयोः सैन्यानि अपि सज्जीभूय परस्परं सन्मुखं आगतानि ॥७६॥

गुजराती :- पछी अत्यंत कोधित थईने तेओ बन्नेना सैन्यो हथियारबंध थईने परस्पर लडवा माटे आवी पहोंच्या.॥७६॥

हिन्दी :- फिर उस समय अत्यंत क्रोधित होकर दोनों के सैन्य हथियारयुक्त हो कर परस्पर लडने के लिए आ पहुँचे। ॥७६॥

मराठी :- नंतर त्या वेळेला क्रोधानी अनावर होऊन दोन्ही पक्षांचे सैनिक हत्यारबंद होऊन परस्पराशीं लढण्याकरिता तत्पर झाले.॥७६॥

English :- Just as one does'nt know, what one is doing when he is very angry, in the same way the two armies got prepared to fight with each other.

दमयन्ती ततो दध्यौ, मन्दभाग्यास्म्यहं हहा ॥
मन्निमितं कथं जीव - संहारोऽयमुपस्थितः ॥७७॥

अन्वय :- ततः दमयन्ती दध्यौ हहा। अहं मन्दभाग्या अस्मि। मन्निमितं कथं अयं जीवसंहार उपस्थितः ॥७७॥

विवरणम् :- ततः तदनन्तरं दमयन्ती दध्यौ - अध्यायत् अध्यासीत्। हहा। खेदे। अहं मन्दं भाग्यं यस्याः सा मन्दभाग्या अभागिनी

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अस्मि। मम निमित्तं मन्निमित्तं कथं कस्मात् अयं जीवानां संहारः जीवसंहारः प्राणिवधः उपस्थितः ॥७७॥

सरलार्थ :- ततः दमयन्ती व्यचारयत् अरेरे। अहं मन्दभाग्या अस्मि। मन्निमित्तं कथं अयं प्राणिक्षयः उपस्थितः ॥७७॥

ગુજરાતી :- ત્યારે દમયંતી વિચારવા લાગી કે અરેરે! હું અત્યંત નિર્ભાગી છું, મારા થકી જ આ જીવોનો સંહાર ઉપસ્થિત થયો છે. ॥૭૭॥

हिन्दी :- तब दमयंती विचार करने लगी "अरेरे। मैं अत्यंत अभागिनी हूं, मेरी वजह से ही यह प्राणीवध उपस्थित हुआ है।" ॥७७॥

मराठी :- तेव्हा दमयंती विचार करु लागली "अरेरे। मी अत्यंत अभागी आहे, माझ्यामुळेच या जीवांचा संहार उपस्थित झाला आहे." ॥७७॥

English :- Then Damyanti thought to herself as to how unfortunate she was, and from where this war to kill lives for her sake has suddenly erupted.

विद्यते यदि मे भक्तिः, स्वामिन्यर्हति निश्चला ॥
जयतात् तन्मम प्रेया - नरातिस्तूपशाम्यतु ॥७८॥

अन्वय :- यदि मे अर्हति स्वामिनि निश्चला भक्तिः विद्यते। तन्मम प्रेयान् जयतात्। अरातिः तु उपशाम्यतु ॥७८॥

विवरणम् :- यदि मे मम अर्हति जिनेश्वरे स्वामिनि निश्चला स्थिरा भक्तिः विद्यते। तत् तर्हि मम प्रेयान् अतिशयेन प्रियः प्रेयान् पतिः नलः जयतात् जयतु। अरातिः शत्रुः कुब्जराजः तु उपशाम्यतु ॥७८॥

सरलार्थ :- यदि मम जिनेश्वरे स्थिरा भक्तिः स्यात् तन्मम प्रियकरः नलः जयतु, शत्रुः उपशाम्यतु ॥७८॥

ગુજરાતી :- શ્રી અરિહંતપ્રભુ પ્રત્યે જો મારી ભક્તિ નિશ્ચલ હોય તો, મારા સ્વામી નલરાજા જય પામો અને શત્રુઓ શાંત થાઓ. ॥૭૮॥

हिन्दी :- श्री अरिहंतप्रभु के प्रति यदि मेरी भक्ति निश्चल हो, तो मेरे स्वामी नलराजा की विजय हो और यह शत्रु शांत हो. ॥७८॥

मराठी :- श्री अरिहंतप्रभूवर जर माझी भक्ति निश्चल असेल, तर माझ्या स्वामी नलराजाचा जय हो आणि हा शत्रु शांत हो. ॥७८॥

English :- Then Damyanti says that if my devotion to Lord Arihant is pure and from the bottom of my heart, then let my to be husband always attain victory and let this enemy king cool down his anger.

इत्युक्त्वा वारिभृङ्गार - मादाय जलशीकरैः ।
त्रिः समाच्छोटयामास, कृष्णराजमहीभुजम् ॥७९॥

अन्वय :- इति उक्त्वा वारिभृङ्गारम् आदाय कृष्णराजमहीभुजं त्रिः जलशीकरैः समाच्छोटयामास ॥७९॥

विवरणम् :- इति एवं उक्त्वा कथयित्वा वारिणः जलस्य भृङ्गारः पात्रविशेषः वारिभृङ्गारं तं वारिभृङ्गारं (झारी इतिमहाराष्ट्रभाषामाह) आदाय गृहीत्वा महीं भुनक्ति भुङ्क्ते वा महीभुक् । कृष्णराजमहीभुजं त्रिः त्रिवारं जलानां शीकराणि जलशीकराणि तैः जलशीकरैः जलबिन्दुभिः तुषारैः समाच्छोटयामास ॥७९॥

सरलार्थ :- एवं कथयित्वा जलभृङ्गारं आदाय कृष्णराजमहीभुजं त्रिवारं जलशीकरैः समाच्छोटयामास ॥७९॥

ગુજરાતી:- એમ કહીને તેણીએ જલથી ભરેલી ઝારી લઈને તેમાં રહેલા જલબિંદુઓ વડે ત્રણવાર તે કૃષ્ણરાજ નામના રાજા પર છંટકાવ કર્યો. ॥૭૯॥

हिन्दी :- ऐसा कह कर उसने जल से भरी हुई झारी लेकर उसमें से जलबिंदुओ लेकर तीनबार उस कृष्णराज नामक राजा पर छंटकाव किया ॥७९॥

मराठी :- असे म्हणून तिने जलाने भरलेली झारी घेऊन त्यातील पाण्याने तीनवेळा त्या कृष्णराज नावाच्या राजावर शिपके मारले. ॥७९॥

English :- So saying thus, she took a pitcher of water and sprinkled three times the remaining water from it on king Krishnaraj.

स्पृष्टस्तेनाम्भसा सोऽभू-द्विध्यदङ्गारसोदरः ॥
कराग्रान्मण्डलाग्रेणापेते द्रोः पक्वपत्रवत् ॥८०॥

अन्वय :- तेन अम्भसा स्पृष्टः सः विध्यदङ्गारसोदरःअभूत । द्रोः पक्वपत्रवत् कराग्रान्मण्डलाग्रेन आपेते ॥

विवरणम् :- *तेन अम्भसा जलेन स्पृष्टः सः कृष्णराजः विध्यन् शाम्यन् चासौ अङ्गारस्थ विध्यदङ्गारः विध्यदाङ्गारस्य सोदरः विध्यदङ्गारसोदरः अभूत् अभवत् । यथा विध्यापितः अङ्गारः निस्तेजाः भवति । तथा जलेन स्पृष्टः कृष्णराजः निस्तेजाः अभूत् । द्रोः वृक्षात् पक्वं च तत् पत्रं च पक्वपत्रम् । पक्वपत्रेण तुल्यं पक्वपत्रवत् । करस्य अग्रः कराग्रः तस्मात् कराग्रात् मण्डलाग्रेण खड्गेन तलवारिणा आपेते । अधःपेते निपेते। यथा वृक्षात् पक्वं पत्रं वायुना अधः पतति तथा तस्य खड्गं कराग्रात् अधः पपात ॥८०॥*

सरलार्थ :- तेन जलेन स्पृष्टः सः कृष्णराजः शाम्यदङ्गारसोदरः अभूत् । वृक्षात् पववपत्रेण तुल्यं तस्य करावात् खड्गेन अधः निपेते ॥८०॥

ગુજરાતી :- જેવી રીતે જલ-છંટકાવથી અગ્નિ શાંત થઈ જાય છે તેમ દમયંતી દ્વારા થયેલા જલ-છંટકાવથી કૃષ્ણરાજ એકદમ ઠંડો પડી ગયો અને જેમ વૃક્ષો પરનાં પાકી ગયેલા પાંદડાઓ ખરી પડે છે તેમ તેના હાથમાંથી તેની તલવાર પણ સરી પડી.॥८०॥

हिन्दी :- जिस तरह पानी छिडकने से अग्नि का शमन होता है उसी तरह दमयंती द्वारा जल छिडकने से कृष्णराज भी एकदम ठंडा हो गया और जिस तरह पेड पर से सुखे पत्ते गिर जाते हैं उसी तरह कृष्णराज के हाथ से उसकी तलवार भी गिर गई । ॥८०॥

मराठी :- जशा प्रकारे पाणी ओतल्यास आग शांत पडते तशाच प्रकारे दमयंती द्वारा पाण्याचे शिपके मारल्यावर कृष्णराज थंड पडला व वृक्षावरून जसे पिकलेले पान गळून पडते तशाच प्रकारे कृष्णराजच्या हातातून त्याची तलवार पडली.॥८०॥

मराठी :- जशा प्रकारे पाणी ओतल्यास आग शांत पडते तशाच प्रकारे दमयंती द्वारा पाण्याचे शिपके मारल्यावर कृष्णराज थंड पडला व वृक्षावरून जसे पिकलेले पान गळून पडते तशाच प्रकारे कृष्णराजच्या हातातून त्याची तलवार पडली.॥८०॥

English :- Just as the water touched him, he became pithless (cooled) just as fire cools down and his sword too fell off from his hand just as a riped leaf falls down from a tree and he became powerless.

लोकोत्तरमहिम्नाथ, भैमीवृत्तेन राजकम् ॥
दध्यौ देवी किमत्रैषा, मानुषीरूपधारिणी ॥८१॥

अन्वय :- अथ लोकोत्तरमहिम्ना भैमीवृत्तेन राजकं दध्यौ । किम् अत्र एषा मानुषीरूपधारिणी देवी अस्ति? ॥८१॥

विवरणम् :- अथ लोकोत्तरः महिमा यस्य तद् लोकोत्तरमहिम, तेन लोकोत्तरमहिम्ना अलौकिकमहिमशालिना भीमस्य अपत्यं स्त्री भैमी दमयन्ती। भैम्याः वृत्तं भैमी वृत्तं तेन भैमीवृत्तेन भैमीचरितेन दमयन्तीचरितेन राज्ञां समूहः राजकं दध्यौ व्यचारयत् व्यचिन्तयत् - किम् अत्र एषा मानुष्याः रूपं मानुषीरूपं मानुषीरूपं धारयति इत्येवंशीला मानुषरूपधारिणी देवी देवाङ्गना अस्ति? ॥८१॥

सरलार्थ :- अथ लोकोत्तरमहिम्ना भैमीवृत्तेन राजकं व्यचारयत् किम् अस्मिन् स्वयंवरमण्डपे एषा मानुषी - रूपधारिणी देवी अस्ति ॥८१॥

ગુજરાતી અર્થ :- ત્યાર બાદ લોકોત્તર મહિમા સભર દમયંતિનું ચરિત્ર જોઈને ત્યાં ઉપસ્થિત બધા રાજાઓ વિચારવા લાગ્યા કે, મનુષ્યરૂપ ધારણ કરીને કોઈ દેવાંગના ત્યાં તે સ્વયંવર મંડપમાં આવી છે કે કેમ ? ॥८१॥

हिन्दी :- उस के बाद असाधारण महिमावाले दमयन्ती के चरित्र को देखकर वहां उपस्थित सभी राजा सोचने लगे कि मनुष्य का रूप लेकर कोई देवांगना यहां पर उपस्थित हुई है क्या ? ॥८१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- तेव्हां अलौकिक महिमा असणारे दमयन्तीचे चरित्र पाहून ते राजे विचार करू लागले, की, या स्वयंवर मंडपातही माणसाचे रूप धारण केलेली कोणी तरी देवीच आहे कि काय. ॥८१॥

English :-When the king seen this uncommon miracle of the spotless character of Damyanti, he thought that this must be a Goddess present here in this swayamwar in the form of a human.

निस्तेजितस्ततः कृष्ण - राजोऽप्येवमचिंतयत् ॥
दमयंती न सामान्या, न सामान्यो नलोऽप्यसौ ॥८२॥

अन्वय :- ततः निस्तेजितः कृष्णराजः अपि एवम् अचिन्तयत्-दमयन्ती सामान्या न। असौ नलः अपि सामान्यः न ॥८२॥

विवरणम् :- ततः तदनन्तरं निर्गतं तेजः यस्मात् सः निस्तेजाः निस्तेजाः कृतः निस्तेजितः तेजोहीनः कृतः कृष्णश्चासौ राजा च कृष्णराजः अपि एवम् अचिन्तयत्-व्यचारयत् - दमयन्ती सामान्या स्त्री न किन्तु विशेषा। असौ नलः नृपः अपि सामान्यः न दृश्यते ॥८२॥

सरलार्थ :- ततः तेजोहीनः कृष्णराजः अपि एवं व्यचारयत् दमयन्ती सामान्या नास्ति। असौ नलः अपि सामान्यः न वर्तते ॥८२॥

ગુજરાતી અર્થ :- પછી ઝંખવાણો પડેલો કૃષ્ણરાજ પણ વિચારવા લાગ્યો કે, દમયંતી સામાન્ય સ્ત્રી નથી, તેમ આ નલરાજા પણ સામાન્ય રાજા નથી. ॥૮૨॥

हिन्दी :- तब निस्तेज सा कृष्णराज भी सोचने लगा कि यह दमयन्ती कोई मामुली स्त्री नहीं है और न ही यह नल भी कोइ सामान्य राजा है। ॥८२॥

मराठी :- तेव्हां तेजोहीन झालेला कृष्णराजाही विचार करू लागला की, ही दमयन्ती कोणी सामान्य स्त्री नाही व नलराजाही कोणी सामान्य पुरूष नाही. ॥८२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

English :- Then just as Krishanraj's splendour of the face fell off, he thought to himself that this Damyanti is not an ordinary woman, nor her to be husband is an ordinary being.

ततस्तं क्षमयामास, कृष्णराजः प्रशांतधीः ॥
नलोऽप्यपूजयत्तं च, संतो हि सुकृतप्रियाः ॥८३॥

अन्वय :- ततः प्रशान्तधीः कृष्णराजः तं क्षमयामास। नलः अपि तमपूजयत्। सन्तः हि सुकृतप्रियाः सन्ति ॥८३॥

विवरणम् :- ततः तदनन्तरं प्रशांन्ता धीः यस्य सः प्रशान्तधीः शान्तबुद्धिः, कृष्णश्चासौ राजाच कृष्णराजः तं नलनृपं क्षमयामास अक्षाम्यत्। नलः नृपः अपि तं कृष्णराजमपूजयत् सदकारयत् तथाहि सन्तः सज्जनाः शोभनानि कृतानि सुकृतानि सत्कार्याणि। सुकृतानि प्रियाणि येषां ते सुकृतप्रियाः सत्कार्यप्रियाः भवन्ति ॥८३॥

सरलार्थ :- तदनन्तरं प्रशान्तमतिः कृष्णराजः तं नलनृपं क्षमयामास - नलनृपः अपि तं कृष्णराजं सदकारयत् तथाहि सज्जनाः सत्कार्यप्रियाः भवन्ति ॥८३॥

ગુજરાતી અર્થ :- પછી શાંતીપૂર્વક કૃષ્ણરાજે નલરાજાની ક્ષમા માગી અને તેમણે પણ તેનો આદરસત્કાર કર્યો, કારણ કે સંતપુરુષો ઉત્તમ કાર્યોને ચાહનારા હોય છે. ॥૮૩॥

हिन्दी :- बाद में विनम्रतापूर्वक कृष्णराजा ने नलराजा से क्षमायाचना कि एवं उन्होनें भी उनका सत्कार किया, क्यों कि सज्जन पुरूषों का चित्त उत्तम कार्यों से प्रसन्न हो जाता है ॥८३॥

मराठी :- नंतर शांततेने कृष्णराजाने नलाराजा कडे क्षमा मागितली आणि नलराजाने पण त्याचा आदरसत्कार केला, कारण सज्जन पुरुषांस सत्कार्ये प्रिय असतात.॥८३॥

English :- Then the cool-minded Krishnaraj asked for forgivenes. And just as good men grant forgireness when it is asked for, Nal too forgave him and felicitated him in great style.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नलं महर्षिवद् ज्ञात्वा, शापानुग्रहयोः क्षमं ॥
वैदर्भो निर्भरानंदः, सुतोद्वाहमचीकरत् ॥८४॥

अन्वय :- नलं महर्षिवद् शापानुग्रहयोः क्षमं ज्ञात्वा वैदर्भः निर्भरानन्दः सुतोद्वाहम् अचीकरत् ॥८४॥

विवरणम् :- नलं महर्षिवद् महान् चासौ ऋषिश्च महर्षिः, महर्षिणा तुल्यं महर्षिवत् शापश्च अनुग्रहश्च शापानुग्रहौ तयो शापानुग्रहयोः क्षमं समर्थं ज्ञात्वा, यथा महर्षिः शापं दातुम् अनुग्रहंच कर्तुं समर्थो भवति। तथा नलोऽपि शापानुग्रहयोः क्षमः वर्तते। इति ज्ञात्वा विदर्भाणां राजा वैदर्भः भीमरथः निर्भरः आनन्दः यस्य सः निर्भरानन्दः परिपूर्णानन्दः सन् सुतायाः कन्यायाः उद्वाहं परिणयं सुतोद्वाहं कन्यापरिणयम् अचीकरत् अकारयत् ॥८४॥

सरलार्थ :- नलनृपं महर्षिणा तुल्यं शापं दातुं कृपांकर्तुं समर्थं विज्ञाय वैदर्भः भीमरथराजः परिपूर्णानन्दः सन् कन्यायाः परिणयं कारयामास ॥८४॥

ગુજરાતી:- ત્યારે નલરાજાને મહાન્ ઋષિની પેઠે શાપ આપવામાં અને અનુગ્રહ કરવામાં સમર્થ જાણીને વિદર્ભ રાજ્યના ભીમરથ રાજાએ અતિ આનંદપૂર્વક પોતાની પુત્રી દમયંતીનો તેમની સાથે વિવાહ કર્યો. ॥८४॥

हिन्दी :- तब नलराजा को महान ऋषि के समान शाप देने में और अनुग्रह करने में समर्थ जानकर विदर्भ राज्य के भीमरथ राजाने अत्यंत हर्षपूर्वक अपनी पुत्री दमयन्ती का ब्याह उनके साथ किया। ॥८४॥

मराठी :- तेव्हा नलराजा महर्षीप्रमाणें शाप देण्यास व अनुग्रह करण्यास समर्थ आहे. असे जाणून हर्षभरित झालेल्या विदर्भ देशच्या भीमरथ राजाने मुलीचा (दमयंतीचा) विवाह करविला. ॥८४॥

English :- Then taking Nal as a great ascetic who when he is angry, has the power to curse anyone but at the same time when he can forgive the person after understanding the situation, King Bhimrath of Vidarbha married off his daughter Damyanti with great pomp and happiness.

हस्त्यश्वरथरत्नाघं, नलस्यादत्त यौतके ॥
नृपानन्यांश्च संमान्य, विससर्ज गृहान् प्रति ॥८५॥

अन्वय :- नलस्य यौतकं हस्ति - अश्व - रथ रत्नाघं अदत्त अन्यान् च नृपान् सम्मान्य गृहान् प्रति विससर्ज ॥८५॥

विवरणम् :- तदनन्तरं भीमरथनृप: नलस्य नलाय यौतके वध्वै उपायनीकृतं प्राभृतीकृतं धनं यौतकं तस्मिन् यौतके उपायने हस्तिनश्च अश्वाश्च रथाश्च एतेषां समाहार: हस्त्यश्वरथं हस्त्यश्वरथं च रत्नानि च हस्त्यश्वरथरत्नानि। रत्नानि आद्यानि यस्य तद् - रत्नाद्यम् अदत्त ददौ अयच्छत्। अन्यान् अपरान् नृन् पान्ति शति नृपा: तान् नृपान् राज्ञ: सम्मान्य सत्कृत्य गृहान् प्रति विससर्ज विमुमोच प्रजिघाय ॥८५॥

सरलार्थ :- भीमरथ: नलाय यौतके प्राभृतके हस्तश्वरथ-रत्नाद्यम् अयच्छत्। अपरान् नृपान् च सत्कृत्य स्वगृहान् प्राहिणोत् ॥८५॥

गुजराती :- પછી ભીમરથરાજાએ નલરાજાને પહેરામણીમાં હાથી, ઘોડા, રથ તથા રત્નો વગેરે આપ્યાં તથા બીજા રાજાઓને સન્માનપૂર્વક પોતપોતાને ઘેર વિદાય કર્યા ॥૮૫॥

हिन्दी :- फिर भीमरथराजा ने नलराजा को दहेजमें हाथी, घोडे, रथ और रत्नो आदि दिये और दुसरे राजाओं का बहुमान कर के उन्हे अपनेअपने घर विदा किया ॥८५॥

मराठी :- नंतर भीमरथराजाने नलराजाला आहेरात हत्ती, घोडे, रथ आणि रत्न आदि दिले आणि दुसऱ्या राजांचा सन्मान करून त्यांना आपआपल्या घरी पाठविले. ॥८५॥

English :- Then King Bhimrath gave away to king Nal elephants, horses, chariots and precious stones etc as dowry and felicitating the other kings, bid them farewell.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्र स्थित्वा दिनान् कांश्चि - च्चलतिस्म नलोऽपि च ॥
तिष्ठन्ति श्वसुरावासे, चिरं नार्यो न पुरुषाः ॥८६॥

अन्वय :- तत्र नलः अपि कांश्चित् दिनान् स्थित्वा चलति स्म। नार्यः श्वसुरावासे चिरं तिष्ठन्ति पुरुषाः न तिष्ठन्ति ॥८६॥

विवरणम् :- तत्र तस्मिन् नगरे नलनृपः अपि कांश्चित् कतिचित् दिनान् दिवसान् स्थित्वा उषित्वा चलति स्म - अचलत्। नार्यः स्त्रियाः श्वशुरस्य आवासः श्वशुरावासः तस्मिन् श्वशुरावासे श्वशुरगृहे चिरं चिरकालं तिष्ठन्ति वसन्ति। किन्तु पुरुषाः न तिष्ठन्ति ॥८६॥

सरलार्थ :- तस्मिन् नगरे नलनृपः अपि कांश्चित् दिवसान् स्थित्वा चलति स्म। आर्याः श्वशुरगृहे चिरकालं तिष्ठन्ति पुरुषाः न तिष्ठन्ति ॥८६॥

ગુજરાતી :- **નલરાજા ત્યાં થોડાક દિવસો રોકાઈ ને પછી ત્યાંથી રવાના થયો કારણ કે સ્ત્રીઓ હમેશાં પોતાને સાસરે જ રહે છે, પરંતુ પુરુષો ત્યાં કયારેય રહેતા નથી અથવા પુરુષો પોતાના સાસરે કયારેય લાંબો સમય રહેતા નથી. ॥८६॥**

हिन्दी :- नलराजा कुछ दिन वहाँ रुककर चल पडा क्योंकि अपने ससुरालमें स्त्रियां ही लंबे समय तक रहती है, लेकिन पुरूष अपने ससुराल में ज्यादा दिन रहते नही है। ॥८६॥

मराठी :- नलराजासुद्धा कांही दिवस तिथे राहून आपल्या गावी जाण्यास निघाला, कारण स्त्रिया सासरी चिरकाल राहतात, परंतु पुरूष आपल्या सासरी जास्त दिवस राहात नाही. ॥८६॥

English :- Then King Nal stayed there for a few days then he left off for his kingdom because only woman come back to their parents house, but the husband cannot and is considered unauspicious to stay for too long in his in-laws house.

सत्कृत्यान्वव्रजत् किंचि-द्भीमो जामातरं नलं ॥
दमयन्तीं प्रयान्तीं च, प्रेम्णा मातैवमन्वशात् ॥८७॥

अन्वय :- भीमः जामातरं नलं सत्कृत्य किञ्चिद् अन्वव्रजत् प्रयान्तीं दमयन्तीं माता प्रेम्णा एवम् अन्वशात् ॥८७॥

विवरणम् :- भीमरथराजः जामातरं नलं सत्कृत्य सन्मान्य किञ्चिद् अन्वव्रजत् अन्वगच्छत्। प्रयान्तीं प्रयाणं कुर्वतीं दमयन्तीं माता प्रेम्णा अन्वशात् उपादिशत् ॥८७॥

P.P. Ac. Gunratnasuri M.S.

सरलार्थ :- भीमरथनृपः जामातरं नलनृपं सन्मान्य किञ्चिद् अन्वव्रजत्। प्रयाणं कुर्वतीं दमयन्तीं माता प्रेम्णा अन्वशात् उपादिशत्।

ગુજરાતી :- ભીમરથરાજાએ પોતાના જમાઈ નલરાજાનું સન્માન કર્યું ને થોડેક સુધી (તેની પાછળ) તેને મૂકવા ગયો. તે વખતે સાસરે જતી દમયંતીને તેની માતાએ પ્રેમથી આ પ્રમાણે શિખામણ આપી. ॥૮૭॥

हिन्दी :- भीमरथराजा ने अपने दामाद नलराजा का सत्कार कर कुछ दूरी तक उनको छोडने गए। उस समय ससुराल जाती हुई पुत्री दमयंती को उसकी माता ने प्रेम से उपदेश दिया ॥८७॥

मराठी :- भीमरथराजाने आपल्या जावई नलराजाचा सत्कार करून त्याच्या सोबत थोड्या अंतरापर्यंत गेला. तेव्हा सासरी जात असलेल्या दमयंतीला आईने प्रेमाने उपदेश केला. ॥८७॥

English :- Bhimrath went along, to leave his son-in-law and daughter for a few-miles, when Damyanti's mother gave her daughter few words of advice, with utmost love.

मास्म निंदेः परं पुत्रि, विनीता स्याः प्रियं वदेः ॥
देहच्छायेव मात्याक्षी - र्व्यसनेऽपि पतिं निजं ॥८८॥

अन्वय :- हे पुत्रि! परं मास्म निन्देः। विनीता स्याः प्रियं वदेः निजं पतिं व्यसने अपि देहछाया इव मा अत्याक्षीः ॥८८॥

विवरणम् :- हे पुत्रि! परं अन्यं मा निन्देः। विनीता विनम्रा स्याः। प्रियं मनोहरं वदेः। निजं स्वं पतिं व्यसने दुःखे अपि देहस्य शरीरस्य छाया देहच्छाया इव मा अत्याक्षीः मा त्यज ॥८८॥

सरलार्थ :- हे पुत्रि! परं मा निन्देः। विनीता स्याः। प्रियं वदेः। निजं पतिं दुःखे अपि देहच्छाया इव मा अत्याक्षीः ॥८८॥

ગુજરાતી :- "હે પુત્રી! પરનિંદા ન કરતી, વિનીત થઈને રહેજે, પ્રિય વચન બોલજે તથા દુઃખના સમયે પણ શરીરની છાયાની પેઠે રહી સ્વામીનો ત્યાગ કરીશ નહિ." ॥૮૮॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- "बेटी! गैरों की निन्दा नहीं करना, विनयी बनकर रहना, हमेशा प्रिय वचन बोलना, और संकट में भी शरीर की परछाई की तरह रहकर पति का साथ नहीं छोडना" ॥८८॥

मराठी :- "हे मुली! सासरी तू इतरांची निंदा करू नकोस, नम्रतेने रहा. नेहमी गोड बोल आणि दु:खाच्या वेळीं सुद्धा शरीराच्या सावलीप्रमाणे राहुन पतीची संगत सोडू नकोस." ॥८८॥

English :- The mother addressing her as "O daughter' tells her that never insult anyone, always be disciplined and always talk sweetly and lovingly and like a shadow never leave her husband during any untoward crisis.

प्राप्तापि परमैश्वर्यं, गर्वं स्वाप्नेऽपि मा कृथाः ॥
निःकलंकं निजं शीलं, प्राणत्यागेऽपि मा मुचः ॥८९॥

अन्वय :- परमैंश्वर्यं प्राप्ता अपि स्वप्ने अपि गर्वं मा अकृथा:; । प्राणत्यागे अपि निजं नि:कलङं शीलं मा मुच: ॥८९॥

विवरणम् :- परमं च तद् ऐश्वर्यं च परमैश्वर्यं प्राप्ताऽपि स्वप्ने अपि परमैश्वर्यस्य गर्वं अहङ्कारम् अभिमानं मा अकृथाः मा कुरुष्व । प्राणानां त्याग: प्राणत्याग: तस्मिन् प्राणत्यागे मरणेप्राप्ते सति अपि निजं स्वं निर्गत: कलंकं यस्मात् तद् निष्कलंङ्कं च तत् शीलं चारित्रं निष्कलंङ्कचारित्रं मा मुचः । निष्कलङ्कचारित्ररक्षणे प्राणानपि मा गणय ॥८९॥

सरलार्थ :- परमैश्वर्यं प्राप्ता अपि स्वप्नेऽपि अहङ्कारं मा अकृथा: प्राणत्यागेऽपि शीलं मा मुचः॥८९॥

ગુજરાતી :- "અધિક ઐશ્વર્ય પ્રાપ્ત થતાં પણ સ્વપ્ને પણ તેનો ગર્વ કરતી નહિ. તથા પ્રાણ જાય તો પણ પોતાના નિર્મલ શીલનો તું ત્યાગ ન કરતી." ॥८९॥

हिन्दी :- "अधिक ऐश्वर्य प्राप्त होने पर भी स्वप्न में भी उसका घमंड मत करना और प्राण जाये तो भी अपना निर्मल शील का त्याग नहीं करना।"॥८९॥

मराठी :- जास्त संपत्ति मिळाली तरी स्वप्नांत सुद्धा त्याचा गर्व करू नकोस, तसेच प्राण गेले तरी आपल्या निर्मळ चारित्र्याचा त्याग करु नकोस. ॥८९॥

English :- She adds that, never to, even in dreams have a pride for having obtained great amount of wealth and never, even if she has to forfiet her life, give up her innocent and pure character.

सा तां शिक्षां समादाय, मातापित्रोरनुज्ञया ॥
संचचाल रथारूढा, वल्लभोत्संगसंगता ॥९०॥

अन्वय :- सा तां शिक्षां समादाय मातापित्रोः अनुज्ञया वल्लभोत्सङ्गसङ्गता रथारूढा सञ्चचाल ॥९०॥

विवरणम् :- सा दमयन्ती तां शिक्षां हितोपदेशं समादाय गृहीत्वा माता च पिता च मातापितरौ तयोः मातापित्रोः अनुज्ञया सम्मत्या वल्लभस्य उत्सङ्गः अङ्कः वल्लभोत्सङ्गः वल्लभोत्सङ्गेन सङ्गता वल्लभोत्सङ्गसङ्गता रथम् आरुढा रथारुढा सञ्चचाल प्रातिष्ठत ॥९०॥

सरलार्थ :- सा दमयन्ती मातुः हितवचनानि समादाय मातापित्रोः सम्मत्या रथारूढा अचलत् ॥९०॥

ગુજરાતી :- પછી દમયંતી તે શિખામણ ગ્રહણ કરીને, માતાપિતાની આજ્ઞાથી પોતાના સ્વામી સાથે રથમાં બેઠી અને ત્યાંથી પ્રસ્થાન કર્યું. ॥૯૦॥

हिन्दी :- तब दमयंती माता की शिक्षा ग्रहण कर के, मातापिता की आज्ञा पाकर पति के साथ रथ में बैठकर उसने वहाँ से प्रस्थान किया ॥९०॥

मराठी :- तेंव्हा ती दमयंती आईचा उपदेश ऐकून, आईवडिलांची परवानगी घेऊन पतीबरोबर रथमध्ये बसून ती पुढे निघाला. ॥९०॥

English :- Then after digesting her mother's advice, and after taking leave of her parents, Damyanti sat along with her husband in his chariot and left off.

तदास्य गच्छतस्तत्र, चतुरंगचमूभृतः ॥
दमयंतीमिव प्राप्य, सर्वराजजयश्रियं ॥९१॥

अन्वय :- दमयन्तीम् इव सर्वराजजयश्रियं प्राप्य चतुरङ्गभूभृतः अस्य तत्र गच्छतः सतः तदा ॥

विवरणम् :- दमयन्तीम् इव सर्वे च ते राजानश्च सर्वराजाः । सर्वराजानां जयः सर्वराजजयः सर्वराजजयस्य श्रीः सर्वराजजयश्रीः तां सर्वराजजयश्रियं प्राप्य लब्ध्वा चत्वारि अङ्गानि यस्याः सा चतुरङ्गा । चतुरङ्गाचासौ चमूश्च चतुरङ्गचमूः । चतुरङ्गचमूं बिभर्ति इति चतुरङ्गचमूभृत् तस्य चतुरङ्गचमूभृतः चतुरङ्गसेनाधारकस्य चतुरङ्गसेनासहितस्य अस्य नलस्य तत्र तस्मिन् नगरे गच्छतः सतः तदा तस्मिन् समये-॥९१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- दमयन्तीम् इव सर्वराजलक्ष्मीं प्राप्य चतुरङ्गसेनासहितस्य नलराजस्य तस्मिन् नगरे गच्छतः सतः तदा तस्मिन् समये ॥९१॥

ગુજરાતી:- દમયંતી અને તેની જેમ સર્વ રાજાઓ પરના વિજયરૂપી લક્ષ્મી પ્રાપ્ત કરીને, પોતાની ચતુરંગી સેના સાથે નલરાજા પોતાના નગરે જાતે હતો ત્યારે ॥૯૧॥

हिन्दी :- दमयंती और उसकी तरह सभी राजाओं के उपर के विजयरूपी लक्ष्मी को प्राप्त कर के, अपनी चतुरंगी सेना के साथ नलराजा अपनी नगरी की ओर जा रहा था तब ॥९१॥

मराठी :- दमयन्तीप्रमाणे सर्व राजांवरच्या विजयरूपी लक्ष्मी प्राप्त करून चतुरंग सेनेसह नलराजा स्वतःच्या नगरात जायला निघाला तेव्हां ॥९१॥

English :- Then Damyanti along with all the praises she had obtained and with the fourfold army and along with her husband Nal, was on her way to the kingdom of her in-laws.

चलद्बलसमुद्भूत - धूलिधूसरवत्तदा ॥
छन्नांशुर्निर्ययौ सूर्यः, स्नानार्थीवापरांबुधौ ॥९२॥ युग्मं ॥

अन्वय :- चलद्बलसमुद्भूत - धूलिधूसरवत् छन्नांशुः सूर्यः स्नानार्थी इव अपराम्बुधौ निर्ययौ ॥९२॥

विवरणम् :- चलत् च तद् बलं च चलत्बलम् । चलत्बलेन समुद्भूता चलत्बलसमुद्भूता । चलत्बलसमुद्भूता चासौ धूलिश्च चलत्बलसमुद्भूतधूलिः धूल्या धूसरः मलिनः धूलिधूसरः तेन तुल्यं धूसरवत् सैन्येन समुद्भूतरजसा धूसरः इव छन्नाः छादिताः अंशवः यस्य सः छन्नांशुः सूर्यः दिवाकरः, स्नानम् अर्थयते असौ स्नानार्थी स्नानेच्छुः इव, अपरश्चासौ अम्बुधिश्च अपराम्बुधिः तस्मिन् अपराम्बुधौ पश्चिमसागरे निर्ययौ निर्ममज्ज । अस्तंगतः इत्यर्थः ॥९२॥

सरलार्थ :- सैन्येन समुद्भूतरजसा धूसरः इव छादितांशुः सूर्यः स्नानेच्छुः इव पश्चिमसागरे निर्ममज्ज ॥९२॥

ગુજરાતી :- તે લશ્કર ના ચાલવાથી ઉડેલી ધૂળથી ઢંકાઈને મલિન થયેલા સુર્યે પોતાના કિરણોને સમેટી, સ્નાન કરવાની ઈચ્છા કરીને પશ્ચિમ સમુદ્રમાં ડુબકી મારી. ॥૯૨॥

हिन्दी :- उस सेना के चलने से उडी हुई धूल की वजह से मलिन हुए सूर्यने स्नान करनेंकी इच्छा से पश्चिम समुद्र में डुबकी लगाई ॥९२॥

मराठी :- त्या लष्कराच्या चालण्यामुळे उडालेल्या माती कणांनी मलिन झालेल्या सूर्याने स्वत:च्या किरणांना घेऊन आंघोळीची इच्छा करून पश्चिम समुद्रात डुबकी मारली. ॥युग्म॥ ॥९२॥

English :- Then during the twi-light period when with such an enormous army hoofing along, the dust flying seemed that it had covered up the sun and the sun feeling dirty has decided along with its rays to have a dip in the ocean in the west.

जगद्विलोचनालोक - घस्मराणि समंततः ॥
प्रसरंतिस्म रोदस्यां, रक्षांसीव तमांस्यथ ॥९३॥

अन्वय :- अथ जगद्विलोचनलोकघस्मराणि तमांसि रक्षांसि इव रोदस्यां समन्ततः प्रसरन्ति स्म ॥९३॥

विवरणम् :- अथ सूर्यास्तात् अनन्तरं जगतः विलोचनानि जगद्विलोचनानि । जगद्विलोचनानाम् आलोकः प्रकाशः तेजः जगद्विलोचनालोकः। आलोकस्य घस्मराणि भक्षकाणि जगद्विलोचनालोकघस्मराणि लोकलोचनप्रकाशविनाशकानि तमांसि अन्धकाराः रक्षांसि इव राक्षसाः इव रोदस्याम् अन्तरिक्षे पृथिव्यां च प्रासरन् । अखिलं जगत् तमोमयम् अभवत् ॥९३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- अथ लोकलोचनप्रकाशविनाशकानि तमांसि राक्षसाः इव अन्तरिक्षे पृथिव्यां च आसमन्तात् प्रासरन् ॥९३॥

ગુજરાતી :- પછી જગતની આંખોના તેજને ઢાંકી દેનારો અંધકાર રાક્ષસની પેઠે પૃથ્વીતલ પર તથા આકાશમાં ચોતરફે ફેલાવા લાગ્યો. ॥૯૩॥

हिन्दी :- फिर जगत की आँखो के तेज को ढक देनेवाला अंधकार राक्षस के समान पृथ्वी पर और आकाश में चारों ओर फैलने लगा ॥९३॥

मराठी :- नंतर जगाच्या डोळ्यांच्या तेजाला दूर करणारा अंधकार राक्षसाप्रमाणे पृथ्वीतलावर आणि आकाशात चहूबाजूंनी फैलू लागला.॥९३॥

English :- The darknes seemed to cover up the eyes of the earth as the demons in all directions on land as well as in the sky.

तदाभूवंस्तमोभिश्च, दिशः कवलिता इव ॥
अदृश्यीकरणो मंत्र, इवास्मर्यत वस्तुभिः ॥९४॥

अन्वय :- तदा दिशः तमोभिः कवलिताः इव अभूवन् । वस्तुभिः अदृश्यीकरणः मन्त्रः इव अस्मर्यत ॥९४॥

विवरणम् :- तदा तस्मिन् समये दिशः आशाः तमोभिः अन्धकारैः कवलिताः ग्रस्ताः इव अभूवन् अभवन् समजायन्त । वस्तुभिः द्रव्यैः पदार्थैः अदृश्यं क्रियते अनेन इति अदृश्यीकरणः मन्त्रः इव अस्मर्यत । वस्तुभिः अदृश्यतां गतम् ॥९४॥

सरलार्थ :- तस्मिन् समये दिशः अन्धकारैः ग्रस्ताः इव समजायन्त । वस्तुभिः अदृश्यतां गतम् ॥९४॥

ગુજરાતી અર્થ :- વળી તે વખતે બધી દિશાઓ અંધકારગ્રસ્ત થઈ ગઈ અને સર્વ પદાર્થો જેમ અદશ્યીકરણના મંત્રના પ્રભાવ હેઠળ હોય તેમ અદશ્ય થઈ ગયા. ॥૯૪॥

हिन्दी :- ठिक उसी समय सभी दिशाएँ अंधेरे से छा गयी और सभी पदार्थ जैसे अदृश्यीकरण के मंत्र के प्रभाव से अदृश्य हो गये । ॥९४॥

मराठी :- त्यावेळी अंधकाराने जणू काय सर्व दिशा गिळून टाकल्या व सर्व वस्तू जणू काय अदृश्यकरणमंत्राच्या प्रभावा खाली असल्या सारख्या अदृश्य झाल्या.॥९४॥

English :-Then it seemed that even the darkness had eaten up the direction and it has turned into a night. And just as everyrone has been memorizing the mantra to be invisible, all seemed invisible in the darkness.

नतोन्नतविभागश्च, पुरस्तादपि नाध्वनि ॥
अलक्ष्यत तदा लोकै - र्ध्यानलीनेक्षणैरिव ॥९५॥

अन्वय :- तदा लोकै: ध्यानलीनेक्षणै: इव अध्वनि पुरस्ताद् अपि नतोन्नतविभाग: न अलक्ष्यत ॥९५॥

विवरणम् :- तदा तस्मिन् समये ध्याने लीनानि ईक्षणानि येषां ते ध्यानलीनेक्षणा: तै: ध्यानलीनेक्षणै: इव लोकै: अध्वनि मार्गे पुरस्ताद् अग्रत: अपि नतश्चासौ उन्नतश्चासौ विभागश्च नतोन्नतविभाग: न अलक्ष्यत न अदृश्यत। प्रगाढतमोभि: नतोन्नतविभाग: न अदृश्यत ॥९५॥

सरलार्थ :- तस्मिन् समये लोकै: ध्यानलीनेक्षणै: इव मार्गे अग्रत: अपि नतोन्नतविभाग: न अदृश्यत ॥९५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- તે વખતે લોકોના ચક્ષુઓ ધ્યાનમય હોય તેવી રીતે તેમને ઉબડખાબડ રસ્તાઓ પણ સ્પષ્ટ રીતે દેખાતા બંધ થયા. ॥૯૫॥

हिन्दी :- उस समय लोगों के चक्ष्यु ध्यानमय हो वैसे उन्हें उबड-खाबड रास्तेभी ठीक ठीक दिखाई देने बंद हुए। ॥९५॥

मराठी :- त्यावेळी लोकांचे डोळे जणू काय ध्यानांत लीन झाले आहेत अशा प्रकारे रस्त्यात उंच-सखल प्रदेश दिसेनासे झाले. ॥९५॥

English :- At that time it seemed as if every one has gone into a deep meditation and has attained eyes to see what is ahead and also can see the voluminous and patulous high forms and low forms in front of them.

प्राचिकीर्षत्तथाप्येष, नैषधिर्नोत्प्रयाणकं ॥
सद्यः स्वस्थानगमनो - त्कंठया कृष्यमाणवत् ॥९६॥

अन्वय :- तथापि एष नैषधिः सद्यः स्वस्थानगमनोत्कण्ठया कृष्यमाणवत् उत्प्रयाणकं न प्राचिकीर्षत् ॥

विवरणम् :- तथापि तर्हि अपि एष निषधस्य अपत्यं पुमान् नैषधिः सद्यः शीघ्रं स्वस्य स्थानं स्वस्थानम् । स्वस्थाने गमनं स्वस्थानगमनम् । स्वस्थानगमने उत्कण्ठा स्वस्थानगमनोत्कण्ठा तया स्वस्थानगमनोत्कण्ठया कृष्यमाणः इव उत्प्रयाणकं क्वचिदपि अवस्थानं न प्राचिकीर्षत् कर्तुम् न ऐच्छत् ॥९६॥

सरलार्थ :- तथापि एष नलनृपः शीघ्रं स्वस्थानगमनेच्छया कृष्यमाण इव क्वचिद् अपि अवस्थानं कर्तुं न ऐच्छत् ॥९६॥

ગુજરાતી :- તેમ છતાં પણ નલરાજા પોતાને સ્થાનકે પહોંચવાની ઉત્કંઠાથી ખેંચાયો અને તેણે ક્યાંય પણ મુકામ કરવાની ઇચ્છા કરી નહીં. ॥૯૬॥

हिन्दी :- फिर भी नलराजा शीघ्र ही अपने स्थानपर पहुंचने की उत्कंठा से आकर्षित होकर उसने कहीं भी मुकाम करने की इच्छा नहीं की। ॥९६॥

मराठी :- तरी पण अत्यंत त्वरेने आपल्या स्थानी जाण्याची उत्कंठा असल्यामुळे त्याने कोठेही मुक्काम करण्याची इच्छा केली नाही.॥९६॥

English :- Then it seemed as though King Nal had a ardour desire to be back home, so he decided not to make a stop on the way.

मूर्छां गमितवत्सैन्यं, ध्वान्तैकधरणे दृशां ॥
प्रस्खलन्निपतद्गच्छ - द्वीक्ष्याचख्यौ नलः प्रियाम् ॥९७॥

अन्वय :- दृशां ध्वान्तैकधरणे सैन्यं मूर्छां गमितवत् प्रस्खलन्निपतद् गच्छद् वीक्ष्य नलः प्रियाम् आचरख्यौ ॥९७॥

विवरणम् :- दृशां ध्वान्तेन एव धरणं ध्वान्तैकधरणं तस्मिन् ध्वान्तैकधरणे दृशां पुरतः अन्धकारावस्थानेन सैन्यं मूर्छां विचेतनतां गमितवत् प्राप्तवत् प्रस्खलत् निपतत् गच्छत् वीक्ष्य अवलोक्य नलः प्रियां दमयन्तीम् आचख्यौ अवदत् ॥९७॥

सरलार्थ :- दृष्टेः पुरतः अन्धकारावस्थानेन सैन्यं मूर्च्छां प्राप्तवत् प्रस्खलत् निपतत् गच्छत् निरीक्ष्य नलनृपः प्रियां दमयन्तीम् अब्रवीत् ॥९७॥

ગુજરાતી :- આંખોને અંધકારે પકડીને સ્વાધીન કરેલી હોવાથી (સઘળું) સૈન્ય જાણે મૂર્છા પામ્યું હોય તેમ પડતું આખડતું ચાલતું જોઈને નલરાજાએ દમયંતીને કહ્યું કે, ॥૯૭॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- अंधकारने आंखो को पकडकर स्वाधीन किया था इस से (सब) सैन्य मूर्छित सा चल रहा था, इसे देखकर नलराजाने दमयंतीसे कहा कि, ॥९७॥

मराठी :- डोळ्यांपुढे अंधकार पसरलेला असल्यामुळे सर्व सैन्य चाचपडत चाचपडत, स्खलनापावून पडत पडत जात आहे. असे पाहून नलराजा दमयन्तीस म्हणाला-॥९७॥

English :- It seemed that the eyes are at the mercy of the darkness. And it also seemed like a band of drunkard men walking along in darkness and falling or dashing against eachother after every obstacle. At this King Nal spoke to Damyanti.

क्षणं जागर्यतां देवि, तमः सैन्यं विबाधते ॥
त्वद्भालतिलकेन.स्तु, रात्रावप्यरुणोदयः ॥९८॥

अन्वय :- देवि ! क्षणं जागर्यताम् । तमः सैन्यं विबाधते । त्वद्भालतिलकेन रात्रौ अपि अरुणोदयः अस्तु ॥९८॥

विवरणम् :- हे देवि! क्षणं किञ्चिद् समयं जागर्यतां बुध्यताम् । तमः अन्धकारः सैन्यं विशेषण बाधते विबाधते । तव भालः ललाटं त्वद्भालः, त्वद्भालस्य तिलकः त्वद्भालतिलकः तेन, त्वद्भालतिलकेन रात्रौ निशायाम् अपि अरुणस्य उदयः अरुणोदयः; अस्तु भवतु ॥९८॥

सरलार्थ :- हे देवि! क्षणं जागर्यताम् । अन्धकारः सैन्यम् विबाधते । तव भालतिलकेन रात्रौ अपि अरुणोदयः भवतु ॥९८॥

ગુજરાતી :- હે દેવી ! તમો ક્ષણવાર જાગો ! કેમ કે અંધકાર સૈન્યને હેરાન કરે છે. તમારા લલાટમાં રહેલા તિલક વડે આ રાત્રિસમયે ભલે સૂર્યનો ઉદય થાય! ॥૯૮॥

हिन्दी :- हे देवी! तुम कुछ क्षण के लिए जागो? क्यों कि अंधकार सैन्य को परेशान कर रहा है, तुम्हारे ललाट के तिलक द्वारा इस रात के समय भी क्यों न सूर्य का उदय हो!

मराठी :- प्रिये काही वेळ जागी रहा. अन्धकार सैन्याला अतिशय त्रास देत आहे. म्हणून रात्रीच्या वेळी सुद्धा तुझ्या कपाळावरील प्रकाशमय तिलकाने (टिळ्याने) अरूणोदय होऊ दे. प्रकाश पडू दे. ॥९८॥

English :- The king addressing Damyanti as a Goddess, asked her to be awake for sometime as darkness is harrassing the army and also adds that let there be a rising sun on her forehead.

उत्थायादर्शवद्भैमी, भालं मार्ष्टिस्म पाणिना ॥
अदीपि तिलकस्तूर्णं, ध्वांतध्वंसभास्कर : ॥९९॥

अन्वय :- भैमी उत्थाय आदर्शवत् पाणिना भालं मार्ष्टि स्म। तूर्णं ध्वान्तविध्वंसभास्करः तिलकः अदीपि ॥९९॥

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी दमयन्ती उत्थाय आदर्श इव दर्पण इव पाणिना हस्तेन भालं ललाटं मार्ष्टि स्म प्रक्षालयति स्म। तूर्णं शीघ्रं ध्वान्तस्य अन्धकारस्य विध्वंसः विनाशः ध्वान्तविध्वंसभास्करः तिलकः अदीपि प्राकाशत ॥९९॥

सरलार्थ :- दमयन्ती उत्थाय आदर्शवत् हस्तेन ललाटं प्रक्षालयति स्म। तदा तूर्णं अन्धकारविनाशे सूर्यः इव तिलकः प्राकाशत ॥९॥

गुजराती :- પછી દમયંતીએ ઊઠીને હાથ વડે (પોતાના) લલાટને સાફ કર્યું કે તુરત જ અંધકારનો નાશ કરનારા સૂર્યસરખું તે તિલક પ્રકાશવા લાગ્યું. ॥૯૯॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर दमयंती ने उठकर हाथ से (अपने) ललाटको साफ किया, कि तुरंत ही अंधकार का नाश करनेवाला सूर्यसमान वह तिलक प्रकाशने लगा॥९९॥

मराठी :- नंतर दमयंतीने उठून आरशासमान आपल्या हातांनी (स्वत:च्या) कपाळाला साफ केले, तेव्हा तत्काल अंधकाराचा नाश करणारा सूर्यासमान तो टिळा प्रकाश् लागला. ॥९९॥

English :- Then Damyanti wipped her forehead just as one wipes a mirror, when suddenly there was a bright and blazing light coming out from the emblem made on the forehead.

नि:प्रत्यूहं ततो गंतुं प्रवृत्तं निखिलं बलं ॥
तिलकार्कप्रतापेन, शोषिते ध्वांतकर्दमे ॥१००॥

अन्वय :- ततः तिलकार्कप्रतापेन ध्वान्तकर्दमे शोषिते निखिलं बलं निःप्रत्यूहं गन्तुं प्रवृत्तम् ॥१००॥

विवरणम् :- ततः तदनन्तरं तिलकः एव अर्कः सूर्यः तिलकार्कः । तिलकार्कस्य प्रतापः तिलकार्कप्रतापः तेन तिलकार्कप्रतापेन । ध्वान्तः अन्धकारः एव कर्दमः ध्वान्तकर्दमः पङ्कः तस्मिन् ध्वान्तकर्दमे शोषिते शुष्कतां नीते निखिलं अखिलं बलं सैन्यं निष्प्रत्यूहं निर्विघ्नं गन्तुं प्रवृत्तम् ॥१००॥

सरलार्थ :- तदनन्तरं तिलकार्कप्रतापेन अंधकारपङ्के शोषिते अखिलं सैन्यं निर्विघ्नं गन्तुं प्रवृत्तम् ॥१००॥

ગુજરાતી :-પછી તેણીના તે તિલકરૂપી સૂર્યના પ્રતાપથી અંધકારરુપી કાદવ સૂકાઇ જવાથી તે સઘળું સૈન્ય કોઈ પણ પ્રકારના વિઘ્ન વિના આગળ ચાલવા લાગ્યું. ॥૧૦૦॥

CC-0. A. Gyanmandir Collection. Digitized by eGangotri

हिन्दी :- फिर उसके वह तिलकरूपी सूर्य के प्रताप से अंधकाररूपी कीचड सुख जाने से वह सैन्य किसी भी बाधा के बिना आगे चलने लगा ॥१००॥

मराठी :- नंतर टिळारुपी सूर्याच्या प्रकाशरूपी प्रतापाने अन्धकाररूपी चिखल सुकून गेल्यावर सर्व सैन्य निर्विघ्नपणे पुढे चालू लागले. ॥१००॥

English :- Then suddenly there was a bright light from the emblem just as the sun, which destroyed the sludge of the darkness and the army could go ahead without any problem on the way.

कोशलोपांतमासाद्य, नलोऽभाषिष्ट वल्लभाम् ।
देव्यसौ मत्पुरी जैन - चैत्यमौक्तिकभूषणा ॥१०१॥

अन्वय :- कोशलोपान्तम् आसाद्य नलः वल्लभाम् अभाषिष्ट-हे देवि ! असौ जैन-चैत्यमौक्तिकभूषणा मत्पुरी अस्ति ॥१०१॥

विवरणम् :- कोशलायाः उपान्तः कोशलोपान्तः तं कोशलोपान्तम् कोशलासमीपम् आसाद्य - आगम्य नलनृपः वल्लभां पत्नीं दमयन्तीम् अभाषिष्ट - अकथयत् हे देवि ! असौ जिनस्य इमानि जैनानि । जैनानि च तानि चैत्यानि च जैनचैत्यानि जिनमन्दिराणि एव मौक्तिकभूषणानि यस्याः सा जिनचैत्यमौक्तिकभूषणा मम पुरी नगरी मत्पुरी अस्ति विद्यते । जिनमन्दिराणि अस्या नगर्याः मौक्तिकभूषणानि इव विराजन्ते ॥१०१॥

सरलार्थ :- कौशलासमीपं प्राप्य नलः दमयन्तीम् अभाषत हे देवि ! असौ जिनमन्दिरमौक्तिक - भूषणा मम नगरी अस्ति ॥१०१॥

ગુજરાતી :- (પછી) કોશલા નગરી નજીક આવતાં નલરાજાએ દમયંતીને કહ્યું કે, હે દેવી! મારી આ નગરી જિનમંદિરોરૂપી મુક્તાફલોના આભૂષણોવાળી છે. ॥૧૦૧॥

हिन्दी :- (फिर) कोशला नगरीके समीप आने के बाद नलराजाने दमयंतीसे कहा कि, हे देवि! मेरी यह नगरी जिनमंदिररूपी मोतियोंके आभूषणोंवाली है। ॥१०१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- (नंतर) कोशला नगरीच्या जवळ आल्यावर नलराजाने दमयंतीला म्हटले की, हे देवि! माझी ही नगरी जिनमंदिररूपी मुक्ताफळांच्या आभूषणांनी सुशोभित आहे. ॥१०१॥

English :-Then as they came closer to the kingdom of Koshala, King Nal addressing her as a Goddess said to her that just as a necklace of pearls seems attractive, in the same way his kingdom has all jain temples all around the kingdom which looks attractive too.

तच्चैत्यमालामालोक्य, पद्ममालामिवालिनी ॥
हर्षेण द्विगुणांगीव, दमयंती तदाभवत् ॥१०२॥

अन्वय :- **यथा पद्ममालाम् आलोक्य अलिनी हर्षेण द्विगुणाङ्गी भवति तथैव दमयंती तदा तच्चैत्यमालाम् आलोक्य हर्षेण द्विगुणङ्गीव अभवत् ॥१०२॥**

विवरणम् :- ***यथा पद्मानां माला पद्ममाला तां पद्ममालां कमलमालाम् आलोक्य निरीक्ष्य अलिनी भ्रमरी हर्षेण आनन्देन द्विगुणम् अङ्गं यस्याः सा द्विगुणाङ्गी उत्फुल्लशरीरा इव भवति। तथैव दमयन्ती तदा तस्मिन् समये तस्या नगर्याः चैत्यानि तच्चैत्यानि। तच्चैत्यानां माला तच्चैत्यमाला तां तच्चैत्यमालाम् दृष्ट्वा तेषां जिनमन्दिराणां मालां विलोक्य हर्षेण द्विगुणाङ्गीव अभवत्***

सरलार्थ :- यथा कमलमालां दृष्ट्वा भ्रमरी हर्षेण द्विगुणाङ्गी इव भवति तथैव दमयन्ती तदा तां मन्दिरमालां तिलोक्य हर्षेण आनन्देन उत्फुल्लशरीरा इव अभवत् ॥१०२॥

ગુજરાતી :- કમળોની શ્રેણી જોઈને ભમર જેમ આનંદ પામે, તેમ તે જિનમંદિરોની શ્રેણી જોઈને દમયંતી તે સમયે હર્ષવડે જાણે બેવડા શરીરવાળી થઈ હોય નહી તેમ (આનંદ પામવા લાગી) ॥૧૦૨॥

हिन्दी :- कमल की श्रेणिमाला को देखकर जैसे भंवरे को आनंद होता है, वैसे जिनमंदिरो की श्रेणि को देखकर दमयंती हर्षोल्लासित हुई (आनंदित हुई) ॥१०२॥

मराठी :- कमळांची श्रेणीं पाहून ज्याप्रमाणे भुंग्यांना आनंद होतो त्याचप्रमाणे त्या जिनमंदिरांची श्रेणी पाहून दमयंतीचे मन हर्षोल्लासित झाले. आनंदित झाली. ॥१०२॥

English :- Just as when a wasp feels happy on seeing a series of Lotuses, in the same way Damyanti was very happy on seeing the series of jaintemples.

ऊचे च देव धन्याहं, यल्लब्धस्त्वं पतिर्मया ॥
नित्यं चैत्यानि चैतानि, यदर्चागोचराणि मे ॥१०३॥

अन्वय :- सा ऊचे-हे देव! मया त्वं पतिः लब्धः अहं धन्या। यत् एतानि चैत्यानि मे नित्यम् अर्चागोचराणि ॥१०३॥

विवरणम् :- दमयन्ती ऊचे अकथयत्-हे देव! मया त्वं पतिः लब्धः प्राप्तः अतः अहं धन्या अस्मि। यतः एतानि चैत्यानि मन्दिराणि मे मम नित्यं प्रतिदिनम् अर्चायाः पूजायाः गोचराणि विषयाः अर्चागोचराणि भविष्यन्ति ॥१०३॥

सरलार्थ :- दमयन्ती अवदत् - हे देव ! त्वां पतिं प्राप्य अहं धन्याऽस्मि । यतः एतानि मन्दिराणि मे प्रतिदिनम् पूजाविषयाः भविष्यन्ति ॥१०३॥

ગુજરાતી:- પછી તે દમયંતીએ કહ્યું કે, હે દેવ! હું ભાગ્યશાલી છું, કે મને આપસરખા સ્વામી મળ્યા કેમ કે આ જિનમંદિરોની પૂજા કરવાનો મને હમેશાં લાભ મળશે. ॥૧૦૩॥

हिन्दी :- फिर उस दमयंतीने कहा कि, हे देव! मैं भाग्यशाली हूँ, के मुझे आप जैसे स्वामी मिले क्योंकि इन जिनमंदिरों की पूजा करने का मुझे हमेशां लाभ मिलेगा ॥१०३॥

मराठी :- नंतर दमयन्ती म्हणाली-देवा! तुमच्यासारखे पती लाभल्यामुळे खरोखर मी धन्य आहे. कारण मला आता दररोज ह्या मंदिरांत पूजा करावयास मिळेल. ॥१०३॥

English :- Damyanti, addressing her husband Nal as a God said to him that she was very fortunate to get a husband like him because she will be getting the benifit of doing pooja and worshipping the Lord daily.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उत्तुंगतोरणा चंच-न्मंचात्युच्चपताकिका ॥
वधूवरागमेऽथाभू - त्तदा शृंगारितेव पूः ॥१०४॥

अन्वय :- अथ तदा उत्तुङ्गतोरणा चञ्चन्मञ्चा उच्चपताकिका पूः वधूवरागमे शृङ्गारिता इव अभूत् ॥१०४॥

विवरणम् :- *अथ उत्तुङ्गानि अत्युच्चानि तोरणानि यस्यां सा उत्तुङ्गतोरणा । चञ्चन्तः चकासतः मञ्चाः आसनानि यस्यां सा चञ्चन्मञ्चा । उच्चाः पताकाः यस्यां सा उच्चपताकिका । पूः नगरी तदा तस्मिन् समये वधूश्च वरश्च वधूवरौ । वधूवरयोः आगमः वधूवरागमः तस्मिन् वधूवरागमे शृङ्गारः अस्याः सञ्जातः इति शृङ्गारिता विभूषिता इव अभूत् बभूव अभवत् ॥१०४॥*

सरलार्थ :- अथ अत्युच्चतोरणा, चकासन्मञ्चा उच्चपताकिका नगरी तथा वधूवरागमे शृङ्गारिता इव अभवत् ॥१०४॥

गुजरातीः- ઉંચા તોરણોવાળી, ચમકતા આસનોવાળી, તથા અતિ ઉંચે ફરકતી ધજાઓવાળી તે નગરી (પણ) નવદંપતિના આગમન સમયે જાણે શૃંગાર સજીને તૈયાર ન થઈ હોય નહીં! (તેમ દેખાવા લાગી) ॥૧૦૪॥

हिन्दी :- उंचे तोरणोवाली, चमकते आसनोवाली, तथा उंचे लहराते हुए ध्वजावाली वह नगरी (भी) वरवधू के आगमन का समय जानकर जैसे श्रृंगार कर के तैयार हो गई हो! वैसी दिखने लगी। ॥१०४॥

मराठी :- उंच उंच तोरणांनी सुशोभित, चमकत असलेल्या खुर्च्यांनी आणि उंचावर फडकत असलेल्या ध्वजांनी ती नगरी जणू वरवधू यांचे आगमन जाणून सजूनधजून तैयार झाली आहे अशी दिसत होती. ॥१०४॥

English :- The kingdom having known the arrival of the Nal and Damyanti seemed to have emblished itself with big festoons and pylons, arched gateways and high flying flags. It also seemed as though the kingdom had dressed and decked itself with ornaments for a great to be incident.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

भैम्युद्वाहसुधासेक - सांद्रसौभाग्यपादपः ॥
शुभेऽह्नि प्राविशत्तत्र, नलः प्रस्तुतमंगलः ॥१०५॥

अन्वय :- भैम्युद्वाहसुधासेक - सान्द्रसौभाग्यपादपः नलः प्रस्तुतमङ्गलः शुभेऽह्नि तत्र प्राविशत् ॥१०५॥

विवरणम् :- *भीमस्य अपत्यं स्त्री भैमी दमयन्ती। भैम्या उद्वाहः विवाहः भैम्युद्वाहः। भैम्युद्वाह एव सुधा भैम्युद्वाहसुधा। भैम्युद्वाहसुधया सेकः सिञ्चनं सुधासेकः तेन सान्द्रः गाढः सौभाग्यमेव पादपः यस्य सः भैम्युद्वाहसुधासेकसान्द्र-सौभाग्यपादपः, यस्य सौभाग्यं भैम्या सह उद्वाहेन प्रगाढम् अभूत् सः नलः प्रस्तुतं मङ्गलं येन सः प्रस्तुतमङ्गलः सन् शुभेऽह्नि शुभे दियसे तत्र तस्यां नगर्यां प्राविशत् ॥१०५॥*

સરલાર્થ :- यस्य सौभाग्यं दमयन्त्या सह विवाहेन प्रगाढम् अभवत् । सः नलनृपः प्रस्तुतमङ्गलःसन् शुभदिवसे तस्यां नगर्यां प्राविशत् ॥१०५॥

ગુજરાતી :- દમયંતી સાથેના વિવાહરુપી અમૃતના સિંચનથી પ્રફુલ્લિત થયેલ નલરાજાએ મંગલીક કરીને શુભ દિવસે નગર-પ્રવેશ કર્યો. ॥१०५॥

हिन्दी :- दमयंती के साथ विवाहरूपी अमृत के सिंचन से जिसका सौभाग्यरुपी वृक्ष प्रफुल्लित हुआ है, ऐसे उस नलराजाने मंगलिक कर के शुभ दिन में उस नगरमें प्रवेश किया ॥१०५॥

मराठी :- दमयन्तीशी विवाह करून विवाहरूपी अमृताच्या सिंचनाने ज्याचा सौभाग्यरुपी वृक्ष प्रगाढ बनला. त्या नलराजाने शुभ मुहूर्तावर मंगलपूर्वक त्या नगरीत प्रवेश केला. ॥१०५॥

English :- It seemed as though the fortunate tree had been grown up when it was nursed by the (amrit) ambrosia of the marriage of Nal to Damyanti. So King Nal heard some holy mantras and entered the city of Koshala.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

सप्रियेण नलेनाथ, नेमाते पितरौ मुदा ॥
प्रीताभ्यामभ्यनंद्येतां, तौ च ताभ्यां प्रियाशिषा ॥१०६॥

अन्वय :- अथ सप्रियेण नलेन मुदा पितरौ नेमाते। प्रीताभ्यां ताभ्यां प्रियाशिषा तौ अभ्यनन्द्येताम् ॥१०६॥

विवरणम् :- अथ प्रियया सहितः सप्रियः तेन सप्रियेण पत्नीसहितेन, नलेन मुदा हर्षेण माता च पिता च पितरौ नेमाते अनम्येताम्। प्रीताभ्यां आनन्दिताभ्यां ताभ्यां मातापितृभ्यां प्रिया चासौ आशीश्च प्रियाशीः तया प्रियाशिषा प्रियेण आशीर्वदिन च तौ वधूवरौ अभ्यनन्द्येताम् ॥१०६॥

सरलार्थ :- अथ पत्नीयुक्तेन नलेन हर्षेण पितरौ प्राणम्येताम् प्रीताभ्यां मातापितृभ्यां च नलदमयन्त्यौ अभ्यनन्येताम् ॥१०६॥

ગુજરાતી :- પછી પ્રિયાસહિત નલરાજાએ હર્ષથી માતાપિતાને નમસ્કાર કર્યા, અને આનંદ પામેલા તે માતાપિતાએ તેઓ બન્નેને શુભ આશિષ આપ્યા. ॥૧૦૬॥

हिन्दी :- फिर प्रियासहित नलराजा ने हर्ष से मातापिता को प्रणाम किया, और आनंदित हुए मातापिता ने उन दोनों को शुभ आशीर्वाद देकर हर्षित किया ॥१०६॥

मराठी :- नंतर प्रिये सह नलराजाने आनंदाने आईवडिलांना नमस्कार केला आणि आनंदित झालेल्या आईवडिलांनी त्या दोघांना शुभाशीर्वाद देऊन आनंद प्रकट केला. ॥१०६॥

English :- Then along witih his love, Damyanti, he entered the city and happily bowed down to his parents and seeing them in proper health and gaiety, he was at utmost bliss.

ततो जायापती तौ च, तत्रानंदवशंवदौ ॥
कदाचिज्जलकेलीभि - रन्वभूतां परं सुखं ॥१०७॥

अन्वय :- **ततःतौ जायापती कदाचित् तत्र आनन्दवशंवदौ जलकेलीभिः परं सुखम् अन्वभूताम् ॥१०७॥**

विवरणम् :- *ततः तदनन्तरं तौ जाया च पतिश्च जायापती जम्पती दम्पती कदाचित् तत्र आनन्देन वशं वदतः इति आनन्दवशंवदौ, जले केल्यः जलकेल्यः ताभिः जलकेलीभिः वारिक्रीडाभिः परं सुखं अन्वभूताम् ॥१०७॥*

सरलार्थ :- ततः तौ च दम्पती नलदमयन्त्यौ कदाचित् तत्र हर्षेण वारिक्रीडाभिः परं सुखम् अन्वभूताम् ॥१०७॥

ગુજરાતી :- પછી તે બન્ને પતિ-પત્ની જલક્રીડા આદિથી પરમ સુખનો અનુભવ લેવા લાગ્યા. ॥૧૦૭॥

हिन्दी :- फिर उसके बाद ये दोनो पति-पत्नी किसी समय वहाँ आनंदित हो कर जलक्रीडा द्वारा परमसुख का अनुभव लेने लगे ॥१०७॥

मराठी :- नंतर ते दोघे पति-पत्नी, नल-दमयन्ती केव्हां केव्हां जलक्रीडा करून परमसुख अनुभव् लागले. ॥१०७॥

English :- Then both husband and wife for some-time with utmost happiness played in the swimming pool.

दोलांदोलनलीलाभिः, कदाचन चिखेलतुः ॥
दमयंत्याः स्फुरद्रत्न - कुंडले इव कर्णगे ॥१०८॥

अन्वय :- **कदाचन दमयन्त्याः कर्णगे स्फुरद्रत्नकुण्डले इव दोलान्दोलनलीलाभिः चिखेलतुः ॥१०८॥**

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- कदाचन दमयन्त्याः कर्णौगच्छतः इति कर्णगे। स्फुरन्ति रत्नानि ययोः ते स्फुरद्रत्ने। स्फुरद्रत्ने च ते कुण्डले च स्फुरद्रत्नकुण्डले इव दोलया आन्दोलनानि दोलान्दोलनानि दोलान्दोलनानां लीलाः दोलान्दोलनलीलाः ताभिः दोलन्दोलनलीलाभिः दोलान्दोलनक्रीडाभिः। चिखेलतुः अखेलताम् ॥१०८॥

सरलार्थ :- कदाचन दमयन्त्याः कर्णगे स्फुरद्रत्नकुण्डले इव दोलान्दोलनक्रीडाभिः अखेलताम् ॥१०८॥

ગુજરાતી :- (વળી) કોઈ વખતે દમયંતીના કર્ણોમાં રહેલાં ચળકતાં રત્નોવાળાં કુંડળોની પેઠે, તેઓ બન્ને હીંચોળામાં ઝુલવાની લીલા વડે ક્રીડા કરવા લાગ્યા. ॥૧૦૮॥

हिन्दी :- (फिर) किसी समय दमयंती के कानों में स्थित चमकते हुए रत्नोवाले कुंडल के समान वे दम्पती झुले पर झुलने की लीला द्वारा क्रीडा करने लगे ॥१०८॥

मराठी :- केव्हां केव्हां ते दोघेही दमयन्तीच्या कानात तेजस्वी रत्नांची कुंडले जसे हेलकावे येऊन क्रीडा करतात. त्याप्रमाणे झोके येऊन क्रीडा करीत असत. ॥१०८॥

English :- Then just as the shining diamond ear-rings in the ears of Damyanti, they both togethers started swinging on the swing.

परस्परविभूषार्थं, स्पर्धया तौ जुगुंफतुः ॥
कदाचित्पुष्पशृंगारं, तद्ज्ञावारामिकाविव ॥१०९॥

अन्वय :- कदाचित् तौ स्पर्धया परस्परविभूषार्थं तद्ज्ञौआरामिकौ इव पुष्पशृङ्गरं जुगुम्फतुः ॥१०९॥

विवरणम् :- कदाचित् तौ दम्पती जाया च पतिश्च, स्पर्धया परस्परस्य विभूषा परस्परविभूषा-परस्परविभूषायै इदं अन्योन्यम् अलङ्कर्तुं विभूषयितुं इत्यर्थः तद् जानीतः इति तज्ज्ञौ निष्णातौ आरामिकौ उद्यानपालकौ इव पुष्पाणां शृङ्गारं पुष्पशृङ्गारं पुष्पमालादिकं विभूषणं जुगुम्फतुः जग्रन्थतुः ॥१०९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- कदाचित् तौ दम्पती स्पर्धया परस्परं विभूषयितुं निष्णातौ उद्यानपालकौ इव पुष्पशृङ्गारं जवान्थतुः ॥१०९॥

ગુજરાતી :- કોઈ વખતે તેઓ બન્ને સ્પર્ધાથી, એકબીજાને શોભાવવા માટે, તે કળાના જાણકાર માલીની પેઠે પુષ્પોનો શણગાર ગુંથતા હતા.॥૧૦૯॥

हिन्दी :- कभी वे दोनो स्पर्धा से, एकदूसरों को सुशोभित करने के लिए, कला के जानकार माली के समान पुष्पमाला फूल गूंथते थे ॥१०९॥

मराठी :- कधी कधी ते दोघे स्पर्धेने, एकमेकांना शोभविण्यासाठी, जाणकार असलेल्या माळ्या प्रमाणे अनेक प्रकारचे फुलांचे शृंगार (अलंकार) गुंफित होते. ॥१०९॥

English :- Then they would sometimes have a competition to decorate eachother just as a professional gardener threads up the flowers.

अदीव्यतां कदाप्यक्षैः, पणीकृत्य च कौतुकं ॥
कदाचिच्चक्रतुः काव्यै - र्दिव्यैरन्योन्यवर्णनं ॥११०॥

अन्वय :- कदा अपि पणीकृत्य अक्षैः कौतुकम् अदीव्यतां कदाचित् दिव्यैः काव्यैः अन्योन्यवर्णनं चक्रतुः ॥११०॥

विवरणम् :- कदा अपि अपणं पणं कृत्वा पणीकृत्य शपथीकृत्य । अक्षैः पाशैः कोतुकम् अदीव्यतां अक्रीडताम् । कदाचित् दिव्यैः मनोहरैः काव्यैः अन्योन्यस्य परस्परस्य वर्णनं अन्योन्यवर्णनं चक्रतुः अकुरुताम् ॥११०॥

सरलार्थ :- कदा अपि शपथीकृत्य पाशैः कौतुकम् अक्रीडतां कदाचिद् दिव्यैः काव्यैः परस्परस्य वर्णनं अकुरुताम् ॥११०॥

ગુજરાતી અર્થ :- (વળી) કોઈ વખત તેઓ બન્ને (પરસ્પર) કૌતુકપૂર્વક પાસાઓ વડે જૂગાર રમતા હતા, તથા કોઈક વાર મનોહર કાવ્યોની રચના વડે એકબીજાનું વર્ણન કરતા હતા. ॥૧૧૦॥

P.P. Ac. Gunratnasuri M.S.

हिन्दी :- (फिर) किसी समय वे दोनो (परस्पर) शर्त लगाकर कौतुकपूर्वक पासोंसे द्यूत (जुआ) खेलते थे तो फिर किसी समय मनोहर काव्यों की रचना से एकदूसरे का वर्णन करते थे ॥११०॥

मराठी :- (नंतर) ते दोघे केव्हा केव्हा परस्पर शर्यत लावून कौतुकाने द्यूत खेळत होते, तर कधीं कधीं मनोहर काव्यांची रचना करून परस्परांचे वर्णन करीत होते. ॥११०॥

English :- Then for sometime they had a competion on playing the game of dice and played it with great suprise and curiousity. Then they would compose beautiful poetries on each other.

कदाचिच्चारुचारीकमेकांते शस्तहस्तकं ॥
अनर्तयन्नलो भैमीं, स्वयं वाद्यानि वादयन् ॥१११॥

अन्वय :- कदाचित् नलः एकान्ते स्वयं वाद्यानि वादयन् चारुचारीकं शस्तहस्तकं नृत्यं भैमीम् अनर्तयत् ॥१११॥

विवरणम् :- कदाचित् नलः एकान्ते रहसि स्वयं वाद्यानि आतोद्यानि वादयन् चारुः सुन्दरा। चारी गतिः यस्मिन् तत् चारुचारीकं मनोहरगतिकं, शस्तः प्रशस्तः हस्तकः हस्तस्य हावभावः यस्मिन् तत् शस्तहस्तकं प्रशस्तहस्तहावभावयुक्तं नृत्यं भीमस्य अपत्यं स्त्री भैमी तां भैमीं दमयन्तीम् अनर्तयत्। भैम्या मनोहरगतिकं प्रशस्तहावभावयुक्तं नृत्यमकारयत् ॥१११॥

सरलार्थ :- कदाचित् नलः एकान्ते सुन्दरगतिकं प्रशस्तहावभावयुक्तं नृत्यं दमयन्तीम् अनर्तयत् ॥१११॥

ગુજરાતી :- કોઈ વખતે નલરાજા એકાંતમાં પોતે વાંજિત્રો વગાડતો અને મનોહર ચાલવાળું તથા ઉત્તમ પ્રકારના હાથોના હાવભાવવાળું નૃત્ય દમયંતીને કરાવતો હતો. ॥१११॥

हिन्दी :- किसी समय नलराजा एकांतमे स्वयं वाद्य बजाते थे और उत्तम प्रकार के हाथो के हावभाव द्वारा दमयंती से नृत्य कराते थे ॥१११॥

मराठी :- कधी कधी नलराजा एकांतात स्वत: वाये वाजवीत दमयंतीकडून उत्तम प्रकारचे, हाताचे हावभाव असलेले नृत्य करवीत असे. ॥१११॥

English :- Then when they were alone, he would play an instrument (organ) and he would also make her dance by twitching her body with a jerk and proper expressions.

एवं नवनवैर्लीला - यितैर्नित्यावियोगिनौ ॥
तावतिक्रामतां कालं, कियंतमपि दम्पती ॥११२॥

अन्वय :- एवं तौ दम्पती नवनवैर्लीलायितैः नित्यावियोगिनौ कियन्तम् अपि कालं अतिक्रामताम् ॥११२॥

विवरणम् :- एवं तौ दम्पती नलदमयन्त्यौ नवानि च तानि नवानि च नवनवानि तैः नवनवैः लीलायितैः क्रीडाचरितैः, न वियोगः अवियोगः नित्यं अवियोगः ययोः अस्ति इति नित्याऽवियोगिनौ कदापि परस्परं न त्यजन्तौ तौ कियन्तं कालं समयं अतिक्रामताम् ॥११२॥

सरलार्थ :- एवं तौ दम्पती नलदमयन्त्यौ नवनवैः क्रीडाचरितैः कदापि अन्योन्यं न त्यजन्तौ कियन्तं कालम् अतिक्रामताम् ॥११२॥

ગુજરાતી :- એ રીતે તે બન્ને સ્ત્રીભતરિ નવી નવી ક્રીડાઓ વડે વિયોગરહિત કેટલોક સમય વ્યતીત કર્યો.॥११२॥

हिन्दी :- इस प्रकार उन दोनो ने नयी नयी क्रीडाओं द्वारा वियोगरहित होकर कुछ समय व्यतीत किया ॥११२॥

मराठी :- याप्रकारे ते दोघे पतिपत्नी एकमेकांचा विरह होऊ न देता नव्या नव्या क्रीडा करून काही काळ घालवीत होते. ॥११२॥

English :- In this way they both without being separated from each other played different types of games for a long time during their leisure time.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूपतिर्निषधोऽन्येद्युः, स्वराज्येऽतिष्ठिपन्नलं ॥
कूबरं यौवराज्ये च, संयमं स्वयमग्रहीत् ॥११३॥

अन्वय :- अन्येषुः भूपतिः निषधः स्वराज्ये नलम् कूबरंच यौवराज्ये अतिष्ठिपत्। स्वयं संयमम् अग्रहीत् ॥११३॥

विवरणम् :- अन्येद्युः एकस्मिन् दिने भुवः पतिः भूपतिः निषधः स्वस्य राज्यं स्वराज्यं तस्मिन् स्वराज्ये निजसिंहासने नलम् अतिष्ठिपत् अस्थापयत्, कूबरंच युवा चासौ राजा च युवराजः। युवराजस्यकर्म यौवराज्यं, तस्मिन् यौवराज्ये अस्थापयत् स्वयंच संयमं दीक्षाम् अग्रहीत् जग्राह ॥११३॥

सरलार्थ :- एकस्मिन् दिवसे भूपतिः निषधः स्वराज्ये नलम्, कूबरंच यौवराज्ये अस्थापयत् स्वयं दीक्षां स्वीचकार ॥११३॥

ગુજરાતી:- પછી એક દિવસે નિષધરાજાએ નલકુમારને પોતાની રાજ્યગાદી પર બેસાડ્યો, અને કૂબરને યુવરાજની પદવી આપી, તથા પોતે દીક્ષા લીધી.॥११३॥

हिन्दी :- फिर एक दिन निषधराजा ने नलकुमार को अपनी राजगद्दी पर बिठाया और कूबर को युवराज की पदवी पर स्थापित किया तथा स्वयंने दीक्षा ली। ॥११३॥

मराठी :- नंतर एके दिवशी निषधराजाने नलकुमाराला स्वत:च्या राजगादीवर बसविले आणि कूबरला युवराजाच्या पदवीवर स्थापन केले आणि त्यांनी स्वत: दीक्षा घेतली. ॥११३॥

English :- Then one day the king of Nishad, crowned Nal as king and Kubar as a prince and he himself renounced the world and became a priest.

नलोऽनल इवासह्य - प्रतापः परिपंथिभिः ॥
पालयामास तद्राज्यं, प्रजालोचनचंद्रमाः ॥११४॥

अन्वय :- अनलः इव परिपन्थिभिः असह्यप्रतापः प्रजालोचनचन्द्रमाः नलः तद्राज्यं पालयामास ॥११४॥

विवरणम् :- अनलः अग्निः इव परिपन्थिभिः शत्रुभिः विराधिभिः सोढुं शक्यः सह्यः। न सह्यः असह्यः। असह्यः प्रतापः प्रकर्षेण तापः पराक्रमः च यस्य सः असह्यप्रतापः असह्यपराक्रमः प्रजानां लोचनानि प्रजालोचनानि प्रजालोचनेभ्यः चन्द्रमाः इव प्रजालोचनचन्द्रमाः प्रजालोचनानन्ददायकः नलः तद्राज्यं पालयामास ररक्ष ॥११४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- अग्निः इव विद्वेषिभिः असह्यपराक्रमः प्रजालोचनानन्ददायकः नलः राज्यं अरक्षत् ॥११४॥

ગુજરાતી :- શત્રુઓ જેનો અગ્નિ જેવો પ્રતાપ સહી શકતા નથી, તથા પ્રજાનાં ચક્ષુઓને (આનંદ આપવામાં) ચંદ્રમા સરખો, એવો નલરાજા તે રાજ્યને પાળવા લાગ્યો. ॥૧૧૪॥

हिन्दी :- अग्नि की तरह शत्रुओं द्वारा जिस का प्रताप सहन न होता था, और प्रजा के चक्षुओं को (आनंद देने मे) चंद्रमा जैसा नलराजा उस राज्य का पालन करने लगा ॥११४॥

मराठी :- ज्याप्रमाणे अग्नीचा ताप सहन करवत नाही. त्याप्रमाणे ज्याचा पराक्रम शत्रू सहन करू शकत नव्हते व जो प्रजेच्या डोळ्यांना चन्द्राप्रमाणे आनंद देत होता. तो नलराजा त्या राज्याचे रक्षण करू लागला. ॥११४॥

English :- The neighbouring enemy kings took king Nal as a fire (blazing sun) thinking that if they put their hand in it, it would turn into ash. But for the subjects of the kingdom, King Nal was like the moon, soft and kind-hearted and pleasant to be looked at.

दिक्पतीनपि दर्पेण, मन्यते स्म तृणाय यः ॥
वीरंमन्येन तेनापि, नालं नालंघि शासनं ॥११५॥

अन्वय :- यः दर्पेण दिक्पतीन् अपि तृणाय मन्यते स्म। वीरंमन्येन तेन अपि नालं शासनं न अलङ्घि ॥११५॥

विवरणम् :- यः नृपः दर्पेण अहंकारेण अपि दिशां पतयः दिक्पतयः तान् दिक्पतीन् इन्द्रादिदिक्पालान् अपि तृणाय तृणवत् तुच्छान् मन्यते स्म अमन्यत। तेन आत्मानं वीरं मन्यतेऽसौ वीरंमन्यः तेन वीरमन्येन वीरमानिना नृपेण अपि नलस्य इदं नालं नलराजसम्बन्धि शासनं राज्यं न अलङ्घि न अलङ्घ्यत ॥११५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- यः दर्पेण दिक्पालान् अपि तुच्छान् अमन्यत तेन वीरमानिना नृपेण अपि नलराजस्य शासनं न अलङ्घ्यत ॥११५॥

ગુજરાતી :- જે રાજા (પોતાના) અભિમાનથી દિશાઓના સ્વામીઓને પણ તૃણસમાન માનતો હતો એવા પોતાને શૂરવીર માનતા તે રાજાએ પણ આ નલરાજાની આજ્ઞાનું ઉલ્લંઘન કર્યું નહીં. ॥११५॥

हिन्दी :- जो राजा (अपने) अभिमान से दिशाओं के स्वामीओ को भी तृणसमान मानता था ऐसा स्वयं को शूरवीर समझनेवाले उस राजाने भी नलराजा की आज्ञा का उल्लंघन नही किया॥११५॥

मराठी :- जो राजा गर्वाने दिक्पालांनासुद्धा तुच्छ समजत असे. त्या स्वत:ला वीर समजणाऱ्या राजाने सुद्धा नलराजाच्या आज्ञेचे कधीही उल्लंघन केले नाही. ॥११५॥

English :- Even the Kings who, because of their pride used to consider the other kings in all directions, not worth even of a blade of grass and consider themselves brave and couragous, used to not make a wiff in front of King Nal's command.

अपरेद्युरमात्यादीन्, कुलवृध्दान् पप्रच्छ सः ॥
किं तातोपार्जितामेव, शास्म्यहं क्ष्मामुताधिकां ॥११६॥

अन्वय :- अपरेद्युः सः अमात्यादीन् कुलवृद्धान् पप्रच्छ किम् अहं तातोपार्जिताम् एव भूमिं शास्मि - उत अधिकां भूमिं शास्मि ॥११६॥

विवरणम् :- अपरेद्युः अन्यस्मिन् दिने सः नलः अमात्याः आदौ येषां ते अमात्यादयः तान् अमात्यादीन् कुले वृद्धाः कुलवृद्धाः तान् कुलवृद्धान् पप्रच्छ अप्राक्षीत् - किम् अहं तातेन उपार्जिता तातोपार्जिता तां तातोपार्जिताम् एव भूमिं शास्मि। उत अथवा अधिकां भूमिं शास्मि। इति ॥११६॥

सरलार्थ :- अन्यस्मिन् दिवसे स नलनृपः मन्त्र्यादीन् कुलवृद्धान् अपृच्छत् - किम् अहं तातोपार्जिताम् एव भूमिं शास्मि । अथवा अधिकां भूमिं शास्मि । इति ॥११६॥

ગુજરાતી :- એક દિવસે તે નલરાજાએ મંત્રીઆદિક કુલવૃદ્ધોને પૂછયું કે, હું શું પિતાજીએ ઉપાર્જન કરેલી પૃથ્વી જેટલું જ રાજ્ય કરું ? કે તેથી અધિક પૃથ્વીનું રાજ્ય કરું ? ॥११६॥

हिन्दी:- एक दिन नलराजा ने मंत्री आदि कुलवृद्धों से पूछा कि, मैं क्या पिताजी द्वारा उपार्जित की हुई पृथ्वी पर ही राज्य करूं? कि उससे अधिक पृथ्वी का राज्य करूं? ॥११६॥

मराठी :- एके दिवशी नलराजाने मंत्रीआदिक कुलवृद्धांना विचारले की, काय मी वडिलांनी प्राप्त केलेल्या पृथ्वीवरच राज्य करूं? की स्वत:च्या पराक्रमाने अधिक पृथ्वीवर राज्य करूं? ॥११६॥

English :- One day King Nal asked his ministers and old, learned men of noble pedigree, if he should rule only this land which his father has obtained, or should he try to increase his power on other lands too.

ऊचुस्ते भारतस्यार्धं, त्र्यंशोनं त्वत्पिताभुनक् ॥
भवान् भुनक्त्वशेषं तु, युक्तं पुत्रोऽधिकः पितुः ॥११७॥

अन्वय :- ते ऊचुः त्वत्पिता त्र्यंशोनं भारतस्यार्धं अभुनक् । भवान् अशेषं भुनक्तु । पुत्रः पितुः अधिकः युक्तम् ॥११७॥

विवरणम् :- ते अमात्यादयः कुलवृद्धाः ऊचुः अकथयन् अवोचन्-तव पिता जनकः त्वत्पिता त्र्यंशेन उनं त्र्यंशोनं भरतस्य अर्धम् अभुनक् अरक्षत् अशात् । भवान् न विद्यते शेषः यस्य तद् अशेषं सकलं भरतार्धं भुनक्तु शास्तु । पुत्रः पितुः अधिकः इति युक्तं योग्यम् एव ॥११७॥

सरलार्थ :- ते अवदन् - त्वत्पिता त्र्यंशोनं भरतस्य अर्धं अभुनक् भवान् अशेषं भरतार्धं भुनक्तु शास्तु । पुत्रः पितुः अधिकः युक्तम् ॥११७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- (ત્યારે) તેઓએ કહ્યું કે, તમારા પિતાજીએ તૃતીયાંશ ભાગથી ઓછા એવા અર્ધ ભરતક્ષેત્રનું રાજ્ય ભોગવ્યું છે, અને તમો તે સંપૂર્ણપણે અર્ધ ભરતક્ષેત્રનું રાજ્ય ભોગવો? કેમકે પુત્રે પિતાથી અધિક થવું યોગ્ય છે. ॥११७॥

हिन्दी :- (तब) उन्होंने कहा कि, तुम्हारे पिताजीने तृतीयांश भाग से कम ऐसा अर्धभरत का राज्य किया है, और तुम उस संपूर्ण अर्ध भरतक्षेत्र पर राज्य करो? क्योंकि पुत्र को पिता से अधिक होना योग्य है ॥११७॥

मराठी :- तेव्हा ते कुलवृद्ध म्हणाले- तुझे वडील एक तृतीयांश सोडून अर्धभरतक्षेत्रावर राज्य करीत होते. तू संपूर्ण अर्धभरतक्षेत्रावर राज्य कर. पित्यापेक्षा पुत्राने अधिक असणे योग्य आहे. ॥११७॥

English :- At this, they replied that his father had ruled one third less of a half, of Bharat. So King Nal should take power over the one third part too, because a son should always be one step ahead of the father.

किंतु द्वे योजनशते, इतस्तक्षशिला पुरी ॥
कदंबः पार्थिवस्तस्यां, स त्वदाज्ञां न मन्यते ॥११८॥

अन्वय :- किन्तु इतः द्वे योजनशते तक्षशिला पुरी अस्ति। तस्यां कदम्बःपार्थिवः वर्तते। सः त्वदाज्ञां न मन्यते ॥११८॥

विवरणम् :- किन्तु इतः द्वे योजनशते तक्षशिला पुरी अस्ति तस्यां तक्षशिलायां कदम्बः नाम पार्थिवः ईश्वरः पार्थिवः नृपः अस्ति। स कदम्बः तव आज्ञा त्वदाज्ञा तां त्वदाज्ञां न मन्यते ॥११८॥

सरलार्थ :- किन्तु इतः द्वे योजनशते तक्षशिला नगरी अस्ति। तस्यां कदम्बनृपः अस्ति स तव आज्ञां न मन्यते ॥११८॥

ગુજરાતી :- પરંતુ અહીંથી બસો યોજન દૂર તક્ષશિલા નામની નગરી છે, તે નગરીમાં કદંબ નામે રાજા છે, તે રાજા આપની આજ્ઞા માનતો નથી. ॥११८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- लेकिन यहां से दोसौ योजन दूर तक्षशिला नामक नगरी है, उस नगरी में कदंबनामक राजा है, वह राजा आपकी आज्ञा मानता नहीं ॥११८॥

मराठी :- परंतु येथून दोनशे योजन अंतरावर तक्षशिला नावाची नगरी आहे, त्या नगरीत कदंब नावाचा राजा आहे, तो राजा तुमची आज्ञा मानीत नाही.॥११८॥

English :- But they continued that, from here, two hundred yojans (i.e - 1600 miles), there was a king named Kadamb who ruled over the kingdom of Taxashila, who had not yet accepted his rule.

यशः सुधांशौ ते स्वामिन्, भरतार्धजयाब्धिजे ॥
अहंयुरेक एवाय - माधत्ते लाञ्छनच्छविं ॥११९॥

अन्वय :- हे स्वामिन् ! भरतार्धजयाब्धिजे यशःसुधांशौ अयम् एक एव अहंयुः लाञ्छनच्छविम् आधत्ते ॥११९॥

विवरणम् :- हे स्वामिन् ! भरतस्य अर्धं भरतार्धम् । भरतार्धस्यः जयः भरतार्धजयः । भरतार्धजयः एव अब्धिः भरतार्धजयाब्धिः । भरतार्धजयाब्धेः जायते इति भरतार्धजयाब्धिजः तस्मिन् भरतार्धजयाब्धिजे सुधा अंशुषु यस्य सः सुधांशुः चन्द्रः । यशः एव सुधांशुः यशःसुधांशुः, तस्मिन् यशःसुधांशौ । तव कीर्तिचन्द्रमसि अयं एक एव अहम् अस्य अस्ति इति अहंयुः अहङ्कारी कदम्बनृपः लाञ्छनस्य छविः लाञ्छनछविः तां लाञ्छनछविम् कलङ्कताम् आधत्ते कलङ्कः वर्तते ॥११९॥

सरलार्थ :- हे स्वामिन् ! त्वया यः भरतार्धस्य जयकृतः तस्माद् उत्पन्ने यशश्चन्द्रे अयं अहङ्कारी कदम्बः एव कलङ्क वर्तते ॥११९॥

ગુજરાતી :- હે સ્વામી ! અર્ધભરતક્ષેત્રના વિજયરુપી સમુદ્રમાંથી ઉત્પન્ન થયેલી એવા આપના યશરુપી ચંદ્રની અંદર આ એક જ અહંકારી રાજા કલંક સમાન છે. ॥११९॥

हिन्दी :- हे स्वामी ! अर्धभरतक्षेत्रना विजयरूपी समुद्रमेंसे उत्पन्न हुए ऐसे आप के यशरूपी चंद्र के अंदर यह एक ही अहंकारी राजा कलंकरूप है ॥११९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- हे स्वामी। अर्धभरतक्षेत्राच्या विजयरूपी समुद्रातून उत्पन्न झालेल्या आपल्या यशरूपी चन्द्रावर आता हा एकच अहंकारी कदंब राजा कलंक आहे. ॥११९॥

English :-The ministers addressing the king as a Swami, said to him that the country Nishad that is a part of Bharatschetra seems that it has come from a wide sea and you are a moon, which is brave and courageous. But this stubborn king Kadamb seems to be a stain on the moon to a otherwise spotless moon.

उपेक्षितस्त्वयैवैष, व्याधिलेश इवोद्भवन् ॥
संप्रत्युपचयं प्राप्तः, कृच्छ्रसाध्य इवाभवत् ॥१२०॥

अन्वय :- एष त्वया उपेक्षितः व्याधिलेशः इव उद्भवन् सम्प्रति उपचयं प्राप्तः कृच्छ्रसाध्य इव अभवत् ॥१२०॥

विवरणम् :- एषः कदम्बनृपः त्वया उपेक्षितः दुर्लक्षितः व्याधेः रोगस्य लेशः व्याधिलेशः इव उद्भवन् सम्प्रति अधुना उपचयं वृद्धिं प्राप्तः कृच्छ्रेण कष्टेन साध्यः कृच्छ्रसाध्यः इव अभवत्। यथा उपेक्षितः व्याधिः पुनरुद्भूय वृद्धिं प्राप्य कृच्छ्रसाध्यः भवति तथैव त्वया उपेक्षितः एषः कदम्बनृपः अधुना उपचयं प्राप्य कष्टसाध्यः सञ्जातः अस्ति ॥१२०॥

सरलार्थ :- एष त्वया उपेक्षितः रोगस्य लेशः इव उद्भवन् अधुना वृद्धिं प्राप्तः कष्टेन साध्यः अभवत् ॥१२०॥

ગુજરાતી :- આપની ઉપેક્ષાને કારણે તે રાજા રોગની પેઠે વૃદ્ધિ પામીને હાલમાં બળવાન થઈ ગયો છે, અને તેથી તે જીતવો મુશ્કેલ બન્યો છે. ॥१२०॥

हिन्दी :- आप के द्वारा उपेक्षा करने से ही वह राजा रोग के समान वृद्धि पाकर अभी बलवान हो गया है, इसलिए वह अब मुश्किल से जीता जा सकेगा॥ ॥१२०॥

मराठी :- ज्याप्रमाणे थोड्याशा राहिलेल्या रोगाची उपेक्षा केली व त्याकडे दुर्लक्ष करून तो तसाच राह् दिला तर कालांतराने वृध्दी पावून असाध्य होतो. त्याप्रमाणे आजपर्यंत तू उपेक्षा केलेला कदम्ब राजा आता वृध्दी पावून असाध्य झाला आहे. ॥१२०॥

English :- If one neglects a disease for some time, the disease keeps on increasing. In the same way as they had neglected this king, so now he had grown into a polent and vehementious king. So the ministers continued saying, that it might be difficult to overpower this king of Taxashila.

कृतंच भवता चेत - स्तं हंतुं निहतश्च सः ॥
प्रभास्फोटेऽपि सूर्यस्य, तमः किं न विलीयते ॥१२१॥

अन्वय :- भवता तं हन्तुं चेतः कृतं चेत् सः निहतः एव सूर्यस्य प्रभास्फोटे अपि तमः किं न विलीयते ॥१२१॥

विवरणम् :- भवता तं कदम्बनृपं हन्तुं मारयितुं चेतः मनः कृतं चेत् स निहत एव मारितः एव। सूर्यस्य दिवाकरस्य प्रभायाः स्फोटः प्रभास्फोटः तस्मिन् प्रभास्फोटे अरुणोदये अपि तमः अन्धकारः किं न विलीयते? यथा प्रभाते सूर्यस्य प्रभोदये तमः तत्क्षणमेव विलीयते। तथा भवता तं हन्तुं मनसि कृते एव स निहतः एव ॥१२१॥

सरलार्थ :- भवता तं हन्तुं मनसि कृते एव स निहतः भविष्यति। यदा सूर्यस्य प्रभोदये तमः विनश्यति ॥१२१॥

ગુજરાતી :- વળી આપ જો તેને મારવાનું મનમાં લેશો, તો તે હણાયો જ સમજો, કેમ કે અરુણોદય થતાં જ શું અંધકાર નષ્ટ નથી થતો? ॥१२१॥

हिन्दी :- यदि आप उसे मारने का निश्चय कर लेंगे तो वह पराभूत हो जायेगा क्योंकि सूर्य के उदय होने से ही क्या अंधकार अपने आप नष्ट नही हो जाता? ॥१२१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- जर तुम्ही त्याला मारण्याचा निश्चय केला तर तो मेला म्हणूनच समजा. कारण सूर्याचा उदय होताच काय अंधार आपोआप नष्ट होत नाही? ॥१२१॥

English :- So they added saying that, if King Nal decides to kill the king, then only he will be finished because only if the sun rises, the darkness can be anhilated.

परं दूतमुखेनैष, पूर्वं देवानुशिष्यते ॥
संग्रामं वा प्रणामं वा, स्वैरं पश्चात्करोतु सः ॥१२२॥

अन्वय :- परं हे देव ! एष दूतमुखेन पूर्वं अनुशिष्यते सङ्ग्रामं वा प्रणामं वा पश्चात् सः स्वैरं करोतु ॥१२२॥

विवरणम् :- परं हे देव ! एषः नृपः दूतः एव मुखं दूतमुखं तेन दूतमुखेन सन्देशवाहकेन पूर्वम् प्रथमं अनुशिष्यते उपदिश्यते । देव ! त्वया पूर्वमेषः कदम्बनृपः दूतमुखेनाऽनुशास्यः । तदनन्तरं सः कदम्बनृपः स्वैरं स्वेच्छया सङ्ग्रामं युद्धं वा प्रणामं वा करोतु । विदधातु ॥१२२॥

सरलार्थ :- परं हे देव । एषः दूतमुखेन प्रथमं अनुशास्यः । ततः सः स्वैरं सङ्ग्रामं वा प्रणामं वा करोतु ॥१२२॥

ગુજરાતી :- પરંતુ હે સ્વામી ! પ્રથમ તો તેને દૂતના મુખથી શિખામણ આપી સમજાવવો, પછી સંગ્રામ કરે અથવા પ્રણામ કરે, તે માટે પોતાની ઈચ્છા મુજબ તેને વર્તવા દેવો.॥१२२॥

हिन्दी :- लेकिन हे स्वामी ! प्रथम तो आप उसे दूत द्वारा समझाने का प्रयास कीजिए, फिर युद्ध करता है या प्रणाम करता है। उसे अपनी इच्छा के अनुसार करने दीजिये! ॥१२२॥

मराठी :- हे राजा! प्रथम दूत पाठवून त्या कदंब राजाला समज या. त्यानंतर लढाई करावची की, शरण यावचे : हे त्यालाच ठरवू या. त्याच्यावर सोपवा.॥१२२॥

English :- But, they continued saying that they should first send a messenger to him to explain to him verbally. Then we shall leave it to him to decide if they want a war or blessing from you.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो राजा समाहूय, दूतं वाग्मिनमुद्धतं ॥
अनुशिष्य महाटोपं, निःसृष्टार्थो विसृष्टवान् ॥१२३॥

अन्वय :- ततः निः सृष्टार्थो, राजा वाग्मिनम् उद्धतं महाटोपं दूतं समाहूय अनुशिष्य विसृष्टवान् ॥१२३॥

विवरणम् :- ततः तदनन्तरं निःसृष्टः साधितः अर्थः येन सः निःसृष्टार्थः साधितकार्यः राजा वाग्मिनं वाचालं उद्धतं साहसिकं महाटोपं महाडम्बरं दूतं समाहूय आकार्य अनुशिष्य अवबोध्य विसृष्टवान् प्राहिणोत् ॥१२३॥

सरलार्थ :- ततः निःसृष्टार्थः राजा नलः वाचालं उद्धतं महाटोपं दूतं समाकार्य अनुशिष्य विमुक्तवान् ॥१२३॥

ગુજરાતી:- પછી કાર્ય સાધવામાં નિપૂણ એવા નલરાજાએ વાચાળ, ઉદ્ધત તથા મહા આડંબરવાલા (એક) દૂતને બોલાવી તેને શિખામણ આપીને (તે રાજા પાસે) મોકલ્યો.॥૧૨૩॥

हिन्दी:- फिर नलराजा ने जिसने अपना कार्य साधा है, एक वाचाल, उद्धत और महान आडंबरवाले (एक) दूतको बुलाकर और उसे शिक्षा देकर (उस राजाके पास) भेजा ॥१२३॥

मराठी :- नंतर ज्याने आपले कार्य साधले आहे अश्या नलराजाने वाचाळ, उद्धट आणि महान आडंबर असणाऱ्या एका दूताला बोलावून आणि त्याला शिक्षण देऊन त्या राजाकडे पाठविले. ॥१२३॥

English :- So having decided on what he has to do, King Nal send a garrulous in (talkative) valiant and a glamourous messenger to the king after explaining to him what is to be said.

दूतस्तक्षशिलां गत्वा, कदंबनृपतिं ततः ॥
एवं स्वस्वामिसंदिष्टं, सावष्टंभोऽनुशिष्टवान् ॥१२४॥

अन्वय :- ततः दूतः तक्षशिलां गत्वा कदम्बनृपतिं सावष्टम्भः स्वस्वामिसंदिष्टम् अनुशिष्टवान् ॥१२४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- ततः तदनन्तरं दूतः तक्षशिलां गत्वा कदम्बश्चासौ नृणां पतिः नृपतिश्च कदम्बनृपतिः तं कदम्बनृपतिम् अवष्टम्भेन आक्षेपेण सह सावष्टम्भः स्वस्य स्वामी स्वस्वामी स्वस्वामिना सन्दिष्टं स्वस्वामिसन्दिष्टं अनुशिष्टवान् उपदिष्टवान् उक्तवान् ॥१२४॥

सरलार्थ :- तदनन्तरं स दूतः तक्षशिलां गत्वा कदम्बनृपतिं साक्षेपं स्वस्वामिनाऽभिहितं कथितवान् ॥१२४॥

ગુજરાતી :- **પછી તે દૂત તક્ષશિલા નગરીમાં જઈને, તે કદંબરાજાને આક્ષેપ સહિત નીચે મુજબ પોતાનો સ્વામીનો સંદેશો કહી સંભળાવા લાગ્યો.॥૧૨૪॥**

हिन्दी :- फिर वह दूत तक्षशिला नगरी में जाकर, उस कदंबराजा को आरोप सहित निम्नानुसार अपने स्वामी का संदेश सुनाने लगा ॥१२४॥

मराठी :- नंतर तो दूत तक्षशिला नगरीत गेला व त्याने आरोपा सहीत खाली उतरून आपल्या स्वामीचा संदेश त्याला सांगितला.॥१२४॥

English :- Then the messanger went to the city of Taxshila and after accusing the king, read out to him the message of king Nal.

भो कदंम्ब मम स्वामी, भरतार्धनरेश्वरः ॥
त्वामाज्ञापयति प्रीतः, सप्रसादः स्वयं नलः ॥१२५॥

अन्वय :- **भो कदम्ब! भरतार्धनरेश्वरः मम स्वामी नलः प्रीतः सप्रसादः स्वयं त्वाम् आज्ञापयति ॥१२५॥**

विवरणम् :- भो कदम्ब ! भरतस्यार्धं भरतार्धम् । नराणां मनुष्याणाम् ईश्वरः नरेश्वरः । भरतार्धस्य नरेश्वरः भरतार्धनरेश्वरः भरतार्धाधिपतिः मम स्वामी नलः नृपः प्रीतः सन्तुष्टः प्रसादेन सह वर्ततेऽसौ सप्रसादः प्रसन्नतया तव हितकामः स्वयं त्वाम् आज्ञापयति आदिशति ॥१२५॥

सरलार्थ :- भो कदम्ब ! भरतार्धनरेश्वरः मम स्वामी नलः प्रसन्नः तव हितं कर्तुकामः स्वयं त्वाम् आदिशति ॥१२५॥

ગુજરાતી :- હે કદંબરાજા! અર્ધ ભરતખંડના અધિપતિ, એવા મારા સ્વામી નલરાજા પ્રેમપૂર્વક (તમારા પર) મહેરબાની રાખે પોતે તમોને એમ ફરમાવે છે કે,॥૧૨૫॥

हिन्दी :- हे कदंबराजा ! अर्धभरत खंड के महाराजा, ऐसे मेरे स्वामी नलराजा प्रेमपूर्वक (तुम्हारे पर) कृपा कर के तुम्हे ऐसा आदेश देते हैं कि,॥१२५॥

मराठी :- हे कदंबराजा ! अर्धभरतखंडाचे अधिपती असे माझे स्वामी नलराजा प्रेमपूर्वक (तुमच्या) हितासाठी तुम्हाला असे फर्मावीत आहे की, ॥१२५॥

English :- The messanger greeting the king as Kadamray said to him that the king of the half of Bharat schetra, King Nal, speaker to you with the feeling of benevolence.

अस्मदीयपदाम्भोज - रजस्तिलकितालकः॥
धृतास्मदाज्ञामुकुटः, क्ष्माप! स्या अकुतोभयः ॥१२६॥

अन्वय :- हे क्ष्माप! अस्मदीयपदाम्भोज - रजस्तिलकितालकः धृतास्मदाज्ञामुकुटः अकुतोभयः स्याः ॥१२६॥

विवरणम् :- क्ष्मां पाति इति क्ष्मापः तत्सम्बुद्धौ हे क्ष्माप ! भूप! अस्माकम् इमौ अस्मदीयौ च तौ पदौच अस्मदीयपदौ। अस्मदीयपदौ एव अम्भोजे, पदौ अम्भोजे इव वा अस्मदीयपदाम्भोजे। अस्मदीयपदाम्भोजयोः रजांसि अस्मदीयपदाम्भोजरजांसि। अस्मदीयपदाम्भोजरजोभिः तिलकितः अलकः ललांटं येन सः अस्मदीयपदाम्भोजरजस्तिलकितालकः। येन अस्माकं चरणरजसा भाले तिलकः कृतः अस्ति सः। अस्माकम् आज्ञा अस्मदाज्ञा। अस्मदाज्ञा एव मुकुटः अस्मदाज्ञामुकुटः। धृतः अस्मदाज्ञा मुकुटः येन सः धृतास्मदाज्ञामुकुटः, अस्मदाज्ञारूपं मुकुटं धारयित्वा न विद्यते कुतः भयं यस्य सः अकुतोभयः निर्भयः स्याः। भवेः ॥१२६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- हे क्षमाप। अस्माकं चरणकमलरजसा भाले तिलकं कृत्वा अस्मदाज्ञामुकुटं मस्तके धारयित्वा अकुतोभयः निर्भयः स्याः

ગુજરાતી અર્થ :- હે રાજન્ ! અમારા ચરણકમલની રજ વડે ભાલમાં તિલક કરેલા, તથા અમારી આજ્ઞારુપી મુકુટને ધારણ કરનારા એવા તમો (હવે) બિલકુલ નિર્ભયપણે (રાજ્ય કરો)॥૧૨૬॥

हिन्दी :- हे राजन्। हमारे चरणकमल की धूल द्वारा भाल में तिलक कर के, और हमारी आज्ञारुपी मुकुट को धारण करनेवाले तुम (अब) बिलकुल निर्भयता से (राज्य करो)॥१२६॥

मराठी :- हे राजा। आमच्या चरणकमळाच्या धुळीने कपाळावर टिळा धारण कर व मस्तकावर आमच्या आज्ञेचा मुकुट धारण करून निर्भय हो.॥१२६॥

English :- The messanger says that you can rule that land a by applying on your forehead the emblem from the dust of the fect which is a lotus and by placing the crown of King Nal's commands.

नो चेत्सप्ताङ्गराज्यस्य, परिभ्रंशमवाप्स्यसि ॥
पर्यन्तं सुकृतस्येव, शीलभ्रष्टो महामुनिः ॥१२७॥

अन्वय :- नो चेत् शीलभ्रष्टः महामुनिः सुकृतस्य पर्यन्तम् इव सप्ताङ्गराज्यस्य परिभ्रंशम् अवाप्स्यसि ॥१२७॥

विवरणम् :- नो चेत् त्वं तथा न कुरुषे चेत् शीलात् भ्रष्टः शीलभ्रष्टः महान्चासौ मुनिश्च महामुनिः। शोभनं कृतं सुकृतं, तस्य सुकृतस्य पुण्यस्य पर्यन्तम् नाशम् आप्नोति। यथा शीलभ्रष्टः महामुनिः सुकृतं नाशयति। तथा सप्त अङ्गानि यस्य तद् सप्ताङ्गम्। सप्ताङ्गं च तद् राज्यं च सप्ताङ्गराज्यं, तस्य सप्ताङ्गराज्यस्य परिभ्रंशं नाशम् अवाप्यसि प्राप्स्यसि। तव सप्ताङ्गं राज्यं विनङ्क्ष्यति। इत्यर्थः ॥१२७॥

सरलार्थ :- न चेत् शीलभ्रष्टः महामुनिः यथा सुकृतस्य पर्यन्तं प्राप्नोति तथैव त्वं सप्ताङ्गराज्यस्य परिभ्रंशम् अवाप्स्यसि ॥१२७॥

ગુજરાતી અર્થ :- અને જો તેમ નહીં કરો તો, શીલવ્રતથી ભ્રષ્ટ થયેલો મહામુનિ જેમ પુણ્યના અંતને (વિનાશને) પ્રાપ્ત થાય છે, તેમ તમો (તમારાં) સાતે અંગોવાળા રાજ્યના વિનાશને પ્રાપ્ત થશો.॥૧૨૭॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- और यदि आप ऐसा करने से इन्कार करते हो तो जिस प्रकार शीलभ्रष्ट महामुनि के पुण्य का अंत (विनाश) होता है, उसी प्रकार आप के सात अंगोवाला राज्य विनाश को प्राप्त होगा ॥१२७॥

मराठी :- जर तुम्ही असे केले नाही तर जसे शीलभ्रष्ट महामुनीचे पुण्य नाश पावते. तसे तुमचे सात अंगांनी परिपूर्ण असलेले राज्य नाश पावेल. ॥१२७॥

English :- The messenger continues saying that if ever he doesn't take to this talk than his seven armed kingdom will be destroyed and ruined just as a priest who has become immodst and characterless, loses his initial mertable deeds and is ruined.

किञ्च ते हितधीर्दूतं, मां च स प्राहिणोन्नृपः ॥
अज्ञातेनान्यथागत्य, संहृतोऽभूद्भवानिह ॥१२८॥

अन्वय :- किञ्च ते हितधीः स नृपः मां दूतं प्राहिणोत् । अन्यथा अज्ञातेन इह आगत्य भवान् संहृतः स्यात् ॥१२८॥

विवरणम् :- किं च ते तव हिता धीः यस्य सः हितधीः हितकारिबुद्धिः ध्रुवं पाति नृपः सः नलनृपः मां दूतं सन्देशवाहकं प्राहिणोत् प्रैषीत् । अन्यथा नो चेत् न ज्ञातः अज्ञातः तेन अज्ञातेन इह अस्यां नगर्याम् आगत्य भवान् संहृतः हतः स्यात् । मम स्वामी तव हितमेवाभिलषति । अतः सः मां तुभ्यं दूतत्वेन प्राहिणोत् । अन्यथा अज्ञातरूपेण इहागत्य तेन त्वं संहृतः अभविष्यः ।

सरलार्थ :- किं च ते हितकारिबुद्धिः नलनृपः मां दूतं प्राहिणोत् । अन्यथा अज्ञातेन इह आगत्य भवान् हतः स्यात् ॥१२८॥

गुजराती :- વળી તારા ભાટેની હિતબુદ્ધિવાળા નલરાજાએ અને દૂત તરીકે અહીં મોકલ્યો છે, નહીંતર અજાણતાએ આવીને તને પકડી લીધો હોત. ॥१२८॥

हिन्दी :- फिर आप के हितैषी नलराजाने मुझे दूत बनाकर यहां भेजा है, नही तो सीधे यहां आकर आप को मार डाला होता ॥१२८॥

मराठी :- माझा स्वामी नलराजा तुझे हितच इच्छित आहे. म्हणून त्याने मला तुझ्याकडे दूत म्हणून पाठविले. नाहीतर न कळत येथे येऊन त्याने तुला ठार मारले असते. ॥१२८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- The messenger adds that as king Nal is a well-wisher and a benefactor, he had send him as a message, or he would have without any menager, he would have arrived and finished him.

ततः कदम्बोभाषिष्ट, सोपहासमवज्ञया ॥
नलस्तृणविशेषोऽत्र, श्रुतोऽस्माभिर्न पुरुषः ॥१२९॥

अन्वय :- ततः कदम्बः सोपहासम् अवज्ञया अभाषिष्ट । अत्र अस्माभिः नलः तृणविशेषः श्रुतः । पुरुषः न श्रुतः ॥१२९॥

विवरणम् :- ततः तदनन्तरं कदम्बः नृपः उपहासेन सह यथा स्यात् तथा सोपहासम् अवज्ञया तिरस्कारेण अभाषिष्ट अवादीत् अत्र अस्मिन् नगरे अस्माभिः नलः तृणस्य विशेषः तृणविशेषः श्रुतः आकर्णितः । नलः नाम तृणविशेषः अस्ति इत्येवास्माभिः श्रुतमस्ति । किन्तुः नलः नाम पुरुषः न श्रुतः ॥१२९॥

सरलार्थ :- तदनन्तरं कदम्बः उपहासेन सतिरस्कारम् अवादीत् अस्माभिः अत्र नलः तृणविशेषः आकर्णितः । किन्तु पुरुषः न श्रुतः

ગુજરાતી અર્થ :- પછી તે કદંબ રાજાએ ઉપહાસ સહિત તિરસ્કાર કરીને (તે દૂતને) કહ્યું કે, નલ નામના ઘાસ વિશે અમોએ સાંભળ્યું છે, પરંતુ (નલ નામનો) કોઈ પુરુષ (અમારા) સાંભળવામાં આવ્યો નથી. ॥૧૨૯॥

हिन्दी :- फिर उस कदंबराजा ने उपहास सहित तिरस्कार से (उस दूत से) कहा कि, नल नामक कोई घास है, इतना ही तो यहाँ हमने सुना है, लेकिन (नल नामक) कोई पुरूष हमने अभी तक सुना नहीं ॥१२९॥

मराठी :- नंतर कदंबराजा उपहासाने म्हणाला- आम्ही नल नावाचे गवत आहे. असे ऐकले आहे. पण नल नावाचा पुरुष काही आमच्या ऐकण्यात नाही. ॥१२९॥

English :- Then king Kadam was angry with the message and told the messenger that, he only thought that Nal was the name of a type of grass and, he had never heard it as a name of a humanbeing.

तत्किं तृणमपि क्वापि? मन्यते पूज्यतेऽपि वा ॥
प्रसीदत्यथवा भूते, बहुधृष्टोऽसि कथ्यताम् ॥१३०॥

अन्वय :- हे दूत! त्वं बहुधृष्टोऽसि तत् कथ्यताम् किं तृणं क्वापि मन्यते वा पूज्यते वा प्रसीदति वा भूते वा ॥१३०॥

विवरणम् :- हे दूत! त्वं अहु अतीव धृष्टः बहुधृष्टः अतीव साहसिकः असि। तत् कथ्यताम् उच्यताम्। किं तृणं क्वापि केनापि मन्यते वा पूज्यते अर्च्यते। अथवा तृणं प्रसीदति प्रसन्नं भवति वा भूते किमपि वक्ति किम्? ॥१३०॥

सरलार्थ :- हे दूत। त्वं अतीव साहसिकः असि तत् कथ्यताम् किं तृणं घासः क्वापि केनाऽपि मन्यते वा अर्च्यते? किं तृणं कस्यचित् प्रसन्नं भवति? अथवा किमपि भाषते इति॥१३०॥

ગુજરાતી અર્થ :- (વળી હે દૂત) તું બહુ હોશિયાર છે, માટે કહે કે, નલ નામનું ઘાસ ક્યાંયે મનાય છે? કે પૂજાય છે? અથવા તે ઘાસ (કોઈ પર) કૃપા કરે છે? કે બોલે છે? ॥૧૩૦॥

हिन्दी :- (फिर हे दूत) तू बहुत ही होशियार है, इसलिए बता कि, वैसा नल नाम का घास किधर माना जाता है? कि कहाँ पूजा जाता है? अथवा वह घास (किसी पर) कृपा करता है? कि बोलता है? ॥१३०॥

मराठी :- हे दूता! तू फारच हुशार आहेस. तर मग सांग-कौठेतरी गवतात मानमरातब दिला जातो काय? गवत कोणावर तरी प्रसन्न होते काय? गवत कधीतरी बोलते काय? ॥१३०॥

English :- Then the King describing the messenger as a brave man him saked him as to where did he come to know of the grass called or does he worship it? or on whom is this grass doing a favour to or whom is it speaking to?

दूतोऽवदत् कुश्रुतं ते, नलः स्यात् तृणं न हि ॥
यैर्नतः किन्तु दन्तात्त - तृणैस्तान् रक्षति स्म सः ॥१३१॥

अन्वय :- दूतः अवदत् - ते कुश्रुतं नलः स्यात् तृणं न। किन्तु दन्तात्ततृणैः यैः नतः तान् सः रक्षति स्म ॥१३१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- *दूतः सन्देशवाहकः अवदत् उवाद अवादीत् - ते त्वया कुत्सितं च तद् श्रुतं च कुश्रुतम् कुत्सितं श्रुतम्। नलः सम्राट् वर्तते तृणं घासः न। किन्तु दन्तैः आत्तं गृहीतं दन्तात्तं तृणं यैः ते दन्तात्ततृणाः तैः दन्तात्ततृणैः गृहीतदन्ततृणैः यैः नृपैः अयं नलः नमस्कृतः तान् नृपान् सः नलनृपः रक्षति स्म। अरक्षत्॥१३१॥*

सरलार्थ :- दूतः अवदत्। त्वया कुत्सितं श्रुतम्। नलः सम्राट् वर्तते तृणं न। किन्तु यैः मुखे घासं धृत्वा नतः। तान् नृपान् नलनृपः रक्षति स्म ॥१३१॥

ગુજરાતી અર્થ :- (ત્યારે) દૂત બોલ્યો કે, તારું સાંભળેલું જૂઠું છે, કેમ કે નલ નામનો તો મહાન રાજા છે, ઘાસ નથી, પરંતુ દાંતોમાં તે ઘાસ રાખીને જે રાજાઓએ તેને નમસ્કાર કરેલા છે, તેઓનું તેણે રક્ષણ કર્યું છે. ॥૧૩૧॥

हिन्दी :- (तब) दूत बोला कि, आप का सुना हुआ झुठा है, क्यों कि नल नामक तो महान राजा है, घास नही। लेकिन दांतो में घास रख कर जिन राजाओ ने नमस्कार किया है, उसकी उसने रक्षा की है ॥१३१॥

मराठी :- (तेव्हां) दूत म्हणाला की, तू ऐकलेले खोटे आहे, कारण की नलनावाचा तर महान् राजा आहे, गवत नाही, परंतु दातात गवत घेऊन ज्या राजांनी त्याला नमस्कार केला त्यांचे त्याने रक्षण केले आहे. ॥१३१॥

English :- At this the messenger replied that whatever King Kadam had heard was all false. And King Nal is a great King, not a types of grass, But, he added, the king who keeps grass in his mouth and bows down to King Nal, surely receives protection, from him.

ततस्त्वयापि तद् भूप, बिभ्यता नलभूपतेः ॥
अर्च्यं प्रसाद्यमाराध्यं, येन त्वमपि रक्ष्यसे॥१३२॥

अन्वय :- तद् हे भूप! ततः त्वया अपि नलभूपतेः बिभ्यता अर्च्यं प्रसाद्यं आराध्यं येन त्वम् अपि रक्ष्यसे ॥१३२॥

विवरणम् :- *तद् तस्मात् कारणात् हे भूप! यतः नलः नतान् रक्षति तस्मात् त्वया अपि नलश्चासौ भुवः पतिः भूपतिश्च नलभूपतिः तस्मात् नलभूपतेः, बिभ्यता भयं प्राप्नुवता अर्च्यं पूज्यं प्रसाद्यं आराध्यं आराधनीयं येन त्वम् अपि रक्ष्यसे। ततः त्वयाऽपि नलनृपात् भीत्वा सः अर्चनीयः, प्रसादनीयः आराधनीयः च॥१३२॥*

P.P.Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- तस्मात्कारणात् हे भूप ! त्वया अपि नलनृपात् भयं प्राप्नुवता अर्चनीयं प्रसादयितव्यं आराध्यं येन त्वम् अपि रक्ष्यसे ॥१३२॥

ગુજરાતી અર્થ :- માટે હે રાજન્ ! તારે પણ નલરાજાથી ડરીને તેની પૂજા કરવી, તેને ખુશ કરવા, તથા આરાધવા કે, જેથી તારું પણ રક્ષણ થઈ શકશે. ॥૧૩૨॥

हिन्दी :- इस लिए हे राजन्! आप को भी नलराजा से डर कर उस की पूजा करनी चाहिए, उसे खुश करना चाहिए, और आराधना करनी चाहिए, कि जिस से आप का भी रक्षण हो सके ॥१३२॥

मराठी :- यासाठी हे राजा! तूं पण नलराजाला याबरून त्याची पूजा कर. त्याला खुश ठेव आणि त्याची आराधना कर. म्हणजे तो तुझे पण रक्षण करील. ॥१३२॥

English :- So, the messenger tells the king that he should be frightened scaid of King Nal and worship him, keep him happy, So that he will stretch out his hand to protect him.

ततः साटोपकोपः सन्, दूतमूचे कदम्बशः॥
शेषराजपदे नीतः, किमरेऽहमपि त्वया ॥१३३॥

अन्वय :- ततः साटोपकोपः सन् कदम्बराट् दूतम् ऊचे-अरे ! किं त्वया अहम् अपि शेषराजपदे नीतः ॥१३३॥

विवरणम् :- ततः तदनन्तरम् आटोपेन सह वर्ततेऽसौ साटोपः। साटोपः कोपः यस्य सः साटोपकोपः। साडम्बरक्रोधः सन् कदम्बराट् दूतम् ऊचे अकथयत् अरे ! किं त्वया अहम् अपि शेषाश्च ते राजानश्च शेषराजाः शेषराजानां पदं स्थानं शेषराजपदं तस्मिन् शेषराजपदे अवशिष्टनृपस्थाने नीतः? त्वं माम् अपि निर्बलं अमन्यथाः किम्? ॥१३३॥

सरलार्थ :- ततः साडम्बरकोपः सन् कदम्बराट् दूतम् अवादीत् अरे ! किं त्वया अहम् अपि शेषराजपदे नीतः शेषराजवत् निर्बलतां प्रापितः ॥१३३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી અર્થ :- પછી ક્રોધિત થયેલો કદંબ રાજા દૂતને કહેવા લાગ્યો કે, અરે ! શું મને પણ તેં બીજા રાજાઓની કક્ષામાં મૂક્યો ? અર્થાત બીજા (નબળા) રાજાઓ જેવો મને ગણ્યો? ॥૧૩૩॥

हिन्दी :- फिर क्रोधित होता हुआ कदंबराजा दूत को कहने लगा कि, अरे! तू क्या मुझे भी दूसरे राजाओं की पदवी पर बिठाता है? याने दूसरे (शक्तिहीन) राजाओं जैसा मुझे समझता है? ॥१३३॥

मराठी :- नंतर अत्यंत क्रुध्द झालेला कदंबराजा दूताला म्हणाला की, अरे । तू मुखा काय मला दुसऱ्या राजांसारखा दुर्बळ समजत आहेस? ॥१३३॥

English :- These words of the messenger made the King blaze with rage and he asked the messenger whether he takes him to be other kings who are cowards and are dependent on King Nal for protection.

दूतोऽवादीत्ननु क्ष्माप, शेषराजपदं क्व ते ॥
त्वं हि नोनशमात्रं नः, शिशुमात्रभयङ्करः ॥१३४॥

अन्वय :- दूतः अवादीत् ननु हे क्ष्माप ! शेषराजपदं ते क्व ! त्वं हि नः शिशुमात्र-भयङ्करः गोनशमात्रम् असि ॥१३४॥

विवरणम् :- दूतः सन्देशवाहकः अवादीत् अवदत् - ननु हे क्ष्मां पाति इति क्ष्माप: तत्सम्बुद्धौ हे क्ष्माप ! नृप ! शेषः राजा शेषराजः शेषनागः शेषराजस्य पदं स्थानं शेषराजपदम् । ते तव कृते क्व कुतः भवेत् । त्वं नः अस्मांक कृते शिशुः एव शिशुमात्रं शिशुमात्राय भयङ्करोति इति शिशुमात्रभयङ्करः गोनशमात्रम् असि ॥१३४॥

सरलार्थ :- दूतः अकथयत् ननु हे क्ष्माप । शेषनागपदं ते तव क्व कुतः भवेत् । त्वं हि अस्माकं कृते शिशुमात्रभयङ्करः गोनशमात्रम् असि।

ગુજરાતી અર્થ :- (ત્યારે) દૂતે કહ્યું કે, હે સજ્જન ! તને શેષરાજની (નાગોના અધિપતિ શેષનાગની) પદવી ક્યાંથી મળે ? તું તો ખરેખર અમારે મન ફક્ત બાળકોને ડરાવનારા બળસીયા સરખો છે. ॥૧૩૪॥

हिन्दी :- (तब) दूतने कहा कि, हे राजन्! आपको शेषराज की (नागो के अधिपति शेषनाग की) पदवी कहाँ से मिलि? आप तो वास्तव में हमारे लिए सिर्फ बालक को डरानेवाले धुए के समान हो। ॥१३४॥

मराठी :- (तेव्हां) दूत म्हणाला- तुला शेषनागाचे स्थान कोठुन मिळेल? आमच्या मते तू तर लहान मुलांना भीति उत्पन्न करणारा गांडूळ आहेस. ॥१३४॥

English :- At this the messenger answered that the King should not and never give himself the title of the Shesha serpent. He added that to them, he is just a mere earthworm.

इत्थं कदम्बो वक्रोक्त्या, जितोऽजल्पदुपैत्य सः ॥
आयातस्य नलस्यात्र, दास्यामो वयमुत्तरम् ॥१३५॥

अन्वय :- इत्थं वक्रोक्त्या जितः सः कदम्बः उपैत्य अजल्पत्। अत्र आयातस्य नलस्य वयम् उत्तरं दास्यामः ॥१३५॥

विवरणम् :- इत्थं वक्रा चासौ उक्तिः च वक्रोक्तिः तया वक्रोक्त्या दूतेन जितः सः कदम्बः दूतम् उपैत्य समीपम् आगत्य अजल्पत् अवदत्-अत्र अस्यां नगर्याम् आयातस्य आगतस्य नलस्य वयम् उत्तरं दास्यामः ॥१३५॥

सरलार्थ :- इत्थं वक्रोत्या जितः सः कदम्बः दूतस्य समीपम् आगत्य अवदत्। अत्र आगतस्य नलस्य वयम् उत्तरं दास्यामः ॥१३५॥

ગુજરાતી અર્થ :- એ રીતે (તે દૂતનાં) વક્રવચનથી પરાજિત થયેલો તે કદંબરાજા તે (દૂતની) પાસે આવી કહેવા લાગ્યો કે, જ્યારે તે અહીં આવશે, ત્યારે અમો તેને ઉત્તર આપીશું.॥૧૩૫॥

हिन्दी :- इस प्रकार (उस दूत के) वक्र वचन से पराजित हुआ वह कदंबराजा (दूत के) पास आकर कहने लगा कि, जब यहाँ नलराजा आयेंगे, तब हम उन्हें ही जवाब देंगे॥१३५॥

मराठी :- अशा रीतीने दूताच्या वक्रवचनांनी पराजित झालेला तो कदंबराजा दूता जवळ येऊन म्हणाला- जेव्हां नलराजा येथे येईल, तेव्हां मी त्यांना उत्तर देईन. ॥१३५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- In this way after having heard the taunts and tortuous discourse of the messenger, the King was wild with anger and he came to the messenger and told him that he will give a reply to the query only when King Nal arrives there.

प्रत्यागत्य ततो दूतः, कोशलाधिपतेः पुरः ॥
उक्तिप्रत्युक्तिकां सर्वां, तामावेदयति स्म सः ॥१३६॥

अन्वय :- ततः सः दूतः प्रत्यागत्य कोशलाधिपतेः पुरः तां सर्वाम् उक्तिप्रत्युक्तिकां आवेदयति स्म ॥१३६॥

विवरणम् :- *ततः तत्पश्चात् सः दूतः सन्देशवाहकः प्रत्यागत्य कोशलायाः अधिपतिः कोशलाधिपतिः तस्य कोशलाधिपतेः पुरः अग्रे तां सर्वाम् उक्तिश्च प्रत्युक्तिश्च यस्यां सा उक्ति प्रत्युक्तिका ताम् उक्तिप्रत्युक्तिकां वचनप्रतिवचने, आवेदयति स्म न्यवेदयत्*

सरलार्थ :- ततः सः दूतः प्रत्यागत्य कोशलाधिपतेः पुरः तां सर्वाम् उक्तिप्रत्युक्तिकां निवेदयति स्म ॥१३६॥

ગુજરાતી અર્થ :- પછી તે દૂતે પાછા આવીને કોશલાનગરીના અધિપતિ એવા નલરાજાની પાસે તે સઘળા પ્રશ્નોત્તરો કહી સંભળાવ્યા. ॥१३६॥

हिन्दी :- फिर उस दूत ने वापस लोट कर कोशला नगरी के महाराज नलराजा के पास वह सब वृत्तांत कहकर सुनाया ॥१३६॥

मराठी :- नंतर त्या दूताने परत येऊन कोशलाधिपति नलराजाजवळ तो सगळा प्रश्नोत्तरात्मक वृत्तांत ऐकविला. ॥१३६॥

English :- Then the messenger, having returned back to Koshala, narrated the happenings in detail to King Nal.

ततोऽभिषेणयामास , सर्वसैन्येन तं नलः ॥
हस्त्यश्वरथपादाति - कम्पिताशेषभूतलः ॥१३७॥

अन्वय :- ततः हस्त्यश्वरथपादातिकम्पिताशेषभूतलः नलः सर्वसैन्येन तम् अभिषेणयामास ॥१३७॥

P.P. Ac. Gunratnasuri M.S.

विवरणम् :- ततः तदनन्तरं हस्तिनश्च अश्वाश्चरथाश्च पादातयश्च एतेषां समाहारः हस्त्यश्वरथपादातम्। हस्त्यश्वरथपादातेन कम्पितं हस्त्यश्वरथपादातिकम्पितम्। हस्त्यश्वरथपादातिकम्पितम् अशेषं भूतलं येन सः हस्त्यश्वरथपादातिकम्पिताऽशेषभूतलःनलः सर्वं च तत् सैन्यं च सर्वसैन्यं तेन सर्वसैन्येन तम् अभिषेणयामास अतिचक्रामा।१३७॥

सरलार्थ :- ततः हस्त्यश्वरथपादाति-चतुरङ्गसैन्येन अशेषभूतलं कम्पयन् नलनृपः सर्वसैन्येन सह तम् अतिचक्राम ॥१३७॥

ગુજરાતી અર્થ :- પછી હાથી, ઘોડા, રથ તથા પાયદળથી ધરતી કંપાવતા નલરાજાએ (પોતાના) સર્વ સૈન્ય વડે તે કદંબરાજા પર હુમલો કર્યો. ॥૧૩૭॥

हिन्दी :- फिर हाथी, घोडा, रथ और पेदल से समस्त पृथ्वी का तल कंपित करनेवाले नलराजा ने (अपने) पूरे सैन्य के साथ उस कदंबराजा पर आक्रमण किया ॥१३७॥

मराठी :- नंतर हत्ती, घोडे, रथ आणि पायदळ अशा चतुरंग सैन्याने सर्व पृथ्वीला कंपित करणाऱ्या नलराजाने आपल्या चतुरंग सैन्यासह कदंब राजावर आक्रमण केले. ॥१३७॥

English :- Then King Nal attacked King Kadam with elephants, horses, chariots and army on foot, which shook the ground when they ran.

अथ राम इवामर्षान्नलस्तक्षशिलापुरीं ॥
लङ्कामिव कपिव्यूहैररुणन्निजसैनिकैः ॥१३८॥

अन्वय :- अथ यथा रामः अमर्षात् कपिव्यूहैः लङ्काम् अरुणत् तथा नलः निजसैनिकैः तक्षशिलापुरीम् अरुणत् ॥१३८॥

विवरणम् :- अथ अनन्तरं यथा रामः दाशरथिः अमर्षात् क्रोधात्। कपीनां व्यूहाः समूहाः कपिव्यूहाः तैः कपिव्यूहैः कपिवृन्दैः लङ्काम् अरुणत्। तथैव नलः अमर्षात्। निजस्य सैनिकाः निजसैनिकाः तैः निजसैनिकैः स्वबलैः तक्षशिलापुरीं नगरीम् अरुणत्। न्यरुणत् ॥१३८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- अथ क्रोधात् यथा रामः कपिसमूहैः लङ्काम् अरुणत्। तथैव नलः स्वसैनिकैः तक्षशिलानगरीम् अरुणत् ॥१३८॥

ગુજરાતી અર્થ :- પછી ક્રોધથી રામચંદ્રજીએ વાનરોના સૈન્યો વડે જેમ લંકાને ઘેરી હતી, તેમ નલરાજાએ પોતાના સૈન્ય દ્વારા તક્ષશિલા નગરીને ઘેરો ઘાલ્યો. ॥૧૩૮॥

हिन्दी :- फिर क्रोध से रामचंद्रजी ने वानरो के सैन्यो से जैसे लंका को घेरा था, उसी प्रकार नलराजा ने अपने सैन्य से तक्षशिला नगरी को घेर लिया॥ ॥१३८॥

मराठी :- नंतर ज्याप्रमाणे प्रभु रामचंद्राने वानरांच्या सेनेने लंकेला वेढा दिला त्याप्रमाणे त्या नलराजाने आपल्या सैन्याकरवी तक्षशिला नगरीला वेढा दिला. ॥१३८॥

English :- Then as Ramchandra had surrounded Lanka with his army of monkeys with rage, in the same way, King nal surrounded Taxshila with his huge army.

दूतेनोचे कदम्बश्च, भवाद्यापि ममानतः ॥
स्वप्रियाणामकालेऽपि, न वैधव्यचिकीर्यदि ॥१३९॥

अन्वय :- ततः दूतेन कदम्बः ऊचे यदि भवान् अकाले अपि स्वप्रियाणां वैधव्यचिकीः न, तर्हि अद्यापि मम आनतः भव ॥१३९॥

विवरणम् :- ततः नलदूतेन कदम्बः ऊचे बभाषे। यदि भवान् न कालः अकालः तस्मिन् अकाले असमये एव, स्वस्य प्रियाः भार्याः स्वप्रियाः तासां स्वप्रियाणां निजपत्नीनां, विगतः धवः यासां ताः विधवाः विधवानां भावः वैधव्यं। वैधव्यं कर्तुम् इच्छति इति वैधव्यचिकीः न अस्ति। तदा अद्यापि मम पुरतः आनतः नम्रः भव ॥१३९॥

सरलार्थ :- ततः नलदूतेन कदम्बः बभाषे यदि असमये एव अकाले एव भवान् निजपत्नीनां वैधव्यं न चिकीर्षति तदा अद्यापि मम पुरतः नम्रः भव ॥१३९॥

ગુજરાતી અર્થ :- પછી (નલરાજાએ) કદંબરાજાને દૂત મારફતે કહેવડાવ્યું કે, જો અકાલે પણ પોતાની રાણીઓને વિધવાપણું આપવાની તારી ઇચ્છા ન હોય તો હવે પણ (આવીને) તું મને નમ. ॥૧૩૯॥

हिन्दी :- फिर (नलराजा ने) कदंबराजा को दूत के साथ कहलवाया कि, जो अभी भी स्वयं की राणीओं को विधवा करने की तेरी इच्छा नही हो तो अभी भी तु मेरे सामने आकर झुक जा ॥१३९॥

मराठी :- नंतर नलराजाने दूतामार्फत कदंबराजाला संदेश पाठविला की, जर तुला अवेळीच आपल्या राण्यांना विधवा बनवायची इच्छा नसेल तर तू अजूनसुध्दा माझ्यासमोर नमुन जा. मला शरण ये. ॥१३९॥

English :- Then King Nal send a message to king Kadam asking him that if he doesn't want to make his queens, widows. then he can still come and bow down.

कदम्बः स्माह किं बालः, किमुन्मत्तो नलस्तव ॥
वेत्ति वैरिभुजङ्गौघ-गरुत्मन्तं न मामपि ॥१४०॥

अन्वय :- **कदम्बः आह स्म किं तव नलः बालः अस्ति। उन्मत्तः अस्ति। येन वैरिभुजङ्गौघगरुत्मन्तं माम् अपि न वेत्ति ॥१४०॥**

विवरणम् :- कदम्बः आह ब्रवीति स्म - किं तव नलः बालः मूर्खः उन्मत्तः मदयुक्तः वा अस्ति। येन वैरिणः शत्रवः एव भुजङ्गाः सर्पाः वैरिभुजङ्गाः। वैरिभुजङ्गानाम् ओघः समूहः वैरिभुजङ्गौघः। वैरिभुजङ्गौघस्य गरुत्मान् गरुडः तं वैरिभुजङ्गौघगरुत्मन्तं माम् अपि "अहं वैरिभुजङ्गानां हन्ता गरुत्मान् गरुडः अस्मि" इति सः न वेत्ति किम् ॥१४०॥

सरलार्थ :- कदम्बः ब्रवीति स्म - किं तव नलः मूर्खः उन्मत्तः वा अस्ति। येन अहं वैरिभुजङ्गानां हन्ता गरुडः अस्मि इति सः न वेत्ति किम्? ॥१४०॥

ગુજરાતી :- **(ત્યારે) કદંબરાજાએ (તે દૂતને) કહ્યું કે, તારો મુર્ખ અને ઉન્મત્ત નલ, વેરીઓરૂપી સર્પો વચ્ચે ગરુડ સરખા એવા મને શું (હજુ) નથી જાણતો? ॥૧૪૦॥**

हिन्दी :- (तब) कदंबराजा ने (उस दूतसे) कहा कि, तेरा मूर्ख और उन्मत्त नल, दुश्मनों के समान सर्प के समूह के बीच गरुडसमान मुझे क्या (अभी तक) नही जानता? ॥१४०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- तेव्हा कदंबराजा दूताला म्हणाला- काय तुझा राजा नल मूर्ख आणि उन्मत्त आहे? कीं, जो मी शत्रुरूपी सापांना ठार मारणारा गरुड आहे. हे जाणत नाही? ॥१४०॥

English :- King Kadam send a mssage to King Nal that he was fanatic and was demented, who still did not understand that he and his army he was a large vulture who can devour them who are mere shakes to him, in no time at all.

मन्त्रिणोऽपि न किं तस्य, सन्ति केऽपि विवेकिनः ॥
अविमृष्टमिदं कुर्वन्, निषिद्धो नैषधिर्न यैः ॥१४१॥

अन्वय :- किं तस्य केऽपि विवेकिनः मन्त्रिणः अपि न सन्ति! यैः इदम् अविमृष्टं कुर्वन् नैषधिः न निषिद्धः ॥१४१॥

विवरणम् :- किं तस्य समीपे के अपि विवेकः येषाम् अस्ति इति विवेकिनः सदसद्विवेकशालिनः मन्त्रिणः सचिवाः अपि न सन्ति। यैः इदम् अविमृष्टम् अविचारितं कर्म कुर्वन् निषधस्य अपत्यं पुमान् नैषधिः, नलः न निषिद्धः न निवारितः।

सरलार्थ :- किं तस्य केऽपि विवेकिनः सचिवाः अपि न सन्ति ? यैः इदम् अविचारितं कर्म कुर्वन् नलः न निषिद्धः ॥

ગુજરાતી :- શું તેની પાસે કોઇ એવા વિવેકી મંત્રીઓ નૃણ નથી કે જેઓએ નલરાજાને આવું વગરવિચાર્યું કાર્ય કરતાં અટકાવ્યો નહિ? ॥૧૪૧॥

हिन्दी :- क्या उस के पास ऐसा कोई भी विवेकी मंत्री नही, जो नलराजा को ऐसा अविचारी कार्य करने से रोक सके? ॥१४१॥

मराठी :- काय त्याच्याजवळ एकही असा विवेकी मंत्री नाही, जो नलराजाला असे अविवेकी कार्य करण्यापासून परावृत्त करु शकतो? ॥१४१॥

English :- He asked if King Nal had no brillant ministers to advise him from taking such an implicit and tyrannical decision..

P.P. Ac. Gunratnasuri M.S.

हुं विज्ञातं स निर्विण्णो, नैषधिर्जीविताद् ध्रुवं ॥
तद्दूत व्रज सद्योऽहमेताऽस्मि रणलम्पटः ॥१४२॥

अन्वय :- हुं विज्ञातम् । सः नैषधिः जीविताद् ध्रुवं निर्विण्णः । तद् दूत ! व्रज । अहं सद्यः रणलम्पटः एतास्मि ॥१४२॥

विवरणम् :- हुं विज्ञातम् । बुद्धम् । सः निषधस्य अपत्यं पुमान् नैषधिः नलनृपः जीविताद् जीवनात् ध्रुवं निश्चितं निर्विण्णः खिन्नः विषण्णः अस्ति । इति प्रतीयते । तद् तेन कारणेन हे दूत ! सन्देशवाहक ! त्वं व्रज गच्छ । अहं सद्यः शीघ्रं झटिति रणे लम्पटः रणलम्पटः रणानुरागी युद्धं कर्तुम् एतास्मि आगन्तास्मि ॥१४२॥

सरलार्थ :- हुं ज्ञातम् । सः नलनृपः जीवनात् निश्चितं खिन्नः । तेन कारणेन हे दूत ! त्वं गच्छ। अहं शीघ्रं रणानुरागी आगन्तास्मि ॥

ગુજરાતી :- અરે ! હવે મને ખબર પડી કે, તે નલરાજા ખરેખર (પોતે) જીવનથી કંટાળી ગયો લાગે છે ! માટે હે દૂત ! તું જા અને યુદ્ધપ્રેમી એવો હું હમણાં જ લડવા માટે તૈયાર થઈને આવું છું ॥૧૪૨॥

हिन्दी :- अरे! अब मुझे पता चला कि, वह नलराजा सचमुच अपने जीवन से त्रस्त लगता है। हे दूत ! जाओ, युद्धप्रेमी ऐसा मैं अभी युद्ध करने के लिए तैयार होकर आता हूं ॥१४२॥

मराठी :- अरे ! आता मला कळले की, नलराजा आपल्या जीवनाला खरोखरच कंटाळला आहे, हे दूता ! तू जा, युद्धप्रेमी असा मी आता युद्ध करण्यासाठी तयार होऊन येत आहे.॥१४२॥

English :- King Kadam tells King Nal that now he come to know that King Nal is tried of his life, So he tells the messenger to go and tell King Nal that he being a lover of war, is ready to have a war with him.

श्रुत्वा दूतात्कदम्बोक्तं, तदहङ्कारदुर्धरम् ॥
नलः संवर्मयामास, युद्धश्रद्धालुसैनिकः ॥१४३॥

अन्वय :- दूतात् तद् अहङ्कारदुर्धरं कदम्बोक्तं श्रुत्वा युद्धश्रद्धालुसैनिकः नलः संवर्मयामास ॥१४३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- दूतात् दूतमुखात् सन्देशवाहकात् तद् अहङ्कारेण दुर्धरम् अहङ्कारदुर्धरम्। कदम्बेन उक्तं कथितं कदम्बोक्तं, श्रुत्वा आकर्ण्य युद्धाय श्रद्धालवः युद्धश्रद्धालवः। युद्धश्रद्धालवः सैनिकाः यस्य सः युद्धश्रद्धालुसैनिकः नलः संवर्मयामास। सन्नद्धः अभवत् ॥१४३॥

सरलार्थ :- दूतमुखात् तद् अहङ्कारदुर्धरं कदम्बेन कथितं निशम्य युद्धश्रद्धालुसैनिकैः नलः संवर्मयामास ॥१४३॥

ગુજરાતી :- **પછી દૂતના મુખથી અહંકારના આવેશવાળા તે કદંબરાજાના વચન સાંભળીને, યુદ્ધ માટે શ્રદ્ધાવાળા સૈનિકો સાથે નલરાજા બખ્તર પહેરીને તૈયાર થયો. ॥૧૪૩॥**

हिन्दी :- फिर दूत के मुख से कदम्ब राजा के अहंकारयुक्त, दुर्धर क्रोधित कदंबराजा के वचन सुनते ही, युद्ध के लिए हमेशा तैयार रहनेवाले सैनिको के साथ नलराजा बख्तर पहन कर तैयार हो गया ॥१४३॥

मराठी :- दूताच्या मुखातून अहंकाराने व घमेंडीने ओतप्रोत भरलेले कदम्बाचे वचन ऐकून ज्याचे सैन्य नेहमी युद्ध करण्यासाठी सज्ज व उत्सुक असते. अशा त्या नलराजाने अंगावर चिलखत चढविले. ॥१४३॥

English : Then King Kadam told King Nal through the messenger that he was a haughty, egotist, and an inaccesssible king, So having heard such vainful words of King Kadam, King Nal put on hs armour and got prepared for a war.

कदम्बोऽप्यभ्यमैत्रीणः, सन्नद्ध्य समभूद्बहिः ॥
त्रिपृष्टे द्वारमायाते, सिंहवद्गिरिकन्दरात् ॥१४४॥

अन्वय :- **अभ्यमैत्रीणः कदम्बः अपि सन्नद्ध्य त्रिपृष्टे द्वारम् आयाते गिरिकन्दरात् सिंहवद् बहिः समभूत् ॥१४४॥**

विवरणम् :- अमित्रम् अभियान् अभ्यमैत्रीणः कदम्बः अपि सन्नद्ध्य सज्जीभूय त्रिपृष्टे वासुदेवे द्वारम् आगते सति सिंहः यथा गिरेः कन्दरात् गुहायाः बहिः निर्गच्छति तथा सः अपि, कदम्बः अपि बहिः समभूत् बहिः निरगच्छत् ॥१४४॥

सरलार्थ :- अभ्यमेत्रीण: कदम्ब: अपि सज्जीभूय त्रिपृष्टे वासुदेवे द्वारम् आयाते यथा सिंह: गिरे: गुहाया: बहि याति तथा कदम्ब: अपि बहि: समभूत् ॥१४४॥

ગુજરાતી :- પછી કદંબરાજા પણ બખ્તર પહેરી તૈયાર થઈને, દરવાજા પર ત્રિપૃષ્ટ વાસુદેવના આવતાં સિંહ જેમ પર્વતની ગુફામાંથી બહાર નીકળે, તેમ લડવા માટે (નગરની) બહાર આવ્યો. ॥૧૪૪॥

हिन्दी :- फिर कदंबराजा भी बख्तर पहन कर तैयार हो कर द्वार पर त्रिपृष्ट वासुदेव को आते देखकर जैसे सिंह पर्वत की गुफा से बाहर निकलता है वैसे लडने के लिए वह (नगर के) बाहर आया ॥१४४॥

मराठी :- नंतर कदंबराजासुध्दा चिलखतघालून तयार होऊन, दरवाज्यावर त्रिपृष्ट वासुदेवाला पाहून सिंह ज्याप्रमाणे गुहेतून बाहेर येतो त्याप्रमाणे तो लढण्यासाठी (नगराच्या) बाहेर आला. ॥१४४॥

English :- King Kadam too put on his armour and just as the great King Triprushtha Vasudev charged out of his cave to have a war with his enemy King, in the same way he came out of his gates to have a war with his enemy King, King Nal.

प्रावर्तत तयोर्युद्धं, तत्र पूर्वं शराशरि ॥
खड्गाखड्गि ततः पश्चात्, कुन्ताकुंति ततोऽप्यनु ॥१४५॥

अन्वय :- ततः तत्र तयोः पूर्वं शराशरि युद्धं प्रावर्तता तत्पश्चात् खड्गाखड्गि। ततः अपि अनु कुन्ताकुन्ति युद्धं प्रावर्तता॥१४५॥

विवरणम् :- ततः तदनन्तरं तत्र तस्मिन् रणाङ्गणे तयोः कदम्बनलयोः सैन्ययोः पूर्वं प्रथमं शरैः शरैः प्रहृत्य इदं युद्धं प्रवृत्तं शराशरि बाणाबाणि युद्धं प्रावर्तत। ततः पश्चात् खड्गैः खड्गैः प्रहृत्य इदं युद्धं प्रवृत्तं खड्गाखड्गि, ततः अपि अनु पश्चात् कुन्तैः कुन्तैः प्रहृत्य इदं युद्धं प्रवृत्तं कुन्ताकुन्ति युद्धं प्रावर्तत ॥१४५॥

सरलार्थ :- ततः तत्र तयोः सैन्ययोः प्रथमं शराशरि युद्धं प्रावर्तत । तत्पश्चात् खड्गाखड्गि ततः अपि पश्चात् कुन्ताकुन्ति युद्धं प्रावर्तत ॥१४५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- પછી ત્યાં તે બન્ને સૈન્યો વચ્ચે પ્રથમ બાણો સાથે બાણોનું, પછી તલવારો સાથે તલવારોનું, તથા પછી ભાલાઓ સાથે ભાલાઓનું, એમ યુદ્ધ થવા લાગ્યું. ॥૧૪૫॥

हिन्दी :- फिर वहाँ दोनो सैन्यो के बीच प्रथम बाणो के साथ बाणों का, फिर तलवारो के साथ तलवारो का, तथा भालों के साथ भालों का युद्ध होने लगा॥१४५॥

मराठी :- तेथे दोन्ही सैन्यांच्या मध्ये प्रथम बाणांबाणांचे, नंतर तलवारी तलवारींचे आणि नंतर भाला भाल्यांचे युद्ध सुरू झाले. ॥१४५॥

English :- Then there was a war between both the armies first with a shower of arrows on either sider, swords clankered spears were thrown.

ऊचे कदम्बमैक्ष्वाकः, किमेतैः कीटकुट्टनैः ॥
आवयोरेव यद्वैरं वैरं, युद्धमप्यावयोस्ततः ॥१४६॥

अन्वय :- ऐक्ष्वाकः कदम्बम् ऊचे-एतैः कीटकुट्टनैः किम् ? यद् आवयोः एव वैरं ततः युद्धम् अपि आवयोः भवतु ॥१४६॥

विवरणम् :- *इक्ष्वाकोः गोत्रापत्यं पुमान् ऐक्ष्वाकः नलनृपः कदम्बम् ऊचे अकथयत् एतैः कीटानां जीवानां कुट्टनानि हिंसनानि कीटकुट्टनानि तैः कीटकुट्टनैः किम् ? यद् यतः आवयोः परस्परयोः एव वैरम्। ततः तेन कारणेन युद्धम् अपि आवयोः भवतु ॥१४६॥*

सरलार्थ :- नलनृपः कदम्बम् अब्रवीत् एतैः हिंसनैः किम् ? यद् आवयोः परस्परयोः एव वैरं तेन कारणेन युद्धम् अपि आवयोः भवतु ॥१४६॥

ગુજરાતી :- (ત્યારે) નલરાજાએ કદંબરાજાને કહ્યું કે, આ કીડા જેવા (મનુષ્યોને) મારવા મરાવવાથી શું લાભ છે ? કેમ કે આપણા બન્ને વચ્ચે જ વેર છે, માટે આપણા બન્નેનું જ દ્વંદ્વયુદ્ધ થવું જોઈએ. ॥૧૪૬॥

P.P. Ac. Gunratnasuri M.S. Jain Aradhana Trust

हिन्दी :- (तब) नलराजाने कदंबराजा को कहा कि, इस कीडे जैसे (मनुष्यो को) मरवाने मारने से क्या लाभ है, इसलिए अपने दोनों के बीच ही द्वंद्वयुद्ध होना चाहिए ॥१४६॥

मराठी :- नंतर नलराजा कदंबराजाला म्हणाला की, या जीवांची हिंसा करून काय उपयोग? कारण आपल्या दोघांमध्येच वैर आहे, म्हणून दोघांतच द्वंद्वयुद्ध व्हावे. ॥१४६॥

English :- At this king Nal said to king kadam that why should there be a bloodshed among there people who seem to be like a multitode of worms. Therfore he says that why not wrestle together.

द्वावप्यथ नरेंद्रौ तौ, संपरायपरायणौ ॥
योद्धुं जयश्रियं बाणान्, प्राहैष्टां करकानिव ॥१४७॥

अन्वय :- अथ सम्परायपरायणौ तौ द्वौ अपि नरेन्द्रौ जयश्रियं योद्धुं करकान् इव बाणान् प्राहैष्टाम् ॥१४७॥

विवरणम् :- *अथ सम्पराये युद्धे परायणौ निष्णातौ सम्परायपरायणौ अथवा सम्पराय: एव वरम् अयनं ययो: तौ सम्परायपरायणौ तौ द्वौ अपि नराणाम् इन्द्रौ नरेन्द्रौ जयस्य श्री: जयश्री: तां जयश्रियं योद्धुं परिणेतुं करकान् हिमखण्डान् इव बाणान् शरान् प्राहैष्टां प्राहिणुताम् ॥१४७॥*

सरलार्थ :- अथ युद्धे निष्णातौ तौ द्वौ अपि नलकदम्बनरेन्द्रौ जयश्रियं परिणेतुं हिमखण्डान् इव बाणान् प्राहिणुताम् ॥१४७॥

गुजराती :- પછી તે બન્ને રાજાઓ યુદ્ધ માટે તત્પર થઈ જયલક્ષ્મીને વરવા માટે કરાઓની પેઠે બાણોનો વરસાદ વરસાવવા લાગ્યા. ॥१४७॥

हिन्दी :- फिर दोनो राजा युद्ध के लिए तैयार हो कर जयलक्ष्मी को प्राप्त करने के लिए हिमखण्डकी भांति बाणों की वर्षा करने लगे

मराठी :- नंतर दोन्ही राजे युद्धासाठी तयार झाले व विजयलक्ष्मी प्राप्त करण्याकरिता हिमखण्डाप्रमाणे बाणांची वर्षा करू लागले.

English :- then both the king started to fight mutually to gain victory first with a shower of arrows on each other just as icicles fall from the sky.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपाचकार कादम्बान्, परं तत्र शिलीमुखान् ॥
अवधूय कराग्रेण, नैषधिर्नृपकुञ्जर : ॥१४८॥

अन्वय :- परं तत्र नृपकुञ्जरः नैषधिः कादम्बान् शिलीमुखान् कराग्रेण अवधूय अपाचकार ॥१४८॥

विवरणम् :- *परं किन्तु तत्र तस्मिन् रणाङ्गणे नृपः कुञ्जरः गजः इव नृपकुञ्जरः नृपश्रेष्ठः निषधस्य अपत्यं पुमान् नैषधिः नलनृपः कदम्बस्य इमे कादम्बाः तान् कादम्बान् शिलीमुखान् शरान् करस्य अग्रः कराग्रः तेन कराग्रेण अवधूय तिरस्कृत्य अपाचकार दूरीचकार ॥१४८॥*

सरलार्थ :- किंतु तत्र नृपकुञ्जरः नलः कादम्बान् शरान् करावेण तिरस्कृत्य दूरीचकार॥१४८॥

ગુજરાતી :- પરંતુ ત્યાં રાજાઓમાં હાથીસરખો નલરાજા કદંબરાજાના બાણોને (પોતાના) હાથથી અટકાવીને દૂર કરવા લાગ્યો.

हिन्दी :- परंतु राजाओ में हाथी जैसा नलराजा कदंबराजा के बाणों को हाथ से रोककर दूर करने लगे॥ ॥१४८॥

मराठी :- पण राजांमध्ये श्रेष्ठ नलराजा कदंबराजाच्या बाणांना हाताने अटकवून दूर करू लागला. ॥१४८॥

English :- But king Nal who among kings was like an elephant who used to just stop the shower of arrows of king Kadam with his hand and throw them away.

यद्यदस्त्रं कदम्बोऽन्य - दपि प्रायुङ्क्त संयति ॥
बाधतेस्म नलस्तत्तदुत्सर्गमपवादवत् ॥१४९॥

अन्वय :- अपवादः उत्सर्गम् इव संयति कदम्बः अन्यद् अपि यद्यदस्त्रं प्रायुङ्क्त तत्तत् नलः बाधते स्म ॥१४९॥

विवरणम् :- *यथा अपवादः विशेषनियमः उत्सर्गं सामान्यनियमं बाधते तथा संयति युद्धे कदम्बः अन्यद् अपि यद् यद् अस्त्रं प्रायुङ्क्त प्रयुयुजे तत् तत् सर्वम् अस्त्रं नलः बाधते स्म ॥१४९॥*

सरलार्थ :- यथा विशेषनियमः सामान्यनियमं बाधते । तथैव युद्धे कदम्बः अन्यदपि यद् यद् अस्त्रं प्रायुज्यत तद् तद् नलः बाधते स्म ॥१४९॥

ગુજરાતી :- અપવાદમાર્ગ જેમ ઉત્સર્ગમાર્ગને બાધા પહોંચાડે, તેમ તે યુદ્ધમાં કદંબરાજા બીજા પણ જે જે શસ્ત્રનો ઉપયોગ કરવા લાગ્યો, તે તે શસ્ત્રને નલરાજા બાધા પહોંચાડવા લાગ્યો. ॥૧૪૯॥

हिन्दी :- अपवादमार्ग जैसे उत्सर्गमार्ग को बाधा पहुँचाता है, वैसे उस युद्ध में कदंबराजा भी जिस जिस शस्त्रों का उपयोग करने लगा, उस उस शस्त्रों को नलराजा बाधा पहुचाने लगे।

मराठी :- विशेष नियम जसे सामान्य नियमाना बाधित करतात त्याप्रमाणे युद्धात कदंबराजा ज्या शस्त्रांचा उपयोग करीत होता त्या शस्त्रांना नलराजा निष्फळ ठरवीत होता. ॥१४९॥

English :- There are always exceptions to put a wall on the strongest of the strong regulations. In the same way, after king kadam used all types of war austries on him, king Nal would then to put a wall on them too.

नलो विध्यापयामास, क्षात्रं तेजोऽद्य मेऽखिलम् ॥
अन्धीभूतोऽत्र दर्पेण, तत्किं शलभवन्म्रिये ॥१५०॥

अन्वय :- अद्य मे अखिलं क्षात्रं तेजः नलः विध्यापयामास । तद् अत्र दर्पेण अन्धीभूतः अहं शलभवत् किं म्रिये ॥१५०॥

विवरणम् :- अद्य मे मम अखिलं सर्वं क्षत्रस्य इदं क्षात्रं तेजः नलः विध्यापयामास। शमयामास । तत् तस्मात्कारणात् अत्र अस्मिन् युद्धे दर्पेण अहङ्कारेण । न अन्धः अनन्धः। अनन्धः अन्धः भूतः अन्धीभूतः अहं शलभवत् पतङ्गवत् किं किमर्थं म्रिये?॥१५०॥

सरलार्थ :- अद्य मम सर्वं क्षात्रं तेजः नलः अशामयत् अतः अत्र युद्धे दर्पेण अन्धीभूतः अहं शलभवत् किं म्रिये?॥१५०॥

ગુજરાતી :- આજે મારા સઘળા ક્ષત્રિયપણાના તેજને નલે ઠંડું કરી નાખ્યું છે, માટે આ યુદ્ધમાં અભિમાનથી આંધળો થઈને પતંગિયાની પેઠે શા માટે મૃત્યુને આધીન થાઉં ?॥૧૫૦॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- आज मेरे पूरे क्षत्रियता के तेज को नलराजा ने ठंडा कर दिया, इसलिए इस युद्ध में अभिमान से अंधा होकर पतंगे की तरह क्यों मौत को अधीन हो जाऊँ? ॥१५०॥

मराठी :- आज माझे सर्व क्षात्र तेज नलराजाने शमविले आहे. तर मग मी अभिमानाने आंधळा होऊन विनाकारणच पतंगाप्रमाणे का मरू? ॥१५०॥

English :- Then king Kadam thinks that king Nal has wipped away the pride of his being a Rajput, (a ruling clam, so why should I die as a butterfly being overcome with vanity and self-conciet.

इति चेतसि सञ्चिन्त्य, ततः स्थानात् पलाय्यच ॥
कदम्बो व्रतमादाय, कायोत्सर्गेण तस्थिवान् ॥१५१॥

अन्वय :- इति चेतसि सञ्चिन्त्य ततः स्थानात् पलाय्य च कदम्बः व्रतम् आदाय कायोत्सर्गेण तस्थिवान् ॥१५१॥

विवरणम् :- *इति एवं चेतसि मनसि सञ्चिन्त्य विचार्य ततः तस्मात् स्थानात् युद्धक्षेत्रात् पलाय्य च कदम्बः व्रतं दीक्षाम् आदाय गृहीत्वा कायस्य उत्सर्गः त्यागः कायोत्सर्गः तेन कायोत्सर्गेण तस्थिवान् अतिष्ठत् ॥१५१॥*

ગુજરાતી :- એમ મનમાં વિચારીને, તે સ્થાનકેથી નાસી જઈને કદંબરાજા ચારિત્ર લઈ કાયોત્સર્ગ ધ્યાનમાં રહ્યા॥१५१॥

हिन्दी :- ऐसा मन में सोच कर, फिर उस स्थान को छोडकर कदंबराजा ने दीक्षा ली और वह कायोत्सर्ग ध्यान में रहे। ॥१५१॥

मराठी :- असा मनात विचार करून युद्धक्षेत्रातून पळून जाऊन कदंबराजाने दीक्षा घेतली व तो कायोत्सर्ग ध्यानात लीन झाला. ॥१५१॥

English :- So having thought, what to do next, king kadam, left his place and left the worldly life and became a priest (Diksha) by going into deep meditation (Kayotsarge).

तं च दृष्ट्वा नलः स्माह, जितोऽस्मि सुभट त्वया ।
त्वदुपात्तां क्षमां येन, न ग्रहीतुमहं क्षमः ॥१५२॥

अन्वय :- तं च दृष्टवा नलः आह स्म हे सुभट! त्वया जितः अस्मि येन त्वदुपात्तां क्षमाम् अहं ग्रहीतुं न क्षमः ॥१५२॥

विवरणम् :- *तं कदम्बमुनिं दृष्टवा अवलोक्य नलनृपः आह ब्रवीति स्म । हे सुभट ! त्वया अहं जितः अस्मि । येन त्वया उपात्तां गृहीतां क्षमाम् अहं ग्रहीतुं न क्षमः न समर्थः॥१५२॥*

सरलार्थ :- तं मुनिं निरीक्ष्य नलनृपः ब्रवीति स्म-हे सुभट ! त्वया अहं जितः अस्मि । येन त्वया गृहीतां क्षमाम् अहं ग्रहीतुं न शक्तोस्मि॥१५२॥

ગુજરાતી :- પછી તે કદંબમુનિને જોઈને નલરાજાએ તેમને કહ્યું કે, હે વીરશિરોમણિ! તેં મને જીતી લીધો છે, કેમ કે તેં સ્વીકારેલી ક્ષમાને ધારણ કરવાને હું સમર્થ નથી. ॥૧૫૨॥

हिन्दी :- फिर कदंबमुनि को देखकर नलराजा ने उन्हे कहा कि, हे वीरशिरोमणि! आपने मुझे जीत लिया, क्यों कि आपने जिस प्रकार क्षमा का स्वीकार किया है, उसे मैं ग्रहण करने में समर्थ नही हूँ॥१५२॥

मराठी :- मग त्या कदंबमुनीला पाहून नलराजा म्हणाले की, हे वीरशिरोमणे! आपण मला जिंकले आहे कारणकी तुम्ही स्वीकार केलेल्या क्षमेला धारण करण्यास मी समर्थ नाही. ॥१५२॥

English :- Then seeing the monk (Kadam), King Nal said to him, by addressing him as stalwart and a gallant king, that, he (Kadam) had won the battle, because he (Nal) wouldn't have been able to ask for forgiveness in this unique fashion. But Nal says that he is not capable to do this unique deed.

एवं कदम्बराजर्षिं, स्तुत्वा तत्सत्त्वरञ्जितः॥
तत्पुत्रमेव तद्राज्ये, जयशक्तिमतिष्ठिपत् ॥१५३॥

अन्वय :- एवं कदम्बराजर्षिं स्तुत्वा तत्सत्त्वरञ्जितः तत्पुत्रमेव जयशक्तिं तद्राज्ये अतिष्ठिपत् ॥१५३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- एवं कदम्बराजर्षिं स्तुत्वा तस्य स्तुतिं कृत्वा तस्य सत्त्यं तत्सत्त्यं तत्सत्त्येन रञ्जितः तत्सत्त्यरञ्जितः तद्बलेन प्रसन्नः नलः तस्य कदम्बनृपस्य पुत्रं तत्पुत्रं जयशक्तिम् एव तस्य राज्यं तद्राज्यं तस्मिन् तद्राज्ये अतिष्ठिपत् अस्थापयत्॥१५३॥

सरलार्थ :- एवं कदम्बमुनिं स्तुत्वा तद्बलेन प्रसन्नः नलनृपः तत्कदम्बमुनिपुत्रं जयशक्तिमेव तद्राज्ये अस्थापयत् ॥१५३॥

ગુજરાતી :- એવી રીતે તે કદંબરાજર્ષિની સ્તુતિ કરીને, તેના પરાક્રમથી ખુશી થયેલા તે નલરાજાએ તેના પુત્ર જયશક્તિને જ તેના રાજ્ય પર સ્થાપન કર્યો. ॥૧૫૩॥

हिन्दी :- इस प्रकार उस कदंबराजर्षि की स्तुति कर के, उस के पराक्रम से खुश होकर नलराजा ने उस के पुत्र जयशक्ति को ही उस के राज्यपर स्थापित किया ॥१५३॥

मराठी :- याप्रकारे त्या कदंबराजर्षींची स्तुति करून त्याच्या पराक्रमाने खुश झालेल्या नलराजाने त्याच्या पुत्रालाच त्याच्या गादीवर बसविले. ॥१५३॥

English :- In this way, King Nal praised the monk (Kadam) for such a herioc deed and placed his son Jaishakti on the throne, in his place.

नलोऽप्यालोच्य निःशेषैः, प्रभूष्णुर्विष्णुवन्नृपैः ॥
भरतार्धस्य साम्राज्ये, तदानीमभ्यषिच्यत ॥१५४॥

अन्वय :- निःशेषैः नृपैः आलोच्य प्रभूष्णुः नलः अपि भरतार्धस्य साम्राज्ये तदानीं विष्णुवत् अभ्यषिच्यत ॥१५४॥

विवरणम् :- निःशेषैः अखिलैः नृपैः आलोच्य विचार्य प्रभूष्णुः समर्थः नलः अपि भरतस्य अर्धं भरतार्धं तस्य भरतार्धस्य साम्राजः भावः साम्राज्यं तस्मिन् साम्राज्ये तदानीं विष्णुना तुल्यं विष्णुः इव इत्यर्थः अभ्यषिच्यत अभिषिक्तः ॥१५४॥

सरलार्थ :- अखिलैः नृपैः विचार्य समर्थः नलः अपि भरतार्धस्य साम्राज्ये तदानीं विष्णुः इव अभिषिक्तः ॥१५४॥

ગુજરાતી :- પછી સર્વ રાજાઓએ (૫૨૫૨૫૨) વિચાર કરીને તે મહાપરાક્રમી નલરાજાનો અર્ધભરતખંડના રાજ્ય પર તે જ વખતે વાસુદેવની પેઠે રાજ્યાભિષેક કર્યો. ॥૧૫૪॥

हिन्दी :- फिर सभी राजाओं ने (परस्पर) विचार-विमर्श कर के उस महापराक्रमी नलराजा का अर्धभरतखंड के राज्य पर उसी समय वासुदेव के समान राज्याभिषेक किया॥ ॥१५४॥

मराठी :- नंतर सर्व राजांनी (परस्पर) विचार करून महापराक्रमी नलराजाला अर्धभरतखंडाच्या राज्यावर त्याच वेळेला वासुदेवाप्रमाणे राज्याभिषेक केला. ॥१५४॥

English :- Them all the Kings, having thought among themselves, coronated this gallant and brave King Nal as the chef of half of Bharat schetra, just as the cornation of the graet King Vasudev had taken place.

नलोऽनलसमानौजाः, कोशलायामथैयिवान् ॥
अपूजि राजभिः सर्वैं - र्धनैर्माङ्गलिकीकृतैः ॥१५५॥

अन्वय :- अथ अनलसमानौजाः नलः कोशलायाम् ऐयिवान्। सर्वैः राजभिः माङ्गलिककृतैः धनैः अपूजि ॥१५५॥

विवरणम् :- अथ अनलेन अग्निना समानम् ओजः यस्य सः अनलसमानौजाः अग्निसदृशतेजाः नलः कोशलायां नगर्याम् ऐयिवान् आगतवान्। सर्वैः अखिलैः राजभिः नृपः मङ्गलं प्रयोजनं येषां तानि माङ्गलिकानि माङ्गलिकानि कृतानि माङ्गलिककृतानि तैः माङ्गलिककृतैः धनैः वित्तैः अपूजि अपूज्यत ॥१५५॥

सरलार्थ :- अग्निसमानतेजाः नलनृपः कोशलायाम् आगतवान्। सर्वैः राजभिः माङ्गलिककृतैः धनैः अपूज्यत ॥१५५॥

ગુજરાતી :- પછી અગ્નિસમાન તેજવાળો નલરાજા કોશલાનગરીમાં આવ્યો, ત્યારે સઘળા રાજાઓએ મંગલરુપ દ્રવ્યો વડે તેની પૂજા કરી. ॥૧૫૫॥

हिन्दी :- फिर अग्निसमान तेजवाला नलराजा कोशलानगरी में आया, तब सभी राजाओं ने मांगलिक द्रव्य से उन की पूजा की॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- नंतर अग्निप्रमाणे तेजोमय नलराजा कोशलानगरीत आला, तेव्हा सगळ्या राजांनी मंगलरुपी द्रव्यांनी त्याची पूजा केली. ॥१५५॥

English :- When King Nal, blazing as the sun, entered the city of Koshala, all the kings worshipped and felicitated him with the religious austries performed at the inaugural of the auspicious arrival of King Nal.

नलेन भुज्यते सर्वा, सार्वभौमेन भूभुजा ॥
किञ्च भूर्भ्यपि भैमीव - एकपत्नी महासती ॥१५६॥

अन्वय :- किञ्च सार्वभौमेन नलेन भूभुजा एकपत्नी महासती भैमी इव सर्वाभूमिः अपि भुज्यते।

विवरणम् :- किञ्च अपरञ्च सर्वा चासौ भूमिश्च सर्वभूमिः। सर्वभूमेः ईश्वरः सार्वभौमः तेन सार्वभौमेन नलेन भुवं भुनक्ति भुङ्क्तेऽसौ भूभुक् तेन भूभुजा एकः एवः पतिः यस्याः सा एकपत्नी पतिव्रता महती चासौ सतीच महासती भीमस्य अपत्यं स्त्री भैमी दमयन्ती इव सर्वा भूमिः अपि भुज्यते।

सरलार्थ :- किञ्च सार्वभौमेन नलेन नृपेण एकपत्नी महासती दमयन्ती इव सर्वा भूमिः अपि भुज्यते।

ગુજરાતી :- વળી સાર્વભૌમ નલરાજા એકપત્ની મહાન સતી દમયન્તીની પેઠે સઘળી પૃથ્વીને પણ ભોગવવા લાગ્યો. અર્થાત્ અર્ધ ભરતખંડનું રાજ્ય તે પોતે જ નિષ્કંટકપણે ભોગવવા લાગ્યો. ॥૧૫૬॥

हिन्दी :- फिर नलराजा एकपत्नी महान सती दमयंती के समान पूर्ण पृथ्वी को भी भोगने लगा। अर्थात् अर्धभरतखंड का राज्य वह स्वयं निष्कंटकता से भोगने लगा ॥१५६॥

मराठी :- नंतर सार्वभौम नलराजा पतिव्रता व महासती दमयंतीप्रमाणे पूर्ण पृथ्वीचा भोग घेऊ लागला. म्हणजेच अर्धभरतखंडाचे राज्य तो स्वत: निष्कलंकपणे भोगू लागला. ॥१५६॥

English :- Then just as Damyanti is one wife of one husband in the same way the universal monarch King Nal them started to endure the weight of the Bharatschetra. Therfore he after the half of the Bharatschetra, started to rule the land peacefully.

कूबरस्तु कुलाङ्गारो, राज्यलिप्सुर्नलस्य सः।।
अधीतशाकिनीमन्त्र, इवास्थात् छलदत्तदृक् ।।१५७।।

अन्वय :- किन्तु कुलाङ्गारः सः कूबरः नलस्य राज्यलिप्सुः अधीतशाकिनीमन्त्र इव छलदत्तदृक् अस्थात् ।।१५७।।

विवरणम् :- किन्तु कुलस्य अङ्गारःकुलाङ्गारः कुलकलङ्कःसः कूबरः नलस्य, लब्धुम् इच्छुः लिप्सुः। राज्यस्य लिप्सुः राज्यलिप्सुः राज्यं ग्रहीतुकामः, शाकिन्याः मन्त्रः शाकिनीमन्त्रः। अधीतः पठितः शाकिनीमन्त्रः येन सः अधीतशाकिनीमन्त्रः इव छले एव दत्ता दृक् येन सः छलदत्तदृक् अस्थात् ।।१५७।।

सरलार्थ :- कुलाङ्गारः स कूबरः नलस्य राज्यं लब्धुमैच्छत्। तेन सः यथा अधीतशाकिनीमन्त्रः नरः छलेषु एव दत्तदृष्टिः वर्तते तथैव नले छलदत्तदृष्टिः अस्थात्।।१५७।।

गुजराती :- परंतु कुळमां अंगारासरखो ते कुबर नलराजानुं राज्य छीनवी लेवानी अभिलाषा करवा लाग्यो, तथा शाकिनी संबंधी मंत्रना अभ्यासीनी पेठे कंईक छलकपट शोधवा पर ज दृष्टि राखवा लाग्यो. ।।१५७।।

हिन्दी :- लेकिन कुल में अंगारे के समान वह कुबर नलराजा का राज्य हडपने की अभिलाषा करने लगा, और शाकिनीसंबंधी मंत्र के अभ्यासी के समान कोइ छलकपट ढूँढने के लिए दृष्टि रखने लगा ।।१५७।।

मराठी :- परंतु कुलकलंक कुबर नलराजाचे राज्य प्राप्त करण्याच्या इच्छेने, आणि शाकिनीमंत्राचा अभ्यास केलेला मनुष्य ज्याप्रमाणे छल-कपट करण्याकडेच दृष्टि लावतो. त्याप्रमाणे नलराजाकडे छल-कपट दृष्टीने पाहू लागला. ।।१५७।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Here Kubar was who seemed like fire, out to disgrace his family's prestige by yearning for his brother king Nal's kingdom. And he tried his best to have a look, in the way to bring a downfall on his brother either throught blackmagic or withchcraft.

गुणिनोऽपि नलस्यासीद्, द्यूतव्यसनदूषणं ॥
कलङ्क इव चन्द्रस्य, क्षारत्वमिव वारिधेः ॥१५८॥

अन्वय :- चन्द्रस्य कलङ्कः इव, वारिधेः क्षारत्वम् इव, गुणिनः नलस्य अपि द्यूतव्यसनदूषणम् आसीत् ॥१५८॥

विवरणम् :- चन्द्रस्य निशाकरस्य कलङ्कः इव, वारीणि धीयन्ते अस्मिन् इति वारिधिः तस्य वारिधेः समुद्रस्य क्षारस्य भावः क्षारत्वम् इव, गुणाः अस्य सन्ति इति गुणी तस्य गुणिनः नलस्य अपि द्यूतस्य व्यसनं द्यूतव्यसनम्। द्यूतव्यसनम् एव दूषणं द्यूतव्यसनदूषणम् आसीत् ॥१५८॥

सरलार्थ :- यथा चन्द्रस्य कलङ्कः, वारिधेः क्षारत्वम् दूषणमस्ति । तथा गुणिनः नलस्य अपि यूतव्यसनदूषणम् आसीत् ॥१५८॥

ગુજરાતી :- ચંદ્રના કલંકની પેઠે, તથા મહાસાગરની ખારાશની પેઠે ગુણવાન એવા નલરાજામાં પણ જુગાર રમવાના વ્યસનનું મોટું દૂષણ હતું. ॥૧૫૮॥

हिन्दी :- चंद्र के कलंक समान तथा महासागर की क्षार के समान, गुणवान ऐसे नलराजा में भी जुआ खेलने के व्यसन का बडा दोष था।

मराठी :- चन्द्राला कलंकाचे व महासागराला खारटपणाचे दूषण आहे. त्याप्रमाणे गुणवान् नलराजाला यूत खेळण्याचा वाईट नाद होता. ॥१५८॥

English :- Just as there are stains on the moon and the sea water is salty, in the same way King Nal after being a King of ample qualities he still had a bad quality of gambling.

विजिगीषुस्ततो राज्यं, कूबरो नूनमन्वहं ॥
मायया रमयामास, देवनैर्द्यूतकारवत् ॥१५९॥

अन्वय :- ततः राज्यं विजिगीषुः कूबरः नूनम् अन्वहं मायया देवनैः द्यूतकारवत् रमयामास ॥१५९॥

विवरणम् :- ततः तदनन्तरं राज्यं विजेतुम् इच्छुः विजिगीषुः कूबरः नूनम् बत अन्वहं प्रत्यहं मायया कपटेन देवनैः पाशैः द्यूतं करोति इति द्यूतकारः द्यूतकारेण तुल्यं द्यूतकारवत् रमयामास अरमयत् ॥१५९॥

सरलार्थ :- तदनन्तरं राज्यं विजेतुम् इच्छुः कूबरः नूनम् अन्वहं कपटेन पासैः द्यूतकारवत् अरमयत् ॥१५९॥

ગુજરાતી :- પછી નલરાજાનું રાજ્ય જીતી લેવાની ઈચ્છાવાળો કૂબર કપટક્રિયાથી પાસાઓ વડે જુગારીની પેઠે તેની સાથે જુગાર રમવા લાગ્યો. ॥१५९॥

हिन्दी :- फिर नलराजा का राज्य जीतने की इच्छा से कुबर कपट से पासे फेंक कर जुआरी की तरह उसके साथ जुआ खेलने लगा

मराठी :- नंतर नलराजाचे राज्य जिंकण्याची इच्छा करणारा कुबर खरोखर नेहमी कपटाने फासे टाकून जुगाऱ्याप्रमाणे नलराजाशी जुगार खेळू लागला. ॥१५९॥

English :- Then his brother Kubar, with the sly desire of taking over the kingdom started to gamble with his brother by throwing the dice as a profssional gambler.

क्रीडतोश्चानयोर्नित्य - मभूद्दोलास्थवज्जयः ॥
मणिर्डमरुकस्येव, काकस्येवाक्षिगोलकः ॥१६०॥

अन्वय :- डमरुकस्य मणिः इव, काकस्य अक्षिगोलकः इव, नित्यं क्रीडतोः अनयोः जयः दोलस्थवत् अभूत्॥१६०॥

विवरणम् :- यथा डमरुकस्य मणिः कदाचित् इतः कदाचित् च ततः भवति। यथा च काकस्य अक्ष्णः गोलकः अक्षिगोलकः कदाचित् इतः कदाचित् ततः भवति। यथा च दोलायां तिष्ठन् नरः कदाचित् इतः कदाचित् च ततः भवति तथैव द्यूतं क्रीडतोः नलकूबरयोः जयः अपि कदाचित् नलं प्रति कदाचित् च कूबरम् प्रति अभवत् ॥१६०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- डमरुकस्य मणिः इव, काकस्य अक्षिगोलकः इव, दोलास्थः इव, च क्रीडतोः तयोः जयः अभूत् ॥१६०॥

गुजराती :- બન્ને વચ્ચે, ડમરુમાં (ડાકલાંમાં) રહેલા કાંકરાની પેઠે, તથા કાગડાની આંખના ડોળાની પેઠે, વિજય હીંચોળામાં બેઠલાની પેઠે ઝોલાં ખાતો હતો. ॥१६०॥

हिन्दी :- जुगार खेलते उन दोनों के बीच, डमरु में रखे हुए कंकर की तरह, और कौए की आंख की पुतली के समान, हमेशा विजय झुले में बैठकर हिचकोले खा रह था। अर्थात द्युतक्रीडा में कभी नल की विजय होती तो कभी कूबर की॥१६०॥

मराठी :- यूत खेळत असतांना ज्याप्रमाणे डमरुतील मणी, कावळ्याच्या डोळ्यातील गोलक व पाळण्यात बसलेला माणूस इकडून तिकडे हेलकावे खातात. त्याप्रमाणे विजयलक्ष्मी त्या दोघांत हेलकावे खात होती. कधी नलराजाकडे तर कधी कुबरकडे जात होती. ॥१६०॥

English :- While gambling, victory used to either be on King Nal's side or Kubar's side just as bead on the tambourine plays either on one side or the other side or just as a crow whose pupil moves from one lye to another. In this way either of them who used to be the winners of them who used to be the winner used to swing on the swing of victory.

अन्यदा दैवदोषेण, कूबरं नलभूपतिः ॥
द्यूतकर्मप्रवीणोऽपि, न विजेतुमपारयत् ॥१६१॥

अन्वय :- अन्यदा दैवदोषेण द्यूतकर्मप्रवीणः नलभूपतिः अपि कूबरं विजेतुं न अपारयत्॥१६१॥

विवरणम् :- अन्यदा एकस्मिन् दिने दैवस्य भाग्यस्य दोषः दैवदोषः तेन दैवदोषेण द्यूतस्य कर्म द्यूतकर्म। द्यूतकर्मणि प्रवीणः द्यूतकर्मप्रवीणः नलश्चासौ भुवः पतिः भूपतिश्च नलभूपतिः अपि कूबरं विजेतुं न अपारयत् न पारयाञ्चकार। समर्थो न बभूव ॥१६१॥

सरलार्थ :- एकस्मिन् दिवसे भाग्यदोषेण द्यूतकर्मप्रवीणः अपि नलभूपतिः कूबरं विजेतुं न अपारयत् ॥१६१॥

ગુજરાતી :- પછી એક દિવસ દૈવયોગે જુગાર રમવામાં હોશીયાર છતાં પણ નલરાજા કુબરને જીતવામાં પહોંચી શક્યો નહીં. ॥૧૬૦॥

हिन्दी :- फिर एक दिन दैवयोग से जुआ खेलने में होशियार होने पर भी नलराजा कूबर को जीत नहीं सका ॥१६१॥

मराठी :- नंतर एक दिवस योगानुयोग जुगार खेळण्यात पटाईत असूनसुध्दा नलराजा कुबराला जिंकू शकला नाही. ॥१६१॥

English :- One day just by chance Kubar, turned out to be more brillant than Nal and defected him in the game of dice.

पतितं चिन्तितैः पाशैस्तद्ज्ञस्यापि नलस्य न ॥
बभूव कूबरस्यैव, वारंवारं जयः पुनः ॥१६२॥

अन्वय :- तद्ज्ञस्यापि नलस्य चिन्तितैः पाशैः न पतितम्। कूबरस्य एव वारंवारं पुनः जयः बभूव ॥१६२॥

विवरणम् :- तद् जानाति इति तज्ज्ञः तस्य तज्ज्ञस्य अपि अक्षनिपुणस्यापि नलस्य चिन्तितैः विचारितैः पाशैः न पतितम्। कूबरस्य एव वारंवारं पुनः पुनः जयः बभूव अभवत् ॥१६२॥

सरलार्थ :- तज्ज्ञस्यापि नलस्य मनसि चिन्तितैः पाशैः न पतितम्। कूबरस्य एव वारंवारं पुनः पुनः जयः अभवत् ॥१६२॥

ગુજરાતી :- દ્યૂતવિદ્યામાં કુશલ એવા નલરાજાના પાસા ચિંતવ્યા મુજબ પડ્યા નહીં, અને કુબરની જ વારંવાર જીત થવા માંડી. ॥૧૬૨॥

हिन्दी :- द्यूतविद्या में कुशल ऐसे नलराजा के पासे मन के लायक पडे नहीं और कुबर की बार बार जीत होती रही ॥१६२॥

मराठी :- द्यूतविद्येत प्रवीण असलेल्या नलराजाचे फासे त्याच्या मनाप्रमाणे पडले नाही आणि कुबरच पुन्हा पुन्हा जिंकु लागला. ॥१६२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- King Nal, being so intelligent in the game of dice, still couldn't get the numbers what he had accepted and Kubar kept tasting victory repeatedly.

ततो नलः शनैर्ग्राम - नगरादीनि हारयन् ॥
ग्रीष्मे सर इवाम्भोभि - र्हीयमानःश्रियाभवत् ॥१६३॥

अन्वय :- ततः यथा गीष्मे सरः अम्भोभिः हीयमानं भवति तथैव शनैः ग्रामनगरदीनि हारयन् नलः श्रिया हीयमानः अभवत्॥१६३॥

विवरणम् :- ततः तत्पश्चात् शनैः ग्रामाश्च नगराणि च ग्रामनगराणि आदौ येषां तानि ग्रामनगरादीनि हारयन् नलः यथा ग्रीष्मे ऋतौ सरः कासारः अम्भोभिः हीयमानं भवति तथा श्रिया हीयमानः अभवत् ॥१६३॥

सरलार्थ :- तदनन्तरं नलः शनैः ग्रामनगरादीनि हारयन् यथा ग्रीष्मर्तौ सरः हीयमानं भवति तथा श्रिया हीयमानः अभवत् ॥१६३॥

ગુજરાતી :- **તેથી નલરાજા ધીમે ધીમે ગામ તથા નગર આદિ હારી ગયો અને ગ્રીષ્મ ઋતુમાં તળાવ જેમ જલવિહીન થઈ જાય, તેમ લક્ષ્મી ગુમાવી બેઠો. ॥૧૬૩॥**

हिन्दी :- जिस से नलराजा धीरे धीरे गांव, नगर आदि हार गया और ग्रीष्म ऋतु में तालाब जिस प्रकार जलहीन हो जाता है, उसी प्रकार वह लक्ष्मी से वंचित हो गया ॥१६३॥

मराठी :- नलराजा हळूहळू गाव, नगर सगळ हरला तसेच ग्रीष्म ऋतूत तलाव जसे पाण्याने रिकामे होतात तसे तो लक्ष्मीहीन झाला. ॥१६३॥

English :- King Nal slowly kept on forfieting villages, cities and just as during the summer season the water from the pond keeps on evaporating, in the same way, king Nal kept on evaporating his wealth to Kubar.

अमुञ्चति नले द्यूतं, तल्लोकस्य निशाभवत् ॥
क्षणे क्षणे जयजुषः, कूबरस्य दिनं पुनः ॥१६४॥

अन्वय :- नले द्यूतं नमुञ्चति तल्लोकस्य निशा अभवत् । क्षणे क्षणे जयजुषः कूबरस्य लोकस्य पुनः दिनम् अभवत् ॥१६४॥

विवरणम् :- नले द्यूतं न मुञ्चति अमुञ्चति सति तस्य नलस्य लोकः तल्लोकः तस्य तल्लोकस्य निशा रात्रिः अभवत् अभूत् बभूव । यथा यथा नलः द्यूतं न मुञ्चति तथा तथा नलस्य लोकः निराशः अभवत् । क्षणे क्षणे प्रतिक्षणं जयं जुषतेऽसौ जयजुट् तस्य जयजुषः कूबरस्य लोकस्य पुनः दिनं दिवसः अभवत् । क्षणेक्षणे जयं प्राप्नुवतः कूबरस्य लोकः दिनवत् प्रसन्नः अभवत् ॥१६४॥

सरलार्थ :- नले द्यूतम् अमुञ्चति सति तल्लोकस्य निशा अभवत् । प्रतिक्षणं जयजुषः कूबरस्य पुनः दिवसः अभवत् ॥१६४॥

ગુજરાતી :- નલરાજાએ જુગાર રમવાનું નહીં છોડવાથી, તેના પક્ષના લોકોને રાત્રિ (પડતી દશા) ભાસવા લાગી, તથા ક્ષણે ક્ષણે જીતતા એવા કુબરાના પક્ષના લોકોને દિવસ (ચડતી દશા) ભાસવા લાગ્યો. ॥१६४॥

हिन्दी :- नलराजा ने जुआ खेलना छोडा नही, तब उस के पक्ष के लोगों को रात्रि (पडती दशा) का आभास होने लगा, तब क्षणक्षण में जीतते हुए कुबर के पक्ष के लोगों को दिन (चडती दशा) का आभास होने लगा ॥१६४॥

मराठी :- नलराजा द्यूत खेळणे थांबवीत नाही. हे पाहून नलराज़ाच्या पक्षातील लोकांना चह्कडे अंधार भास् लागला. (सर्व चिन्तातुर झाले) तर क्षणाक्षणाला जिंकणाऱ्या कुबराच्या पक्षातील सर्व लोकांना जिकडे तिकडे प्रकाश दिस् लागला. सर्व जण हर्षभरित झाले. ॥१६४॥

English :- But at this too king Nal did not stop playing the game of dice. The partisans on King Nal's side could see the downfall of king Nal and the partisans on Kubar's side could see the rise of Kubar.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नलानुरागिभिर्लोकै - श्चक्रे हाहारवस्ततः ॥
तं चाकर्ण्य समायासी - दाकुला दमयन्त्यपि ॥१६५॥

अन्वय :- ततः नलानुरागिभिः लोकैः हाहारवः चक्रे तं च आकर्ण्य आकुला दमयन्ती अपि समायासीत्

विवरणम् :- *ततः तदनन्तरं नले अनुरागिणः नलानुरागिणः तैः नलानुरागिभिः लोकैः जनैः हाहा इति रवः ध्वनिः हाहारवः चक्रे। सर्वे नलानुरागिणः दुःखेन हाहारवमकुर्वन्। तं च हाहारवम् आकर्ण्य निशम्य श्रुत्वा आकुला व्याकुला दमयन्ती अपि समायासीत् समायात् ॥१६५॥*

सरलार्थ :- ततः नलानुरागिभिः लोकैः हाहारवः अक्रियत। तं हाहारवं श्रुत्वा आकुला दमयन्ती अपि समायात् ॥१६५॥

ગુજરાતી :- પછી નલરાજાના અનુરાગી લોકોએ હાહાકાર કર્યો, અને તે સાંભળીને ગભરાટમાં પડેલી દમયંતી પણ ત્યાં આવી. ॥૧૬૫॥

हिन्दी :- फिर नलराजा के अनुरागी लोगों ने हाहाकार किया, और यह सुनकर घबरायी हुई दमयंती भी वहाँ आयी ॥१६५॥

मराठी :- नंतर नलराजावर प्रेम करणाऱ्या नलराजाच्या पक्षातील लोकांनी हाहाकार करावयास सुरूवात केली. तो हाहाकार ऐकून दमयन्ती पण घाबरली व तेथे आली. ॥१६५॥

English :- Then the partisans of king Nal gave out a tumult of distress. When Damyanti heard this call of lamentation, she came out running.

ऊचे च तमहं किञ्चित्, प्रार्थये प्रार्थितप्रद ॥
मा देवीर्देव दुर्दैव - पाशिकैः पाशकैर्विभो ॥१६६॥

अन्वय :- तम् ऊचे हे प्रार्थितप्रद देव! अहं किञ्चित् प्रार्थये हे विभो दुर्दैव - पाशिकैः पाशकैः मा देवीः ॥१६६॥

P.P. Ac. Gunratnasuri M.S.

www.kobatirth.org

विवरणम् :- तम् नलं दमयन्ती ऊचे बभाषे - प्रार्थितं प्रददाति इति प्रार्थितप्रदः तत्सम्बुद्धौ हे प्रार्थितप्रद! देव! अहं किञ्चित् प्रार्थये। हे विभो! दुष्टं दैवं भाग्यं दुर्दैवम्। दुर्दैवं पाशिकाः इव दुर्दैवपाशिकाः तैः दुर्दैवपाशिकैः पाशकैः मा देवीः मा क्रीड ॥१६६॥

सरलार्थ :- दमयन्ती तं नलम् अवदत्। हे प्रर्थितप्रद! अहं किञ्चित् प्रार्थये। हे विभो! दुर्दैवपाशिकैः पाशकैः मा देवीः ॥१६६॥

गुजराती :- આને તે નલરાજાને કહેવા લાગી કે, હે નાથ! હે પ્રાર્થિત વસ્તુ દેનારા! હું આપને પ્રાર્થના કરું છું કે, હે સ્વામી! દુર્દૈવરૂપી પારધી જેવા આ પાસાઓ વડે આપ જુગાર ન રમો. ॥૧૬૬॥

हिन्दी :- और वह नलराजा से कहने लगी कि, हे नाथ! हे प्रार्थित वस्तु देनेवाले! मैं आप से कुछ प्रार्थना करती हूँ कि, हे स्वामी! दुर्दैवरूपी पारधिसमान् इस पासे से आप जुआ मत खेलिए. ॥१६६॥

मराठी :- आणि ती नलराजांना म्हणू लागली की, हे नाथ! हे प्रार्थित वस्तु देणारे! मी आपल्याला काही प्रार्थना करीत आहे की, हे स्वामी! दुर्दैवरूपी पारध्यांसारख्या या पाशांनी तुम्ही जुगार खेळू नका? ॥१६६॥

English :- She entered the hall and addressing Nal as a master said to him that as he had granted her all her requests so she pleads to him to accept her another request as to stop gambling with the dice as it will only bring them a ruinous rain as the hunter who was out to catch the pigeons.

कूबरस्य वरं राज्यं, स्वयं यच्छ प्रियानुज ॥
हृतं राज्यं हठादस्ये - त्यकीर्त्तिं स्वस्य् मा कृथाः ॥१६७॥

अन्वय :- प्रियानुज! स्वयं कूबरस्य राज्यं यच्छ इति वरम्। अस्य राज्यं हठात् हृतं इति स्वस्य् अकीर्त्तिं मा कृथाः ॥ मा कार्षीः ॥१६७॥

विवरणम् :- अनुजायतेऽसौ अनुजः। प्रियः अनुजः यस्य् सः प्रियानुजः तत्सम्बुद्धौ हे प्रियानुज! त्वं स्वयंमेव आत्मना कूबरस्य् कूबराय राज्यं यच्छ इति वरं श्रेष्ठम्। अस्य नलस्य राज्यं हठात् बलात् हृतम् इति एवं स्वस्य् अकीर्त्तिम् अपकीर्तिं मा कृथाः मा कुरु ॥१६७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- हे प्रियानुज! त्वं स्वयमेव कूबरस्य राज्यं यच्छ अन्यथा स राज्यं हरेत् चेत् अस्य नलस्य राज्यं कूबरेण बलात् हृतम् इति तव अपकीर्तिः स्यात् ताम् अपकीर्तिं मा कुरु ॥१६७॥

ગુજરાતી :- નાના ભાઈને ચાહનારા હે સ્વામી! આપ આપની મેળે જ કુબરને રાજ્ય સોંપી દો તો સારું, કેમ કે બળાત્કારે પણ એ તમારું રાજ્ય લેઈ લેશે, માટે એમ કરીને આપની અપકીર્તિ ન કરાવો! ॥૧૬૭॥

हिन्दी :- जिसे अपना छोटा भाइ प्रिय है ऐसे हे स्वामी! आप के लिए आप की तरफ से कुबर को राज्य सोंप देना अच्छा है, क्यों की यह जबरदस्ती आप से राज्य ले लेगा, इसलिए ऐसा कर के आप अपनी अपकीर्ति न करें। ॥१६७॥

मराठी :- ज्याला आपला लहान (धाकटा) भाऊ प्रिय आहे असे हे स्वामी! आपण आपल्याकडून कुबरला राज्य देणे चांगले, कारणकी हा जबरदस्ती आपल्याकडून राज्य घेईल आणि असे करून तुम्ही तुमची अपकीर्ति करू नका? ॥१६७॥

English :- She continues saying that, if he loved his brother, he should on his own handover the kingdom to him and not bring disgrace and approbation on himself, by losing the game.

यद् युद्धैरर्जितं राज्यं, नलनलोऽक्षैरहारयत् ॥
इति मे दुःखकृन्नाथ, चौरादिहृतवस्तुवत् ॥१६८॥

अन्वय :- हे नाथ यद् युद्धैः अर्जित राज्यं तद् अक्षैः अहारयत् इति चौरादिहृतवस्तुवत् मे दुःखकृत् अस्ति ॥१६८॥

विवरणम् :- नलः यद् युद्धैः अर्जितं जितं प्राप्तं राज्यं तद् राज्यम् अक्षैः पाशैः अहारयत् नाथा चौरः आदौ येषां ते चौरादयः। चौरादिभिः हृतंच तद् वस्तुच चौरादिहृतवस्तु इव चौरादिभिः हृतं वस्तु यथा दुःख करोति तथा नलेन युद्धेनाऽर्जितं राज्यम् अक्षैः पाशैः हारितम् इति मे मम दुःखकृत् अस्ति ॥१६८॥

सरलार्थ :- हे नाथ! यद् युद्धैः अर्जितं राज्यं तद् नलः पाशैः अहारयत् इति चौरादिहृत-वस्तुवत् मम दुःखं करोति ॥१६८॥

ગુજરાતી :- નલરાજાએ સંગ્રામો કરીને જે રાજ્ય મેળવ્યું, તે રાજ્ય તેણે જુગાર રમીને ગુમાવ્યું, એવો રીતનો લોકોનો અપવાદ, હે સ્વામી! ચોરોએ લૂંટી લીધેલાં દ્રવ્યની પેઠે મારા હૃદયમાં દુઃખ ઉત્પન્ન કરે છે. ॥૧૬૮॥

हिन्दी :- नलराजा ने युद्ध द्वारा जो राज्य प्राप्त किया था, वह राज्य उसने जुगार खेलकर खो दिया, इस प्रकार का लोगों का अपवाद, हे स्वामी! चोरों द्वारा लुटे हुअे द्रव्य की तरह मेरे हृदय में दुःख उत्पन्न कर रहा है॥१६८॥

मराठी :- नलराजाने लढाई करुन जे राज्य प्राप्त केले, ते राज्य त्याने जुगार खेळुन घालविले अश्याप्रकारे लोकांचा हा अपवाद, हे स्वामी! चोरांनी लुटलेल्या द्रव्याप्रमाणे माझ्या हृदयात दुःख उत्पन्न करीत आहे.

English :- She adds that the kingdome which had been won by war was now being lost by gambling. In this way it will be an issue for people to talk and inflam about. She says that her heart is filled with remorse as this seems like a robber is out to rob the wealth of the kingdom.

नलो नाजीगणन्मत्त - द्विपवत्तद्वचः सृणिम् ॥
ततस्तयोचिरेऽमात्या, नलं धूतान्न्यषेधयन् ॥१६९॥

अन्वय :- किन्तु मत्तद्विपः सृणिमिव नलः तद्वचः नाजीगणत्। ततः अमात्या ऊचिरे ते अमात्याः नलं धूतात् न्यषेधयन् ॥१६९॥

विवरणम् :- किन्तु मत्तश्चासौ द्विपश्च गजश्च मत्तद्विपः मत्तद्विपेन तुल्यं मत्तद्विपवत्। मत्तद्विपः मदोन्मत्तगजः सृणिमङ्कुमिव नलः तस्याः वचः तद्वचः नाजीगणत् न अगणयत् न स्वीचकार। यथा मदोन्मत्तः गजः सृणिम् अङ्कुशं न गणयति। तथा नलः तस्या दमयन्त्याः वचः न अजीगणत्। ततः तदनन्तरं तया दमयन्त्या अमात्याः सचिवाः ऊचिरे बभाषिरे - ते सचिवाः अपि नलनृपं धूतात् न्यषेधयन्॥१६९॥

सरलार्थ :- किन्तु मदोन्मत्तगजः यथा सृणिमङ्कुशं न गणयति तथा नलः तस्याः वचः न अगणयत्। ततः तथा अमात्या ऊचिरे-ते अमात्याः नलं धूतात् न्यषेधयन्॥१६९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- પરંતુ મદોન્મત હાથી જેમ અંકુશને અંગીકાર નહીં, તેમ નલરાજાએ તેણીનું વચન અંગીકાર્યું નહીં, તેથી તેણીએ તે મોટા મંત્રીઓને કહ્યું, અને તેઓ પણ નલરાજાને જુગાર રમતો અટકાવવા લાગ્યા. ॥૧૬૯॥

हिन्दी :- लेकिन मदोन्मत हाथी जैसे अंकुश को मानता नही, वैसे नलराजा ने उस का कहना माना नही। फिर उसने मंत्रियों से कहा, और वह भी नलराजा को जुआ खेलने से रोकने लगे। ॥१६९॥

मराठी :- परंतु मदोन्मत हत्ती जसे अंकुशाला जुमानत नाही तसेच नलराजाने पण तिचे वचन ऐकले नाही. तेव्हा तिने आपल्या मंत्र्यांना म्हटले, आणि तै पण नलराजाला जुगार खेळण्यापासून परावृत्त करू लागले. ॥१६९॥

English :- Just as an uncontrollable elephant cannot be controlled by an elephant after been prenurised by the goad, by the mahout, in the same way king Nal could'nt be controlled. Then she requested the minister to request king Nal and then they pleaded to him to stop playing the game of dice.

द्यूताद्वारयतोऽत्यर्थं, नलो नामंस्त तानपि ॥
औषधं कुरुते किं नु, सन्निपातज्वरार्दिते ॥१७०॥

अन्वय :- नलः द्यूतात् वारयतः तान् अपि नामंस्त । सन्निपातज्वरार्दिते औषधं किं कुरुते? ॥१७०॥

विवरणम् :- नलः द्यूतात् वारयतः निवारयतः तान् सचिवान् अपि न अमंस्त न अमन्यत न अगणयत् । सन्निपातज्वेरण अर्दितः पीडितः सन्निपातज्वरार्दितः तस्मिन् सन्निपातज्वरार्दिते सन्निपातज्वरपीडिते औषधं किं कुरुते? यथा सन्निपातज्वरार्दिते औषधम् अनुपयुक्तं तथा द्यूतासक्ते नले अमात्यादीनाम् अभ्यर्थना अनुपयुक्ता अभवत् ॥१७०॥

सरलार्थ :- नलः यूतात् वारयतः अमात्यादीत् अपि न अमंस्त् । सन्निपातज्वरार्दिते औषधं किं कुरुते? ॥१७०॥

ગુજરાતી :- જુગાર રમવાનું અટકાવતા એવા તે મંત્રીઓનું વચન પણ નલરાજાએ માન્યું નહીં, કેમકે સન્નિપાતયુક્ત જ્વરથી પીડાતા માણસને ઔષધ શું કરી શકે? ॥૧૭૦॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- जुआ खेलने से रोकते हुअे मंत्रियों का वचन भी नलराजा ने माना नही, क्यों कि सन्निपातयुक्त ज्वर से पीडित मनुष्य के लिए दवा भी क्या कर सकती है? ॥१७०॥

मराठी :- जुगार खेळण्यापासून परावृत्त करणाऱ्या मंत्र्याचे वचनसुध्दा नलराजाने मानले नाही, कारणकी सन्निपातयुक्त ज्वरांनी पीडित मनुष्याला औषध काय करू शकते? ॥१७०॥

English :- The King did not even hear to the pleads of the ministers. What can medicine do to a man who is affected by mental abberation?

अन्धीभूतोऽथ द्यूतेन, ततश्चाहारयन्नलः ॥
त्रिखण्डमेदिनीमेता - मप्यखण्डितविक्रमः ॥१७१॥

अन्वय :- अथ द्यूतेन अन्धीभूतः अखण्डितविक्रमः अपि नलः ततः एतां त्रिखण्डमेदिनीम् अहारयत् ॥१७१॥

विवरणम् :- अथ न अन्धः अनन्धः । अनन्धः अन्धः भूतः अन्धीभूतः । द्यूतेन अन्धीभूतः । खण्डः अस्य सञ्जातः खण्डितः न खण्डितः अखण्डितः । अखण्डितः विक्रमः यस्य सः अखण्डित विक्रमः अपिं नलः ततः तस्मात् द्यूतात् एतां त्रीणि खडानि यस्याः सा त्रिखण्डा त्रिखण्डाचासौ मेदिनी च त्रिखेण्डमेदिनी तां त्रिखण्डमेदिनीं त्रिखण्डपृथ्वीम् अहारयत् ॥१७१॥

सरलार्थ :- अथ द्यूतेन अन्धीभूतः अखण्डितविक्रमः अपि नलः तस्मात् द्यूतात् एतां त्रिखण्डपृथ्वीम् अहारयत् ॥१७१॥

ગુજરાતી :- પછી જુગારથી આંધળો થયેલો નલરાજા અતુલ્ય પરાક્રમવાળો છતાં પણ, આ ત્રણે ખંડોવાળી પૃથ્વી હારી ગયો. ॥૧૭૧॥

हिन्दी :- फिर जुअे मे अंधा ऐसा नलराजा अतुल्य पराक्रमवाला होते हुए भी इस तीन खंडों से युक्त पृथ्वी को हार गया ॥१७१॥

मराठी :- नंतर जुगारात आंधळा झालेला नलराजा अतुल्य पराक्रमी असूनसुध्दा तीन खंडाच्या पृथ्वीला हरवून बसला. ॥१७१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then being blind in playing the game of dice, King Nal who was matchless in courage and bravery, now had lost all the parts of Bharat Schetra.

सार्धं भैम्याथ शुद्धान्तं, शरीराभरणाद्यपि ॥
केवलं देहमात्रेण, जातमात्र इव स्थितः ॥१७२॥

अन्वय :- अथ भैम्या सार्धं शुद्धान्तं शरीराभरणादि अपि अहारयत् । जातमात्रः इव केवलं देहमात्रेण स्थितः ॥१७२॥

विवरणम् :- अथ भीमस्य अपत्यं स्त्री भैमी तथा भैम्या सार्धं शुद्धान्तम् अन्तः पुरं, शरीरस्य आभरणानि शरीराभरणानि शरीराभरणानि आदौ यस्य तत् शरीराभरणादि अपि अहारयत् । जातः एव जातमात्रः इव केवल देहः एव देहमात्रं तेन देहमात्रेण केवलशरीरेण स्थितः । यथा जातः बालः केवलं शरीररूपेण तिष्ठति तथैव शरीरभूषणादिकं हारितवान् नलः केवलशरीरेण अतिष्ठत् ॥१७२॥

सरलार्थ :- अथ नलः दमयन्त्या सार्धम् अन्तःपुरं शरीराभरणादि अपि अहारयत् । जातमात्रः इव केवलं शरीरेण स्थितः ॥१७२॥

ગુજરાતી :- પછી દમયંતીસહિત અંતઃપુરને તથા શરીરનાં આભૂષણ આદિને પણ તે (હારી ગયો.) અને તેથી તે જન્મસમયની જેમ, ફક્ત પોતાના શરીરની જ માલિકીવાળો રહ્યો. ॥૧૭૨॥

हिन्दी :- फिर दमयंतीसहित अंतःपुर को और अपने शरीर के आभूषण आदि को भी वह (हार गया) और इस प्रकार जन्मसमय के समान सिर्फ स्वयं के शरीर का ही वह मालिक रह गया। ॥१७२॥

मराठी :- नंतर दमयंतीसहित शरीरावरील अलंकार वगैरे पण तो (हरला.) आणि त्यामुळे जन्माच्या वेळेप्रमाणें नुसत्या शरीराचा मालक तो राहिला. ॥१७२॥

English :- He then even lost Damyanti and the ornaments on his body and was only left with his body (as he was during his brith)

नलोऽथ कुबरेणोचे, मद्राज्यं मुंच सत्वरम् ॥
तातपादैरिवेदं य - द्दत्तमक्षैर्ममाधुना ॥१७३॥

अन्वय :- अथ कूबरेण नलः ऊचे संत्वरं मद्राज्यं मुञ्च । यत् तातपादैः इव अक्षैः अधुना इदं राज्यं मह्यं दत्तम् ॥१७३॥

विवरणम् :- *अथ कूबरेण नलः ऊचे बभाषे । सत्वरं शीघ्रं मम राज्यं मद्राज्यं मुञ्च त्यज । यत् तातस्य पादाः तातपादाः तैः; तातपादैः इव अक्षैः पाशैः अधुना इदं राज्यं मह्यं दत्तम् ॥१७३॥*

सरलार्थ :- अथ कुबरेण नलः अकथ्यत - सत्वरं मद्राज्यं त्यज । जनकपादैः इव अक्षैः अधुना इदं राज्यं मह्यं दत्तम् ॥१७३॥

गुजराती :- પછી કુબરે નલરાજાને કહ્યું કે, હવે તુ તુરંત મારા રાજ્યને છોડીને ચાલ્યો જા કેમ કે પિતાજીની પેઠે આ જુગારના પાસાઓએ હવે આ રાજ્ય મને સોંપેલું છે. ॥૧૭૩॥

हिन्दी :- फिर कुबर ने नलराजा से कहा कि, अब तू तुरंत ही मेरे राज्य को छोड कर चला जा. क्यों कि पिताजी की तरह इस जुअे के पासे ने यह राज्य अब मुझे सौंपा है॥१७३॥

मराठी :- नंतर कुबर नलराजाला म्हणाला की, आता तू लगेच माझे राज्य सोडून जा. वडिलांप्रमाणे या पाशांनी हे राज्य मला सोपविले आहे. ॥१७३॥

English :- Then Kubar said to King Nal, that he better leave the Kingdom and this Kingdom is being granted to him by the game of dice as it was granted to their father.

जितकाशीति माद्राप्सीः, करे सत्ववतां श्रियः ॥
इत्युक्त्वा तं नलोऽचालीत्, संवीतांशुकवैभवः ॥१७४॥

अन्वय :- जितकाशी इति माद्राप्सीः सत्ववतां करे श्रियः सन्ति । तम् इति उक्त्वा संवीतांशुकवैभवः नलः अचालीत् ॥१७४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- जितेन विजयेन काशते प्रकाशते इति जितकाशी इति माद्राप्सी: गर्वं मा उद्वह। सत्त्वम् एषाम् अस्ति इति सत्त्ववन्त: तेषां सत्त्ववतां बलवतां करे हस्ते श्रिय: सन्ति। तम् कूबरम् इति उक्त्वा भाषित्वा संवीतं च तद् अंशुकञ्च संवीतांशुकं संवीतांशुकम् एव वैभवं यस्य स: संवीतांशुकवैभव: संवीतेन अंशुकेन सह एव परिहितेन वस्त्रेण साकमेव नल: अचालीत् ॥१७४॥

सरलार्थ :- जितकाशी इति गर्वं मा उद्वह। बलवत्ता हस्ते श्रिय: सन्ति। तं कूबरम् इति उक्त्वा संवीतेन अंशुकेन सहैव नल: अचालीत् ॥१७४॥

गुजराती :- હું વિજયી થયો છું, એમ માનીને તું ગર્વ નહીં કર, કેમ કે પરાક્રમીઓના હાથમાં તો લક્ષ્મી રમી રહી છે. એમ કૂબરને કહીને, નલરાજા ફક્ત પહેરેલે કપડે (ત્યાંથી) ચાલવા લાગ્યો. ॥૧૭૪॥

हिन्दी :- मैं विजयी हुआ हुं, ऐसा समझ कर अभिमान मत कर? क्योंकि पराक्रमियों के हाथ में लक्ष्मी खेलती है, ऐसा कुबर को कहकर नलराजा सिर्फ पहने हुए कपड़ेसे (वहां से) चला गया ॥१७४॥

मराठी :- मी विजयी झालो आहे असे मानून तू गर्व करू नकोस कारण बलवानांच्या हातात लक्ष्मी खेळत असते असे कुबराला सांगून नलराजा केवळ अंगावरच्या कपड्यासह तेथून निघाला. ॥१७४॥

English :- Then Nal said to Kubar that he should not be proud of his victory as wealth only plays in the hands of brave and valiant men. So saying thus and just with the clothes he had worn Nal left the place.

अनुयांती नलं भैमी, कूबरेणाभ्यधीयत ॥
द्यूते जितासि मायासी:, प्रविशांत:पुरं मम ॥१७५॥

अन्वय :- नलम् अनुयान्ती भैमी कूबरेण अभ्यधीयत। त्वं द्यूते जितासि। मा यासी: मम अन्त: पुरं प्रविश ॥१७५॥

विवरणम् :- नलम् अनुयान्ती अनुसरन्ती भीमस्य अपत्यं स्त्री भैमी दमयन्ती कूबरेण अभ्यधीयत औच्यत। त्वं द्यूते जितासि। तेन मा यासी: मा याहि। मम अन्त:पुरं प्रविश ॥१७५॥

सरलार्थ :- नलम् अनुसरन्ती दमयन्ती कूबरेण औच्चत । त्वं मया यूते जितासि। मा याहि। मम अन्तः पुरं प्रविश ॥१७५॥

ગુજરાતી :- હવે નલરાજાની પાછળ જતી દમયંતીને કુબરે કહ્યું કે, અરે! તને તો મેં જુગારમાં જીતી લીધી છે, માટે નહીં જા ! અને મારા અંતઃપુરમાં તું દાખલ થા. ॥૧૭૫॥

हिन्दी :- अब नलराजा के पीछे जाती दमयंती को कुबर ने कहा कि, अरे! तुझे तो मैंने जुअे में जीत लिया है, इसलिए तू मत जा और मेरे अंतःपुर में तू दाखिल हो जा । ॥१७५॥

मराठी :- आता नलराजाच्या मागे जाणाऱ्या दमयंतीला कुबर म्हणाला- तुला यूतात जिंकले आहे. म्हणून तू जाऊ नको? माझ्या अन्तःपुरात प्रवेश कर. ॥१७५॥

English :- Then as Damyanti was going at the back of Nal, Kubar called out to her saying that he had won her in the game of dice, therfore, she shouldn't go and should be a another wife in the harem.

अथोचे कूबरोऽमात्यै - र्दमयन्ती महासती ॥
नेयं परनरच्छाया - मपि स्पृशति जातुचित् ॥१७६॥

अन्वय :- अथ अमात्यैः कूबरः ऊचे - दमयन्ती महासती अस्ति। इयं जातुचित् परनरच्छायाम् अपि न स्पृशति ॥१७६॥

विवरणम् :- अथ अमात्यैः सचिवैः कूबरः ऊचे बभाषे । दमयन्ती महती चासौ सती च महासती अस्ति । महापतिव्रता अस्ति । इयं जातुचित् कदाचित् परश्चासौ नरश्च परनरः परनरस्य छाया परनरच्छाया तां परनरच्छायाम् अपि न स्पृशति॥१७६॥

सरलार्थ :- अथ सचिवैः कूबरः अभाष्यत । दमयन्ती महासती अस्ति । इयं कदाचित् परनरच्छायाम् अपि न स्पृशति ॥१७६॥

ગુજરાતી :- પછી મંત્રીઓએ કુબરને કહ્યું કે, આ દમયંતી મહાસતી છે, તેથી તે પરપુરુષની છાયાનો પણ સ્પર્શ કરતી નથી. ॥૧૭૬॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर मंत्रीयों ने कुबर से कहा कि, यह दमयंती महासती है, वह परपुरुष की छाया को भी स्पर्श नही करती ॥१७६॥

मराठी :- नंतर मंत्री कुबराला म्हणाले- ही दमयंती महासती आहे. ही परपुरुषाच्या सावलीलासुध्दा कधीही स्पर्श करीत नाही.

English :- The the minister told Kubar that Damyanti being a chaste and an illustrous woman is also a wife of only one husband and she does'nt find in befitting to even touch another man's shadow.

मैतामन्तःपुरे क्षेप्सी - र्मातेवेयं यतस्तव ॥
पितृतुल्यो बृहद्बन्धुः, सर्वलोकेषु गीयते ॥१७७॥

अन्वय :- एताम् अन्तःपुरे मा क्षेप्सीः। यतः इयं तव माता इव अस्ति। बृहद्बन्धुः सर्वलोकेषु पितृतुल्यः गीयते ॥१७७॥

विवरणम् :- *एतां दमयन्तीम् अन्तपुरे मा-क्षेप्सीः मा क्षिप। यतः इयं तव माता जननी इव अस्ति। बृहन् चासौ बन्धुश्च बृहद्बन्धुः ज्येष्ठबन्धुः। सर्वे च ते लोकाश्च सर्वलोकाः तेषु सर्वलोकेषु पित्रा तुल्यः पितृतुल्यः गीयते। ज्येष्ठो भ्राता पितुः समः इत्युच्यते ॥१७७॥*

सरलार्थ :- एतां दमयन्तीं तव अन्तःपुरे मा क्षेप्सीः। यतः इयं तव माता इव अस्ति। ज्येष्ठबन्धुः सर्वलोकेषु पितृतुल्यः गीयते ॥१७७॥

ગુજરાતી :- આ દમયંતીને તારા અંતઃપુરમાં તારે દાખલ કરવી નહીં, કેમ કે તે તારી માતાસમાન છે, અને મોટો ભાઈ પણ સર્વ લોકોમાં પિતાસમાન ગણાય છે.॥૧૭૬॥

हिन्दी :- इस दमयंती को तु अपने अंतःपुर में दाखिल नही करना, क्यों कि यह तेरी मातासमान है और बडा भाई भी सब लोगो में पितासमान माना जाता है ॥१७७॥

मराठी :- या दमयंतीला तुझ्या अंतःपुरात तू दाखल करू नकोस, कारणकी, ही तुझ्या मातेसमान आहे आणि मोठा भाऊ पण सर्व लोकात पित्यासमान मानला जातो.॥१७७॥

English :- So they requested him not put Damyanti in the harem as she was like a mother to him and Nal, among all men was like a father to him.

हठादात्ता पुनरियं, भस्मसात् त्वां करिष्यति ॥
सतीनां कुपितानां हि, न किञ्चिदपि दुष्करम् ॥१७८॥

अन्वय :- हठादात्ता इयं त्वां भस्मसात् करिष्यति। सतीनां कुपितानां किञ्चिद् अपि दुष्करं न अस्ति ॥१७८॥

विवरणम् :- *पुनः हठात् आत्ता हठादात्ता बलात्कारेण गृहीता चेत् इयं दमयन्ती त्वां भस्मनः अधीनं भस्मसात् करिष्यति। सतीनां कुपितानां किञ्चिदपि दुःखेन क्रियते इति दुष्करं न अस्ति॥१७८॥*

सरलार्थ :- यदि त्वं दमयन्तीं बलात्कारेण आदत्से तर्हि सा त्वां भस्मसात् करिष्यति। यतः कुपितानां सतीनां दुष्करं किमपि नास्ति ॥१७८॥

गुजराती :- વળી જો તું બળાત્કારે તેણીને ગ્રહણ કરીશ તો તને બાળીને ખાખ કરી નાખશે, કેમ કે ક્રોધ પામેલી સતીને કંઈ પણ કાર્ય કરવું મુશ્કેલ નથી. ॥१७८॥

हिन्दी :- फिर जो तु उसे जबरदस्ती ग्रहण करेगा, तो वह तुम्हे जलाकर राख कर देगी, क्यों कि क्रोधित सती के लिए कोइ कार्य करना कठीन नही होता॥ ॥१७८॥

मराठी :- पुन्हा जर तू जबरदस्ती तिला ग्रहण केले तर तुला ती जाळून राख करुन टाकील, कारणकी, क्रुध्द झालेल्या सतींना कोणतेही कार्य करणे मुश्कील नसते. ॥१७८॥

English :- They continued saying that if he forcefully puts her in the harem, she will turn him to ash as it is difficult to control an angry woman who is a virtious and chaste.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

माभूर्महासतीमेतां, प्रकोप्यानर्थभाजनम् ॥
अपि तूत्साहयैतां त्वमनुयांतीं निजं पति ॥१७९॥

अन्वय :- एतां महासतीं प्रकोप्य अनर्थभाजनं मा भूः । अपि तु त्वं निजं पतिम् अनुयान्तीम् एताम् उत्साहय॥१७९॥

विवरणम् :- *एतां महती चासौ सती च महासती तां महासतीं प्रकोप्य न अर्थ; अनर्थः अनर्थस्य भाजनं पात्रम् अनर्थभाजनं मा भूः मा भव। अपि तु त्वं निजं स्वं पतिम् अनुयान्तीं अनुसरन्तीं एतां दमयन्तीं पत्या सह गन्तुम् उत्साहय ॥१७९॥*

मरलार्थ :- एतां महासतीं प्रकोप्य अनर्थभाजनं मा भूः । अपि तु त्वं स्वपतिम् अनुसरन्तीम् एताम् उत्साहय ॥१७९॥

गुजराती :- આ મહાસતીને કોપ ઉપજાવીને તું અનર્થના પાત્રરૂપ નહીં થા. પરંતુ પોતાના પતિની પાછળ જવા માટે તેણીને તું ઉત્સાહિત (આનંદયુક્ત) કર? ॥૧૭૯॥

हिन्दी :- इस महासती को क्रोध उपजा कर तुं अनर्थ का पात्ररुप मत हो? लेकिन खुद के पति के पीछे जाती ऐसी उसे तु उत्साहित (आनंदयुक्त) कर । ॥१७९॥

मराठी :- वा पतिव्रतेला क्रोध उत्पन्न करून तू अनर्थास कारण होऊ नकोस. पतीबरोबर जात असलेल्या हिला पतीबरोबर जाण्यास उत्साहित कर. ॥१७९॥

English :- They added that by making a chasste wife angry, he is only inviting a great misfortune on himself. Therfore he should only stimulate and encourage her to go at the back of her husband.

अलं दत्वा पुरग्राम - नगरादीनि कूबर ॥
ससारथिं सपाथेयं, नलस्य रथमर्पय ॥१८०॥

अन्वय :- पुरग्रामनगरादीनि ग्रामाश्च नगराणि च पुरग्रामनगराणि पुरग्रामनगराणि आदौ येषां तानि पुरग्रामनगरादीनि दत्त्वा अलम् । किन्तु हे कूबर ! सारथिना सह वर्ततेऽसौ ससारथिः तं ससारथिं । पथि साधु पाथेयं पाथेयेन सह वर्ततेऽसौ सपाथेयः तं सपाथेयं रथम् नलस्य अर्पय यच्छ । पुरग्रामादीनि नलाय मा यच्छा परं सारथिना पाथेयेन च सह रथं यच्छ ॥१८०॥

P.P.Ac. Gunratnasuri M.S.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सरलार्थ :- पुरग्रामनगरादीनि दत्त्वा अलम्। किन्तु हे कूबर! ससारथिं सपाथेयं रथं नलाय अर्पय ॥१८०॥

गुजराती :- પુર, ગામ કે નગર આદિ આપવા તો એક બાજુ રહ્યાં, પરંતુ હે કૂબર! સારથિ તથા ભાતા સહિત એક રથ તું નલને આપ. ॥૧૮૦॥

हिन्दी :- पुर, गांव या नगर आदि देना तो एक बाजु रहा, लेकिन हे कुबर! सारथि और भातासहित एक रथ तु नल को दे.॥१८०॥

मराठी :- हे कूबरा! तू नलराजाला पुर, गाव आणि नगर वगैरे काही न देता फक्त सारथी आणि शिदोरीसह एक रथ दे. ॥१८०॥

English :- The ministers requested him to give King Nal atleast a charoiteer, some food and a chariot if not a village or a city.

इत्युक्तस्तत्तथाकार्षी - न्निर्दाक्षिण्योऽपि कूबरः ॥
स्यात् क्रूरोऽपि ग्रहः किञ्चिच्छुभदः शुभयोगतः ॥१८१॥

अन्वय :- इति उक्तः निर्दाक्षिण्यः कूबरः अपि तत् तथा अकार्षीत्। क्रूरः ग्रहः अपि शुभयोगतः किञ्चित् शुभदः स्यात् ॥१८१॥

विवरणम् :- *इति एवं सचिवेन उक्तः भणितः निर्गतं दाक्षिण्यं यस्मात् सः निर्दाक्षिण्यः दाक्षिण्यरहितः कूबरः अपि तत् तथा अकार्षीत् चकार। अकरोत्। क्रूरः निष्ठुरः ग्रहः अपि शुभस्य योगः शुभयोगः तस्मात् शुभयोगतः शुभग्रहेण योगात् किञ्चित शुभं ददाति इति शुभदः स्यात् ॥१८१॥*

सरलार्थ :- एवं सचिवेन उदितः दाक्षिण्यरहितः कूबरः अपि तत् तथा अकार्षीत्। कदाचित् क्रूरः ग्रहः अपि शुभयोगात् किञ्चित् शुभं ददाति ॥१८१॥

गुजराती :- તે મંત્રીઓના કહેવાથી દાક્ષિણ્યતા વિનાના કુબરે પણ તેમ કર્યું, કેમ કે ક્રૂર ગ્રહ પણ શુભના યોગથી કંઈક કલ્યાણ આપનારો થાય છે. ॥૧૮૧॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- वे मंत्रीओं के कहने से दाक्षिण्यरहित कुबरने भी वैसा किया, क्यों कि क्रूर ग्रह भी शुभ के योग से कुछ कल्याण देनेवाला होता है ॥१८१॥

मराठी :- मंत्र्यांच्या सांगण्यावरून कुबराने पण तसे केले. कारण क्रूर ग्रह सुध्दा शुभ ग्रहाच्या योगाने शुभ करणारे होतात. ॥१८१॥

English :- Kubar had no wish to give his brother anything, but as his ministers had asked him to give so he granted their wish just as a cruel star who is out to bring us ill-luck but due to our good-fortune, brings sus good-luck.

नलोऽवादीदिमां लक्ष्मीं, योऽहंभुजबलार्जितां ॥
त्यजामि क्रीडया सोऽहं, रथाय स्पृहयामि किं ॥१८२॥

अन्वय :- नलः अवादीत् - यः अहं भुजबलार्जितां लक्ष्मीं क्रीडया त्यजामि सः अहं रथाय स्पृहयामि किम् ॥१८२॥

विवरणम् :- नलः अवादीत् उवाच - अवदत् यः अहं भुजयोः बलं भुजबलं भुजबलेन अर्जिता भुजबलार्जिता तां भुजबलार्जितां लक्ष्मीं सम्प्रति क्रीडया लीलया त्यजामि सः अहं रथाय स्पृहयामि किम्? ॥१८२॥

सरलार्थ :- नलः अभणत् यः अहं स्वभुजबलेन अर्जितां लक्ष्मीं क्रीडया अनायसेन त्यजामि । सः अहं रथाय स्पृहयामि किम्? ॥१८२॥

गुजराती :- પછી નલરાજાએ કહ્યું કે, હું ભુજબળથી મેળવેલી લક્ષ્મીને આવીરીતે ફક્ત ક્રીડા માત્રમાં હારી જવાથી ત્યજી જઉં છું, ને વળી રથની લાલચ રાખું? ॥૧૮૨॥

हिन्दी :- फिर नलराजा ने कहा की, जो मैंने भुजाबल से जीती हुई लक्ष्मी को इस प्रकार केवल क्रीडामें हार जाने से छोड देता हूँ, तो फिर मैं रथ की लालच किस लिए करुं? ॥१८२॥

मराठी :- नलराजा म्हणाला- जो मी स्वत:च्या भुजबळावर मिळविलेली लक्ष्मी सहजगत्या सोडून जात आहे. तो मी रथाची इच्छा कां बरे करीन? ॥१८२॥

English :- At this Nal blurted out saying that if he can loose away his wealth which he had obtained through his valour and strength just by playing the game of dice, than why should he keep the greed or the want in his heart for a chariot.

P.P. Ac Gunratnasuri M.S.

Jun Gun Aaradhak Trust

ऊचिरे नागराः स्वामिन्, वयं ते पादपांसवः ॥
आगच्छामस्त्वया सार्धं, निषेद्धा कूबरः पुनः ॥१८३॥

अन्वय :- नागराः ऊचिरे हे स्वामिन् ! वयं ते पादपांसवः त्वया सार्द्धम् आगच्छामः । कूबरः पुनः निषेद्धा ॥१८३॥

विवरणम् :- *नागराः नगरवासिनः ऊचिरे ऊदुः हे स्वामिन् ! वयं ते तव पादयोः पांसवः पादपांसवः चरणरजांसि त्वया सार्द्धं सह आगच्छामः । परंतु कूबरः निषेद्धा निषेधकर्ता अस्ति ॥१८३*

सरलार्थ :- नागराः बभणुः हे स्वामिन्! वयं तव चरणधूलयः इव त्वया सह आगच्छामः। किन्तुः कूबरः निषेधति ॥१८३॥

ગુજરાતી :- હવે નગરના લોકો તે નલરાજાને કહેવા લાગ્યા કે, હે સ્વામી! અમો તો આપના ચરણોની રજ સમાન છીએ, અને આપની સાથે આવવાને તૈયાર છીએ, પરંતુ આ કૂબર અમોને (તેમ કરતાં) અટકાવે છે. ॥૧૮૩॥

हिन्दी :- अब नगर के लोग उस नलराजा से कहने लगे की, हे स्वामी! हम तो आप के चरणों की धूलसमान हैं, और आप के साथ आने को तैयार हैं, लेकिन यह कुबर हमें (ऐसा करते हुए) रोक रहा है ॥१८३॥

मराठी :- तेव्हां नगरवासी लोक त्या नलराजाला म्हणाले- महाराज! आम्ही तर आपल्या चरणाच्या धूळीप्रमाणे आहोत व आपल्या बरोबर येऊ इच्छित आहोत. पण कुबर आम्हांला अडकवित आहे. ॥१८३॥

English :- Then the subjects of the kingdom said to Nal that they are the dust of his feet and they were willing to go along with him if not for the new to be king Kubar.

किञ्चेशोऽपि त्वया राज्ये, कृतस्तत्कथमुज्झ्यते ॥
स्यादन्योऽप्यत्र यो राजा, सेव्यस्त्वमिव सोऽपि नः ॥१८४॥

अन्वय :- किञ्च त्वया अपि राज्ये ईशः कृतः तत्कथम् उज्झ्यते । अन्यः अपि अत्र यः राजा स्यात् सः अपि नः त्वम् इव सेव्यः ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- किञ्च त्वया अपि राज्ये ईशः कृतः। तत् कथम् उज्झ्यते त्यज्यते। अन्यः अपरः अपि अस्मिन् नगरे अत्र यः राजा नृपः स्यात् सः अपि नः अस्माकं त्वम् इव सेवितुं योग्यः सेव्यः आस्ते॥१८४॥

संस्कृतार्थ :- किञ्च त्वया अपि राज्ये ईशः कृतः तत्कथं त्यज्यते। अन्यः अपि अत्र यः नृपः स्यात्। सः अपि अस्माकं त्वम् इव सेवनीयः

ગુજરાતી :- વળી આપે જ તેને રાજ્યનો માલિક બનાવ્યો છે, તો હવે (તેને અમારાથી) કેમ ત્યજાય ? કેમ કે અહીં બીજો પણ જે કોઈ રાજા હોય, તેની પણ અમારે તો આપની પેઠે જ સેવા કરવી જોઈએ.

हिन्दी :- फिर आपने ही उन्हे राज्य का मालिक बनाया है, तो हम उसे कैसे छोड़ सकते है? क्यों कि यहाँ दुसरा कोइ भी राजा होगा, उस की भी हमे तो आप की तरह सेवा करनी ही होगी।

मराठी :- तुम्हीच त्याला राज्याचा मालक बनविला आहे, तर आता आम्ही त्याला कसे सोडणार? कारणकी इथे दुसरा कोणी पण राजा असला, तरी त्याची सुद्धा आम्हाला तुमच्या सारखीच सेवा करावी लागेल.

English :- They continued saying that as he him self had made him the king than how can they leave the new king as they had to serve any other king in his place as they had served him. (King Nal)

तद्वयं देव नायामः, साम्प्रतं भवतामियम् ॥
भार्या भृत्यसुतामात्या, भैम्येव सहगामिनी ॥१८५॥

अन्वय :- तद् हे देव। वयं न आयामः। साम्प्रतं इयं सहगामिनी भार्या भैमी एव भवतां भृत्यसुतमात्याः ॥१८५॥

विवरणम् :- तद् तेन कारणेन हे देव। वयं न आयामः आगच्छामः। साम्प्रतं सम्प्रति इयं सह गच्छति इत्येवं शीला सहगामिनी भार्या भैमी दमयन्ती एव भवतां भृत्याश्च सुताश्च अमात्याश्च भृत्यसुतामात्याः भवति। इयं दमयन्त्येव भृत्यसुतामात्यादीनां कार्याणि करिष्यति ॥१८५॥

संस्कृतार्थ :- तेन कारणेन हे देव! वयं न आगच्छामः;। साम्प्रतम् इयं सहगामिनी पत्नी भैमी एव भवतां भृत्य सुतामात्याः भवन्ति ॥१८५॥

ગુજરાતી :- માટે હે સ્વામી! અમો આપની સાથે આવી શકીએ તેમ નથી, હવે તો સ્ત્રી, નોકર, પુત્ર કે મંત્રીનું કાર્ય બજાવનારી આ એક દમયંતી જ આપની સાથે આવશે. ॥૧૮૫॥

हिन्दी :- इसलिए हे स्वामी! हम तुम्हारे साथ आ सकें ऐसा नही है, अब तो स्त्री, नोकर, पुत्र या मंत्री का कार्य करनेवाली यह एक दमयंती ही आप के साथ आयेगी॥१८५॥

मराठी :- म्हणून हे स्वामी! आता आम्ही तुमच्या बरोबर येत नाही. तुमच्या बरोबर येणारी दमयन्ती पत्नीच तुमचे नोकर, पुत्र व अमात्य आहे.॥१८५॥

English :- So they said that, they couldn't go along with him and only Damyanti who has to do the role of a wife, a servant, a son and a minister (all in one) has to go with him.

तत्तो राजाङ्गजाऽ सूर्यम्पश्येयं राजवल्लभा ॥
मृद्वङ्गी पथिकीभावं, कथं नाथ प्रपत्स्यते ॥१८६॥

अन्वय :- ततः असूर्यम्पश्या राजाङ्गजा मृद्वङ्गी इयं राजवल्लभा हे नाथ। पथिकीभावं कथं प्रपत्स्यते॥१८६॥

विवरणम् :- ततः तस्मात् कारणात् सूर्यं न पश्यति इति असूर्यम्पश्या अङ्गात् जायते अङ्गजा तनया राज्ञः अङ्गजा राजाङ्गजा मृदूनि अङ्गानि यस्याः सा मृद्वङ्गी इयं दमयन्ती राज्ञः वल्लभा राजवल्लभा हे नाथ। पथिक्याः भावः पथिकीभावः तं पथिकीभावं कथं प्रपत्स्यते प्राप्स्यते ॥१८६॥

सरलार्थ :- ततः असूर्यम्पश्या राजतनया मृद्वङ्गी राजपत्नी इयं दमयन्ती हे नाथ! पथिकीभावं कथं प्राप्स्यते ॥१८६॥

ગુજરાતી :- અને જેણે સૂર્યને પણ જોયો નથી એવી, રાજાની પુત્રી, અને રાજ્યમાં માનીતી, તથા કોમળ શરીરવાળી આ દમયંતી, હે સ્વામી! શી રીતે મુસાફરીનું કષ્ટ સહન કરી શકશે? ॥૧૮૬॥

हिन्दी :- जिस ने सूर्य भी देखा नही, ऐसी राजकुमारी और राज्य में सभी की लाडली, तथा कोमल शरीरवाली दमयंती , हे स्वामी! सफर का कष्ट कैसे सह सकेगी? ॥१८६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- जिने सूर्य सुध्दा पाहिला नाही, अशी राजकुमारी आणि राज्यात सर्वांची लाडकी, तशीच नाजुक शरीराची दमयंती, हे स्वामी! प्रवासाचे कष्ट कसे सहन करु शकेल? ॥१८६॥

English :- They then asked Nal that, how can Damyanti who had always exprienced shade and coolness and never heat and who is the favourite queen of all the people in the kingdome and who is a delicate darling, exprience the problems and difficulties of the journey.

ललाटन्तपसूर्यांशु - भ्राष्ट्रीभूतरजोऽणवः ॥
पन्थानः कथमुल्लङ्घ्यु पादैरस्याः सुकोमलैः ॥१८७॥

अन्वय :- ललाटन्तपसूर्यांशुभ्राष्ट्रीभूतरजोणवः पन्थानः अस्याः सुकोमलैः पादैः कथम् उल्लङ्घ्याः ॥१८७॥

विवरणम् :- *ललाटं तपन्ति इति ललाटन्तपाः सूर्यस्य अंशवः किरणाः सूर्यांशवः। ललाटन्तपाश्च ते सूर्यांशवश्च ललाटन्तपसूर्यांशवः । ललाटन्तपसूर्यांशुभिः भ्राष्ट्री भ्रज्यतेऽनया इति भ्राष्ट्री । भ्राष्ट्रीभूताःरजसाम् अणवः येषु ते ललाटन्तपसूर्यांशुभ्राष्ट्रीभूतरजोणवः पन्थानः मार्गाः अस्याः दमयन्त्याः सुष्ठु कोमलाः सुकोमलाः तैः सुकोमलैः अतीवसुकुमोरैः पादैः चरणैः कथं केन प्रकारेण उल्लङ्घितुं योग्याः उल्लङ्घ्या भवन्ति ॥१८७॥*

सरलार्थ :- सूर्यस्य प्रखरैः किरणैः यत्रत्याः रजोणवः भ्राष्ट्रीभूताः सन्ति ते पन्थानः ते मार्गाः अस्याः दमयन्त्याः सुकोमलैः पादैः; कथम् उल्लङ्घितुं शक्याः ॥१८७॥

ગુજરાતી :- માથું ફાડી નાખે એવી ગરમીમાં ભઠ્ઠી જેવા તપેલા માર્ગ ઉપર દમયંતી પોતાના સુકોમળ ચરણે કેવી રીતે માંડી શકશે?

हिन्दी :- सिर फट जाए ऐसे किरणो से तपती भट्ठी के समान मार्ग का उल्लंघन दमयंती के सुकोमल चरण कैसे कर सकेंगे?

मराठी :- मस्तक तापविणाऱ्या सूर्याच्या प्रखर किरणांनी ज्यातील पूळ तापलेल्या भट्टीसारखी बनली आहे. अश्या मार्गाचे उल्लंघन दमयंतीचे सुकोमल चरण कसे करू शकतील? ॥१८७॥

English :- The scorching heat of the sun will give her a migrainous headache and the ground that will become hot due to the strong heat of the sun will seem like a furnace or a kiln to her soft delicate feet.

सम्प्रति स्यन्दनः स्वामिन्, गृह्यतामनुगृह्य च ॥
देवस्य दमयन्त्याश्च, सुलङ्घ्योऽध्वा यथा भवेत् ॥१८८॥

अन्वय :- तत् हे स्वामिन्! अनुगृह्य सम्प्रति स्यन्दनः गृह्यतां यथा देवस्य दमयन्त्याः च अध्वा सुलङ्घ्यः भवेत् ॥१८८॥

विवरणम् :- *तत् तेन कारणेन हे स्वामिन्! अनुगृह्य मयि कृपां कृत्वा सम्प्रति स्यन्दनः रथः गृह्यतां स्वीक्रियताम् । यथा देवस्य दमयन्त्याःच अध्वा मार्गः सुखेन लङ्घयते इति सुलङ्घः भवेत् ॥१८८॥*

संस्कृतार्थ :- तेन कारणेन हे स्वामिन्! मयि अनुगृह्य सम्प्रति रथः गृह्यताम् । यथा देवस्य दमयन्त्याः च मार्गः सुलङ्घः भवेत् ॥१८८॥

ગુજરાતી :- માટે હે સ્વામી! (અમારા પર) કૃપા કરીને આપ આ વખતે રથને સ્વીકારો, કે જેથી આપનો અને દમયંતીનો માર્ગ સુખેથી ઓળંગી શકાય. ॥१८८॥

हिन्दी :- इस लिये हे स्वामी! हमारे उपर कृपा कर के आप इस समय रथ का स्वीकार करो, जिस से आप का और दमयंती का मार्ग सुख से कट सकेगा ॥१८८॥

मराठी :- म्हणून हे स्वामी! आमच्यावर कृपा करून तुम्ही यावेळी या रथाचा स्वीकार करा, की ज्यामुळे आपला व दमयंतीचा मार्ग सुखाने ओलांडला जाईल. ॥१८८॥

English :- So the subjects pleaded to Nal to accepted the chariot as this is the only way for both of them to travel peacefully.

ततो नलस्तमारुह्य भैम्या सह महाद्युतिः॥
चचालाचलसत्त्वा हि, महान्तः सम्पदापदोः॥१८९॥

अन्वय :- ततः महाद्युतिः नलः भैम्या सह तम् आरुह्य चचाल । तथाहि महान्तः सम्पदापदोः अचलसत्त्वाः भवन्ति ॥१८९॥

विवरणम् :- *ततः तदनन्तरं महती द्युतिः कान्तिः यस्य सः महाद्युतिः उत्तमकान्तिः नलः भीमस्य अपत्यं स्त्री भैमी तया भैम्या दमयन्त्या सह तं रथम् आरुह्य चचाल अचालीत् अचलत्। तथाहि-महान्तः सहासत्त्वाः नराः सम्पद् च आपद् च सम्पदापदौ तयोः सम्पदापदोः अचलं सत्त्वं येषां ते अचलसत्त्वाः भवन्ति ॥१८९॥*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- तदनन्तरं महातेजस्वी नलः दमयन्त्या सह रथम् आरुह्य अचलत् । तथाहि महान्तः सम्पदापदोः अचलसत्त्वाः भवन्ति ॥१८९॥

ગુજરાતી :- પછી મહાન કાંતિવાળો નલરાજા દમયંતીની સાથે તે રથમાં બેસી ચાલતો થયો, કેમકે મહાન પુરુષો સંપદાસમયે તેમ જ વિપત્તિસમયે પણ નિશ્ચલ પરાક્રમવાળા હોય છે ॥૧૮૯॥

हिन्दी :- फिर महान कांतीवाला राजा रथ पर विराजमान होकर चल पडा, क्यों की महान पुरुष संपदासमय तथा विपत्तिसमय में भी निश्चल पराक्रमवाले होते है ॥१८९॥

मराठी :- नंतर अत्यंत तेजस्वी नलराजा दमयन्तीसह रथात बसून निघाला कारण महापुरुष सम्पत्तीत व विपत्तीत आपलें सत्त्व ढळू देत नाही. ॥१८९॥

English :- Then this great valiant King accepted and sat on the chariot because great men do not brood during gay or difficult tunes.

तदैकवसनां भैमीं तामालोक्य पुरीजनः ॥
चलन् कोपं ववर्षाश्रुधाराभिर्नव्यमेघवत् ॥१९०॥

अन्वय :- तदा एकवसनां तां भैमीम् आलोक्य चलन् पुरीजन; नव्यमेघवत् अश्रुधाराभिः कोपं ववर्ष ॥१९०॥

विवरणम् :- तदा एकं वसनं यस्याः सा: एकवसना तां एकवसनाम् एकवस्त्रां भीमस्य अपत्यं स्त्री भैमी तां भैमीं दमयन्तीम् आलोक्य निरीक्ष्य चलन् व्रजन् पुर्याः जनः पुरीजनः नगरवासी जन; नव्यश्चासौ मेघश्च नव्यमेघः नव्यमेघेन तुल्यं नव्यमेघवत् अश्रूणां धाराः अश्रुधाराः ताभिः अश्रुधाराभिः कूबराय कोपं क्रोधं ववर्ष अवर्षत् । नव्यमेघः यथा धाराभिः जलं वर्षति तथा पुरीजनः कूबराय अश्रुधाराभिः क्रोधं ववर्ष ॥१९०॥

सरलार्थ :- तदा एकवस्त्रां दमयन्तीं निरीक्ष्य चलन् नगरवासी जनः नव्यमेघवत् अश्रुधाराभिः कूबराय कोपं ववर्ष ॥१९०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- તે વખતે ફક્ત એક વસ્ત્રવાળી તે દમયંતીને જોઈને, ચાલતા એવા નગરના લોકોની આંખો નવા મેઘની પેઠે અશ્રુધારાઓ અને કુબર પરના કોપને વરસાવવા લાગી.॥૧૯૦॥

हिन्दी :- उस वक्त केवल एक वस्त्रवाली दमयंती को देखकर नगरवासीयों की आँखें बरसते मेघ के समान अश्रुधारा से और कुबर पर क्रोध से बरसने लगी ॥१९०॥

मराठी :- तेव्हां केवळ एक वस्त्र असलेल्या दमवन्तीला पाहून चालणाऱ्या नगरतील लोकांनी वर्षाऋतूतील नवीन मेघ ज्याप्रमाणें मुसळधारांनी पाऊस पाडतो. त्याप्रमाणें अश्रूंच्या धारा वाहवून कुबरावर क्रोध प्रकट केला. ॥१९०॥

English :- As Damyanti was living the Kingdom with whatever clothes she had worn only the subjects of the Kingdom started weeping (like the showering rain) feeling sad for her and showered anger on Kubar.

अथानुव्रजतो लोकान्, बभाषे निषधाधिपः ॥
निर्ममत्वकठोरात्मा, प्रपित्सुरिव संयमम् ॥१९१॥

अन्वय :- अथ निर्ममत्वकठोरात्मा निषधाधिपः संयमं प्रपित्सुः इव अनुव्रजतः लोकान् बभाषे ॥१९१॥

विवरणम् :- अथ निर्गतं ममत्वं यस्मात् सः निर्ममत्वः । निर्ममत्वश्चासौ कठोरश्चासौ निर्ममत्वकठोरः । निर्ममत्वकठोरः आत्मा यस्य सः निर्ममत्वकठोरात्मा निषधानाम् अधिपः निषधाधिपः नलः संयमं दीक्षां प्रपत्तुम् इच्छुः प्रपित्सुः ईप्सुः इव अनुव्रजतः अनुगच्छतः लोकान् जनान् बभाषे अभाषत ॥१९१॥

सरलार्थ :- अथ निर्ममत्वकठोरात्मा नलः दीक्षाम् ईप्सुः इव अनुगच्छतः लोकान् बभाषे ॥१९१॥

ગુજરાતી :- પછી મમતારહિતપણાથી કઠોર થયેલ હૃદયવાળો નલરાજા, જાણે ચારિત્ર લેવાની ઇચ્છા કરતો હોય તેમ (પોતાની) પાછળ આવતા લોકોને કહેવા લાગ્યો કે, ॥૧૯૧॥

हिन्दी :- फिर ममतारहित कठोर हृदय है जिस का ऐसा नलराजा जैसे चारित्र (दीक्षा) लेने की इच्छा करता नही हो ! ऐसे पीछे आते लोगों को कहने लगा कि, ॥१९१॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

मराठी :- नंतर ममतारहित कठोर हदय असलेला असा तो नलराजा जणूकाय दीक्षा घ्यायची इच्छा करणारा स्वत:च्या मागे येत असलेल्या लोकांना म्हणाला- ॥१९१॥

English :- King Nal spoke to the people following him, with the expressions which showed no love or affection which seemed that he was about to renounce the worldly life. (Diksha)

प्राभवान्ध्ये यदस्माभि - रपराद्धं किमप्यहो ॥
युष्माभि: क्षम्यतां नस्त - देते यामोऽधुना वयम् ॥१९२॥

अन्वय :- अहो प्राभवान्ध्ये यद अस्माभि: किम् अपि अपराद्धं युष्माभि: न: तद् क्षम्यताम् अधुना एते वयं याम: ॥१९२॥

विवरणम् :- अहो ! प्रभो: भाव: प्राभवम् । प्राभवेन आन्ध्यं प्राभवान्ध्यं तस्मिन् प्राभवान्ध्ये सत्तामदान्ध्ये अस्माभि: यत् किम् अपि अपराद्धम् अपराध कृत: । तत् युष्माभि: न: क्षम्यताम् । अधुना एते वयं याम: ॥१९२॥

सरलार्थ :- सत्तामदान्ध्ये यद् अस्माभि: कोऽपि अपराध: कृत: । युष्माभि: अस्मांक स क्षम्यताम् । अधुना एते वयं याम: ॥१९२॥

ગુજરાતી :- અધિકારના મદાંધપણામાં મેં તમારો જે કાંઇ અપરાધ કર્યો હોય, તે માટે મને ક્ષમા કરો. અને હવે અમે અહીંથી વિદાય થઈએ છીએ. ॥૧૯૨॥

हिन्दी :- अधिकारो से मदांध हो कर मैं ने जो भी अपराध किया हो इस के लिए मुझे क्षमा करना ! और अब हम यहाँ से जा रहे हैं ॥१९२॥

मराठी :- अधिकाराने मदांध होऊन आम्ही जो काही अपराध केला आहे, त्याबदल आम्हांला क्षमा करा, आता आम्ही येवून जात आहोत. ॥१९२॥

English :- King Nal asked them to forgive him, if during his ruling pride he had been unjust in any way. And he added that he was now taking their leave.

ऊचुस्ते स्वामिदुःखार्ताः, किं कृतं दैव हा त्वया ॥
विलीनमसि किं न त्वं, यदेवं दुःखदाय्यभूः ॥१९३॥

अन्वय :- स्वामिदुःखार्ताः ते ऊचुः -हा दैव। त्वया किं कृतम्। त्वं किं न विलीनम् असि। यद् एवं दुःखदायि अभूः ॥१९३॥

विवरणम् :- *स्वामिनः दुःखं स्वामिदुःखम्। स्वामिदुःखेन आर्ताः स्वामिदुःखार्ताः। स्वामिदुःखव्याकुलाः ते ऊचुः अवदन् हा दैव भाग्य! त्वया किं कृतम् ? त्वं किं न विलीनम्। किं नष्टं न असि। यद् एवं दुःखं ददाति इत्येवं शीलं दुःखदायि दुःखदम् अभूः अभवः ॥१९३॥*

सरलार्थ :- स्वामिनः दुःखेनार्ताः ते अवदन्-हा दैव ! त्वया किं कृतम् ! त्वं किं नष्टं न अभवः। यद् एवं दुःखदम् अभवः ॥१९३॥

गुजराती :- (પોતાના) સ્વામીના દુઃખથી પીડિત થયેલા તે લોકો દૈવને ઉપાલંભો દેવા લાગ્યા કે, અરે દૈવ ! આ તે શું કર્યું ? તારું પોતાનું મોત કેમ ન આવ્યું ? તું આવો દુઃખદાયી કેમ નીવડ્યો. ॥૧૯૩॥

हिन्दी :- अपने स्वामि के दुःख से पिडित वो लोग दैव को कोसने लगे ! अरे दैव ! यह तुमने क्या किया? तुम खुद क्यों न मर गये? तुमने ऐसा दुःखदायी काम क्यों किया ?॥१९३॥

मराठी :- आपल्या स्वामीच्या दुःखाने पीडित लोक दैवाला दोष देऊ लागले, "अरे दैवा ! हे तू काय केलेस ? तू स्वतःच नष्ट कां नाही झालास, जे असे दुःखदायी कार्य केलेस. ॥१९३॥

English :- The people were full of remorse when they encountered the suffering of their King Nal. They began cursing-desting and asked, as to why it did not dic before doing such sad and remorseful thing.

जगतामनुकूलस्य, नलस्यास्य महात्मनः ॥
प्रतिकूलमभूः किं त्वं, दौष्ट्यं दुष्टे हि युज्यते ॥१९४॥

अन्वय :- जगताम् अनुकूलस्य अस्य महात्मनः नलस्य त्वं किं प्रतिकूलम् अभूः तयाहि दुष्टे दौष्ट्यं युज्यते ॥१९४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- जगतां भुवनानाम् अनुकूलस्य अस्य महान् आत्मा यस्य सः महात्मा तस्य महात्मनः महापुरुषस्य नलस्य त्वं किं प्रतिकूलम् अभवः अभूः। तथाहि दुष्टे दुष्टस्य भावः दौष्ट्यं युज्यते। दुष्टे एव दौष्ट्यम् कर्तुं युज्यते न सुजने। नलस्तु सुजनः। तस्य त्वं प्रतिकूलं किमर्थमभवः ॥१९४॥

सरलार्थ :- जगताम् अनुकूलस्य अस्य महात्मनः नलस्य त्वं किं प्रतिकूलम् अभवः। तथाहि दुष्टे दुष्टत्वं युज्यते ॥१९४॥

ગુજરાતી :- (વળી હે દેવ !) જગતને અનુકૂળ એવા આ મહાત્મા નલ પ્રત્યે તું કેમ પ્રતિકૂળ થયો ? કેમ કે દુષ્ટ પ્રત્યે દુષ્ટપણું આચરવું એ જ વ્યાજબી ગણાય. ॥૧૯૪॥

हिन्दी :- हे दैव ! जगत को अनुकूल ऐसे महात्मा नल उपर तु क्यों प्रतिकूल हुआ? क्यों की दुष्टपर दुष्टपणा सही माना जाता है ॥१९४॥

मराठी :- हे दैवा ! जगाला अनुकूल असलेल्या महात्म्या नलराजावर तू कां प्रतिकूल झाला ? कारण दुष्टांवर दुष्टपणाचे आचरण करणे हेच योग्य असते.।१९४॥

English :- The people asked the desting as to why did it bring ill-luck to a pious and gentle man like King Nal when luck should stick to him, because if ill-luck be-falls a wrong doer it is just be-fitting but here the perverse had taken place.

कूबरोऽपि हि दुर्दैव, भवताधिष्ठितः स्फुटम् ॥
अन्यथा पितृतुल्यस्य, बंधोः किं वैरितां व्यधात् ॥१९५॥

अन्वय :- दुर्दैव ! भवता कूबरः अपि अधिष्ठितः इति स्फुटम्। अन्यथा पितृतुल्यस्य बन्धोः वैरितां किं व्यधात् ॥१९५॥

विवरणम् :- दुष्टंच दैवंतद्च भाग्यं च दुर्दैवं तत्सम्बुद्धौ हे दुर्दैव ! भवता त्वया कूबरः अपि अधिष्ठितः अस्ति इति स्फुटं स्पष्टम्। अन्यथा त्वया अधिष्ठितः नो चेत् सः पित्रा तुल्यः पितृतुल्यः तस्य पितृतुल्यस्य बन्धोः भ्रातुः नलस्य वैरितां शत्रुतां किमर्थं व्यधात् अकरोत् ? ॥१९५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- हे दुर्दैव ! भवता कूबरः अपि अधिष्ठितः इति स्पष्टम् । अन्यथा सः पितृतुल्यस्य भ्रातुः शत्रुतां किम् अकरोत् ॥१९५॥

ગુજરાતી :- અરે ! દુર્દૈવ ! ખરેખર પ્રગટ રીતે કૂબરમાં પણ તેં જ પ્રવેશ કરેલો છે, નહીંતર પિતાસરખા ભાઈ પ્રત્યે તે આવું વેર શા માટે ધારણ કરે ? ॥૧૯૫॥

हिन्दी :- अरे दुर्दैव ! तुमने सचमुच कूबर में प्रवेश किया है, वरना वो पितासमान भाई के प्रति ऐसी शत्रुता क्यों करेगा? ॥१९५॥

मराठी :- अरे दुर्दैवा ! खरोखरच तु कूबराच्या शरीरात प्रवेश केला आहे, हे नक्की. नाहींतर वडिलांसमान भावा विषयी तो अशी शत्रुता का करील ? ॥१९५॥

English :- They added that probably ill-luck has entered Kubar or he wouldn't have thrown away a brother who is like a father to him and behave with him like an enemy.

नलोऽवादीदलं दैव - शोचनेनाधुना जनाः ॥
हृदयं निर्दयीकृत्य, स्नेहं श्लथयताऽनघाः ॥१९६॥

अन्वय :- नलः अवादीत् - हे - अनघाः जनाः अधुना दैवशोचनेन अलम् । हृदयं निर्दयीकृत्य स्नेहं श्लथयत ॥१९६॥

विवरणम् :- नलः अवादीत् - अवदत् अुवादहे न विद्यते अघं पापं येषां ते अनघाः निष्पापाः जनाः । अधुना दैवस्य भाग्यस्य शोचनं दैवशोचनं तेन दैवशोचनेन दैवशोकेन अलम् । निरर्थकम् । अथ हृदयं निर्गता दया यस्मात् तत् निर्दयं कृत्वा निर्दयीकृत्य दयारहितं कृत्वा स्नेहं प्रेम श्लथयत । शिथिलीकुरुत ॥१९६॥

सरलार्थ :- नलः अवदत् - हे निष्पापाः जनाः । अधुना भाग्यशोकेन अलम् । हृदयं दयारहितं कृत्वा स्नेहं श्लथयत ॥१९६॥

ગુજરાતી :- ત્યારે નલરાજાએ કહ્યું કે, હે નિષ્પાપી લોકો ! હવે દૈવને દોષ આપવાથી શું ? હવે તો તમો હૃદય કઠણ કરીને (બારા પરના) સ્નેહને ઓછો કરી નાખો.॥૧૯૬॥

हिन्दी :- तब नलराजाने लोगों से कहा, "हे निष्पापी लोगो, अब दैव को दोष देने से अच्छा है अपना हृदय सख्त कर के मेरे प्रति अपने स्नेह को कम करो।" ॥१९६॥

P.P. Ac. Gunratnasuri M.S.
Jain Gun Aradhak Trust

मराठी :- तेव्हा नलराजा लोकांना म्हणाला, ''हे निष्पापी लोकांनो आता दैवाला दोष देण्यापेक्षा आपले हृदय कठोर करून माझ्या विषयी आपला स्नेह कमी करा.'' ॥१९६॥

English :- Then King Nal addressing the people as sinless people told them not to blame destiny and asked them to make their hearts of stone and reduce the love and affection for him.

दोषो नान्यस्य कस्यापि, दोषो नः कर्मणामयम् ॥
सर्वोऽप्यनुभवत्यत्र, स्वयमेव शुभाशुभे ॥१९७॥

अन्वय :- अन्यस्य कस्यापि दोषः न। अयं नः कर्मणां दोषः। सर्वः अपि स्वयमेव शुभाशुभे अत्र अनुभवति ॥१९७॥

विवरणम् :- *अन्यस्य अपरस्य कस्यापि दोषः न। अयं नः अस्माक कर्मणां पापानां दोषः अस्ति। सर्वः नरः अपि स्वयमेव शुभं च अशुभं च शुभाशुभे कर्मणी अत्र अनुभवति ॥१९७॥*

सरलार्थ :- अन्यस्य कस्यापि दोषः नास्ति। अयम् अस्माकं कर्मणां दोषः अस्ति।सर्वः अपिजनः स्वयमेव शुभाशुभे कर्मणी अत्र अनुभवति। ॥१९७॥

ગુજરાતી :- (આ બાબતમાં) બીજા કોઈનો પણ દોષ નથી, આ દોષ ફક્ત અમારાં કર્મોનો જ છે, કેમ કે સર્વ મનુષ્ય પોતાનાં જ શુભ-અશુભ કર્મોને ભોગવે છે. ॥૧૯૭॥

हिन्दी :- इस में किसी का दोष नहीं, ये दोष सिर्फ मेरे कर्मों का है, क्यों कि कोई भी मनुष्य अपने ही शुभ-अशुभ कर्मों का फल पाता है। ॥१९७॥

मराठी :- ह्यात कोणाचाही दोष नाही. सर्व दोष माझ्या कर्माचा आहे कारण प्रत्येकजण आपल्याच शुभ अशुभ कर्माचे फळ भोगतो.॥१९७॥

English :- He says that they should not blame desting but should blame his past immeritable deeds for this untimely incident, because every man has to bear up according to his good and bad deeds.

किं चात्र महतां हंत, संपत्त्यर्थं विपत्तयः ॥
तेजोवृद्ध्यै न किं हेम्नः, पतनं ज्वलितानले ॥१९८॥

अन्वय :- हन्त !किं च अत्र महतां विपत्तयः सम्पत्यर्थं भवन्ति । ज्वलितानले हेम्नः पतनं किं तेजोवृद्धयै न भवति ? ॥१९८॥

विवरणम् :- किं च अपरंच अत्र अस्मिन् जगति महतां महापुरुषाणां सज्जनानां विपत्तयः सङ्कटानि हन्त ! सम्पत्यै इदं सम्पत्यर्थं सम्पत्यै भवन्ति । ज्वलितश्चासौ अनलश्च ज्वलितानलः तस्मिन् ज्वालितानले हेम्नः सुवर्णस्य पतनं तेजसां वृद्धिः तेजोवृद्धिः तस्यै तेजोवृद्धयै न भवति किम् ? महात्मानः विपत्त्यनन्तरं सम्पदमधिगच्छन्ति । ज्वलितेऽग्नौ पतनेन् सुवर्णस्य तेजोवृद्धिः भवति ॥१९८॥

सरलार्थ :- प्रज्वलिते अग्नौ सुवर्णस्य पतनं यथा तेजोवृद्ध्यै भवति । तथा महात्मनां विपत्तयः सम्पत्त्यर्थं भवन्ति । महात्मानः विपदन्तरं सम्पदमधिगच्छन्ति ॥ ॥१९८॥

ગુજરાતી :- વળી મહાન પુરુષોને જે આપત્તિ આવે છે, તે આખરે તો સંપત્તિને માટે જ હોય છે, કેમ કે બળતા અગ્નિમાં સુવર્ણનું પડવું શું તેના તેજની વૃદ્ધિ નથી કરતું ? ॥૧૯૮॥

हिन्दी :- महान पुरुषो पर जो भी आपत्ति आती है, वह केवल संपत्ति के लिये ही आती है, क्योंकि जलती हुई अग्निमे जो सुवर्ण डाला जाता है क्या उस के तेज की वृद्धि के लिए नहीं डाला जाता ? ॥१९८॥

मराठी :- प्रज्वलित अग्नीत सुवर्ण टाकल्याने जसे सोन्याचे तेज वाढते. त्याप्रमाणे महापुरुषावर आपत्ति आली की त्याची सम्पत्ती वाढते. ॥१९८॥

English :- He continues saying that all great men have and had to exprience difficultties due to wealth alone but when gold is put in a burning furnace, it only cleans of the dirt but becomes more brighter and attractive as ever. In the same way man learns from his mistake and come out victorious.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो धारागृहीभूताः, सर्वे जानपदास्तदा ॥
वर्षन्तो नेत्रतश्चास्त्रै - र्धारालैः पतयालुभिः ॥१९९॥

अन्वय :- ततः तदा नेत्रतः पतयालुभिः धारालैः आस्त्रैः वर्षन्तः सर्वे जानपदाः धारागृहीभूताः ॥१९९॥

विवरणम् :- *ततः तदनन्तरं तदा तस्मिन् समये नेत्रतः नेत्रात् पतन्ति इति पतयालूनि तैः पतयालुभिः पतभ्दिः धारालैः धाराः येषां सन्ति धारालानि तैः धारालुभिः धारावद्भिः अश्रूणां समूहाः आस्राणि तैः आस्त्रैः अश्रुसमूहैः वर्षन्तः ते सर्वे जनपदेषु तिष्ठन्ति इति जानपदाः ग्रामीणाः धाराणां गृहाणि धारागृहाणि।न धारागृहाणि अधारागृहाणि अधारागृहाणि धारागृहाणि भूताः धारागृहीभूताः। नेत्राश्रुभिः अविरतं अश्रूणि वर्षन्तः ते जलधारागृहसदृशाः अभवन् ॥१९९॥*

सरलार्थ :- तदनन्तरं तस्मिन् समये नेत्रान् पतयालुभिः धारालैः अश्रुसमूहैः वर्षन्तः सर्वेजानपदाः धारागृहीभूताः ॥१९९॥

ગુજરાતી :- પછી તે વખતે આંખોમાંથી ધારાબંધ પડતા આંસુઓ ને કારણે તે સઘળા નગરજનો (જલધારા) વરસતા ફુવારાઓ સરખા (દેખાવા લાગ્યા) ॥૧૯૯॥

हिन्दी :- फिर उस वक्त आँखोमें से धाराबंध गिरते आंसुओ से वे सभी नगरजन जलधारा बरसाते फव्वारों के समान दिखने लगे।

मराठी :- नंतर त्या वेळी डोळ्यांतून अखंड धाराप्रमाणे वाहात असलेल्या अश्रूनी ते सर्व नगरवासी जलधारांचा वर्षाव करणाऱ्या कारंजा सारखे दिसू लागले. ॥१९९॥

English :- When the subjects came to bid their king and queen farewell, tears were rolling down their cheeks which seemed like infinite fountains.

किमयं पामराचारः, प्रारेभे सत्तमैरपि ॥
अलं रुदित्वा तद्येन, प्रस्थितानाममंगलम् ॥२००॥

अन्वय :- सत्तमैः अपि अयं पामराचारः किम् प्रारेभे तद् रुदित्वा अलम्। येन प्रस्थितानाम् अमङ्गलम् ॥२००॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

विवरणम् :- अतिशयेन सन्तः सत्तमाः तैः सत्तमैः धैर्यवद्भिः अपि युष्माभिः पामरश्चासौ आचारश्च पामराचारः कातराचारः किमर्थं प्रारेभे प्रारभ्यत। तद् रुदित्वा रोदनेन अलम्। येन रोदनेन प्रस्थितानां प्रस्थानकारिणां न मङ्गलं अमङ्गलं भवति। रोदनं प्रस्थितानां कृते अमङ्गलं वर्तते ॥२००॥

सरलार्थ :- यूयं धैर्यवन्तः अपि एवं निर्बलवत् किम् आचरथ। रोदनेन अलम्। रोदनं प्रस्थितानाम् अमङ्गलकारकं वर्तते ॥२००॥

ગુજરાતી :- (ત્યારે નલરાજા તેઓને કહે છે કે) હે નગરજનો ! તમો ધૈર્યવાન છો છતાં, તમોએ આ નિર્બલતાનો આચાર શું માંડ્યો છે ? માટે હવે રડવાનું છોડો, કેમ કે પ્રસ્થાન કરનારના સંબંધમાં રડવું, એ અપશુકન લેખાય છે. ॥૨૦૦॥

हिन्दी :- तब नलराजा ने उन्हों से कहा, "हे नगरजनो ! तुम लोग धैर्यशील होते हुए भी यह निर्बलता का आचरण क्यों कर रहे हो? अब रोना बंद करो, क्यों कि प्रस्थान करनेवालो के लिए रोना अपशकुन माना जाता है।" ॥२००॥

मराठी :- तेव्हां नलराजा म्हणाला, - "हे नगरवासिवांनो ! तुम्ही धैर्यवान असतांना सुद्धा हा निर्बलतेचा खेळ कां मांडला आहे ? आता रडणे बंद करा, कारण प्रस्थान करणाऱ्या करिता रडणे अपशुकनाचे लक्षण मानले जाते." ॥२००॥

English :- King Nal asked his subjects as to why they have turned so soft-hearted when they are supposed to be high-sprited and firm in life. He asked them to stop crying as it is unauspicious to cry before the departure of a jouney.

यद्देशदर्शनोत्साहः, सहायो नः सहाधुना ॥
ततो वयं सुखेनैव, यास्यामो मा विषीदत ॥२०१॥

अन्वय :- यद् देशदर्शनोत्साहः अधुना नः सह सहायः। ततः वयं सुखेन एव यास्यामः मा विषीदत ॥२०१॥

विवरणम् :- यद् देशानां दर्शनानि देशदर्शनानि देशदर्शनानाम् उत्साहः देशदर्शनोत्साहः अधुना नः। अस्माकं सह साकं सहायः अस्ति। ततः तस्मात् वयं सुखेन एव यास्यामः गमिष्यामः। मा विषीदत मा खेदं कुरुत ॥२०१॥

सरलार्थ :- यद् देशदर्शनोत्साहः अधुना अस्माकं सहचारी सहायः अस्ति। तस्मात् कारणात् वयं सुखेन एव गमिष्यामः। खेदं मा कुरुत

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- દેશો જોવા માટેનો જે ઉત્સાહ હોય છે, તે જ હવે અમારી સાથે છે, માટે અમે સુખરૂપ જ રહીશું, તમો (જરાપણ) કચવાઓ નહીં. ॥૨૦૧॥

हिन्दी :- अलग अलग देश देखने का हमें जो उत्साह है, वह अब हमारे साथ है इसलिये हम सुख समाधान से जायेंगे, आप जरा भी नाराज नहीं होना ॥२०१॥

मराठी :- वेगळे वेगळे देश पाहण्याचा आमचा जो उत्साह आहे तोच आम्हाला सहाय्यभूत आहे, म्हणून आम्ही सुख समाधानपूर्वक जाऊ, तुम्ही जरापण दुःखी होऊ नका.॥२०१॥

English :- The King then said that he always had the interest to see different places and this will increase his enthusiusm all the country with utmost blis. So he asks them to leave their anger aside.

एवं प्रज्ञापिता राज्ञा, ते न्यवर्तन्त नागराः ॥
केवलं कायमात्रेण, मनसा त्वन्वगुर्नृपम् ॥२०२॥

अन्वय :- एवं राज्ञा प्रज्ञापिताः ते नागराः केवलं कायमात्रेण न्यवर्तन्त । मनसा तु नृपम् अन्वगुः ॥२०२॥

विवरणम् :- *एवं इति राज्ञा नृपेण नलेन प्रज्ञापिताः अवबोधिताः ते नागराः नगरवासिनः केवलं कायः एव कायमात्रः तेन कायमात्रेण शरीरमात्रेण न्यवर्तन्त । किन्तु मनसा हृदयेन नृपं राजानम् अन्वगुः अन्वगच्छन् । ॥२०२॥*

सरलार्थ :- एवं नलेन नृपेण संबोधिताः ते नगरवासिनः केवलं शरीरमात्रेण न्यवर्तन्त । मनसा तु नृपम् अन्वगच्छन् । ॥२०२॥

ગુજરાતી :- એવી રીતે રાજાએ સમજાવેલા તે લોકો, કેવળ (પોતાનાં) શરીરથી જ પાછા વળ્યા, પરંતુ મન વડે તો તેઓ રાજાની સાથે જ રહ્યા. ॥૨૦૨॥

हिन्दी :- इस तरह राजा द्वारा समजाये हुए वह नगरवासी सिर्फ अपने शरीर से ही (देहसे) वापस गये किन्तु मन से वह राजा के पिछे गये (राजा के साथ गये) ॥२०२॥

मराठी :- अशा प्रकारे राजाने समजूत घातलेले ते नगरातील लोक फक्त आपल्या शरीराने परत गेले, परंतु मनाने ते राजाच्या मागे गेले. ॥२०२॥

English :- In this way when Nal explained to the subjects of his kingdom they turned back and walked back to the houses but only bodily but mentally they were along with the king.

गच्छंस्तत्रैव च स्तंभं, पंचहस्तशतोन्नतम् ॥
नलो व्यलोकयद्व्योम-च्छत्रदंडमिवाग्रतः ॥२०३॥

अन्वय :- तत्र गच्छन् एव नलः व्योमच्छत्रदण्डम् इव पञ्चहस्तशतोन्नतं स्तम्भम् अग्रतः व्यलोकयत् । ॥२०३॥

विवरणम् :- तत्र तस्मिन् अरण्येगच्छन् व्रजन् एव नलः नृपः व्योम एव छत्रं (व्योम छत्रम् इव वा) व्योमच्छत्रम् । व्योमच्छत्रम् एव दण्डः व्योमच्छत्रदण्डः तं व्योमच्छत्रदण्डम् इव हस्तानां शतानि हस्तशतानि पञ्च च तानि हस्तशतानि पञ्चहस्तशतानि पञ्चहस्तशतानि उन्नतः पञ्चहस्तशतोन्नतः तं पञ्चहस्तशतोन्नतं स्तम्भम् अग्रतः पुरत व्यलोकयत् विलोकयामास ॥२०३॥

सरलार्थ :- तत्र गच्छन् एव नलः आकाशच्छत्रदण्डम् इव पञ्चहस्तशतोन्नतस्तम्भम् अग्रत ऐक्षत ॥२०३॥

ગુજરાતી :- જતી વખતે ત્યાં જ નલરાજાએ જાણે આકાશરૂપી છત્રનો દંડ હોય એવો પાંચસો હાથ ઊંચો એક સ્તંભ આગળના ભાગમાં જોયો. ॥૨૦૩॥

हिन्दी :- जाते हुए वहाँ नलराजा ने जैसे आकाश समान छत्रका दंड हो ऐसा पांचसौ हाथ ऊंचा एक स्तंभ सामने के भाग में देखा ॥२०३॥

मराठी :- जाता जाता नलराजाने जणूकाय आकाशरूपी छत्राचा दंडच असा पांचशे हाथ ऊंच एक स्तंभ समोरच्या भागात पाहिला. ॥२०३॥

English :- As he was leaving, King Nal seen a pillar fifty feet high and the sky seem to be an over cloth over the pillar that seemed like gaint umbrella.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राज्यभ्रंशप्रहारार्ति - मप्यजानन्निवौजसा ॥
उच्चखान तमाश्वेव, पद्मनालमिव द्विपः ॥२०४॥

अन्वय :- द्विपः पद्मनालम् इव राज्यभ्रंशप्रहारार्तिम् अपि अजानन् इव नलः ओजसा तम् आशु एव उच्चखान ॥२०४॥

विवरणम् :- द्वाभ्यां शुण्डामुखाभ्यां पिबति इति द्विपः द्विरदः, पद्मस्य नालं पद्मनालं यथा आशु झटिति उत्खनति तथा राज्यात् भ्रंशः राज्यभ्रंशः । राज्यभ्रंशः एव प्रहारः राज्यभ्रंशप्रहारः राज्यभ्रंशप्रहारार्तिम् अपि न जानन् अजानन् इव नलः ओजसा तेजसा तं स्तम्भम् आशु शीघं झटिति एव उच्चखान उत्खातवान् ॥२०४॥

सरलार्थ :- यथा गजः पद्मनालम् उत्खनति तथैव राज्यभ्रंशप्रहारार्तिम् अपि अजानन् इव नलः तेजसा तम् स्तम्भं झटिति एव उत्खातवामास ॥२०४॥

ગુજરાતી :- હાથી જેમ કમળની દાંડીને ઉખેડી નાખે તેમ રાજ્યના ત્યાગરૂપી પ્રહારની પીડાને પણ નહી જાણતા એવા નલરાજાએ (પોતાના) બળથી તે સ્તંભને એકદમ ઉખેડી નાખ્યો. ॥૨૦૪॥

हिन्दी :- हाथी जैसे कमल उखाड देता है वैसे राज्य के त्यागरूपी प्रहार की पीडा को भी नही जानते हुए नलराजाने बलपूर्वक उस स्तंभ को एकदम उखाड दिया ॥२०४॥

मराठी :- हत्ती जसा कमळाच्या देठ उखडून टाकतो. त्याप्रमाणे राज्य नाश होण्याच्या प्रहाराची पीडा जणूकाय न जाणताच राजाने आपल्या तेजाने तो स्तंभ उखडून टाकला. ॥२०४॥

English :- Just as an elephant plucks of a lotus in the same way by having no problems, King Nal rooted out the pillar just as easily as the elephant.

तथैवारोपयामास, पुनस्तत्रैव तं नलः ॥
महौजस्त्वप्रकाशाय, कीर्तिस्तंभमिवात्मनः॥२०५॥

अन्वय :- महौजस्त्वप्रकाशाय आत्मनः कीर्तिस्तम्भम् इव तं नलः पुनः तत्रैव तथैव आरोपयामास ॥२०५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

विवरणम् :- महत् ओजः यस्य सः महोजाः । महौजसः भाव महौजस्त्वम्। महौजस्त्वस्य प्रकाशः महौजस्त्वप्रकाशः तस्मै महौजस्त्वप्रकाशाय आत्मनः महौजस्त्वं प्रकशयितुम् आत्मनः कीर्तेः स्तम्भः कीर्तिस्तम्भः तं कीर्तिस्तम्भम् इव तं स्तम्भं पुनः तत्र एव तस्मिन् स्थाने एव तथा एव पूर्ववत् आरोपयामास आरोपयत् ॥२०५॥

सरलार्थ :- महौजस्त्वप्रकाशाय आत्मनः कीर्तिस्तम्भम् इव तं नलः पुनः तस्मिन् एव स्थाने पूर्ववत् आरोपयत् ॥२०५॥

ગુજરાતી :- (પછી) પોતાના બલિષ્ટપણાને જાહેર કરવામાટે જાણે પોતાના કીર્તિસ્તંભને સ્થાપન કરતો હોય તેમ નલરાજાએ તે સ્તંભને પાછો ત્યાં જ ફરી સ્થાપિત કર્યો. ॥૨૦૫॥

हिन्दी :- फिर खुद के बलिष्ठपन को जाहीर करने के लिये, अपने कीर्तिस्तंभ के समान नलराजा ने उस स्तंभ को वापस वहाँ पहेले के समान स्थापीत किया॥२०५॥

मराठी :- नंतर स्वत:चा बलिष्ठपणा जाहीर करण्याकरिता जणू काय स्वत:च्या कीर्तिस्तंभाप्रमाणे तो स्तम्भ नलराजाने पुन्हा त्याच ठिकाणी स्थापन केला. ॥२०५॥

English :- To advertise his bravery and gallancy he uprooted the pillar and placed it back in the place which seemed that he wanted to advertise his name and fame.

तच्च दृष्ट्वावदन् पौरा, अहो ऊर्जस्वलो नलः ॥
ईदृशस्याप्यवस्थेयं, किंचास्तं याति नार्यमा ॥२०६॥

अन्वय :- तद् दृष्ट्वा पौराः अवदन्-अहो नलः ऊर्जस्वलः अस्ति। ईदृशस्य अपि इयम् अवस्था वर्तते अर्यमा किं अस्तं न याति।

विवरणम् :- तद् च दृष्ट्वा निरीक्ष्य पौराः नगरजना अवदन् ऊदुः--अहो! नलः ऊर्जः बलम् अस्य अस्ति इति ऊर्जस्वलः बलवान् अस्ति। ईदृशस्य बलवत्तः नलस्य अपि इयम् अवस्था दुरवस्था जाता अर्यमा दिवाकरः किं अस्तं न याति। सूर्यास्तः किं न भवति। यथा तेजस्विनोऽपि सूर्यस्यास्तो भवति। तथा बलवतोऽपि नलस्येयं दुरवस्था जाता। अत्र किमप्याश्चर्यं नास्ति

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- तद् अवलोक्य नगरजनाः अवदन् अहो । नलः बलवान् अस्ति। बलवतः नलस्य अपि इयम् ईदृशी दुष्टा अवस्था जाता । सूर्यः किं अस्तं न गच्छति । तेजस्वी सूर्यः अपि अस्तं गच्छत्येव । तर्यद बलवानपि नलः दुरवस्थां आप । इत्यत्र नास्ति किमप्याश्चर्यम् ॥२०६॥

ગુજરાતી :- તે જોઈને નગરના લોકો કહેવા લાગ્યો કે, અહો! આ નલરાજા (કેવો) બળવાન છે ? આવા બળવાનની પણ અરેરે! આવી હાલત! સૂર્ય કેમ આથમી જતો નથી! ॥२०६॥

हिन्दी :- यह देखकर नगर के लोग कहने लगे कि आहा ! यह नलराजा कितना बलवान है ! ऐसे बलवान की अरेरे! ऐसी हालत! क्यों सूरज डूबता नही? ॥२०६॥

मराठी :- हे पाहून नगरवासी म्हणू लागले की, अहो! हा नलराजा किती बलवान आहे? अशा बलवानाची अरेरें! काय ही दुर्दशा! सूर्य मावळत नाही का ? सूर्य तेजस्वी असून सुद्धा अस्ताला जातो तसेच नलराजा बलवान असून सुद्धां दुर्दशेला प्राप्त झाला. यांत काही आश्चर्य नाही. ॥२०६॥

English :- Seeing the valiantcy of King Nal the people exclmed at the sufferings he is going through and wondered why the sun does'nt set by felling sorry for King Nal.

उद्याने क्रीडतोरत्र, नलकूबरयोः पुरा ॥
आगादतीन्द्रियज्ञानी, मुनिरेकोऽतिलोकधीः ॥२०७॥

अन्वय :- पुरा अत्र उद्याने नलकूबरयोः क्रीडतोः अतीन्द्रियज्ञानी अतिलोकधीः एकः मुनिः आगात् ॥२०७॥

विवरणम् :- पुरा पुरानतकाले अत्र अस्मिन् उद्याने नलश्च कूबरश्च नलकूबरौ तयोः नलकूबरयोः क्रीडतोः खेलतोः सतोः इन्द्रियाणि अतिक्रान्तम् अतीन्द्रियं, अतीन्द्रियं ज्ञानं यस्य अस्ति अतीन्द्रियज्ञानी । लोकम् अतिक्रान्ता अतिलोका, अतिलोका धीः यस्य सः अतिलोकधीः लोकोत्तरमतिः एकः मुनिः आगात् आगच्छत् आजगाम ॥२०७॥

सरलार्थ :- पुरा अस्मिन् उद्याने नलकूबरयो: खेलतो: अतीन्द्रियज्ञानी लोकोत्तरमति: एक: मुनि: अत्र आगच्छत् ॥२०७॥

ગુજરાતી :- પહેલા અહીં ઉદ્યાનમાં જ્યારે નલ અને કૂબર ક્રીડા કરતા હતા, ત્યારે અતીંદ્રિય જ્ઞાનવાળા, તથા લોકોત્તર બુદ્ધિવાળા એક મુનિ આવ્યા હતા. ॥૨૦૭॥

हिन्दी :- पहले इस उद्यान में जब नल और कूबर क्रीडा करते थे, तब अतींद्रिय ज्ञानवाले और लोकोत्तर बुद्धिवाले एक मुनि वहाँ आये थे ॥२०७॥

मराठी :- पूर्वी या बगीच्यात जेव्हा नल आणि कूबर क्रीडा करीत होते, तेव्हा अतींद्रिय ज्ञान असणारे आणि लोकोत्तर बुध्दी असणारे एक साधु तेथे आले. ॥२०७॥

English :- Once, long back when Nal and Kubar were playing in this garden a priest arrived there who was unperecived by the senser and was supernatural and egregious.

सोऽभ्यधाद्भरतार्धस्य, नल: स्वामी भविष्यति ॥
प्राग्भवोपात्तसत्पुण्य:, सुसाधो: क्षीरदानत: ॥२०८॥

अन्वय :- स: अभ्यधात् - सुसाधो: क्षीरदानत: प्राग्भवोपात्तसत्पुण्य: नल: भरतार्धस्य स्वामी भविष्यति ॥२०८॥

विवरणम् :- स: मुनि अभ्यधात्-अवदत् - शोभनश्चासौ साधुश्च सुसाधु; तस्य सुसाधो: क्षीरस्य दुग्धस्य दानं क्षीरदानं तस्मात् क्षीरदानत; प्राक् चासौ भवश्च प्राग्भव: । प्राग्भवे उपात्तं प्राग्भवोपात्तं पुण्यं येन स: प्राग्भवोपात्तसत्पुण्य: पूर्वभवार्जितसुकृत: नल: भरतस्य अर्धं भरतार्धं तस्य भरतार्धस्य स्वामी भविष्यति ॥२०८॥

सरलार्थ :- स: मुनि: अवदत् - सुसाधो: दुग्धदानत: प्राग्भवोपात्तसत्पुण्य: नल: भरतार्धस्य स्वामी भविष्यति । पूर्वस्मिन् भवे नलेन कस्मैचित् सुसाधवे दुग्धं प्रदत्तम् । तत्पुण्यप्रभावात् नल: भरतार्धस्य स्वामी भविष्यति ॥२०८॥

ગુજરાતી :- તે મુનિએ કહ્યું હતું કે, પૂર્વ ભવમાં ઉત્તમ સાધુને ક્ષીરનું દાન દેવાથી ઉપાર્જન કરેલ ઉત્તમ પુણ્ય થકી નલરાજા અર્ધ ભરતખંડનો સ્વામી થશે. ॥૨૦૮॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- उस मुनि ने कहा था कि पहले भव में मुनि को क्षीर का दान देने से जिसने पुण्य उपार्जना किया, वह नलराजा अर्ध भारत खंड का स्वामी बनेगा ॥२०८॥

मराठी :- त्यां साधूने सांगितले होते कीं, नलराजानें पूर्व जन्मात एका उत्तम साधूला दूध दिले. त्यादानाच्या पुण्याने नलराजा अर्धभरतखंडाचा स्वामी होईल. ॥२०८॥

English :- The priest had said that King Nal had become a King of the half of the Bharatschetra because he had done a meritable deed of giving a sweet dish made of milk, sugar and rice.

सावष्टंभो महास्तंभं, यश्चैनं चालयिष्यति ॥
स पतिर्भरतार्धस्यावश्यमेव भविष्यति ॥२०९॥

अन्वय :- सावष्टम्भः यः एतं महास्तम्भं चालयिष्यति। सः अवश्यमेव भरतार्धपतिः भविष्यति ॥२०९॥

विवरणम् :- अवष्टम्भेन आवेशेन सह वर्ततेऽसौ सावष्टम्भः सावेशः यः एनं महान् चासौ स्तम्भश्च महास्तम्भः तं महास्तम्भं चालयिष्यति कम्पयिष्यति। सः अवश्यमेव निश्चितमेव भरतस्य अर्धं भरतार्धं तस्य भरतार्धस्य पतिः स्वामी भविष्यति ॥२०९॥

सरलार्थ :- सावेशः यः एनं महास्तम्भं कम्पयिष्यति सः अवश्यमेव भरतार्धस्वामी भविष्यति ॥२०९॥

ગુજરાતી :- વળી આ મહાન સ્તંભને ઉખેડીને પાછો સ્થાપશે, તે ખરેખર જ અર્ધ ભરતખંડનો રાજા થશે. ॥૨૦૯॥

हिन्दी :- जो इस महान स्तंभ को उखाड़कर फिर उसकी स्थापना करेगा वह अर्ध भरतखंड का राजा जरूर बनेगा ॥२०९॥

मराठी :- बलसंपन्न असलेला जो कोणी हा स्तंभ हलवून पुन्हा स्थापन करील तो अर्धभरतखंडाचा स्वामी होईल. ॥२०९॥

English :- The man being brave and gallant and who is able to uproot a great pillar and place it back in its place, is capable and will be a king of the half of the Bharatschetra.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

तत्रासौ भरतार्धस्य, स्वामी तावदजायत ॥
स्तंभं च चालयामास, द्वयं संवदति स्म तत् ॥२१०॥

अन्वय :- तत्र असौ तावत् भरतार्धस्य स्वामी अजायत। स्तम्भं च चालयामास तत् द्वयं संवदति स्म ॥२१०॥

विवरणम् :- तत्र तस्मिन् नगरे असौ नलः तावत् प्रथमं भरतस्य अर्धं भरतार्धम्। भरतार्धस्य स्वामी अजायत अजनि। स्तम्भं च चालयामास अचालयत्। तत् द्वयं संवदति स्म परस्परम् अनुकूलम् अस्ति ॥२१०॥

सरलार्थ :- तत्र असौ नलः प्रथमं भरतार्धस्य स्वामी अजावत स्तम्भं च चालयामास। तत् द्वयं परस्परम् अनुकूलम् अस्ति ॥२१०॥

गुजराती :- તેમાં આ નલરાજા અર્ધા ભરતખંડનો રાજા તો થયો, તેમ તેણે આ સ્તંભને પણ ચલાયમાન કર્યો, એ રીતે તે બન્ને વાતો તો મળતી આવી. ॥२१०॥

हिन्दी :- तब वह नलराजा अर्ध भरत खंड का राजा तो बना, और उसने उस स्तंभ को भी पुनःस्थापित किया, इसी तरह उसे दोनों बातें भी मिलीं ॥२१०॥

मराठी :- त्यात नलराजा अर्ध भरतखंडाचा महाराजा झाला, त्याने स्तंभ उखडून स्थापित केला. ह्या दोन्ही गोष्टी मिळतात. ॥२१०॥

English :- So in this way King Nal experienced both the benefits, one is to be the King of the half of Bharatschetra and the second is to uproot the great pillar and keep it back in the place.

इदं चैकमसंवादि, नले जीवत्यपीह यत् ॥
अभवत् कोशलापुर्यां, कूबरः पृथिवीश्वरः ॥२११॥

अन्वय :- इदं च एकम् असंवादि। यत् नले जीवति अपि इह कोशलापुर्यां कूबरः पृथ्वीश्वरः अभवत् ॥२११॥

विवरणम् :- इदं च एकम् असंवादि प्रतिकूलं आस्ते। यत् नले जीवति सति अपि इह अस्यां कोशलापुर्यां कूबरः पृथ्व्या ईश्वरः पृथ्वीश्वरः अभवत् अभूत् बभूव ॥२११॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- इदं च एकं प्रतिकूलं यत् नले जीवति सति इह कोशलापुर्यां कूबरः नृपः अभवत् ॥२११॥

ગુજરાતી :- પરંતુ આ એક વાત બંધબેસતી નથી, કે નલરાજા જીવતા હોવા છતાં પણ કોશલાનગરીમાં કૂબર રાજા બન્યો. ॥२११॥

हिन्दी :- लेकिन यह एक बात प्रतिकूल है कि नलराजा जीवित होते हुए भी इस कोशला नगरी में कूबर राजा हुआ ॥२११॥

मराठी :- परंतु ही एकच गोष्ट जुळत नाही की, नलराजा जीवंत असून सुद्धा या कोशला नगरीत कूबर राजा झाला. ॥२११॥

English meaning :- But here a reverse and a refractory incident had taken place, i.e - instead of King Nal who is suppossed to be the King, Kubar had become in his place.

विसंवदति किं वात्र, कदाचिन्मुनिभाषितम् ॥
ततो यदि परं नात्र, नंदिष्यत्येव कूबरः ॥२१२॥

अन्वय :- अत्र कदाचित् मुनिभाषितं विसंवदति किम्? वा ततः यदि अत्र एवः कूबरः न नन्दिष्यति ॥२१२॥

विवरणम् :- अत्र कदाचित् मुनेः भाषितं मुनिभाषितं मुनिवचनं विसंवदति प्रतिकूलं विरुद्धं भवति किम्? वा ततः यदि अत्र अस्मिन् नगरे कूबरः न नन्दिष्यति ॥२१२॥

सरलार्थ :- अत्र मुने वचनं कदाचिदपि विसंवादि भवितुं नार्हति। अतः अत्र कदाचित् कूबरः न नन्दिष्यति ॥२१२॥

ગુજરાતી :- અથવા મુનિએ કહેલાં વચનમાં શું કોઈ દિવસ ફેર પડે? (અર્થાત્ ન જ પડે) અને તેથી કદાચ આ નગરમાં આ કૂબર રાજા તરીકે ટકી શકશે નહીં. ॥२१२॥

हिन्दी :- मुनि के वचन में कभी कोई तफावत पड सकता है? (अर्थात् नही पडता) इस लिए इस नगर में कूबरराज टीक नही सकेगा ॥२१२॥

मराठी :- मुनीचे वचन केव्हाही विसंवादी (विरूद्ध) होऊ शकत नाही. त्यामुळे कदाचित् या नगरीत कूबरराजा टिकू शकणार नाही. ॥२१२॥

English :- It is sure that there cannot and will not be a change in the priest's words as these words are his oracle (prediction). Therefore Kubar will not stick or sojourn to be a king for a long time to come.

भूयोऽपि नल एवात्र, जातु स्यात्कोशलेश्वरः ॥
इति शृण्वन् जनालापान्, नलस्तत्याज कोशलाम् ॥२१३॥

अन्वय :- भूयः अपि अत्र नलः एव कौशलेश्वरः स्यात् इति जनालापान् शृण्वन् नलः कोशलाम् तत्याज ॥२१३॥

विवरणम् :- भूयः अपि पुनः अपि अत्र अस्मिन् नगरे नलः एव कौशलायाः ईश्वरः कोशलेश्वरः स्यात् इति एवं जनानाम् आलपाः जनालापाः तान् जनालापान् शृण्वन् आकर्णयन् नलः कोशलां तत्याज अत्यजत् अत्याक्षीत् ॥२१३॥

सरलार्थ :- पुनः अपि अत्र नलः एव कोशलेश्वरः स्यात् इति जनालापान् शृण्वन् नलः कोशलाम् अत्यजत् ॥२१३॥

ગુજરાતી :- પાછો અહીં નલરાજા જ કોશલાના સ્વામી બનવા જોઈએ એ રીતે લોકોનાં વચનો સાંભળતા સાંભળતાં નલરાજાએ કોશલાનગરીનો ત્યાગ કર્યો. ॥૨૧૩॥

हिन्दी :- इस कोशलानगरी का स्वामी नलराजा ही होना चाहिए इस तरह लोगों के वचन सुनकर नलराजाने कोशला नगरीका त्याग किया ॥२१३॥

मराठी :- पुन्हा नलराजाच वा कोशला नगरीचा राजा होईल. असे लोकांच्या तोंडून ऐकून नलराजाने कोशलानगरीचा त्याग केला. ॥२१३॥

English :- So having heard the words of the people that King Nal should and is the only one capable to be the king, King Nal sacrificed and forsaked his Kingdom.

अथापृच्छन्नलः पत्नीं, सांप्रतं कुत्र गम्यते ॥
स्थानं ह्याननुसंधाय, न जडोऽपि प्रवर्तते ॥२१४॥

अन्वय :- अथ नलः पत्नीम् अपृच्छत् - साम्प्रतं कुत्र गम्यते । तथाहि स्थानं अननुसन्धाय जडः अपि न प्रवर्तते ॥२१४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- अथ अनन्तरं नलः पत्नीं दमयन्तीम् अपृच्छत् पप्रच्छ अप्राक्षीत् साम्प्रतं वर्तमानं कुत्र कस्मिन् स्थाने गम्यते। तथाहि स्थानं अननुसन्धाय अनवेक्ष्य जडः मूर्खः अपि न प्रवर्तते ॥२१४॥

सरलार्थ :- अथ नलः पत्नीं दमयन्तीम् अपृच्छत् - साम्प्रतं कुत्र गम्यते तथाहि स्थानं अनवेक्ष्य मूर्खः अपि न प्रवर्तते ॥२१४॥

ગુજરાતી :- પછી નલરાજા પોતાની સ્ત્રી દમયંતીને પૂછવા લાગ્યો કે, હવે આપણે ક્યાં જવું? કેમ કે સ્થાનનો નિશ્ચય કર્યા વિના મૂર્ખ માણસ પણ આગળ ચાલતો નથી. ॥૨૧૪॥

हिन्दी :- फिर नलराजा अपनी पत्नी दमयंती से पूछने लगे कि, "हम कहाँ जायेंगे? क्यों कि किसी स्थान का पता लगाये बिना मूर्ख आदमी भी आगे नही जाता"॥२१४॥

मराठी :- नंतर नलराजाने आपली पत्नी दमवंतीला विचारले की, "आता आपण कुठे जायचे? कारण कुठे जायचे याचा विचार केल्याशिवाय मूर्ख माणूस सुद्धा पुढे जात नाही". ॥२१४॥

English :- Then King Nal asked his wife Damyanti as to where they are supposed to go, as even foolish men, inquire about the place they will step into before they enter that place.

भीमराजांगजावादीदलमालोच्य-सर्वथा ॥
देव त्वरासंगमनास्तु, कुंडिनं विश्वमंडनम् ॥२१५॥

अन्वय :- भीमराजाङ्गजा अवादीत् हे देव ! सर्वथा आलोच्य अलम् । त्वत्सङ्गमेन कुण्डिनं विश्वमण्डनम् अस्तु ॥२१५॥

विवरणम् :- अङ्गात् जाता इति अङ्गजा भीमराजस्य अङ्गजा भीमराजाङ्गजा दमयन्ती अवादीत् अवदत् उवाद-हे देव! सर्वथा सर्वप्रकारेण आलोच्य विचार्य अलम् । तव सङ्गमः त्वत्सङ्गमः तेन त्वत्सङ्गमेन कुण्डिनं विश्वस्य मण्डनं विश्वमण्डनम् अस्तु भवतु ॥२१५॥

सरलार्थ :- दमयन्ती अवदत्-हे देव! सर्वथा विचार्य अलम् । त्वत्सङ्गमेन कुण्डिनं विश्वमण्डनं भवतु । इदानीं कुण्डिनमेव गच्छावः । अन्येन विचारेण अलम् ॥२१५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે ભીમરાજાની પુત્રી દમયંતી બોલી કે, હે સ્વામી! હવે બીજા સર્વ પ્રકારના વિચારો છોડો. આપના સમાગમથી કુંડિનપુર નગર જગતના આભૂષણરૂપ થાઓ ! ॥૨૧૫॥

हिन्दी :- तब भीमराजा की पुत्री दमयंती ने कहा कि, "हे स्वामी! अब सब तरह के विचारों को छोडो। आप के समागम से कुंडिनपुर नगर जगत का आभूषणरूप बनेगा।" ॥२१५॥

मराठी :- तेव्हा भीमराज-कन्या दमयंती म्हणाली-स्वामी! आता सर्व विचार सोडा. आपण कुंडिनपुरातच जाऊ. आपल्या संगतीने कुंडिनपुर विश्वभूषण होऊ या."॥२१५॥

English :- At this, the daughter of Bhimrath, Damyanti replied that they should keep aside all types of thoughts and proceed towards Kudinpur town which will become an ornament of the earth, by his auspicious arrival.

नलादेशात्ततः सूत-स्तज्ज्ञःस्तुरगपुंगवान् ॥
सद्यः प्रणोदयामास, पत्तनं कुण्डिनं प्रति ॥२१६॥

अन्वय :- ततः नलादेशात् तज्ज्ञः सूतः तुरङ्गपुङ्गवान् सद्यः कुण्डिनं पत्तनं प्रति प्रणोदयामास ॥२१६॥

विवरणम् :-ततः तदनन्तरं नलस्य आदेशः नलादेशः तस्मात् नलादेशात् - तद् जानाति इति तज्ज्ञः मार्गज्ञः सूतः सारथिः तुरङ्गाः अश्वाः पुङ्गवा इव तुरगपुङ्गवाः तान् तुरगपुङ्गवान् अश्वश्रेष्ठान् सद्यः शीघ्रं झटिति कुण्डिनं पत्तनं नगरं प्रति प्रणोदयामास प्रेरयामास ॥२१६॥

सरलार्थ :- तदनन्तरं नलादेशात् मार्गज्ञः सारथिः अश्वश्रेष्ठान् शीघ्रं कुण्डिनं पत्तनं प्रति प्रेरयामास ॥२१६॥

ગુજરાતી :- પછી નલરાજાની આજ્ઞાથી તે માર્ગના જાણકાર રાજ-સારથિએ તુરત કુંડિનપુર નગરતરફ ઘોડાઓ દોડાવી મૂક્યા. ॥૨૧૬॥

हिन्दी :- फिर नलराजा की आज्ञासे उस मार्ग को जाननेवाले सारथीने तुरंत ही कुंडिनपुर नगरी के तरफ घोडों को दौडाया ॥२१६॥

P.P. Ac. Gunratnasuri M.S.

मराठी अर्थ :- तेव्हा नलराजाच्या आज्ञेने मार्ग जाणणाऱ्या सारथ्याने लगेच आपले श्रेष्ठ घोडे कुंडिनपुर नगराकडे वळविले. ॥२१६॥

English :- At the command of King Nal, the charioteer at once turned his horses and sped off towards Kudinpur town.

व्याघ्रघूत्कारपूत्कारारावडम्बरिताम्बराम् ॥
भुजङ्गमफणारत्नज्योतिरुद्योतिलोचनाम् ॥२१७॥

अन्वय :- व्याघ्रघूत्कारपूत्कारारावडंबरिताबरां भुजङ्गमफणारत्नज्योतिरुद्योतिलोचनाम् ॥२१७॥

विवरणम् :- व्याघ्राणां घूत्काराः व्याघ्रघूत्काराः व्याघ्रघूतकाराश्च ते पूत्काराश्च व्याघ्रघूत्कारपूत्काराः, पूत्काराणाम् आरावाः पूत्कारारावाः पूत्कारारावैः डम्बरितम् अम्बरम् आकाशं यथा सा व्याघ्रघूत्कारपूत्कारारावडम्बरिताम्बरा तां व्याघ्रघूत्कारपूत्कारारावडम्बरिताम्बरां भुजङ्गमानां सर्पाणां फणाः भुजङ्गमफणाः भुजङ्गमफणासु रत्नानि भुजङ्गमफणारत्नानि, तेषां ज्योतींषि एव उद्योतीनि लोचनानि यस्याः सा भुजङ्गमफणारत्नज्योतिरुद्योतिलोचना तां ---लोचनाम् ॥२१७॥

सरलार्थ :- यस्यां व्याघ्राणां घूत्कारपूत्काराणाम् आरावैः ध्वनिभिः आकाशं निनादितम् अस्ति, तथा भुजङ्गमानां फणासु वर्तमानानां रत्नानाञ्ज्योतींषि एव यस्याः उद्योतिलोचनानि सन्ति तां महाटवीं नलः प्राप ॥२१७॥

ગુજરાતી :- વાઘોના ઘુઘવાટ તથા પોકરોના નાદથી આકાશને ગજાવતી, સર્પોની ફણાઓ પર રહેલાં રત્નોની કાંતિરુપ તેજસ્વી આંખોવાળી. ॥२१७॥

हिन्दी अर्थ :- शेर की डरावनी आवाज और पुकारों के नाद से आकाश को गजाती हुई सर्प के फन के रत्नो की कांतिरुप तेजस्वी आँखोवाली, ॥२१७॥

मराठी अर्थ :- वाघांच्या डरकाळ्यांच्या आवाजांनी आकाशाला दुमदुमून टाकणाऱ्या, सापांच्या फणांवर असलेल्या रत्नांच्या कांतीरूपी तेजस्वी डोळे असणाऱ्या. (महारण्यात नलराजा आला) ॥२१७॥

English :- The jungle is filled with the frightening uproar of the lion as though it is calling its mate which fills the sky with the sound. The sapphire on the cobra's hood which is blazing with brightness seems to be the glaring eyes of the ogres and the orgress seems to be a forest.

अभ्रंलिहलसद्धूम्र - धूममूर्धजमालिनीम् ॥
दीप्तदावानलज्वालाजिव्हालविपिनाननाम् ॥२१८॥

अन्वय :- अभ्रंलिहलसत्धूम्रधूममूर्धजमालिनीं दीप्तदावानलज्वाला जिह्वालविपिनाननां महाटवीम् ॥२१८॥

विवरणम् :- अभ्रं लिहन्ति इति अभ्रंलिहा:। अभ्रंलिहाश्च ते लसन्तश्च ते धूम्राश्च ते धूमाश्च अभ्रंलिहलसत्धूम्रधूमा: मूर्ध्नि जायन्ते इति मूर्धजा: केशा:, लसत्धूम्रधूमा: एव मूर्धजा: लसत्धूम्रधूममूर्धजा: मूर्धजानां माला अस्या: अस्ति इति मूर्धजमालिनी तां मूर्धजमालिनीम्। दीप्तश्चासौ दावानलश्च दीप्तदावानल: दीप्तदावानलस्य ज्वाला: दीप्तदावानलज्वाला: दीप्तदावानलज्वालाभि: जिह्वालानि जिह्वायुक्तानि विपिनानि एव आननानि यस्या: सा दीप्तदावानलज्वालाजिह्वालविपिनानना तां दीप्तदावानलज्वालाजिह्वालविपिनाननां महाटवीम्॥२१८॥

सरलार्थ :- आकाशगामिन: धूमा: एव यस्या: मूर्धजा: सन्ति तां, दीप्तदावानलस्य ज्वाला:, एव येषां जिह्वा: सन्ति तानि विपिनानि एव यस्या: आननम् अस्ति तां महाटवीम् ॥२१८॥

ગુજરાતી :- છેક આકાશને પહોંચતા ધુમાડારૂપી કેશોવાળા, સળગી ઉઠેલા દાવાનળની જ્વાળાઓરૂપી જીભોવાળા વનરુપી મુખવાળા અરણ્યમાં નલરાજા આવ્યો. ॥२१८॥

हिन्दी :- आसमान को छुते हुए धुवों के समूह जिसके बाल हैं, दावानल की ज्वालाओ के समान् जीभवाले वन जिसके मुख है, ऐसे महारण्य में नलराजा आया ॥२१८॥

मराठी :- आकाशात उंच उंच जाणारे धूसर पुराचे लोटच ज्याचे केस आहेत व पेटलेल्या वणव्याच्या ज्वालारूपी जिभा असलेली अरण्यें ज्याचे मुख आहेत. अशा महारण्यात नलराजा आला. ॥२१८॥

English :- The smoke in the jungle seems to be the long, thick hair of the ogress and her reddish tongue seems to be as if there is a fire confragation and the jungle seems to be, like her huge deadly face.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मृगेन्द्रनिहतक्रोडदंष्ट्राकर्तरिकावतीम् ॥
दुःश्वापदहतानेकपान्थमौलिकपालिनीम् ॥२१९॥

अन्वय :- मृगेन्द्रनिहतक्रोडदंष्ट्राकर्तरिकावतीं दुःश्वापदहतानेकपान्थमौलिकपालिनीम्॥२१९॥

विवरणम् :- मृगाणाम् इन्द्राः मृगेन्द्राः सिंहाः मृगेन्द्रैः निहताः मृगेन्द्रनिहताः मृगेन्द्रनिहताश्च ते क्रोडाश्च शूकराश्च मृगेन्द्रनिहतक्रोडाः मृगेन्द्रनिरतक्रोडानां दंष्ट्राः एव कर्तरिकाः मृगेन्द्रनिहतक्रोडदंष्ट्राकर्तरिकाः अस्याः सन्ति इति कर्तरिकावती तां मृगेन्द्र --रिकावतीं, दुष्टाश्च ते श्वापदाश्च दुःश्वापदाः दुःश्वापदैः हताः दुःश्वापदाहताः दुश्वापहताश्च ते अनेके च ते पान्थाश्च दुःश्वापदहतानेकपान्थाः तेषां मौलयः मस्तकानि एव कपालाः अस्याः सन्ति इति पान्थमौलिकपालिनी तां पान्थमौलिकपालिनीम्॥२१९॥

सरलार्थ :- यस्यां मृगेन्द्रैः निहतानां शूकराणां दंष्ट्राः एव कर्तरिकाः सन्ति तथा दुःश्वापदैः हतानाम् अनेक पान्थानां मस्तकानि एव यस्याः कपालाः सन्ति ताम् ॥२१९॥

ગુજરાતી :- સિંહોએ મારી નાખેલાં ડુક્કરોની દાઢોરૂપી કાતરોવાળી, હિંસક એવા વનવાસી જંગલી જાનવરોએ મારી નાખેલા અનેક મુસાફરોની ખોપરીઓરૂપી કપાલોને ધારણ કરનારી, ॥૨૧૯॥

हिन्दी :- शेरने मारे हुए सुअरों की दाढो जैसी कैंचीवाली, हिंसक और जंगली जानवरो ने मारे हुए बहुत से मुसाफिरों के कपालोको धारण करनेवाली, ॥२१९॥

मराठी :- ज्या अरण्यांत सिंहांनी ठार मारलेल्या डुकरांच्या दाढाच कातरी आहेत आणि हिंस्र प्राण्यांना ठार मारलेल्या वाटसरूंची मस्तकेच ज्याचे गाल आहेत. अशा महारण्यात नलराजा आला. ॥२१९॥

English :- The teeth (molars) of the ogress (jungle) seemed to be like sissors like the deadly teeth of the wild boar who the lion has killed. The skeletons of the people who the wild animals have killed seemed to be like hollow pots out of which the ogress has made a necklace and worn it around her neck.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भिल्ललुब्धकमुख्यैश्च, बद्धसख्यां बिभीषणाम् ॥
नलो महाटवीं प्राप, प्रत्यक्षामिव राक्षसीम् ॥२२०॥

अन्वय :- भील्ललुब्धकमुख्यैः बध्दसख्यां बिभीषणां प्रत्यक्षां राक्षसीम् इव महाटवीं नलः प्राप ॥२२०॥

विवरणम् :- *भिल्लाश्च लुब्धकाश्च व्याधाश्च भिल्ललुब्धकाः भिल्ललुब्धकाः मुख्याः येषां ते, तैः भिल्ललुब्धकमुख्यैः भिल्लव्याधादिहिंसकैः बद्धं सख्यं यया सा बध्दसख्या तां बध्दसख्यां बिभीषणां विशेषेण भीषणां भयङ्करीं प्रत्यक्षां राक्षसीम् इव महती चासौ अटवी च महाटवी तां महाटवीं नलः आजगाम प्रापा॥२२०॥*

सरलार्थ :- नलः भिल्लव्याधादिभिः हिंसकैः बद्धसख्यां बिभीषणां भयङ्करीं प्रत्यक्षां राक्षसीमिव महाटवीम् आजगाम॥२२०॥

ગુજરાતી :- ભીલો તથા શિકારીઓ આદિ જેમાં મુખ્ય છે, એવા હિંસક મનુષ્યો સાથે મિત્રાચારી રાખનારી, અને અતિ ભયંકર રાક્ષસી હોય એવી મોટી અટવીમાં નલરાજા આવી પહોંચ્યો. ॥૨૨૦॥

हिन्दी :- भिल्ल और शिकारी आदि जिस में मुख्य हैं ऐसे, हिंसक प्राणियों के साथ अपनी दोस्ती रखनेवाली, और राक्षसी के समान अत्यंत भयंकर ऐसे अरण्यमें नलराजा आ पहुंचे ॥२२०॥

मराठी :- भिल्ल आणि शिकारी आदींचा ज्यात मुख्य समावेश आहे अशा हिंसक मनुष्यासोबत मित्रता ठेवणाऱ्या, अति भयंकर प्रत्यक्ष राक्षसीप्रमाणे भय उत्पन्न करणाऱ्या महारण्यात नलराजा येऊन पोहोचला. ॥२२०॥

English :- King Nal entered the forest in which the Bhills (adivaisis) and a trihe of hunters lived. The forest which seemed to be as a deadly ogress, seems that it had joint hands with the bad men of the forest.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्थालीबुध्नमिव श्यामान्। भिल्लान् सशरकार्मुकान्॥
यमदूतानिवापश्यत्। सर्पंस्तत्राभिसर्पतः ॥२२१॥

अन्वय :- तत्र सर्पन् सः स्थालबुध्नम् इव श्यामान् सशरकार्मुकान् भिल्लान् अधिसर्पत यमदूतान् इव अपश्यत्॥२२१॥

विवरणम् :- तस्याम् महाटव्यां सर्पन् गच्छन् सः स्थाल्याः बुध्नम् इव तलम् इव स्थालिबुध्नम् इव श्यामान् कृष्णवर्णान् शरेण सह वर्तन्ते इति सशराः कार्मुकाः धनूंषि येषां ते सशरकार्मुकाः तान् सशरकार्मुकान्, भिल्लान् अभिसर्पतः संमुखमागच्छतः यमस्य दूताः यमदूताः तान् यमदूतान् इव अपश्यत्॥२२१॥

सरलार्थ :- तत्र गच्छन् सः स्थाल्याः तलम् इव कृष्णवर्णान् सशरकार्मुकान् यमदूतान् इव सन्मुखम् आगच्छतः भिल्लान् अपश्यत्॥२२१॥

ગુજરાતી :- ત્યાં આગળ વધતાં તેણે (રાંધવાની) તપેલીના તળિયાં જેવી શ્યામ રંગની ચામડીવાળા, બાણો સહિત ધનુષવાળા, યમના દૂતસરખા ભીલોને દોડી આવતા જોયા. ॥૨૨૧॥

हिन्दी :- वहाँ चलते चलते उन्हें तपेली के नीचले भाग जैसे, श्याम रंग की चमडीवाले, बाणोसहित धनुषवाले, यम के दूत जैसे भिल्लोंको सामने आते हुए देखा॥२२१॥

मराठी :- तेथून जात असताना पटाच्या बुहाप्रमाणे काळा रंग असलेले, हातात धनुष्य व बाण असलेले जणू काय यमदूतच असे भिल्ल आपल्याकडे धावून येत आहेत. असे त्याला दिसले. ॥२२१॥

English :- King Nal suddenly saw a band of adivasis (Bhills) with dark complexion. (which seemed like the colour of burnt vessels) coming towards him with bows and arrows and they seemed like the messengers of the God of death. (Yama)

भूताविष्टा इवानृत्यन् । भिल्लास्तत्र च केचन ॥
ग्रामीणा इव संवादे । केचित् कोलाहलं व्यधुः ॥२२२॥

अन्वय :- तत्र केचन भिल्लाः भूताविष्टाः इव अनृत्यन्। केचित् ग्रामीणाः इव संवादे कोलाहलं व्यधुः॥२२२॥

विवरणम् :- तत्र तस्मिन् अरण्ये केचन भिल्लाः भूतैः आविष्टाः भूताविष्टा इव भूतैः गृहीताः इव अनृत्यन्। केचित् ग्रामे भवाः ग्रामीणाः इव कोलाहलं कलकलं व्यधुः अकुर्वन्॥२२२॥

सरलार्थ :- तस्मिन् अरण्ये केचन भिल्लाः भूतैः व्रासिताः इव अनृत्यन्। केचित् व्रामीणाः इव संवादे कलकलम् अकुर्वन् ॥२२२॥

गुजराती :- તેમાં કેટલાક ભીલો ભૂત વળગેલાની પેઠે નાચતા હતા, તથા કેટલાક ચોવટ કરતી વેળાના ગામડિયાઓની પેઠે (મોટેથી) કોલાહલ કરતા હતા. ॥૨૨૨॥

हिन्दी :- उस में बहुत से भिल्ल भूतों की तरह नाच रहे थे, और कुछ झगडते ग्रामिणों की तरह कोलाहल मचा रहे थे ॥२२२॥

मराठी :- त्यात अनेक भिल्ल भूतासारखे नाचत होते, आणि कित्येक भिल्ल व्रामीण पुरूषाप्रमाणे गोंधळ करीत होते.॥२२२॥

English :- Among these many of them were dancing like ghosts and made a clamour and a fracas all around.

केचनावादयन् शृंगम् । खड्गिवच्चैकशृंगकाः ॥
विशिखान् केऽप्यवर्षन्त । जलासारान् घना इव ॥२२३॥

अन्वय :- केचन खड्गिवत् एक शृङ्गकाः शृङ्गम् अवादयन्। के अपि घना इव जलासारान् विशिखान् अवर्षन्त ॥

विवरणम् :- केचन खड्गिवत् गवयववत् एकं शृङ्गं येषां ते एकशृङ्गकाः शृङ्गम् अवादयन्। के अपि घनाः मेघाः जलस्य आसाराः धारासम्पाताः जलासाराः तान् जलसारान् इव विशिखान् बाणान् अवर्षन्त ॥२२३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- केचन खड्गिवत् एकशृङ्गकाः शृङ्गम् अवादयन्। केऽपि घनाः मेघाः धारासम्पातान् इव बाणान् अवर्षन्त ॥२२३॥

ગુજરાતી :- વળી કેટલાક ગેંડાની પેઠે એક રણશીંગુ ધારણ કરી વગાડતા હતા અને કેટલાક મેઘ જેમ બિંદુઓ વરસાવે તેમ બાણોનો વરસાદ વરસાવતા હતા.॥૨૨૩॥

हिन्दी :- और कुछ गेंडे समान रणशींगा धारण कर बजाते थे और कुछ बादल की तरह बाणों की बरसात कर रहे थे.॥२२३॥

मराठी :- त्यात गेंड्यासारखे एकच रणशिंग असलेले काही शिंग वाजवीत होते. तर काही मेघ जसा पाण्याचा वर्षाव करतात त्याप्रमाणे धनुष्य बाणांचा वर्षाव करीत होते. ॥२२३॥

English :- Some of them placed head-masks, just like horns of the hippopotamus and some showered arrows around like the clouds showering rain.

चक्रुः केऽपि भुजास्फोटम् । तरंगस्फोटविभ्रमम् ॥
अरौत्सुस्ते नलं सर्वेऽप्यभ्रकाणीव भास्करम्॥२२४॥

अन्वय :- केऽपि तरंगस्फोटविभ्रमं भुजास्फोटं चक्रुः। अभ्रकाणि भास्करम् इव ते सर्वे अपि नलम् अरौत्सुः ॥२२४॥

विवरणम् :- केऽपि तरंगाणां वीचीनां स्फोटः तरंगस्फोटः । तरंगास्फोटस्य विभ्रमः विलासः इव विभ्रमः यस्य सः तरंगस्फोटविभ्रमः तं तरंगस्फोटविभ्रमं वीचिस्फोटविभ्रमं भुजयोः आस्फोटः भुजास्फोटः तं भुजास्फोटं चक्रुः अकुर्वन् अकार्षुः । अभ्राणां समूहाः अभ्रकानि मेघसमूहाः। भासं प्रकाशं करोति इति भास्करः तं भास्करं सूर्यम् इवा यथा मेघसमूहाः सूर्यं रुन्धति तथा ते सर्वे भिल्ला नलम् अरौत्सुः अरुन्धन्॥२२४॥

सरलार्थ :- केऽपि वीचिस्फोटविभ्रमं भुजास्फोटं अकुर्वन्। यथा मेघाः सूर्यं रुन्धन्ति तथा ते सर्वे भिल्लाः नलम् अरुन्धन्॥२२४॥

ગુજરાતી :- વળી કેટલાક ભીલો મોજાંઓ ફુટવાના વિભ્રમને સૂચવનારો ભુજાસ્ફોટ કરવા લાગ્યા, અને વાદળાંઓ જેમ સૂર્યને રોકી રાખે, તેમ તેઓ સઘળા નલરાજાને રોકીને ઊભા. ॥૨૨૪॥

P.P. Ac Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- कुछ भिल्लों मोजों के स्फोटों के समान भुजास्फोट कर रहे थे, और बादल जैसे सूरज को रोकता है, वैसे ही उन्होने नलराजा को रोका॥२२४॥

मराठी :- काही भिल्ल लाटांच्या स्फोटाप्रमाणे भुजास्फोट करीत होते, शेवटी ज्याप्रमाणे मेघ सूर्याला घेरतात. त्याप्रमाणे सर्व भिल्लांनी नलराजाला घेरले. ॥२२४॥

English :- Just as the waves make a blasting sound when it dashes against rocks, in the same way the Bhills, hitting their arms made sounds to showoff their biceps. And just as the clouds block the way of the sun in the same way, the Bhills blocked the way of King Nal.

नलो रथादथोत्तीर्य । कंपितासिरढौकत ॥
करीवोल्लासितकरो । भिल्लानां निजिघृक्षया ॥२२५॥

अन्वय :- नलः रथाद् उत्तीर्य उल्लासितकरः करी इव कम्पिताऽसिः भिल्लानां निजिघृक्षया अढौकत ॥२२५॥

विवरणम् :- नलः रथात् स्यन्दनात् उत्तीर्य उल्लासितः करः शुण्डादण्डः येन सः उल्लासितकरः । करः अस्य अस्ति इति करी हस्ती इव कम्पितः वेपितः असिः येन सः कम्पितासिः भिल्लानां निग्रहीतुम् इच्छा निजिघृक्षा तया निजिघृक्षया अढौकत सम्मुखम् आगच्छत्॥२२५॥

सरलार्थ :- नलः रथात् उत्तीर्य उल्लासितकरः करीव कम्पिताऽसिः भिल्लानां निजिघृक्षया (भिल्लान् निग्रहीतुमिच्छया) सम्मुखम् आगच्छत् ॥२२५॥

ગુજરાતી :- પછી નલરાજા રથ પરથી ઉતરીને, ઊંચી સૂંઢવાળા હાથીની પેઠે, તલવારને કંપાવતો ભીલોને મારવાની ઇચ્છાથી તેઓની સાથે યુદ્ધ કરવા લાગ્યો. ॥૨૨૫॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर नलराजा रथ से उतर कर हाथी जैसे अपनी सूंड उपर करता है वैसे ही तलवार को सज्ज करते हुए उन भिल्लों को मारने की इच्छा से उनके साथ युध्द करने लगा ॥२२५॥

मराठी :- नंतर नलराजा रथावरून उतरून सोंड वर केलेल्या हत्तीप्रमाणे तलवारीला सज्ज करून त्या भिल्ल लोकांना मारण्याच्या इच्छेने त्यांच्या सोबत युध्द करू लागला. ॥२२५॥

English :- Then King Nal alighted from the chariot. And just as an elephant lifts up his trunk, in the same way, Nal drew his sword from the scabbard and occilated it. And started to fight with them.

वैदर्भ्यथरथं हित्वा । पाणौ धृत्वाभ्यधान्नलम् ॥
देव कोऽयं तवास्थाने । संरम्भो मशका ह्यमी ॥२२६॥

अन्वय :- अथ वैदर्भी रथं हित्वा नलं पाणौ धृत्वा अभ्यधात्-हे देव! तव अस्थाने अयं कः संरम्भः। अमी हि मशकाः सन्ति॥

विवरणम् :- *अथ वैदर्भस्य इयं वैदर्भी दमयन्ती रथं स्यन्दनं हित्वा त्यक्त्वा नलं पाणौ करे धृत्वा अभ्यधात् अवदत् हे देव! तव अस्थाने अनुचितस्थाने अयं कः संरम्भः आवेशः? अमी हि मशकाः मशकतुल्याः वर्तन्ते॥२२६॥*

सरलार्थ :- अथ दमयन्ती रथात् उत्तीर्य नलं हस्ते धृत्वा अवदत्-हे देव। तव अनुचितस्थाने अयं कः आवेशः। अमी भिल्लाः मशकतुल्याः वर्तन्ते ॥२२६॥

ગુજરાતી :- (ત્યારે) દયમંતી રથમાંથી ઉતરીને નલરાજાનો હાથ ઝાલીને તેને કહેવા લાગી કે, હે સ્વામી ! આ અયોગ્ય પ્રકારનો સંગ્રામ શા માટે આદર્યો છે ? કેમ કે આ ભીલો તો મચ્છર જેવા છે. ॥૨૨૬॥

हिन्दी :- तब दमयंती रथ से उतर कर नलराजा को कहने लगी कि, "हे स्वामी ! इस अयोग्य प्रकार के संग्राम का आरंभ क्यों कर रहे हो ? क्योंकि यह भिल्ल तो केवल मच्छर जैसे है।" ॥२२६॥

मराठी :- तेव्हा दमयंती रथामधून उतरून नलराजाचा हात धरून म्हणाली की, ''हे स्वामी! तुम्ही भलत्याच ठिकाणी हा आवेश कां आणला आहे? हे भिल्ल तर केवळ मच्छराप्रमाणे आहेत.'' ॥२२६॥

English :- At this Damyanti alighting from the chariot asked her husband as to why he desires to have this improper and as inept fight wih such mosquitoes.

लज्जिष्यते कृपाणस्ते । भिल्लेषु निपतन्न किम् ॥
रणे यः शत्रुकुंभीन्द्रमौक्तिकैः कृतमंगलः ॥२२७॥

अन्वय :- यः कृपाणः रणे शत्रुकुम्भीन्द्रमौक्तिकैः; कृतमङ्गलः सः ते कृपाणः भिल्लेषु निपतन् न लज्जिष्यते किम्? ॥२२७॥

विवरणम् :- यः कृपाणः खड्गः शत्रवः एव कुम्भिनः शत्रुकुम्भिनः शत्रुकुम्भिनाम् इन्द्राः शत्रुकुम्भीन्द्राः। शत्रुकुम्भीन्द्राणां मौक्तिकानि शत्रुकुम्भीन्द्रमौक्तिकानि तैः शत्रुकुम्भीन्द्रमौक्तिकैः कृतं मङ्गलं येन सः कृतमङ्गलः सः ते कृपाणः भिल्लेषु निपतन् पतन् किं न लज्जिष्यते। अवश्यं लज्जिष्यते ॥२२७॥

सरलार्थ :- यः खड्गः शत्रुकुम्भीन्द्रमौक्तिकैः कृतमङ्गलः सः ते कृपाणः भिल्लेषु पतन् किं न लज्जिष्यते? ॥२२७॥

गुजराती :- (હે સ્વામી !) જે તલવારે રણસંગ્રામમાં શત્રુઓના મહાનં હાથીઓને વિદારી (તેઓના કુંભસ્થલોમાંથી નીકળેલાં) મોતીઓ વડે મંગલાચરણ કર્યું છે તે તલવાર (આવા ક્ષુદ્ર) ભીલો પર પડતાં શરમાશે નહીં ? ॥૨૨૭॥

हिन्दी :- हे नाथ ! जिस तलवार ने रणसंग्राम में शत्रुओं के महान हाथीयों के गणुस्थलों में से नीकले हुए मोतियों से मंगलाचरण किया वह आपकी तलवार (ऐसे क्षुद्र) भिल्ल पर पडते हुए शरमायेंगी नही? ॥२२७॥

मराठी :- हे स्वामी ! ज्या तलवारीने युध्दक्षेत्रात शत्रूच्या महान हत्तींना सळो की पळो करून सोहले व त्यांच्या गंड स्थलामधून निघालेल्या मोत्यांनी आपले मंगलाचरण करून येतले. त्या तलवारीला भिल्लांवर वार करतांना लाज वाटणार नाहीं काय? ॥२२७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- She continued that the sword when sriked on the temples of an elephant, showers a shower of precious stones, will certainly feel ashamed to fight with such lowly and lowcaste Bhills.

नैषधिं विनिषिध्यैवम् । भैमी मंत्राक्षरोद्धुरान् ॥
कृतभिल्लतिरस्कारान् । हुंकारान् मुमुचे स्वयम् ॥२२८॥

अन्वय :- एवं नैषधिं विनिषिध्य भैमी स्वयं मन्त्राक्षरोध्दुरान् कृतभिल्लतिरस्कारान् हुङ्कारान् मुमुचे ॥२२८॥

विवरणम् :- *एवं निषधस्य अपत्यं पुत्रान् नैषधिः। तं नैषधिं नलं विनिषिध्य विशेषेण निषिध्य भीमस्य अपत्यं स्त्री भैमी दमयन्ती स्वयं मन्त्राणाम् अक्षराणि मन्त्राक्षराणि मन्त्राक्षरैः उद्धुरान् भयप्रदान् मन्त्राक्षरोद्धुरान् भिल्लानां तिरस्कारः भिल्लतिरस्कारः कृतः भिल्लतिरस्कारः यैः ते कृतभिल्लतिरस्काराः तान् कृतभिल्लतिरस्कारान् हुं इति शब्दात् हुङ्कारान् मुमुचे अमुञ्चत् । अमुचत् ॥२२८॥*

सरलार्थ :- एवं नलं विनिषिध्य दयमन्ती स्वयं मन्त्राक्षरभयप्रदान् कृतभिल्लतिरस्कारान् हुङ्कारान् अमुञ्चत्॥२२८॥

ગુજરાતી :- એ રીતે નલરાજાને અટકાવીને દમયંતી પોતે મંત્રાક્ષરોથી ભય ઉપજાવનારા, તથા કરેલો છે ભીલોનો તિરસ્કાર જેણે, એવા હુંકાર શબ્દોનો નાદ કરવા લાગી. ॥૨૨૮॥

हिन्दी :- इस प्रकार नलराजा को रोककर दमयंती खुद मंत्राक्षरो से डर पैदा करनेवाला, और जिस ने भिल्ल का तिरस्कार किया है ऐसे हुंकार शब्द का नाद करने लगी ॥२२८॥

मराठी :- अशा रीतीने नलराजाला थांबवून दमयंती स्वत: मंत्राक्षरांमुळे भय उत्पन्न करणारे व भिल्लांचा तिरस्कार करणारे हुंकार शब्द करू लागली. ॥२२८॥

English :- In this way Damyanti having stopped Nal from fighting with the lowly Bhills, caste a spell on them and produced fright all around and giving out a bawl and an outcry, she scorned and disdained them.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तोमरैरिव तैः सत्या हुंकारैर्व्रणिता इव ॥
पलायांचक्रिरे भिल्लाः । कांदिशीका दिशो दिशम् ॥२२९॥

अन्वय :- तौमरैः इव सत्याः तैः हुङ्कारैः व्रणिताः इव कान्दिशीकाः भिल्लाः दिशः दिशं पलायाञ्चक्रिरे ॥२२९॥

विवरणम् :- तौमरैः बाणैः इव सत्याः दमयन्त्याः तैः हूं इति शब्दैः हुङ्कारैः व्रणाः सञ्जाताः येषां ते व्रणिताः व्रणयुक्ताः इव कान्दिशीकाः भयभीताः भिल्लाः दिशः दिशं एकस्याः दिशः अन्यां दिशं पलायाञ्चक्रिरे पलायन्त ॥२२९॥

सरलार्थ :- बाणैः इव दमयन्त्याः तैः हुङ्कारैः व्रणिता इव भयभीताः भिल्लाः एकस्याः दिशः अन्यां दिशां पलायन्त ॥२२९॥

ગુજરાતી :- બાણોસરખા તે સતીના નાદો વડે જાણે ઘાયલ થતાં હોય એમ ભીલો ગભરાટના માર્યા એક દિશાથી બીજી દિશામાં નાસવા લાગ્યા. ॥२२९॥

हिन्दी :- बाणों के जैसे उस सती के नाद से वे भिल्ल भयभीत हो कर वे एक दिशा से दूसरी दिशा की ओर भागने लगे ॥२२९॥

मराठी :- बाणाप्रमाणे त्या सतीच्या हुंकाराने जणू काही ते भिल्ल जखमी झाले व याबरून एका दिशेकडून दुसऱ्या दिशेकडे पळू लागले. ॥२२९॥

English :- After hearing the roar and the outery of Damyanti which seemed like arrows piercing them they were injured and feeling frightened they started running helter-skelter from one direction to another.

तेषामनुपदं दूरे । जग्मतुस्तौ च दंपती ॥
जयवादरवारूढौ । परित्यक्तरथावपि ॥२३०॥

अन्वय :- तौ च दम्पती जयवादरवारूढौ परित्यक्तरथौ अपि तेषाम् अनुपदं दूरे जग्मतुः॥२३०॥

P.P. Ac. Gunratnasuri M.S.

विवरणम् :- तौ जाया च पतिश्च दम्पती। पतिपत्न्यौ नलदमयन्त्यौ जय इति वादाः जयवादाः जयवादानां रवाः ध्वनयः जयवादरवाः जयवादरवान् आरूढौ जयवादरवारूढौ परित्यक्तः रथः याभ्यां तौ परित्यक्तरथौ रथविहीनौ अपि तेषां भिल्लानाम् पदानां पश्चात् इति अनुपदं पृष्ठतः एव दूरे जग्मतुः ययतुः अगच्छताम् ॥२३०॥

सरलार्थ :- तौ च दम्पती नलदमयन्त्यौ जयजयवादरवारूढौ रथविहीनौ अपि तेषां भिल्लानाम् अनुपदं दूरे अगच्छताम् ॥२३०॥

ગુજરાતી :- પછી તે બન્ને સ્ત્રીભરથાર, (જાણે) જયજયકાર પર આરુઢ થઈ રથનો પણ ત્યાગ કરીને ઘણે દૂર સુધી તે ભીલોની પાછળ ચાલ્યા ગયા.॥૨૩૦॥

हिन्दी :- फिर वे दोनों जयवाद के शब्द पर आरूढ होकर, रथ को त्याग कर बहुत दूर तक उन भिल्लके पीछे पीछे चले गये ॥२३०॥

मराठी :- नंतर ते दोघे जयवादाच्या शब्दांवर आरूढ होऊन, रथाचा त्याग करून खूप दूरवर त्या भिल्लांच्या मागे मागे गेले. ॥२३०॥

English :- Then they left the chariot and mounted the chariot of the words of victory (Jai, Jai ...) and followed the Bhills for quiet a distance.

इतो भिल्लान्तरैस्तस्य, जह्वे सांयात्रिको रथः ॥
प्रतिकूले विधौ कुर्यात्, पौरुषं पुरुषस्य किम् ॥२३१॥

अन्वय :- इतः भिल्लान्तरैः तस्य सांयात्रिकः रथः जह्वे विधौ प्रतिकूले पुरुषस्य पौरुषं किम् कुर्यात्? ॥२३१॥

विवरणम् :- इतः अन्ये भिल्लाः भिल्लान्तराणि तैः भिल्लान्तरैः अन्यैः भिल्लैः तस्य संयात्रा प्रयोजनं यस्य सः सांयात्रिकः रथः स्यन्दनः जह्वे अहियत। विधौ भाग्ये प्रतिकूले सति पुरुषस्य पौरुषं पुरुषत्वं किम् कुर्यात् ॥२३१॥

सरलार्थ :- इतः भिल्लान्तरैः तस्य नलस्य सांयात्रिकः रथः जह्वे। दैवे प्रतिकूले सति पुरुषस्य पौरुषं किं कुर्यात्? ॥२३१॥

ગુજરાતી :- એવામાં બીજા ભીલો (ત્યાં આવીને) એમનો રથ ઉપાડી ગયા, કેમ કે જે વખતે નસીબ અવળું હોય તે વખતે પુરૂષનું પુરુષાતન શું કરી શકે? ॥૨૩૧॥

हिन्दी :- तभी दूसरे भिल्ल (वहाँ आके) उन का रथ ले गये, क्योंकि जिस समय किस्मत प्रतिकूल होती है उस समय आदमी का पुरुषार्थ क्या कर सकता है? ॥२३१॥

मराठी :- तेव्हा काही भिल्ल (तिथे येऊन) त्याचा रथ घेऊन गेले, कारण की ज्या वेळेला भाग्य अनुकूल नसते त्या वेळी त्या पुरुषाचा पुरुषार्थ तरी काय करू शकणार? ॥२३१॥

English :- At this the other Bhills arrived there and took away the chariot. What can a man's valour and energy do when the goddess of destiny is not smiling upon him ?

तत्रारण्येऽभ्रमद् भैम्याः, पाणिमादाय पाणिना ॥
पाणिग्रहमहं तस्याः, स्मारयन्निव नैषधिः ॥२३२॥

अन्वय :- तस्याः पाणिग्रहमहं स्मारयन् इव नैषधिः पाणिना भैम्याः पाणिम् आदाय तत्र अरण्ये अभ्रमत् ॥२३२॥

विवरणम् :- तस्याः दमयन्त्याः पाणेः ग्रहः पाणिग्रहः पाणिग्रहस्य महः उत्सवः पाणिग्रहमहः तं पाणिग्रहमहं स्मारयन् विवाहमहस्य स्मरणं कारयन् इव निषधस्य अपत्यं पुमान् नैषधिः नलः पाणिना हस्तेन भैम्याः भीमस्य अपत्यं स्त्री भैमी तस्याः भैम्याः दमयन्त्याः पाणिं हस्तम् आदाय गृहीत्वा तत्र तस्मिन् अरण्ये अभ्रमत् ॥२३२॥

सरलार्थ :- दमयन्त्याः विवाहमहोत्सवं स्मारयन् इव नलनृपः हस्तेन दमयन्त्याः हस्तं गृहीत्वा तस्मिन् अरण्ये अभ्रमत् ॥२३२॥

ગુજરાતી :- પછી તેણીના પાણિગ્રહણના (વિવાહના) મહોત્સવને જાણે યાદ કરાવતો હોય તેમ પોતાના હાથમાં દમયંતીનો હાથ પકડીને નલરાજા તે વનમાં ભ્રમણ કરવા લાગ્યો. ॥૨૩૨॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर उनके पाणिग्रहण का (विवाह का) समय जैसे याद आता हो! उसी प्रकार वे खुद के हाथ में दमयंती का हाथ पकडकर वन में भ्रमण करने लगा ॥२३२॥

मराठी :- नंतर दमयन्तीच्या विवाह सोहळ्याची जणू काय आठवण करून देत तो नलराजा स्वत:च्या हाताने दमयंतीचा हाथ धरून वनात भ्रमण करू लागला. ॥२३२॥

English :- Then Nal caught Damyanti's hand and walked ahead in to forest and remembered the wedding day when he had caught her hand and walked around the fire.

दर्भाग्रभिन्ना वैदर्भी, पदो: शोणितलाञ्छिता ॥
सालक्तकपदांकेव, वासभूर्वनभूरभूत् ॥२३३॥

अन्वय :- दर्भाग्रभिन्ना पदो: शोणितलाञ्छिता वैदर्भी सालक्तपदाङ्केव वनभू: वासभू: अभूत् ॥२३३॥

विवरणम् :- *दर्भस्य अग्राणि दर्भाग्राणि दर्भाग्रै; भिन्ना दर्भाग्रभिन्ना। पदो: पादयो: शोणितेन रक्तेन लाञ्छिता शोणितलाञ्छिता विदर्भाणाम् ईश्वर: वैदर्भ: । वैदर्भस्य अपत्यं स्त्री वैदर्भी। अलक्तेन सह वर्तेते इति सालक्तकौ । सालक्तकौ च तौ पदौ च सालक्तकपदौ । सालक्तकपदयो: अङ्का: चिह्नानि यस्यां सा सालक्तकपदाङ्का वनस्य भू: वनभू: इव वासस्य वासाय वा भू:वासभू: अभूत् अभवत् बभूव ॥२३३॥*

सरलार्थ :- कुशाग्रभिन्ना पादयो: रक्तचिह्निता दमयन्ती सालक्तकपदाङ्का वनभू: इव वासभू: अभवत् ॥२३३॥

गुजराती :- घासनी तीक्ष्ण अणीओथी वींधायेली, अने तेथी बन्ने पगमांथी नीकळता रुधिरथी खरडायेली, दमयंती जाणे पग पर लाल रंग लगाड्यो न होय ! एवी, तथा वनभूमिरूपी आवासभुवनवाळी बनी. ॥२३३॥

हिन्दी :- दर्भ की तीक्ष्ण नोक से घायल और दोनों पैर में से निकलते रूधिर से रंजित दमयंती ने जैसे पैरों पर अलत का लाल रंग लगा दिया हो ! ऐसे वनभूमिरूपी आवासभुवनवाली हो गयी ॥२३३॥

मराठी :- दर्भांच्या अणकुचीदार टोकांनी खरचटल्यामुळें रक्तबंबाळ पाय झालेली दमयन्ती जणू काय आळित्यानें लाल पाय झाल्यासारखी दिसत होती. तिला वनभूमीच निवासभूमी झाली. ॥२३३॥

English : As Damyanti walked deeper and deeper into the forest, they encountered a land of Kusha grass. As they went through it, the pointed gram poked her delicate feet and they began to bleed and then it seemed that the blood from her feet had made the mud around red in colour and a place of residence.

पटबन्धः पुरा राज्ये, दमयन्त्याः शिरस्यभूत् ॥
पथव्यथितपादायाः, स तदा पादयोः पुनः ॥२३४॥

अन्वय :- पुरा राज्ये दमयन्त्या; शिरसि पटबन्धः अभूत् इदानीं स. पुनः पथव्यथितपादायाः दमयन्त्याः पादयोः अभूत् ॥२३४॥

विवरणम् :- *पुरा राज्याभिषेकसमये तदा तस्मिन् समये राज्ये दमयन्त्या; शिरसि मस्तके पट्टस्य बन्धः पट्टबन्धः अभूत् अभवत्। इदानीम् अधुना सः पुनः पथे व्यथितौ पादौ यस्याः सा पथव्यशितपादा तस्याः मार्गविध्दपादायाः दमयन्त्याः पादयोः अभूत् ॥२३४॥*

सरलार्थ :- पुरा तदा राज्ये दमयन्त्या; मस्तके पट्टबन्धः अभवत्। अधुना सः पटबन्धः पुनः मार्गविध्दपादायाः दमयन्त्याः पादयोः अभवत् ॥२३४॥

ગુજરાતી :- પૂર્વે (નલરાજાના) રાજ્યાભિષેક સમયે દમયંતીના મસ્તક પર (પટ્ટરાણી તરીકેનો) પટબંધ થયો હતો, તેવો પટબંધ આ સમયે માર્ગમાં ચીરાયેલા પગવાળી, એવી દમયંતીના બન્ને પગ પર બાંધવામાં આવ્યો. ॥૨૩૪॥

हिन्दी :- पहले (नलराजा के) राज्याभिषेक के समय दमयंती के मस्तक पर (महाराणी के जैसा) पटबंध हुआ था, इस समय रास्ते मे चीरे हुए दमयंती के दोनो पाँवो पर पटबंध बाँधा गया ॥२३४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- पूर्वी (नलराजाच्या) राज्याभिषेकाच्या वेळी दमयंतीच्या डोक्यावर (महाराणीप्रमाणे) पट्टबंध होता पण या वेळेस मार्गावर जखमी झालेल्या दमयंतीच्या दोन्ही पायावर पटबंध बांधण्यात आला. ॥२३४॥

English :- When Damyanti had become a queen, a band was tied as a mark of becoming a queen. In the same way, Damyanti had to tie bands on her, feet due to continuous bleeding.

श्रान्तां भैमीं तरुच्छायासीनां स्वेदं प्रमार्जयन् ॥
व्यजनैरिव वस्त्रान्तै-र्नलः स्वयमवीजयत् ॥२३५॥

अन्वय :- श्रान्तां तरुच्छायासीनां भैमी नलः स्वयं स्वेदं प्रमार्जयन् व्यजनैः इव वस्त्रान्तैः अवीजयत् ॥२३५॥

विवरणम् :- श्रान्तां क्लान्तां भीमस्य अपत्यं स्त्री भैमी तां भैमीं दमयन्तीं तरोः छाया तरुच्छाया तरुच्छायायाम् आसीना उपविष्टा तरुच्छायासीना तां तरुच्छायासीनां नलः स्वयं स्वेदं प्रमार्जयन् व्यजनैः इव वस्त्रस्य अन्ताः वस्त्रान्ताः तैः वस्त्रान्तैः वस्त्राञ्चलैः अवीजयत् वायुना असान्वयत् ॥२३५॥

सरलार्थ :- श्रान्तां तरुच्छायासीनां दमयन्तीं नलः स्वयं प्रमार्जयन् व्यजनैः इव वस्त्राञ्चलैः अवीजयत् ॥२३५॥

ગુજરાતી :- પછી થાકેલી એવી દમયંતીને વૃક્ષની છાયામાં બેસાડીને નલરાજા પોતે તેણીનો પસીનો લૂછતો, પંખારૂપ વસ્ત્રાના છેડા વડે તેણીને પવન નાખવા લાગ્યો. ॥૨૩૫॥

हिन्दी :- फिर थकी हुई दमयंती को वृक्ष की छाया में बैठाकर नलराजा खुद उसका पसीना पोंछते हुए पंख के समान वस्त्र के पल्ले से (दमयंती को) पवन करने लगे ॥२३५॥

मराठी :- नंतर थकलेल्या दमयंतीला झाडाच्या सावलीत बसवून नलराजा स्वतः तिचा घाम पुसून पंख्याप्रमाणे वस्त्राच्या पदराने तिला वारा घालू लागला. ॥२३५॥

English :- Then Damyanti was very tired and exhausted. So she sat under the shadow of a tree. King Nal, sitting with her, wiped her perspiration and with his broad hem of the garment fanned her.

ऊचे भैम्यद्य मां स्वामिन्नुदन्या बाधतेतमां ॥
सन्तापेनामृतकला, शुष्यतीव च सर्वथा ॥२३६॥

अन्वय :- भैमी ऊचे हे स्वामिन्! अद्य माम् उदन्या बाधतेतमां। सन्तापेन च अमृतकला सर्वथा शुष्यति ॥२३६॥

विवरणम् :- *भीमस्य अपत्यं स्त्री भैमी दमयन्ती ऊचे अवदत् अवादीत्। हे स्वामिन्। अद्य माम् उदन्या पिपासा तृषा बाधतेतमाम् अतिशयेन बाधते। सन्तापेन च मम अमृतकला जिह्वा रसना सर्वथा शुष्यति ॥२३६॥*

सरलार्थ :- दमयन्ती अवदत् - हे स्वामिन्! अद्य मां पिपासा बाधतेतमां सन्तापेन च जिह्वा सर्वथा शुष्यति ॥२३६॥

ગુજરાતી :- પછી દમયંતી કહેવા લાગી કે, હે સ્વામી ! આજે અને તૃષા અત્યંત પીડા ઉપજાવે છે, અને આ સખત ગરમીને કારણે મારી જિવ્હા પણ જાણે બિલકુલ સૂકાઈ જાય છે. ॥૨૩૬॥.

हिन्दी :- फिर दमयंती कहने लगी कि, "हे नाथ! आज मुझे प्यास बहुत सता रही है, और इस अति ताप से मेरी जीभ भी बिलकूल सुख गयी है"॥२३६॥

मराठी :- नंतर दमयंती म्हणाली की, "हे स्वामी! आज मला तृष्णा (तहान) अत्यंत सतावीत आहे आणि या अतितापाने माझी जीभ पण अतिशय सुकली आहे. ॥२३६॥

English :- Then Damyanti sittiing beside her husband said to him that thirst is harrasing her and the scorching heat of the sun has turned her tongue parched.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नलोऽवादीदरे कोऽत्र, पयोवाही नियोगिषु ॥
सुगन्धिसरसस्वच्छपयस्कुरकमानय ॥२३७॥

अन्वय :- नलः अवादीत् अरे! नियोगिषु पयोवाही कः अत्र? सुगन्धिसरसस्वच्छपयस्कुरकम् आनय ॥२३७॥

विवरणम् :- *नलः अवादीत् अवदत् - अरे! नियोगिषु दूतेषु पयः वहति इत्येवं शीलः पयोवाही जलवाहकः; को अत्र? सुगन्धि च तत् सरसं च तत् स्वच्छं च तत् पयः च सुगन्धिसरसस्वच्छपयः सुगन्धिसरसस्वच्छपयसः कुरकं पात्रं सुगन्धिसरसस्वच्छपयस्कुरकम् आनय ॥२३७॥*

ગુજરાતી :- ત્યારે નલરાજા બોલ્યો કે, અરે! નોકરોમાંથી જળ લાવનારો અહીં કોણ હાજર છે? સુગંધી, સરસ તથા નિર્મલ જલની ઝારી લાવો? ॥२३७॥

हिन्दी :- तब नलराजा ने कहा कि, "अरे ! नौकरो में से जल लानेवाला यहाँ कोई हाजीर है? सुगंधि, अच्छे और निर्मल जल की झारी लावो?" ॥२३७॥

मराठी :- तेव्हा नलराजा म्हणाला की, "अरे! नौकरामधून पाणी आणणारा इथे कोणी उपस्थित आहे काय? सुगंधि, छान, आणि निर्मल पाण्याची झारी आणा?" ॥२३७॥

English :- At this King Nal said that anyone from among the servants should bring some scented fine and sweet water in a pitcher.

क्षणं स्थित्वा पुरो वीक्ष्य। पार्श्वतः पृष्ठतोऽपि च ॥
सर्वतः शून्यमालोक्य । व्रीडयाऽधोमुखोऽभवत् ॥२३८॥

अन्वय :- क्षणं स्थित्वा पुरे, पार्श्वतः पृष्ठतः सर्वतः वीक्ष्य अपि च शून्यम् आलोक्य व्रीडया अधोमुखः अभवत् ॥२३८॥

विवरणम् :- क्षणं किञ्चित्कालं स्थित्वा पुरः पुरतः पार्श्वतः उभयोः पक्षयोः पृष्ठतः पश्चात् सर्वतः इतस्ततः वीक्ष्य आलोक्य अपि च शून्यं रिक्तम् आलोक्य कोऽपि न विद्यते इति आलोक्य व्रीडया लज्जया अधोमुखः अभवत् ॥२३८॥

सरलार्थ :- क्षणं स्थित्वा पुरः पार्श्वतः पृष्टतः सर्वतः वीक्ष्य च रिक्तम् आलोक्य लज्जया अधोमुखः अभवत् ॥२३८॥

गुजराती :- પછી ક્ષણવાર રાહ જોયા બાદ આગળ, પડખે તથા પાછળ, એમ સર્વે બાજુએ શૂન્યકાર જોઈને તે લજ્જાને લીધે નીચા મુખવાળો થયો.॥२३८॥

हिन्दी :- फिर थोडी देर बाद राह देखकर आगे, पीछे, बाजु में ऐसे सभी ओर देखकर लज्जा से उनका मुँह नीचा हो गया ॥२३८॥

मराठी :- नंतर थोडा वेळ वाट पाहून समोर, आजुबाजूला, मागे इकडेतिकडे सर्व बाजूंनी कोणी नाही हे पाहून लाजेने त्याने मान खाली घातली. ॥२३८॥

English :- Then after sometime he saw in all directions and having understood that he is in a forest and no one is there to answer his call, his head fell in shame, for he couldn't concile to Damyanti's request.

भैम्यूचे देव किमिद - मभिधत्ते स्म नैषधिः॥
संस्कारः प्राक्तनो देवि, ह्येवं विलपयत्यसौ ॥२३९॥

अन्वय :- भैमी अूचे देव ! किमिदम् अभिधत्ते स्म । नैषधिः अवदत् देवि! असौ प्राक्तनसंस्कारः एवं विलपयति ॥२३९॥

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी दमयन्ती अूचे अवादीत्-हे देव! किम् इदम् अभिधत्ते वदति स्म । निषधस्य अपत्यं पुमान् नैषधि; नलः अवदत्-हे देवि! असौ प्राग् भवः प्राक्तनः प्राक्तनश्चासौ संस्कारश्च प्राक्तन-संस्कारः एवं विलपयति वादयति॥२३९॥

सरलार्थ :- दमयन्ती अवदत् - हे देव किम् इदं वदति स्म । नलः अभणत् देवि! असौ प्राग्भवसंस्कारः हि एवं विलपयति ॥२३९॥

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે દમયંતી બોલી કે હે સ્વામી! આ શું બોલો છો? ત્યારે નલરાજાએ કહ્યું કે, હે દેવી! ઘરેઘર પૂર્વથી પડેલો આ સંસ્કાર એમ બોલાવે છે. ॥૨૩૯॥

हिन्दी :- तब दमयंती कहने लगी कि, "हे नाथ। क्या कह रहे हैं?" तब नलराजा ने कहा, "हे देवी! सचमुच संस्कारवश ऐसा कहने लगा"॥२३९॥

मराठी :- तेव्हा दमयंती म्हणाली की, "हे स्वामी! हे तुम्ही काय म्हणत आहात?" तेव्हा नलराजा म्हणाला की, "हे देवी! खरोखरच पूर्व जन्मातील संस्कार मला हे बोलायला भाग पाडीत आहे." ॥२३९॥

English :- Then Damyanti asked her husband as to what he was blabbering. At this Nal replied that his old way of orderinig hasn't left him yet.

रोदिति स्माथ वैदर्भी, राजोचे देवि मा रुदः ॥
अहं पतिश्च पत्तिश्चे- दानीं तेऽतः स्थिरीभव ॥२४०॥

अन्वय :- अथ वैदर्भी रोदिति स्म राजा ऊचे देवि मा रुदः। इदानीम् अहं ते पतिश्च पत्तिश्चाऽस्मि। अतः स्थिरीभव ॥२४०॥

विवरणम् :- अथ विदर्भाणां राजा वैदर्भः वैदर्भस्य अपत्यं स्त्री वैदर्भी दमयन्ती रोदिति स्म अरुदत्। राजा ऊचे अवादीत् हे देवि! मा रुदः मा रुदिहि। इदानीं तव पतिश्च पत्तिश्च सेवकश्च अहम् एव अस्मि। अतः न स्थिरा अस्थिरा अस्थिरा स्थिरा भव स्थिरीभव। मा चिन्तां कार्षीः ॥२४०॥

सरलार्थ :- अथ दमयन्ती अरोदीत् - राजा अवोचत् देवि! मारुदिहि। इदानीम् अहमेव तव पतिश्च सेवकश्च अस्मि। अतः स्थिरीभव॥२४०॥

ગુજરાતી :- પછી દમયંતી રડવા લાગી, ત્યારે નલરાજાએ (તેણીને) કહ્યું કે, હે દેવી! તું રડ નહીં, કેમ કે આ સમયે તારો સ્વામી, તેમ જ નોકર પણ હું જ છું, માટે તું શાંત થા. ॥૨૪૦॥

हिन्दी :- फिर दमयंती रोने लगी तब नलराजा (उसे) कहने लगा कि, "हे देवी! तू रोना नही, क्यों कि इस समय तेरा स्वामी नौकर सब कुछ मैं ही हूँ इसलिये शांत हो जा।"॥२४०॥

मराठी :- नंतर दमयंती रड़ लागली तेव्हा नलराजा तिला म्हणाला की, "हे देवी! तू रड़ नको, कारण या वेळी तुंझा पती, तुझा नोकर मीच आहे. म्हणून आता तू शांत हो."॥२४०॥

English :- Then Damyanti broke down and started to weep. Then Nal requested her to not to weep and said that he was a servant to her at this moment so he asked her to clam down, and relax.

कुतोऽप्यानीय पानीयमेष सम्पादयामि ते।
इत्युदित्वा परिक्रम्याऽचिन्तयत् खिन्नमानसः ॥२४१॥

अन्वय :- कुतः अपि पानीयम् आनीय एषः ते सम्पादयामि इति उदित्वा परिक्रम्य खिन्नमानसः अचिन्तयत् ॥

विवरणम् :- कुतः अपि पानीयं जलम् आनीय लात्वा एषः अहं ते तुभ्यं सम्पादयामि ददामि। इति एवं उदित्वा भणित्वा परिक्रम्य खिन्नं मानसं यस्य सः खिन्नमानसः नलः अचिन्तयत् व्यचारयत्।

सरलार्थ :- कुतः अपि जलम् आनीय एषः अहम् तुभ्यं ददामि। तां एवं भणित्वा परिक्रम्य खिन्नमानसः नलः व्यचारयत्।

ગુજરાતી :- ગમે ત્યાંથી પણ જળ લાવીને તને આપું છું, એમ કહી આગળ ચાલીને ખેદયુક્ત હૃદયવાળો નલરાજા વિચારવા લાગ્યો કે,

हिन्दी :- कहीं से भी जल लाकर तुझे देता हुँ ऐसा कहकर आगे चलते हुए खेदयुक्त हृदयवाला नलराजा विचार करने लगा की,

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- कुठूनही पाणी आणून तुला देतो. असे सांगून पुढे चालत खेदयुक्त अन्त:करणाने नलराज़ा विचार करू लागला की, ॥२४१॥

English :- King Nal said to her that he will bring her some water from somewhere around. Having said thus he stood up and walked ahead and with a heart full of dolour and gloominess thought to himself.

क्व तद्भ्रूभङ्गभग्नान्य - राज्यं साम्राज्यमुज्ज्वलम् ॥
क्व चावस्थेयमधुना । मृगद्वन्द्वानुकारिणी ॥२४२॥

अन्वय :- तद्भ्रूभङ्गभग्नान्यराज्यम् उज्ज्वलं साम्राज्यं क्व? अधुना च मृगद्वन्द्वानुकारिणी इयम् अवस्था क्व? ॥२४२॥

विवरणम् :- तद् तस्य भ्रुवौ तद्भ्रुवौ । तद्भ्रुवोः भङ्गः तद् भ्रूभङ्गः तद्भ्रूभङ्गेन भग्नानि तद्भ्रूभङ्गभग्नानि। अन्येषां राज्यानि अन्यराज्यानि । तद्भ्रूभङ्गभग्नानि अन्यराज्यानि यस्मिन् तद् तद्भ्रूभङ्गभग्नान्यराज्यम् उज्ज्वलं तेजस्वि साम्राज्ञः भावः साम्राज्यं क्व । अधुनाच्च मृगाणां द्वन्द्वानि मृगद्वन्द्वानि। मृगद्वन्द्वानि अनुकरोतीत्येवं शीला मृगद्वन्द्वानुकारिणी इयम् अवस्था क्व ॥२४२॥

सरलार्थ :- तद्भ्रूभङ्गभग्नान्यराज्यम् उज्ज्वलं साम्राज्यं क्व? अधुनाच्च मृगद्वन्द्वानुकारिणी इयम् अवस्था क्व? ॥२४२॥

गुजराती :- फक्त એક ભ્રુકુટી ચડાવવાથી નષ્ટ થયાં હતાં બીજા રાજ્યો જેનાથી એવું તે (મારું) નિર્મલ રાજ્ય ક્યાં અને આ સમયે હરણના યુગલનું અનુકરણ કરનારી આ મારી અવસ્થા ક્યાં? ॥૨૪૨॥

हिन्दी :- केवल एक भ्रुकुटि चढाने से नष्ट हुए हैं दूसरे राज्य जिस सेमें, ऐसा (मेरा) निर्मल राज्य कहाँ? और इस समय मृग के युगल का अनुकरण करनेवाली मेरी अवस्था कहाँ? ॥२४२॥

P.P.Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- केवळ भुवया चढविल्यानेच ज्यातील इतर राज्ये नष्ट होत होती ते माझे उज्ज्वल साम्राज्य कोठे! आणि आता हरणांच्या जोड्यांचे अनुकरण करावे लागणारी ही अवस्था कोठे? ॥२४२॥

English :- With a heavy heart, he thought to himself that where is his spotless and serene kingdom from where, with just an uplift of an eyebrow he could rain and destroy a kingdom and now he is just like a deer who is in a state of being harmlesss and a destitute.

न यः पात्रं दृशोर्नापि, वचसो मनसोऽपि वा ॥
तमप्यर्थं विधिः पुंसामयं घटयते खलः ॥२४३॥

अन्वय :- यः दृशोः पात्रं ना वचसः मनसः अपि पात्रं ना तम् अपि खलः अयं विधिः पुंसां घटयते॥२४३॥

विवरणम् :- यः दृशोः नयनयोः पात्रं विषयः न। यः : दृग्गोचरः न भवति। वचसः वचनस्य मनसः अपि पात्रं विषयः न भवति। तम् अपि खलः दुर्ज्जनः अयं विधिः भाग्यं पुंसां घटयते॥२४३॥

सरलार्थ :- यः नयनवोः विषयः न। वचस; मनसः अपि पात्रं न। तम् अपि दुर्जनः विधिः पुंसां घटयते॥२४३॥

ગુજરાતી :- જે નજરે પણ જોયું ન હોય, જે વચનો વડે બોલાયું પણ ન હોય, અથવા જે ચિંતવવામાં પણ આવતું ન હોય, તેવું કાર્ય આ દુષ્ટ વિધાતા મનુષ્યોના સંબંધમાં ઘટાવી બૂકે છે. ॥૨૪૩॥

हिन्दी :- जो नजर से भी न देखा हो, जो वचन से भी न बोला हो अथवा जो मानवी चिंतन में भी न आता हो, ऐसा कार्य भी यह दुष्ट विधाता मनुष्य के संबंध में अमल में लाता है ॥२४३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- जे डोळ्याने पाहिले नाही, जे वचनाने बोलले नाही, आणि जे मानवी चिंतनात पण येत नाही, असे कार्य पण हा दुष्ट विधाता मनुष्याच्या बाबतीत घडवून आणतो. ॥२४३॥

English :- He continued thinking that, a forlorn incident which he had never heard of, nor he had ever spoken of, nor he had ever seen, has occured with them. He then asked the almightly creator as to why he had made them experience such an unhappy and a miserable incident.

इति ध्यायन् सरो वीक्ष्य, पुटैराहृत्य तत्पयः ॥
अपीप्यत्तृषिताम् देवीं, छत्रीकृतकरो नलः॥२४४॥

अन्वय :- इति ध्यायन् सरः वीक्ष्य तत्पयः पुटैः आहृत्य छत्रीकृतकरो नलः तृषितां देवीम् अपीप्यत् ॥२४४॥

विवरणम् :- इति एवं ध्यायन् चिन्तयन्, सरः कासारं वीक्ष्य अवलोक्य तस्य सरसः पयः जलं: तत्पयः। पुटैः पर्णपुटैः आहृत्य आदाय न छत्रम् अच्छत्रम्। अच्छत्रं छत्रं कृतः करः येन सः छत्रीकृतकरः। नलः तृषितां पिपासितां देवीं दमयन्तीम् अपीप्यत् अपाययत् ॥२४४॥

सरलार्थ :- इति चिन्तवन् सरः निरीक्ष्य तत्पवः पर्णपुटैः गृहीत्वा छत्रीकृतकरः नलः तृषितां देवीम् अपायवत् ॥२४४॥

ગુજરાતી :- એમ વિચારતા એવા નલરાજાએ (એક) તળાવ જોઈ, તેમાનું જળ (પાંદડાઓના)પડિયામાં લાવીને, તૃષાતુર થયેલી દમયન્તીને, પોતાના હાથને (તેણીના મસ્તક પર) છત્રરુપે ધરીને તેને પાયું.

हिन्दी :- ऐसा विचार करते हूए नलराजा ने एक तालाब देखा, और उसमें का जल लेकर, तृषातुर (प्यासी) दमयन्ती को खुद के हाथ से उसे पिलाया ॥२४४॥

मराठी :- असा विचार करीत असतांना नलराजाला एक तलाव दिसला. त्या तलावातून पानाच्या द्रोणाने पाणी घेऊन तहानेने व्याकुळ झालेल्या दमयन्तीला नलाने स्वत:च्या हाताने डोक्यावर छत्र धरून तिला पाजले. ॥२४४॥

English :- As he was deep in thought, he happened to see a lake. He then made a parasol of leaf and holding in his hand and collecting some water took it to the thirsty Damyanti and made her to drink it in his own hands and then dropped some fe drops on he heated head.

पादौ संवाहयामास, खिन्नायाश्च पदे पदे ॥
दत्तहस्तावलम्बश्च, क्वापि क्वाप्यनयत् पथि ॥२४५॥

अन्वय :- पथि पदे पदे खिन्नाया: पादौ संवाहयामास। दत्तहस्तावलम्ब: च क्व अपि क्व अपि अनयत् ॥२४५॥

विवरणम् :- पथि मार्गे खिन्नाया; क्लान्ताया: तस्या: दमयन्त्या: पादौ चरणौ संवाहयामास। हस्ताभ्याम् पीडयामास। दत्त: हस्तेन हस्ताभ्याम् वा आलम्ब: आश्रय: येन स: दत्तहस्तावलम्ब: च क्व अपि यत्र कुत्रापि अनयत् ॥२४५॥

सरलार्थ :- मार्गे क्लान्ताया: दमयन्त्या: चरणौ संवाहयामास। दत्तहस्तावलम्ब: च तां यत्रकुत्रापि अनयत् ॥२४५॥

ગુજરાતી :- વળી પગલે પગલે થાકી જતી દમયંતીના પગો નળરાજા **ચાંપવા લાગ્યો તથા ક્યાંક ક્યાંક પોતાના હાથનો ટેકો દઈને તેને માર્ગમાં ચલાવવા લાગ્યો. ॥૨૪૫॥**

हिन्दी :- थकी हुइ दमयंती के पाँव नलराजा दबाने लगे और कहाँ कहाँ खुद के हाथ का सहारा देकर उसे चलाने लगे ॥२४५॥

मराठी :- रस्त्यात चालून चालून दमयन्ती थकली. म्हणजे नलराजा तिचे पाय दाबीत असे व तिचा हात धरून तिला कोठे कोठे नेत असे. ॥२४५॥

English :- Then King Nal pressed the feet of the exhausted Damyanti. Then as they proceeded on their journey, Damyanti rested her head on Nal's shoulder.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्नातोत्थेवाथ स्वेदाम्भ:प्लुताङ्गी भीमभूः श्रमात् ॥
कियदद्यापि गन्तव्यमित्यूचे नैषधिं मुहुः ॥२४६॥

अन्वय :- अथ श्रमात् स्वेदाम्भ:प्लुताङ्गी भीमभूः स्नातोत्था इव अद्यापि कियद् गन्तव्यम् इति नैषधिं मुहुः ऊचे ॥२४६॥

विवरणम् :- अथ श्रमात् स्वेदस्य अम्भः जलं स्वेदाम्भः । स्वेदाम्भसा प्लुतम अङ्गं शरीरं यस्याः सा स्वेदाम्भ:प्लुताङ्गी । भीमात् भवति इति भीमभूः भीमाङ्गजा दमयन्ती । आदौ स्नाता पश्चाद् उत्था स्नातोत्था इव अद्यापि कियद् गन्तव्यं गमनीयम् इति एवं निषधस्य अपत्यं पुमान् नैषधिः नलः तं नैषधिं मुहुः वारंवारमूचे अवोचत् ॥२४६॥

सरलार्थ :- अथ श्रमात् स्वेदाम्भ:प्लुताङ्गी दमयन्ती स्नातोत्था इव अद्यापि कियद् गन्तव्यम् इति नलं वारंवारम् अपृच्छत् ॥२४६॥

गुजराती :- વળી જાણે સ્નાન કરીને ઊઠી હોય એવી રીતે થાકને લીધે પસીનાથી ભીંજાયેલા શરીરવાળી દમયંતી, હજુ કેટલુંક ચાલવાનું છે ? એમ વારંવાર નળરાજાને પૂછવા લાગી. ॥२४६॥

हिन्दी :- जैसे की स्नान करके उठी न हो! इसी तरह पसीने से भीगी हुई दमयंती बारबार नलराजा से पूछने लगी, कि और कितना चलना बाकी है ॥२४६॥

मराठी :- नंतर श्रमामुळें सर्व शरीर यामाने ओलेचिंब झाल्यामुळे जणू काय नुकतेच स्नान करून बाहेर आलेली दमयन्ती अजून किती चालावयाचे आहे! असे सारखे नलराजाला विचारू लागली. ॥२४६॥

English :- Damyanti was drenched with sweat as though she had just, had a bath. Then the tired Damyanti kept on asking Nal again and again as to how long a journey they had to travel more.

अचीकथन्नलः साश्रु-ररण्यं शतयोजनम् ॥
विंश एव हि भागोऽस्याद्यापि देव्यतिचक्रमे ॥२४७॥

अन्वय :- नलः साश्रुः अचीकथत् अरण्यं शतयोजनम् अस्ति । हे देवि! अद्यापि अस्य विंश एव भागः अतिचक्रमे ॥२४७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- नलः अश्रुणा सह वर्ततेऽसौ साश्रुः रूदन् अचीकथत् अकथयत् कथयामास। अरण्यं विपिनं योजनानां शतं शतयोजनम् अस्ति। हे देवि! अद्यापि अस्य अरण्यस्य विंश एव भागः आवाभ्याम् अतिचक्रमे उल्ललङ्घे ॥२४७॥

सरलार्थ :- नलः साश्रुः अकथयत्-अरण्यं शतयोजनं वर्तते। हे देवि! अद्यापि अस्य अरण्यस्य विंश एव भागः आवाभ्याम् अतिचक्रमे ॥२४७॥

गुजराती :- त्यारे नळराजा आंखोमां आंसु लावी कहेवा लाग्यो के, आ जंगल एकसो योजननुं छे, अने हे देवी! हजु आपणे तेनो वीसमो भाग ज ओळंगी शक्या छीओ. ॥२४७॥

हिन्दी :- तब नलराजा आँखो में आँसू लाकर कहने लगे कि, यह जंगल एक सौ योजन का है, और हे देवी ! अभी तक हमने उसका बीसवां ही भाग पार किया है ॥२४७॥

मराठी :- तेव्हा नलराजा डोळयात अश्रू आणून म्हणाला- हे देवि! हे जंगल शंभर योजन आहे, आपण अजून त्याच्या विसावा भाग ओलांडला आहे. ॥२४७॥

English :- At this Nal's eyes were filled witih tears and he said to her that the forest was a hundred yojan long (800 miles) and they had only crossed twenty yojans. (160 miles)

तापमल्पय मार्तण्ड। भूमे कोमलताम् भज ॥
पन्था संहर दीर्घत्वमासन्नीभव कुण्डिन ॥२४८॥

अन्वय :- मार्तण्ड! तापम् अल्पय! हे भूमे! कोमलतां भजा हे पन्थाः! दीर्घत्वं संहर। हे कुण्डिन। आसन्नीभव ॥२४८॥

विवरणम् :- हे मार्तण्ड सूर्य! त्वं तापम् उष्णताम् अल्पय अल्पं कुरूष्व। हे भूमे! त्वं कोमलस्य भावः कोमलता तां कोमलतां भज अङ्गीकुरूष्व। पन्थाः। मार्ग! त्वं दीर्घस्य भावः दीर्घत्वं संहर। हे कुण्डिन! त्वम् न आसन्नः अनासन्नः। अनासन्नः आसन्नः भव आसन्नीभव समीपवर्ती भव ॥२४८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- हे दिवाकर। त्वं तापम् अल्पय। हे भूमे! त्वं कोमलतां भजा हे पन्था: त्वं दीर्घत्वं संहर। हे कुण्डिन। त्वम् आसन्नीभव ॥२४८॥

ગુજરાતી :- હે સૂર્ય! તું તારો તાપ ઓછો કર ! હે પૃથ્વી ! તું કોમળપણાને ધારણ કર... હે માર્ગ! તું તારી લંબાઈને સંકોરી લે તથા હે કુંડિનપુર નગર! તું નજીક આવ ! ॥૨૪૮॥

हिन्दी :- हे सूरज! तू तेरा ताप कम कर। हे पृथ्वी। तू कोमलता धारण कर। हे मार्ग। तू तेरी लंबाई कम कर और हे कुंडिनपुर नगर! तू नजदीक आ जा? ॥२४८॥

मराठी :- हे सूर्य! तू तुझा ताप कमी कर? हे पृथ्वी तू कोमलता धारण कर? हे मार्गा तू तुझी लांबी कमी कर? आणि हे कुंडिनपुरा तू जवळ ये? ॥२४८॥

English :- He then asked the sun to decrease its scorching heat, then asked the ground to attain softness then asked the road to decrease its length and asked Kundinpur town to come closer.

श्रमार्तां भीमजामेतां, **हन्त पीडयथेह किम् ॥**
क्षते क्षिपथ किं क्षारम्, **दु:स्थिते किमु निर्दया: ॥२४९॥**

अन्वय :- हन्त श्रमार्ताम् एतां भीमजाम् इह किं पीडयथ। अथ क्षते क्षारं किं क्षिपथ। दु:स्थिते किमु निर्दया भवथ ॥२४९॥

विवरणम् :- *हन्त ! खेदे। श्रमेण आर्ता श्रमार्ता तां श्रमार्ताम् एतां भीमात् जाता भीमजा तां भीमजां दमयन्तीम् इह अस्मिन् अरण्ये किं पीडयथ ! अथ क्षते व्रणे क्षारं किं क्षिपथा दु:खेस्थित: दु:स्थित: तस्मिन् दु:स्थिते किमु किमर्थं निर्गता दया येभ्य: ते निर्दया: दयारहिता: कठोरा: भवथ ॥२४९॥*

सरलार्थ :- हन्त श्रमार्ताम् एतां दमयन्तीम् इह किं पीडयथ। अथ क्षते क्षारं किं क्षिपथ? दु:स्थिते किमु निर्दया: भवथ ॥२४९॥

ગુજરાતી :- અરે ! થાકથી પીડાયેલી આ દમયંતીને તમો (સઘળા) કેમ અહીં સંતાપ ઉપજાવો છો? તેણીના ઘા પર તમો મીઠું કેમ છાંટો છો? તથા દુ:ખ પામતી આ દમયંતી પ્રત્યે તમો શા માટે નિર્દય થાઓ છો? ॥૨૪૯॥

हिन्दी :- अरे! थकान से पीडित इस दमयंती को तुम सब क्यों संतापित करते हो? उनके घाव पर तुम नमक क्यों डालते हो और दुःखित दमयंती के प्रति तुम क्यों निर्दय बनते हो? ॥२४९॥

मराठी :- अरे! श्रमाने पीडलेल्या दमयन्तीला तुम्ही वेये कां पीडा देत आहात. जखमेवर मीठ का टाकत आहात. संकटात निर्दय का होत आहात. ॥२४९॥

English :- He then asked as to why they (sun, ground, road) are harrassing the forlorn Damyanti and why are they being so harsh and tyrranical to the delicate Damyanti.

किम् मेघ मेघातपत्रं धत्से न संप्रति ॥
स्वाजन्यावसरोऽयं ह्रीत्युपालभत तान्नलः ॥त्रिभिर्विशेषकं॥२५०॥

अन्वय :- हे मेघ! सम्प्रति मेघातपत्रं किं न धत्से। अयं स्वाजन्यावसरः। हि नलः तान् उपालभत ॥

विवरणम् :- मेघ! जलद! सम्प्रति साम्प्रतं आतपात् त्रायते इति आतपत्रं छत्रम्। मेघः एव आतपात्रं मेघातपत्रं किं न धत्से। धारयसि। अयं स्वश्चासौ जनश्च स्वजनः स्वजनस्य भावः स्वाजन्यं स्वाजन्यस्य अवसरः स्वाजन्यावसरः। स्वजनतायाः अवसरः अस्ति इति नलः तान् उपालभत ॥२५०॥

सरलार्थ :- हे वारिद! साम्प्रतं मेघातपत्रं किं न धत्से। अयं स्वजनतायाः अवसरः अस्ति इति नलः तान् उपालभत ॥२५०॥

ગુજરાતી :- અરે મેઘ! તુ આ સમયે મેઘાડંબરરૂપ છત્રને દમયંતી પર કેમ ધારણ કરતો નથી? ખરેખર સજ્જનપણું દેખાડવાનો આ અવસર છે, એ રીતે નલરાજા તેઓને ઉપાલંભ આપવા લાગ્યો. ॥૨૫૦॥

हिन्दी :- अरे मेघ ! तू इस समय मेघाडंबररूप छत्र को दमयंती पर क्यों धारण नही करता? सचमुच सज्जनता दिखाने का यही समय है, इस प्रकार नलराजा उनको उपालंभ देने लगा ॥२५०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- अरे मेघा! तू या वेळी मेघाडंबररूपी छत्र दमयंतीवर कां धारण करीत नाहीस? खरोखरच सज्जनपणा दाखविण्याची हीच वेळ आहे, अशा प्रकारे नलराजा त्यांचा उपालंभ करीत होता. ॥२५०॥

English :- Then King Nal addressing the rain asked it as to why it cannot shower itself on Damyanti. He continued saying that if at this time when they are undergoing torments and harrassment and are not helped then these are not the signs of respectable gentle beings. In this way Nal reviled and taunted the God of rain, Varun.

एवमुल्लपतोस्तस्मिन्नरण्ये गच्छतोस्तयोः ॥
प्रतीकाराऽक्षमोऽस्ताद्रौ, ह्रियेवान्तर्दधौ रविः ॥२५१॥

अन्वय :- एवम् उल्लपतोः तस्मिन् अरण्ये गच्छतोः तयोः प्रतिकाराऽक्षमः रविः ह्रिया इव अस्ताद्रौ अन्तर्दधौ॥२५१॥

विवरणम् :- एवम् इति उल्लपतोः परस्परम् आलपतोः तस्मिन् अरण्ये विपिने गच्छतोः व्रजतोः तयोः नलदमयन्त्योः प्रतिकाराय प्रतिकर्तुम् अक्षमः प्रतिकाराऽक्षमः रविः सूर्यः ह्रिया लज्जया त्रपया इव अस्ताय अस्तस्य वा अद्रिः गिरिः अस्ताद्रिः तस्मिन् अस्ताद्रौ अन्तर्दधौ अन्तर्हितः अभवत् बभूव ॥२५१॥

सरलार्थ :- एवं परस्परम् आलपतोः तस्मिन् गहने व्रजतोः तयोः नलदमयन्त्योः प्रतिकर्तुम् अक्षमः सूर्यः लज्जया इव अस्ताचले अन्तर्हितः अभवत् ॥२५१॥

गुजराती :- એમ બોલતાં બોલતાં તે જંગલમાં તેઓ બન્ને જતાં હતાં. એવામાં તેઓ પર ઉપકાર કરવાનો ઉપાય શોધવામાં નિષ્ફળ બનેલો સૂર્ય પણ જાણે લજ્જિત બની અસ્તાચલ પર અદૃશ્ય થયો. ॥૨૫૧॥

हिन्दी :- ऐसा बोलते हुए वे दोनों जंगल में जा रहे थे, इतने में उन पर उपकार करने में असमर्थ ऐसा सूरज भी लज्जा आती हो उस प्रकार अस्ताचल पर्वत पर अदृश्य हो गया ॥२५१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- असे आपसात बोलत अरण्यातून जात असता जणू काय त्यांचा प्रतिकार करण्यास असमर्थ झालेला सूर्यही लाजेने अस्ताचल पर्वतावर अदृश्य झाला. ॥२५१॥

English :- So speaking thus, both continued their journey. Just then the sun set itself in the west asthough it was hidding its face for it couldn't solve the problem of its utmost heat which was harrassing them.

भैम्याः कृते ततस्तस्याः, नलः कङ्केलिपल्लवैः ॥
पल्यङ्कं रचयाञ्चक्रे, तूलीलीलामलिम्लुचम् ॥२५२॥

अन्वय :- ततः तत्र नलः कङ्केलिपल्लवैः; भैम्याः कृते तूलीलीलामलिमलुचं पल्यङ्कं रचयाञ्चक्रे ॥२५२॥

विवरणम् :- *तत तदनन्तरं तत्र तस्मिन् अरण्ये नलः कङ्केल्याः अशोकस्य पल्लवैः किसलयैः कङ्केलिपल्लवैः भीमस्य अपत्यं स्त्री भैमी तस्याः भैम्याः दमयन्त्याः कृते दमयन्त्याः हेतोः तूल्याः लीला तूलीलीला तूलीलीलायाः मलिम्लुचः चोरः तुलीलीलामलिम्लुचः तं तूलीलीलामलिम्लुचं कार्पासलीलामलिम्लुचं चोरं पल्यङ्कं शय्यां रचयाञ्चक्रे ॥२५२॥*

सरलार्थ :- ततः तस्मिन् विपिने नलः कङ्केलिपल्लवैः दमयन्त्याः हेतोः कार्पासलीलाचोरां शय्यां रचयाञ्चक्रे ॥२५२॥

ગુજરાતી :- પછી ત્યાં નલરાજાએ અશોક વૃક્ષનાં કોમલ પાન વડે દમયંતીને સૂવા માટે, કોમળ રૂની ભરેલી પથારીનો પણ તિરસ્કાર કરે એવી શય્યા બનાવી. ॥૨૫૨॥

हिन्दी :- फिर नलराजा ने अशोक वृक्ष के कोमल पत्तों से दमयंती को सोने के लिए कोमल रूई से भरी हुई शय्या का भी तिरस्कार करे ऐसी शय्या बनायी ॥२५२॥

मराठी :- नंतर नलराजाने अशोक वृक्षाच्या कोमल पानांनी दमयंतीला झोपण्यासाठी मऊ कापसाने भरलेल्या बिछान्याचा (गादीचा) पण तिरस्कार करणारी शय्या बनविली. ॥२५२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then Nal prepared a mattress out of the soft and tender leaves of Ashoka tree which even spurned and discarded a mattress of soft delicate cotton as it was a way beyound compare.

अथोवाच प्रियामेवमत्र तल्पेऽतिकोमले ॥
कुरु श्रमापनोदत्वं, देवि निद्राविनोदतः ॥२५३॥

अन्वय :- अथ प्रियाम् एवम् उवाच - देवि ! अत्र अतिकोमले तल्पे निद्राविनोदतः श्रमापनोदत्वं कुरु॥२५३॥

विवरणम् :- अथ प्रियां दमयन्तीम् एवम् इति उवाच उवाद-हे देवि! अत्र अस्मिन् अतिकोमले अतिशयेन कोमले तल्पे शयने निद्रया विनोदः निद्राविनोदः तस्मात् निद्राविनोदतः निद्रया मनोविनोदनेन श्रमस्य अपनोदत्वं श्रमापनोदत्वं कुरु श्रमम् अपसारय ॥२५३॥

सरलार्थ :- अथ दमयन्तीम् एवम् उवाच-हे देवि ! अत्र अतिकोमले तल्पे निद्रया मनोविनोदनेन श्रमम् अपसारय ॥२५३॥

गुजराती :- પછી નલરાજાએ પોતાની પ્રાણપ્રિયા દમયંતીને એમ કહ્યું કે હે દેવી ! આ અત્યંત કોમલ પથારી પર આનંદથી નિદ્રા લઈને તું તારો થાક દૂર કર. ॥૨૫૩॥

हिन्दी :- फिर नलराजाने अपनी प्राणप्रिया दमयंती से कहा कि, हे देवी! इस अत्यंत कोमल शय्या पर तू आनंद से निद्रा ले और तेरी थकान दूर कर. ॥२५३॥

मराठी :- नंतर नलराजा आपल्या प्राणप्रिया दमयंतीला म्हणाला- "हे देवी ! या अत्यंत कोमल अशा बिछान्यावर तू आनंदाने झोपून तुझा थकवा दूर कर?."॥२५३॥

English :- Then Nal who loved his wife whole heartedly said her to lie on the matress and relax and be refreshed as she was weary with exhaustion.

अथ भैम्यवदन्नाथ, ग्रामः सम्भाव्यतेऽन्तिके ॥
भाङ्कृतानि गवामत्र, श्रूयन्ते यददूरतः॥२५४॥

अन्वय :- अथ भैमी अवदत्-हे नाथ ! अन्तिके ग्रामः सम्भाव्यते अत्र यद् अदूरतः गवां भाङ्कृतानि श्रूयन्ते.॥२५४॥

विवरणम् :- अथ भीमस्य अपत्यं स्त्री भैमी दमयन्ती अवदत् अवादीत् उवाद-हे नाथ! अन्तिके समीपे ग्रामः सम्भाव्यते। यद् अत्र न दूरः अदूरः तस्मात् अदूरतः गवां भाङ्कृतानि श्रूयन्ते आकर्ण्यन्ते ॥२५४॥

सरलार्थ :- अथ दमयन्ती अवदत् - हे नाथ ! समीपे ! ग्रामः सम्भाव्यते। यद् अत्र अदूरतः गवां भाङ्कृतानि श्रूयन्ते ॥२५४॥

ગુજરાતી :- ત્યારે દમયંતીએ કહ્યું કે, હે સ્વામી! આટલામાં કોઈ ગામ નજીક હોય એમ લાગે છે, કેમ કે અહીં નજીકમાં જ ગાયોના ભાંભરવાનો અવાજ સંભળાય છે. ॥૨૫૪॥

हिन्दी :- तब दमयंती ने कहा कि, हे नाथ ! यहाँ आसपास कोई गाँव है ऐसा लगता है, क्यों कि यहाँ नजदीक ही गाय के चिल्लाने की आवाज सुनाई दे रही है ॥२५४॥

मराठी :- तेव्हा दमयंती म्हणाली की, हे स्वामी ! येथे जवळपास कोणते तरी गाव आहे, असे वाटते, कारण की जवळच गायींच्या हंबरण्याचा आवाज ऐकू येत आहे. ॥२५४॥

English :- Then Damyanti told her husband that it seems that there is a village close-by as she could hear the mooing of the cows.

गम्यतां नाथ तत्तत्र, हित्वाऽरण्यम् स्मशानवत् ॥
गृहान्तरेव निर्भीकैर्येन सौख्येन सुप्यते ॥२५५॥

अन्वय :- तद् नाथ स्मशानवत् अरण्यं हित्वा तत्र गम्यताम्। येन गृहान्तरेव निर्भीकैः सौख्येन सुप्यते ॥२५५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- तद् तस्मात् हे नाथ ! स्मशानेन तुल्यं स्मशानवत् अरण्यं वनं हित्वा त्यक्त्वा तत्र तस्मिन् ग्रामे गम्यताम् । येन गृहस्य अन्तः गृहान्तः एव निर्गता भीः येभ्यः येषां वा ते निर्भीकास्तैः निर्भीकैः भयरहितैः सुखम् एव सौख्यं तेन सौख्येन सुप्यते॥२५५॥

सरलार्थ :- तस्मात् हे नाथ ! स्मशानेन तुल्यम् अरण्यं त्यक्त्वा तस्मिन् ग्रामे गम्यताम् । येन गृहान्तः एव भयरहितैः सौख्येन सुप्यते ॥२५५॥

ગુજરાતી :- માટે હે સ્વામી ! સ્મશાન જેવા આ જંગલ તજીને આપણે તે ગામમાં જઈએ, કે જેથી ત્યાં આપણે નિર્ભયપણે સુખે સુઈ શકીએ. ॥૨૫૫॥

हिन्दी :- इसलिये हे स्वामी ! स्मशानसमान इस जंगल को छोड कर हम उस गाँव मे जायेंगे, वहाँ किसी घर के अंदर निर्भयतासे, सुखचैन से सो जायेंगे । ॥२५५॥

मराठी :- त्यासाठी हे स्वामी! या स्मशानासारख्या जंगलाला सोडून आपण त्या गावी जाऊ की, ज्यामुळे तेथे कोणाच्या तरी घरी आपण निर्भयपणे सुखाने झोपू. ॥२५५॥

English :- So, she told her husband that they should leave this forest which seemed like a graveyard to her, and go to the village and go to somebody's house and have a nap with utmost bliss and a heart which is at peace.

नलोऽवादीदरण्ये हि, ग्रामो नास्त्यत्र कातरे ॥
मिथ्यादृशामयं किन्तु, तापसानामिहाश्रमः ॥२५६॥

अन्वय :- नलः अवादीत् कातरे ! अत्र अरण्ये ग्रामः नास्ति । किन्तु अयं मिथ्यादृशां तापसानाम् इह आश्रमः अस्ति ॥२५६॥

विवरणम् :- नलः अवादीत् अवदत् - कातरे ! भयभीते ! अत्र अस्मिन् अरण्ये विपिने ग्रामः नास्ति । किन्तु अयं मिथ्या दृक् येषां ते मिथादृशः तेषां मिथ्यादृशाम् । तापसानाम् इह आश्रमः अस्ति ॥२५६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- नलः अवदत् हे भयभीते दमयन्ति ! अस्मिन् अरण्ये ग्रामः नास्ति । किन्तु मिथ्यादृशां तापसानाम् इह आश्रमः अस्ति ॥२५६॥

ગુજરાતી :- ત્યારે નલરાજાએ કહ્યું કે, હે ભયભીત થયેલી પ્રિયે ! ખરેખર આ જંગલમાં કોઈ ગામ નથી, પરંતુ અહીં મિથ્યાદૃષ્ટિ તાપસોનો આશ્રમ છે. ॥૨૫૬॥

हिन्दी :- तब नलराजा ने कहा कि हे भयभीत होनेवाली प्रिये ! सचमुच इस जंगल में कोई गाँव नही है, लेकिन यहाँ मिथ्यादृष्टी तापसों का वह आश्रम है ॥२५६॥

मराठी :- तेव्हा नलराजा म्हणाला- हे भित्रे! खरोखरच या जंगलात कोठेही गाव नाही, येथे मिथ्यादृष्टी तापसांचा आश्रम आहे. ॥२५६॥

English :- Then Nal said to Damyanti who was overcome with fright that there was no village as such in the jungle and it was only a hermitage of a lot of illusive non-jains.

मिथ्यादृशां च सम्पर्कः, सम्यग्दर्शनदूषकः ॥
अलं क्षीरविनाशाय, न सौवीरच्छटापि किम् ॥२५७॥

अन्वय :- मिथ्यादृशां सम्पर्कः सम्यक्दर्शनदूषकः अस्ति। सौवीरच्छटापि क्षीरविनाशाय अलं न किम्? ॥२५७॥

विवरणम् :- मिथ्या दृक् येषां ते मिथ्यादृशः तेषां मिथ्यादृशां च सम्पर्कः सहवासः सम्यक् च तद् दर्शनं च सम्यक्दर्शनं सम्यक्दर्शनस्य दूषकः सम्यक्दर्शनदूषकः अस्ति । सौवीरस्य तक्रस्य छटा सौवीरच्छटा अपि क्षीरस्य दुग्धस्य विनाशः क्षीरविनाशः तस्मै क्षीरविनाशाय अलं समर्था न किम्? यथाऽल्पेनैव तक्रांशेन दुग्धस्य विनाशो भवति। तथा मिथ्यादृशामल्पोऽपि सहवासः सम्यक्त्वं दूषयति॥२५७॥

P.P. Ac. Gunratnasuri M.S. Shri Siddhi Ratnakar Trust

सरलार्थ :- मिथ्यादृशां सम्पर्कः सम्बन्धः सम्यक्दर्शनदूषकः अस्ति। सौवीरच्छटाऽपि तक्रस्य लेशोऽपि मिथ्यादृशामल्पोऽपि सम्बन्धः सम्यक्त्वं दूषयति। यथा तक्रस्य लेशोऽपि दुग्धं विनाशयति। क्षीरविनाशाय समर्थो न किम्? ॥२५७॥

ગુજરાતી :- વળી (ત્યાં જવાથી) તે મિથ્યાદૃષ્ટિ તાપસોનો પરિચય આપણાં સમ્યક્ત્વને દોષિત કરનારો થાય, કેમ કે કાંજીનો છાંટો પણ શું દૂધનો વિનાશ નથી કરતો? ॥૨૫૭॥

हिन्दी :- फिर वहाँ जाने से उस मिथ्यादृष्टि तापसों का परिचय अपने सम्यकत्व को दूषित करनेवाला होगा, क्यों कि कांजी का एक ही छिंटा क्या दूध का विनाश नही करता? ॥२५७॥

मराठी :- मिथ्यादृष्टी लोकांचा सहवास (सम्बन्ध) सम्यकत्वाचा नाश करतो. ताकाचा एक थेंबसुद्धा काय दूध बिघडवीत नाही? ॥२५७॥

English :- Damyanti who was a staunch jain considered it impure to mix around with the illusive non-jains. Just as a drop of starch spoils milk, in the same way she considered it unchaste to even meet them.

मास्म भैषीः सुखेनैव, स्वपिहि त्वमिहैव तत् ॥
स्वयं स्यां तव येनाहं, यामिकः सौविदल्लवत् ॥२५८॥

अन्वय :- तत् त्वं मा भैषीः स्मा इह एव सुखेनैव स्वपिहि। येन अहं स्वयं तव सौविदल्लवत् यामिकः स्याम् ॥२५८॥

विवरणम् :- तत् तस्मात् त्वं मा भैषीः मा बिभीहि। इह एव अस्यां शय्यायाम् एव सुखेन एव स्वपिहि निद्राहि। येन अहं स्वयं सौविदल्लवत् दण्डधारी यामिकवत् तव यामिकः स्याम् ॥२५८॥

सरलार्थ :- तत् त्वं मा बिभीहि। इह एव सुखेनैव स्वपिहि। येन अहं स्वयं तव सौविदल्लवत् यामिकः स्याम् ॥२५८॥

ગુજરાતી :- માટે તું ડર નહીં ? અને સુખેથી અહીં જ નિદ્રા કર? કેમકે હું પોતે તારી ચોકી કરનારો છું. ॥૨૫૮॥

हिन्दी :- इसलिये तू डर मत ? और सुख चैन से यहीं सो जा? क्यों कि मैं खुद तेरी चौकी करनेवाला हूँ। ॥२५८॥

मराठी :- त्यासाठी तू घाबरू नको? वा शय्येवरच सुखाने झोप. मी स्वत: पहारेकऱ्याप्रमाणे तुझा पहारेकरी आहे. ॥२५८॥

English :- So, King Nal said to Damyanti not to feel afraid and relax with utmost peace as he himself is going to guard and protect her.

अथ प्रच्छादयामास, स्वांशुकार्धेन संस्तरम्॥
प्रच्छदेनेव पल्यङ्कं, भरतार्धमहीपतिः ॥२५९॥

अन्वय :- अथ भरतार्धमहीपतिः प्रच्छदेन पल्यङ्कम् इव स्वांशुकार्धेन संस्तरं प्रच्छादयामास॥२५९॥

विवरणम् :- अथ भरतस्य अर्धं भरतार्धम्। मह्याः पृथ्व्याः पतिः महीपतिः। भरतार्धस्य महीपतिः भरतार्धमहीपतिः नलः प्रच्छाद्यते अनेन इति प्रच्छदः तेन प्रच्छदेन पल्यङ्कः पर्यङ्कः इव स्वस्य अंशुकं वस्त्रं स्वांशुकम्। स्वांशुकस्य अर्धं स्वांशुकार्धं तेन स्वांशुकार्धेन अर्धवस्त्रेण इत्यर्थः संस्तरं शय्यां प्रच्छादयामास आच्छादयामास ॥२५९॥

सरलार्थ :- अथ भरतार्धमहीपतिः नलः प्रच्छदेन पल्यङ्कम् इव स्वस्य अर्धवस्त्रेण दमयन्त्याः शय्याम् आच्छादयामास ॥२५९॥

ગુજરાતી :- પછી અર્ધ ભરતખંડના અધિપતિ એવા નલરાજાએ, ઓછાડ વડે જેમ પલંગની શય્યાને ઢાંકે, તેમ પોતાના પહેરવાના અર્ધ વસ્ત્ર વડે તે શય્યાને આચ્છાદિત કરી. ॥२५९॥

हिन्दी :- फिर अर्धभरत खंड के अधिपति, नलराजा, चद्दर से जैसे पलंग की शय्या को ढाँकते है, उसी तरह खुद के पहनने के अर्ध वस्त्र से उस शय्या को आच्छादित किया॥२५९॥

मराठी :- नंतर अर्धभरतखंडाचा अधिपती नलराजाने चादरीने जसा पलंगावरचा बिछाना झाकून टाकतात त्याप्रमाणे स्वत:च्या अर्ध्यावस्त्राने त्या बिछान्याला आच्छादित केले.

English :- Then the monarch of the half of the Bharatschetra taking off his half garment from his body covered the mattress, as a bedsheet covers up a mattress.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्मृतपञ्चनमस्कारा, नतदेवगुरुक्रमा ॥
अस्वपीद् भीमजा तत्र, भृङ्गीव कमलोदरे ॥२६०॥

अन्वय :- तत्र स्मृतपञ्चनमस्कारा नतदेवगुरुक्रमा भीमजा कमलोदरे भृङ्गीव अस्वपीत्॥२६०॥

विवरणम् :- तत्र तस्यां शय्यायां पञ्च च ते नमस्काराः च पञ्चनमस्काराः। स्मृताः पञ्चनमस्काराः यया सा स्मृतपञ्चनमस्कारा, देवश्च गुरुश्च देवगुरू । देवगुर्वोः क्रमौ पादौ देवगुरुक्रमौ । नतौ देवगुरुक्रमौ यया सा नतदेवगुरुक्रमा । भीमात् जायते इति भीमजा दमयन्ती। कमलस्य उदरं कमलोदरं तस्मिन् कमलोदरे भृङ्गी भ्रमरी इव अस्वपीत् सुष्वाप ॥२६०॥

सरलार्थ :- तस्यां शय्यायां स्मृतपञ्चनमस्कारा नतदेवगुरुक्रमा दमवन्ती कमलोदरे भृङ्गीव अस्वपीद्। यथा भ्रमरी कमलोदरे स्वपिति। तथा दमवन्त्यपि पञ्चनमस्कारान् स्मृत्वा देवगुर्वोः पादौ नत्वा च तस्यां शय्यायां सुष्वाप॥२६०॥

गुजराती :- પછી પંચપરમેષ્ઠિને નમસ્કાર કરી , દમયંતી દેવગુરૂના ચરણોમાં નમસ્કાર કરીને, ભમરી જેમ કમળમાં સૂએ, તેમ તે શય્યા પર નિદ્રાધીન બની. ॥२६०॥

हिन्दी :- फिर पंचपरमेष्ठि का स्मरण कर के दमयंती देवगुरू के चरणोमे नमस्कार कर के भंवरा जैसे कमल के अंदर सोता है, उसी प्रकार वह शय्या पर निद्राधीन हुई ॥२६०॥

मराठी :- नंतर ज्याप्रमाणे भ्रमरी उदरात झोपते. त्याप्रमाणे दमवन्ती पंच परमेष्ठी नमस्कारांचे स्मरण करून व देवगुरूंच्या चरणाला वन्दन करून त्या शय्येवर झोपली. ॥२६०॥

English :- Then she memorized the Navkar Mantra and bowed down to the Arihant and just as a wasp sleeps inside a lotus, in the same way Damyanti slept on the matress.

P.P. A.C. Gunratnasuri M.S.

निद्राणायां च वैदर्भ्यां, नलश्चिन्तां प्रपन्नवान् ॥
अहो मे वासनं कीदृग्, मनोवाग्दृक्पथातिगम् ॥२६१॥

अन्वय :- वैदर्भ्यां निद्राणायां च नलः चिन्तां प्रपन्नवान्। अहो मनोवाग्दृक्पथातिगं मे वासनं कीदृक्॥२६१॥

विवरणम् :- *विदर्भाणाम् ईश्वरः वैदर्भः। वैदर्भस्य अपत्यं स्त्री वैदर्भी तस्यां वैदर्भ्यां दमयन्त्यां निद्राणायां च नलः चिन्तां प्रपन्नवान् सचिन्तः अभवत्। अहो मनश्च वाक् च दृशौ च मनोवाग्दृशः मनोवाग्दृशां पन्थाः मनोवाग्दृग्पथः मनोवाग्दृग्पथं अतिगच्छति इति मनोवाक्दृग्पथातिगं मे मम वासनं वनवासः कीदृग्॥२६१॥*

सरलार्थ :- वैदर्भ्यां निद्राणायां च नलः सचिन्तः अभवत्-अहो! मनोवाक्दृग्पथातिगः मम वनवासः कीदृग् ॥२६१॥

ગુજરાતી :- પછી દમયંતી નિદ્રાધીન થયા બાદ નલરાજા વિચારવા લાગ્યો કે, અહો! મન, વચન તથા દૃષ્ટિના વિષયમાં પણ ન આવી શકે, એવો આ મારે કેવો વનવાસ ભોગવવો પડ્યો છે ! ॥२६१॥

हिन्दी :- फिर दमयंती सो जाने के बाद नलराजा विचार करने लगा कि, अहो ! मन, वचन, और दृष्टि के विषय में न आ सके, ऐसा यह मुझे कैसा वनवास भुगतना पडा है ॥२६१॥

मराठी :- दमयंती झोपून गेल्यानंतर नलराजा विचार करू लागला-अरे ! मन, वचन आणि दृष्टीच्या पण विषयात न येणारा, असा कसा वनवास मला भोगावा लागत आहे. ॥२६१॥

English :- As Damyanti fell off to sleep, King Nal thought to himself that he was to bear the torments of such a wondering life, of which he had never thought of nor spoke of, nor seen.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दूरोदरेण यद्राज्य -परिभ्रंशोऽ नुजादपि ।।
व्यसनस्यापि सा चूला, श्वशुराश्रयणं तु यत् ।।२६२।।

अन्वय :- दूरोदरेण अनुजादपि यद् राज्यपरिभ्रंशः। यत् श्वशुराश्रयणं तु सा व्यसनस्यापि चूला ।।२६२।।

विवरणम् :- दूष्यम् उदरं यस्य तद् दूरोदरं तेन दूरोदरेण द्यूतेन। अनुजायतेऽसौ अनुजः तस्मात् अनुजात् कनीयसः भ्रातुः कूबरात् राज्यस्य राज्यात् परिभ्रंशः राज्यपरिभ्रंशः इति यत् व्यसनं तस्य व्यसनस्य सङ्कटस्य यद् श्वशुरस्य आश्रयणं श्वशुराश्रयणं सा चूला परिसीमा शिखरम् अस्ति।।२६२।।

सरलार्थ :- यूतेन लघुभ्रातुः कूबरात् राज्यस्य परिभ्रंशः व्यसनम्। तत्र यद् श्वशुराश्रयणं सा तु तस्य सङ्कटस्य परिसीमा अस्ति। भ्रातुः सकाशात् राज्यभ्रंशापेक्षया श्वशुराश्रयणं व्यसनस्य पराकाष्ठा वर्तते। इत्यर्थः।।२६२।।

ગુજરાતી :- જુગાર રમવા વડે નાનાભાઈથી રાજ્ય પરથી ભ્રષ્ટ થવારૂપ એક તો જે મહાકષ્ટ થયું છે, તેમાં પણ હવે જે શ્વસુરને ઘરે જઈ તેનો આશ્રય લેવો, એ તો કષ્ટ પર શિખાસમાન જાણવું. ।।२६२।।

हिन्दी :- जुआ खेलते खेलते छोटेभाई द्वारा राज्य से भ्रष्ट होना यह तो महाकष्ट हुआ ही, उसमें भी अब जो ससुर के घर जाकर आश्रय लेना, यह तो कष्ट पर शिखासमान है ।।२६२।।

मराठी :- यूतात लहान भावाकडून राज्यभ्रष्ट होण्याच्या संकटापेक्षा सासऱ्याच्या घरी आश्रय करण्याचा प्रसंग संकटाची पराकाष्ठा असून महान संकट आहे.।।२६२।।

English :- King Nal thought it was more destressing to even think of taking help and support from a father-in-law, which seemed like pinnacles crashing down on his problem. This was a more tormenting thought than just losing a kingdom to a younger brother in a game of dice.

स्याद्येषां व्यसनार्तानां, नराणां श्वशुरो गतिः ॥
नूनं निर्गतिकास्तेऽत्र, पशवो नररूपिणः ॥२६३॥

अन्वय :- एषां व्यसनार्तानां नराणां श्वशुरः गतिः स्यात् । नूनं निर्गतिकाः ते अत्र नररूपिणः पशवः सन्ति ॥२६३॥

विवरणम् :- *एषां, व्यसनैः सङ्कटैः आर्ता व्यसनार्ताः तेषां व्यसनार्तानां नराणां मनुष्याणां श्वशुरः गतिः आश्रयः स्यात् । नूनं निर्गता गतिः येषां ते निर्गतिकाः अगतिकाः निराश्रयाः ते अत्र नरः रूपं येषां ते नररूपिणः पशवः सन्ति ॥२६३॥*

सरलार्थ :- एषां सङ्कटैः पीडितानां मनुष्याणां श्वशुरः आश्रयः स्यात् नूनं निराश्रयाः ते अत्र नररूपिणः पशवः सन्ति । संकटैः पीडिता ये नराःश्वशुरमाश्रयन्ति। नूनं ते नररूपिणः पशवः सन्ति॥२६३॥

ગુજરાતી :- દુઃખથી પીડિત થયેલા જે પુરૂષો (પોતાના) સસરાનો આધાર લે છે તેઓને ખરેખર અહીં હાલબેહાલ થયેલા મનુષ્યનું રુપ ધરનારા પશુઓ જાણવા. ॥૨૬૩॥

हिन्दी :- जो दुःखी आदमी खुद के श्वसुर का आधार लेते है, वे सचमुच हालबेहाल हुए मनुष्य का रुप धारण करनेवाला पशु है ॥२६३॥

मराठी :- दुःखांने पीडित झालेले जे पुरुष स्वतःच्या सासऱ्याचा आधार येतात, ते खरोखरच मनुष्याचे रूप धारण करणारे पशूच आहेत. ॥२६३॥

English :- The man who takes the help of his father-in-law when he is in atmost distress, is not considered a man but a beast in the form of a man.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदूर्ध्वं मुखमादाय, हित्वैनां वल्लभामपि।
अज्ञातचर्ययैवाहं, भ्रमाम्येकोऽवधूतवत् ॥२६४॥

अन्वय :- तद् वल्लभाम् अपि हित्वा ऊर्ध्वं मुखम् आदाय अज्ञातचर्ययैव अहम् एकः अवधूतवत् भ्रमामि ॥२६४॥

विवरणम् :- तद् तेन कारणेन वल्लभाम् अपि पत्नीम् अपि हित्वा त्यक्त्वा ऊर्ध्वं मुखं आदाय कृत्वा न ज्ञाता अज्ञाता अज्ञाता चासौ चर्या च अज्ञातचर्या तया अज्ञातचर्यया एव अहम् एकः अवधूतेन-तुल्यं अवधूतवत् योगीवत् भ्रमामि ॥२६४॥

सरलार्थ :- तेन कारणेन पत्नीम् अपि त्यक्त्वा ऊर्ध्वमुखं आदाय अज्ञातचर्ययैव अहम् एकः योगीवत् भ्रमामि ॥२६४॥

ગુજરાતી :- માટે હવે આ સ્ત્રીને પણ તજીને, ઉંચું મુખ રાખી, કોઈ ન ઓળખી શકે એવો વેષબદલો કરીને એકલો જ હું અવધુત જોગીની પેઠે (પૃથ્વી પર) ભ્રમણ કરું. ॥२६४॥

हिन्दी :- इसलिये अब इस स्त्री को छोडकर ऊंचा मुँह कर, कोई भी पहचान न पाये ऐसा वेष परिधान कर मैं अकेला ही इस पृथ्वी पर भ्रमण करूंगा ॥२६४॥

मराठी :- म्हणून आता मी या स्त्रीला पण सोडून उंच मुख करून, कोणी पण ओळखणार नाही असा पोषाख परिधान करून मी एकटाच अवधूताप्रमाणे या पृथ्वीवर फिरत राहीन. ॥२६४॥

English :- Then he decides to leave Damyanti and with a feeling of self-respsect and disguising himself he shall wonder about alone without identifing himself.

अपायः कोऽपि नैवास्याः, स्वयं शीलानुभावतः ॥
शीलं सतीनां वर्मेव, सर्वाङ्गरक्षणक्षमम् ॥२६५॥

अन्वय :- अस्याः स्वयं शीलानुभावतः कोऽपि अपायः न भविष्यति। सतीनां शीलं वर्म कवचम् इव सर्वाङ्गरक्षणक्षमम् अस्ति ॥२६५॥

विवरणम् :- *अस्याः दमयन्त्याः स्वयं शीलस्य चारित्रस्य अनुभावः शीलानुभावः तस्मात् शीलानुभावतः कः अपि अपायः का अपि हानिः न भविष्यति। सतीनां शीलं चारित्रं वर्म इव कवचम् इव सर्वाणि च तानि अङ्गानि च सर्वाङ्गानि सर्वाङ्गानां रक्षणं सर्वाङ्गरक्षणं सर्वाङ्गरक्षणे क्षमं समर्थं सर्वाङ्गरक्षणक्षमम् अस्ति ॥२६५॥*

सरलार्थ :- दमयन्त्याः स्वयं शीलानुभावतः का अपि हानिः न भविष्यति। सतीनां शीलं कवचम् इव सर्वाङ्गरक्षणक्षमम् अस्ति। यथा कवचं सर्वाङ्गरक्षणं करोति। तथा सतीनां शीलकवचं सतीनां सर्वाणि अङ्गानि रक्षति। अतः शीलवत्याः दमयन्त्याः कोऽप्यपायः न भविष्यति॥२६५॥

ગુજરાતી :- વળી આ મહાસતી દમયંતીને તેણીના પોતાના શીલના પ્રભાવથી કંઈ પણ વિઘ્ન થવાનું નથી, કેમ કે સતીઓનું શીલવ્રત, તેણીના સર્વ અંગોનું રક્ષણ કરવામાં સમર્થ એવાં બખ્તરસમાન છે ॥૨૬૫॥

हिन्दी :- फिर ऐसी महासती दमयंती को उस के खुद के शील के प्रभाव से कुछ भी बाधा होनेवाली नही, क्यों कि सतीओं का शीलव्रत उनके सब अंगो का रक्षण करने में समर्थ, ऐसा बख्तरसमान है ॥२६५॥

मराठी :- आणि अशा महासती दमयंतीला तिच्या स्वत:च्या शीलाच्या प्रभावाने काही पण विघ्न येणार नाही कारण की, सतीचे शीलव्रत तिच्या सर्व अंगांचे रक्षण करण्यास समर्थ आहे. ॥२६५॥

English :- Damyanti being a chaste woman can protect herself due to her virtues and amiable nature, as the chaste quality of such a faithful woman can protect all the parts her body.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इदानीं चास्ति सुप्तेयं, श्रमान्निर्भरनिद्रया ॥
तद्यामि परमेतस्या, मत्संव्यानार्धमस्त्यधः ॥२६६॥

अन्वय :- इदानीम् इयं श्रमात् निर्भरनिद्रया सुप्ता अस्ति। तद् यामि। परं मत्संव्यानार्धम् एतस्याः अधः अस्ति ॥२६६॥

विवरणम् :- इदानीम् अधुना इयं दमयन्ती श्रमात् निर्भरा चासौ निद्रा च निर्भरनिद्रा तया निर्भरनिद्रया प्रगाढनिद्रया सुप्ता अस्ति। तद् तस्मात् यामि गच्छामि। परं मम संव्यानं वस्त्रं मत्संव्यानम्। मत्संव्यानस्य अर्धं मत्संव्यानार्धम्। मम परिधानार्धम् एतस्याः दमयन्त्याः शरीरस्य अधः अस्ति॥२६६॥

सरलार्थ :- इदानीम् इयं दमयन्ती श्रमात् प्रगाढनिद्रया सुप्ता अस्ति। तद् गच्छामि। परं मम परिधानार्धम् एतस्याः दमयन्त्याः अधः अस्ति ॥२६६॥

ગુજરાતી :- વળી આ સમયે થાકથી તે ભરનિદ્રામાં સૂતેલી છે, માટે હું ચાલ્યો જાઉં, પરંતુ મારું પહેરવાનું અર્ધું વસ્ત્ર તેણીના શરીર નીચે દબાયેલું છે. ॥२६६॥

हिन्दी :- फिर इस समय वह थकान से भर निंद मे सोई है, इसलिये मैं चला जाऊंगा, लेकिन मेरा आधा वस्त्र उस के शरीर के नीचे दबा हुआ है॥२६६॥

मराठी :- आता थकल्यामुळे दमयन्ती गाढ झोपेत आहे, त्यामुळे मी येथून निघून जातो. परंतु माझे अर्धवस्त्र तिच्या शरीराखाली दबले आहे. ॥२६६॥

English :- He thought that he should leave at once as she is fast asleep as she is tired and weary. But then he thought that his half garment of his body is pressed down under her body.

ततस्तन्निर्दयत्वेन, निर्लूनप्रेमबन्धनः ॥
छिनद्मि पल्लवच्छेदं, संव्यानमसिनाधुना ॥२६७॥

अन्वय :- ततः निर्दयत्वेन निर्लूनप्रेमबन्धनः अहम् अधुना असिना तत् संव्यानं पल्लवच्छेदं छिनद्मि॥२६७॥

विवरणम् :- *ततः तदनन्तरं निर्गता दया यस्मात् स निर्दयः निर्दयस्य भावः निर्दयत्वं तेन निर्दयत्वेन दयारहितत्वेन प्रेम्णः बन्धनानि प्रेमबन्धनानि। निःशेषं लूनानि निर्लूनानि। निर्लूनानि प्रेमबन्धनानि येन सः निर्लूनप्रेमबन्धनः अहम् अधुना असिना खड्गेन तत् संव्यानं तत्परिधानं वस्त्रं पल्लवम् इव पल्लवच्छेदं छिनद्मि॥२६७॥*

सरलार्थ :- तदनन्तरं दयारहितत्वेन निर्लूनप्रेमबन्धन अहम् अधुना असिना तत्परिधानं पल्लवम् इव छिनद्मि। अहं निर्दयो भूत्वा सर्वाणि प्रेमबन्धनानि छित्त्वा अधुना खड्गेन तत्परिधानं छिनद्मि॥२६७॥

ગુજરાતી :- પરંતુ હવે નિર્દયપણાથી જેના પ્રેમનું બંધન તૂટી ગયું છે એવો હું, આ સમયે તલવાર વડે (અર્ધભાગથી) આ વસ્ત્ર ને કાપી નાખું. ॥૨૬૭॥

हिन्दी :- लेकिन अब निदर्य भाव से जिस का प्रेम का बंधन तूट गया है ऐसा मैं इस समय तलवार से इस वस्त्र को काट डालुँ ॥२६७॥

मराठी :- परंतु आता मी निर्दयपणे सर्व प्रेमबंधने तोडून तलवारीने त्या वस्त्राचे तुकडे करतो. ॥२६७॥

English :- But as he was not able to pull out the other half of his garment as she might wake up, so he made his heart strong and keeping aside his emotions, he decides to cut off the garment.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथोचे खड्गमाधत्स्व, स्वन्निधिफलं सखे ॥
किं कृपालुरिवासि त्वम्, यदद्यापि विलंबसे ॥२६८॥

अन्वय :- अथ खड्गम् ऊचे-सखे ! स्वसन्निधिफलम् आधत्स्व । त्वं किं कृपालुः इव असि । यद् अद्यापि विलम्बसे ॥२६८॥

विवरणम् :- अथ अनन्तरं खड्गम् असिम् ऊचे अवोचत् सखे ! मित्र ! स्वस्य सन्निधिः सान्निध्यं समीपता स्वसन्निधिः स्वसन्निधेः फलं स्वसन्निधिफलम् आधत्स्व गृहाण । त्वं किं कृपालुः दयालुः इव असि । यद् अद्यापि अधुना अपि विलम्बसे ॥२६८॥

सरलार्थ :- अथ असिम् अवोचत् सखे ! स्वसन्निधिफलं गृहाण । त्वं किं दयालुः इव असि । यद् अद्यापि विलम्बसे ॥२६८॥

ગુજરાતી :- પછી નલરાજા પોતાની તલવારને કહેવા લાગ્યો કે, અરે મિત્ર ! તારી નજીકમાં રહેલાં ફલનો તું સ્વીકાર કર? તું દયાળુની પેઠે કેમ બેઠો છે? હજુ પણ (આ કાર્ય માટે વિલંબ કર્યા) કેમ કરે છે ? ॥૨૬૮॥

हिन्दी :- फिर नलराजा खुद की तलवार से कहने लगा कि, अरे साथी ! तेरे नजदीक में रखे हुए फल को तू स्वीकार कर? तू इस तरह क्यों बैठा है? और इस कार्य के लिये और भी विलंब क्यों कर रहा है ?॥२६८॥

मराठी :- नंतर नलराजा आपल्या खड्गास म्हणाला- मित्रा! स्वत:च्या सान्निध्याचे फळ धारण कर. तूं काय कृपाळू माणसासारखा आहेस की, अजूनही विलंब करीत आहेस. ॥२६८॥

English :- Then Nal asked his sword (when he finds that he cannot bring himself to do the required work) as to why it is not able to accept the fruit which is close to it.

P.P. Ac. Gunratnasuri M.S.

प्रेमग्रन्थिरपि च्छिन्ना, सदयेनापि मे हृदा ॥
करुणा सख निस्त्रंश, संव्यानच्छेदने ऽपि का ॥२६९॥

अन्वय :- सदयेन अपि मे हृदा प्रेमग्रन्थिः अपि च्छिन्ना। निस्त्रंश! तव संव्यानच्छेदने अपि का करुणा? ॥२६९॥

विवरणम् :- दयया सह वर्तते इति सदयम्, तेन सदयेन सकृपेण अपि मे मम हृदा मनसा प्रेम्णः ग्रन्थिः प्रेमग्रन्थिः अपि च्छिन्ना अच्छिद्यत। निस्त्रंश! निर्दय! असे कृपाण! तव संव्यानस्यच्छेदनं संव्यानच्छेदनं तस्मिन् संव्यानच्छेदने वस्त्रछेदने अपि का करुणा? ॥२६९॥

सरलार्थ :- सकृपेण अपि मम हृदा प्रेमग्रन्थिः अपि अच्छिद्यत। तद् हे निर्दय कृपाण! तव वस्त्रच्छेदने का करुणा? शीघ्रं वस्त्रं छेदय॥२६९॥

ગુજરાતી :- દયાળુ એવા મારા હૃદયે જ્યારે પ્રેમની ગ્રંથિને પણ છેદી નાખી, ત્યારે અરે નિર્દય કૃપાણ ! તને આ વસ્ત્ર છેદવામાં શાની કરુણા આવે છે? ॥૨૬૯॥

हिन्दी :- दयालु हृदयवाले मैने प्रेम की ग्रन्थि को भी छेद डाला, तब अभि हे निर्दय कृपाण ! तुझे इस वस्त्र को छेदने मे करुणा क्यों आ रही है? ॥२६९॥

मराठी :- माझ्या दयाळु अन्तःकरणाने प्रेमाची ग्रन्थी छेदून टाकली. पण हे निर्दय खड्गा! तुला हें वस्त्र छेदण्यास कसली दया येत आहे. ॥२६९॥

English :- Then he wonders as to why when he had made his heart, harsh and has decided to break the ganglion of love then why does his heart still shiver to cut off the garment.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

आ ज्ञातं हस्तसाहाय्यं निस्त्रिंशोऽपि समीहते।
प्रसार्य दक्षिणं हस्तं कृपार्द्रोऽथ तमूचिवान्॥२७०॥

अन्वय :- आः ज्ञातम्। निस्त्रिंशः अपि हस्तसाहाय्यं समीहते। अथ कृपार्द्रः स दक्षिणं हस्तं प्रसार्य तमूचिवान् ॥२७०॥

विवरणम् :- *आः ज्ञातम्। इति स्मरणे। निस्त्रिंशः क्रूरोऽपि निर्दयोऽपि निस्त्रिंशः खड्गः, हस्तस्य साहाय्यं हस्तसाहाय्यं समीहते इच्छति॥ इति कृपयाऽऽर्द्रः कृपार्द्रो नलो दक्षिणं हस्तं करं प्रसार्य तं दक्षिणकरमूचिवान् उवाचा॥२७०॥*

सरलार्थ :- - आः ज्ञातम्। निर्दयः खड्गोऽपि हस्तसाहाय्यमिच्छति। इति दक्षिणं हस्तं प्रसार्य कृपार्द्रो नलस्तमवोचत् ॥२७०॥

ગુજરાતી :- અરે! હવે માલુમ પડયું !આ નિર્દય તલવાર પણ હાથની મદદની ઈચ્છા કરે છે. (એમ વિચારી) જમણો હાથ લાંબો કરીને આર્દ્ર હૃદયવાળો નલરાજા તે હાથને કહેવા લાગ્યો કે, ॥૨૭૦॥

हिन्दी :- अरे! अब मालुम हुआ कि इस निर्दय तलवार को भी हाथ की मदद लगती है। ऐसा विचार कर दांया हाथ बढाकर कृपा से आर्द्र नलराजा उस हाथ से कहने लगा कि, ॥२७०॥

मराठी :- हां! आता माहित झालें की, वा निर्दय तलवारीला पण हाताच्या मदतींची जरूर असते. असा विचार करून उजवा हात लांब करून कृपेने आर्द्र झालेला नलराजा त्या हाताला असें म्हणाला. ॥२७०॥

English :- He then says that the cruel sword has to still take the help of the hand. He then puts forward his right hand and spoke to it with must feelings of mercy.

अयि दक्षिणहस्त त्वं, दक्षिणोऽसि वृथा कृतः ॥
निर्दक्षिण्यशिरोरत्नं, यदकृत्यं चिकीर्षसि ॥२७१॥

अन्वय :- अयि दक्षिणहस्त ! त्वं दक्षिणो वृथा कृतः असि । यदकृत्यं चिकीर्षसि निर्दाक्षिण्यशिरोरत्नम् असि ॥२७१॥

विवरणम् :- अयि हे दक्षिणश्चासौ हस्तश्च दक्षिणहस्तः तत्सम्बुध्दौ हे दक्षिणहस्त ! त्वं दक्षिणः उदारः सरलः वृथा व्यर्थं कृतः असि । यद् अकृत्यम् अकार्यं कर्तुम् इच्छसि चिकीर्षसि । दक्षिणस्य भावः दाक्षिण्यम्। निर्गतं दाक्षिण्यं येषां ते निर्दाक्षिण्याः । निर्दाक्षिण्यानां शिरसि रत्नं शिरोरत्नं निर्दाक्षिण्यशिरोरत्नमसि।२७१॥

सरलार्थ :- हे दक्षिणहस्त त्वं दक्षिणः व्यर्थं कृतः असि । यद् अकार्यम् चिकीर्षसि निर्दयशिरोरत्नम् असि॥२७१॥

ગુજરાતી :- અરે જમણા હાથ ! તું ડહાપણવાળો છે, એવો ઈલ્કાબ તને ખોટો જ મળેલો છે કેમ કે તું જ્યારે આવું અકાર્ય કરવાની ઈચ્છા કરે છે, ત્યારે તો તુ દક્ષતા વિનાના નિર્દયોમાં મુકુટસમાન છે, (અથાત્ નિદર્ય નો સરદાર છે.) ॥૨૭૧॥

हिन्दी :- अरे दांया हाथ ! तु बहुत समजदार हैं, ऐसा इल्काब तुझे फुकट में ही मिला है, क्यों कि जब ऐस अकार्य करने की इच्छा करता है तब तो तू दाक्षिण्य बिना के निर्दयों में मुकुटसमान है, (याने तु निर्दयों का सरदार है)॥२७१॥

मराठी :- हे दक्षिण (उजव्या) हाता! तुला विनाकारणच दक्षिण (उदार) बनविले आहे. कारण तूं अकार्य करण्याची इच्छा करीत आहेस. म्हणून तू दाक्षिण्यरहित पुरूषांचा शिरोमणी आहेस.॥२७१॥

English :- When Nal was still fighting between love and being unkind, and still couldn't decide whether to cut the garment or not, he asks his right hand as to why, when it is so clever and understanding and has taken the harsh decision of being unkind then it surely is the most harsh and crown of the crueliest.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यदिवा द्यूतकारस्य, न नामाकृत्यमस्ति ते ॥
तद् गृहाण कृपाणं त्वं, हुं विधेहि द्विधांशुकम् ॥२७२॥

अन्वय :- यदिवा द्यूतकारस्य ते न नामाकृत्यमस्ति। तद् त्वं कृपाणं गृहाण। हुं अंशुकं द्विधा विधेहि ॥२७२॥

विवरणम् :- यदिवा द्यूतं करोति इति द्यूतकारः तस्य द्यूतकारस्य ते तव न नाम कर्तुम् अयोग्यम् अकृत्यम् किमपि अस्ति। तद् तेन कारणेन त्वं कृपाणं खड्गं गृहाण। हुम् अंशुकं वस्त्रं द्विधा विधेहि छिन्धि ॥२७२॥

सरलार्थ :- यदिवा द्यूतकारस्य तव न नाम अकृत्यम् अस्ति। तेन त्वं असिं गृहाण। हुं वस्त्रं छिन्धि ॥२७२॥

गुजराती :- અથવા જુગાર રમનારા એવા તને ખરેખર કંઈ પણ અકાર્ય છે જ નહીં, માટે તુ ખડગ ગ્રહણ કર? અને વસ્ત્રના બે ટુકડા કરી નાખ? ॥२७२॥

हिन्दी :- जुआ खेलनेवाले के लिये यह कुछ भी अकार्य नही है, इसलिये तु खडग ग्रहण कर और इस वस्त्र के दो टुकडे कर डाल ॥२७२॥

मराठी :- जुगार खेळणाऱ्या तुला जर कोणतेही अकार्य नाही. तर तू खड्ग ग्रहण कर आणि या वस्त्राचे दोन तुकडे करून टाक?॥२७२॥

English :- He then says that there is nothing improper for a man who gambles. So he decides to take a good hold of the sword and make two pieces of the garment.

तत तथा कृते तेनांशुके भैम्याः पटाञ्चले ॥
वर्णान् स्वशोणितेनैतां - लिलेख निषधाधिपः ॥२७३॥

अन्वय :- ततः तेन अंशुके तथाकृते निषधाधिपः स्वशोणितेन भैम्याः पटाञ्चले एतान् वर्णान् लिलेख ॥२७३॥

विवरणम् :- ततः तदनन्तरं तेन अंशुके वस्त्रे तथाकृते च्छिन्ने सति निषधानाम् अधिपः निषधाधिपः नलः स्वस्य शोणितं स्वशोणितं तेन स्वशोणितेन स्वरक्तेन भीमस्य अपत्यं स्त्री भैमी तस्याः भैम्याः दमयन्त्याः पटस्य अञ्चलः पट्टाञ्चलः तस्मिन् पट्टाञ्चले एतान् वर्णान् लिलेख अलिखत्॥२७३॥

सरलार्थ :- तदनन्तरं तेन खड्गेन अंशुके छिन्ने सति निषधाधिपनलः स्वरक्तेन दमयन्त्याः वस्त्राञ्चले एतान् वर्णान् अक्षराणि लिलेख॥२७३॥

ગુજરાતી :- પછી તે ખડ્ગે વસ્ત્રને કાપી નાખ્યા બાદ, નિષધદેશના અધિપતિ એવા નલરાજાએ પોતાના રૂધિર વડે દમયંતીના વસ્ત્રને છેડે આવી રીતના અક્ષર લખ્યા -॥૨૭૩॥

हिन्दी :- फिर वे वस्त्र को काटने के बाद निषध देश के अधिपती ऐसे नलराजाने, खुद के खुन से दमयंती के वस्त्र पर इस प्रकार अक्षर लिखे - ॥२७३॥

मराठी :- नंतर त्या खड्गाने वस्त्र छेदल्यावर नलराजाने आपल्या रक्तांने दमयन्तीच्या पदरावर अशी अक्षरें लिहिली. ॥२७३॥

English :- Then the monarch of Nishad cuts off the garment and with his own blood writes on the garment of Damyanti.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यात्यथवाऽसौ विदर्भेषु, दक्षिणस्यामितो वटात् ।।
कौशलेषूत्तरस्यां तु, द्वयोरन्यतरेण तत् ।।२७४।।

अन्वय :- इतः वटात् दक्षिणस्याम् असौ अध्वा विदर्भेषु याति । उतरस्यां असौ अध्वा कौशलेषु याति । तत् द्वयोः अन्तरेण - -।।२७४।।

विवरणम् :- इतः अस्मात् वटात् वृक्षात् दक्षिणस्याम् असौ अध्वा मार्गः विदर्भदेशेषु याति गच्छति । उत्तरस्यां असौ मार्गः कौशलेषु देशेषु याति गच्छति । तत् द्वयोः अन्तरेण मध्ये - - ।।२७४।।

सरलार्थ :- अस्मात् वटवृक्षात् दक्षिणस्याम् असौ मार्गः विदर्भदेशेषु गच्छति। उत्तररस्यां असौ मार्गः कौशलदेशेषु गच्छति तत् द्वयोः मध्ये - -।।२७४।।

ગુજરાતી :- આ વડથી દક્ષિણ દિશા તરફનો માર્ગ વિદર્ભદિશ તરફ જાય છે તથા ઉત્તર દિશા તરફનો માર્ગ કોશલદેશ તરફ જાય છે, માટે તે બન્ને માર્ગોમાંથી એક માર્ગે -।।२७४।।

हिन्दी :- इस वटवृक्ष से दक्षिण दिशा का मार्ग विदर्भ देश की ओर जाता है, और उत्तर दिशा का मार्ग कोशल देश की ओर जाता है । इसलिये उस दोनो मार्गमें से एक मार्ग -।।२७४।।

मराठी :- या वटवृक्षाच्या दक्षिणकडील हा मार्ग विदर्भदेशाकडे जातो, आणि उत्तरेकडील मार्ग कोशलदेशाकडे जातो, मात्र या दोन्ही मार्गामधून एका मार्गाने-।।२७४।।

English :- He writes that, to the south of the oak tree lies the road towards the state of Vidharba and towards its north lies the state of Koshal. So he asks her to take one of the two roads.

यथारुचि व्रजेद्धाम्नि, पैतृके श्वाशुरेऽथवा ॥
नासन्नोऽपि भविष्यामि, स्वजनानामहं पुनः ॥युग्मम् ॥२७५॥

अन्वय :- यथारुचि पैतृके धाम्नि व्रजेत् वा अथवा श्वाशुरे धाम्नि व्रजेत् पुनः अहं स्वजनानाम् आसन्नः अपि न भविष्यामि ॥२७५॥

विवरणम् :- रुचिमनतिक्रम्य यथारुचि यथेच्छं पितुः आगतं पैतृकं तस्मिन् पैतृके धाम्नि गृहे वेश्मनि व्रजेत् गच्छेत् । अथवा श्वशुरस्येदं श्वाशुरं तस्मिन् श्वाशुरे धाम्नि गृहे व्रजेत् गच्छेत् अहं पुनः स्वस्य जनाः स्वजनाः तेषां स्वजनानाम् आसन्नः समीपवर्ती अपि न भविष्यामि॥२७५॥

सरलार्थ :- यथारुचि पैतृके गृहे गच्छेत् अथवा श्वशुरे वेश्मनि गच्छेत् अहं पुनः स्वजनानाम् समीपम् अपि न भविष्यामि ॥२७५॥

ગુજરાતી :- જેમ તને રૂચે તેમ કાં તો તું પિયર જજે અથવા સસરાને ઘેર જજે. હું તો હવે તે સગાંસંબધીઓની નજીક પણ આવવાનો નથી. ॥२७५॥

हिन्दी :- जैसा तुम्हे ठीक लगे वैसे एक तो मायके जाना या फिर ससुराल जाना। अब तो मैं इस सगे संबंधियों के नजदीक तक नहीं आऊंगा ॥२७५॥

मराठी :- जसे तुला रुचेल त्याप्रमाणे तू एक तर माहेरी जा किंवा सासरी जा. मी मात्र आता नातलगांच्या जवळपास कोठेच असणार नाही. ॥२७५॥

English :- He asks her to decide which road she should take whether to her in-laws or to her parents and he adds that he will never ever come closer to any of the relatives.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

त्वामुद्वोढुं तदा तत्र, तादृगर्द्धिर्गतोऽस्म्यहम् ॥
ईदृग्देशः प्रिये सोऽहं, गच्छंस्तत्र त्रपे न किम् ॥२७६॥

अन्वय :- हे प्रिये ! तदा तत्र त्वां वोढुं तादृगर्द्धिः अहं गतः अस्मि । सः अहं ईदृग्देशः गच्छन् न त्रपे किम् ॥२७६॥

विवरणम् :- *हे प्रिये ! तदा विवाहात्पूर्वं तत्र तस्मिन् नगरे त्वां वोढुं परिणेतुं सा इव दृश्यते इति तादृशी - तादृशी ऋद्धिः यस्य सः तादृगर्द्धिः तादृग्वैभवसम्पन्नः अहं गतः अस्मि । सः अहम् इयम् इव दृश्यते ईदृशी ईदृशी दशा यस्य सः ईदृग्दशः इत्थं दुरवस्थः गच्छन् न त्रपे किं न लज्जे किं न जिह्रेमि किम् ॥२७६॥*

सरलार्थ :- हे प्रिये । तदा विवाहात् पूर्वं तादृग्वैभवसम्पन्नः अहं त्वां परिणेतुं तस्मिन् नगरे गतः आसम् । सः अहम् इदानीमीदृश्यां दुरवस्थायां तत्र गच्छन् न लज्जे किम्। ॥२७६॥

ગુજરાતી :- હે પ્રિયે ! તે સમયે તને પરણવા માટે હું કેવા પ્રકારની સમૃદ્ધિ સહિત ગયો હતો ! હવે આવી દશાવાળો થઈને ત્યાં જતાં હું શું શરમાઉં નહીં? ॥૨૭૬॥

हिन्दी :- हे प्रिये ! उस वक्त मैं तुझ से शादी करने के लिए कैसी समृद्धि से आया था! अब ऐसी दशा में क्या शरमाउंगा नहीं? ॥२७६॥

मराठी :- हे प्रिये! त्या वेळेला मी तुझ्याशी लग्न करण्यासाठी मोठया समृध्दिसहित त्या नगरात आलो होतो, आता या वाईट स्थितीत असतांना मला तेथे जाण्याची लाज वाटणार नाही काय? ॥२७६॥

English :- Then King Nal asked her addressing her as ""O Love" that when he had come for the swayamvar, he had come with great pomp and style and with profuse prosperity and he adds asking her if it will be proper to go there now in this state.

इति वर्णान् लिखित्वाथ, बभाषे खेदविह्वलः ॥
रुदन्निःशब्दमुद्बाष्प-लोचनो गद्गदाक्षरम्॥२७७॥

अन्वय :- इति वर्णान् लिखित्वा अथ खेदविह्वलः उद्बाष्पलोचनः रुदन् निःशब्दम् गद्गदाक्षरं बभाषे ॥

विवरणम् :- *इति एवं वर्णान् शब्दान् लिखित्वा आलिख्य अथ खेदेन विह्वलः खेदविह्वलः उद्गतानि बाष्पाणि अश्रूणि ययोः ते उद्बाष्पे। उद्बाष्पे लोचने यस्य सः उद्बाष्पलोचनः साश्रुलोचनः रुदन् सन् निर्गताः शब्दाः यस्मिन् कर्मणि यथा स्यात् तथा निःशब्दम् गदगदानि अक्षराणि यस्मिन् कर्मणि यथा स्यात् तथा गद्गदाक्षरं बभाषे अभाषत ॥२७७॥*

सरलार्थ :- एवं शब्दान् लिखित्वा अथ खेदविह्वलः साश्रुलोचनः रुदन् सन् निःशब्दं गद्गदाक्षरम् अभाषत ॥२७७॥

ગુજરાતી :- એવા અક્ષરો લખીને ખેદથી ભરાયેલો નલરાજા, મુખથી બોલ્યા વિના, આંખોમાં આંસુઓ લાવીને ગદ્ગદિત કંઠે રડવા લાગ્યો, ॥૨૭૭॥

हिन्दी :- इस प्रकार के अक्षर लिख कर शोक से व्याकुल नलराजा, मुख से बोले बिना, आँखों में आंसु लाकर गद्गदित कंठ से रोने लगे ॥२७७॥

मराठी :- अशा प्रकारची अक्षरे दमयन्तीच्या पदरावर लिहून दुःखाने व्याकुळ झालेला नलराजा डोळयात अश्रू आणून हुंदके देत देत रहू लागला. ॥२७७॥

English :- Then after having written thus, and feeling afraid of dolour and melancholy, there were tears in his eyes and was affected with tragic emotions.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यामो वयं सखे चूत, भ्रातः केसर हेऽर्जुन !।
ममाकार्यविधायित्वं, यूयं वित्थ स्म मा हृदि ॥२७८॥

अन्वय :- हे सखे चूत। वयं यामः। हे भ्रातः केसर! हे अर्जुन। मम अकार्यविधायित्वं यूयं हृदि मा वित्थ स्म ॥२७८॥

विवरणम् :- हे सखे! मित्र! चूत आम्रवृक्ष ! वयं यामः गच्छामः। हे भ्रातः बन्धो ! केसर ! हे अर्जुन ! मम कर्तुम् अयोग्यम् अकार्यम् अकार्यं विदधातीत्येवंशीलः अकार्यविधायी। अकार्यविधायिनः भावः अकार्यविधायित्वं अयोग्यम् आचरणं यूयं हृदि मनसि मा वित्थ स्म जानीथ स्म ॥२७८॥

सरलार्थ :- हे सखे! आम्रवृक्ष! वयं गच्छामः हे भ्रातः केसर। हे अर्जुन मम अयोग्याचरणं - यूयं हृदि मा जानीथ स्म ॥२७८॥

ગુજરાતી :- હે મિત્રસરખા આમ્રવૃક્ષ ! હે ભાઈસરખા કેસરવૃક્ષ ! તથા હે અર્જુનવૃક્ષ ! મારા આ અકાર્યના આચરણને તમો તમારાં હૃદયમાં ધારણ કરશો નહીં. ॥૨૭૮॥

हिन्दी :- हे साथी समान आम्रवृक्ष! हे भाई केसरवृक्ष ! और हे अर्जुनवृक्ष ! मेरे इस अयोग्य आचरण को तुम तुम्हारे हृदय में धारण मत करना ॥२७८॥

मराठी :- हे मित्रासारख्या आम्रवृक्षा! हे भावासारख्या केसरवृक्षा! हे अर्जुनवृक्षा! माझे अयोग्य आचरण (वागणे) तुम्ही मनात ठेवू नका. ॥२७८॥

English :- Then he spoke to the mango tree as a friend, to the saffron tree as a brother and to the Arjun tree, asking them not to take it to heart, for doing such improper thing, of leaving Damyanti.

क्व कूबरस्य द्यूतेच्छा, नलस्याक्षैर्जयः क्व च ॥
क्व वैदर्भ्याः परित्यागः, सर्वाप्येषा विधेः कृतिः ॥२७९॥

अन्वय :- क्व कूबरस्य द्यूतेच्छा क्व च अक्षैः नलस्य जयः । क्व वैदर्भ्याः परित्यागः एषा सर्वा अपि विधेः कृतिः ॥२७९॥

विवरणम् :- क्व कूबरस्य द्यूतस्य इच्छा द्यूतेच्छा । क्व च अक्षैः पाशैः नलस्य जयः क्व विदर्भाणाम् ईश्वरः वैदर्भः वैदर्भस्य अपत्यं स्त्री वैदर्भी तस्याः वैदर्भ्याः दमयन्त्याः परित्यागः । एषा सर्वा अपि विधेर्दुर्भाग्यस्य कृतिः ॥२७९॥

सरलार्थ :- क्व कूबरस्य द्यूतेच्छा। क्व च अक्षैः नलस्य जयः । क्व दमयन्त्याः परित्यागः । एषा सर्वा अपि दुर्भाग्यस्य कृतिः अस्ति॥२७९॥

ગુજરાતી :- ક્યાં કૂબેરને જુગાર રમવાની ઇચ્છા! ક્યાં પાસઓ વડે તેનું નલને જીતવુ અને ક્યાં દમયંતીનો ત્યાગ ! અરેરે આ સઘળું વિધાતાનું (વિપરીત કાર્ય છે.) ॥૨૭૯॥

हिन्दी :- कहाँ कूबेर को जुआ खेलने की इच्छा? कहाँ पासों से नल को जीतना? और कहाँ दमयंती का त्याग? अरेरे ! यह सब विधाता का (विपरीत) कार्य है ॥२७९॥

मराठी :- कूबेराला यूत खेळण्याची इच्छा होणे. फासे टाकून नलराजाला जिंकणे आणि नलराजाने दमयन्तीचा त्याग करणे. हा सर्व दुर्भाग्याचा खेळ आहे. ॥२७९॥

English :- King Nal says that its the work of the almighty creator for having made Kubar to gamble, and to let him win and to sacrifice Damyanti.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्युक्त्वालोक्य वक्त्राब्जं, देव्याः साश्रु व्यचिन्तयत् ॥
अपश्यद्यां न सूर्योऽपि, शङ्कयेव पुरा मम ॥२८०॥

अन्वय :- इति उक्त्वा देव्याः वक्त्राब्जम् आलोक्य साश्रु अचिन्तयत्। पुरा सूर्यः अपि मम शङ्कया इव यां न अपश्यत् ॥२८०॥

विवरणम् :- इति एवं उक्त्वा भणित्वा देव्याः दमयन्त्याः वक्त्रम् एव अब्जं वक्त्राब्जं मुखकमलम् आलोक्य निरीक्ष्य अश्रुभिः सह वर्तते इति साश्रु व्यचिन्तयत् व्यचारयत्। पुरा पूर्वं सूर्यः अपि दिवाकरः अपि मम शङ्कया इव यां दमयन्तीं न अपश्यत् न ददर्श ॥२८०॥

सरलार्थ :- एवं भणित्वा देव्या दमयन्त्याः मुखकमलं निरीक्ष्य साश्रु व्यचारयत्। पूर्वं सूर्यः अपि मम शङ्कया इव दमयन्तीं न अपश्यत् ॥२८०॥

ગુજરાતી :- એમ કહી દમયંતીના મુખકમલ તરફ જોઈને, આંખોમાં આંસુ લાવી નલરાજા વિચારવા લાગ્યો કે, જાણે પૂર્વે મારી શંકાથી (મારાથી ડરીને) જેને સૂર્ય પણ જોઈ શક્યો નથી, ॥૨૮૦॥

हिन्दी :- ऐसा कह कर और दमयंती के मुख की ओर देख कर, आँखो में आंसु लाकर नलराजा विचार करने लगा कि, पहले मेरी शंका से (मुझसे डरकर) जिस को सूर्य ने भी देखा नही है ॥२८०॥

मराठी :- असे म्हणून आणि दमयंतीच्या मुख कमलाकडे पाहून, डोळ्यात अश्रू आणून नलराजा विचार करू लागला की, पूर्वी माझ्या भीतीनेच जणू सूर्यसुद्धा पाहू शकत नव्हता. ॥२८०॥

English :- So saying thus, he sees the soft face of Damyanti and bringing tears in his eyes, he wondered if the sun, having understood, that he will be leaving Damyanti left off from the east and set itself in anger in the west.

क्षुत्क्षामाङ्गीविशरणा, प्रावृतैकपटाम्बरा ॥
वनभूमौ हहा सेयं, शेते भीमसुताधुना ॥२८१॥

अन्वय :- हहा सा इयं भीमसुता क्षुत्क्षामाङ्गी विशरणा प्रावृतैकपटाम्बरा अधुना बनभूमौ शेते ॥२८१॥

विवरणम् :- *हहा खेदे सा इयं भीमस्य सुता तनया भीमसुता दमयन्ती क्षुधा क्षामं क्षुत्क्षामं क्षुत्क्षामम् अङ्गं यस्याः सा क्षुत्क्षामाङ्गी विगतं शरणं रक्षणं यस्याः सा विगतशरणा अशरणा एकं च तत् पटाम्बरं च एकपटाम्बरं प्रावृतं एकपटाम्बरं यया सा प्रावृतैकपटाम्बरा, एकवस्त्रधरा अधुना इदानीं वनस्य भूमिः वनभूमिः तस्यां वनभूमौ शेते स्वपिति ॥२८१॥*

सरलार्थ :- हहा! सा इयं भीमसुता दमयन्ती क्षुत्क्षामाङ्गी अशरणा एकवस्त्रधरा अधुना वनभूमौ स्वपिति ॥२८१॥

गुजराती :- **તે આ દમયંતી, અરેરે ! ક્ષુધાથી ક્ષીણ શરીરવાળી, તથા પહેરેલા ફક્ત એક જ એકવડાં વસ્ત્રવાળી આ વખતે આવી (ભયંકર) જંગલની ભૂમિ પર સૂતી છે! ॥૨૮૧॥**

हिन्दी :- ऐसी वह दमयंती, अरेरे! क्षुधा से क्षीण शरीरवाली, सिर्फ एक ही वस्त्र में और थकी हुई इस भयंकर जंगल की भूमि पर सोई हुई है ॥२८१॥

मराठी :- अरेरे! ती ही भुकेने क्षीण शरीर झालेली जिचे रक्षण करणारा कोणीही नाही. एक वस्त्र नेसलेली दमयन्ती आतां वनातील जमिनीवर झोपली आहे. ॥२८१॥

English :- So, he says that, this Damyanti who is famished with hunger and who has turned feeble and effete due to exhaust and weariness, is here lying on the ground with just one garment covering her in this deadly and hazardous jungle.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इति ध्यात्वावदत् कर्म - चण्डालः सैष नैषधिः ॥
याति देवि कठोरात्मा वज्रेणेव विनिर्मितः ॥२८२॥

अन्वय :- इति ध्यात्वा अवदत्-हे देवि! सैष कर्मचण्डालः नैषधिः वज्रेण इव निर्मितः कठोरात्मा याति ॥२८२॥

विवरणम् :- इति एवं ध्यात्वा विचार्य अवदत् उवाद अवादीत्-हे देवि ! स एषः कर्मणा चण्डालः कर्मचण्डालः निषधस्य अपत्यं पुमान् नैषधिः नलः वज्रेण इव निर्मितः रचितः कठोरः निष्ठुरः आत्मा यस्य सः कठोरात्मा याति गच्छति॥२८२॥

सरलार्थ :- एवं विचार्य अवदत् हे देवि! सैष कर्मचण्डालः नैषधिः नलः वज्रेण इव निर्मितः कठोरात्मा गच्छति ॥२८२॥

ગુજરાતી :- એમ વિચારીને (મનમાં) કહેવા લાગ્યો કે, હે દેવી ! તેં આ કર્મચંડાલ નૈષધપતિ નલરાજાને જાણે વજથી ઘડ્યો હોય નહીં ! એમ કઠોર હૃદયવાળો બની ચાલ્યો જાય છે. ॥૨૮૨॥

हिन्दी :- ऐसा विचार करते हुए विधाता से कहते है कि, हे देवी ! यह कर्मचण्डाल निषधपुत्र नलराजा मानो पत्थर का बना हो! ऐसा कठोर हृदयवाला होता जा रहा है॥२८२॥

मराठी :- असा विचार करून नलराजा म्हणाला- हे देवि! हा कर्मचांडाल निषधाधिपति नलराजा जणू वज्रानेच घडविला आहे. तो अतिशय कठोर निर्दय बनून जात आहे. ॥२८२॥

English :- So Nal addressing himself as a scavenger who is the cheiftain of Naushad, takes himself of being a man of iron who is heartless and walks off with a heavy heart of memories.

पदानि कतिचिद् गत्वा स्वं प्रत्यूचेऽभ्यसूयया ॥
आः पाप श्वपचाधीश, नल स्वकुलपांशन ॥२८३॥

अन्वय :- कतिचिद् पदानि गत्वा अभ्यसूयया स्वं प्रति ऊचे-आः पाप श्वपचाधीश स्वकुलपांशन नल! ॥

विवरणम् :- *कतिचिद् पदानि गत्वा व्रजित्वा अभ्यसूयया असूयया ईर्ष्यया स्वं प्रति ऊचे अवोचत् - आः पाप ! श्वानं पचन्ति इति श्वपचाः श्वपचानाम् अधीशः श्वपचाधीशः, स्वस्य कुलं स्वकुलं स्वकुलस्य पांशनः कलङ्कः स्वकुलपांशनः तत्सम्बुध्दौ हे स्वकुलपांशन स्वकुलकलङ्क नल! ॥२८३॥*

संस्कृतार्थ :- कतिचित् कानिचित् पदानि गत्वा ईर्ष्यया स्वं प्रति अवोचत् - आः पाप ! चण्डालाधीश ! स्वकुलकलंक ! नल ॥२८३॥

गुजराती :- પછી કેટલાંક પગલા આગળ જઈને, નલરાજા તિરસ્કારથી પોતાના આત્માને કહેવા લાગ્યા કે, અરે પાપી ! અરે ચાંડાલ શિરોમણિ ! અરે કુલકલંક નલ ! ॥૨૮૩॥

हिन्दी :- फिर कुछ कदम आगे चलकर नलराजा तिरस्कार से अपनी आत्मा से कहता है कि अरे पापी! चांडाल शिरोमणि! अरे कुलकलंक नला! ॥२८३॥

मराठी :- नंतर काही पावले पुढे चालून तिटकाऱ्याने स्वत:लाच म्हणाला- अरे पाप्या ! चाण्डाल शिरोमणे ! कुलकलंक नला! ॥२८३॥

English :- After taking a few steps and condemning himself tells his soul that he is a sinner and a diadem who is now an untouchable for he has degraded his family's pedigree.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एकाकिनीमिमां भर्तृ - रक्तां भक्तां महासतीम् ॥
वने सन्त्यज्य निर्यासि, हहा विश्वस्तवञ्चक ॥ युग्मम् ॥२८४॥

अन्वय :- हहा विश्वस्तवञ्चक भर्तृरक्तां भक्तां महासतीम् एकाकिनीम् इमां वने सन्त्यज्य निर्यासि ॥२८४॥

विवरणम् :- हहा! विश्वस्तस्य वञ्चक: विश्वस्तवञ्चक: तत्सम्बुद्धौ हे विश्वस्तवञ्चक! भर्तरि रक्ता भर्तृरक्ता तां भर्तृरक्तां पत्यनुरागिणीं भक्तां भजनशीलां, महती चासौ सती च महासती तां महासतीम्, एकाकिनीम् इमां दमयन्तीं वने विपिने सन्त्यज्य निर्यासि निर्गच्छासि ॥२८४॥

सरलार्थ :- हहा विश्वस्तवञ्चक भर्तृरक्तां भक्तां महासतीम् एकाकिनीम् इमां दमयन्तीं वने मुक्त्वा निर्गच्छसि ॥२८४॥

ગુજરાતી :- (પોતાના) સ્વામીમાં રત બનેલી, ભક્તિવંત, અને મહાસતી એવી આ દમયંતીને આવા (ભયંકર) જંગલમાં એકલી છોડીને, અરે વિશ્વાસઘાતી ! તું (કેમ) ચાલ્યો જાય છે !

हिन्दी :- स्वामी में अनुरक्त पतिभक्त और महासती ऐसी इस दमयंती को ऐसे भयंकर वन मे एकाकी छोड कर, अरे विश्वासघाती ! तू क्यों चला जा रहा है ॥२८४॥

मराठी :- अरेरे! हे विश्वास यातक्या नला! पतीवर प्रेम करणाऱ्या, पतीच्या भक्तीत (सेवेत) रमणाऱ्या, पतिव्रता दमयन्तीला एकटीलाच वनात सोडून तू निघून जातोस. ॥२८४॥

English :- Damyanti who loves her husband wholeheartedly, who is pious and who believes in just one husband, has been left by Nal, by deceiving her in this horrorful forest.

P.P. Ac. Gunratnasuri M.S.

इत्यात्मानमधिक्षिप्य, बध्ध्वा मूर्ध्नि कराञ्जलिम् ॥
पत्न्याः सहायकं कर्तुं, सोऽभ्यधाद्वनदेवताः ॥२८५॥

अन्वय :- इति आत्मानम् अधिक्षिप्य पत्न्याः सहायकं कर्तुं कराञ्जलिं मूर्ध्नि बध्ध्वा सः वनदेवताः अभ्यधात् ॥२८५॥

विवरणम् :- इति एवम् आत्मानम् अधिक्षिप्य तिरस्कृत्य पत्न्याः दमयन्त्याः सहायकं कर्तुं करयोः अञ्जलिः कराञ्जलिः तं कराञ्जलिं मूर्ध्नि मस्तके बध्वाः सः वनस्य देवताः वनदेवताः अभ्यधात् अवदत् ॥२८५॥

सरलार्थ :- एवम् आत्मानं तिरस्कृत्य पत्न्याः दमयन्त्याः सहायकं कर्तुं कराञ्जलिं ललाटे बध्द्वा सः वनदेवताः अवदत् ॥२८५॥

ગુજરાતી :- એ રીતે (પોતાના) આત્માનો તિરસ્કાર કરીને, તથા મસ્તક પર બન્ને હાથ જોડીને, નલરાજા (પોતાની) પત્નીને સહાય કરવા માટે વનદેવીઓને કહેવા લાગ્યો કે, ॥૨૮૫॥

हिन्दी :- इस प्रकार अपनी आत्मा का तिरस्कार कर, और मस्तक पर दो हाथ जोडकर नलराजा अपनी पत्नी की सहायता के लिये वनदेवीयों से कहने लगा कि, ॥२८५॥

मराठी :- अशाप्रकारे स्वत:चा तिरस्कार करून मस्तकावर दोन्ही हाथ जोडून तो नलराजा स्वत:च्या पत्नीच्या मदती करिता वनदेवीना असे म्हणाला-॥२८५॥

English :- Nal disdains his soul and keeping his hand on his forhead he appeals to the Goddess of the forest to protect his wife Damyanti.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मातरः शृणुतेयं सा, भीमभूपालपुत्रिका ॥
विधाय यद्वपुर्वेधा, जातः शिल्पिगणाग्रणीः ॥२८६॥

अन्वय :- मातरः ! शृणुत यद् वपुर्विधाय वेधाशिल्पिगणाग्रणीः जातः सा इयं भीमभूपालपुत्रिका अस्ति ॥२८६॥

विवरणम् :- *हे मातरः ! वनदेवताः! शृणुत। यस्याः दमयन्त्याः वपुः यद्वपुः विधाय निर्माय वेधा निर्माता शिल्पम् एषाम् अस्ति इति शिल्पिनः शिल्पिनां गणः शिल्पिगणः शिल्पिगणस्य अग्रणीः शिल्पिगणाग्रणीः जातः। सा इयं भीमश्चासौ भुवं पालयति इति भूपालः च भीमभूपालः। भीमभूपालस्य पुत्रिका तनया भीमभूपालपुत्रिका दमयन्ती अस्ति ॥२८६॥*

सरलार्थ :- हे मातरः वनदेवताः! शृणुत! ब्रह्मा यस्याः दमयन्त्याः शरीरं निर्माय शिल्पिगणाग्रणीः जातः। सा इयं भीमनृपस्य तनया दमयन्ती अस्ति ॥२८६॥

ગુજરાતી :- હે માતાઓ ! તમે સાંભળો? જેનું શરીર બનાવીને વિધાતા, કારીગરોના સમૂહમાં શિરોમણિ થયેલ છે, તે આ ભીમ રાજાની પુત્રી દમયંતી છે. ॥૨૮૬॥

हिन्दी :- ए माताओ ! तुम सुनो ! जिस का शरीर निर्माण कर के विधाता कारीगरों के समूह में शिरोमणि हुइ है, वह भीमराजा की पुत्री दमयंती है ॥२८६॥

मराठी :- हे मातांनो ! तुम्ही ऐका? जिचे शरीर बनवून विधाता कुशल कारागिरांचा शिरोमणी बनला आहे. ती ही भीम राजाची मुलगी दमयन्ती आहे. ॥२८६॥

English :- Nal addressing the Goddesses as ""O mothers" asked them to give him a ear and told them that the God who has become the best among all creators after creating a body like Damyantis is the daughter of King Bhimrath.

त्यक्तायाः कर्कशेनास्याः, सत्याः पत्या निरागसः ॥
यूयं स्थ शरणं मास्म, नलवद् भूत निष्ठुराः॥२८७॥

अन्वय :- कर्कशेन पत्या त्यक्तायाः निरागसः अस्याः सत्याः यूयं शरणं स्था नलवद् निष्ठुराः मा भूत स्म ॥२८७॥

विवरणम् :- कर्कशेन कठोरेण पत्या भर्त्रा त्यक्तायाः निर्गतम् आगः अपराधः यस्याः सा निरागाः तस्याः निरागसः निरपराधायाः अस्याः सत्याः दमयन्त्याः यूयं शरणं रक्षकाः स्थ। नलः इव नलवद् निष्ठुराः कठोराः मा भूत स्म ॥२८७॥

सरलार्थ :- कठोरेण भर्त्रा त्यक्तायाः निरागसः अस्याः सत्याः दमयन्त्याः यूयं शरणं स्थ। नलवद् निष्ठुराः मा भूत स्म ॥२८७॥

ગુજરાતી :- (હે વનદેવીઓ) કઠોર હૃદયના પતિએ તજેલી, અને નિરપરાધી એવી આ દમયંતીની તમો શરણરૂપ (આધારરૂપ) છો, માટે તમો નલરાજાની પેઠે નિર્દય થશો નહીં ॥૨૮૭॥

हिन्दी :- (हे वनदेवीओ) कठोर हृयद के पति ने छोडी हुई और निरपराधी ऐसी इस दमयंती के तुम शरणरूप (रक्षक) हो इसलिये तुम नलराजा की तरह निर्दय मत बनो॥ ॥२८७॥

मराठी :- (हे वनदेवींनो) कठोर हृदयाच्या पतीने सोहलेल्या निरपराधी अशा या दमयंतीला तुम्ही शरणरूप (रक्षक) आहात. यासाठी तुम्ही नलराजासारखे निर्दय बन् नका? ॥२८७॥

English :- He continued saying and asking them to take good care of Damyanti who is stainless at heart and who is deserted by her husband and appealed to them not to be harsh on her as he himself was.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निद्राछेदे क्व मे कान्त, गतोऽसीति विलापिनी ।।
दिशोदिशं क्षिपन्ती च, बाष्पकल्लोलिनीं दृशम् ।।२८८।।

अन्वय :- निद्राछेदे मे कान्त क्व गतः असि? इति निद्राछेदे विलापिनी च बाष्पकल्लोलिनीं दृशं दिशोदिशं क्षिपन्ती ।

विवरणम् :- हे मे मम कान्त ! पते ! हे नाथ ! निद्रायाः छेदः नाशः निद्राछेदः, तस्मिन् निद्राछेदे निद्रानाशे (यदा निद्रा अपगता तदा) क्व गतः असि? इति एवं विलापः अस्याः अस्तीति, विलपति इत्येवंशीला वा विलापिनी बाष्पाणां कल्लोलाः लहर्यः बाष्पकल्लोलाः बाष्पकल्लोलाः अस्याः सन्ति इति बाष्पकल्लोलिनी तां बाष्पकल्लोलिनीं बाष्पतरङ्गवतीं दृशं दृष्टिं एकस्याः दिशः अन्यां दिशं क्षिपन्ती।।२८८।।

सरलार्थ :- हे मम प्रिय । क्व गतः असि? एवं निद्रायामपगतायां विलापिनी बाष्पतरङ्गवतीं दृष्टिं एकस्याः दिशः अन्यां दिशं क्षिपन्ती ।।२८८।।

ગુજરાતી :- નિદ્રા ઊડ્યા બાદ, હે મારા સ્વામી ! આપ ક્યાં ગયા છો? એમ કહી વિલાપ કરશે, અને ઝરતા આંસુઓથી નદીરૂપ થયેલી પોતાની દૃષ્ટિને એક દિશામાંથી બીજી દિશામાં ફેંકશે. ।।૨૮૮।।

हिन्दी :- निद्रा पूर्ण होने के बाद, हे मेरे स्वामी ! आप कहाँ गये ? ऐसा कह कर विलाप करेगी और बहते हुए आसुओं की नदीसमान बनी हुई अपनी दृष्टि एक दिशा से दूसरी दिशा में डालेगी ।।२८८।।

मराठी :- झोपेतून उठल्यावर (जागी झाल्यावर) हे नाथ! तुम्ही कोठे गेला? असा विलाप करणारी दमयन्ती अश्रूंच्या पारा वाहात असलेली दृष्टी एका दिशेकडून दुसऱ्या दिशेकडे टाकील. (इकडे तिकडे पाहात राहील.)।।२८८।।

English :- He says that when she wakes up she will be asking around as to where her husband has disappered and just as the river flows from one direction to another, in the same way her eyes will be flowing around in search of him from one direction to another.

किं बहूक्तेन युष्माभि-र्मम प्रार्थनयानया ॥
यथाऽसौ कुण्डिनाध्वानं, वेत्ति कार्यं तथा प्रगे ॥२८९॥

अन्वय :- किं बहु उक्तेन यथा प्रगे मम अनया प्रार्थनया असौ कुण्डिनाध्वानं वेत्ति तथा युष्माभिः कार्यम् ॥२८९॥

विवरणम् :- किं बहुनाउक्तेन यथा प्रगे प्रातःकाले प्रभातसमये मम अनया प्रार्थनया विज्ञप्तया असौ दमयन्ती यथा कुण्डिनाध्वानं कुण्डिनस्य अध्वा मार्गः कुण्डिनाध्वा, तं कुण्डिनाध्वानं कुण्डिननगरस्य मार्गं वेत्ति तथा युष्माभिः कार्यम् तस्यै कुण्डिनपुरस्य मार्गो दर्शनीयः॥२८९॥

सरलार्थ :- किं बहुना कथनेन प्रभातसमये मम अनया प्रार्थनया असौ दमयन्ती यथा कुण्डिनाध्वानं जानीत तथा युष्माभिः कार्यम् ॥२८९॥

ગુજરાતી :- વધારે કહેવાથી શું ? આ મારી વિનંતીથી તે પ્રભાતે કુંડીનપુરનો માર્ગ જાણે, તેમ તમારે કરવું. ॥२८९॥

हिन्दी :- अब अधिक क्या कहना? मेरी प्रार्थना से यह प्रातःकाल कुंडिनपुर का मार्ग पहचाने, ऐसा आप करना ॥२८९॥

मराठी :- अधिक सांगून काय उपयोग?. माझी आपणांस अशी विनंती आहे की, सकाळी उठल्यावर दमयन्ती कुंडिनपुराचा मार्ग जाईल. असे तुम्ही करा.॥२८९॥

English :- So he appeals to the Goddesses to take good cave of her and help her to understand at dawn which direction to take towards Kudinpur.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्युक्त्वा गन्तुमारेभे, चौरवन्निष्ठुरः पुरः ॥
मा जागरीदियमिति, मन्दं मन्दं रुदन्नलः ॥२९०॥

अन्वय :- इति उक्त्वा निष्ठुरः नलः रुदन् इयं माजागरीत् इति चौरवत् मन्दं मन्दं पुरः गन्तुम् आरेभे ॥२९०॥

विवरणम् :- इति एवं उक्त्वा भणित्वा निष्ठुरः कठोरः दयाहीन; नलः रुदन् रोदनं कुर्वन् इयं दमयन्ती मा जागरीत् इति एवं चौरेण तुल्यं चौरवत् मन्दं मन्दं शनैः शनैः पुरः अग्रे गन्तुं व्रजितुं आरेभे प्रारब्धवान् ॥२९०॥

सरलार्थ :- एवम् उक्त्वा निष्ठुरः नलः रुदन् सन् इयं दमयन्ती मा जागरीत् इति चौरवत् शनैः शनैः अग्रे गन्तुम् आरेभे ॥२९०॥

ગુજરાતી :- એમ કહીને નલરાજા નિર્દય થઈને રડતો રડતો દમયન્તી જાગી ન જાય એમ વિચારી ચોરની પેઠે ધીમેધીમે આગળ ચાલવા લાગ્યો. ॥૨૯૦॥

हिन्दी :- ऐसा कहकर निर्दयी नलराजा रोने लगा, यह दमयंती कहीं जाग न जाय ऐसा विचार कर के चोरो के समान वह धीरे धीरे आगे की ओर चलने लगा ॥२९०॥

मराठी :- असे म्हणून नलराजा निर्दय होऊन रड लागला, व दमयंतीला जाग येऊ नये म्हणून चोराप्रमाणे तो हळूहळू पुढे चाल लागला. ॥२९०॥

English :- So saying thus, he began to weep. But suddenly realizing that she might wake up with the sound of someone weeping, he like a robber, slowly and carefully stole away from there.

दयितां वलितग्रीवः, पश्यन् सुप्तां मुहुर्मुहुः ॥
तावद्ययौ यावदभूल्लोचने गोचरे हि सा ॥ २९१॥

अन्वय :- सुप्तां दयितां वलितग्रीवः मुहुर्मुहुः पश्यन् सा यावत् लोचनगोचरे अभूत् तावत् ययौ ॥२९१॥

विवरणम् :- सुप्तां शयितां दयितां पत्नीं दमयन्तीं वलिता ग्रीवा येन सः; वलितग्रीवः मुहुर्मुहुः वारंवारं पश्यन् अवलोकयन् सः सा दमयन्ती यावद् लोचनयोः नयनयोःगोचर विषये अभूत् अभवत् बभूवा तावद् ययौ अगच्छत् जगाम इयाय ॥२९१॥

सरलार्थ :- सुप्तां पत्नीं वलितग्रीव; वारंवारम् अवलोकयन् सः नलः सा दमयन्ती यावद् नयनविषये अभवत् तावद् अगच्छत् ॥२९१॥

गुजराती :- પછી નલરાજા (ત્યાં) સૂતેલી (પોતાની) સ્ત્રી દમયન્તી ને પાછળ વારંવાર જોતો જોતો જ્યાં સુધી તે દેખાઈ ત્યાં સુધી જોતો રહ્યો. ॥૨૯૧॥

हिन्दी :- फिर वह नलराजा वहाँ सोई हुई अपनी पत्नी दमयंती को बारबार पीछे मुडकर देखता हुआ जबतक वह दिखायी देती थी वहाँ तक देखता चला गया ॥२९१॥

मराठी :- नंतर नलराजा तेथे झोपलेल्या दमयंतीकडे मान वळवून वारंवार पाहत दमयन्ती दृष्टीच्या टप्प्यात येईल तेथपर्यंत चालून गेला.॥२९१॥

English :- Then King Nal, as he walked away from Damyanti, kept on staring at her till she was covered up by trees.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ध्यौचेतां हहाऽनाथां, शयानां गहने वने ।।
भक्षयेद्यदि सिंहो वा, व्याघ्रो वा का गतिस्तदा।।२९२।।

अन्वय :- सः **ध्यौ च हहा एताम् अनाथां गहने वने शयानां यदि सिंह वा व्याघ्रः वा भक्षयेत् तदा का गतिः भविष्यति।।२९२।।**

विवरणम् :- *सः नलः ध्यौ - अध्यायत् च हहा खेदे एताम् न विद्यते नाथः यस्याः सा अनाथा तां अनाथां निराधारां गहने भयङ्करे वने विपिने शयानां सुप्तां यदि सिंहः शार्दूलः वा व्याघ्रः वा भक्षयेत् खादेत् तदा तर्हि का गतिः भविष्यति।।२९२।।*

सरलार्थ :- सः व्यचारयत् हहा! एतां निराधारां भयङ्करे विपिने सुप्तां यदि सिंहः वा व्याघ्रः वा भक्षयेत् तदा का गतिः भविष्यति।।२९२।।

ગુજરાતી :- પછી તે વિચારવા લાગ્યો કે, અરેરે નિરાધારપણે આવા ભયંકર જંગલમાં સુતેલી, એવી આ દમયંતીને કદાચ સિંહ અથવા વાઘ મારીને ખાઈ જશે, તો શું હાલ થશે ?।।૨૯૨।।

हिन्दी :- फिर वह विचार करने लगा कि अरेरे! इस भयंकर जंगल में निराधार सोयी हुई दमयंती को बाघ या सिंह मारकर खा जायेंगे तो क्या हाल होगा?।।२९२।।

मराठी :- नंतर तो विचार करू लागला कि अरेरे या भयंकर जंगलात एकटी झोपलेल्या दमयंतीला समजा सिंह किंवा वाघानी मारून खाल्ले तर तिचे काय हाल होतील?।।२९२।।

English :- He then thought that it would be very some wild beast devours this forlorn Damyanti.

अतः सूर्योद्गमं यावद्रक्षाम्येतामहं प्रियाम् ॥
प्रत्यूषे च व्रजत्वेषा, स्वैरमेकतराध्वना ॥२९३॥

अन्वय :- अतः सूर्योद्गमं यावत् एतां प्रियाम् अहं रक्षामि। प्रत्यूषे एकतराऽध्वना असौ स्वैरं व्रजतु ॥२९३॥

विवरणम् :- अतः अस्मात् कारणात् सूर्यस्य दिवाकरस्य उद्गमः उदयः सूर्योद्गमः; तं सूर्योद्गमं सूर्योदयं यावत् एतां प्रियां दमयन्तीम् अहं रक्षामि। प्रत्यूषे प्रभाते एकतस्श्रासौ अध्वा च एकतराध्वा तेन एकतराध्वना उभयोः एकतरेण मार्गेण असौ दमयन्ती स्वैरं यथेच्छं व्रजतु गच्छतु ॥२९३॥

सरलार्थ :- अस्मात् कारणात् सूर्योदयं यावत् एतां प्रियां दमयन्तीम् अहं रक्षामि। प्रातःकाले उभयोः एकतरेण मार्गेण असौ दमयन्ती यथेच्छं गच्छतु ॥२९३॥

ગુજરાતી :- આટે સૂર્યનો ઉદય થાય ત્યાં સુધી હું મારી આ પ્રિયાનું રક્ષણ કરું અને પછી પ્રભાતે ઇચ્છા મુજબ બેમાંથી એક માર્ગે ભલે તે ચાલી જાય.॥૨૯૩॥

हिन्दी :- इसलिये सूर्योदय होने तक मैं मेरी प्रिया का रक्षण करूं, और फिर सुबह वह अपनी इच्छा से दोनो में से किसी एक मार्ग पर चली जाएगी ॥२९३॥

मराठी :- यासाठी सूर्योदय होईपर्यंत मी माझ्या प्रियेचे रक्षण करीन, सकाळ झाल्यानंतर ती आपल्या इच्छेने दोन मार्गांपैकी एका मार्गाने जाईल. ॥२९३॥

English :- Then he decides that he will take care of his love till dawn and then he shall leave, leaving her to decide, which road of the two should be taken.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नलोऽथ तैरेव पदैर्वलितः पतितार्थिवत् ॥
लुठन्तीं भुवि भैमीं च, परिभाव्य व्यचिन्तयत् ॥२९४॥

अन्वय :- अथ नलः पतितार्थिवत् तैः एव पदैः वलितः भुवि लुठन्तीं भैमीं परिभाव्य व्यचिन्तयत् ॥२९४॥

विवरणम् :- *अथ नलः : अस्य अस्ति इति अर्थी। पतितश्चासौ अर्थी च पतितार्थी पतितार्थिना तुल्यं पतितार्थिवत् पतितधनिकवद् तैः एव पदैः वलितः भुवि पृथ्व्यां लुठन्तीं आलोटन्तीं भीमस्य अपत्यं स्त्री भैमी तां भैमीं दमयन्तीं। परिभाव्य विज्ञाय अचिन्तयत् व्यचारयत् ॥२९४॥*

सरलार्थ :- अथ नलः पतितधनीवत् तैः एव पदैः वलितः पृथ्व्याम् आलोटयन्तीं दमयन्तीं विज्ञाय व्यचारयत् ॥२९४॥

गुजराती :- પછી નલરાજા ખોવાઇ ગયેલા ધનવાળાની પેઠે તેજ પગલે ત્યાંથી પાછો વળ્યો, તથા જમીન પર સુતેલી દમયંતીને જોઇને વિચારવા લાગ્યો કે, ॥२९४॥

हिन्दी :- फिर नलराजा पतित धनवान के समान उसी समय वापस लौटा तथा जमीन पर सोई हूइ दमयंती को देखकर विचार करने लगा कि,॥२९४॥

मराठी :- नंतर नलराजा पतित झालेल्या धनवानाप्रमाणे त्याच पावांनी मागे वळला आणि जमिनीवर लोळणाऱ्या दमयंतीला पाहून विचार करू लागला.॥२९४॥

English :- Then Nal with a heavy heart as though it is about to break out of sorrow retraced his steps back to where Damyanti was lying.

एकवस्त्रा हहा भैमी, स्वपित्येकाकिनी वने ॥
अहो नलस्य दाराणामसूर्यम्पश्यताद्भुता ॥२९५॥

अन्वय :- हहा एकवस्त्रा भैमी एकाकिनी वने स्वपिति। अहो! नलस्य दाराणाम् असूर्यम्पश्यताद्भुता वर्तते ॥२९५॥

विवरणम् :- हहा खेदे। एकं वस्त्रं यस्याः सा एकवस्त्रा भीमस्य अपत्यं स्त्री भैमी दमयन्ती एकाकिनी वने स्वपिति। अहो ! नलस्य दाराणां पत्नीनां सूर्यं न पश्यन्ति इति असूर्यपश्याः असूर्यम्पश्यानां भावः असूर्यम्पश्यता अद्भुता आश्चर्यकारिणी वर्तते ॥२९५॥

सरलार्थ :- हहा ! एकवस्त्रा दमयन्ती एकाकिनी वने स्वपिति । अहो ! नलस्य पत्न्याः असूर्यम्पश्यता अद्भुता वर्तते ॥२९५॥

ગુજરાતી :- અરે રે! ફક્ત પહેરેલા એક જ વસ્ત્રવાળી આ દમયન્તી એકલી જંગલમાં સુતી છે, અહો! નલરાજાની રાણીનું આ આશ્ચર્ય, સૂર્યને પણ ન જોવાપણું તે (જુઓ!) ॥૨૯૫॥

हिन्दी :- अरेरे! सिर्फ एक ही वस्त्र धारण की हुई यह दमयंती एकाकी वन में सोयी है। अहो! नलराजा की राणी का आश्चर्य सूरज को भी देखने नही है। ॥२९५॥

मराठी :- अरेरे। फक्त एकच वस्त्र परिधान केलेली ही दमवंती एकटी जंगलात झोपलेली आहे, अहो। नलराजाच्या पत्नीचे सूर्याला न पाहाणें आश्चर्यकारक आहे. ॥२९५॥

English :- He wondered that this delicate Damyanti who is lying there alone with just a garment over her in this forest will even make the rising sun put his face down in shame.

हहा वनचरीवेयं, जज्ञे मत्कर्मदोषतः ॥
जीवन् मृतस्तदत्राहं, हताशः करवाणि किम् ॥२९६॥

अन्वय :- हहा मत्कर्मदोषतः वनचरी इव इयं जज्ञे। तद् अत्र अहं जीवन्मृतः हताशः किं करवाणि ॥२९६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- हहा ! मम कर्माणि मत्कर्माणि। मत्कर्मणां दोषः मत्कर्मदोषः तस्मात् मत्कर्मदोषतः वने चरति इति वनचरी इव जाते सञ्जाता इयं दमयन्ती। तद् तेन कारणेन अत्र अस्याम् अटव्यां जीवन् सन् अपि मृतः मृतवद् अस्मि। हता आशा यस्य सः हताशः निराशः किं करवाणि? किं करवै। मम कर्मणां दोषादेव इयं दमयन्ती वनचरी इव संजाता। अतः अहं जीवन् सन्नपि मृतोऽस्मि।२९६॥

सरलार्थ :- हहा। मत्कर्मदोषतः इवं दमयन्ती वनचरी इव जाइो। तद् अत्र अहं मृतवद् अस्मि परं निराशः अहं किं करवाणि? कि करवै ॥२९६॥

ગુજરાતી :- અરેરે! મારા કર્મોના દૂષણથી આ બિચારી જંગલમાં રખડતાં પશુસરખી દશાને પ્રાપ્ત થઈ! માટે હું તો અહીં જીવતા છતાં પણ મુઆ સરખો છું, અરે! હતાશ થયેલો હું હવે શું કરું ? ॥૨૯૬॥

हिन्दी :- अरेरे! मेरे कर्म के दोष से यह बेचारी को वन में भटकते हुए पशु के समान दशा प्राप्त हुई! और मैं तो यह जीवित होते हुए भी मृतक के समान हूँ, अरे! निराश हो गया हूँ, मै अब क्या करूं? ॥२९६॥

मराठी :- अरेरे ! माझ्या कर्माच्या दोषामुळे या बिचारीला जंगलात भटकणाऱ्या पशुसारखी दशा प्राप्त झाली आहे ! त्यामुळे मी येथे जिवंत असूनसुध्दा मेल्यासारखा आहे, परंतु हताश झालेला मी आता काय करू? ॥२९६॥

English :- Then Nal cursed himself for having done such an immeritable deed as to make this poor and tender Damyanti wonder about in the forest like beasts and also because he being an alive man is just like a dead man who cannot take care of his wife. And thought sadly with a sigh what is he supposed to do now.

नाथे सत्यप्यनाथेयं, निर्मदाप्युन्मदिष्णुवत् ॥
भूमिसुप्तापि दृष्टेयं, ही नलप्रलयाय न ॥२९७॥

अन्वय :- मयि नाथे सति अपि इयम् अनाथा निर्मदा अपि उन्मदिष्णुवत् भूमिसुप्तापि दृष्टा इयं नलप्रलयाय न ॥२९७॥

विवरणम् :- नाथे पत्यौ सति अपि मयि, इयं न विद्यते नाथः यस्याः सा अनाथा नाथरहिता। निर्गतः मदः यस्याः सा निर्मदा अपि उन्मदिष्णुः इव, भूमौ सुप्ता शयिता इयं दृष्टा अपि नलस्य प्रलयाय विनाशाय कथं न भवति। नलं किमर्थं न विनाशयति॥२९७॥

सरलार्थ :- मयि नाथे सति अपि इयं दमयन्ती अनाथा, निर्मदा अपि उन्मदिष्णुवत् इयं भूमौ शयिता दृष्टा अपि नलस्य विनाशाय किं न भवति ॥२९७॥

ગુજરાતી :- હું નાથ છતાં પણ આ અનાથ સરખી થયેલી, મદરહિત છતાં પણ ઉન્મત્તની પેઠે (નિરાંતે) જમીન પર સૂતેલી આ દેખાય છે, છતાં પણ નલના વિનાશ માટે (નિમિત્ત) થતી નથી (અર્થાત્ આવા નિદર્શ નલનો કેમ વિનાશ કરતી નથી?) ॥૨૯૭॥

हिन्दी :- मैं नाथ होते हुए भी अनाथ जैसी हो कर, मदरहित होते हुए भी उन्मत्त जैसे जमीन पर सोयी हुई दिखाई दे रही है, फिर भी नल का विनाश क्यों करती नही? ॥२९७॥

मराठी :- मी नाथ असून सुध्दा अनाथ झालेली ही दमयंती, मदरहित असून सुध्दा उन्मत्ता प्रमाणे जमिनीवर झोपलेली दिसत आहे, तरीपण नलाचा विनाश का करीत नाही? ॥२९७॥

English :- He says that, Damyanti will be taken as an orphan, even after having a husband. She seem to be lying on the ground with no feeling of vanity or arrogance but she seems to be insane and intoxicated with anger, but still does not finish him.

इयमेकाकिनी त्यक्ता, मयारण्ये दुरात्मना ॥
प्रबुध्दा प्राणितेनापि, त्यक्ष्यते स्पर्धयेव मे ॥२९८॥

अन्वय :- दुरात्मना मया अरण्ये एकाकिनी त्यक्ता इयं प्रबुध्दा मे स्पर्धया इव प्राणितेन अपि त्यक्ष्यते ॥२९८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- दुष्टः आत्मा यस्य सः दुरात्मा तेन दुरात्मना मया अरण्ये विपिने एकाकिनी त्यक्ता इयं दमयन्ती यदा प्रबुध्दा जागरिता भवेत् तदा मम स्पर्धया इव प्राणितेन जीवितेन अपि त्यक्ष्यते ॥२९८॥

सरलार्थ :- दुरात्मना मया अरण्ये एकाकिनी त्यक्ता इयं दमयन्ती प्रबुध्दा चेत् मम स्पर्धया इव जीवितेन अपि त्यक्ष्यते ॥२९८॥

ગુજરાતી :- મેં દુર્બુદ્ધિએ આ દમયન્તીને એકલી વનમાં તજેલી છે, અને તેથી જ્યારે તે જાગશે, ત્યારે (ત્યાગમાં) મારી સ્પર્ધા કરતી હોય તેમ તે શરીરને પણ ત્યજશે. (અર્થાત તે અપઘાત કરી મરણ પામશે.)॥૨૯૮॥

हिन्दी :- मैं दुर्बुद्धि से इस दमयंती को अकेली वन में छोडकर आया हूँ, जिस से वह जब जागेगी तब वह मानो मेरी स्पर्धा में शरीर का त्याग करेगी (याने आपघात से मर जायेगी।) ॥२९८॥

मराठी :- दुष्ट बुद्धी असलेल्या मी दमयन्तीला एकटीला अरण्यात सोडले आहे. जेव्हा ती जागी होईल तेव्हां तिला जणू काय माझ्या स्पर्धेने प्राणसुद्धा सोडून जातील. ती प्राणत्याग करील. ॥२९८॥

English :- King Nal then says that it was his stupidity and evil-mindedness to have left Damyanti in the jungle, for which when she wakes up and understands his action which is done, might not be able to control herself and might commit a tragedous deed.

ततः पतिव्रतामेतां, विप्रतार्य न यास्यते ॥
दुःखं वापि सुखं वापि, सार्धमस्त्वनयैव मे ॥२९९॥

अन्वय :- ततः पतिव्रताम् एतां विप्रतार्य न यास्यते। दुःखं वापि सुखं वापि मे अनया सार्धम् एव अस्तु ॥२९९॥

विवरणम् :- तत तदनन्तरं पतिः एव व्रतं यस्याः सा पतिव्रता तां पतिव्रतां सतीम् एतां दमयन्तीं विप्रतार्य विप्रलभ्य न यास्यते मया न गम्यते। दुःखं वापि सुखंवा अपि मे मम अनया दमयन्त्या सार्धसह एव अस्तु ॥२९९॥

सरलार्थ :- तदनन्तरं पतिव्रताम् एतां दमयन्तीं विप्रलभ्य गन्तुं न युज्यते। दुःखं वापि सुखंवापि मम अनया सह एव अस्तु ॥२९९॥

ગુજરાતી :- માટે આ પતિવ્રતા દમયંતીને છેતરીને મારે જવું લાયક નથી, દુ:ખ અથવા સુખ મારે તેણીની સાથે જ સહન કરવું વ્યાજબી છે. ॥૨૯૯॥

हिन्दी :- इसलिये इस पतिव्रता दमयंती को छोडकर जाना अच्छा नही, दु:ख अथवा सुख मुझे उस के साथ भोगना ही अच्छा है ॥२९९॥

मराठी :- म्हणून या पतिव्रतां दमयंतीला सोडून जाणे योग्य नाही, दु:ख किंवा सुख मी तिच्यासोबतच सहन करणे योग्य आहे. ॥२९९॥

English :- So he thinks that, it is not proper to leave a chaste and a faithful wife as Damyanti. He adds that he should accompany her in happpiness and in sadness and this is the only appropriate thing to do.

एक एवाथवारण्ये, व्यपायशतसङ्कुले ॥
स्वकर्मफलवज्जीवः, कृच्छ्राण्यनुभवाम्यहम् ॥३००॥

अन्वय :- अथवा जीवः स्वकर्मफलवत् व्यपायशतसङ्कुले अरण्ये अहम् एक. एव कृच्छ्राणि अनुभवामि ॥३००॥

विवरणम् :- अथवा जीवः स्वस्य कर्माणि स्वकर्माणि, स्वकर्मणां फलानि स्वकर्मफलानि स्वकर्मफलैः तुल्यं स्वकर्मफलवत् यथा जीवः कर्मफलानि एकः एव अनुभवति तथा विशेषेण अपायाः व्यपायाः व्यपायानां शतं व्यपायशतं, व्यपायशतेन सङ्कुलं व्यपायशतसङ्कुलं तस्मिन् व्यपायशतसङ्कुले अनेकशतसङ्कटव्याप्ते अरण्ये वने अहम् एक एव कृच्छ्राणि दुःखानि अनुभवामि ॥३००॥

सरलार्थ :- अथवा जीवः यथा स्वकर्मफलं एकः एव अनुभवति तथा अनेकशतसङ्कटव्याप्ते वने अहम् एक एव दुःखानि अनुभवामि ॥३००॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- અથવા જીવ જેમ એકલો જ પોતાના કર્મોનાં ફળ ભોગવે છે, તેમ હું પણ એકલો જ સેંકડો વિઘ્નોથી ભરેલા આ જંગલમાં રહીને દુઃખોને ભોગવું. ॥૩૦૦॥

हिन्दी :- अथवा जीव जैसे अकेला ही अपने कर्मो के फल भोगता है, वैसे ही मैं अकेला ही सेंकडो विघ्नो से भरे इस जंगल में रहकर दुःखो को भोगूंगा॥३००॥

मराठी :- जीव जसा एकटाच आपल्या कर्माचे फळ भोगतो त्याप्रमाणे अनेक संकटांनी व्यापलेल्या या वनात मी एकटाच दुःख भोगीन. ॥३००॥

English :- Just as a soul has to alone bear up all the fruits of his/her own deeds in the smae way Nal decides to stay in the jungle and bear up the many obstacles and woes and anxieties.

असौ पुनर्ममादेशं दृष्ट्वा लिखितमञ्चले ॥
स्वजनावासमासाद्य, देवीव सुखमेधताम् ॥३०१॥

अन्वय :- असौ पुनः अञ्चले लिखितं मम आदेशं दृष्ट्वा स्वजनावासम् आसाद्य देवी इव सुखम् एधताम् ॥

विवरणम् :- *असौ दमयन्ती पुनः अञ्चले लिखितं मम आदेशम् आज्ञां दृष्ट्वा अवलोक्य निरीक्ष्य स्वस्य जनाः स्वजनाः स्वजनानाम् आवासः स्वजनावासः तं स्वजनावासम् पितृगृहम् आसाद्य प्राप्य देवी इव सुखम् एधतां वर्धताम् ॥ अनुभवतु॥३०१॥*

सरलार्थ :- असौ दमवन्ती पुनः अञ्चले लिखितं मम आज्ञां निरीक्ष्य स्वजनावासं प्राप्य देवी इव सुखं वर्धताम् ॥३०१॥

ગુજરાતી :- અને આ દમયંતી તો તેના વસ્ત્રને છેડે લખેલી મારી આજ્ઞાને જોઈને પોતાના પિયરે જઈને દેવીની પેઠે ભલે સુખ ભોગવે.॥૩૦૧॥

हिन्दी :- और दमयंती अपने वस्त्र के पालव पर लिखी हुई मेरी आज्ञा को देखकर अपने मायके जाकर देवीसमान सुख का भोग करे

मराठी :- पण ही दमवंती तिच्या पदरावर लिहिलेला माझा आदेश पाहून, आपल्या माहेरी जाऊन देवीप्रमाणे सुख भोगो. ॥३०१॥

English :- And Damyanti, when she wakes up and reads the message at the end of the garment, will collect her emotions and going to her parent's house, will live a life of a noble woman, in peace and gaiety, as per his order.

एवमेतद्विनिश्चित्य, तत्र निर्वाह्य यामिनीम् ।।
प्रबोधकाले वैदर्भ्यास्तिराधत्ते स्म नैषधिः ।।३०२।।

अन्वय :- एवम् एतद् विनिश्चित्य तत्र यामिनीं निर्वाह्य वैदर्भ्याः प्रबोधकाले नैषधिः तिराधत्ते स्म ।।३०२।।

विवरणम् :- *एवम् इति एतद् विनिश्चित्य निर्णयं कृत्वा तत्र तस्याम् अटव्यां यामिनीं रात्रिं निर्वाह्य यापयित्वा विदर्भाणाम् ईश्वरः वैदर्भः वैदर्भस्य अपत्यं स्त्री वैदर्भी तस्याः वैदर्भ्याः दमयन्त्याः प्रबोधस्य काल : प्रबोधकालः तस्मिन् प्रबोधकाले जागरणसमये निषधस्य अपत्यं पुमान् नैषधिः नलः तिराधत्ते स्म अदृश्योऽभवत् ।।३०२।।*

सरलार्थ :- एवम् एतद् विनिश्चित्य तस्याम् अटव्यां रात्रिं निर्वाह्य दमयन्त्याः जागरणसमये नलः अदृश्योऽभवत् ।।३०२।।

ગુજરાતી :- એવો વિચાર કરીને ત્યાં રાત્રિ ગાળીને, દમયંતીનો જાગવાનો સમય થતાં જ નલરાજા ત્યાંથી અદૃશ્ય થયો.।।૩૦૨।।

हिन्दी :- इसप्रकार उसने निश्चय किया तथा वहाँ रात बिताकर दमयंती के जागने का समय होते ही नलराजा वहाँ से अदृश्य हो गया।

मराठी :- असा निश्चय करून व तेथे रात्र यालवून दमयंतीची जागे होण्याची वेळ होताच नलराजा तेथून अदृश्य झाला. ।।३०२।।

English :- So having decided, he spent the night and at dawn when it was time for Damyanti to wake up, Nal disappeared from there.

ततः कुङ्कुमरागाया - मिव प्राच्यां प्रियागमे ।।
प्रभाप्रकाशवेलायां । भैमी स्वप्ने व्यलोकयत् ।।३०३।।

अन्वय :- ततः प्रियागमे कुङ्कुमरागायाम् प्राच्यां इव प्रभाप्रकाशवेलायां भैमी स्वप्ने व्यलोकयत् ।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- ततः तदनन्तरं प्रियस्य आगमः तस्मिन् प्रियागमे कुङ्कुमस्य रागः इव रागः यस्याः सा कुङ्कुमरागा। तस्यां कुङ्कुमरागायां रक्तवर्णायाम् इव प्राच्यां पूर्वस्यां दिशि प्रभायाः प्रकाशः प्रभाप्रकाशः प्रभाप्रकाशस्य वेला तस्यां प्रभाप्रकाशवेलायां अरुणोदये भीमस्य अपत्यं स्त्री भैमी दमयन्ती स्वप्ने व्यलोकयत् अपश्यत् ॥३०३॥

सरलार्थ :- तदनन्तरं प्रियागमे रक्तवर्णायाम् इव प्राच्याम् अरुणोदये दमयन्ती स्वप्ने अपश्यत् ॥३०३॥

ગુજરાતી :- અરુણોદય સમયે પૂર્વ દિશા જાણે (પોતાના) સ્વામીના આગમન સમયે કેસરના રંગવાળી બની. એ વખતે દમયંતીએ સ્વપ્નમાં (નીચે જણાવ્યા મુજબ) જોયું, ॥૩૦૩॥

हिन्दी :- अरूणोदय के समय पूर्व दिशा मानो अपने स्वामी के आगमन से केशर के रंगसमान हुअी तब दमयंतीने स्वप्नमें देखा, ॥३०३॥

मराठी :- आपल्या प्रियकराच्या आगमनाच्या वेळी पूर्व दिशा केशरच्या रंगाप्रमाणे लाल झाली असता अरूणोदयाच्या वेळी दमयंतीने एक स्वप्न पाहिले.॥३०३॥

English :- Then Damyanti during the arrival of the sun at daybreak, when the horizon seemed like the colour of saffron, she had a dream.

अहमारोहमुत्फुल्ले फलिते चूतपादपे ॥
तत्फलान्यद्म्यहं भृङ्गी - गीतिप्रीतिवशंवदा ॥३०४॥

अन्वय :- अहम् उत्फुल्ले फलिते चूतपादपे आरोहम्। भृङ्गीगीतिप्रीतिवशंवदा तत्फलानि अहम् अद्मि ॥३०४॥

विवरणम् :- अहम् उत्फुल्ले विकसिते फलिते पादैः पिबति इति पादपः वृक्षः चूतस्य आम्रस्य पादपः चूतपादपः, तस्मिन् आम्रपादपे चूतपादपे आरोहम्। भृङ्ग्याः गीतिः भृङ्गीगीतिः। भृङ्गीगीतौ प्रीतिः भृङ्गीगीतप्रीतिः। भृङ्गीगीतिप्रीतेः वशं वदति इति वशंवदा भृङ्गीगीतिप्रीतिवशंवदा तस्य फलानि तत्फलानि अहम् अद्मि खादामि ॥३०४॥

सरलार्थ :- अहं विकसिते आम्रवृक्षे आरोहम्। भृङ्गीगीतिप्रीतेः वशा अहं तत्फलानि आम्रफलानि स्वादामि ॥३०४॥

गुजराती :- જાણે હું પ્રફુલ્લિત થઈને ફલદ્રુપ થયેલા આંબાના વૃક્ષપર ચડી છું તથા ભમરીઓના ગુંજારવોથી આનંદને વશ થઈ તુરત તે આમ્રફળોનો સ્વાદ લઉં છું. ॥૩૦૪॥

हिन्दी :- जैसे मैं प्रफुल्लित होकर फलों से लदे आम्र वृक्षपर चढी हूँ तथा भंवरो के मधुर गुंजन से आनंदित होकर तुरंत आम्रफलो का स्वाद लेती हूँ। ॥३०४॥

मराठी :- मी प्रफुल्लित होऊन फळांनी लदबदलेल्या आंबाच्या झाडावर चढली आहे. भुव्वांच्या मधुर गुंजनामुळे आनंदित व मोहित होऊन आंब्याचा स्वाद येत आहे. ॥३०४॥

English :- She dreamt that she with atmost gaiety had climbed a tree with countless mangoes and enjoying the pleasant sound of wasps, started to taste the tempting mangoes, on a very fertile ground.

उदमूलि च चूतःस, सहसा वनहस्तिना ॥
ततोऽहमपतं भूम्यां, सुपक्वफलवत् क्षणात् ॥३०५॥

अन्वय :- सहसा वनहस्तिना स चूतः उदमूलि ततः अहं सुपक्वफलवत् क्षणात् भूम्याम् अपतम् ॥३०५॥

विवरणम् :- *सहसा अकस्मात् वनस्य हस्ती गजः वनहस्ती तेन वनहस्तिना वनगजेन सः चूतः आम्रवृक्षः उदमूलि उत्खातः। ततः तदनन्तरम् अहं सुष्ठु पक्वं सुपक्वं सुपक्वं च तद् फलंच सुपक्वफलं सुपक्वफलेन तुल्यं सुपक्वफलवत् क्षणात् भूम्याम् अपतम् अपतम् ॥३०५॥*

सरलार्थ :- अकस्मात् वनहस्तिना सः आम्रवृक्षः उत्खातः। तदनन्तरम् अहं सुपक्वफलवत् क्षणात् भूम्याम् अपतम्। यथा सुपक्वं फलं क्षणमात्रादेव भूमौ पतति तथा अहं वनहस्तिना आम्रवृक्षे उत्खाते क्षणात्भूमा वपतम्॥३०५॥

गुजराती :- પરંતુ એકદમ કોઈ જંગલી હાથીએ (આવીને) તે આંબાના વૃક્ષને મૂળમાંથી ઉખેડી નાખ્યું અને તેથી અતિ પાકેલા ફળની પેઠે ક્ષણવારમાં હું તે વૃક્ષ પરથી જમીન પર પડી. ॥૩૦૫॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- परंतु उसी समय कोई जंगली हाथी ने आकर उस आमके वृक्ष को जड सहित उखाड फेंका। जिस से पके हुए आम की तरह पलभर में मैं वृक्षपर से जमीन पर गिर पडी ॥३०५॥

मराठी :- परंतु त्याच वेळी एक जंगली हत्ती तेथे आला व त्याने आंब्याच्या झाडाला मुळासकट उपटून टाकले. त्यामुळे पिकलेल्या फळाप्रमाणे क्षणभरांत मी झाडावरून खाली पडले. ॥३०५॥

English :- But at that time a wild elephant arrived there and uprooted the mango tree and Damyanti fell off the tree like a over-riped mango, in no time.

अथ जागरिता भैमी, पुरोऽनालोक्य नैषधिम् ॥
यूथभ्रष्टा कुरङ्गीव, दिशः पश्यन्त्यचिन्तयत् ॥३०६॥

अन्वय :- अथ भैमी जागरिता पुरः नैषधिम् अनालोक्य यूथभ्रष्टा कुरङ्गीव दिशः पश्यन्ती अचिन्तयत् ॥३०६॥

विवरणम् :- अथ भीमस्य अपत्यं स्त्री भैमी दमयन्ती जागरिता प्रबुध्धा पुरः अग्रतः निषधस्य अपत्यं नैषधिः तं नैषधिं नलम् न आलोक्य अनालोक्य यूथात् समूहात् भ्रष्टा यूथभ्रष्टा कुरङ्गी इव मृगीव दिशः पश्यन्ती निरीक्षमाणा अचिन्तयत् व्यचारयत् ॥३०६॥

मरलार्थ :- अथ दमयन्ती जागरिता पुरतः नलम् अनालोक्य यूथभ्रष्टा मृगीव दिशः पश्यन्ती व्यचारयत् । यदा दमयन्ती जागरिता अभवत्। तदा सा पुरः नलं न अपश्यत्। तेन सा यूथात् भ्रष्टा मृगी इव व्याकुला भूत्वा इतस्ततः दिशः अवलोक्य व्यचिन्तयत्॥३०६॥

ગુજરાતી :- હવે નિદ્રામાંથી જાગેલી દમયંતી (પોતાની) પાસે નલને ન જોવાથી ટોળામાંથી વિખૂટી પડેલી હરિણી પેઠે ચારે દિશાઓ તરફ જોતી વિચારવા લાગી કે, ॥૩૦૬॥

हिन्दी :- तब निद्रा से जागी हुई दमयंतीने अपने पास नल को न पाकर झुंड मे से बिछडी हुई हरिणी के समान चारो दिशाओ की ओर देखते हुए सोचने लगी, ॥३०६॥

मराठी :- नंतर झोपेतून उठलेली दमयंती आपल्या जवळ नल नसल्याचे पाहून कळपातून वेगळी झालेल्या हरिणीप्रमाणे व्याकुळ होऊन चारही दिशांकडे पाहून विचार करू लागली, ॥३०६॥

English :- Now when Damyanti woke up and not finding her husband next to her, kept wondering, which seemed like a deer who has strayed away from her flock, and is having a look in all directions.

आः पपाताऽत्यहितं मे, मम दैवमगात् क्रुधम् ॥
यदलक्ष्मीमिवात्याक्षीत्, प्राणेशोऽप्येवमत्र माम् ॥३०७॥

अन्वय :- आः। मे अति अहितं पपात। मम दैवं क्रुधम् अगात्। यद् प्राणेशः अपि माम् अत्र एवम् अलक्ष्मीं इव अत्याक्षीत् ॥३०७॥

विवरणम् :- *आः ! मे मम न हितं अहितं अतिशयेन अहितम् अत्यहितं पपात आजगाम। मम दैवं क्रुधं क्रोधम् अगात्। अक्रुध्यत्। यद् प्राणानाम् ईशः प्राणेशः अपि माम् अत्र अस्याम् अटव्याम् एवम् एकाकिनीं न लक्ष्मीः अलक्ष्मीः तां अलक्ष्मीम् इव अत्याक्षीत् अत्यजत् तत्याज ॥३०७॥*

संस्कृतार्थ :- आः । मे अत्यहितम् आजगाम। मम दैवं अक्रुध्यत्। यद् प्राणेशः अपि माम् अस्मिन् वने अलक्ष्मीम् इव एकाकिनीम् अत्यजत् ॥३०७॥

गुजराती :- અરેરે ! મારું અતિપાપ પ્રગટ થયું અને દૈવ (પણ) મારા પર કોપાયમાન થયો કે જેથી મારા પ્રાણવલ્લભે આ રીતે દરિદ્રની પેઠે મારો અહીં ત્યાગ કર્યો. ॥૩૦૭॥

हिन्दी :- अरेरे ! मेरा अतिपाप प्रकट हुआ और देव का भी मेरे उपर कोप हुआ जिससे मेरे प्राणप्रिय ने भी इस तरह दरिद्रता से मेरा त्याग किया ॥३०७॥

मराठी :- अरेरे! माझे महापाप ओढवले. देव माझ्यावर कोपले. कारण माझ्या प्राणप्रिय पतीने सुध्दा मला अलक्ष्मीप्रमाणे या अरण्यात एकटीलाच सोडून दिले. ॥३०७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- She wonders that her husband who she loved more than her own life has abandoned her in such a cruel way, signifies that she is a big sinner and even the Gods have shown a wrathful displeasure towards her.

यदिवा यदि मर्यादां, मुञ्चेदब्धिः कदाचन ॥
मुञ्चेच्चेत्कौमुदीमिंदुस्तदा मुञ्चेन्नलोऽपि माम् ॥३०८॥

अन्वय :- यदिवा यदि कदाचन अब्धिः मर्यादां मुञ्चेत् चेत् इन्दुः कौमुदीं मुञ्चेत् तदा नलः अपि मां मुञ्चेत् ॥३०८॥

विवरणम् :- यदिवा अथवा यदि कदाचन अब्धिः आपः धीयन्ते यस्मिन् इति अब्धिः सागरः मर्यादां सीमां मुञ्चेत् त्यजेत् चेत्, इन्दुः चन्द्रः कौमुदीं ज्योत्स्नां चन्द्रिकां मुञ्चेत् त्यजेत् तदा नलः अपि मां मुञ्चेत् ॥३०८॥

सरलार्थ :- अथवा यदि कदाचन सागरः सीमां त्यजेत् चेत् चन्द्रः चन्द्रिकां त्यजेत् तदा नलः अपि मां त्यजेत् ॥ यथा सागरः मर्यादां न त्यजति । चन्द्रः चन्द्रिकां न विजहाति । तथा नलः अपि मां त्यक्तुं न शक्नोति ॥३०८॥

ગુજરાતી :- અથવા જો મહાસાગર કદાચ મર્યાદા મૂકે અથવા ચંદ્ર જો કદાચ ચાંદનીને મૂકે, તો આ નલરાજા પણ મારો ત્યાગ કરે. ॥૩૦૮॥

हिन्दी :- अथवा कदाचित् महासागर अपनी मर्यादा छोड दे या चंद्र चांदनीको छोड दे तो नलराजा भी मेरा त्याग कर सके॥३०८॥

मराठी :- किंवा जर महासागर आपली मर्यादा सोडील. चन्द्र चांदणीचा त्याग करील तरच नलराजा सुध्दा माझा त्याग करील. ॥३०८॥

English :- Or just if an ocean can crose its limts, or just if the moon can forsaked its own light then same way Damyanti says that King Nal too can abandon and desert her.

नूनं मे मुखशौचार्थं, पानीयानयनाय तत् ॥
मत्प्रेमप्रेरित इव, जगाम क्वापि नैषधिः ॥३०९॥

अन्वय :- नूनं मत्प्रेमप्रेरितः इव नैषधिः मे मुखशौचार्थं तत् पानीयम् आननाय क्वाऽपि जगाम ॥३०९॥

विवरणम् :- नूनं निश्चितं मे मम मुखस्य शौचं मुखशौचम्। मुखशौचाय इदं मुखशौचार्थं मयि प्रेम मत्प्रेम। मत्प्रेम्णा प्रेरितः मत्प्रेमप्रेरितः इव तत् पानीयं जलं आननाय लातुं निषधस्य अपत्यं पुमान् नैषधिः नलः क्वाऽपि कुत्रापि जगाम अगच्छत् ॥३०९॥

सरलार्थ :- नूनं मयि प्रेमप्रेरितः इव जलः मम मुखशुध्यर्थं जलं लातुं क्वाऽपि अगच्छत् ॥३०९॥

ગુજરાતી :- મારું મુખ ધોવા માટે, મારા પ્રેમથી પ્રેરાઈને પાણી લાવવા નલરાજા ક્યાંક ગયા હોય એવું સંભવી શકે. ॥३०९॥

हिन्दी :- सचमुच मेरा मुख धोने के लिए, मेरे प्रेम से प्रेरित होकर जल लाने के लिये (नलराजा) कहीं गये हो, ऐसा लगता है ॥३०९॥

मराठी :- खरोखरच माझ्यावरील प्रेमाने प्रेरित होऊन नलराजा मला मुखशुध्दी करण्यासाठी पाणी आणून देण्याकरीता कोठेतरी गेला आहे. असे वाटते. ॥३०९॥

English :- She then wonders if Nal out of overwhelming love for her has gone in search of water, to wash her face.

यद्वा विद्याधरी काचि - दायाताऽत्र कथञ्चन ॥
नलं स्मरमिवालोक्य, निन्ये रमयितुं ध्रुवम् ॥३१०॥

अन्वय :- यद् वा काचिद् विद्याधरी कथञ्चन अत्र आयाता स्मरम् इव नलम् आलोक्य ध्रुवं रमयितुं निन्ये ॥३१०॥

विवरणम् :- यद् वा अथवा काचिद् विद्याः धरति इति विद्याधरः विद्याधरस्य स्त्री विद्याधरी कथञ्चन कथञ्चित् रीत्या अत्र अस्मिन् वने आयाता आगता स्मरं कामदेवम् इव नलम् आलोक्य दृष्ट्वा ध्रुवं निश्चितं रमयितुं निन्ये अनयत् ॥३१०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- अथवा काचिद् विद्याधरी कथञ्चित् अस्मिन् विपिने आगता आसीत्। कामदेवम् इव नलं निरीक्ष्य धृवं रमयितुम् अनयत् ॥३१०॥

ગુજરાતી :- અથવા કોઈક વિદ્યાધરી અહીં કોઈ પણ રીતે આવી ચડેલી લાગે છે, તથા કામદેવસરખા તે નલરાજાને જોઈને (તેની સાથે) વિલાસ કરવા માટે તેને ઉપાડી ગઈ લાગે છે. ॥૩૧૦॥

हिन्दी :- अथवा कोई विद्याधरी यहाँ पर किसी तरह आयी हो और कामदेव जैसे नलराजा को देखकर अपने साथ विलास करने के लिए ये उन्हें उठाकर ले गई हो, ऐसा लगता है॥३१०॥

मराठी :- किंवा कोणीतरी विद्याधरी येथे आली असेल, कामदेवासारख्या सुंदर नलराजाला पाहून त्याच्याबरोबर विलास करावा म्हणून त्यांना उचलून येऊन गेली असावी. असे वाटते. ॥३१०॥

English :- Or a Demi-goddess must have arrived here and seeing Nal (Who is like Cupid in all respects) must have lifted and taken him to have a jolly good and amorous time with him.

सैव भूस्तद्वनं तेऽमी, शाखिनस्ते शिलोच्चयाः ॥
स एको नयनानन्दी, नलो नालोकयते पुनः ॥३११॥

अन्वय :- सैव भूः तद्वनं अमी ते शाखिनः ते शिलोच्चयाः पुनः नयनान्दी स एकः नलः न आलोक्यते ॥३११॥

विवरणम् :- सा एव भूः पृथ्वी अस्ति। तद् एव वनम् अस्ति। अमी ते शाखाः येषां सन्ति इति शाखिनः ते वृक्षाः। ते शिलानाम् उच्चयाः राशयः शिलोच्चयाः शिलाराशयः पर्वताः सन्ति। किन्तु नयने आनन्दयति इत्येवंशीलः नयनानन्दी स एकः नलः न आलोक्यते। न दृश्यते ॥३११॥

सरलार्थ :- सा एव पृथ्वी अस्ति। तद् एव वनम् अस्ति। अमी ते वृक्षाः सन्ति। ते एव पर्वताः सन्ति। किन्तु नयनानन्दी सः एकः नलः न निरीक्ष्यते ॥३११॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- તે જ આ ભૂમિ છે, તે જ આ વન છે, તે જ આ વૃક્ષો છે તથા તે જ આ પત્થરના ઢગલા પડ્યા છે પરંતુ આંખોને આનંદ ઉપજાવનાર તે એક નલરાજા જ (અહીં) જોવામાં આવતા નથી. ॥૩૧૧॥

हिन्दी :- वही यह भूमि है, वही यह वन है, वही ये वृक्ष है तथा वही पत्थर के ढेर है परंतु आँखो को आनंद देनेवाले एक नलराजा ही यहाँ दिखाई नहीं दे रहे हैं॥३११॥

मराठी :- तीच ही भूमि आहे, तेच हे वन आहे, तेच हे वृक्ष आहेत. तेच पर्वत आहेत. परंतु डोळ्यांना आनंद देणारा केवळ एक नलराजाच येथे दिसत नाही. ॥३११॥

English :- She then says that the ground, the forest and the clouds (made of stones) are all the same. But King Nal, whose presence gives pleasancy to the eyes, is not present here.

इत्यनल्पविकल्पौघ - व्याकुलालोकयद्दिश : ॥
प्रियमप्रेक्ष्य च क्वाऽपि, स्वप्नार्थं पर्यभावयत् ॥३१२॥

अन्वय :- इति अनल्पविकल्पौघव्याकुला दिशः आलोकयत् क्वाऽपि प्रियम्अप्रेक्ष्य स्वप्नार्थं पर्यभावयत् ॥३१२॥

विवरणम् :- *इति एवं न अल्पाः अनल्पाः अनल्पाश्च ते विकल्पाश्च अनल्पविकल्पाः अनल्पविकल्पनाम् ओघः समूहः अनल्पविकल्पौघः अनल्पविकल्पौघेन व्याकुला विह्वला अनल्पविकल्पौघव्याकुला सा दमयन्ती दिशः आलोकयत् परं क्वापि कुतः अपि प्रियं नलं न प्रेक्ष्य अप्रेक्ष्य स्वप्नस्य : स्वप्नार्थः तं स्वप्नार्थं पर्यभावयत् व्यचारयत् ॥३१२॥*

भावार्थ :- इति अनल्पविकल्पौघव्याकुला दमयन्ती दिशः निरैक्षत क्वाऽपि च प्रियं नलम् अनालोक्य स्वप्नार्थं व्यचारयत्। इत्येवमनेकैः विकल्पैः व्याकुला दमयन्ती इतस्ततः दिशः अवलोक्य प्रियं नलं नाऽपश्यत्। तदा सा तस्य स्वप्नस्य अर्थं व्यचारयत्॥३१२॥

ગુજરાતી :- એવી રીતે અનેક પ્રકારના વિકલ્પોના સમૂહથી ગભરાયેલી તે દમયંતી બધી દિશાઓ તરફ જોવા લાગી, પરંતુ ક્યાંય પોતાના સ્વામીને ન જોવાથી તે સ્વપ્નનો અર્થ વિચારવા લાગી, ॥૩૧૨॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- इसप्रकार अनेक विकल्पो से व्याकुल होकर दमयंती चारों दिशाओं की ओर देखने लगी। फिर भी अपने स्वामी को न पाकर उस स्वप्न का विचार करने लगी ॥३१२॥

मराठी :- याप्रमाणे अनेक विकल्पाच्या समूहामुळे याबरलेली दमयंती चारही दिशाकडे पाहू लागली. पण आपला स्वामी नलराजा न दिसल्यामुळे ती त्या स्वप्नाच्या अर्थाचा विचार करू लागली. ॥३१२॥

English :- In this way Damyanti experienced fright with all such ambiguious doubts and kept looking around in all directions. But after a continuous vainful search she sat thinking about the meaning of her dream.

पुत्रपुष्पफलैराढ्यो, यश्चूतः स नलो नृपः ॥
स राज्यसुखसंभोगो, यत्फलास्वादनं मम ॥३१३॥

अन्वय :- पत्रपुष्पफलैः आढ्यः यः चूतःस नलनृपः। यत् मम फलास्वादनं सः राज्यसुखसम्भोगः अस्ति ॥३१३॥

विवरणम् :- पत्राणि च पुष्पाणि च फलानि च पत्रपुष्पफलानि तैः पत्रपुष्पफलैः आढ्यः युक्तः यः चूतः आम्रवृक्षः सः नलनृपः। यत् मम फलस्य आस्वादनं फलास्वादनं सः राज्यस्य सुखं राज्यसुखं। राज्यसुखस्य सम्भोगः राज्यसुखसम्भोगः अस्ति ॥३१३॥

सरलार्थ :- पत्रपुष्पफलैः युक्तः यः आम्रवृक्षः स नलनृपः अस्ति। यत् मम फलास्वादनं सः राज्यसुखसम्भोगः अस्ति ॥३१३॥

ગુજરાતી :- પત્રો, પુષ્પો તથા ફળોથી યુકત આમ્રવૃક્ષ, તે નલરાજા અને તેના ફળોનો જે મેં સ્વાદ લીધો તે રાજ્યસુખનો ભોગવટો જાણવો. ॥૩૧૩॥

हिन्दी :- पत्तों, फुलों, तथा फलों से युक्त वह आम्रवृक्ष जैसे नलराजा है, और उन फलो का जो स्वाद मैंने लिया वह राजसुख का भोग समझो ॥३१३॥

मराठी :- पाने, फुले, व फळांनी युक्त आम्रवृक्ष नलराजा आहे, आणि मी त्या फळांचा जो स्वाद येतला तो राज्यसुखाचा भोग आहे. ॥३१३॥

English :- She comes to a conclusion that the leaves, flowers and the fruits of the mango tree is King Nal in that form and the taste of fruits is the taste of the happiness found in the kingdom.

वन्यगन्धगजेन्द्रेण, यश्चासावुदमूल्यत ॥
स एष नैषधेर्दैवा - द्राज्यविभ्रंशविप्लवः ॥३१४॥

अन्वय :- वन्यगन्धगजेन्द्रेण यश्च असौ उदमूल्यत। सः एषः दैवात् नैषधेः राज्यविभ्रंशविप्लवः ॥३१४॥

विवरणम् :- वने भवः वन्यः। गन्धगजानाम् इन्द्रः गन्धगजेन्द्रः वन्यश्चाऽसौ गन्धगजेन्द्रः च, तेन वन्यगन्धगजेन्द्रेण वन्यमदोन्मत्तहस्तीन्द्रेण यद् च असौ आम्रवृक्षः उदमूल्यत उत्खातः सः एषः; दैवात् भाग्यात् निषधस्य अपत्यं पुत्रः नैषधिः नलः तस्य नैषधेः नलस्य राज्यात् विभ्रंशः राज्यविभ्रंशः राज्यभ्रंशात् विप्लवः राज्यभ्रंशविप्लवः अस्ति॥३१४॥

सरलार्थ :- वन्यमदोन्मत्तहस्तीन्द्रेण यद् च असौ आम्रवृक्षः उत्खातः स एषः भाग्यात् नलस्य राज्यविभ्रंशविप्लवः अस्ति। वन्यगजेन आम्रवृक्षस्योन्मीलनं दुर्दैववशात् नलस्य राज्यभ्रंशनमिवाऽस्ति॥३१४॥

ગુજરાતી :- જંગલી ઉન્મત્ત હાથીએ જે વૃક્ષને મૂળમાંથી ઉખેડી નાખ્યું, તે દૈવયોગે આ નલરાજાનો રાજ્યથી ભ્રષ્ટ થવાનો ઉપદ્રવ જાણવો. ॥३१४॥

हिन्दी :- जंगली हाथीने जैसे वह वृक्ष जड सहित उखाड दिया वह देवयोग से नलराजा का राज्य से भ्रष्ट होने का संकेत है ॥३१४॥

मराठी :- जंगली हत्तीने तो वृक्ष मुळासकट उपटून टाकला. तो देवयोगाने नलराजाचे राज्य भ्रष्ट होण्याचा संकेत आहे. ॥३१४॥

English :- The wild and fanatic elephant who had uprooted the tree meant the downfall of Nal. Means he had lost the kingdom to his brother Kubar.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अहं यत्पतिता चूता - त्तद्वियोग: प्रियादभूत् ॥
स्वप्नेनानेन जानेऽहं, दुर्लभं प्रियदर्शनम् ॥३१५॥

अन्वय :- अहं यत् चूतात् पतिता तत् प्रियात् वियोग: अभूत्। अनेन स्वप्नेन अहं जाने प्रियदर्शनं दुर्लभम् अस्ति ॥३१५॥

विवरणम् :- अहं यत् यस्मात् चूतात् आम्रवृक्षात् पतिता तत् तेन प्रियात् नलात् वियोग: अभूत् अभवत्, अनेन स्वप्नेन अहं जाने प्रियस्य दर्शनं प्रियदर्शनं दु:खेन लभ्यते इति दुर्लभम् अस्ति ॥३१५॥

सरलार्थ :- अहं यत् आम्रवृक्षात् पतिता तेन प्रियात् वियोग: अभवत्। अनेन स्वप्नेन अहं जानामि प्रियदर्शनं दुर्लभम् अस्ति ॥३१५॥

गुजराती :- વળી હું જે આમ્રવૃક્ષથી પડી, તે સ્વામીથી મારો વિયોગ થયો, આ સ્વપ્નથી હું એક અનુમાન કરું છું કે, હવે મારા સ્વામીનું દર્શન મને દુર્લભ છે. ॥३१५॥

हिन्दी :- और जो आम्रवृक्ष से मैं नीचे गिरी वह स्वामी से मेरा वियोग था। इस स्वप्न से मै ऐसा अनुमान करती हूँ, कि अब मेरे स्वामी का दर्शन मुझे दुर्लभ है ॥३१५॥

मराठी :- आणि मी आम्रवृक्षावरून आली पडली, तो माझ्या स्वामींचा वियोग आहे. या स्वप्नावरून मला असे वाटते की, आता माझ्या स्वामीचे दर्शन दुर्लभ आहे. ॥३१५॥

English :- She then says her fall meant, her seperation from her husband, and the dream meant, that it would be difficult to acquire and audience with her husband again.

ततो रोदितुमारब्धा, मुक्तकण्ठं विदर्भजा ॥
स्त्रीणां प्रकृतिभीरूणां, भवेद्धैर्यं किमापदि ॥३१६॥

अन्वय :- तत: विदर्भजा मुक्तकण्ठं रोदितुम् आरब्धा। प्रकृतिभीरूणां स्त्रीणां आपदि धैर्यं भवेत् किम्?॥३१६॥

विवरणम् :- तत: तदनन्तरं विदर्भजा दमयन्ती मुक्त: कण्ठ: यस्मिन् कर्मणि यथा स्यात् तथा मुक्तकण्ठं रोदितुम् आरब्धा। प्रकृत्या

भीरवः प्रकृतिभीरवः तासां प्रकृतिभीरूणां स्त्रीणां आपदि धैर्यं धीरता भवेत् किम्? ॥३१६॥

सरलार्थ :- तदनन्तरं दमयन्ती मुक्तकण्ठं रोदितुम् आरब्धा प्रकृतिभीरूणां स्त्रीणां आपदि धैर्यं भवेत् किम्? ॥३१६॥

ગુજરાતી :- પછી તે દમયંતી એકદમ પોકાર કરીને રડવા લાગી, કેમ કે સ્વભાવથી જ ભીરુણ એવી સ્ત્રીઓને સંકટ સમયે કેટલીક ધીરજ રહે? ॥३१६॥

हिन्दी :- फिर दमयंती जोर से रोने लगी, क्योंकि स्वभाव से भीरु ऐसी स्त्रीयों को संकटसमय में कहां तक धीरज रहे?॥३१६॥

मराठी :- नंतर दमयंती जोराने रड लागली कारण हळव्या स्वभावाच्या स्त्रियांना संकटाच्या वेळी धैर्य कसे असणार। ॥३१६॥

English :-Then Damyanti couldn't control her emotions and burst out crying, for how long can a soft-hearted woman have patience and keep her composure during a calamity and when is left in a lurch.

हहा नाथ त्वयाहं किं, त्यक्ता किं भारकृत्तव ॥
स्वनिर्मोकः कदापि स्यात्, किमु भाराय भोगिनः ॥३१७॥

अन्वय :- हहा नाथ। त्वया अहं किम् त्यक्ता? किं अहं तव भारकृत्। भोगिनः स्वनिर्मोकः कदापि भाराय स्यात् किमु ॥३१७॥

विवरणम् :- हहा खेदे! हे नाथ। त्वया अहं किं त्यक्ता? मुक्ता। किं अहं तव भारं करोति इति भारकृत् अभवम्। भोगः अस्य अस्ति इतिभोगी, तस्य भोगिनः सर्पस्य स्वस्य निर्मोकः स्वनिर्मोकः किमु कदापि भाराय स्यात् ॥३१७॥

सरलार्थ :- हहा नाथ! त्वया अहं किं त्यक्ता? किं तव भारकृत् अभवम्। सर्पस्य कदापि स्वनिर्मोकः किमु भाराय स्यात्। यथा सर्पस्य निर्मोकः भाराय न भवति। तथा पत्युः पतिव्रताभार्या भाराय न भवति। अतः त्वं मां किमुज्झः ॥३१७॥

ગુજરાતી :- અરે સ્વામી! આપે મારો શા માટે ત્યાગ કર્યો? શું હું આપને ભારે પડતી હતી? શું સર્પને કોઇ પણ દિવસે પોતાની કાંચળી ભાર કરનારી થાય છો? ॥३१७॥

P.P. Ac. Gunratnasuri M:S. Jun Gun Aaradhak Trust

हिन्दी :- अरे स्वामी ! आपने मेरा त्याग क्यों किया? क्या मैं आप के लिए भारी थी? क्या सर्प को अपनी कांचली भी कहीं भारी पडती है? ॥३१७॥

मराठी :- अरे स्वामी! तुम्ही माझा त्याग कां केला? काय मी तुम्हाला ओढ झाली होती? कधी सर्पाला आपली कात भारी होते काय? ॥३१७॥

English :- Then as she was weeping she asked her husband the reason for deserting her, was she a burden to him or does a snake ever feel that its slough is a burden to it ?

दीनाहं प्रार्थये युष्मान्, हंहो काननदेवता: ॥
सद्य: प्रसद्य भर्ता मे, दर्श्यतां तत्पथोऽथवा ॥३१८॥

अन्वय :- हंहो काननदेवता:! अहं दीना युष्मान् प्रार्थये । मे प्रसद्य सद्य: मे भर्ता दर्श्यतां अथवा तत्पथ: दर्श्यताम् ॥३१८॥

विवरणम् :- हंहो हम्भो! काननस्य देवता: काननदेवता: अहं दीना दु:खिता युष्मान् प्रार्थये विज्ञापये । मे मयि प्रसद्य मयि प्रसन्ना भूत्वा सद्य: शीघ्रं झटिति मम भर्ता पति: दर्श्यताम् अथवा तस्य नलस्य पन्था: मार्ग: तत्पथ: दर्श्यताम् ॥३१८॥

सरलार्थ :- हम्भो वनदेवता: । अहं दीना युष्मान् प्रार्थये । मयि प्रसन्ना: भूत्वा सत्वरं पति: दर्श्यताम् अथवा नलस्य मार्ग: दर्श्यताम् ॥३

ગુજરાતી :- હે વનદેવીઓ! હું દીન થઈને આપને પ્રાર્થના કરું છું કે, મારા પર કૃપા કરીને, તુરત મારા સ્વામીને દેખાડો અથવા મને તેમનો માર્ગ દેખાડો ! ॥૩૧૮॥

हिन्दी :- हे वनदेवियों! मैं दीन होकर आपसे प्रार्थना करती हूँ कि मुझपर कृपा करके तुरंत मेरे स्वामी के दर्शन कराओ, अथवा मुझे उनका मार्ग दिखाओ। ॥३१८॥

मराठी :- हे वनदेवींनो! मी दीन होऊन तुमची प्रार्थना करते की माझ्यावर कृपा करून मला माझ्या स्वामीचे दर्शन या किंवा मला त्यांचा मार्ग दाखवा. ॥३१८॥

English :- Then Damyanti appealing to the Goddesses of the forest asked them to see her forlorn plight and asks them to help her meet her husband or atleast show her the way he has taken.

पक्कवालुङ्कवत् पृथ्वि, स्फुट त्वत्कोटरे, यथा ॥
प्रविश्य प्राप्य पातालं, येन प्राप्नोमि निर्वृतिम् ॥३१९॥

अन्वय :- पृथ्वि? पक्कवालुङ्कवत् स्फुट। यथा त्वत्कोटरे प्रविश्य पातालं प्राप्य येन निवृत्तिं प्राप्नोमि ॥३१९॥

विवरणम् :- रे पृथ्वि भूमे। पक्कश्चासौ वालुङ्कश्च पक्कवालुङ्कः। पक्कवालुङ्केन तुल्यं पक्कवालुङ्कवत् स्फुट। यथा तव कोटरं उदरम् त्वत्कोटरं तस्मिन् त्वत्कोटरे तवोदरे प्रविश्य पातालं प्राप्य येन निर्वृतिं सुखं प्राप्नोमि ॥३१९॥

सरलार्थ :- रे भूमे। पक्कवालुङ्कवत् स्फुट। यथा त्वत्कोटरे प्रविश्य पातालं प्राप्य निर्वृतिं प्राप्नोमि ॥३१९॥

गुजराती :- અરે પૃથ્વી! તુ પાકેલાં ચીભડાંની પેઠે ફાટી જા કે જેથી તારી કોતરમાં પ્રવેશી પાતાળમાં જ હું શાંતિ પામું. ॥३१९॥

हिन्दी :- अरे पृथ्वी तू पके हुए खरबुज के समान फट जा जिस से मै तुझ में प्रवेश कर के पाताल मे जा कर शांति प्राप्त करूं ॥३१९॥

मराठी :- हे पृथ्वी। त् पिकलेल्या वाळकाप्रमाणे फुटून जा? जेणे करून मी तुझ्या उदरात प्रवेश करून पातळात जाऊन शांति मिळव् शकेन. ॥३१९॥

English :- Then Damyanti pleads to the earth to burst open as an over-riped musk-melon, so that she can enter it and stay in peace and harmony in the under world.

एवं च विलपन्ती सा, बाष्पौघैः पतयालुभिः ॥
कुल्याभ्यामिव दृष्टिभ्यां, सिञ्चतिस्म वनद्रुमान् ॥३२०॥

अन्वय :- एवं च विलपन्ती सा कुल्याभ्याम् इव दृष्टिभ्यां पतयालुभिः बाष्पौघैः वनद्रुमान् सिञ्चति स्म ॥३२०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- एवम् इति च विलपन्ती विलापं कुर्वती सा दमयन्ती कुल्याभ्याम् इव कृत्रिमसरिद्भ्याम् इव दृष्टिभ्यां नेत्राभ्यां पतयालुभिः बाष्पाणाम् अश्रूणाम् ओघाः समूहाः बाष्पौघाः तैः बाष्पौघैः वनस्य द्रुमाः वृक्षाः वनद्रुमाः तान् वनद्रुमान् सिञ्चति स्म असिञ्चित् ॥३२०॥

संस्कृतार्थ :- इति विलपन्ती सा दमयन्ती कुल्याभ्याम् इव नेत्राभ्यां पतद्भिः बाष्पौघैः वनवृक्षान् असिञ्चत् ॥३२०॥

ગુજરાતી :- એવી રીતે વિલાપ કરતી, દમયંતી નહેર સમાન (પોતાની) બન્ને આંખોમાંથી પડતા આંસુઓના સમૂહથી વનનાં વૃક્ષોને સિંચવા લાગી. ॥૩૨૦॥

हिन्दी :- इसप्रकार विलाप करती हुई दमयंती नहर समान अपनी दोनों आँखो से बहते आंसुओं से वृक्षो को सिंचने लगी॥ ॥३२०॥

मराठी :- असा विलाप करणाऱ्या दमयन्तीने पाटातून पडणाऱ्या पाण्याप्रमाणे डोळ्यातून वाहाणाऱ्या अश्रूंनी वनातील वृक्षांना सिंचन केले. ॥३२०॥

English :- In this way Damyanti began to bring out her emotions and lamentation in the from of tears. And began to water the trees around with her overflowing emotions.

नलं विना न कुत्रापि, प्रज्ज्वलद्विरहानला ॥
निर्वृतिं प्राप सा तप्ते, शफरीव शिलातले ॥३२१॥

अन्वय :- यथा तप्ते शिलातले शफरी निर्वृतिं न प्राप तथा नलं विना प्रज्ज्वलद्विरहानला सा कुत्रापि निर्वृतिं न प्राप ॥३२१॥

विवरणम् :- यथा तप्ते शिलायाः तले शिलातलं तस्मिन् शिलातले शफरी मत्स्यी निर्वृतिं सुखं न प्राप्नोति तथा नलं विना विरहः अनलः इव विरहानलः प्रज्ज्वलन् विरहानलः यस्याः सा प्रज्ज्वलद् विरहानला सा दमयन्ती कुत्रापि सुखं न प्राप ॥३२१॥

संस्कृतार्थ :- यथा तप्ते शिलातले मत्स्यः सुखं न प्राप्नोति तथा नलं विना विरहानलेन प्रज्ज्वलन्ती प्रज्ज्वलद्विरहानला सा दमयन्ती कुत्रापि सुखं न प्राप ॥३२१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- જેમ (સૂર્યના તાપથી) તપેલી શિલા પર માછલી સુખ ન પામે, તેમ નલ વિના દમયંતી વિરહરૂપી અગ્નિથી બળતી ક્યાંય પણ સુખ પામી નહીં. ॥૩૨૧॥

हिन्दी :- जैसे सूर्यकिरणों द्वारा तपी हुई शिला पर मछली तडपती है वैसे नल के बिना दमयंती विरहरूपी अग्नि मे जलती हुई कहीं भी सुख प्राप्त न कर सकी ॥३२१॥

मराठी :- उन्हाने तापलेल्या दगडावर मासे जसे सुख मिळवत नाहीत, तडफडतात, त्याप्रमाणें नलराजाच्या विरहाग्नीने जळणारी दमयन्ती नलाचा वृन कोठेही सुख मिळवत नव्हती. ॥३२१॥

English :- Just as a fish fulminates and writhes for life on a rock when the hot rays of the sun has heated it, in the same way Damyanti's wandering in the forest, was like a tunnel of fire where she was forced to go through in search of her beloved but to no avail.

भाम्यन्त्येवमरण्यानि, दृष्ट्वा वर्णान् पटाञ्चले ॥
प्रियप्राप्त्येव सा प्रीता - ऽवाचयद्विकचेक्षणा ॥३२२॥

अन्वय :- एवम् अरण्यानि भाम्यन्ती पटाञ्चले वर्णान् दृष्ट्वा विकचेक्षणा सा प्रियप्राप्त्या इव प्रीता अवाचयत् ॥३२२॥

विवरणम् :- *एवम् इति अरण्यानि वनानि भाम्यन्ती विचरन्ती सती पटस्य वस्त्रस्य अञ्चलः पटाञ्चलः तस्मिन् पटाञ्चले वर्णान् शब्दान् दृष्ट्वा अवलोक्य प्रियस्य नलस्य प्राप्तिः प्रियप्राप्तिः, तया प्रियप्राप्त्या इव प्रीता आनन्दिता विकचे विकसिते ईक्षणे यस्याः सा विकचेक्षणा, विकसितनयना अवाचयत् वाचयामास॥३२२॥*

सरलार्थ :- एवं वनानि विचरन्ती सती वस्त्राञ्चले शब्दान् निरीक्ष्य प्रियस्य प्राप्त्या इव आनन्दिता सा दमयन्ती विकस्वरनयना अवाचयत्

ગુજરાતી :- આવી રીતે વનમાં વિચરણ કરતી દમયન્તીએ પોતાની સાડીના આંચલ પર લખેલા અક્ષરો જોયા અને પતિની પ્રાપ્તિના આનંદને પ્રાપ્ત કરીને આંખો મોટી કરી તે એ અક્ષરો વાંચવા લાગી. ॥૩૨૨॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- इस प्रकार जंगल में भटकती दमयंतीने खुद के वस्त्र के आंचल पर लिखे हुऐ अक्षरो को देखकर जैसे अपने पति का मिलाप नही हुआ हो वैसे आनंदित हो कर आँखे बडी कर के पढने लगी ॥३२२॥

मराठी :- याप्रमाणे वनात भटकत असतांना दमयंती स्वत:च्या वस्त्राच्या पदरावर लिहिलेली अक्षरे पाहून जसे जणू आपल्या पतीची प्राप्ती झाल्याप्रमाणे आनंदित होऊन डोळे मोठे करून ती अक्षरे वाचू लागली. ॥३२२॥

English :- Then as she was wandering about, she happened to see the message written on her garment. She was so overjoyed, as though she was having a meeting with her beloved and she read it with atmost concentration and with big eyes.

अन्वय :- सा अचिन्तयत्-प्रिय: मां मुक्त्वा देहेन एव अगमत् किन्तु आदेशव्यपदेशेन मन: मदभ्यर्णे अमुचत् ॥३२३॥

विवरणम् :- सा दमयन्ती अचिन्तयत् व्यचारयत् । प्रिय: नल: मां मुक्त्वा त्यक्त्वा देहेन शरीरेण एव अगमत् अगच्छत् । किन्तु आदेशस्य व्यपदेश: व्याज: आदेशव्यपदेश: तेन आदेशव्यपदेशेन मन: हृदयं मम अभ्यर्णं मदभ्यर्णं तस्मिन् मदभ्यर्णे मत्समीपे अमुञ्चत् मुमोच ॥३२३॥

सरलार्थ :- सा दमवन्ती व्यचारयत् - प्रिय: मां त्यक्त्वा शरीरेण एव अगच्छत्। किन्तु आदेशव्याजेन मन: मम समीपे अमुञ्चत् ॥३२३॥

ગુજરાતી :- પછી તે વિચારવા લાગી કે, મારા સ્વામી મને છોડીને ફક્ત શરીરથી જ દૂર થયા છે, આ લખેલી આજ્ઞા પરથી લાગે છે કે તેમણે પોતાનું હૃદય તો મારી પાસે જ મૂક્યું છે.॥૩૨૩॥

हिन्दी :- फिर वह विचार करने लगी कि मेरे स्वामी मुझे छोडकर केवल शरीर मात्र से दूर गये हैं, वैसे लिखी हुई आज्ञा के बहाने उन्होंने अपना हृदय तो मेरे पास ही रखा है ॥३२३॥

मराठी :- नंतर ती विचार करू लागली की, माझे पती मला सोडून फक्त शरीरानेच दूर गेले आहे, पण आज्ञेच्या मिषाने त्यांनी त्यांचे मन माझ्याजवळच सोडले आहे. ॥३२३॥

English :- Then she thinks that her beloved has only left her bodily but through the message it signifies that his heart is still here with her.

गुर्वादिशमिवालङ्घ्यं, पत्यादेशमिमं मम ॥
यथोक्तं विदधानाया, नेह लोकेऽस्ति दूषणम् ॥३२४॥

अन्वय :- गुर्वादिशम् इव अलङ्घ्यम् । इमं पत्यादेशम् यथोक्तं विदधानायाः मम इह लोके दूषणं नास्ति ॥३२४॥

विवरणम् :- *गुरोः आदेशः आज्ञा गुर्वादिशः तं गुर्वादिशम् इव न लङ्घ्यः अलङ्घ्यः तम् अलङ्घ्यं पत्युः आदेशः पत्यादेशः तं पत्यादेशम् । उक्तम् अनतिक्रम्य यथोक्तम् उक्तानुसारेण विदधानायाः कुर्वत्याः आचरन्त्याः मम इह अस्मिन् लोके जगति दूषणं नास्ति ॥३२४॥*

सरलार्थ :- गुर्वादेशम् इव अलङ्घ्यम् इमं पत्यादेशम् उक्ताऽनुसारेण कुर्वत्याः मम इह लोके दूषणं नास्ति ॥३२४॥

गुजराती :- ગુરુમહારાજની આજ્ઞાની જેમ નહીં ઉથાપવા જેવી આ મારા સ્વામીની આજ્ઞાને પાળવાથી મને આ લોકમાં પણ દોષ લાગવાનો નથી. ॥३२४॥

हिन्दी :- गुरूमहाराज की आज्ञा के समान मेरे स्वामी की आज्ञा को पालने से मुझे इस लोक में भी दोष नही लगेगा ॥३२४॥

मराठी :- गुरूच्या आज्ञेप्रमाणे माझ्या पतीचा आदेश मला अलंघ्य आहे. म्हणून त्यांच्या सांगण्याप्रमाणे त्या आदेशाचे पालन करणाऱ्या मला या जगात काहीच दोष नाही. ॥३२४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Just as one has to give an ear to the commands of a priest, in the same way Damyanti decides to listen to her love's command as it is not a disgrace nor a difility in the world to cherish and nurture her husband's wishes.

तथापि पैतृकं वेश्म, निःशंका भर्तुराज्ञया ॥
स्त्रीणां परिभवायैव, श्वाशुरं तु पतिं विना ॥३२५॥

अन्वय :- तद् भर्तुः आज्ञया निःशङ्का पैतृकं वेश्म यामि। पतिं विना श्वाशुरं तु स्त्रीणां परिभवाय एव भवति ॥३२५॥

विवरणम् :- *तद् तस्मात् भर्तुः पत्युः आज्ञया आदेशेन निर्गता शङ्का यस्याः सा निःशङ्का शङ्कारहिता अहं पितुः आगतं पैतृकं वेश्म गृहं यामि गच्छामि। पितृगृहं यामि। यतः पतिं भर्तारं विना श्वशुरस्य इदं श्वाशुरं गृहं स्त्रीणां परिभवाय एव भवति ॥३२५॥*

सरलार्थ :- तस्मात् पत्युः आज्ञया निशङ्का अहं पैतृकं गृहं गच्छामि। पतिं विना श्वाशुरं गृहं स्त्रीणां परिभवाय एव भवति। पतिं विना श्वशुरगृहे निवासः पराभवाय एव भवति॥३२५॥

ગુજરાતી :- માટે હવે આ મારા સ્વામીની આજ્ઞાથી નિઃશંકપણે હું પિતાને ઘરે જાઉં, કેમ કે ભર્તાર વિનાનું સાસરું સ્ત્રીઓને દુઃખદાયક જ નિવડે છે ॥૩૨૫॥

हिन्दी :- इसलिये अब मैं मेरे स्वामी की आज्ञा से बिना किसी शंका से पिता के घर जाती हूँ, क्यों कि पति के बिना उसका ससुराल स्त्री के लिये दुःखदायी है ॥३२५॥

मराठी :- यासाठी आता मी माझ्या पतीच्या आज्ञेप्रमाणे निःसंकोचपणे माझ्या वडिलांच्या घरी जाईन, कारण पतीशिवाय सासरघर स्त्रीसाठी दुःखदायक आहे. ॥३२५॥

English :- So, she decides to accept her beloved's command and without any doubt and dauntlessly proceeds towards her father's house because the father-in-law's house without a husband will seem very painful and a troublesome one.

इति निश्चित्य वैदर्भी, दक्षिणस्यां वटद्रुमात् ॥
नलाक्षराणि नलवन्मन्यमाना चचाल सा ॥३२६॥

अन्वय :- इति निश्चित्य नलाक्षराणि नलवत् मन्यमाना सा वैदर्भी वटद्रुमात् दक्षिणस्यां चचाल ॥३२६॥

विवरणम् :- इति एवं निश्चित्य निर्णयं कृत्वा नलस्य अक्षराणि शब्दाः नलाक्षराणि नलेन तुल्यं नलवत् मन्यमाना सा विदर्भाणामीश्वरः वैदर्भः। वैदर्भस्य अपत्यं स्त्री वैदर्भी दमयन्ती वट एव द्रुमः वटद्रुमः तस्मात् वटद्रुमात् वटवृक्षात् दक्षिणस्यां विशायां चचाल अचलत् अचालीत् ॥ अर्थात् विदर्भान् चचाल॥३२६॥

सरलार्थ :- एवं निर्णयं कृत्वा दमयन्ती नलाक्षराणि नलवत् मन्यमाना वटवृक्षात् दक्षिणस्यां दिशायाम् अचलत् ॥ अर्थात् विदर्भान् प्रत्यचलत्॥३२६॥

ગુજરાતી :- એમ નિશ્ચય કરીને દમયંતી, નલરાજાના અક્ષરોને નલરાજાની જેમ માનતી, વડના વૃક્ષથી જમણી તરફની દિશામાં ચાલવા લાગી. ॥३२६॥

हिन्दी :- ऐसा निश्चय कर के वह दमयंती, नलराजा के अक्षरों को नलराजा के समान मानकर, वटवृक्ष की दक्षिण दिशा की ओर चलने लगी ॥३२६॥

मराठी :- असा निश्चय करून ती दमयंती नलराजाच्या अक्षरांना नलराजा प्रमाणे समजून वटवृक्षाच्या दक्षिण बाजूने विदर्भ देशाकडे चालू लागली. ॥३२६॥

English :- So having decided and taking Nal's words as Nal himself saying it, she turned towards the right of the oak tree and walks along the path to her father's kingdom

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्षुधाकशलाः शार्दूलाः, दृषदोऽपि जिघत्सवः ॥
नांतिकेऽप्यभवंस्तस्याः, कृशानोरिव भीरवः ॥३२७॥

अन्वय :- कृशानोः इव भीरवः क्षुधाकशलाः दृषदः अपि जिघत्सवः शार्दूलाः कृशानोः इव तस्याः अन्तिके अपि नाभवन् ॥

विवरणम् :- कृशानुः हुताशनः तस्मात् कृशानोः अग्नेः इव भीरवः यथा भीरवः अग्नेः समीपमप्यागन्तुं न शवनुवन्ति तथा क्षुधया कशलाः भीषणाः क्षुधाकशलाः, दृषदः प्रस्तरान् अपि अत्तुम् इच्छवः जिघत्सवः शार्दूलाः सिंहाः तस्याः दमयन्त्या अन्तिके समीपे अपि न अभवन् ॥३२७॥

सरलार्थ :- अग्नेः इव भीरवः क्षुधया भवङ्कराः प्रस्तरानुपलानपि खादितुमिच्छवः सिंहाः अग्नेःइव तस्याः दमयन्त्याः भयेन तस्याः समीपेऽपि नाऽभवन्। नाऽऽसन्॥३२७॥

ગુજરાતી :- જાણે પત્થરોને પણ તોડીને ખાઈ જવાની ઇચ્છા કરતા અને ભુખથી ભયંકર બનેલા સિંહો પણ અગ્નિસરખી એવી તે દમયંતીથી જાણે ડરી ગયા હોય તેમ તેણીની નજીક પણ આવી શક્યા નહીં. ॥૩૨૭॥

हिन्दी :- मानो पत्थरों को भी तोडकर खा जानेकी इच्छा करते हो ऐसे भूखसे व्याकुल शेर भी अग्नि जैसी उस दमयंती से डर कर उसके नजदीक भी आ नही सके ॥३२७॥

मराठी :- जणू काही दगडाला पण तोडून खाऊन टाकण्याची इच्छा करणारे भुकेने भयंकर बनलेले सिंह पण त्या अग्निसमान अश्या दमयंतीला जणू काय भिऊन तिच्याजवळही येऊ शकले नाही.॥३२७॥

English :- The lion who is straying around in search of food is so hungry, that he is even capable of breaking the stones and having them. But as he sees Damyanti he is overcome with fright as she is a mass of fire blazing in brightness.

Serving Jinshasan
073763
gyanmandir@kobatirth.org

प्रतिदन्तिभ्रमाद्यो स्व-च्छायामप्यसहिष्णवः ॥
द्विपास्तेऽप्यत्यजन् भीतास्तां सिंहीमिव दूरतः ॥३२८॥

अन्वय :- प्रातदान्तभ्रमात् स्वच्छायाम् अपि असहिष्णवः ये द्विपाः ते अपि भीताः सिंहीम् इव तां दूरतः एव अत्यजन् ॥३२८॥

विवरणम् :- *प्रतिगताः दन्तिनः प्रतिदन्तिनः । प्रतिदन्तिनः इति भ्रमः प्रतिदन्तिभ्रमः तस्मात् प्रतिदन्तिभ्रमात् - एते प्रतिदन्तिनः सन्ति इति भ्रमात् स्वस्य छाया स्वच्छाया तां स्वच्छायाम् अपि न सहिष्णवः असहिष्णवः स्वच्छायामपि प्रतिदन्तिनो मत्वा बिभ्यतः । ये द्वाभ्यां मुखशुण्डाभ्यां पिबन्ति इति द्विपाः गजाः ते अपि भीताः सिंहीम् इव तां दमयन्तीं दूरतः एव अत्यजन् ॥३२८॥*

सरलार्थ :- स्वच्छायामवलोक्य तामपि प्रतिदन्तिन: मत्वा बिभ्यत: गजा: सिंहीमिव तां दमयन्तीं दूरत एवाऽ त्यजन्। भयाकुला गजा यथा सिंही दूरत: त्यजन्ति तथा तां दमयन्तीमपि दूरत एव अत्यजन्॥३२८॥

ગુજરાતી :- દુશ્મન હાથીની ભ્રાંતિથી જેઓ પોતાના પડછાયાને પણ સહન કરી શકતા નથી, એવા તે ક્રૂર જંગલી હાથીઓ પણ તેણીને સિંહણ માનીને ડરી ગયા હોય તેમ તેણીને દૂર જ છોડીને જતા હતા.॥૩૨૮॥

हिन्दी :- दुश्मन हाथी की भ्रांति से जो स्वयं की परछांयी भी सहन नही कर सकते, ऐसे क्रूर जंगली हाथीभी उसे शेरनी मानकर मानो डर गये हो! वैसे उसे दूर ही छोड कर जाते थे ॥३२८॥

मराठी :- स्वत:च्या सावलीलाच प्रतिहत्ती समजून सहन न करणारे जंगली हत्ती सिंहिणीप्रमाणे असलेल्या दमयन्तीला जणू काय याबरूनच तिच्यापासून दूरच राहात असत.॥३२८॥

English :- An elephant who has turned cruel by just seeing is own shadow and estimating it as the enemy elephant's shadow gets ready to have a dual with it. But even such an elephant who is blazing manger, will not be able to confront Damyanti as it sees a deadly tigress in her.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धत्ते श्यामत्वमद्यापि, यद्धूमश्यामलं नभः ॥
स्पृष्टो वृष्ट्येव यद्दृष्ट्या, दवः सोऽप्युपशान्तवान् ॥३२९॥

अन्वय :- यद्धूमश्यामलं नभः अद्यापि श्यामत्वं धत्ते। वृष्ट्याइव यद्दृष्ट्या स्पृष्टः सः दवः अपि उपशान्तवान् ॥३२९॥

विवरणम् :- यस्य धूमःयद्धूमः, यद्धूमेन श्यामलं श्यामवर्णं यद्धूमश्यामलं नभः आकाशम् अद्यापि अधुना अपि श्यामस्य कृष्णस्य भावः श्यामत्वं धत्ते। वृष्ट्या इव यद्दृष्ट्या दृशा स्पृष्टः सः दवः दावाग्निः अपि उपशान्तवान् ॥३२९॥

सरलार्थ :- दावाग्नेः धूमेन श्यामलं नभः अद्यापि श्यामवर्णं वर्तते। सःदवः अपि इदानीं वृष्टया इव तद्दृष्टया उपशान्तवान् उपाशाम्यत्॥३२९॥

ગુજરાતી :- જે દાવાનળના ધૂમાડાથી મલીન થયેલું આકાશ હજુ પણ શ્યામપણાને ધારણ કરતું હતું, તે દાવાનળ પણ મેઘવૃષ્ટિ સરખી દમયંતીની દૃષ્ટિ પડવાથી શાંત થઈ ગયો. ॥૩૨૯॥

हिन्दी :- जिस दावानल के धुंअें से मलीन होकर आकाश अभी तक कालीमा युक्त था, वह दावानल भी दमयंती की मेघवृष्टि समान दृष्टि पडते ही शांत हो गया ॥३२९॥

मराठी :- ज्या दावानलाच्या धुराने मलीन झालेले आभाळ अजूनसुध्दा श्यामपणाला धारण करीत आहे. तो दावानल पण मेघवृष्टिसारखी त्या दमयंतीची दृष्टि पडताच शांत झाला. ॥३२९॥

English :- The smoke which has been emited by the forest confragration has made the sky dirty and insipid as ever. But the glimpse of Damyanti which seem like the roaring rain, has even scared the confragration and has calmed it down.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

फटाटोपेन ये रेजु - र्धृतच्छत्रा इवावनौ ॥
अभ्यसर्पन्न ते सर्पा, यां नागदमनीमिव ॥३३०॥

अन्वय :- ये सर्पाः फटाटोपेन अवनौ धृतछत्रा इव रेजुः ते सर्पाः नागदमनीम् इव याम् न अभ्यसर्पन् ॥३३०॥

विवरणम् :- *ये सर्पाः भुजङ्गाः फटानां फणानाम् आटोपः विस्तारः फटाटोपः, तेन फटाटोपेन फणाविस्तारेण, अवनौ भूमौ धृतानि छत्राणि यैः ते धृतछत्राः इव रेजुः शुशुभिरे। ते सर्पाः नागान् दाम्यति इति नागदमनी नागदमनकारिणीम् औषधिम् इव यां दमयन्तीं न अभ्यसर्पन् ॥३३०॥*

सरलार्थ :- ये सर्पाः फणाविस्तारेण भूमौ धृत्रछत्रा इव शुशुभिरे। ते सर्पाः नागदमनीम् इव यां दमयन्तीं न अभ्यसर्पन् ॥३३०॥

गुजराती :- ફણોના આડંબરથી જાણે (પોતાને) માથે છત્રો ધરતા હોય એમ પૃથ્વીપર (ભમતા) સર્પો પણ તે દમયંતીને નાગદમની નામની ઔષધિની પેઠે માનીને તેની સન્મુખ આવી શક્યા નહીં. ॥૩૩૦॥

हिन्दी :- फनो के विस्तार से मानो वे (अपने) सिर पर छत्र धारण करते हैं ऐसे पृथ्वीपर (भ्रमण करनेवाले) सर्प भी उस दमयंती को नागदमनी नामक औषधी के समान समझकर उसके पास भी आ नहीं सके ॥३३०॥

मराठी :- आपल्या होक्यावर विस्तृत फणारूपी छत्र धारण करून पृथ्वीवर शोभणारे सर्प दमयंतीला नागदमनी नावाची औषधी समजून तिच्याजवळ येत नव्हते. ॥३३०॥

English :- The protraction and size of a hood of a Shesha-serpent seems like an umberalla on one's head. In the same way all the types of snakes on the earth, used to take Damyanti as the deadly medicinal herb, (Nagdamni) and used to leave her alone.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उपसर्गा न केऽप्यन्ये, मार्गे तामुपदुद्रुवुः ॥
पतिव्रतत्वमेवेह, योषितां ह्यङ्गरक्षकम् ॥३३१॥

अन्वय :- अन्ये केऽपि उपसर्गाः मार्गे तां न उपदुद्रुवुः । इह पतिव्रतत्वम् एव योषिताम् अङ्गरक्षकम् अस्ति ॥३३१॥

विवरणम् :- अन्ये अपरे केऽपि उपसर्गाः उपद्रवाः मार्गे तां दमयन्तीं न उपदुद्रुवुः न पीड़यामासुः । इह अस्मिन् जगति पतिः एव व्रतं यस्याः सा पतिव्रता । पतिव्रतायाः भावः पतिव्रतत्वम् एव योषितां स्त्रीणाम् अङ्गानां रक्षकं अङ्गरक्षकं अस्ति ॥३३१॥

सरलार्थ :- अन्ये केऽपि उपसर्गाः मार्गे तां दमयन्तीं न अपीडयन् । इह लोके पतिव्रतत्वमेव योषिताम् अङ्गरक्षकम् अस्ति ॥३३१॥

ગુજરાતી :- વળી બીજા કોઇ પણ ઉપસર્ગોએ માર્ગમાં તેણીને ઉપદ્રવ કર્યો નહીં, કેમ કે આ જગતમાં સ્ત્રીઓનું પતિવ્રતાપણું જ તેના શરીરનું રક્ષણ કરનારું છે. ॥૩૩૧॥

हिन्दी :- फिर और किसी भी उपसर्गोंने उसके मार्ग में उपद्रव नही किया क्यों कि इस जगत में स्त्रीओं का पतिव्रताव्रत ही उसके शरीर का रक्षण करता है ॥३३१॥

मराठी :- नंतर दुसऱ्या कोणत्याही उपसर्गांनी तिला मार्गात त्रास दिला नाही. कारण की, या जगात स्त्रीचे पतिव्रताव्रत हेच तिच्या शरीराचे रक्षण करणारे आहे. ॥३३१॥

English :- Then no other calamity decided to create chaos or a protentious phenomenon on the way because only a religious vow of virtuous and a chaste wife in this world can take care of herself.

विसंस्थुलितकेशी सा, वनेचरवधूरिव ॥
जलदेवीव सर्वाङ्ग - प्रस्वेदसलिलप्लुता ॥३३२॥

अन्वय :- विसंस्थुलितकेशी सा वनेचरवधूः इव सर्वाङ्गप्रस्वेदसलिलप्लुता जलदेवी इव दृश्यमाना ॥३३२॥

विवरणम् :- *विसंस्थुलिताः अस्ताव्यस्ताः केशाः यस्याः सा विस्थुंलितकेशी सा दमयन्ती वने चरति इति वनेचरः वनेचरस्य वधूः वनेचरवधूः वनचरी इव सर्वाणिच तानि अङ्गानि च सर्वाङ्गानि। सर्वाङ्गेषु प्रस्वेदः सर्वाङ्गप्रस्वेदः। सर्वाङ्गप्रस्वेदस्य सलिलं सर्वाङ्गप्रस्वेदसलिलम्। सर्वाङ्गप्रस्वेदसलिलेन प्लुता सर्वाङ्गप्रस्वेदसलिलप्लुता। सा दमयन्ती जलस्य देवी जलदेवी इव दृश्यमाना ॥३३२॥*

संस्कृतार्थ :- अस्ताव्यस्तकेशी सा दमयन्ती वनचरी इव अदृश्यत। सर्वाङ्गेषु प्रस्वेदसलिलेन आर्द्रा सा जलदेवी इव अदृश्यत ॥३३२॥

गुजराती :- વિખરાઈ ગયેલા કેશવાળી તે વનમાં ભમતી રાક્ષસી સરખી દેખાવા લાગી તથા શરીર પર પસીનાના જલ વડે ભીંજાએલી તે જલદેવી સરખી ભાસવા લાગી. ॥૩૩૨॥

हिन्दी :- बाल बिखर जाने से वह वन में घूमनेवाली राक्षसी के समान दिखने लगी और पूर्ण शरीरपर पसीने के जल से भिग जाने से जलदेवी समान दिखने लगी ॥३३२॥

मराठी :- केस विसव्हून गेल्याने ती वनात फिरणाऱ्या राक्षसीप्रमाणे वाटू लागली, तर तिचे पूर्ण शरीर यामाने ओलेचिंब झाल्यामुळे ती जलदेवी सारखी पण भासू लागली. ॥३३२॥

English :- As her hair was strewn about due to utmost sadness, she seemed like a demi-Godess roaring about in the forest. And as she had taken a dip in the river of pespiration, she seemed to be a Goddess of aqua (water).

स
कण्टकिद्रुमसङ्घर्ष - क्षरद्रुधिरसीकरा ॥
रम्भेव कथमप्यासं - काश्मीरविरलच्छटा ॥३३३॥

अन्वय :- कण्टकिद्रुमसङ्घर्षक्षरद्रुधिरसीकरा कथम्अपि आसकाश्मीरविरलच्छटा रम्भा इव दृश्यमाना सा ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- कण्टकाः येषां सन्ति इति कण्टकिनः कण्टकिनश्च ते द्रुमाश्च कण्टकिद्रुमाः कण्टकिद्रुमाणां सङ्घर्षः कण्टकिद्रुमसङ्घर्षः। रुधिरस्यरक्तस्यसीकराः रुधिरसीकराः। कण्टकिद्रुमसङ्घर्षात् क्षरन्तः रुधिरसीकराः यस्याः एतादृशी, कथम् अपि कथञ्चित् अपि काश्मीरस्य केशरस्य विरलाश्च ताः छटाश्च काश्मीरविरलच्छटाः, आमाः काश्मीरविरलच्छटाः यया सा आमकाश्मीरविरलच्छटा रम्भा अप्सराः इव दृश्यमाना ॥३३३॥

सरलार्थ :- कण्टकितद्रुमसङ्घर्षात् यस्याः शरीरात् रुधिरस्य बिन्दवः क्षरन्ति, एतादृशी अतएव कथञ्चिदपि यस्याः शरीरे केशरस्य विरलाः छटाः सन्ति एतादृशी सा रम्भा अप्सरा इव अदृश्यत ॥३३३॥

ગુજરાતી :- કાંટાવાળા વૃક્ષોમાં ઉઝરડાવાથી ઝરતા રૂધિરના બિંદૂઓ વાળી તે દમયંતી, કોઈપણ રીતે થયેલા કેસરના છંટકાવવાળી રંભા નામની અપ્સરા સરખી દેખાતી હતી. ॥૩૩૩॥

हिन्दी :- काँटे के वृक्षमें उलझ जाने से उसके शरीर पर जो घाव हो गये थे, उनमें से टपकते हुए खूनके बिंदूओवाली वह दमयंती किसी भी प्रकारसे केसरके छंटकाववाली रंभानामक अप्सरा समान दिखने लगी। ॥३३३॥

मराठी :- काटेरी वृक्षांना खरचटल्यामुळे शरीरातून रक्ताचे थेंब गळत असलेली दमयंती केशराच्या विरलच्छटा असलेल्या रम्भा अप्सरेप्रमाणे दिसत होती. ॥३३३॥

English :- Damyanti then happened to enter a thorny tree which was comouflaged with throns. When she came out of it she experienced horrorful bruises with blood oozing out of them. Now she seemed like a fairy (apsara) named Rambha who had saffron sprinkled all over her body.

रुः

तमोग्रस्तेन्दुलेखेव, मार्गरिणुहतद्युतिः ॥
व्रजति त्वरितं दाव - भयभीरुः करेणुवत् ॥३३४॥

अन्वय :- मार्गरिणुहतद्युतिः तमोग्रस्तइन्दुलेखा इव दावभयभीरुः करेणुवत् त्वरितं सा व्रजति ॥३३४॥

विवरणम् :- *मार्गस्य रेणुः धूलिः मार्गरिणुः । मार्गरिणुना हता द्युतिः कान्तिः यस्याः सा मार्गरिणुहतद्युतिः अतएव तमोभिः अन्धकारैः ग्रस्ता तमोग्रस्ता । इन्दोः लेखा इन्दुलेखा । तमोग्रस्ता चासौ इन्दुलेखाच तमोग्रस्तेन्दुलेखा इव दावात् भयं दावभयं दावभयात् भीरुः दावभयभीरुः करेणुवत् हस्तिनीवत् त्वरितं शीघ्रं सा दमयन्ती व्रजति ॥३३४॥*

सरलार्थ :- मार्गरिणुभिः दमयन्त्याः कान्तिः मलिना अभवत्। तेन सा अन्धकारेण ग्रस्ता चन्द्रकला इव अदृश्यत। स वनवह्निभयात् भीरूः हस्तिनी इव शीघ्रमगच्छत् ॥३३४॥

ગુજરાતી :- માર્ગમાં ઉડતી ધુળથી નિસ્તેજ બનેલી દમયંતી અંધકારથી (વાદળાંથી) છવાયેલી ચંદ્રની કળા સરખી દેખાતી હતી. અને દાવાનળથી ભયભીત થયેલી હાથીણીની પેઠે ઉતાવળે પગલે ચાલતી હતી.॥૩૩૪॥

हिन्दी :- रास्तेमें उडनेवाली धूलसे जिसकी कांति लुप्त हुई है, ऐसी दमयंती अंधकार से ढकी चंद्र की कोर जैसी दिखने लगी और दावानल से भयभीत हुई हाथनी जैसी जल्दी जल्दी चलने लगी ॥३३४॥

मराठी :- रस्त्यात उडणाऱ्या धुळीने जिची कांति लुप्त झाली आहे अशी ती दमयंती अंधाराने ग्रासलेल्या चंद्राच्या कलेसारखी दिसत होती आणि दावानळाने भयभीत झालेल्या हत्तीणी सारखी लवकर लवकर चालत होती. ॥३३४॥

English :- The flying dust and smoke had concealed the lustre and gloss of Damyanti. In the same way the moon too had become viewless due to the clouds covering it and only a phase of the moon could be seen. Damyanti ran faster like a she-elephant as she was afraid of a forest confragration, breaking out.

वसन्तसार्थवाहस्य, सार्थमावासितं पुरः ॥
पश्यति स्म महाभोगं, कटकं क्ष्मापतेरिव ॥३३५॥

अन्वय :- पुरः आवासितं वसन्तसार्थवाहस्य सार्थं क्ष्मापतेः महाभोगं कटकम् एव पश्यति स्म ॥३३५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- *पुरः पुरस्तात् आवासितं पुरः निवेशितं, सार्थं वहति इति सार्थवाहः । वसन्तश्चासौ सार्थवाहश्च वसन्तसार्थवाहः तस्य वसन्तसार्थवाहस्य सार्थं क्ष्मायाः पतिः क्ष्मापतिः पृथ्वीपतिः तस्य क्ष्मापतेः पृथ्वीपतेः महान् आभोगः यस्य तत् महाभोगं कटकं सैन्यम् इव ददर्शेति स्म अपश्यत् ॥३३५॥*

संस्कार्य :- पुरः निवेशितं वसन्तसार्थवाहस्य सार्थं पृथ्वीपतेः महाभोगं सैन्यम् इव अपश्यत् ॥३३५॥

गुजराती :- (એવામાં તે દમયંતીએ) રાજાના સૈન્યની પેઠે અત્યંત જાહોજલાલીવાળા અને પડાવ નાખીને પડેલા એવા વસંત નામના સાર્થવાહને આગળના ભાગમાં જોયો. ॥૩૩૫॥

हिन्दी :- (इतनेमें उस दमयंतीने) राजा के सैन्य के जैसे समृद्धि वाले और पडाव डाले हुअे वसंत नामक सार्थवाह को सामने के भाग में देखा ॥३३५॥

मराठी :- इतक्यात दमयंतीने समोरच वसन्त सार्थवाहाने उभारलेली छावणी राजाच्या लांबवर पसरलेल्या सैन्याप्रमाणे पाहिली. ॥३३५॥

English :- Just then she happened to see a man who seemed like a king named Vasant with profuse prosperity and wealth, with an army and who had encamped there for a while.

दध्यौ चापारकान्तार - निस्तारणमहारथः ॥
लेभे यदत्र सार्थोऽयं, नूनं पुण्यलवोऽस्ति ततः ॥३३६॥

अन्वय :- सा दध्यौ यद् अत्र अपारकान्तार निस्तारणमहारथः अयं सार्थः लेभे। तत् नूनं पुण्यलवः अस्ति ॥

विवरणम् :- *सा दमयन्ती अध्यायत् दध्यौ यद् अत्र अस्मिन् वने अपारं च तद् कान्तारं च अपारकान्तारं, अपारकान्तारात् निस्तारणम् अपारकान्तारनिस्तारणम्। महान् चासौ रथश्च महारथः अपारकान्तारनिस्तारणाय महारथः अपारकान्तारनिस्तारणमहारथः अपारविपिनात् पारयितुं महारथसदृशः सार्थः सङ्घः लेभे। तत् नूनं निश्चितं पुण्यस्य लवः अंशः पुण्यलवः अस्ति ॥३३६॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org
Shri Gun Aaradhak Trust

सरलार्थ :- सा दमयन्ती अचिन्तयत् यद् अस्याम् अटव्याम् अपारवनात् पारयितुं महारथसदृशः अयं वसन्तसार्थवाहस्य सार्थः प्राप्तः। तत् नूनं मम पुण्यलवः अस्ति ॥३३६॥

ગુજરાતી :- ત્યારે તે વિચારવા લાગી કે, આ બહુ મોટા જંગલને ઉલ્લંઘી જવા માટે મહાન રથ સરખો મને આ સાર્થવાહનો મેળાપ થયો છે, ખરેખર હજુ મારાં પુણ્યનો અંશ વિદ્યમાન છે. ॥૩૩૬॥

हिन्दी :- तब वह सोचने लगी कि, इस बहुत बडे जंगल को पार करने के लिए महान् रथ के समान मुझे सार्थवाह का मिलाप हुआ है, उससे मैं जानती हूँ कि सचमुच अभी भी मेरे पुण्य का अंश विद्यमान है ॥३३६॥

मराठी :- आणि ती विचार करू लागली की, या महारण्यात अपार वनातून पार करण्यासाठी महारथाप्रमाणे उपयोगी पडणारा हा वसंत सार्थवाहाचा संग प्राप्त झाला. त्यामुळे खरोखर अजूनही माझे थोडे पुण्य शिल्लक आहे. असे मला वाटते. ॥३३६॥

English :- Damyanti began to wonder that probably she had some luck left to have encountered some companions that seemed like eminents and great chariots to cross a huge and a dense jungle like this.

अथाश्वास्येव सा यावत्तस्थौ तावत्स्यमन्ततः ।
क्रोडयूथमिव श्वानैः, सार्थश्चौरैररुध्यत ॥३३७॥

अन्वय :- अथ सा दमयन्ती आश्वास्य सान्त्वयित्वा यावत् तस्थौ अतिष्ठत् तावत् श्वानैः कुक्कुरैः क्रोडानां शूकराणां यूथं समूहः कोडयूथम् इव समन्ततः आसमन्तात् चौरैः सार्थः अरुध्यत॥३३७॥

सरलार्थ :- अथ सा दमयन्ती यावत् धैर्यमास्थाय तस्थौ तावत् श्वानैः शूकरयूथम् इव समन्ततः चौरैः सार्थः अरुध्यत ॥३३७॥

ગુજરાતી :- પછી તે દમયંતી જરા શાંત થઈને જોવા માટે (ત્યાં) ઉભી રહી, તેવામાં કૂતરાઓ જેમ ડુક્કરોના ટોળાને ઘેરી લે, તેમ ચોરોએ તે સાર્થવાહને ચારે તરફથી ઘેરી લીધો. ॥૩૩૭॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर वह दमयंती शांत हो-कर देखनें के लिये खडी रही, इतने में कुत्ते जैसे डुक्करों के झुंड को घेर लेते हैं, उसी प्रकार चोरोनि उस सार्थवाह को चारों ओर से घेर लिया ॥३३७॥

मराठी :- नंतर ती दमयंती शांत होऊन धैर्य धारण करते, तोच कुत्रे जसे डुकरांच्या टोळीला घेरतात, त्याप्रमाणे चोरांनी पण त्या सार्थाला चारी बाजूंनी घेरले.॥३३७॥

English :- Then as Damyanti kept her cool, she suddenly sew a band of robbers encircling and occluding the camp just as a group of wild dogs envirous a group of pigs.

कृतान्तदूतानिव तांश्चौरानालोक्य सार्थिकाः ॥
नष्टुमप्यशकन्नैव, भयेन स्तम्भिता इव ॥३३८॥

अन्वय :- सार्थिका:कृतान्तदूतान् इव तां चौरान् आलोक्य भयेन स्तम्भिता इव नष्टुम् अपि न अशकन् ॥३३८॥

विवरणम् :- सार्थस्य इमे सार्थिकाः कृतान्तस्य मृत्योः दूताः इव इति उत्प्रेक्षायां कृतान्तदूताः तान् कृतान्तदूतान् इव तान् चौरान् स्तेनान् आलोक्य निरीक्ष्य भयेन स्तम्भिता इव नष्टुं पलायितुम् अपि न अशकन् न अशक्नुवन् ॥३३८॥

सरलार्थ :- सार्थिकाः यमस्य दूतान् इव तान् चौरान् दृष्ट्वा भयेन स्तम्भिता इव पलायितुम् अपि न अशकन् ॥३३८॥

ગુજરાતી :- યમના દૂતો સરખા તે ચોરોને જોઈને સાર્થના માણસો જાણે ભય વડે જડાઈ ગયા હોય તેમ ત્યાંથી બિલકુલ નાસી શક્યા નહીં. ॥૩૩૮॥

हिन्दी :- यम के दूत समान उन चोरों को देखकर भय के कारण स्तंभित से हो कर वे सार्थ के आदमी वहाँ से भाग भी नहीं सके ॥३३८॥

मराठी :- सार्थातील माणसे यमदूताप्रमाणे असलेल्या त्या चोरांना पाहून जणू काय स्तम्भित झाले व तेथून पळूनही जाऊ शकले नाहीत. ॥३३८॥

English :- The people from the camp became still and stable with fright and couldn't run away as they had encounted a band of robbers who seemed like the messengers of the God of death (yama) to them.

तदानीमवदद्भैमी, हंहो मा भैष्ट सार्थिकाः ॥
तेऽपि तां मन्त्रवद्वाचमाकर्ण्योत्तम्भिताः क्षणात् ॥३३९॥

अन्वय :- तदानीं भैमी अवदत्-हंहो सार्थिकाः। मा भैष्ट। तेऽपि तां मन्त्रवत्वाचम् आकर्ण्य क्षणात् उत्तम्भिताः।

विवरणम् :- *तदानीं तस्मिन् समये भीमस्य अपत्यं स्त्री भैमी अवदत् अुवाव - हंहो सार्थिकाः यूयं मा भैष्ट। मा बिभीत। ते अपि दमयन्त्याः तां मन्त्रः अस्याम् अस्ति इति मन्त्रवती। मन्त्रवती चासौ वाक् च मन्त्रवद्वाक् तां मन्त्रवद्वाचम् आकर्ण्य श्रुत्वा क्षणात् उत्तम्भिताः स्तंम्भिताः ॥३३९॥*

सरलार्थ :- तस्मिन् समये दमयन्ती अवदत्-हे सार्थिकाः मा बिभीत। ते सार्थिकाः अपि दमयन्त्याः तां मन्त्रवद्वाचं निशम्य क्षणात् उत्तम्भिताः। स्तम्भिताः अभवन्॥३३९॥

ગુજરાતી :- તે વખતે દમયંતીએ કહ્યું કે, હે સાર્થના લોકો! તમો ડરશો નહીં! એવી તેણીની તે મંત્ર સરખી વાણી સાંભળીને તેઓ પણ ક્ષણવાર સુધી નિશ્ચલપણે સ્થિર થઈ ગયા. ॥૩૩૯॥

हिन्दी :- उस समय दमयंतीने कहा कि, हे सार्थ के लोगो, तुम बिलकुल भी डरना नही! इसप्रकार की मंत्र जैसी उसकी वाणी सुनकर वे भी पलभर के लिए निश्चल खडे हो गये ॥३३९॥

मराठी :- तेव्हा दमयंती म्हणाली- हे सार्थिक हो तुम्ही घाबरू नका! तिची ती मंत्रयुक्त वाणी ऐकून ते पण एका क्षणात निश्चलपणे स्थिर झाले.

English :- At this, Damyanti spoke to the campers saying that, they should gather courage and wipe away the fright from the hearts. In this way when they heard the soothing words of Damyanti, they were calm and immobile for a moment.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उवाच चौरानपि सा, रेरे गच्छत गच्छत ।।
रक्षितोऽयम् मया सार्थो, मानर्थम् कृषतात्मनः ।।३४०।।

अन्वय :- सा चौरान् अपि उवाच-रे रे गच्छत गच्छत । अयम् सार्थः मया रक्षितः । आत्मनः अनर्थम् मा कृषत ।।३४०।।

विवरणम् :- *सा दमयन्ती चौरान् स्तेनान् अपि उवाच रे रे चौरा यूयम् गच्छत गच्छत । व्रजत व्रजत । अयम् सार्थः मया रक्षितः अस्ति। आत्मनः स्वस्य न अनर्थम् अनर्थम् मा कृषत मा कुरुध्वम् ।।३४०।।*

सरलार्थ :- सा दमवन्ती चौरान् अपि अवदत्-रे रे गच्छत गच्छत । अयम् सार्थः मया रक्षितः अस्ति। स्वस्य अनर्थम् मा कृषत ।।३४०।।

गुजराती :- પછી તે દમયંતીએ ચોરોને પણ કહ્યું કે અરે! તમો અહીંથી ચાલ્યા જાઓ! આ સાર્થનું મે રક્ષણ કર્યું છે, નાહક તમારા અનર્થને (તમે પોતે) ખેંચી લાવો નહીં. ।।૩૪૦।।

हिन्दी :- फिर वह दमयंती चोरों से कहने लगी कि अरे! तुम यहाँ से चले जाओ! चले जाओ! इस सार्थ की रक्षा मैंने की है। फिर तुम अपने अनर्थ को व्यर्थ में ही न करो ।।३४०।।

मराठी :- नंतर दमवंती चोरांना म्हणाली की अरे! तुम्ही येवून चालले जा! चालले जा! मी या सार्थाचे रक्षण केले आहे, तुम्ही विनाकारण अनर्थ ओढवून घेऊ नका. ।।३४०।।

English :- Damyanti asked the band of robbers to scamp off as she has kept her cloak of protection over them. She adds that if any harm is done to them, they shall be the cause of their own ruinous downfall.

भूतात्तामिव वातुला - मिव पीतासवामिव ।।
मन्वानास्तेऽपि चौरास्ताम्, न वैदर्भीमजीगणन् ।।३४१।।

अन्वय :- ते अपि चौराः ताम् वैदर्भीम् भूतात्ताम् इव वातुलाम् इव पीतासवाम् इव मन्वानाः न अजीगणन् ।।३४१।।

विवरणम् :- ते चौराः अपि ताम् विदर्भाणाम् ईश्वरः वैदर्भः वैदर्भस्य अपत्यम् स्त्री वैदर्भी ताम् वैदर्भीम् दमयन्तीम् भूतेन पिशाचेन आत्ताम् गृहीताम् भूतात्ताम् इव, वातः अस्याः अस्ति इति वातुला ताम् वातुलाम् इव, पीतम् आसवम् यया सा पीतासवा ताम् पीतासवाम् इव, मन्वानाः न अजीगणन् न अगणयन् ॥३४१॥

सरलार्थ :- ते चौराः अपि ताम् दमयन्तीम् भूतेन गृहीताम् इव वातुलाम् इव पीतासवाम् इव मन्वानाः न अजीगणन् ॥३४१॥

ગુજરાતી :- **ભૂત વળગ્યું હોય એવી, કે વાયુના રોગવાળી, અથવા મદિરા પીધેલી માનીને, તે ચોરોએ દમયંતીની કશી દરકાર કરી નહીં. ॥३४१॥**

हिन्दी :- उन चोरोंने दमयंती को भूतों से ग्रस्मित, वायु रोग के रोगी के समान तथा मदिरापान की हुई हो ऐसा मानकर उसकी परवाह नहीं की ॥३४१॥

मराठी :- त्या चोरांनीसुद्धा दमयन्तीला जणू काय भूतांनी पछाडले आहे. वाताने व्यासले आहे, दारू पिऊन धुंद झाली आहे. असे समजून जुमानले नाही.॥३४१॥

English :- Taking Damyanti as a person who was subdued by an evil sprit or who is drunk or who is suffering from hypochondria, the robbers too did not take much notice of her.

सा मुमोचाथ हुङ्कारांष्टंकारानिव धन्विनाम् ॥
दिशो दिशम् पलायन्ते, वायसा इव तस्कराः ॥३४२॥

अन्वय :- अथ सा धन्विनाम् टङ्कारान् इव हुङ्कारान् मुमोच तदा तस्कराः वायसा इव दिशो दिशम् पलायन्ते ॥३४२॥

विवरणम् :- अथ सा दमयन्ती धनूंषि एषाम् सन्ति इति धन्विनः तेषाम् धन्विनाम् धनुर्धारिणाम् टङ्कारान् टणत्कारान् इव हुङ्कारान् मुमोच अमुञ्चत् । तेन ते तस्कराः स्तेनाः वायसाः काकाः इव एकस्या दिशः अन्याम् दिशम् इतस्ततः पलायन्ते धावन्ति स्म ॥३४२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थ :- अथ सा दमयन्ती धनुर्धारिणाम् टङ्कारान् इव हुङ्कारान् अमुञ्चत्। तेन स्तेनाः वायसा इव एकस्या दिशः अन्याम् दिशम् पलावन्ते स्म। पलावन्त॥३४२॥

ગુજરાતી :- પછી તે દમયંતી ધનુર્ધરના ટંકારનાદો સરખા હુંકારનાદો કરવા લાગી, ત્યારે તે સઘળા ચોરો કાગડાઓની પેઠે એક દિશામાંથી બીજી દિશાઓ તરફ નાસવા લાગ્યા.॥૩૪૨॥

हिन्दी :- फिर वह दमयंती धनुर्धर के टंकारनाद के समान हुंकार करने लगी, तभी सब चोर कौओं की तरह एक दिशा से दूसरी दिशा की ओर भागने लगे ॥३४२॥

मराठी :- नंतर ती दमयंती धनुर्धराच्या टंकारनादाप्रमाणे हुंकार करू लागली, तेव्हा ते सगळे चोर कावळ्यांसारखे एका दिशेकडून दुसऱ्या दिशेकडे धावू लागले.॥३४२॥

English :- Then Damyanti roared and bellowed like the twang of a bow of an archer. This outcry of Damyanti bought fear in the hearts of the robbers and they began to run helter-skelter like crows.

सार्थलोकोऽवदन्नूनमसौ नः कुलदेवता ॥
चौरव्याघ्रमुखादेषा - ऽन्यथास्मान् कथमाकृषत् ॥३४३॥

अन्वय :- सार्थलोकः अवदत्-नूनम् असौ नः कुलदेवता। अन्यथा अस्मान् एषा चौरव्याघ्रमुखात् कथम् आकृषत् ॥३४३॥

विवरणम् :- सार्थस्य लोकः जनः सार्थलोकः अवदत् - अुवाद अवादीत् - नूनम् निश्चितम् असौ नः अस्माकम् कुलस्य देवता कुलदेवता अस्ति। अन्यथा अस्मान् एषा चौराः एव व्याघ्राः, चौराः व्याघ्राः इव वा चौरव्याघ्राः। चौरव्याघ्राणाम् मुखम् चौरव्याघ्रमुखम्, तस्मात् चौरव्याघ्रमुखात् कथम् आकृषत् आकर्षत्॥३४३॥

सरलार्थ :- सार्थलोकः अवदत् - निश्चितम् असौ अस्माकम् कुलदेवता वर्तते। अन्यथा अस्मान् एषा चौरव्याघ्रमुखात् कथम् आकर्षत् - ॥३४३॥

ગુજરાતી :- ત્યારે તે સાર્થના લોકો કહેવા લાગ્યા કે, આ સ્ત્રી ખરેખર અમારી કુલદેવી જણાય છે, જો એમ ન હોય તો તેણીએ અમોને આ ચોરોરુપી વાઘોના મુખમાંથી ખેંચીને શામાટે છોડાવ્યા ? ॥૩૪૩॥

हिन्दी :- तब उस सार्थ के लोग कहने लगे कि, यह स्त्री सचमुच हमारी कुलदेवी मालूम होती है और अगर ऐसा न होता तो हमे इस चोररूपी बाघों के मुँह से खिंचकर क्यों निकालती? ॥३४३॥

मराठी :- तेव्हा सार्थातील लोक म्हणू लागले की ही स्त्री खरोखरीच आमची कुलदेवी आहे, नाही तर हिने आम्हांला या चोररूपी वाघांच्या तोंडातून कशाला ओढून काढले असते? ॥३४३॥

English :- At this incident the campers speaking among themselves said that this woman seems to be their family Goddess or else how would she be able to pull them out of such danger as these robbers who seemed like lions to them who were out to devour them.

सार्थवाहोऽपि ताम् नत्वा, स्वाममम्बामिव भक्तितः ॥
प्रश्नयामास कासि त्वम्, मातर्भ्राम्यसि किम् वने ॥३४४॥

अन्वय :- सार्थवाहः अपि ताम् स्वांअम्बाम् इव भक्तितः नत्वा प्रश्नयामास-मातर् त्वम् कासि? वने किम् भ्राम्यसि ॥३४४॥

विवरणम् :- सार्थवाहः वसन्तः अपि ताम् दमयन्तीम् स्वाम् स्वकीयाम् अम्बाम् मातरम् इव भक्तितः भक्तिवशात् नत्वा प्रणम्य प्रश्नयामास पप्रच्छ - हे मातर् हे अम्ब ! त्वम् कासि? वने विपिने किम् भ्राम्यसि अटसि! ॥३४४॥

सरलार्थ :- सार्थवाहः अपि ताम् दमयन्तीम् स्वकीयाम् मातरम् इव भक्ति - वशात् प्रणम्य अपृच्छत् हे अम्ब ! त्वम् कासि ! वने किम् भ्राम्यसि ॥३४४॥

ગુજરાતી :- પછી તે સાર્થપતિએ પણ તેણીને પોતાની માતાની પેઠે ભક્તિથી નમસ્કાર કરીને પૂછયું કે, હે માતાજી ! તમો કોણ છો? અને આ જંગલમાં કેમ ભમણ કરો છો? ॥૩૪૪॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर उस सार्थपतिने भी उसे अपनी माता के समान मान कर भक्तिपूर्वक नमस्कार कर के पूछा कि, हे माताजी! आप कौन हो? और इस जंगलमें क्यों भ्रमण कर रही हो? ॥३४४॥

मराठी :- नंतर तो वसन्त सार्थवाह पण दमयन्तीला स्वत:च्या आईप्रमाणे भक्तिपूर्वक नमस्कार करून विचारू लागला-हे माते ! तू कोण आहेस? या वनात का भटकतेस? ॥३४४॥

English :- Then the chieftain of the encampment taking Damyanti as his own mother and with utmost devotion and veneration, bowed down to her and asked her about her identity and as to why she was rambling alone in such a dangerous forest.

सोदरस्येव तस्याथ, सार्थनाथस्य भैम्यपि ॥
जन्मतः कथयामास, वृत्तान्तम् सर्वमात्मनः ॥३४५॥

अन्वय :- अथ भैमी अपि तस्य सोदरस्येव सार्थनाथस्य जन्मतः आत्मनः सर्ववृत्तान्तम् कथयामास ॥३४५॥

विवरणम् :- अथ भीमस्य अपत्यम् स्त्री भैमी दमयन्ती अपि तस्य समानम् उदरम् यस्य सः सोदरः तस्य सोदरस्य इव भ्रातुः इव सार्थस्य नाथः सार्थनाथः तस्य सार्थनाथस्य जन्मतः आरभ्य आत्मनः स्वस्य सर्वश्रासौ वृत्तान्तश्च सर्ववृत्तान्तः तम् सर्ववृत्तान्तम् सर्वांअखिलांकथाम् कथयामास अकथयत् ॥३४५॥

सरलार्थ :- अथ दमयन्ती अपि तस्य भ्रातुः इव सार्थनाथस्य जन्मत आरभ्य स्वस्य अखिलाम् कथाम् अकथयत् ॥३४५॥

ગુજરાતી :- પછી દમયંતીએ પણ તે સાર્થવાહને પોતાના સહોદર ભાઈ સમાન માનીને, છેક જન્મથી માંડીને પોતાનું સઘળું વૃત્તાંત કહી સંભળાવ્યું. ॥३४५॥

हिन्दी :- फिर दमयंती ने भी उस सार्थवाह को अपना सहोदर भाई मानकर, जन्म से लेकर अपना पूरा वृत्तांत कह सुनाया ॥३४५॥

मराठी :- मग दमयंतीने पण त्या सार्थवाहाला स्वत:चा सहोदर भाऊ मानून, जन्मापासूनचा आपला सगळा वृत्तांत सांगितला. ॥३४५॥

English :- Then Damyanti too taking the Chef Vasant as her uterine brother, narrated her whole biography from her birth to her present situation.

सोऽवदद्देवि मे पूज्या, त्वम् मातेव स्वसेव च ॥
भैमीति नलपत्नीति, धार्मिकीति सतीति च ॥३४६॥

अन्वय :- सः अवदत् हे देवि ! त्वम् भैमी इति नलपत्नी इति धार्मिकी इति सतीइति च माता इव स्वसा इव मे पूज्या असि ॥३४६॥

विवरणम् :- सः वसन्तः सार्थपतिः अवदत् उवाच-हे देवि ! त्वम् भीमस्य अपत्यम् स्त्री भैमी इति, नलस्य पत्नी नलपत्नी इति, धर्मम् आचरति इति धार्मिकी इति, सती इति शीलवती इति, च माता इव जननी इव स्वसा इव भगिनी इव मे मम पूज्या अर्चनीया असि ॥३४६॥

सरलार्थ :- वसन्तसार्थपतिः अवदत् - हे देवि! त्वम् भीमरथनृपस्य तनया असि इति नलनृपस्य पत्नी इति, धर्मिकी इति, शीलवती इति, जननी इव भगिनी इव मम पूजनीया असि ॥३४६॥

ગુજરાતી :- ત્યારે તે સાર્થપતિએ કહ્યું કે, હે દેવી! તુ ભીમરાજાની પુત્રી, નલરાજાની પત્ની, ધર્મવતી તથા સતી હોવાથી માતાની પેઠે તથા બહેનની પેઠે મને પૂજવા યોગ્ય છે. ॥३४६॥

हिन्दी :- तब उस सार्थपतिने कहा कि, हे देवी! आप भीमराजा की पुत्री, नलराजा की पत्नी धर्मवती और सती होने से मातासमान और बहनसमान पूजने लायक हो ॥३४६॥

मराठी : तेव्हा वसन्त सार्थपति म्हणाला-हे देवी! तू भीमराजाची मुलगी, नलराजाची पत्नी, धर्मवती आणि सती असल्यामुळे मला आई व बहिणीप्रमाणे पूजनीय आहेस. ॥३४६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then the chief, addressing her as a Goddess said that she who was the daughter of Bhimrath, wife of king Nal and who is a chaste and virtuous woman and a religious woman too, is worthy of veneration and adoration.

किञ्चोपकारक्रीतोऽहमेकागारिकनाशनात् ॥
तन्मे पवित्रयावास - मधमर्णोऽस्मि ते ऽनघे ॥३४७॥

अन्वय :- हे अनघे ! एकागारिकनाशनात् उपकारक्रीत: अहम् ते अधमर्ण: अस्मि। तत् मे आवासम् पवित्रय ॥३४७॥

विवरणम् :- *न विद्यते अघम् पापम् यस्या: सा अनघा तत्सम्बुद्धौ हे अनघे हे निष्पापे! ऐकागारिकाणाम् स्तेनानाम् नाशनात् उपकारेण क्रीत: अहम् ते तव अधमर्ण: ऋणी अस्मि। तत् तस्मात् त्वम् मे मम आवासम् गृहम् पवित्रय पवित्रम् कुरु ॥३४७॥*

सरलार्थ :- हे निष्पापे ! स्तेनानाम् नाशनात् उपकारेण क्रीत: अहम् तव ऋणी अस्मि । तस्मात् त्वम् मम आवासम् पवित्रम् कुरु ॥३४७॥

ગુજરાતી :- વળી હે નિષ્પાપી દમયંતી ! તમે આ ચોરોને નસાડી મારા પર ઉપકાર કરીને મને ખરીદી લીધો છે, માટે હવે તમો મારા આવાસને પવિત્ર કરો? કેમકે હું તમારો કરજદાર છું. ॥૩૪૭॥

हिन्दी :- और हे निष्पाप दमयंती आपने इन चोरोंको भगाकर मुझपर आप उपकार करके मुझे खरीद लिया है, इसलिए आप मेरे आवास को पवित्र कीजिए क्यों कि मैं आपका कर्जदार हूँ ॥३४७॥

मराठी :- हे निष्पाप दमयंती ! तू या चोरांना पळवून माझ्यावर उपकार करून मला खरीदले आहे म्हणून मी तुझा ऋणी आहे. माझ्या घराला पवित्र कर? ॥३४७॥

English :- And, he continues that this Damyanti who is sinless and who has made the robbers to flee, has made him her slave. He then asked her to enter his dwelling and bless it by her auspicious presence as he was endebted to her now.

इत्युक्त्वा निजमावासम्, निनाय नलवल्लभाम् ॥
देवतामिव सार्थेश - स्तत्राराधयति स्म ताम् ॥३४८॥

अन्वय :- इति उक्त्वा सार्थेशः नलवल्लभाम् निजावासम् निनाय। तत्र ताम् देवताम् इव आराधयति स्म ॥३४८॥

विवरणम् :- *इति उक्त्वा अुदित्वा सार्थस्य ईशः सार्थेशः नलस्य वल्लभा स्त्री पत्नी नलवल्लभा, ताम् नलवल्लभाम् नलपत्नीम् दमयन्तीम् निजस्य स्वस्य आवासः गृहम् निजावासः तम् निजावासम् निनाय अनयत्। तत्र तस्मिन् गृहे सः ताम् देवताम् इव आराधयति स्म। आराधयत्॥३४८॥*

शब्दार्थ :- एवम् भणित्वा सार्थेशः नलपत्नीम् स्वावासम् अनयत्। तस्मिन् गृहे देवताम् इव ताम् आराधयति स्म ॥३४८॥

ગુજરાતી :- એમ કહીને સાર્થપતિ તે નલરાજાની પટ્ટરાણી દમયંતીને પોતાના આવાસમાં લઈ ગયો, તથા ત્યાં તે તેણીની દેવતાની પેઠે સરભરા કરવા લાગ્યો. ॥૩૪૮॥

हिन्दी :- ऐसा कहकर सार्थपति उस नलराजा की पट्टरानी दमयंती को अपने आवास में ले गया, और वहाँ वह उसकी देवता की तरह आवभगत करने लगा ॥३४८॥

मराठी :- असे म्हणून सार्थपती नलराजाच्या पत्नीला-दमयंतीला स्वतःच्या घरी घेऊन गेला आणि तेथे देवतेप्रमाणे तिची आराधना करु लागला. ॥३४८॥

English :- So saying thus, he took King Nal's favourite wife in his camp and worshipped her and attended to her as if she was a God.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अत्रान्तरे जगर्जोच्चैर्घनो गन्धगजेन्द्रवत् ॥
पूजाक्षणध्वनद्वाद्यनादम् सस्मार भीमजा ॥३४९॥

अन्वय :- अत्रान्तरे गन्धगजेन्द्रवत् घनः उच्चैः जगर्ज । भीमजा पूजाक्षणध्वनद्वाद्यनादम् सस्मार ॥३४९॥

विवरणम् :- *अत्रान्तरे एतस्मिन् अन्तरे गन्धगजानाम् इन्द्रः गन्धगजेन्द्रः गन्धगजेन्द्रेण तुल्यम् गन्धगजेन्द्रवत् घनः मेघः उच्चैः उच्चैःस्वरम् जगर्ज अगर्जत् । भीमात् जाता भीमजा भीमकन्या दमयन्ती पूजायाः क्षणः उत्सवः पूजाक्षणः । पूजाक्षणे ध्वनन्ति वाद्यानि पूजाक्षणध्वनद्वाद्यानि । पूजाक्षणध्वनद्वाद्यानाम् नादः पूजाक्षणध्वनद्वाद्यनादः, तम् पूजाक्षणध्वनद्वाद्यनादम् सस्मार अस्मरत् ॥३४९॥*

सरलार्थ :- एतस्मिन् अन्तरे गन्धगजेन्द्रवत् मेघः उच्चैःस्वरम् अगर्जत्। तदा दमयन्ती तद् मेघगर्जनम् श्रुत्वा पूजोत्सवध्वनद्वाद्यनादम् अस्मरत् ॥३४९॥

ગુજરાતી :- એવામાં મદોન્મત ગંધહસ્તિનીપેઠે મેઘ ગરજવા લાગ્યો, ત્યારે દમયંતી જિનેશ્વરની પૂજા સમયે વાગતા વાજિંત્રોના નાદને યાદ કરવા લાગી. ॥૩૪૯॥

हिन्दी :- इतनेमे मदोन्मत गंधहस्ति की तरह मेघ गर्जना करने लगे, तब दमयंती जिनेश्वर की पूजा के समय बजते हुए वाजिंत्रो के नाद को याद करने लगी ॥३४९॥

मराठी :- इतक्यात मदोन्मत्त गंधहस्तीप्रमाणे ढग जोराने गर्जना करू लागला, तेव्हा दमयंतीला जिनेश्वराची पूजा करतांना वाजणाऱ्या वाद्यांच्या नादाचा आठवण झाली. ॥३४९॥

English :- Then, she heared thunuers in the sky which seemed like a mad elephant parading about. She thought that the sounds were the musical instruments played on the tune of the puja, which were being played when she used to perform the puja at her maternal home.

प्रससार घनध्वान्तम्, रोदसीरन्ध्ररोधनम् ॥
दध्यौ भैमी जिनेन्द्रार्चा - धूपधूम्यामिवोत्थिताम् ॥३५०॥

अन्वय :- रोदसीरन्ध्ररोधनम् घनध्वान्तम् प्रससार। भैमी उत्थिताम् जिनेन्द्रार्चा - धूपधूम्याम् इव दध्यौ ॥३५०॥

विवरणम् :- *रोदस्योः रन्ध्रम् रोदसीरन्ध्रम्। रोदसीरन्ध्रस्य रोधनम् रोदसीरन्ध्ररोधनम् भूम्याकाशयोः अन्तरालम् रुन्धत् घनम् च तद् ध्वान्तम् च घनध्वान्तम् प्रगाढान्धकारः प्रससार प्रासरत्। भीमस्य अपत्यम् स्त्री भैमी दमयन्ती उत्थिताम् जिनानाम् इन्द्रः जिनेन्द्रः। जिनेन्द्रस्य अर्चा पूजा जिनेन्द्रार्चा। जिनेन्द्रार्चायाः धूपाः जिनेन्द्रार्चाधूपाः। धूमानाम् समूहः धूम्या। जिनेन्द्रार्चाधूपानाम् धूम्या जिनेन्द्रार्चाधूपधूम्या। ताम् जिनेन्द्रार्चाधूपधूम्याम् इव दध्यौ अध्यायत् चिन्तितवती ॥३५०॥*

सरलार्थ :- भूम्याकाशयोः अन्तराले रुन्धत् प्रगाढांधकारः प्रासरत्। तमन्धकारसमूहम् दमयन्ती उत्थिताम् जिनेन्द्रार्चाधूपधूम्याम् इव अमन्यत ॥३५०॥

ગુજરાતી :- **તે વખતે આકાશ અને પૃથ્વી વચ્ચેના પોલાણમાં મેઘનો અંધકાર ફેલાઈ ગયો, ત્યારે દમયંતી તેને જિનેશ્વરપ્રભુની પૂજા સમયે કરાતા ધૂપના ધૂમાડાનો સમૂહ જાણે ઊંચો ચડ્યો હોય તેમ માનવા લાગી ॥૩૫૦॥**

हिन्दी :- उस समय आकाश और पृथ्वी के बीच के रिक्तस्थान में बादलों का अंधकार फैल गया तब दमयंती उसे जिनेश्वर की पूजा करते समय धूप का धुंवा ऊँचा चढा हो! ऐसा मानने लगी ॥३५०॥

मराठी :- तेव्हा अन्तराळात सर्वत्र गाढ अन्धकार पसरला. तो अंधकार जिनेश्वराची पूजा करतांना ओवाळल्या जाणाऱ्या धुपाच्या धुरांचा लोळ आहे. असे दमयन्ती समजली. ॥३५०॥

English :- At that time, there appeared a clusler of dark clouds, in between the earth and the sky. Encountering this incident, Damyanti took it as the incense ot the burnt perfume which was emitted during the puja has risen and has clustered around there.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दर्शं दर्शं च वैदर्भी । तडित्ताण्डवडम्बरम् ॥
ब्रम्भ्रम्यमाणमस्मार्षीदारात्रिकमिवार्हतः ॥३५१॥

अन्वय :- वैदर्भी तण्डित्ताण्डवडम्बरं दर्शं दर्शं बम्भ्रम्यमाणम् अर्हतः आरात्रिकम् इव अस्मार्षात् ॥३५१॥

विवरणम् :- विदर्भाणाम् ईश्वरः वैदर्भः वैदर्भस्य अपत्यं स्त्री वैदर्भी दमयन्ती, तडितः ताण्डवं तडित्ताण्डवं तडित्ताण्डवस्याडम्बरः तडित्ताण्डवाडम्बरः तं तडित्ताण्डवाडम्बरं दर्शं दर्शं दृष्ट्वा दृष्ट्वा पुनः पुनः भ्रमति इति बम्भ्रम्यमाणं पुनः पुनः भ्रमत् अर्हतः प्रभोः आरात्रिकं इव अस्मार्षीत् अस्मरत् सस्मार ॥३५१॥

सरलार्थ :- दमयन्ती तडित्ताण्डवडम्बरं दृष्ट्वा दृष्ट्वा पुनः पुनः भ्रमत् अर्हतः आरात्रिकं इव अस्मरत्। आकाशे तडितः ताण्डवडम्बरमवलोक्य अर्हतः आरात्रिकामिव भ्रमति इति सा अस्मरत्॥३५१॥

ગુજરાતી :- વળી વીજળીઓના ચમકારાના આડંબરને નિરખીને દમયંતી જિનેશ્વરપ્રભુની પાસે ફેરવાતી આરતીની ક્રિયાને યાદ કરવા લાગી.॥३५१॥

हिन्दी :- फिर बीजली के चमकार के आडंबर को देखकर दमयंती जिनेश्वरप्रभु के पास घूमती हुई आरती की क्रिया को याद करने लगी ॥३५१॥

मराठी :- नंतर आकाशात चमकणाऱ्या विजेचे तांडवनृत्य पाहून दमयंतीला पुन्हा पुन्हा जिनेश्वरप्रभूवरून ओवाळली जाणाऱ्या आरतीची आठवण झाली. ॥३५१॥

English :- Then there was a sudden lightening in the sky Damyanti at that time was worshipping Lord Jineshwar by moving a lighted lamp circularly around the idol, which made her to think that the lightening was the lighted lamp shining in the sky.

दृष्टं वृष्टिजलैर्जातं, विरजस्कं महीतलम् ॥
संवेगरसपूरेण, भैम्यार्चायां स्वचित्तवत् ॥३५२॥

अन्वय :- भैम्या वृष्टिजलैः विरजस्कं महीतलम् अर्चायां संवेगरसपूरेण विरजस्कं स्वचित्तवत् दृष्टम् ॥३५२॥

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी तया भैम्या दमयन्त्या वृष्ट्याः जलानि वृष्टिजलानि तैः वृष्टिजलैः विगतं रजः यस्मात् तद् विरजस्कं मह्याः पृथ्व्याः तलं महीतलम् अर्चायां पूजायां संवेगस्य रसः संवेगरसः संवेगरसस्य पूरः संवेगरसपूरः तेन संवेगरसपूरेण वैराग्यरसपूरेण विरजस्कं रजोगुणरहितं स्वस्य चित्तं स्वचित्तं स्वचित्तेन तुल्यं स्वचित्तवत् दृष्टम् ॥३५२॥

सरलार्थ :- दमयन्त्या वृष्टिजलैः विरजस्कं रजोरहितं जातं पृथ्वीतलं पूजायां वैराग्यरसपूरेण विरजस्कं रजोगुणरहितं जातं स्वचित्तवत् दृष्टम् ॥३५२॥

ગુજરાતી :- **મેઘવૃષ્ટિના જલથી રજરહિત થયેલાં પૃથ્વીના તલને, દમયંતીએ વૈરાગ્યરસના પ્રવાહથી જિનેશ્વરની પૂજા સમયે (પાપરૂપી રજથી રહિત થયેલાં) પોતાનાં નિર્મલ હૃદય સરખું હોય તેમ જોયું ॥૩૫૨॥**

हिन्दी :- मेघवृष्टि के जल से रजरहित बने पृथ्वी के तल को, दमयंती ने वैराग्यरस के प्रवाह से जिनेश्वर की पूजा करते समय (पापरूपी रज से रहित ऐसे) खुद के निर्मल हृदय समान देखा ॥३५२॥

मराठी :- मेघाच्या वृष्टीने धूळरहित झालेले पृथ्वीतळ दमयंतीला जिनेश्वराच्या पूजेत वैराग्यरसाच्या पुराने रजोगुणरहित (पापरहित) निर्मळ झालेल्या आपल्या चित्ताप्रमाणे दिसले. ॥३५२॥

English :- Just as the dusty ground was cleansed by a shower of rain, in the same way, Damyanti who was doing the puja of Lord Jineshwar whole heartedly experienced utmost peace within and felt as though she was cleansed from all sins.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अखण्डधारं तत्रासीद्, वृष्टिस्त्रैरात्रिकी तदा ।।
शुभध्यानेन सा त्वस्थाद्धर्मस्थान इव स्थिता ।।३५३।।

अन्वय :- तदा तत्र अखण्डधारं त्रैरात्रिकी वृष्टिः आसीत्। किन्तु सा धर्मस्थाने स्थिता इव शुभध्यानेन अस्थात्।।३५३।।

विवरणम् :- *तदा तस्मिन् समये तत्र तस्यां अटव्यां न विद्यते खण्डः यासां ताः अखण्डाः। अखण्डाः धाराः यस्मिन् कर्मणि यथा स्यात् तथा अखण्डधारं सन्ततधारम्। तिसृषु रात्रिषु भवा त्रैरात्रिकी वृष्टिः त्रिरात्रपर्यन्तं सन्ततधारा वृष्टिः अभवत् किन्तु सा दमयन्ती धर्मस्य स्थानं धर्मस्थानं तस्मिन् धर्मस्थाने स्थिता इव शुभं च तद् ध्यानं च शुभध्यानं तेन शुभध्यानेन अस्थात् अतिष्ठत् तस्थौ।।३५३।।*

सरलार्थ :- तदा तत्र अखण्डधारं त्रैरात्रिकीवृष्टिः अभवत् किन्तु सा दमयन्ती धर्मस्थाने स्थिता इव शुभध्यानेन अतिष्ठत्।।३५३।।

ગુજરાતી :- એ રીતે તે વખતે ત્યાં અખંડ ધારાથી ત્રણ રાત્રિ સુધી જલની વૃષ્ટિ થઈ ત્યારે તે દમયંતી જાણે ધર્મસ્થાનમાં બેઠી હોય તેમ શુભ ધ્યાન વડે સ્થિરચિત્તવાળી થઈ. ।।૩૫૩।।

हिन्दी :- इसप्रकार उस समय अखंड धारा से तीन रात्रि तक जल की वृष्टि हुई तब वह दमयंती मानो धर्मस्थान में बैठी हो उसी प्रकार शुभ ध्यान से स्थिर चित्तवाली हो गयी ।।३५३।।

मराठी :- अशारीतीने तेव्हा तीन रात्रपर्यंत अखण्ड मुसळधार वृष्टी झाली. पण दमयंती मात्र जणू काय धर्मस्थानात असल्याप्रमाणे शुभध्यानाने स्थिरचित्त झाली. ।।३५३।।

English :- In this way it rained very heavily for about three nights. Damyanti took this place as a religious place and the happening as a religious one and thus went into deep meditation.

वर्षं वर्षं पयोवाहे, परिश्रान्त इव स्थिते ॥
भूयोऽपि भीमभूस्त्यक्त - सार्था प्रास्थित वर्त्मनि ॥३५४॥

अन्वय :- पयोवाहे वर्षं वर्षं परिश्रान्ते इव स्थिते भूयः अपि त्यक्तसार्था भीमभूः वर्त्मनि प्रास्थित॥३५४॥

विवरणम् :- पयः वहति इति पयोवाहः तस्मिन् पयोवाहे मेघे वर्षं वर्षं वृष्ट्वा वृष्ट्वा पुनः पुनः वृष्ट्वा परिश्रान्ते इव (इति उत्प्रेक्षायां) स्थिते सति स्थितवति सति भूयः अपि पुनरपि त्यक्तः सार्थः यया सा त्यक्तसार्था भीमात् भवति इति भीमभूः दमयन्ती वर्त्मनि मार्गे प्रास्थिता प्रयाणं अकरोत् ॥३५४॥

सरलार्थ :- मेघे पुनः पुनः वृष्ट्वा परिश्रान्ते इव स्थितवति सति सार्थं त्यक्त्वा दमयन्ती पुनः मार्गे प्रयाणं अकरोत् ॥३५४॥

ગુજરાતી :- પછી વરસાદ વરસી વરસીને જાણે થાકી ગયો હોય તેમ અટકી ગયો. પછી દમયંતી વળી પાછી સાર્થનો ત્યાગ કરીને પોતાને માર્ગે ચાલવા લાગી. ॥૩૫૪॥

हिन्दी :- फिर वर्षा बरस बरस कर थक गयी तब दमयन्ती फिर अपने मार्ग पर चलने लगी ॥३५४॥

मराठी :- नंतर पाऊस पहून पहून थकून थांबल्यावर दमयंती पुन्हा सार्थ सोडून आपल्या मार्गाला चालू लागली. ॥३५४॥

English :-Then it seemed that the clouds had exausted their stock of rain water and had stopped showering itself on the earth. Then Damyanti too decided to leave the campers and proceed on her journey.

प्राणाधारं च चक्रे सा, निरवद्यैः फलादिभिः ॥
चतुर्थादितपोलीना, वियोगाद्यदिनादपि ॥३५५॥

अन्वय :- सा वियोगाद्यदिनात् अपि चतुर्थादितपोलीना निरवद्यैः फलादिभिः प्राणाधारं चक्रे ॥३५५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम् :- सा दमयन्ती आदौ भवं आद्यं आद्यं च तद् दिनं च आद्यदिनं वियोगस्य आद्यदिनं वियोगाद्यदिनं तस्मात् वियोगाद्यदिनात् अपि चतुर्थं आदौ येषां तानि चतुर्थादीनि । चतुर्थादीनि च तानि तपांसि च चतुर्थादितपांसि चतुर्थादितपस्सु लीना चतुर्थादितपोलीना निर्गतं, अवद्यं येभ्यः तानि निरवद्यानि तैः निरवद्यैः निर्दोषैः फलादिभिः प्राणानां आधारः प्राणाधारः तं प्राणाधारं चक्रे अकरोत् ॥३५५॥

सरलार्थ :- सा दमयन्ती नलवियोगस्य आयदिनात् आरभ्य चतुर्थादितपोलीना निरवद्यैः फलादिभिः प्राणाधारं चक्रे ॥ प्राणान् अधारयत्॥३५५॥

ગુજરાતી :- વળી દમયંતી (પોતાના ભર્તાર સાથેના) વિયોગના પહેલા દિવસથી માંડીને જ ઉપવાસ આદિ તપમાં લીન થઈ હતી. હવે તે નિર્દોષ ફળ આદિ વડે જીવનનો નિર્વાહ કરતી હતી.॥૩૫૫॥

हिन्दी :- दमयंती अपने वियोग के पहले दिन से लेकर उपवास आदि तप में लीन होकर निर्दोष फल आदि द्वारा प्राण धारण करने लगी ॥३५५॥

मराठी :- नंतर ती दमयंती (स्वत:च्या पतिसमवेत) वियोगाच्या पहिल्या दिवसापासून उपवास आदि तपात लीन होऊन निर्दोष फळ आदि येऊन प्राणधारण करू लागली. ॥३५५॥

English :- Damyanti, from the day she was seperated from her husband, started abstinating, did heavy penance and remained wholly on fruits.

ज्वलद्दावानलं शैल - मिवोत्पिङ्गलकुन्तलम् ॥
करालकर्त्रिकापाणिं, विद्युद्वन्तमिवाम्बुदम् ॥३५६॥

अन्वय :- उत्पिङ्गलकुन्तलं ज्वलद्दावानलं शैलं इव करालकर्त्रिकापाणिं विद्युद्वन्तं अम्बुदं इव राक्षसं सा अद्राक्षीत् ।

विवरणम् :- *ऊर्ध्वं गता: पिङ्गला पीतवर्णा: कुन्तला: केशा: यस्य स: उत्पिङ्गलकुन्तल: तं उत्पिङ्गलकुन्तलं, अत एव ज्वलन् दावानल: यस्मिन् स: ज्वलद्दावनल: तं ज्वलत्दावानलं शैलं पर्वतं इव उपलक्ष्यमाणं, कराला चासौ कर्त्रिका च करालकर्त्रिका भीषणकर्त्रिका। करालकर्त्रिका पाणौ यस्य स: करालकर्त्रिकापाणि: तं करालकर्त्रिकापाणिं अतएव विद्युत: अस्यां सन्ति इति विद्युद्वान् तं विद्युद्वन्तं अम्बूनि ददाति इति अम्बुद: तं अम्बुदं वारिदं इव उपलक्ष्यमाणं राक्षसं सा। अद्राक्षीत् - अपश्यत्॥३५६॥*

सरलार्थ :- उत्पिङ्गलकुन्तलम् अतएव ज्वलद्दावानलं पर्वतम् इव, भीषणकर्त्रिकाहस्तम् अत एव विद्युद्वन्तं जलदं इव उपलक्ष्यमाणं राक्षसं सा दमयन्ती अपश्यत् ॥३५६॥

ગુજરાતી :- એવામાં બળતા દાવાનળવાળા પર્વતની પેઠે ઊંચા ઉડતા પીળા કેશોવાળા, વીજળીઓના ચમકારાવાળા મેઘની પેઠે હાથમાં પકડેલી ભયંકર કાતરવાળા,

हिन्दी :- इतने में जलते हुए पर्वत के समान उंचे उडते हुए पीले केशोवाला, चमकती हुई बिजलीवाले बादल के समान, हाथ में भयंकर कैंची ग्रहण किए, ॥३५६॥

मराठी :- इतक्यात पिवळे केस वर उडत असल्यामुळे जळत असलेल्या वर्णव्याने युक्त असलेल्या पर्वताप्रमाणे दिसणारा व हातात भयंकर कातर असलेला म्हणूनच विजेने युक्त मेघाप्रमाणे दिसणारा राक्षस तिला दिसला. ॥३५६॥

English :- Then suddenly she happened to see an ogre whose hair was yellow in colour and was as long as a mountain and dense as a forest confragration. He had a pair of sissors with him which shone like lightening in the sky.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मुखरन्ध्रविनिर्गच्छद् - द्विजिह्वसमजिह्वकम् ॥
भयानकरसं मूर्त - मिवातिशयभैरवम् ॥३५७॥

अन्वय :- मुखरन्ध्रविनिर्गच्छद्द्विजिह्वसमजिह्वकम् अतिशयभैरवं मूर्तं भयानकरसम् इवा राक्षसं सा अपश्यत्॥३५७॥

विवरणम् :- *मुखम् एव रन्ध्रं मुखरन्ध्रं मुखरन्ध्रात् विनिर्गन्ती मुखरन्ध्रविनिर्गच्छन्ती द्वे जिह्वे यस्य सः द्विजिह्वः द्विजिह्वेन समा जिह्वा द्विजिह्वसमजिह्वा। मुखरन्ध्रविनिर्गच्छन्ती द्विजिह्वसमजिह्वा यस्य सः, तं मुखरन्ध्रविनिर्गच्छद् द्विजिह्वसमजिह्वकम्, अतिशयेन भैरवः अतिभैरवः तमतिभैरवं मूर्तं भयानकः श्वासौ रसश्च भयानकरसः तं भयानकरसम् इव दृश्यमानं राक्षसमपश्यत्॥३५७॥*

सरलार्थ :- मुखरन्ध्रविनिर्गच्छद्द्विजिह्वसमजिह्वकम् अतिशयेन भयानकम् अतएव मूर्तिमन्तं भयानकरसं इव दृश्यमानं राक्षसं अपश्यत्॥३५७॥

ગુજરાતી :- મુખરુપી ગુફામાંથી બહાર નીકળતી સર્પસરખી જીભવાળા, જાણે દેહધારી 'ભયાનક રસ' જ હોય નહીં! તેમ અત્યંત ભય ઉપજાવનારા,॥૩૫૭॥

हिन्दी :- मुखरूपी गुफा से बाहर निकलती हुई सर्प समान जीभवाला, मानो देहधारी भयानक रस ही हो ! ऐसा अत्यंत भय पैदा करनेवाला, राक्षस देखा ॥३५७॥

मराठी :- सापाच्या मुखातून बाहेर निघणाऱ्या जीभेप्रमाणे त्याच्या मुखातून जीभ बाहेर निघत आहे. असा अतिशय भयंकर जणूं काय मूर्तिमंत भयानक रसच असा राक्षस तिला दिसला. ॥३५७॥

English :- His mouth was as big as a huge cave and the wriggling tongue, wriggled like a venomous snake. And whose body was actually a testimonial evidence of fright means whose mere sight was frightful.

तमोमयमिव श्यामं, संवीतव्याघ्रकृत्तिकम् ॥
राक्षसं तत्र साद्राक्षी - त्प्रेताधिपमिवापरम् ॥३५८॥

अन्वय :- तमोमयं इव श्यामं संवीतव्याघ्रकृत्तिकम् अपरं प्रेताधिपम् इव राक्षसं तत्र सा अद्राक्षीत् ॥३५८॥

विवरणम् :- तमसां विकारः तमोमयः तं तमोमयं अन्धकारमयं इव श्यामं कृष्णं, व्याघ्रस्य कृतिकं व्याघ्रकृत्तिकं व्याघ्रचर्म, संवीतं व्याघ्रकृत्तिकं येन सः संवीतव्याघ्रकृत्तिकः तं संवीतव्याघ्रकृत्तिकम् अपरं द्वितीयं प्रेतानाम् अधिपः प्रेताधिपः तं प्रेताधिपं इव राक्षसं तत्र तस्मिन् वने सा दमयन्ती अद्राक्षीत् अपश्यत् ॥३५८॥

सरलार्थ :- अन्धकारमयम् इव कृष्णं, संवीतव्याघ्रचर्मकं परं प्रेताधिपं यमं दमयन्ती तत्र कृष्णवर्णं व्याघ्रचर्म वसानं द्वितीयं यमराजमिव राक्षसं अपश्यत्॥३५८॥

ગુજરાતી :- અંધકાર જેવા શ્યામ રંગવાળા, શરીર પર જેણે વાઘનું ચામડું ઓઢેલું છે એવા, તથા જાણે બીજા યમરાજ જ હોય નહીં એવા રાક્ષસને દમયંતીએ ત્યાં જોયો. ॥૩૫૮॥

हिन्दी :- अंधकार जैसे श्याम रंग के शरीर पर वाघ्रचर्म धारण किया हुआ ऐसा लग रहा था जैसे दूसरा यमराज ही हो, ऐसे एक राक्षस को दमयंतीने वहाँ देखा ॥३५८॥

मराठी :- जणू काय अंधकारातून उत्पन्न झालेल्या काळाकुळकुळीत रंगाचा, वाघाचे कातडे पांघरलेला जणू काय दुसरा यमराजच असा राक्षस दमयंतीने त्या वनांत पाहिला. ॥३५८॥

English :- The environment had become dark and horrorful with fright. The ogre's body was not only jet black in complexion, but also had the fur and the mane of a lion. It seemed as though it was a second God of death (Yama).

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

रक्षोऽपि प्रेक्ष्य तामूचे, भोक्ष्येऽद्य त्वामहं शुभे ॥
क्षामकुक्षिः क्षुधास्म्येष, सप्तरात्रमुपोषितः ॥३५९॥

अन्वय :- रक्षः अपि तां प्रेक्ष्य ऊचे हे शुभे ! सप्तरात्रं उपोषितः अतः एव क्षुधा क्षामकुक्षिः अहं अद्य त्वां भोक्ष्ये ॥३५९॥

विवरणम् :- रक्षः राक्षसः अपि तां दमयन्तीं प्रेक्ष्य अवलोक्य ऊचे अवोचत् हे शुभे ! सप्तानां रात्रीणां समाहारः सप्तरात्रम् उपोषितः अनशनः एषः अहं क्षुधा क्षुधया बुभुक्षया क्षामा कृशा कुक्षिः उदरं यस्य सः क्षामकुक्षिः कृशोदरः अस्मि । अत अद्य अहं त्वां भोक्ष्ये खादिष्यामि॥३५९॥

सरलार्थ :- राक्षसः अपि तां दमयन्तीं अवलोक्य अवदत् हे शुभे । सप्तरात्रं उपोषितः एषः अहं बुभुक्षया कृशोदरः अस्मि। अतः अद्य अहं त्वां भक्षयिष्यामि॥३५९॥

ગુજરાતી :- પછી તે રાક્ષસ પણ તેણીને જોઈ કહેવા લાગ્યો કે, હે શુભે ! આજે હું તારું ભક્ષણ કરીશ, કેમ કે સાત રાત્રિનો ઉપવાસી એવો હું ક્ષુધાથી ખાલી ઉદરવાળો છું. ॥૩૫૯॥

हिन्दी :- फिर वह राक्षस दमयंती को देखकर कहने लगा कि, हे शुभे! आज मैं तुम्हें खाऊंगा। क्योंकि मैं सात दिन का भूखा हूँ ॥३५९॥

मराठी :- नंतर तो राक्षसही दमयन्तीला म्हणाला- हे शुभे! मी सात दिवस झाले उपाशी आहे. भुकेने माझे पोट कृश झाले आहे म्हणून मी आज तुला खाईन. ॥३५९॥

English :- Then the goblin spoke to her saying that, he had abstinated for seven days and he is utterly hungry now and therfore wishes to devour her.

तद् दुःश्रवमपि श्रुत्वा, दुरीक्ष्यमपि वीक्ष्य तम् ॥
भीतापि धैर्यमालम्ब्य, जजल्प नलवल्लभा ॥३६०॥

अन्वय :- नलवल्लभा तद् दुःश्रवम् अपि श्रुत्वा दुरीक्ष्यम् अपि तं वीक्ष्य भीता अपि धैर्यम् आलम्ब्य तं जजल्प ॥३६०॥

विवरणम् :- नलस्य वल्लभा पत्नी नलवल्लभा दमयन्ती तद् दुःखेन श्रूयते इति दुःश्रवं श्रोतुं अशक्यं दुराकर्ण्य अपि वचनं श्रुत्वा निशम्य, दुःखेन ईक्ष्यते दुरीक्ष्यं दुरालोक्यं अपि तं राक्षसं वीक्ष्य आलोक्य भीता अपि धैर्यं धीरताम् आलम्ब्य आश्रित्य तं राक्षसं जजल्प अजल्पत् ॥३६०॥

सरलार्थ :- नलवल्लभा तद् दुःश्रवं अपि वचनं निशम्य, दुरीक्ष्यं अपि तं राक्षसं आलोक्य भीता अपि धैर्यं आश्रित्य तं राक्षसं अजल्पत् । अवदत्॥३६०॥

ગુજરાતી :- એ રીતે (કાર્ણોથી) ન સંભળાય એવું પણ તે વચન સાંભળીને, તથા (ચક્ષુઓથી) ન જોઈ શકાય એવા તે રાક્ષસને જોઈને, ભયભીત થયા છતાં પણ ધૈર્ય રાખીને દમયંતીએ તેને કહ્યું કે, ॥૩૬૦॥

हिन्दी :- इसप्रकार कान से न सूना जाय ऐसा वह वचन सुनकर और (आँखो से) न देखा जाय ऐसे उस राक्षस को देखकर, भयभीत होते हुए भी हिंमत कर के दमयंती ने उससे कहा कि,॥३६०॥

मराठी :- नलराजाची पत्नी दमयन्ती कानाने ऐकण्यास अशक्य असे ते वचन ऐकून व डोळ्याने पाहाण्यास अशक्य अशा त्या भयानक राक्षसास पाहून याबरली असता सुध्दा धैर्य धारण करून त्याला म्हणाली ॥३६०॥

English :- The ogre gave out a horrorful cry which one might not be able to hear and showed his horrorful self, which one might not be able to bear such a shuddering sight. But Damyanti stood there as a fortress and bluntly spoke to the ogre.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

जातस्य हि ध्रुवं मृत्यु - रकृतार्थस्य तद्भयम् ।
आजन्मपरमार्हत्याः, कृतार्थायास्तु तन्न मे ॥३६१॥

अन्वय :- जातस्य हि मृत्युः ध्रुवं अस्ति । अकृतार्थस्य तद्भयं अस्तु। आजन्मपरमार्हत्याः कृतार्थायाः मे तद् न अस्ति ॥३६१॥

विवरणम् :- *जातस्य उत्पन्नस्य लब्धजन्मनः हि मृत्युः मरणं ध्रुवं निश्चितम् अस्ति । कृतः अर्थः येन सः कृतार्थः न कृतार्थः अकृतार्थः तस्य अकृतार्थस्य अकृतकृत्यस्य नरस्य तस्मात् मरणात् भयं तद्भयम् अस्तु । किन्तु जन्मनः आरभ्य आजन्मा अर्हतः इयम् आर्हती । परमा चासौ आर्हती च परमार्हती तस्याः परमार्हत्याः अर्हतः परमभक्तायाः तथा कृतः अर्थः यया सा कृतार्था तस्याः कृतार्थायाः कृतकृत्यायाः मे मम तद् मृत्युभयं न अस्तु ॥३६१॥*

सरलार्थ :- उत्पन्नस्य हि मरणं निश्चितं अस्ति । अकृतकृत्यस्य मरणाद्भयम् अस्तु । किन्तु अर्हतः परमभक्तायाः कृतकृत्यायाः मम मृत्युभयं न अस्ति ॥३६१॥

ગુજરાતી :- **(હે રાક્ષસ!) જન્મેલા પ્રાણી માટે મરણ તો ખરેખર નિશ્ચીત જ છે, પણ જે માણસે પોતાનું કાર્ય સાધેલું નથી, તેને મૃત્યુનો ભય હોય છે. પરંતુ હું તો છેક જન્મથી માંડીને જૈન ધર્મનું આરાધન કરવાથી કૃતાર્થ થયેલી છું, માટે મને મરણનો ભય નથી.**

हिन्दी :- (हे राक्षस!) जन्म पाये हुए प्राणिओं के लिए मौत तो निश्चय ही आनेवाली है, परंतु जिस मनुष्यने अपना कार्य सिद्ध नहीं किया हो, उसे मृत्यु का भय है, लेकिन मैं आजन्म से जैनधर्म की आराधना कर के कृतार्थ हो गयी हूँ । इसलिए मुझे मृत्यु का कोई भय नहीं है ॥३६१॥

मराठी :- (हे राक्षसा!) जन्मलेल्या प्राण्याला मरण हे निश्चितच आहे, परंतु ज्या मानवाने स्वतःचे कार्य साध्य केले नाही त्याला मृत्यूचे भय असते. परंतु मी तर जन्मापासून जैनधर्माची आराधना केल्यामुळे कृतार्थ झाली आहे, म्हणून मला मरणाचे भय नाही. ॥३६१॥

English :- **She says that every mortal being is bound and has to experience death. A being who hasn't accomplished his deeds, will surely be afraid of death, but she who has from birth, worshipped Lord Jineshwar and is satisfed in her religious deed. is not at all afraid of facing death.**

प. पू. श्री पैज्यरत्नसागर जी गणधर...
कोबा तीर्थ जैन आराधना केन्द्र,
पुंसेनगर, पिन-३४२०...

किंचाहं दुःखमोक्षाय, दुःखार्ता प्रार्थये मृतिम् ॥
त्वं मां नलवियोगाग्निदग्धांगी भोक्ष्यसे सुखम् ॥३६२॥

अन्वय :- किञ्च नलवियोगाग्निदग्धाङ्गी दुःखार्ता अहं दुःखमोक्षाय मृतिं प्रार्थये । त्वं मां सुखं भोक्ष्यसे ॥३६२॥

विवरणम् :- *किञ्च नलस्य वियोगः नलवियोगः। नलवियोगः एव अग्निः नलवियोगाग्निः । नलवियोगाग्निना दग्धम् अङ्गं यस्याः सा नलवियोगाग्निदग्धाङ्गी, दुःखेन आर्ता पीडिता दुःखार्ता अहं दुःखात् मोक्षः मुक्तिः दुःखमोक्षः तस्मै दुःखमोक्षाय मृतिं मरणं प्रार्थये विज्ञापये। त्वं मां सुखं भोक्ष्यसे ॥३६२॥*

सरलार्थ :- किञ्च नलवियोगाग्निदग्धाङ्गी दुःखपीडिता अहं दुःखमोक्षाय मरणं प्रार्थये त्वं मां सुखं भोक्ष्यसे ॥३६२॥

गुजराती :- વળી દુઃખથી પીડાયેલી હું, દુઃખમાંથી છૂટવા માટે મરણની જ ઇચ્છા કરું છું તેમજ નલરાજાના વિયોગરુપી અગ્નિથી બળી ગયેલાં શરીરવાળી એવી મને તું સુખેથી ભક્ષણ કરી શકીશ. ॥૩૬૨॥

हिन्दी :- और मैं दुःख से पीडित होने के कारण दुःखों से छूटकारा पाने के लिए मरने की ही इच्छा कर रही हूं, नलराजा की वियोगाग्नि से मेरा शरीर जल रहा है इसलिए तू मेरा खुशी से भोजन कर सकते हो। ॥३६२॥

ગુજરાતી :- પૂર્વે દમયંતીના ઉપદેશથી શ્રાવક થયેલો તાપસોનો કુલપતિ તે વખતે, પોતાના શિષ્યનું વૃત્તાંત જોઈને તે કેવલી મુનિરાજ પાસે ચારિત્રની માગણી કરવા લાગ્યો. ॥૪૩૯॥

हिन्दी :- पहले दमयंती के उपदेश से श्रावक हुआ तापसों का कुलपति उस समय, अपने शिष्य का वृत्तांत देखकर वह केवली मुनिराज के पास चारित्र की इच्छा करने लगा ॥४३९॥

मराठी :- पूर्वीपण दमयन्तीचा श्रावक बनलेला तो तापसांचा कुलपति आपल्या शिष्याचा वृत्तान्त पाहून केवलिमुनीजवळ चारित्राची मागणी करु लागला. ॥४३९॥

English :- The teacher of the God had initially become a layman by listening to Damyanti's lecture regarding the jain religion. But now he askes the Kevalmuni to help him renounce the world and become a priest.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

केवल्यपि बभाषे तं, गुरुर्दास्यति ते व्रतम् ॥
सूरिः श्रीमान् यशोभद्रो, गुरुरेष ममाप्यभूत् ॥४४०॥

अन्वय :- केवली अपि तं बभाषे-ते व्रतं श्रीमान् यशोभद्रः सूरिः गुरुः दास्यनि । एषः मम अपि गुरुः अभूत् ॥४४०॥

विवरणम् :- *केवली अपि तं तापसं बभाषे अभाषत-श्रीः अस्य अस्ति इति श्रीमान् यशोभद्रः सूरिः गुरुः ते तुभ्यं व्रतं दीक्षां दास्यति अर्पयिष्यति । एषः मम अपि गुरुः अभूत् अभवत् बभूव ॥४४०॥*

सरलार्थ :- केवलिमुनिः अपि तं तापसम् अभाषत । श्रीमान् यशोभद्रः सूरिः गुरुः तुभ्यं व्रतं अर्पयिष्यति । एषः मम अपि गुरुः अभवत् ॥४४०॥

गुजराती :-त्यारे ते केवली मुनिराजे पण ते कुलपतिने कह्युं के, मारा गुरु तमोने चारित्र आपशे, केम के श्रीमान यशोभद्र नामना जे आचार्य छे, ते मारा पण गुरु हता. ॥४४०॥

हिन्दी :- तब उस केवली मुनिराज ने उस कुलपति से कहा कि, मेरे गुरु तुम्हे चारित्र देंगे, क्यों कि श्रीमान यशोभद्र नामक जो आचार्य है, वह मेरे भी गुरु थे। ॥४४०॥

मराठी :- नंतर केवलिमुनिराज पण त्या कुलपतीला म्हणाले - श्रीमान् यशोभद्र नावाचे आचार्य गुरु तुला दीक्षा देतील. ते माझे सुद्धा गुरु होते. ॥४४०॥

English :- At this the Kevalmuni replied that his former teacher named Shri Yashobadra who was a religious perceptor would help him to become a priest.

पुनः कुलपतिः प्रोचे, विस्मयोत्फुल्ललोचनः ॥
व्रतं जग्राह भगवान्, कुतो वैराग्ययोगतः ॥४४१॥

अन्वय :- विस्मयोत्फुल्ललोचनः कुलपतिः पुनः प्रोचे-भगवान् कुतः वैराग्ययोगतः व्रतं जग्राह ॥४४१॥

विवरणम् :- विस्मयेन आश्चर्येण उत्फुल्ले विकसिते विस्मयोत्फुल्ले। विस्मयोत्फुल्ले लोचने नयने यस्य सः विस्मयोत्फुल्ललोचनः कुलस्य पतिः कुलपतिः पुनः प्रोचे अवोचत् भगः यस्य अस्ति इति भगवान् कुतः कस्मात् विरागस्य भावः वैराग्यं, वैराग्यस्य योगः वैराग्ययोगः तस्मात् वैराग्ययोगतः व्रतं दीक्षां जग्राह अग्रहीत् ॥४४१॥

सरलार्थ :- आश्चर्येण विकसितनयनः कुलपतिः अवदत् भगवान् कस्मात् वैराग्ययोगतः व्रतम् अगृह्णात् ॥४४१॥

ગુજરાતી :-આશ્ચર્યથી વિકસિત થયેલ ચક્ષુવાળા કુલપતિએ વળી તેમને કહ્યું કે, હે ભગવાન! આપ સાહેબે કેવી રીતે વૈરાગ્યના યોગથી આ ચારિત્ર લીધું હતું? ॥૪૪૧॥

हिन्दी :- आश्चर्य से विकसित चक्षुवाले कुलपति ने फिर उन से कहा कि, हे भगवान ! आपने कैसे वैराग्य के योग से यह चारित्र लिया था? ॥४४१॥

मराठी :- आश्चर्याने विकसित नयन झालेले कुलपती पुन्हा त्यांना म्हणाले- भगवन्! आपण कशाप्रकारच्या वैराग्य योगाने दीक्षा घेतली? ॥४४१॥

English :- The teacher's eyes that were bloomed with astonishment asked the Kevalmuni the reason for him to renounce the world and as to what was the situation at that time.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः केवलिनाऽख्यायि, कोशलायां नलानुजः ॥
कूबरः कुरुते राज्यमहं तस्यास्मि नन्दनः ॥४४२॥

अन्वय :- ततः केवलिना आख्यायि कोशलायां नलानुजः कूबरः राज्यं कुरुते। तस्य अहं नन्दनः अस्मि ॥४४२॥

विवरणम् :- *ततः तदनन्तरं केवलिना मुनिना आख्यायि अकथ्यत। अनुजायते इति अनुजः नलस्य अनुजः; नलानुजः कूबरः कोशलायां राज्यं कुरुते। तस्य कूबरस्य अहं नन्दनः पुत्रः अस्मि ॥४४२॥ .*

सरलार्थ :- तदनन्तरं केवलिना मुनिना अकथ्यत । नलस्य अनुजः कूबरः कोशलायां नर्गायां राज्यं कुरुते । तस्य कूबरस्य अहं नन्दनः अस्मि ॥४४२॥

ગુજરાતી :- ત્યારે કેવલી ભગવાને કહ્યું કે, કોશલા નામની નગરીમાં નલરાજાનો કૂબર નામનો નાનો ભાઈ રાજ્ય કરે છે, અને હું તે કૂબરનો પુત્ર છું. ॥૪૪૨॥

हिन्दी :- तब केवली भगवाने कहा कि, कोशला नामक नगरी में नलराजा का कूबर नामक छोटा भाई राज्य करता है, और मैं उस कूबर का बेटा हूँ ॥४४२॥

मराठी :- तेव्हा केवलीभगवान म्हणाले- कोशलनावाच्या नगरीत नलराजाचा कूबरनावाचा लहान भाऊ राज्य करीत आहे, मी त्या कूबराचा मुलगा आहे. ॥४४२॥

English :- The Kevalmuni replied that, in a city named Koshala, King Nal's younger brother Kubar ruled the city and he happened to be the son of Kubar.

इतोऽस्ति भङ्गानगरी, राजा तस्यां च केसरी ॥
तस्य मन्त्री यशोभद्रो, व्रतं जग्राह धीनिधिः ॥४४३॥

अन्वय :- इतः भङ्गानगरी अस्ति । तस्यां केशरी राजा वर्तते । तस्य च धीनिधिः यशोभद्रः मन्त्री व्रतं जग्राह ॥४४३॥

विवरणम् :- इतः भङ्गा नाम नगरी भङ्गानगरी अस्ति । तस्यां भङ्गानगर्यां केशरी नाम राजा वर्तते । तस्य केशरनृपस्य धीनां बुद्धीनां निधिः धीनिधिः बुद्धिसागरः यशोभद्रः नाम मन्त्री व्रतं दीक्षां जग्राह अगृह्णात् ॥४४३॥

सरलार्थ :- इतः भङ्गानगरी अस्ति । तस्यां नगर्यां केशरी राजा वर्तते । तस्य च बुद्धिसागरः यशोभद्रः मन्त्री व्रतम् अग्रहीत् ॥४४३॥

ગુજરાતી :-હવે ભંગા નામની નગરીમાં કેશરી નામે રાજા છે, તે રાજાના યશોભદ્ર નામના બુદ્ધિના ભંડારસમા મંત્રીએ દીક્ષા લીધી. ॥૪૪૩॥

हिन्दी :- अब भंगा नामक नगरी है, और उस नगरी में केशरी नामक राजा है, उस राजा के यशोभद्र नामक बुद्धि के भंडार जैसे मंत्री ने दीक्षा ली ॥४४३॥

मराठी :- एक भंगानावाची नगरी आहे, त्या नगरीत केशरीनावाचा राजा आहे, त्या राजाच्या यशोभद्रनावाच्या बुद्धीचे भांडार असलेल्या मंत्र्याने दीक्षा घेतली. ॥४४३॥

English :- Now there is another city named Bhangha and a king named Kesari ruled that Kingdom. The minister of the kingdom, who was a storehouse of wisdom and brillancy, decided to renounce the world and become a priest.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्रमेण ते यशोभद्रा, जाता ह्यागमपारगाः ॥
विजहुश्च महीपीठे, भव्यबोधकृते शुभाः ॥४४४॥

अन्वय :- **क्रमेण ते यशोभद्राः आगमपारगाः जाताः । शुभाः ते भव्यबोधकृते महापीठे विजहुः ॥४४४॥**

विवरणम् :- ***क्रमेण अनुक्रमेण ते यशोभद्राः पारं गच्छन्ति इति पारगाः । आगमानां पारगाः आगमपारगाः सिद्धान्तपारङ्गताः जाताः अभवन् अजायन्ता शुभाः कल्याणकारिणः शुभदर्शनाः, ते भव्यानां बोधः भव्यबोधः भव्यबोधस्य कृते भव्यबोधकृते भव्यबोधहेतोः मह्याः पीठं महीपीठं तस्मिन् महीपीठे पृथ्वीतले विजहुः व्यचरन् ॥४४४॥***

सरलार्थ :- क्रमेण ते यशोभद्राः आगमपारगाः जाताः कल्याणकारिणः ते भव्यबोधहेतोः पृथ्वीतले व्यचरन् ॥४४४॥

ગુજરાતી :-અનુક્રમે તે યશોભદ્ર મુનિ જૈન આગમોના પારગામી થયા, તથા ભવ્ય જીવોને બોધ પમાડવા માટે તે શુભ આચાર્ય પૃથ્વીતલ પર વિહાર કરવા લાગ્યા. ॥૪૪૪॥

हिन्दी :- अनुक्रम से वे यशोभद्रमुनि जैन आगमों के पारगामी हुए और भव्यजीवो को बोध कराते वह शुभ आचार्य पृथ्वीतल पर विहार करने लगे ॥४४४॥

मराठी :- **क्रमाने ते यशोभद्रमुनि जैन आगमात पारंगत झाले आणि भव्यजीवांना बोध करण्यासाठी ते शुभ आचार्य पृथ्वीतलावर विहार करू लागले.॥४४४॥**

English :- **Then in due-course Shri Yashobhadra studied and attained Knowledge of all the sacred books (Aagams) and then went about from place to place transmitting the knowledge and vigilance and preaching to the people about the jain religion.**

अन्यदा कोशलायां ते, विहरन्तः समाययुः ॥
तारकैरिव शीतांशुः, शिष्यैर्बहुभिरावृताः ॥४४५॥

अन्वय :- अन्यदा तारकैः आवृतः शीतांशुः इव बहुभिः शिष्यैः आवृताः ते विहरन्तः कोशलायां समाययुः ॥४४५॥

विवरणम् :- अन्यदा अन्यस्मिन् दिने तारकैः आवृत्तः शीताः अंशवः यस्य सः शीतांशुः चन्द्रः इव बहुभिः शिष्यैः आवृताः परिवृताः ते यशोभद्राः विहरन्तः विचरन्तः कोशलायां समाययुः समाजग्मुः समागच्छन् ॥४४५॥

सरलार्थ :- अन्यस्मिन् दिवसे तारकैः आवृतः शीतांशु इव बहुभिः शिष्यैः परिवृताः ते विहरन्तः कोशलायां समागच्छन् ॥४४५॥

ગુજરાતી :-તે યશોભદ્રમુનિ, તારાઓથી ઘેરાયેલા ચંદ્રની પેઠે, ઘણા શિષ્યોની સાથે વિહાર કરતા કરતા એક દિવસે કોશલા નગરીમાં પધાર્યા. ॥૪૪૫॥

हिन्दी :- वे यशोभद्रमुनि, तारों से घिरे हुए चंद्र के समान, बहुत शिष्यों के साथ विहार करते करते एक दिन कोशला नगरी में पधारे ॥४४५॥

मराठी :- ते यशोभद्रमुनि तारकांनी घेरलेल्या चंद्राप्रमाणे अनेक शिष्यांसह विहार करीत करीत एके दिवशी कौशला नगरीत आले.॥४४५॥

English :- Just as the stars surround the moon, in the same way the high-priest Shri Yashobhadra was surrounded by his disciples and wandering about, one day landed in the city of Koshala.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्र तं श्रेयसीभक्ति-र्मुनिराजमवंदिषम् ॥
व्याख्यामशृणवं कर्णकुरङ्गप्रीतिगीतिकाम्॥४४६॥

अन्वयः- तत्र श्रेयसीभक्तिः अहं तं मुनिराजम् अवन्दिषम्। कर्णकुरङ्गप्रीतिगीतिकां व्याख्याम् अशृणवम्॥४४६॥

विवरणम् :- *तत्र तस्यां नगर्यां श्रेयसी कल्याणकारिणी भक्तिः यस्य सः श्रेयसीभक्तिः अहं तं मुनीनां राजा मुनिराजः तं मुनिराजं यशोभद्रं अवन्दे। कर्णौ एव कुरङ्गौ कर्णकुरङ्गौ। कर्णकुरङ्गौ प्रीणाति इति कर्णकुरङ्गप्रीतिश्चासौ गीतिका च, तां कर्णकुरङ्गप्रीतिगीतिकां इव व्याख्यां प्रवचनम् अशृणवं अश्रौषम्॥४४६॥*

सरलार्थ :- तत्र कल्याणकारिणीभक्तिः अहं तं यशोभद्रमुनिराजम् अवन्दे। कर्णहरिणप्रीतिकारगीतिकं प्रवचनम् अशृणवम् ॥४४६॥

गुजराती :-त्यां कल्याणकारी भक्तिवाळा एवा में ते मुनिराजने वांद्या, तथा कर्णरुपी हरणने आनंद आपनार मनोहर गायन सरखी में तेमनी धर्मदेशना सांभळी. ॥४४६॥

हिन्दी :- वहाँ कल्याणकारी भक्तिवाले उन मुनिराज को और कर्णरुपी हरिन को आनंद देनेवाले गायन के जैसी उनकी धर्मदेशना मैंने सुनी ॥४४६॥

मराठी :- तेथे कल्याणकारक भक्ति असलेल्या मी त्या यशोभद्र आचार्यांना वन्दन केले व कानरूपी हरिणांना आनंद देणाऱ्या गीताप्रमाणे मुनिराजांची धर्मदेशना ऐकली. ॥४४६॥

English :- The Kevalmuni than went to bow down to the high-priest who was conductive to happiness and prosperity. He than sat down to hear the lecture of the high-priest which was as sweet and beautiful as music which seemed like a deer that had stopped suddenly to taste the sweetness of the song.

व्याख्यान्ते गुरुमप्राक्षमहं जीवितमात्मनः ॥
ज्ञात्वा श्रुतोपयोगेन, स ऊचे पञ्चवासरीम् ॥४४७॥

अन्वय :- व्याख्यान्ते अहम् आत्मनः जीवितं गुरुम् अप्राक्षं-श्रुतोपयोगेन ज्ञात्वा सः ऊचे पञ्चवासरीम् अस्ति ॥४४७॥

विवरणम् :- *व्याख्यायाः अन्तः व्याख्यान्तः तस्मिन् व्याख्यान्ते प्रवचने समाप्ते अहम् आत्मनः स्वस्य जीवितं जीवनविषये प्रश्नं यशोभद्रगुरुम् अप्राक्षम् अपृच्छम् । श्रुतस्य उपयोगः श्रुतोपयोगः तेन श्रुतपयोगेन ज्ञात्वा अवबुध्य सः यशोभद्रसूरिः ऊचे अवोचत्-पञ्चानां वासराणां समाहारः पञ्चवासरीं पञ्चदिवसं यावत् मम आयुः अस्ति ॥४४७॥*

सरलार्थ :- प्रवचनान्ते अहं स्वजीवनविषये यशोभद्रगुरुम् अपृच्छम्। तदा श्रुतोपयोगेन ज्ञात्वा यशोभद्रसूरिः अवोचत्-पञ्चदिनानि यावत् आयुः अस्ति ॥४४७॥

गुजराती :- ધર્મદેશનાને અંતે મેં ગુરુમહારાજને મારા જીવનના સબંધમાં પૂછ્યું, ત્યારે ગુરુમહારાજે શ્રુતજ્ઞાનના ઉપયોગથી પાંચ દિવસનું આયુ બાકી છે, એમ કહ્યું.॥૪૪૭॥

हिन्दी :- धर्मदेशना के अंत में मैंने गुरुमहाराज को मेरे जीवन के संबंध में पूछा, तब गुरुमहाराज ने अपने श्रुतज्ञान के उपयोग से मेरा पांच दिन का आयुष्य बाकी है, ऐसा कहा ॥४४७॥

मराठी :- धर्मदेशना संपल्यानंतर मी माझ्या जीवनाबदल यशोभद्रसूरींना प्रश्न केला. तेव्हां यशोभद्र आचार्यांनी श्रुतज्ञानाचा उपयोग करून सांगितले की आता पांच दिवस आयुष्य शिल्लक आहे. ॥४४७॥

English :- After the sermon was over, he went ahead and asked the high-priest regarding his life. At this the high-priest with the help of his knowledge of the Vedas and Scriptures told him that he had five days left in this world to live.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततश्चाचिन्तयमहं, हहा धिग्मे प्रमादिताम् ॥
नाकार्षमुज्ज्वलं धर्ममहार्षं जन्म मानुषम् ॥४४८॥

अन्वय :- ततः अहं अचिन्तयम् । मे प्रमादितां धिग् । उज्ज्वलं धर्मं न अकार्षं, तेन मानुषं जन्म अहार्षम् ॥४४८॥

विवरणम् :- तत; तदनन्तरम् अहम् अचिन्तयं व्यचारयं-हहा! मे मम प्रमादः अस्य अस्ति इति प्रमादी । प्रमादिनः भावः प्रमादिता तां प्रमादितां अनवधानतां धिग् अस्तु । उज्ज्वलं तेजस्विनं धर्मं न अकार्षम् अकरवं तेन मनुषस्य इदं मानुषं जन्म अहार्षं व्यर्थं यापितवान् ॥४४८॥

सरलार्थ :- तदनन्तरम् अहं अध्यायम् । मम प्रमादितां धिग् अस्तु । अहं उज्ज्वलं धर्मं न अकरवं तेन मानुषं जन्म अहरम् ॥४४८॥

गुजराती :- पछी हुं चिंतववा लाग्यो के, अरेरे ! मारां प्रमादीपणाने धिक्कार छे ! में निर्मळ एवुं (कंई पण) धर्मकार्य कर्युं नहीं, अने तेथी आ मनुष्यजन्मने हुं (फोकटमां) हारी गयो छुं.॥४४८॥

हिन्दी :- फिर मैं विचार करने लगा कि, अरेरे ! मेरे प्रमादीपन को धिक्कार है । मैंने कुछ भी निर्मल धर्मकार्य किया नहीं, और इस मनुष्यजन्म को मैं व्यर्थ में हार गया हूँ ॥४४८॥

मराठी :- मग मी चिंतन करू लागलो की, अरेरे! माझ्या प्रमादीपणाला धिक्कार असो, मी अतिशय उज्ज्वल असलेल्या धर्माचे आचरण केले नाही व दुर्लभ मनुष्यजन्म व्यर्थ घालविला.॥४४८॥

English :- He then wonders and disdains his lazziness. He has just wasted this human-life of his without doing any meritable deed.

गुरुः प्रोवाच मा शोचीर्वत्साद्यापि व्रतं चर ।।
अप्येकदिवसं दीक्षा, सर्वपापक्षयङ्करी ।।४४९।।

अन्वय :- गुरुः प्रोवाच-हे वत्स ! मा शोचीः। अद्यापि व्रतं चरा एकन्दिवसं अपि दीक्षा सर्वपापक्षयङ्करी वर्तते ।।४४९।।

विवरणम् :- *गुरुः यशोभद्रसूरिः प्रोवाच अवोचत्-हे वत्स! मा शोचः, शोकं मा कुरु। अद्यापि अधुनापि व्रतं दीक्षां चर गृहाण। एकं दिवसमपि दीक्षा सर्वाणि च तानि पापानि च सर्वपापानि। सर्वपापानां क्षयः सर्वपापक्षयः। सर्वपापक्षयं करोतीति सर्वपापक्षयकरी वर्तते।।४४९।।*

सरलार्थः- गुरुः अवदत् हे वत्स! शोकं मा कुरु। अद्यापि दीक्षां गृहाण। एकदिवसमपि दीक्षा सर्वपापनाशकरी वर्तते ।।४४९।।

ગુજરાતી :- ત્યારે ગુરુમહારાજે કહ્યું કે, હે વત્સ! તું દિલગીર નહીં થા. અને હજુ પણ તું ચારિત્રને અંગીકાર કર કેમકે એક દિવસ પાળેલી દીક્ષા પણ સર્વ પાપોનો વિનાશ કરનારી છે. ।।४४९।।

हिन्दी :- तब गुरुमहाराज ने कहा कि, हे वत्स! तू दिलगिर मत हो और अभी भी तू चारित्र को स्वीकार कर, क्योंकि एक दिन भी पाली हुई दीक्षा सब पापों का विनाश करनेवाली होती है ।।४४९।।

मराठी :- तेव्हा गुरुमहाराज म्हणाले- हे वत्सा! तू शोक करू नको. वाईट वाटून घेऊ नको. अजूनही दीक्षा घे. एक दिवस जरी दीक्षा घेतली तरी सर्वपापांचा नाश होतो.।।४४९।।

English :- Then the high-priest said to him to throw away his laments as he still has time left to repent, he decided to renounce the world and become a priest. As even one day of pure monastism wipes away all the past sins.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः प्रव्रज्य तत्पार्श्वे, गिरावागत्य तद्गिरा ॥
शुक्लध्यानाग्निनिर्दग्धघातिकर्मापि केवलम् ॥४५०॥

अन्वय :- ततः तत्पार्श्वे प्रव्रज्य तद् गिरा गिरौ आगत्य शुक्लध्यानाग्निनिर्दग्धघातिकर्मा केवलम् आप ॥४५०॥

विवरणम् :- *ततः तदनन्तरं तस्य यशोभद्रसूरीश्वरस्य पार्श्वः तत्पार्श्वः तस्मिन् तत्पार्श्वे प्रव्रज्य दीक्षां लात्वा तस्य यशोभद्रसूरिवरस्य गीः तद्गीः तया तद्गिरा वाण्या गिरौ पर्वते आगत्य एत्य शुक्लं च तद् ध्यानं च शुक्लध्यानं शुक्लध्यानस्य अग्निः पावकः शुक्लध्यानाग्निः । आत्मगुणान् घ्नन्तीत्येवं शीलानि घातीनि च तानि कर्माणि च घातिकर्माणि । निर्दग्धानि घातिकर्माणि येन सः निर्दग्धघातिकर्मा केवलं ज्ञानम् आप प्रापा॥४५०॥*

सरलार्थ :- ततः तस्य यशोभद्रसूरिश्वरस्य पार्श्वे प्रव्रज्य तद्वाण्या पर्वते आगत्य शुक्लध्यानाग्निना निर्दग्धघातिकर्मा केवलम् आप । शुक्लध्यानेन घातिकर्माणि विनाश्य केवलज्ञानमाप ॥४५०॥

ગુજરાતી :-પછી તેમની પાસે ચારિત્ર લઈને, તથા તેમના જ વચનથી આ પર્વત પર આવીને, શુક્લ ધ્યાનરૂપી અગ્નિથી ઘાતિકર્મોને બાળીને હું કેવલજ્ઞાન પામ્યો છું. ॥૪૫૦॥

हिन्दी :- फिर उनके पास चारित्र लेकर, और उनके वचन से इस पर्वत पर आ कर शुक्ल ध्यानरूपी अग्नि से घातिकर्मों को जलाकर मैनें केवलज्ञान पाया है। ॥४५०॥

मराठी :- नंतर यशोभद्रसूरीजवळ चारित्र घेऊन, त्यांच्या वचनाने या पर्वतावर येऊन शुक्लध्यानरुपी अग्नीने घातिकर्मांना जाळून मी केवलज्ञान प्राप्त केले आहे. ॥४५०॥

English :- Therfore after becoming a medicant, he came to this mount as it was told to him by the priest and went into deep meditation and burnt away his blazing sins and attained final liberation.

Jun Gun Aaradhak Trust

इत्याख्याय मुनिस्तेषां, कृतार्थः सिंहकेशरी ॥
योगं निरुध्य संहत्य, शेषकर्माणि निर्वृतः ॥४५१॥

अन्वय :- इति आख्याय कृतार्थः सिंहकेशरी मुनिः तेषां योगं निरुध्य शेषकर्माणि संहत्य निर्वृतः ॥४५१॥

विवरणम् :- इति एवं आख्याय कथयित्वा कृतः (कृतार्थः) येन सः कृतार्थः सिंहकेशरीमुनिः तेषां योगं युज्यते इति योगः मनोवचनकायानां योगः तं योगं निरुध्य शेषाणि च तानि कर्माणि च शेषकर्माणि संहत्य निर्वृतः ॥४५१॥

सरलार्थ :- एवं कथयित्वा कृतार्थः सिंहकेसरी मुनिः तेषां योगं निरुध्य शेषकर्माणि संहत्य निर्वृतः निर्वाणं प्राप ॥४५१॥

ગુજરાતી :- એ રીતે તેઓને કહીને કૃતાર્થ થયેલા સિંહકેશરી કેવલી ભગવાન મન, વચન, કાયાના યોગોને રોકીને, તથા બાકીના કર્મોનો વિનાશ કરીને મોક્ષે ગયા.॥४५१॥

हिन्दी :- इस प्रकार उनको कहकर कृतार्थ हुए वे सिंहकेशरी केवली भगवान मन वचन, काया के योग से और बाकी के कर्मो का विनाश कर मोक्षमें गये ॥४५१॥

मराठी :- याप्रमाणे त्यांना सांगून कृतार्थ झालेले सिंहकेशरी - केवली भगवान मन, वचन, काया यांच्या योगाने बाकीच्या कर्मांचा विनाश करून मोक्षात गेले.॥४५१॥

English :- Then in this way after becoming successful this Sinhakesari Kevalmuni attained Supreme Knowledge (Kevalgyan) after cleansing away his four vitiating karmas.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ सिद्धशरीरं तद्, देवदानवमानवाः ॥
चंदनागुरुकाष्ठौघ - चितायां चक्रुरग्निसात् ॥४५२॥

अन्वय :- अथ तत् सिद्धशरीरं देवदानवमानवाः चन्दनागुरुकाष्ठौघचितायाम् अग्निसात् चक्रुः ॥४५२॥

विवरणम् :- *अथ अनन्तरं तद् सिद्धस्य शरीरं सिद्धशरीरं देवाश्च दानवाश्च मानवाश्च देवदानवमानवाः चन्दनानि च अगुरूणिच चन्दनागरुणि चन्दनागुरूणां काष्ठानि चन्दनागरुकाष्ठानि, चन्दनागरुकाष्ठानाम् ओघः चन्दनागरुकाष्ठौघः चन्दनागुरुकाष्ठौघेन विरचिता चिता चन्दनागरुकाष्ठौघचिता तस्यां चन्दनागरुकाष्ठौघचित्तायाम् अग्नेः अधीनं अग्निसात् चक्रुः अकुर्वन् ॥४५२॥*

सरलार्थ :- अथ तदसिद्धशरीरं देवदानवमानवाः चन्दनागरुकाष्ठौघचित्तावाम् अग्नेः अधीनम् अकुर्वन् ॥४५२॥

गुजराती :- પછી તે સિદ્ધ ભગવાનનાં શરીરનો દેવો, દાનવો તથા મનુષ્યોએ મળીને, ચંદન તથા અગુરુના કાષ્ઠોની ચિતા ખડકીને તેમાં અગ્નિસંસ્કાર કર્યો. ॥૪૫૨॥

हिन्दी :- फिर सिद्ध भगवान के उस शरीर को देवो, दानवो और मनुष्यों ने मीलकर चंदन, अगुरुके काष्टो की चिता रचाकर उसमें अग्निसंस्कार किया ॥४५२॥

मराठी :- नंतर त्या सिद्धभगवानाच्या शरीराला देव, दानव आणि मनुष्यांनी मिळून चंदन तसेच अगरुच्या काष्ठांची चिता रचून त्यात अग्निसात् केले. (जाळले) ॥४५२॥

English :- Then the body of the Siddhe was burnt by the sandal wood and a kind of sweet smelling wood (Angaru) by the Gods, Goblins and the mortal beings of the earth.

गतिः सच्चरणानां यद्, भवेत्कुलपतिस्ततः ।
गुरूणां दीक्षया सिद्धौ, गंतुं सच्चरणोऽभवत् ॥४५३॥

अन्वय :- सच्चरणानां गतिः भवेत् । ततः कुलपतिः गुरूणां दीक्षया सिद्धौ गन्तुं सच्चरणः अभवत्॥४५३॥

विवरण :- *यथा सन्तौ चरणौ येषां ते सच्चरणाः तेषां सच्चरणानां सत्पादानां सद्गतिः सती चासौ गतिः च सद्गतिः सुचारुगमनं भवति । तथैव सत् चरणं चारित्रं येषां ते सच्चरणाः तेषां सच्चरणानां सचरित्राणां सद्गतिः भवति । ततः तदनन्तरं कुलस्य पतिः कुलपतिः गुरूणां यशोभद्राणां समीपे गृहीतया दीक्षया संयमेन सिद्धौ मोक्षे गन्तुं सन्तौ चरणौ यस्य सः सच्चरणः, सच्चरणं चारित्रं यस्य सः सच्चरणः अभवत् अभूत् ॥४५३॥*

सरलार्थ :- यथा सुष्ठुपादानां शोभनागतिः भवति तथा सुष्ठुचारित्राणां सद्गतिः भवति । ततः कुलपतिः यशोभद्रगुरूणां समीपे गृहीते संयमेन मोक्षे गन्तुं सच्चरणः अभवत् ॥४५३॥

ગુજરાતી :- **ઉત્તમ ચારિત્રવાળાઓની (પક્ષે ઉત્તમ પગવાળાઓની) ઉત્તમ ગતિ થાય છે, એમ વિચારીને તે કુલપતિ પણ યશોભદ્ર ગુરુમહારાજની પાસે દીક્ષા લઈને સિદ્ધિગતિમાં જવા માટે ઉત્તમ ચારિત્રવાળા (પક્ષે ઉત્તમ પગવાળા) થયા. ॥૪૫૩॥**

हिन्दी :- उत्तम चारित्रवालों की (पक्ष-उत्तम पैरवालों की) उत्तम गति होती है, ऐसा सोच कुलपति ने भी यशोभद्र महाराज के पास दीक्षा लेकर सिद्धगति में जाने के लिये उत्तम चारित्रवाले (पक्षे उत्तम पैरवाले) हुए ॥४५३॥

मराठी :- उत्तम चारित्र असणाऱ्यांची (पक्षे - उत्तम पायगुण असलेल्याची) उत्तम गति होते असे विचार करुन ते कुलपती पण यशोभद्रगुरु महाराजाजवळ दीक्षा घेऊन सिद्धगतीत जाण्यासाठी उत्तम चारित्रवान (पक्ष उत्तम पाय असलेले) झाले.॥४५३॥

English :- If one has good and healthy feet, he is bound to win races, in the same way if one has a good renounceful life of a priest he is capable of attaining Supreme Knowledge. Therfore the high priest of the monks, in order to attain the world of the Siddhas, decided to live a pure and pious renounceful life.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदा तस्य गुरोः पार्श्वे, दमयन्त्यप्ययाचत ।।
देहि मह्यमपि त्रात-व्रतं शाश्वतसौख्यदम् ।।४५४।।

अन्वय :- तदा तस्य गुरोः पार्श्वे दमयन्ती अपि अयाचत-हे त्रातर् शाश्वतसौख्यदं व्रतं मह्यम् अपि देहि ।।४५४।।

विवरणम् :- तदा तस्मिन् समये तस्य यशोभद्रगुरोः पार्श्वे समीपे दमयन्ती अपि अयाचत-प्रार्थयत-हे त्रातर्! सुखम् एव सौख्यं शश्वद् भवं शाश्वतं शाश्वतं च तद् सौख्यंच शाश्वत-सौख्यं शाश्वतंसौख्यं ददाति इति शाश्वतसौख्यदं चिरन्तनसुखदं व्रतं मह्यम् अपि देहि यच्छ, इति।४५४।।

सरलार्थ :- तदा तस्य यशोभद्रगुरोः समीपे दमयन्ती अपि प्रार्थयत- हे त्रातर् चिरन्तनसुखदं व्रतं मह्यम् अपि यच्छ ।।४५४।।

ગુજરાતી :- પછી તે વખતે તે યશોભદ્ર ગુરુમહારાજ પાસે દમયંતી પણ યાચના કરવા લાગી કે, હે ભગવન્ ! મને પણ શાશ્વતું સુખ આપનારું ચારિત્ર આપો? ।।૪૫૪।।

हिन्दी :- फिर उस समय उन यशोभद्र गुरुमहाराज के पास दमयंती भी याचना करने लगी, हे भगवन् ! मुझे भी शाश्वत सुख देनेवाला चारित्र दीजिए ।।४५४।।

मराठी :- मग तेव्हा यशोभद्रगुरूमहाराजांजवळ दमयंतीने पण याचना केली की, हे भगगन! मला पण शाश्वत सुख देणारे चारित्र या? ।।४५४।।

English :- Then at that time, the high-priest Yashobadra was asked by Damyanti to help her to understand the best way to attain eternal bliss i.e. - to become a priestess.

आख्यातिस्म गुरुभद्रे, नास्ति ते व्रतयोग्यता ॥
कर्म भोगफलं येन, गाढमद्यापि विद्यते ॥४५५॥

अन्वय :- गुरुः आख्याति स्म-भद्रे। ते व्रतयोग्यता नास्ति। येन अद्यापि भोगफलं कर्म गाढं विद्यते ॥४५५॥

विवरणम् :- गुरुः यशोभद्रः आख्याति स्म कथयति स्म। हे भद्रे ! ते तव योग्यस्य भावः योग्यता। व्रतस्य योग्यता व्रतयोग्यता नास्ति। येन अद्यापि अधुना अपि भोगःफलं यस्य तद् भोगफलं कर्म गाढं विशेषं विद्यते वर्तते ॥४५५॥

सरलार्थ :- गुरुः कथयति स्म हे भद्रे। तव व्रतयोग्यता नास्ति। येन अद्यापि तव गाढं भोगफलं कर्म विद्यते ॥४५५॥

ગુજરાતી :- ત્યારે ગુરુમહારાજે તેણીને કહ્યું કે, હે ભદ્રે ! તને હજુ ચારિત્ર લેવા માટેની યોગ્યતા નથી, કેમ કે હજુ પણ ભોગોરૂપી ફળ આપનારું તારું નિબિડ કર્મ વિદ્યમાન છે. ॥૪૫૫॥

हिन्दी :- तब गुरुमहाराज ने उससे कहा कि, हे भद्रे ! अभी तेरी चारित्र लेने की योग्यता नही है, क्यों कि अभी भी भोगरूपी फल देनेवाला तेरा निबिड कर्म विद्यमान है। ॥४५५॥

मराठी :- तेव्हा गुरुमहाराजांनी तिला म्हटले की, हे भद्रे। तुझी चारित्र घेण्याची अजून योग्यता नाही, कारण की अजून तुझे भोगरूपी फळ देणारे निबिड कर्म विद्यमान आहे.॥४५५॥

English :- At this the high-priest answered that he will still not advise her to renounce the world as she hasn't seen life yet, she has to still live it.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ प्रभाते सआते समुत्तीर्य गुरुगिरिः ॥
नगरं तापसपुरं पादैः पूषेव सोऽपुनात् ॥४५६॥

अन्वय :- अथ सः गुरु प्रभाते सआते सति गिरेः समुत्तीर्य पादैः पूषा इव तापसपुरं नगरम् अपुनात् ॥४५६॥

विवरणम् :- *अथ अनन्तरं यथा पूषा सूर्यः गिरेः पर्वतात् समुत्तीर्य पादैः किरणैः भुवनं विश्वं पुनाति। तथा सः यशोभद्रः गुरुः प्रभाते गिरेः पर्वतात् समुत्तीर्य पादैः चरणैः तापसपुरं नाम नगरम् अपुनात्॥४५६॥*

सरलार्थ :- अथ प्रभाते यथा पूषा सूर्यः पर्वतात् समुत्तीर्य किरणैः भुवनं पुनाति तथा सः यशोभद्रः गुरुः प्रभाते पर्वतात् समुत्तीर्य पादैः तापसपुरं नगरम् अपुनात्॥४५६॥

ગુજરાતી :- પ્રભાતે તે ગુરુમહારાજ પણ પર્વત પરથી ઉતરીને સૂર્યની પેઠે પોતાનાં ચરણો વડે (પક્ષે-કિરણો વડે કરીને) તાપસપુર નામના નગરને પવિત્ર કરવા લાગ્યા.॥४५६॥

हिन्दी :- फिर प्रभात होने के बाद वे गुरुमहाराज भी पर्वत पर से उतर कर सूर्यसमान अपने चरणों से (पक्षे किरणों से) तापसपुर नामक नगरी को पवित्र करने लगे ॥४५६॥

मराठी :- नंतर सकाळी जसा सूर्य पर्वतावरून उतरून आपल्या किरणांनी सर्व विश्वाला पवित्र करतो. त्याप्रमाणे सकाळी यशोभद्र गुरुंनी पर्वतावरून उतरून आपल्या चरणांनी तापसपुर नगराला पवित्र केले. ॥४५६॥

English :- At dawn, the high-priest climbed down the hill and began taking his auspicious feet all around the city of Tapaspur.

भैमी निःप्रतिकर्माङ्गी, तथातिमलिनांशुका ॥
सप्त वर्षाणि तत्रास्था - न्मुनिवद्विजितेन्द्रिया ॥४५७॥

अन्वय :- निःप्रतिकर्माङ्गी तथा अतिमलिनांशुका मुनिवद् विजितेन्द्रिया भैमी सप्तवर्षाणि तत्र अस्थात् ॥४५७॥

विवरणम् :- निर्गतं प्रतिकर्म अङ्गरागादिकर्म येभ्यः तानि निष्प्रतिकर्माणि। निष्प्रतिकर्माणि अङ्गानि यस्याः सा निष्प्रतिकर्माङ्गी अङ्गरागादिकर्मविरहिताङ्गी, तथा अतिमलिनम् अंशुकं वस्त्रं यस्याः सा अतिमलिनांशुका अतिमलिनवस्त्रधारिणी, मुनिना तुल्यं मुनिवद् विजितानि इन्द्रियाणि यया सा विजितेन्द्रिया भीमस्य अपत्यं स्त्री भैमी दमयन्ती सप्त वर्षाणि तत्र तस्मिन् नगरे अस्थात् अतिष्ठत् ॥४५७॥

सरलार्थ :- अङ्गरागादिकर्मविरहिताङ्गी अतिमलिनवस्त्रा मुनिवत् विजितेन्द्रिया दमयन्ती सप्तवर्षाणि तापसपुरे नगरे अतिष्ठत् ॥४५७॥

ગુજરાતી :- એવી રીતે તે દમયંતી (પોતાના) શરીરનો કંઈ પણ સંસ્કાર કર્યા વિના અત્યંત મલીન વસ્ત્રને ધારણ કરતી થકી મુનિની પેઠે ઈંદ્રિયોને જીતીને સાત વર્ષો સુધી ત્યાં રહી.॥४५७॥

हिन्दी :- इसप्रकार वह दमयंती (अपने) शरीर के कुछ भी संस्कार किये बिना अत्यंत मलिन वस्त्रों को धारण करती हुई मुनिसमान इंद्रियो को जीतकर सात सालों तक वहाँ रही ॥४५७॥

मराठी :- अशाप्रकारे ती दमयंती (स्वत:च्या) शरीराचा काही पण संस्कार न करता, अत्यंत मलिन वस्त्र धारण करून मुनिप्रमाणे इन्द्रियांना जिंकून सात वर्षापर्यंत त्या तापसपुर नगरात राहिली. ॥४५७॥

English :- Then in this way, Damyanti, by not taking care of her body, took up to the dirty clothes and by staying there for seven years, like a prifestess and won victory and control over her five physical senses (i.e. - skin - touch, mouth - tongue, nose - smell, eyes - sight, ears - hearing)

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृष्टो मयात्र स्थानेऽद्य, दमयन्ति पतिस्तव ।।
इति स्माह पुरासन्नः, कश्चित्पान्थः परेद्यवि ।।४५८।।

अन्वय :- परेद्यवि पुरासन्नः कश्चित् पान्थः आह स्म हे दमयन्ति! अद्य मया अत्र स्थाने तव पतिः दृष्टः ।।४५८।।

विवरणम् :- *परेद्यवि परस्मिन् दिने पुरस्य नगरस्य आसन्नः पुरासन्नः कश्चित् पान्थः इति एवम् आह स्म ब्रवीतिस्मा हे दमयन्ति! अद्य मया अत्र अस्मिन् स्थाने नगरे तव पतिः नलः दृष्टः अदृश्यत ।।४५८।।*

संस्कार्य :- एकस्मिन् दिने कश्चित् पान्थः ब्रवीति स्म हे दमयन्ति! अद्य मया अस्मिन् नगरे तव पतिः नलः अदृश्यत ।।४५८।।

ગુજરાતી :- પછી એક દિવસ, તે નગરની પાસેથી (પસાર થતા) કોઈક મુસાફરે તેણીને એમ કહ્યું કે, હે દમયંતી! આજે મેં આ જગાએ તારા સ્વામી નલરાજાને જોયો હતો.।।४५८।।

हिन्दी :- फिर एक दिन, उस नगर के पास से पसार होते हुए किसी मुसाफिर ने उससे कहा कि, हे दमयंती ! आज मैंने इस जगह पर तेरे स्वामी नलराजा को देखा था ।।४५८।।

मराठी :- नंतर त्या नगराजवळ असलेला एक वाटसरु (प्रवासी) तिला म्हणाला- हे दमयन्ती आज मी या नगरात तुझ्या पती नलराजाला पाहिले. ।।४५८।।

English :- Then one day a traveller, passing by told her that he happened to see her husband King Nal passing by.

तद्वचःश्रवणाद्भैम्याः, प्रेमोल्लासितचक्षुषः ॥
वपुः कण्टकितं सद्यो, रेजे राजीवनालवत्॥४५९॥

अन्वय :- तद्वचः श्रवणात् प्रेमोल्लसितचक्षुषः भैम्याः वपुः राजीवनालवत् कण्टकितं रेजे ॥४५९॥

विवरणम् :- *तस्य पथिकस्य वचः वचनं तद्वचनं तद्वचनस्य श्रवणं तद्वचनश्रवणं तस्मात् तद्वचनश्रवणात् आकर्णनात् प्रेम्णा उल्लसिते प्रेमोल्लसिते प्रेमोल्लसिते चक्षुषी यस्याः सा प्रेमोल्लसितचक्षुः तस्याः प्रेमोल्लसितचक्षुषः भीमस्य अपत्यं स्त्री भैमी तस्या भैम्याः दमयन्त्याः वपुः शरीरं सद्यः शीघ्रं राजीवस्य नालं राजीवनालं राजीवनालेन तुल्यं राजीवनालवत् कमलनालवत् कण्टकितं कण्टकाः सञ्जाताः अस्मिन् तत् कण्टकितं रेजे शुशुभे ॥४५९॥*

सरलार्थ :- तस्य पथिकस्य वचनश्रवणात् प्रेमोल्लसितनयनाया दमयन्त्याः शरीरं शीघ्रं कमलनालवत् कण्टकितं कण्टकाः सञ्जाताः अस्मिन् तत् कण्टकितं रेजे शुशुभे ॥४५९॥

ગુજરાતી :- તે વચન સાંભળવાથી પ્રેમ વડે વિકસિત થયેલાં નયનોવાળી દમયંતીનું શરીર તુરત જ કમલની નલિકાની પેઠે રોમાંચિત થતું શોભવા લાગ્યું. ॥४५९॥

हिन्दी :- वह वचन सुनकर प्रेम से विकसित नयनोवाली दमयंती का शरीर तुरंत ही कमल की नलिका समान रोमांचित होकर शोभायमान हुआ॥४५९॥

मराठी :- हे वचन ऐकून दमयन्तीचे डोळे प्रेमाने विकस्वर झाले व शरीर कमलाच्या नाळासारखे रोमांचित होऊन शोभू लागले. ॥४५९॥

English :- Then after having heard the good news regarding her husband, her eyes bloomed with happiness, and her body attained her original vigour and glamour just as a stream of lotuses fills with beauty at blooming time.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्वासौ क्वासौ महाभागः, प्रियवार्त्तानिवेदकः ॥
दमयन्ती वदन्ती च, पश्यन्ती च दिशोऽखिलाः ॥४६०॥

अन्वय :- असौ प्रियवार्तानिवेदकः गहाभागः क्व इति वदन्ती अखिलाः दिशः पश्यन्ती च दमयन्ती ॥४६०॥

विवरणम् :- प्रियस्य वार्ता प्रियवार्ता। प्रियवार्तायाः निवेदकः प्रियावार्तानिवेदकः महान् भागः यस्य सः महाभागः असौ पान्थः क्व असौ पान्थः क्व इति वदन्ती भणन्ती, अखिलाः सर्वाः दिशः पश्यन्ती अवलोकयन्ती दमयन्ती ॥४६०॥

सरलार्थ :- प्रियवार्तानिवेदकः महाभागः असौ क्व असौक्व, इति वदन्ती अखिलाः दिशः पश्यन्ती च दमयन्ती ॥४६०॥

ગુજરાતી :- મારા સ્વામીના સમાચાર નિવેદન કરનારો, તે મહાભાગ્યશાળી પુરુષ ક્યાં ગયો? ક્યાં ગયો? એમ બોલતી, તથા સઘળી દિશાઓ તરફ જોતી, ॥૪૬૦॥

हिन्दी :- मेरे स्वामी का समाचार निवेदन करनेवाला वह महाभाग्यशाली आदमी कहाँ गया ? कहाँ गया ? ऐसा कहते हुए सब दिशाओं की ओर देखती थी। ॥४६०॥

मराठी :- माझ्या स्वामीची बातमी देणारा तो, महाभाग्यवान पुरुष कुठे गेला। कुठे गेला। असे म्हणत ती सगळ्या दिशेकडे पाह् लागली. ॥४६०॥

English :- And she at once began to look in all directions and asked as to where the fortunate man has gone who had bought the good news of her husband.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

तदीयस्य च शब्दस्या - नुसारेण ससार सा ॥
भयत्रस्तकुरङ्गीव, महावेगवती तदा ॥४६१॥

अन्वय :- भयत्रस्तकुरङ्गीव महावेगवती तदीयस्य शब्दस्य अनुसारेग सा ससार ॥४६१॥

विवरणम् :- *भयात् त्रस्ता भयत्रस्ता भयत्रस्ता चासौ कुरङ्गी च भयत्रस्तकुरङ्गीव भयव्याकुलहरिणी इव महान्चासौ वेगश्च महावेग: महावेग: अस्या: अस्तीति महावेगवती सा दमयन्ती तदीयस्य पथिकस्य शब्दस्य अनुसारेण ससार असरत् ॥४६१॥*

सरलार्थ :- भयत्रस्तहरिणी इव महावेगवती सा दमयन्ती पथिकस्य शब्दानुसारेण असरत् ॥४६१॥

गुजराती :- તે માણસના શબ્દને અનુસારે, ભયથી દોડતી હરણીની પેઠે અત્યંત વેગપૂર્વક તે વખતે દમયંતી દોડવા લાગી. ॥४६१॥

हिन्दी :- उस आदमी के शब्द के अनुसार डर से भागती हिरनी के समान वेग से दमयन्ती दौडने लगी ॥४६२॥

मराठी :- भयाने व्याकुळ झालेल्या हरिणीप्रमाणे वेगयुक्त झालेली ती दमयन्ती त्या पथिकाच्या शब्दानुरोधाने पळू लागली. ॥४६२॥

English :- Then due to the impact of the man's words, Damyanti was afraid with excitement and began running about as a deer with great velocity.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शब्दमात्रं विनि:क्षिप्य, भूतवच्छलनाय स:॥
पान्थस्तिरोदधे भैमी - स्थानत्यजनलग्नक: ॥४६२॥

अन्वय :- भूतवच्छलनाय शब्दमात्रं विनिक्षिप्य स: पान्थ: भैमीस्थानत्याजनलग्नक: तिरोदधे ॥४६२॥

विवरणम् :- भूतेन तुल्यं भूतवत् । च्छलनाय वञ्चनाय शब्द एव शब्दमात्रं विनिक्षिप्य स: पान्थ: भीमस्य अपत्यं स्त्री भैमी दमयन्ती । स्थानस्य त्यजनं स्थानत्यजनं, भैम्या: स्थानत्यजनं भैमीस्थानन्त्यजनं भैमीस्थानत्यजने लग्नक: भैमीस्थानत्यजनलग्नक: तिरोदधे अन्तर्दधे ॥४६२॥

सरलार्थ :- स: पान्थ: भैमीं वञ्चयितुं केवलं शब्दान् विनिक्षिप्य भूत इव दमयन्ती स्थानत्यागे लग्न: अन्तर्दधे ।

ગુજરાતી :- એવી રીતે દમયંતીને છેતરવા માટે ફક્ત ભૂતની પેઠે શબ્દ બોલીને જ તે મુસાફર જાણે દમયંતીને તે સ્થાન છોડાવવા માટે ઉત્સુક થયો હોય તેમ (ત્યાંથી) અદૃશ્ય થઈ ગયો. ॥૪૬૨॥

हिन्दी :- उस प्रकार दमयंती को सताने के लिये केवल भूत की तरह शब्द कहकर, वह मुसाफिर मानो दमयंती को उस स्थान को छुडाने के लिये उत्सुक हो ! वैसे (वहाँ से) अदृश्य हो गया ॥४६२॥

मराठी :- अशा रीतीने दमवंतीला ठगविण्यासाठीच केवळ भूतासारखे शब्द बोलून तो वाटसरु जणु दमवंतीच्या त्या स्थळाला सोडून जाण्यासाठी उत्सुक होऊन तेथून अदृश्य झाला. ॥४६२॥

English :- Then in this way the man had come to harass Damyanti, by making her mind tilt towards the worldly life (when she was like a nun) and tempted her to think about her long lost husband and then suddenly dissappeared.

प्रेमयुग्याधिरूढा तु, भैमी दूरं गता परम् ॥
नलं वा नलवार्तायाः, कथकं क्वापि नैक्षत ॥४६३॥

अन्वय :- प्रेमयुग्याधिरूढा तु भैमी दूरं गता। परं नलं वा नलवार्तायाः कथकं क्वापि न ऐक्षत ॥४६३॥

विवरणम् :- युगं वहति इति युग्यः अश्वः । प्रेम एव युग्यः प्रेमयुग्यः । प्रेमयुग्यम् अधिरूढा प्रेमयुग्याधिरूढा प्रेमाश्वोपविष्टा भीमस्य अपत्यं स्त्री भैमी दमयन्ती दूरं गता। परं किन्तु नलं वा नलस्य वार्ता नलवार्ता, तस्याः नलवार्तायाः कथयति इति कथकः तं कथकं क्वावि कुत्रापि न ऐक्षत न अपश्यत् ॥४६३॥

सरलार्थ :- प्रेमाश्वोपविष्टा दमयन्ती तं पान्थम् अन्वेष्टुं दूरंगता, किन्तु नलं वा नलवार्तायाः कथकं कुत्रापि न अपश्यत् ॥४६३॥

गुजराती :- પ્રેમરૂપી વાહન પર ચડેલી દમયંતી તો ઘણે દૂર સુધી નીકળી ગઈ પરંતુ ક્યાંયે પણ નલરાજાને અથવા નલરાજાના સમાચાર કહેનાર મુસાફરને તેણીએ જોયો નહીં. ॥४६३॥

हिन्दी :- प्रेमरूपी वाहन पर सवार दमयंती तो बहुत दूर तक निकल गयी लेकिन कहीं भी नलराजा अथवा नलराजा के समाचार कहनेवाले मुसाफिर को उसने देखा नही ॥४६३॥

मराठी :- प्रेमरूपी वाहनावर आरुढ झालेली ती दमयंती खूप दूरवर निघून गेली. परंतु तिला कुठेही नलराजा किंवा त्यांची बातमी देणारा तो वाटसरु दिसला नाही. ॥४६३॥

English :- She then entered the carrier of love and travelled high and low in search of her husband or in search of the messenger.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततोऽचिन्ति तया तस्या - मेव दर्यां प्रयाम्यहम् ॥
धर्मकर्मकृतार्थानि, तत्र यांति दिनानि यत् ॥४६४॥

अन्वय :- ततः तया अचिन्ति। अहं तस्याम् एव दर्यां प्रयामि। यत् तत्र धर्मकर्मकृतार्थानि दिनानि यान्ति ॥४६४॥

विवरणम् :- *ततः तदनन्तरं तया दमयन्त्या अचिन्ति व्यचारि-अहं तस्याम् एव दर्यां कन्दरे प्रयामि प्रगच्छामि। यतः तत्र तस्मिन् कन्दरे धर्मस्य कर्माणि धर्मकर्माणि धर्मकर्मभिः कृतार्थानि सफलानि धर्मकर्मकृतार्थानि दिनानि दिवसाः यान्ति गच्छन्ति ॥४६४॥*

सरलार्थ :- तदनन्तरं तया दमयन्त्या व्यचारि अहं तस्याम् एव गुहायां प्रगच्छामि। यतः तत्र धर्मकर्मभिः सफलानि दिनानि गच्छन्ति ॥४६४॥

गुजराती :- પછી તેણીએ વિચાર્યું કે, તે જ ગુફામાં હું પાછી જાઉં, કેમકે ત્યાં ધર્મકાર્યોથી કૃતાર્થ થયેલા મારા દિવસો સુખરૂપ વ્યતીત થાય છે. ॥४६४॥

हिन्दी :- फिर उसने विचार किया कि, उसी गुफा में मैं वापस जाऊं क्योंकि वहाँ धर्मकार्यो से कृतार्थ ऐसे मेरे दिन (सुखसमाधानसे) व्यतीत होते हैं ॥४६४॥

मराठी :- नंतर त्या दमयन्तीने विचार केला की, मी पुन्हा त्याच गुहेत जाते. कारण त्या गुहेत धर्मकार्यात माझे दिवस कृतार्थ होतात. ॥४६४॥

English :- Then she thought that she will go back to her cave because her days are filled with religious bliss and happiness.

इति ध्यात्वा निवृत्तापि, तत्र मार्गमजानती ॥
पारावार इवापारे, कान्तारे निपपात सा ॥४६५॥

अन्वय :- इति ध्यात्वा निवृत्ताऽपि तत्र मार्गम् अजानती अपारे पारावारे इव कान्तारे सा निपपात ॥४६५॥

विवरणम् :- *इति एवं ध्यात्वा विचार्य निवृत्ता अपि तत्र मार्गं पन्थानं न जानती अजानती, न विद्यते पारः यस्य सः अपारः तस्मिन् अपारे पारावारे समुद्रे इव अपारे कान्तारे वने सा निपपात अपतत् ॥४६५॥*

सरलार्थ :- इति एवं विचार्य निवृत्ता अपि तत्र मार्गम् अजानती सा अपारे समुद्रे इव अपारे कानने अपप्तत् ॥४६५॥

ગુજરાતી :- એમ વિચારીને પાછી તો વળી, પરંતુ ત્યાં જવાના માર્ગને નહીં જાણવાથી મહાસાગરની પેઠે જેનો પાર ન આવે, એવા અરણ્યમાં તે ભૂલી પડી. ॥૪૬૫॥

हिन्दी :- ऐसा सोचकर वह वापीस गयी, लेकिन वहाँ जाने के रास्ते को पहचान न सकी और महासागर के समान जिसका पार नही आता ऐसे वन में भटक गयी ॥४६५॥

मराठी :- असा विचार करून ती मागारी फिरली. परंतु रस्ता माहित नसल्यामुळें ती महासागराप्रमाणे अपार अरण्यात पैऊन पडली.॥४६५॥

English :- Then having decided, she turned towards her hermitage, but in no time, lost her way and just as a man cannot cross an ocean, in the same way she got lost and couldn't find her way back to the hermitage.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततो दुःखसहायासौ, याति तिष्ठति मूर्छति ।।
रोदिति प्रलपत्युच्चैर्विषीदति निषीदति ।।४६६।।

अन्वय :- ततः दुःखसहाया असौ याति तिष्ठति मूर्छति रोदिति उच्चैः प्रलपति विषीदति निषीदति ।।४६६।।

विवरणम् :- *ततः तदनन्तरं दुःखे सहाया दुःखसहाया असौ दमयन्ती याति गच्छति तिष्ठति मूर्छति मूर्च्छां प्राप्नोति । रोदिति रोदनं करोति । उच्चैः प्रलापं करोति प्रलपति । विषीदति खिद्यते निषीदति उपविशति ।।४६६।।*

सरलार्थ :- तदनन्तरं दुःखसहाया असौ दमयन्ती गच्छति तिष्ठति रोदनं करोति उच्चैः प्रलपनं करोति खिद्यते उपविशति ।।४६६।।

ગુજરાતી :- તેથી ફક્ત દુઃખથી જ ઘેરાયેલી તે દમયંતી (તે અરણ્યમાં) ચાલે છે, ઊભી રહે છે, મૂર્છા પામે છે, રડે છે, મોટેથી વિલાપ કરે છે, વિષાદ પામે છે, તથા બેસી જાય છે. ।।૪૬૬।।

हिन्दी :- ऐसे केवल दुःख से घिरी वह दमयंती (उस अरण्यमें) चलती है, खडी रहती है, मूर्च्छा पाती है, रोती है, विलाप करती है, विषाद पाती है और बैठ जाती है। ।।४६६।।

मराठी :- अशा केवळ दुःखाच्या सहाय्याने ती दमयंती (त्या अरण्यात) चालू लागली, उभी राह् लागली, बेभान झाली, रड् लागली, विलाप करु लागली, विषाद पाऊ लागली तसेच बसून गेली. ।।४६६।।

English :- Then Damyanti was overcome with utmost grief and began walking about of stood to identify thedirection or at times lost her conciousness, then after regaining her consciousness began weeping, and bewailed about it and overcome with melancholy and bad sprits sat down with feelings of gloom and sorrow.

इत्यनेकाः क्रियास्तत्र, विधुरा विदधत्यसौ ॥
स्वदुःखसंविभागेन श्वापदानप्यरोदयत् ॥४६७॥

अन्वय :- विधुरा इति अनेकाः क्रियाः तत्र विदधती असौ स्वदुःखसंविभागेन श्वापदान् अपि अरोदयत् ॥४६७॥

विवरणम् :- *विधुरा भयग्रस्ता इति न एका अनेकाः क्रियाः तत्र विपिने विदधती कुर्वती असौ दमयन्ती स्वस्य दुःखानि स्वदुःखानि स्वदुःखानां संविभागः स्वदुःखसंविभागः तेन स्वदुःखसंविभागेन श्वापदान् हिंस्रप्राणिनः अपि अरोदयत् ॥४६७॥*

सरलार्थ :- भयवाळी इति अनेकाः क्रियाः तत्र विदधती असौ दमयन्ती स्वदुःखसंविभागेन हिंस्रप्राणिनः अपि अरोदयत् ॥४६७॥

गुजराती :- બે રીતે અત્યંત ગભરાયેલી તે દમયંતી, તે જંગલમાં અનેક પ્રકારની ક્રિયા કરતી પોતાનાં દુઃખમાં હિસ્સો આપીને વનવાસી પશુઓને પણ રડાવવા લાગી. ॥४६७॥

हिन्दी :- इसप्रकार अत्यंत डरी हुई वह दमयंती, उस वन में अनेक प्रकार की क्रिया करती हुई अपने दुःख में हिस्सा देकर वनवासी पशुओं को भी रुलाने लगी ॥४६७॥

मराठी :- अशाप्रकारे अत्यंत घाबरलेली ती दमयंती, त्या जंगलात अनेक प्रकारच्या क्रिया करीत स्वतःचे दुःख वनांतील हिंस्र पशूंना वाटून त्यांना पण रडवू लागली. ॥४६७॥

English :- In this way, Damyanti who was very frightened and wondering about in the forest and trying every possible way to identify her way back to the sacred grove, began to weep profusely and also made the other dwellers (animals & birds) to weep.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अद्राक्षीद्राक्षसी तां च, तदा यमवधूरिव ॥
अभाणीच्च सुशीलेऽहं, भोक्ष्ये त्वां क्षुधिताधुना ॥४६८॥

अन्वय :- तदा यमवधूः इव राक्षसी तां अद्राक्षीत् अभाणीत् च हे सुशीले ! अधुना क्षुधिता अहं त्वां भोक्ष्ये ॥४६८॥

विवरणम् :- तदा तस्मिन् समये यमस्य वधूः यमवधूः इव राक्षसी तां दमयन्तीम् अद्राक्षीत् अपश्यत् अभाणीत् अवदत् च-हे सुष्ठु शीलं यस्याः सा सुशीला तत्सम्बुध्दौ हे सुशीले ! अधुना क्षुधा अस्याः सञ्जाता इति क्षुधिता अहं त्वां भोक्ष्ये खादिष्यामि ॥४६८॥

सरलार्थ :- तदा यमवधूः इव राक्षसी तां दमयन्तीम् अपश्यत् अवदत् च हे सुशीले! अधुना अहं क्षुधिता त्वां खादिष्यामि! ॥४६८॥

ગુજરાતી :- પછી એવામાં યમરાજની સ્ત્રીસરખી એક (ભયંકર) રાક્ષસીએ તેણીને જોઈ, ત્યારે તે રાક્ષસી તેણીને કહેવા લાગી કે, ક્ષુધાતુર થયેલી એવી હું, હે સુશીલે ! તારું હમણાં ભક્ષણ કરીશ. ॥४६८॥

हिन्दी :- फिर वहाँ यमराज की स्त्री जैसी एक (भयंकर) राक्षसी ने उसको देखा तब वह राक्षसी उससे कहने लगी कि, क्षुधातुर ऐसी मैं हे सुशीले ! तेरा अभी भक्षण करूँगी ॥४६८॥

मराठी :- नंतर तेथे यमराजाच्या पत्नीसारख्या एका भयंकर राक्षसीने तिला पाहिले, तेव्हा ती राक्षसी तिला म्हण् लागली की, क्षुधातुर झालेली मी हे सुशीले । तुझे आता भक्षण करीन. ॥४६८॥

English :- Then suddenly she happened to see an ogress who seemed like a wife of the God of death (yama) who was famished and ravenous with hunger, said to Damayanti that she will devour her up now.

सधैर्यमथ भैम्यूचे, सत्येवाहं त्रिधापि चेत् ॥
ततो राक्षसि नासि त्वं, भ्रश्यतां ते मनोरथैः ॥४६९॥

अन्वय :- अथ सधैर्यं भैमी ऊचे-अहं त्रिधापि सती एव चेत् ततः हे राक्षसि ! त्वं न असि। ते मनोरथैः भ्रश्यताम् ॥४६९॥

विवरणम् :- अथ धैर्येण सह यथा स्यात् तथा सधैर्यं भीमस्य अपत्यं स्त्री भैमी दमयन्ती ऊचे अवोचत्-अहं मनोवचनकायैः त्रिधा अपि सती एव चेत् ततः हे राक्षसि ! त्वं न असि। ते तव मनोरथैः आशाभिः भ्रश्यताम् नश्यताम् ॥४६९॥

सरलार्थ :- अथ दमयन्ती सधैर्यम् अवदत् अहं मनोवक्कायैः त्रिधा अपि सती एव स्यां तर्हि ततः हे राक्षसि। त्वं न असि। तव आशा नश्यताम्॥४६९॥

ગુજરાતી :- ત્યારે ધૈર્યપણું રાખીને દમયંતી તેણીને કહેવા લાગી કે, જો હું મન, વચન અને કાયાથી એમ ત્રણે પ્રકારે સતી હોઉં, તો હે રાક્ષસી, અહીંથી તુ ચાલી જા અને તારા મનોરથો નષ્ટ થાઓ. ॥४६९॥

हिन्दी :- तब धैर्य रखकर दमयंती उससे कहने लगी कि, जो मैं मन, वचन और काया से, इन तीनों प्रकार से अगर सती हूं, तो हे राक्षसी यहाँ तेरी उपस्थिती न हो। और तेरी इच्छा नष्ट हो जाय ॥४६९॥

मराठी :- तेव्हा धैर्य धारण करून दमयंती म्हणाली- जर मी मन, वचन आणि कायेने अशा तिन्ही प्रकारे सती असेन तर हे राक्षसी। येथे तुझी उपस्थिती नको। तुझे मनोरथ नष्ट होवो? ॥४६९॥

English :- Then Damyanti gathering courage boldly spoke, saying that if she is a chaste woman in mind, words and deeds than let this ogress be thrown away from here and let her desire be destroyed.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवोऽर्हन्नास्ति चेन्नित्यं, प्रासाद इव मे हृदि ॥
ततो राक्षसि नासि त्वं, भ्रश्यतां ते मनोरथैः ॥४७०॥

अन्वय :- यथा प्रासादे अर्हन् देवः अस्ति तथा मे हृदि नित्यम् अर्हन्देवः अस्ति चेत् ततः हे राक्षसि! त्वं न असि । ते मनोरथैः भ्रश्यताम् ॥४७०॥

विवरणम् :- *यथा प्रासादे मन्दिरे अर्हन् देवः तथा मे मम हृदि मनसि नित्यं प्रतिक्षणम् अर्हन्देवः अस्ति । ततः हे राक्षसि! त्वं न असि! ते मनोरथैः भ्रश्यतां नश्यताम् ॥४७०॥*

सरलार्थ :- यथा देवालये अर्हन् देवः अस्ति तथा मम मनसि नित्यम् अर्हन्देवः अस्ति। ततः तर्हि तव मनोरथैः नश्यताम् ॥४७०॥

ગુજરાતી :- જેમ જિનમંદીરમાં, તેમ મારા હૃદયમાં જો હમેશા શ્રી અરિહંતપ્રભુ વસતા હોય, તો હે રાક્ષસી ! અહીં તારી હાજરી ન હો અને તારા મનોરથો નષ્ટ થાઓ. ॥૪૭૦॥

हिन्दी :- जैसे जिनमंदिर में, वैसे मेरे हृदय में अगर हमेशा श्री अरिहंतप्रभु निवास करते हो तो हे राक्षसी ! यहाँ तेरी उपस्थिति न हो और तेरी इच्छा नष्ट हो। ॥४७०॥

मराठी :- श्री अरिहंत भगवान् जिनमंदिराप्रमाणे माझ्या हृदयात निवास करीत असतील तर येथे तुझे अस्तित्व नसावे. तुझे मनोरथ नष्ट होवोत. ॥४७०॥

English :- And if the Lord Arihant has placed himself in her heart due to her profuse devotion to him just as it is in the Jain temple then let this ogress dissappear from here and let her desire be ruined.

सुगुरोर्वासनां चेतो, मे धत्ते यदि सर्वदा ॥
ततो राक्षसि नासि त्वं, भ्रश्यतां ते मनोरथैः ॥४७१॥

अन्वय :- यदि सर्वदा मे चेतः सुगुरोः वासनां धत्ते ततः हे राक्षसि! त्वं नासि ते मनोरथैः भ्रश्यताम् ॥४७१॥

विवरणम् :- यदि सर्वदा अहर्निशं मे मम चेतः हृदयं शोभनश्चासौ गुरुश्च सुगुरुः तस्य सुगुरोः वासनां धत्ते। ततः तर्हि हे राक्षसि। त्वं न असि। ते तव मनोरथैः भ्रश्यतां नश्यताम् ॥४७१॥

सरलार्थ :- यदि सर्वकाले मम हृदयं, सुगुरोः वासनां धत्ते। ततः हे राक्षसि! त्वं न असि तव मनोरथैः नश्यताम् ॥४७१॥

ગુજરાતી :- જો મારું હૃદય સુગુરુ પ્રત્યે પોતાના મનોરથને હમેશા ધારણ કરતું હોય, તો હે રાક્ષસી ! અહીં તારી હાજરી ન હો અને તારા મનોરથો નષ્ટ થાઓ. ॥૪૭૧॥

हिन्दी :- जो मेरा हृदय सुगुरु के प्रति खुद के मनोरथ को हमेशा धारण करता हो, तो हे राक्षसी! यहाँ तेरी उपस्थिति न हो और तेरी इच्छा नष्ट हो॥४७१॥

मराठी :- जर माझ्या हृदयात सुगुरु नेहमी राहात असतील तर हे राक्षसि! इथे तुझी उपस्थिती नको? तुझे मनोरथ नष्ट होवोत.'' ॥४७१॥

English :- She then continues saying that if her heart is only filled with devotional thoughts of a perceptor, than let the ogress dissappear and let her desire be anhilated.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सम्यग्दर्शनवत्यस्मि, चेद् गृहस्थापि सर्वथा ॥
ततो राक्षसि ! नासि त्वं, भ्रश्यतां ते मनोरथैः ॥४७२॥

अन्वय :- सर्वथा गृहस्थापि सम्यग्दर्शनवती अस्मि चेत् ततः हे राक्षसि! त्वं न असि। ते मनोरथैः भ्रश्यताम् ॥४७२॥

विवरणम् :- यदि सर्वथा सर्वप्रकारेण गृहे तिष्ठति इति गृहस्था अपि अहं सम्यक् च तद् दर्शनं च सम्यग्दर्शनं सम्यग्दर्शनम् अस्याः अस्ति सम्यग्दर्शनवती अस्मि, ततः हे राक्षसि! त्वं न असि। ते तव मनोरथैः भ्रश्यतां नश्यताम् ॥४७२॥

सरलार्थ :- यदि सर्वप्रकारेण गृहस्था अपि अहं सम्यग्दर्शनवती अस्मि ततः हे राक्षसि! त्वं न असि। तव मनोरथैः नश्यताम् ॥४७२॥

ગુજરાતી :- હું ગૃહસ્થી છતાં પણ જો સર્વ પ્રકારે સમ્યગ્દર્શનવાળી હોઉં તો હે રાક્ષસી ! અહીં તારી હાજરી ન હો અને તારા મનોરથો નષ્ટ થાઓ.॥૪૭૨॥

हिन्दी :- मैं गृहस्थिनी होते हुए भी सब प्रकार से सम्यग्दर्शनवाली होऊं तो हे राक्षसी! यहाँ तेरी उपस्थिति न हो और तेरी इच्छा नष्ट हो ॥४७२॥

मराठी :- मी गृहस्थ असूनसुद्धा जर सम्यक्त्वधारी असेन तर हे राक्षसि! येथे तुझी उपस्थिती नसो. तुझे मनोरथ नष्ट होवो. ॥४७२॥

English :- She continues that if she is a devotional house-wife and if she is a staunch jain than let this and ogress vanish and her desire be crushed.

इति तद्वचनैः कृत्या, साऽप्यकृन्यान्न्यवर्तत ॥
यतः सतीनां वाक्यानि, मन्त्रानप्यतिशेरते ॥४७३॥

अन्वय :- इति तद् वचनैः सा कृत्या अपि अकृत्यात् न्यवर्तत। यतः सतीनां वाक्यानि मन्त्रान् अपि अतिशेरते ॥४७३॥

विवरणम् :- इति एवं तस्याः दमयन्त्याः वचनानि तद्वचनानि तैः तद्वचनैः दमयन्तीवचनैः सा कृत्या राक्षसी अपि न कृत्यं अकृत्यं तस्मात् अकृत्यात् न्यवर्तत परावर्तत। यतः सतीनां वाक्यानि वचनानि मन्त्रान् अपि अतिशेरते अतिक्रामन्ति ॥४७३॥

सरलार्थ :- एवं तस्याः दमयन्त्याः वचनैः सा राक्षसी अपि अकार्यात् परावर्तत। यतः सतीनां वाक्यानि मन्त्रान् अपि अतिक्रामन्ति ॥४७३॥

गुजराती :- એવી રીતનાં તેણીનાં વચનોથી તે રાક્ષસી પણ તે કાર્ય કરતાં અટકી, કેમ કે સતીનાં વચનો મંત્રોને પણ ઉલ્લંઘી જાય છે. ॥૪૭૩॥

हिन्दी :- इसप्रकार उसके वचनो से वह राक्षसी भी वह कार्य करते हुए रुक गई, क्यों कि सती के वचन मंत्रो को भी लांघ जाते हैं ॥४७३॥

मराठी :- अशारीतीने दमयन्तीच्या वचनाने त्या राक्षसीने अकार्य करणे सोडले. कारण पतिव्रतेचे वचन मंत्रावरसुद्धा मात करते. ॥४७३॥

English :- In this way, through her words, the ogress was prevented from doing a sinful deed. As the words of a chaste woman are more stronger and can leap through any types of obstacles.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सतीव्रता पदापीयं, ग्रीष्मश्रीरिव दुस्सहा ॥
इति राक्षस्यदृश्याभूदिन्द्रजालकृतेव सा ॥४७४॥

अन्वय :- सतीव्रता इयं ग्रीष्मश्रीः इव पदापि दुस्सहा इति सा राक्षसी इन्द्रजालकृता इव - अदृश्या अभूत् ॥४७४॥

विवरणम् :- सत्याः व्रतम् इव व्रतं यस्याः सा सतीव्रता इयं दमयन्ती ग्रीष्मस्य श्रीः लक्ष्मीः ग्रीष्मश्रीः ग्रीष्मलक्ष्मीः इव पदा चरणेन अपि दुःखेन सह्यते इति दुस्सहा इति सा राक्षसी इन्द्रस्यजालं इन्द्रजालम् । इन्द्रजालेन कृता इव इन्द्रजालकृता इव न दृश्या अदृश्या अभूत् अभवत् ॥४७४॥

सरलार्थ :- सतीव्रता इयं ग्रीष्मलक्ष्मीः इव चरणेन अपि दुस्सहा वर्तते इति सा राक्षसी इन्द्रजालकृता इव अदृश्या अभवत् ॥४७४॥

ગુજરાતી :- સતીવ્રતવાળી આ સ્ત્રીને તો ગ્રીષ્મઋતુની પેઠે અડકવાનું પણ સહન ન થઈ શકે તેવું છે, એમ વિચારીને તે રાક્ષસી જાણે ઇંદ્રજાલની બનાવટ હોય તેમ ત્યાંથી અદૃશ્ય થઈ ગઈ. ॥૪૭૪॥

हिन्दी :- सतीव्रतवाली इस स्त्री को तो ग्रीष्मऋतु के समान स्पर्श करना भी सहन नही हो सकता ऐसा सोचकर वह राक्षसी मानो इंद्रजाल की बनावट न हो! इसप्रकार वहाँ से अदृश्य हो गई ॥४७४॥

मराठी :- सतीव्रत असलेल्या या स्त्रीला ग्रीष्मऋतूप्रमाणे स्पर्श करणेसुद्धा सहन होत नाही, असा विचार करून ती राक्षसी जणु इन्द्रजाल करून उत्पन्न केल्याप्रमाणे अदृश्य झाली. ॥४७४॥

English :- The ogress taking this chaste Damyanti as the hot summer season that cannot be touched, dissapeared as though it was an illusion done through witchcraft.

यान्त्यथाग्रे नदीं भैमी, स्फुलिङ्गायितवालुकाम् ॥
अङ्गारीभूतपाषाणां, ददृशेऽग्निवहामिव ॥४७५॥

अन्वय :- अथ अग्रे यान्ती भैमी स्फुलिङ्गायितवालुकाम् अङ्गारीभूतपाषाणाम् अग्निवहाम् इव नदीं ददृशे ॥४७५॥

विवरणम् :- *अथ अग्रे पुरतः यान्ती गच्छन्ती भीमस्य अपत्यं स्त्री भैमी दमयन्ती स्फुलिङ्गाः इव आचरिता स्फुलिङ्गायिता वालुका यस्यां सा स्फुलिङ्गायितवालुका तां स्फुलिङ्गायितवालुकाम् अग्निकणायितवालुकां न अङ्गाराः अनङ्गाराः। अनङ्गाराः अङ्गाराः भूताः अङ्गारीभूताः, अङ्गारीभूताः पाषाणाः यस्यां सा अङ्गारीभूतपाषाणा ताम् अङ्गारीभूतपाषाणाम्, अग्निं वहति इति अग्निवहा ताम् अग्निवहाम् इव नदीं ददर्श इत्यर्थः ॥४७५॥*

सरलार्थ :- अथ अग्रे गच्छन्ती दमयन्ती अग्निकणायितवालुकाम् अङ्गारीभूतपाषाणाम् अग्निवहाम् इव नदीं ददर्श ॥४७५॥

गुजराती :- **पछी आगळ चालतां दमयंतीए तणखाओनी पेठे आचरण करती रेती जेमां छे, तथा (धगधगता) अंगारारुप पथ्थरो जेमां छे, तथा जाणे अग्निनो प्रवाह जेमां वहेतो होय एवी एक नदीने दीठी. ॥४७५॥**

हिन्दी :- फिर आगे चलते हुई दमयन्ती ने चिनगारीयों के समान आचरण करती हुई बालु जिस में है, अंगाररूप बने हुऐ पत्थर जिसमें है, मानों अग्नि जिसमें प्रवाहित हो ऐसी एक नदी को देखा ॥४७५॥

मराठी :- मग पुढे चालताना दमयंतीला जिच्यातील वाळू ठिणग्याप्रमाणे उडते आहे व दगड रखरखीत अंगाराप्रमाणे (निखाऱ्याप्रमाणे) तापले आहेत. अशी जणू अग्नीच्या प्रवाहालाच वाहून नेत असलेली कोरडी ठणठणीत नदी दिसली. ॥४७५॥

English :- As she walked on, she happened to see a river which was heated up by the scorching sun that it seemed like a river of fire, the sand around the shore also seemed like fire blazing on the shore and the rocks and pebbles seemed like coal burning in and around the river. And the river seemed like fire flowing down.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततस्तां निर्जलां वीक्ष्य, मरुभूमिसखीमिव ।।
अतीवोदन्यया ऽशान्ता, तापक्लान्तान्नवीदिदम् ।।४७६।।

अन्वय :- ततः तां निर्जलां मरुभूमिसखीम् इव वीक्ष्य उदन्यया अतीव अशान्ता तापक्लान्ता इदम् अब्रवीत् ।।४७६।।

विवरणम् :- *ततः तदनन्तरं तां नदीं निर्गतं जलं यस्याः सा निर्जला तां निर्जलां जलरहितां मरुभूम्याः सखी मरुभूमिसखी तां मरुभूमिसखीम् इव वीक्ष्य निरीक्ष्य उदन्यया तृषया अतीव न शान्ता अशान्ता, तापेन ऊष्मणा क्लान्ता खेदिता तापक्लान्ता इदम् अब्रवीत् ।।४७६।।*

सरलार्थ :- तदनन्तरं तां नदीं जलरहितां मरुभूमिसखीम् इव वीक्ष्य तृषया अतीव अशान्ता तापक्लान्ता इदम् अवदत् ।।४७६।।

गुजराती :- પછી મરુભૂમિ જેવી તે નદીને જલરહિત જોઈને, અતિશય તૃષાતુર તથા અકળાયેલી અને તાપથી વ્યાકુળ થયેલી દમયંતી એમ કહેવા લાગી કે, ।।४७६।।

हिन्दी :- फिर मरुभूमि की सहेली समान उस नदी को जलरहित देखकर, अत्यंत तृषातुर व घबरायी, और तापसे व्याकुल दमयन्ती कहने लगी कि, ।।४७६।।

मराठी :- नंतर जणूं मरुभूमीच्या मैत्रिणीप्रमाणें जलरहित कोरड्या ठणठणीत त्या नदीला पाहून तहानेने अत्यंत बेचैन झालेली व उन्हाने व्याकुळ झालेली दमवंती असे म्हणाली-।।४७६।।

English :- Then she took the dry sandy plain as a friend and her throat was parched due to thirst and was overcome with fright and was exhausted due to the afflicting heat.

यद्याहंती सती चास्मि, शुचिःसत्यैकवादिनी ॥
अत्राविर्भवताद्वारि, सुधाधारानुकारि तत् ॥४७७॥

अन्वय :- यदि आर्हती सती शुचिः सत्यैकवादिनी अस्मि। तत् अत्र सुधाधारानुकारि वारि आविर्भवतात् ॥४७७॥

विवरणम् :- यदि अहम् अर्हतः इयम् आर्हती जिनधर्मानुरागिणी सती पतिव्रता शुचिः पवित्रा, सत्यम् एव सत्यैकं सत्यैकं वदति इत्येवंशीला सत्यैकवादिनी, अस्मि तत् अत्र अस्यां नद्यां सुधायाः अमृतस्य धारा सुधाधारा। सुधाधाराम् अनुकरोति इत्येवंशीलं सुधाधारानुकारि वारि जलम् आविर्भवतात् प्रकटीभवतु ॥४७७॥

सरलार्थ :- यदि अहं जिनधर्मानुरागिणी सती सत्यैकवादिनी च अस्मि तत् अस्यां नद्याम् अमृतधारानुकारि वारि आविर्भवतु ॥४७७॥

ગુજરાતી :- જો હું જૈનધર્મ પાળનારી, સતી, પવિત્ર તથા સત્ય વચન બોલનારી હોઉં તો આ નદીમાં અમૃતની ધારાનું અનુકરણ કરનારું જળ પ્રગટ થાઓ! ॥૪૭૭॥

हिन्दी :- जो मैं जैनधर्म पालनेवाली सती, पवित्र तथा सत्य वचन बोलनेवाली होऊं तो इस नदी में अमृत की धारा का अनुकरण करनेवाला जल प्रगट हो! ॥४७७॥

मराठी :- जर मी जैनधर्मानुरागिणी सती, पवित्र आणि सत्य वचन बोलणारी असेन तर या नदीत अमृताच्या धारेचे अनुकरण करणारे पाणी प्रकट होवो। ॥४७७॥

English :- Then she said that if she was a staunch jain and if she is pious and keeps up with the jain practices then let the river be an imitation of ambrosia flowing through it.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इत्थं सा श्रावणां कृत्वा, प्राहरत् पार्ष्णिना भुवं ॥
उच्चस्थाने जलं कूपादिव स्फोटितनालतः ॥४७८॥

अन्वय :- इत्थं सा श्रावणां कृत्वा पार्ष्णिना भुवं प्राहरत्। स्फोटितनालतः कूपात् उच्चस्थाने जलम् आविरभूत्॥४७८॥

विवरणम् :- इत्थम् एवं सा दमयन्ती श्रावणां कृत्वा श्रावयित्वा पार्ष्णिणा पादतलेन भुवं पृथ्वीं प्राहरत् प्रजहार । स्फोटितश्चासौ नालश्च स्फोटितनालः तस्मात् स्फोटितनालतः कूपात् इव उच्चं च तद् स्थानं च उच्चस्थानं तस्मिन् उच्चस्थाने जलं वारि आविरभूत् ॥४७८॥

सरलार्थ :- एवं सा दमयन्ती श्रावयित्वा पादतलेन पृथ्वीं प्राहरत् । स्फोटितनालतः कूपात् उच्चस्थाने जलं प्रगटम् अभवत् ॥४७८॥

ગુજરાતી :- એવી રીતે (સંભળીને) તેણીએ પોતાના પગના તળીયાથી પૃથ્વી પર પ્રહાર કર્યો, કે તરત કુવામાંથી જેમ જળ ઉચે ઉછળે, તેમ ત્યાંથી જળ પ્રગટ થયું. ॥૪૭૮॥

हिन्दी :- इसप्रकार सुनकर उसने अपना पाँव पृथ्वी पर पटका कि, तुरंत कुअे में से जल उंचे स्थान तक उछलता है इसीप्रकार (जल वहाँ से) प्रगट हुआ॥ ॥४७८॥

मराठी :- असे वचन ऐकवून तिने स्वत:चा तळपाय पृथ्वीवर आपटला. की, लगेच झरे फुटलेल्या विहीरीतून पाणी जसे उंच उडावे त्याप्रकारे तेथे पाणी नियाले (प्रगट झाले.)

English :- In this way after saying the said words, she stamped the sole of her feet on the ground. Suddenly there was an explosion and water sprang up from that place just as water rises in a well.

ततस्तत्र सुधाकुण्डमिव जातं तदद्भुतम् ।
पपौ तन्नीरमातृप्ति, पीयूषममरीव सा ॥४७९॥

अन्वय :- ततः तत्र तद् अद्भुतं सुधाकुण्डम् इव जातं । तन्नीरम् अमरी पीयूषम् इव सा आतृप्ति पपौ ॥४७९॥

विवरणम् :- ततः तदनन्तरं तत्र तस्यां नद्यां तद् अद्भुतं सुधायाः अमृतस्य कुण्डं सुधाकुण्डम् अमृतकुण्डम् इव जातम् नीरं जलं तंन्नीरम् अमरी देवी पीयूषम् इव अमृतम् इव सा दमयन्ती तृप्तेः आ आतृप्ति तृप्तिपर्यन्तम् आकण्ठम् इत्यर्थः पपौ अपिबत्। यथा अमरी पीयूषं आतृप्ति पिबति तथा दमयन्ती तद्जलम् आकण्ठम् अपिबत् ॥४७९॥

सरलार्थ :- तदनन्तरं तस्यां नद्यां तद् अद्भुतम् अमृतकुण्डम् इव जातम्। यथा देवी अमृतं आतृप्ति पिवति तथैव दमयन्ती तद् जलं आतृप्ति अपिबत् ॥४७९॥

गुजराती :- पछी ते नदीमां आश्चर्यकारक अमृतकुंड जेवो जळनो कुंड थई गयो अने देवांगना जेम अमृतनुं पान करे, तेम ते दमयंतीओ तेमांथी तृप्ति थाय तेटलुं जलपान कर्युं. ॥४७९॥

हिन्दी :- फिर उस नदी में आश्चर्यकारक अमृतकुंड जैसा जल का कुंड बना और देवांगना जिस प्रकार अमृत पीती है, उसी प्रकार दमयन्ती ने तृप्ति होने तक जलपान किया ॥४७९॥

मराठी :- मग त्या नदीत ते एक आश्चर्यकारक अमृतकुंड बनले आणि देवांगना ज्याप्रमाणे अमृताचे पान करते त्याप्रमाणे दमयंती ते पाणी तृप्त होईपर्यंत प्याली. ॥४७९॥

English :- Then suddenly an astonishing pond of ambrosia was formed in the river. And just as the Gods drink the ambrosia, in the same way Damyanti drank the ambrosia till her thirst was quenched.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूयोऽपि भीमभूर्यान्ती, वनलक्ष्मीरियाङ्गिनी ॥
परिश्रमादुपाविक्षदधो न्यग्रोधपादपम् ॥४८०॥

अन्वय :- अङ्गिनी वनलक्ष्मीः इव भीमभूः भूयः अपि यान्ती परिश्रमात् न्यग्रोधपादपम् अधः उपाविक्षत् ॥४८०॥

विवरणम् :- अङ्गम् अस्याः अस्ति इति अङ्गिनी शरीरिणी मूर्तिमती वनस्य लक्ष्मीः वनलक्ष्मीः इव, भीमात् भवति इति भीमभूः दमयन्ती भूयः पुनरपि यान्ती गच्छन्ती परिश्रमात् पादैः पिबति इति पादपः । न्यग्रोधस्य पादपः न्यग्रोधपादपः तं न्यग्रोधपादपम् अधः नीचैः उपाविक्षत् उपाविशत् ॥४८०॥

सरलार्थ :- शरीरिणी वनलक्ष्मीः इव दमयन्ती पुनरपि गच्छन्ती परिश्रमात् न्यग्रोधपादपम् अधः उपाविशत् ॥४८०॥

गुजराती :- જાણે દેહધારી વનની લક્ષ્મી હોય તેમ દમયંતી વળી આગળ ચાલતી થાક લાગવાથી એક વડના વૃક્ષની નીચે બેઠી. ॥४८०॥

हिन्दी :- मानो देहधारी वन की लक्ष्मी न हो ऐसी दमयन्ती फिर भी आगे चलती हुई थक जाने से एक बरगद के वृक्ष के नीचे बैठी॥४८०॥

मराठी :- जणू देहधारी वन-लक्ष्मीच अशी ती दमयंती पुन्हा चालता चालता थकल्यामुळे एका वडाच्या झाडाखाली बसली. ॥४८०॥

English :- Damyanti seemed like the incarnate of Goddess Laxmi of the forest as she walked on. Then when she was tired and exhausted of walking, she sat down under a banyan tree.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत सार्थनरैः कैश्चिद, बम्भ्रमन्द्भिरदृश्यत ॥
अभण्यत च हे भद्रे, का त्वं रम्भेव रूपतः ॥४८१॥

अन्वय :- ततः बम्भ्रमद्भिः कैश्चित् सार्थनरैः अदृश्यत अभण्यत च हे भद्रे। रूपतः रम्भा इव त्वं का ॥४८१॥

विवरणम् :- *ततः तदनन्तरं कैश्चिद् पुनः पुनः भ्रमद्भिः बम्भ्रमद्भिः सार्थस्य नराः सार्थनराः तैः सार्थनरैः अदृश्यत अवालोक्यत अभण्यत औघत च हे भद्रे। रूपतः रम्भा इव त्वं का असि? ॥४८१॥*

सरलार्थ :- तदनन्तरं बम्भ्रमद्भिः कैश्चिद् सार्थपुरुषैः सा अदृश्यत अभण्यत च हे भद्रे। रूपतः रम्भा इव त्वं का असि ॥४८१॥

ગુજરાતી :- પછી કોઇક સાર્થના કેટલાક માણસોએ ત્યાં તેણીને ભમણ કરતા દીઠી, ત્યારે તેઓએ તેણીને પૂછ્યું કે, હે ભદ્રે! રંભાસરખાં સ્વરુપવાળી તું કોણ છે? ॥૪૮૧॥

हिन्दी :- फिर कोइ सार्थ के आदमियोंने भ्रमण करते हुए उसे देखा, तब उन्होने उससे पूछा कि, हे भद्रे! रंभा जैसे स्वरूपवाली तू कौन है? ॥४८१॥

मराठी :- नंतर काही सार्थाच्या माणसांनी फिरत असतांना तिला पाहिले व विचारले की, हे भद्रे! रंभेसारखे रूप असलेली तू कोण आहेस. ॥४८१॥

English :- Then she was noticed by some campers. They then came forward and asked her to give them her identity as she seemed to be a beautiful fairy named Rambha.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोचे सार्थच्युता मर्त्या, सञ्चरन्त्यस्मि कानने ॥
तत्तापसपुराध्वानं, मम दर्शयताध्वगाः ॥४८२॥

अन्वय :- सा ऊचे हे अध्वगाः सार्थच्युता मर्त्या अहं कानने सञ्चरन्ती अस्मि तत् तापसपुराध्वानं मम दर्शयत ॥४८२॥

विवरणम् :- सा दमयन्ती ऊचे अवदत् अध्वना गच्छन्तीति हे अध्वगाः पान्थाः । सार्थात् च्युता भ्रष्टा सार्थच्युता मर्त्या मानुषी अहं कानने विपिने सञ्चरन्ती भ्रमन्ती अस्मि । तत् तस्मात् तापसपुरस्य अध्वानं मार्गं तापसपुराध्वानं मम दर्शयत ॥४८२॥

सरलार्थ :- दमयन्ती अवदत् हे अध्वगाः । सार्थच्युता मानुषी अहं काननेसञ्चरामि तत् तापसपुरमार्गं दर्शयत ॥४८२॥

ગુજરાતી :- ત્યારે તે દમયંતીએ કહ્યું કે, હે મુસાફર લોકો! સાર્થથી વિખુટી પડેલી હું આ અરણ્યમાં ભટકયા કરું છું, માટે તમો મને તાપસપુરનો માર્ગ દેખાડો? ॥૪૮૨॥

हिन्दी :- तब उस दमयंतीने कहा कि हे ! मुसाफिर लोगो ! सार्थ से बिछडी हुई मैं इस जंगल में भटक रही हूँ, इसलिये आप मुझे तापसपुर का मार्ग बताओ ॥४८२॥

मराठी :- तेव्हा त्या दमयंतीने म्हटले की, हे ! वाटसरु लोक हो! सार्थातून भ्रष्ट (अलग) झालेली मी एक स्त्री या अरण्वात भटकत आहे. म्हणून तुम्ही मला तापसपुराचा मार्ग दाखवा. ॥४८२॥

English :- Then the weary Damyanti said to the travellers that, she was a lost member of an encampment who is wondering about in this forest and she appeals to them to tell her the way to Tapaspur and to her camp.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेऽवोचन् प्रातरुत्थाय, यायास्त्वं पश्चिमां दिशम् ॥
दर्शयिष्यति ते मार्गं, सूर्य एव सह व्रजन् ॥४८३॥

अन्वय :- ते अवोचन् ! प्रातः त्वम् उत्थाय पश्चिमां दिशं यायाः । सह व्रजन् सूर्यः एव ते मार्गं दर्शयिष्यति ॥४८३॥

विवरणम् :- ते अध्वगाः अवोचन् अवदन्-प्रातः प्रभाते त्वम् उत्थाय पश्चिमां दिशं यायाः गच्छेः। सह व्रजन् गच्छन् सूर्यः दिवाकरः एव ते तव मार्गं दर्शयिष्यति ॥४८३॥

सरलार्थ :- ते अध्वगा अवदन्-प्रभाते त्वम् उत्थाय पश्चिमां दिशं गच्छेः। सह गच्छन् सूर्यः एव तव मार्गम् दर्शयिष्यति ॥४८३॥

ગુજરાતી :- ત્યારે તે મુસાફરોએ તેણીને કહ્યું કે, પ્રભાતમાં ઊઠીને તું પશ્ચિમ દિશા તરફ જજે, અને તેથી સૂર્ય જ તારી સાથે ચાલતો તને (તાપસપુરનો) માર્ગ દેખાડશે ॥૪૮૩॥

हिन्दी :- तब उन मुसाफिरों ने उससे कहा कि, सुबह उठकर तुम पश्चिम दिशा की ओर चलना, और तब सुरज तुम्हारे साथ चलते हुए तुम्हे तापसपुर का रास्ता दिखायेगा॥ ॥४८३॥

मराठी :- तेव्हा ते वाटसरू तिला म्हणाले की, सकाळी उठल्यानंतर तू पश्चिम दिशेकडे जा. तेव्हा तुझ्या सोबत चालणारा सूर्यच तुला तापसपुराचा मार्ग दाखवील. ॥४८३॥

English :- Then the travellers said to her that at dawn, she should walk towards the west which will take her to Tapaspur and the sun will accompany her to her encampment.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वयं तु चारिमादाय, यास्यामः सार्थमुत्सुकाः ॥
तत्रैषि चेत्तदागच्छ, तिष्ठेरिष्टे पुरे क्वचित् ॥४८४॥

अन्वय :- उत्सुकाः वयं तु चारिम् आदाय यास्यामः। तत्र एषि चेत् तद् आगच्छा क्वचित् इष्टे पुरे तिष्ठेः ॥४८४॥

विवरणम् :- उत्सुकाः वयं तु चारिं तृणसमूहं तृणपुञ्जम् आदाय गृहीत्वा सार्थं यास्यामः गमिष्यामः। तत्र तस्मिन् सार्थे एषि आगच्छसि चेत् तद् आगच्छा क्वचित् इष्टे अभिलषिते पुरे नगरे तिष्ठेः ॥४८४॥

सरलार्थ :- उत्सुकाः वयं तु तृणपुञ्जं गृहीत्वा सार्थं यास्यामः। तस्मिन् सार्थे आगच्छसि चेत् तद् आगच्छ। क्वचित् अनुकूले नगरे तिष्ठेः ॥४८४॥

ગુજરાતી :- અમો તો આ (ઘાસનો) ચારો લઈને ઉતાવળથી અમારા સાર્થમાં જઈએ છીએ, જો તારે અમારા સાર્થમાં આવવું હોય તો ચાલ અને તને ગમે તે કોઈ પણ નગરમાં તું રહેજે! ॥४८४॥

हिन्दी :- हम तो यह (घास का) चारा लेकर जल्दी से हमारे सार्थ में जा रहे हैं, अगर तुम्हे हमारे सार्थ में आना हो तो चलो, और तुझे अच्छा लगे ऐसे किसी भी नगर में तुम रहो! ॥४८४॥

मराठी :- आम्ही तर हा गवताचा भार, घेऊन सार्थात जात आहोत, जर तुला आमच्या सार्थात यायचे असेल तर चल. तेथे तुला इष्ट वाटेल अशा नगरात तू राहा. ॥४८४॥

English :- They said that they had come there to collect grass as fodder for cattle. And they will be leaving soon. If she wishes to accompany them she can choose her own town to live in.

ततस्तैरेव सा सार्धं, ययौ दृष्ट्वा च सार्थपः ॥
अप्राक्षीद् धनदेवस्तां, का त्वं भद्रे वने च किम् ॥४८५॥

अन्वय :- ततः सा तैः; सार्धम् एव ययौ । सार्थपः धनदेवः तां दृष्ट्वा अप्राक्षीत्-भद्रे! त्वं का? वने च किम् ॥४८५॥

विवरणम् :- *ततः तदनन्तरं सा दमयन्ती तैः अध्वगैः सार्धं सह एव ययौ अगच्छत् ! सार्थं पाति रक्षति इति सार्थपः धनदेवः तां दमयन्तीं दृष्ट्वा अवलोक्य अप्राक्षीत्-अपृच्छत् भद्रे! त्वं का असि । वने अरण्ये च किम् भ्रमसि? ॥४८५॥*

संस्कृतार्थ :- तदनन्तरं सा दमयन्ती तैः अध्वगैः सह एव अगच्छत्। सार्थपः धनदेवः तां दमयन्तीं निरीक्ष्य अपृच्छत् भद्रे! त्वं कासि? वने च किम् भ्रमसि?॥४८५॥

ગુજરાતી :- પછી તે દમયંતી તે માણસોની સાથે જ તે સાર્થમાં ગઇ, ત્યારે ધનદેવ નામના તે સાર્થના સ્વામીએ તેણીને જોઇ પૂછ્યું કે, હે ભદ્રે તું કોણ છે અને આ અરણ્યમાં કેમ ભટકે છે? ॥૪૮૫॥

हिन्दी :- फिर वह दमयंती उन आदमियों के साथ उस सार्थ में गई, तब धनदेव नामक सार्थ के स्वामी ने उसको देखकर पूछा कि, हे भद्रे! तू कौन है? और इस जंगल में क्यों भटक रही है? ॥४८५॥

मराठी :- मग ती दमयंती त्या माणसासोबत च त्या सार्थात गेली, तेव्हा धनदेव नावाच्या त्या सार्थाच्या स्वामीने तिला विचारले की, हे भद्रे! तू कोण आहेस? आणि या जंगलात कां भटकत आहेस? ॥४८५॥

English :- Then she went along with the travellers. There a man named Dhandev who was the cheiftain of the camp asked her who she was and why is she wondering about in this jungle.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैम्यवादीदहं भद्रा वणिक्पुत्री पितुर्गृहे।।
प्रस्थिता निशि निद्राणा, त्यक्ता भर्त्रा च कानने ।।४८६।।

अन्वय :- भैमी अवादीत् भद्र! अहं वणिक्पुत्री भर्त्रासह पितुः गृहे प्रस्थिता। निशि निद्राणा भर्त्रा त्यक्ता ।।४८६।।

विवरणम् :- *भीमस्य अपत्यं स्त्री भैमी दमयन्ती अवादीत् अवदत् हे भद्र। अहं वणिजः पुत्री तनया वणिक्पुत्री भर्त्रा पत्या सह पितुः जनकस्य गृहे प्रस्थिता निर्गता। निशि रात्र्यां निद्राणा निद्राधीना भर्त्रा त्यक्ता ।।४८६।।*

सरलार्थ :- दमयन्ती अवदत्-हे भद्र ! अहं वणिजः तनया पत्या सह जनकस्य गृहे निर्गता रात्र्यां निद्राणा पत्या त्यक्ता ।।४८६।।

गुजराती :- त्यारे दमयंतीओ कह्युं के, हे भद्र! हुं वाणिकनी पुत्री छुं, अने पिताने घेर हती त्यांथी भर्तारनी साथे जती हती, परंतु रातें वनमां निद्राधीन थयेली एवी मने मारो भर्तार तजीने चाल्यो गयो छे. ।।४८६।।

हिन्दी :- तब दमयंती कहती है कि, हे भद्र! मै बनिये की पुत्री हूँ और पिता के घर थी, वहाँ से मेरे पति के साथ जा रही थी, लेकिन रात में वन में निद्राधीन देख मुझे मेरे पति छोडकर चले गये है ।।४८६।।

मराठी :- तेव्हा दमवंती म्हणाली- हे भद्र ! मी वाण्याची मुलगी आहे, मी वडिलांच्या घरी होते. तेथून मी पती बरोबर जात होते. रस्त्यात रात्री मी झोपली असता माझ्या पतीने माझा त्याग केला. माझे पती मला सोडून गेले. ।।४८६।।

English :- She replied that she was a daughter of a shop-keeper and was at her parent's place when her husband came and took her. But when they reached this jungle and when it was dark, they decided to rest. When she was in deep slumber her husband deserted her.

तावकीनैर्नरैः सार्धमत्रागां बान्धवैरिव ॥
स ऊचे पुत्रि मा भैषीः, समाश्वसिहि सम्प्रति ॥४८७॥

अन्वय :- बान्धवैः इव तावकीनैः नरैः सार्धम् अत्र आगाम् । स ऊचे - हे पुत्रि! मा भैषीः सम्प्रति समाश्वसिहि ॥४८७॥

विवरणम् :- *बान्धवैः इव भ्रातृभिः इव तव इमे तावकीनाः तैः तावकीनैः नरैः सार्थं सह अत्र अस्मिन् सार्थे आगाम् आगच्छम् । सः धनदेव सार्थपः ऊचे अवोचत् हे पुत्रि । मा भैषीः मा बिभीहि । सम्प्रति समाश्वसिहि ॥४८७॥*

सरलार्थ :- बान्धवैः इव तावकीनैः नरैः सह अत्र आगच्छम्। सः धनदेवसार्थः अवदत् हे पुत्रि । मा भैषीः। साम्प्रतं समाश्वसिहि ॥४८७॥

ગુજરાતી :- પરંતુ આ બાંધવસરખા તમારા માણસોની સાથે હું અહીં આવી છું. (તે સાંભળી) તે સાર્થપતિએ તેણીને કહ્યું કે, હે પુત્રી! તું હવે બિલકુલ ડર નહીં અને અહીં નિરાંતે રહે. ॥૪૮૭॥

हिन्दी :- लेकिन इन भाईसमान तुम्हारे आदमियों के साथ मैं यहाँ आयी हूँ (यह सुनकर) उस सार्थपति ने उससे कहा कि, हे पुत्री! तू बिलकुल डर मत और यहाँ बेफिक्र हो कर रहो! ॥४८७॥

मराठी :- परंतु बांधवासारख्या तुमच्या माणसांसोबत मी इथे आली आहे (हे ऐकून) त्या सार्थपतीने तिला म्हटले की, हे मुली! तू आता घाबरू नको! धीर धर. शांततापूर्वक येथे रहा. ॥४८७॥

English :- And she says that she had come with his men who are like brothers to her. Hearing these words, the chef, addressing her as a daughter said to her to throw away, feelings of fright and to be free from only care or anxiety.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

करण्डान्तर्विनि:क्षिप्तपुष्पवत्त्वां प्रयत्नत: ॥
सुखेनैवाचलपुरे, नेष्याम्यमलमानसे ॥४८८॥

अन्वय :- हे अमलमानसे ! करण्डान्त:विनि:क्षिप्तपुष्पवत् त्वां प्रयत्नत: सुखेन एव अचलपुरे नेष्यामि ॥४८८॥

विवरणम् :- *न विद्यते मल: यस्य तद् अमलं, अमलं मानसं यस्या: सा अमलमानसा तत् संबुध्दौ हे अमलमानसे! करण्डस्य अन्त: करण्डान्त: विनि:क्षिप्तं च तत् पुष्पं च विनि:क्षिप्तपुष्पम् इव त्वां प्रयत्नत: सुखेन एव अचलपुरे नगरे नेष्यामि ॥४८८॥*

सरलार्थ :- हे निर्मलमानसे ! करण्डान्त:विनि:क्षिप्तपुष्पवत् त्वां प्रयत्नत: सुखेन एव अचलपुरे नेष्यामि ॥४८८॥

ગુજરાતી :- હે નિર્મલ હૃદયવાળી પુત્રી! કરંડીયાની અંદર રાખેલાં પુષ્પની પેઠે તને ઘણી જ સંભાળપૂર્વક હું અહીંથી અચલપુર નામના નગરમાં સુખેથી લઈ જાઈશ. ॥૪૮૮॥

हिन्दी :- हे निर्मल हृदयवाली पुत्री! टोकरी के अंदर रखे हुये पुष्प के समान तुझे संभाल के मैं यहाँ से अचलपुर नामक नगर में सुख समाधान से ले जाऊंगा ॥४८८॥

मराठी :- हे निर्मळ मन असलेल्या मुली करंडयात ठेवलेल्या फुलाप्रमाणे मी तुला चांगल्याप्रकारे सांभाळून अचलपुर नावाच्या नगरात सुखासमाधानाने घेऊन जाईन. ॥४८८॥

English :- The chef addressing her as a soft-hearted and an invaluable daughter said to her, that he will take care of her just as one takes care of the flowers kept in the basket and will take her to a city named Achalpur.

स्नेहलः साऽथ तां पुत्रीमिवाध्यारोप्य वाहने ।
चचालास्थाश्च मध्याह्ने, कुंजे निर्झरिणि क्वचित् ॥४८९॥

अन्वय :- अथ सः स्नेहलः तां पुत्रीम् इव वाहने अध्यारोप्य चचाल । मध्याह्ने क्वचित् निर्झरिणि कुञ्जे अस्थात् ॥४८९॥

विवरणम् :- *अथ सः धनदेवः सार्थपः स्नेहलः स्नेहयुक्तः; तां दमयन्तीं पुत्रीम् इव वाहने अध्यारोप्य आरोप्य चचाल अचलत् । अह्नः मध्यं मध्याह्नः तस्मिन् मध्याह्ने क्वचित् निर्झरः जलस्रोतः अस्मिन् अस्तीति निर्झरी, तस्मिन् निर्झरिणि कुञ्जे लतामण्डपे अस्थात् अतिष्ठत् ॥४८९॥*

सरलार्थ :- अथ सः धनदेवसार्थपः स्नेहलः तां दमयन्तीं पुत्रीम् इव वाहने आरोप्य अचलत्। मध्याह्ने क्वचित् निर्झरिणि कुञ्जे अतिष्ठत् ॥४८९॥

ગુજરાતી :- પછી તે સ્નેહવાળો સાર્થપતિ પુત્રીની પેઠે તે દમયંતીને વાહન પર બેસાડીને ત્યાંથી ચાલવા લાગ્યો, તથા મધ્યાન્હ સમયે તેણે ઝરણાઓવાળી વૃક્ષોની ઘટામાં પડાવ નાખ્યો.॥૪૮૯॥

हिन्दी :- फिर वह स्नेहवाला सार्थपति पुत्रीसमान उस दमयंती को वाहन पर बैठाकर वहाँ से चलने लगा और दोपहर के समय में उसने पानी के झरनेवाली वृक्षोकी घटामें पडाव डाला ॥४८९॥

मराठी :- मग तो प्रेमळ सार्थपती मुलीसमान दमयंतीला वाहनात बसवून तेथून चालू लागला. तेव्हा दुपारच्या वेळी त्याने पाण्याचा झरा असलेल्या लतामंडपात मुक्काम केला. ॥४८९॥

English :- Then this affectionate and caring chief, took great care of Damyanti who was like a daughter to him and making her sit in the cart, set off. When it was noon they stooped to rest in a spring grove and put up a bivouac (camp).

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्र स्थित्वा सुखं भैमी, प्रसुप्ता विधिवन्निशि ।।
परमेष्ठिमहामन्त्रं ! पठन्तं कञ्चनाशृणोत् ।।४९०।।

अन्वय :- तत्र भैमी सुखं स्थित्वा निशि प्रसुप्ता। विधिवत् परमेष्ठिमहामन्त्रं पठन्तं कञ्चन अशृणोत् ।।४९०।।

विवरणम् :- *तत्र तस्मिन् सार्थे भीमस्य अपत्यं स्त्री भैमी दमयन्ती सुखं स्थित्वा निशि रात्रौ प्रसुप्ता विधिवत् यथाविधि परमेष्ठिनामर्हदादीनां महान् चासौ मन्त्रश्च महामन्त्र: तं महामन्त्रं परमेष्ठिमहामन्त्रं नमस्कारमहामन्त्रं पठन्तं भणन्तं कञ्चन अशृणोत शुश्रावा।४९०।।*

सरलार्थ :- तस्मिन् सार्थे दमयन्ती सुखं स्थित्वा रात्रौ प्रसुप्ता विधिवत् परमेष्ठिमहामन्त्रं पठन्तं कञ्चन अशृणोत् ।।४९०।।

गुजराती :- ત્યાં સુખેથી રહીને દમયંતી રાત્રિએ વિધિપૂર્વક સૂતેલી છે, એવામાં પંચપરમેષ્ઠિના મહામંત્રનો પાઠ કરતા એવા કોઇક માણસને તેણીએ સાંભળ્યો.।।४९०।।

हिन्दी :- वहाँ दमयंती रात को विधिपूर्वक सुखरूप सोई है, तभी पंचपरमेष्ठि महामंत्र का पाठ करते हुए किसी आदमी को उसने सुना ।।४९०।।

मराठी :- तेथे सुखाने राहून दमयंती रात्री विधिपूर्वक झोपली. इतक्यात कोणीतरी मनुष्य पंचपरमेष्ठी महामंत्राचा पाठ करीत होता. तो तिने ऐकला.।।४९०।।

English :- Then Damyanti lied down to rest with utmost bliss, when she suddenly heard a man saying the sacred Navkar Mantra with great devotion and veneration.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साथ सार्थेशमालापीद्यो नमस्कारपाठकः ।।
स मे साधर्मिकस्तात! तत्तं दर्शय धार्मिकम् ।।४९१।।

अन्वय :- अथ सा सार्थेशम् आलापीत् यः नमस्कारपाठकः सः मे साधर्मिकः अस्ति। हे तात। तं धार्मिकं दर्शय ।।४९१।।

विवरणम् :- अथ सा दमयन्ती सार्थस्य ईशः सार्थेशः तं सार्थेशं धनदत्तम् आलापीत् अवदत्। यः पठति इति पाठकः, नमस्कारस्य नमस्कारमन्त्रस्य पाठकः नमस्कारपाठकः सः मे मम समानः धर्मः यस्य सः साधर्मिकः अस्ति। हे तात। तं धार्मिक पुरुषं दर्शय ।।४९१।।

सरलार्थ :- अथ सा दमवन्ती सार्थेशं धनदत्तम् आलापीत्-यः नमस्कारपाठकः सः मम साधर्मिकः अस्ति हे तात! त्वं तं धार्मिकं दर्शय ।।४९१।।

ગુજરાતી :- પછી દમયંતીએ સાર્થપતિને કહ્યું કે, આ નવકારમંત્રનો પાઠ કરનાર જે માણસ છે, તે મારો સાધર્મિક કહેવાય માટે હે તાત! તે સાધર્મિક માણસના મને દર્શન કરાવો. ।।४९१।।

हिन्दी :- फिर दमयंतीने सार्थपति से कहा कि, इस नवकारमंत्र का पाठ करनेवाला जो आदमी है, वह मेरा साधर्मिक है, इसलिये हे तात! उस साधर्मिक आदमी का मुझे दर्शन करा दो ।।४९१।।

मराठी :- नंतर ती दमयंती त्या सार्थपतीला म्हणाली की, या नवकारमंत्राचा पाठ करणारा जो माणूस आहे, तो माझा सार्धर्मिक आहे. म्हणून हे तात! त्या सार्धर्मिक मनुष्याचे मला दर्शन करवून या. ।।४९१।।

English :- Then Damyanti addressing the chief as a father said to him that the man who is saying the Navkar Mantra is from her religion, so she says that she desires to meet him.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रद्धालुर्धनदेवोऽपि, तत्र भैम्या सहागमत् ॥
गुरुवाक्यमिवालङ्घ्यं, तद्वचो बहु मानयन् ॥४९२॥

अन्वय :- श्रद्धालुः धनदेवः अपि गुरुवाक्यम् इव अलङ्घ्यं तद्वचः बहु मानयन् भैम्या सह तत्र अगमत् ॥४९२॥

विवरणम् :- *श्रद्धा अस्य अस्ति इति श्रद्धालुः श्रद्धायुक्तः धनदेवः सार्थवाहः अपि गुरोः वाक्यं वचनं गुरुवाक्यम् इव न लङ्घयम् अलङ्घ्यं तस्याः दमयन्त्याः वचः वचनं तद्वचः बहु मानयन् भीमस्य अपत्यं स्त्री भैमी दमयन्ती तथा भैम्या दमयन्त्या सह तत्र अगमत् अगच्छत् ॥४९२॥*

सरलार्थ :- श्रद्धालुः धनदेवः सार्थवाहः अपि गुरुवचनम् इव अलङ्घ्यं तस्याः दमयन्त्याः वचनं बहुमानयन् दमयन्त्या सह तत्र अगमत् ॥४९२॥

ગુજરાતી :- પછી શ્રદ્ધાવાળો તે ધનદેવ સાર્થવાહ પણ ગુરુમહારાજના વચનની પેઠે તેણીના વચનનું સન્માન કરતો દમયંતીની સાથે ત્યાં ગયો. ॥४९२॥

हिन्दी :- फिर श्रद्धावान् वह धनदेव - सार्थवाह भी गुरुमहाराज के वचन के समान अलंघ्य ऐसे उसके वचन का सन्मान करता हुआ दमयन्ती के साथ वहाँ गया॥ ॥४९२॥

मराठी :- नंतर श्रद्धावान् तो धनदेव सार्थवाहपण गुरुमहाराजांच्या वचनाप्रमाणे न ओलांडण्यालायक अशा तिच्या वचनाचा सन्मान करीत दमयंती सोबत तेथे गेला. ॥४९२॥

English :- Then this chef Dhandev who had great faith and fealty took Damyanti to him by respecting her words. Just as one cannot displease a monk, in the same way the chef couldn't go against the words of Damyanti.

प्रेक्षामासे वणिगेकस्तत्र ताभ्यां स धार्मिकः ॥
वन्दमानः प्रमोदेन, चैत्यवन्दनया जिनम् ॥४९३॥

अन्वय :- तत्र ताभ्यां प्रमोदेन चैत्यवन्दनया जिनं वन्दमानः सः धार्मिकः एकः वणिक् प्रेक्षामासे ॥४९३॥

विवरणम् :- तत्र तस्मिन् सार्थे ताभ्यां धनदेवदमयन्तीभ्यां प्रमोदेन आनन्देन हर्षेण चैत्यस्य वन्दना चैत्यवन्दना तया चैत्यवन्दनया जयति इति जिनः तं जिनं वन्दमानः सः धर्मः अस्य अस्ति इति धार्मिकः एकः वणिक् व्यापारी प्रेक्षामासे प्रैक्षत ॥४९३॥

सरलार्थ :- तत्र धनदेवदमयन्तीभ्यां हर्षेण चैत्यवन्दनया जिनेश्वरं वन्दमानः सः धार्मिकः एकः वणिक् प्रैक्षत ॥४९३॥

ગુજરાતી :- પછી ત્યાં તેઓએ હર્ષથી ચૈત્યવંદન વડે જિનેશ્વરપ્રભુને વંદન કરતા એવા એક ધાર્મિક વણિકને જોયો. ॥૪૯૩॥

हिन्दी :- फिर वहाँ उन्होने हर्ष से चैत्यवंदन से जिनेश्वर प्रभु को वंदन प्रणाम करते हुए एक बनिऐ को देखा ॥४९३॥

मराठी :- मग तेथे त्यांनी आनंदाने चैत्यवंदनाने जिनेश्वर प्रभूला नमस्कार करीत असलेल्या एका वाण्याला पाहिले. ॥४९३॥

English :- There she happened to see a tradesman who was adoring Lord Arihant in utmost obeisance by doing the Chitheiyaandan i.e. bowing to the idol of Lord Arihant.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

माभूत्पुण्यान्तरायोऽस्येत्यासिषातामुभावपि ।
अनुमोदनया तस्या-र्जयन्तौ पुण्यमद्भुतम् ॥४९४॥

अन्वय :- अस्य पुण्यान्तरायः मा भूत् इति तस्याः अनुमोदनया अद्भुतं पुण्यं अर्जयन्तौ उभौ अपि आसिषाताम् ॥४९४॥

विवरणम् :- *अस्य पुण्यस्य धर्मस्य अन्तरायः पुण्यान्तरायः मा भूत् मा भवतु इति एवं विचार्य तस्याः चैत्यवन्दनायाः अनुमोदनया प्रशंसया अद्भुतम् अलौकिकं पुण्यं धर्मं अर्जयन्तौ उपार्जयन्तौ प्राप्नुवन्तौ उभौ धनदेवदमयन्त्यौ अपि आसिषाताम् उपाविशताम् ॥४९४॥*

सरलार्थ :- अस्य पुण्यस्य अन्तरायः मा भवतु एवं विचार्य तस्याः चैत्यवन्दनायाः अनुमोदनया अद्भुतं पुण्यं उपार्जितवन्तौ सार्थवाहदमयन्त्यौ अपि तत्र उपाविशताम् ॥४९४॥

ગુજરાતી :- આ વણિકના ધર્મકાર્યમાં અંતરાય ન થવો જોઈએ, એમ વિચારી તેઓ બન્ને (તે સાર્થવાહ અને દમયંતી) તેની અનુમોદનાથી આશ્ચર્યકારક પુણ્યને ઉપાર્જન કરતા ત્યાં બેઠા. ॥૪૯૪॥

हिन्दी :- इस वणिक के धर्मकार्य में बाधा न हो ऐसा सोचकर वह दोनो (सार्थवाह और दमयन्ती) उसके अनुमोदन से आश्चर्यकारक पुण्यउपार्जन करते हुए वहाँ बैठे । (अच्छा कार्य करते वहाँ बैठे.) ॥४९४॥

मराठी :- वा वाण्याच्या धर्मकार्यात विघ्न येऊ नये. असा विचार करून ते दोघे (सार्थवाह आणि दमयंती) त्याचे अनुमोदन करून आश्चर्यकारक पुण्यउपार्जन करीत तेथे बसले. ॥४९४॥

English :- In order that the man is not disturbed during his prayer, they decided to sit down till he has finished. They sat down with feelings of appreciation and meritable pleasure.

इन्द्रनीलमिवोन्नीलं, पटस्थं बिम्बमार्हतः ।
सम्पूजितं समालोक्य, ववंदाते च भक्तितः ॥४९५॥

अन्वय :- इन्द्रनीलम् इव उन्नीलं पटस्थं सम्पूजितम् आर्हतम्बिम्बं समालोक्य भक्तितः ववन्दाते ॥४९५॥

विवरणम् :- *इन्द्रनीलश्चासौ मणिश्च इन्द्रनीलमणिः । इन्द्रनीलमणिः इव उन्नीलं अतिशेयन नीलं पटे तिष्ठति इति पटस्थं सुष्ठु पूजितं सम्पूजितं समर्थितम् अर्हतः इदम् आर्हतं बिम्बं प्रतिमां समवलोक्य दृष्ट्वा भक्तितः भक्तिवशात् च ववन्दाते अवन्देताम् ॥४९५॥*

सरलार्थ :- इन्द्रनीलम् इव उन्नीलं पटस्थं सुष्ठु पूजितम् आर्हतं बिम्बं निरीक्ष्य भक्तिवशात् अवन्देताम् ॥४९५॥

गुजराती :-ઈંદ્રનીલ મણિની પેઠે લીલા રંગની, પાટલા પર સ્થાપન કરેલી, તથા સમ્યક્ પ્રકારે પૂજેલી એવી શ્રીજિનેશ્વરપ્રભુની પ્રતિમાને જોઈને તેઓ બન્નેએ ભક્તિપૂર્વક વંદન કર્યું. ॥૪૯૫॥

हिन्दी :- इंद्रनील मणि जैसी हरे रंग की, पाटपर स्थापन कीहुई और सम्यक् प्रकार से पूजित ऐसी श्री जिनेश्वरप्रभु की प्रतिमा को देखकर उन दोनों ने भक्तिपूर्वक वंदन किया ॥४९५॥

मराठी :- इंद्रनीलमण्यासारखी अत्यंत नीलवर्ण असलेली, पाटावर स्थापन केलेली, व उत्तम रीतीने पूजलेली. श्री जिनेश्वरप्रभूची प्रतिमा पाहून त्या दोघांनी त्या प्रतिमेला भक्तिपूर्वक नमस्कार केला. ॥४९५॥

English :- They saw an idol of Lord Jineshwar which had the green colour of the Indraneel sapphire and was kept on a wooden stant. They then with utmost devotion bowed down to the idol.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ वन्दितदेवेन्द्रं, कृतौचित्यक्रियं च तम् ।
भैम्यपृच्छन्महासत्व, कस्तीर्थेशस्त्वयार्च्यते ॥४९६॥

अन्वय :- अथ वन्दितदेवेन्द्रं कृतौचित्यक्रियं तं भैमी अपृच्छत्-हे महासत्व! त्वया कः तीर्थेशः अर्च्यते ॥४९६॥

विवरणम् :- अथ देवानाम् इन्द्रः देवेन्द्रः। वन्दितः देवेन्द्रः जिनेश्वरः येन सः वन्दितदेवेन्द्रः तं, वन्दितदेवेन्द्रं वन्दितजिनेश्वरं, उचितस्य भावः औचित्यं औचित्यस्य क्रिया औचित्यक्रियाः कृताः औचित्यक्रियाः येन सः, तं कृतौचित्यक्रियं विहितोचितक्रियं च तं वणिजं भीमस्य अपत्यं स्त्री भैमी दमयन्ती अपृच्छत् पप्रच्छ हे महत् सत्त्वं यस्य सः महासत्त्वः तत्सम्बुद्धौ हे महासत्त्व! त्वया कः तीर्थस्य ईशः तीर्थेशः तीर्थंकरः अर्च्यते पूज्यते ॥४९६॥

सरलार्थ :- अथ देवेन्द्रं जिनेन्द्रं वन्दितवन्तम् उचितक्रियां कृतवन्तं च तं, वणिजं दमवन्ती अपृच्छत् हे महासत्त्व! त्वया कः तीर्थेशः पूज्यते ॥४९६॥

ગુજરાતી :- દેવોના પણ દેવને (તીર્થંકરને) જેણે વંદન કર્યા છે, તથા ઉચિત ધર્મક્રિયા જેણે કરેલી છે, એવા તે પુરુષને દમયંતીએ પૂછ્યું કે, હે મહાપરાક્રમી પુરુષ! આ કયા તીર્થંકરની તમો પૂજા કરો છો? ॥४९६॥

हिन्दी :- फिर प्रणाम किया है, देवो के भी देव को (तीर्थंकर को) जिसने और उचित धर्मक्रिया जिसने की है ऐसे उस पुरुष को दमयन्तीने पूछा कि, हे महापराक्रमी पुरुष! कौन से तीर्थंकर की तुम पूजा कर रहे हो? ॥४९६॥

मराठी :- नंतर देवाधिदेव जिनेन्द्राला वन्दन करून उचित धर्मक्रिया पूर्ण केलेल्या त्या वाण्याला दमयंती म्हणाली- हे महासत्त्वा! तू कोणत्या तीर्थंकरांची पूजा करीत आहेस? ॥४९६॥

English :- Then Damyanti bowed down to the man and addressing him as a courageous man who had done the religious austries asked him as to which Tirthankar who is the God of Gods is he bowing at?

सोऽवदन्मल्लिरेकोनविंशो भावी जिनेश्वरः ।।
विशेषश्चास्य पूजायाः, कल्याणि, कथयामि ते ।।४९७।।

अन्वय :- सः अवदत् मल्लिः एकोनविंशः जिनेश्वरः भावी। हे कल्याणि! अहं अस्य पूजाया विशेषं ते कथयामि ।।४९७।।

विवरणम् :- *सः वणिक् अवदत् उवाद अवादीत्-मल्लिः नाथः एकोनविंशः एकोनविंशतितमः जिनानाम् ईश्वरो जिनेश्वरः देवः भावी भविष्यति। हे कल्याणि! अहम् अस्य तीर्थङ्करस्य पूजायाम् अर्चायां विशेषं ते तव कथयामि ।।४९७।।*

सरलार्थ :- सः वणिक् अवदत् मल्लिनाथः एकोनविंशतितमः भविष्यन् जिनेश्वरः अस्ति। हे कल्याणि ! अहम् अस्य पूजायां विशेषं कथयामि ।।४९७।।

गुजराती :- ત્યારે તે પુરુષે કહ્યું કે, હે કલ્યાણી! હવે થનારા ઓણગણીસમા શ્રી મલ્લિનાથ પ્રભુની આ પ્રતિમા છે, અને તેની પૂજા કરવાના જે ખાસ હેતુ છે, તે હું તેમને જણાવું છું. ।।४९७।।

हिन्दी :- तब उस आदमीने कहा कि, हे कल्याणी अब होनेवाले उन्नीसवे श्री मल्लिनाथप्रभु की यह प्रतिमा है, और उनकी पूजा करने के दो खास हेतु है, वह तुम्हे बताता हूँ ।।४९७।।

मराठी :- तेव्हा तो पुरुष (वाणी) म्हणाला- हे कल्याणि? पुढे होणाऱ्या एकोणीसाव्या श्री मल्लिनाथप्रभूची ही प्रतिमा आहे, या प्रतिमेच्या पूजेचा विशेष मी तुम्हांला सांगतो. ।।४९७।।

English :- The man addressing Damyanti as a propitious woman said to her that the idol was of the to be, nineteenth Tirthankar, Lord Mallinath and there are two reasons for doing the puja of this Lord and he will tell them the reasous for the veneration.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इहास्ति नगरी काञ्ची, ख्यातस्तत्रास्म्यहं वणिक्।।
ज्ञानी तत्रान्यदायासी-द्धर्मगुप्तमहामुनिः ॥४९८॥

अन्वय :- इह काञ्ची नाम नगरी अस्ति तत्र ख्यातः प्रसिद्धः अहं वणिक् अस्मि। अन्यदा तत्र ज्ञानी धर्मगुप्तमहामुनिः आयासीत् ॥४९८॥

विवरणम् :- इह अत्र काञ्ची नाम नगरी अस्ति। तत्र तस्यां नगर्याम् ख्यातः प्रसिद्धः अहं वणिक् व्यापारी अस्मि। अन्यदा अन्यस्मिन् दिने तत्र तस्मिन् नगरे ज्ञानम् अस्य अस्ति इति ज्ञानी, धर्मगुप्तः महान्चासौ मुनिश्च महामुनिः आयासीत् आगच्छत् ॥४९८॥

सरलार्थ :- इह काञ्ची नगरी अस्ति। तस्यां नगर्याम् प्रख्यातः अहं वणिक् अस्मि। अन्यस्मिन् दिने तस्यां नगर्यां ज्ञानी धर्मगुप्तमहामुनिः आगच्छत् ॥४९८॥

ગુજરાતી :- કાંચી નામની એક નગરી છે, અને તે નગરીમાં પ્રખ્યાતિ પામેલો હું એક વણિક છું, ત્યાં એક દિવસે ધર્મગુપ્ત નામના જ્ઞાનવંત મહાન મુનિરાજ પધાર્યા હતા. ॥૪૯૮॥

हिन्दी :- कांञ्ची नामक एक नगरी है और उस नगरी में ख्यातिप्राप्त ऐसा मैं एक बनिया हूं। वहाँ एक दिन धर्मगुप्त नामक ज्ञानी महान् मुनिराज पधारे थे ॥४९८॥

मराठी :- इथे कांची नावाची एक नगरी आहे आणि त्या नगरीत प्रसिद्ध असलेला मी एक वणिक् (वाणी) आहे. तेथे एके दिवशी धर्मगुप्त नावाचे ज्ञानवंत महान् मुनिराज आले. ॥४९८॥

English :- There was a city named Kanchi and he was a shop-keeper who had attained fame and wealth. Once there arrived a brillant and an eminent monk named Dharmagupte.

रतिवल्लभनामन्यारामे च समवासरत् ।।
तमवन्दिषि भक्त्याहमसेविषि च सादरम् ।।४९९।।

अन्वय :- रतिवल्लभनामन्यारामे च समवासरत्। अहं भक्त्या तम् अवन्दिषि। सादरः असेविषि च ।।४९९।।

विवरणम् :- रतिवल्लभः नाम यस्य सः रतिवल्लभनामा, तस्मिन् रतिवल्लभनामनि आरामे उद्याने च समवासरत् आवसत् आगच्छत् । अहं भक्त्या तं धर्मगुप्तमहामुनिम् अवन्दिषि अवन्दे। आदरेण सह वर्ततेऽसौ सादरः असेविषि असेवे ।।४९९।।

सरलार्थ :- सः महामुनिः रतिवल्लभनामनि उद्याने समवासरत् । अहं भक्त्या तम् अवन्दिषि सादरः असेविषि च ।।४९९।।

ગુજરાતી :- **અને તે મુનિરાજ રતિવલ્લભ નામના ઉદ્યાનમાં આવીને સમોસર્યા, તેમને મેં ભક્તિથી વંદન કર્યું, તથા આદર માનથી તેમની સેવા કરી. ।।४९९।।**

हिन्दी :- और वे मुनिराज रतिवल्लभ नामक उद्यान में आकर ठहरे उनको मैनें भक्ति से प्रणाम किया, और आदरमान से उनकी सेवा की। ।।४९९।।

मराठी :- आणि ते मुनिराज रतिवल्लभ नावाच्या उद्यानात येऊन राहिले. त्यांना मी भक्तीने नमस्कार केला व आदरभावाने त्यांची सेवा केली. ।।४९९।।

English :- The monk had decided to settle in a garden named Rativallab and when he had seen the monk, he bowed down to him with great devotion and served him with great reverence and venerableness.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अप्राक्षं मे कदा सिद्धिः, स ज्ञात्वोचे दिवश्च्युतः ॥
भूत्वा प्रसन्नचन्द्रस्त्वं, मिथिलायां नृपस्ततः ॥५००॥

अन्वय :- अहम् अप्राक्षं-मे सिद्धिः कदाभविता। सः ज्ञात्वा ऊचे। दिवः च्युतः त्वं मिथिलायां प्रसन्नचन्द्रः नृपः भूत्वा ॥५००॥

विवरणम् :- *अहम् अप्राक्षम् अपृच्छम्- मे मम सिद्धिः मोक्षः कदा कस्मिन् समये भविष्यति? सः ज्ञानेन ज्ञात्वा अवबुध्य ऊचे अवोचत्- दिवः स्वर्गात् च्युतः त्वं ततः तदनन्तरं मिथिलायां नगर्यां प्रसन्नचन्द्रः नॄन् पाति इति नृपः भूत्वा ॥५००॥*

सरलार्थ :- अहम् अपृच्छम् मम मोक्षः कदा भविष्यति। सः अवबुध्य अवोचत्-स्वर्गात् च्युतः त्वं मिथिलायां नगर्यां प्रसन्नचन्द्रः नृपः भूत्वा ॥५००॥

ગુજરાતી :- પછી મેં તે મુનિરાજને પૂછ્યું કે મારી મુક્તિ ક્યારે થશે? ત્યારે તેમણે જ્ઞાનથી જાણીને કહ્યું કે, સ્વર્ગમાંથી ચ્યવીને, તમે મિથિલા નગરીમાં પ્રસન્નચન્દ્ર રાજા થશો. ॥૫૦૦॥

हिन्दी :- फिर मैंने मुनिराजा से पूछा कि, मेरा मोक्ष कब होगा? तब उन्होंने ज्ञान द्वारा जानकर कहा कि, स्वर्ग में से च्युत होकर तुम मिथिला नगरी में प्रसन्नचन्द्र नाम के राजा बनोगे ॥५००॥

मराठी :- मग मी मुनिराजांना विचारलें कीं, माझा मोक्ष केव्हां होईल? तेव्हां त्यांनी ज्ञानानें जाणून सांगितले कीं, तू स्वर्गातून च्युत होऊन तुम्ही मिथिला नगरीत प्रसन्नचन्द्र नावाचे राजा व्हाल. ॥५००॥

English :- He then asked the monk as to when will he get deliverance. At this the monk answered that when he dies he will go to the Eden (Devlok) and when he arrives from there he will be incarnated as a king of Mathila named Prasabachandra and then he shall renounce the world by becoming a priest then attain supreme knowledge and then attain salvation.

मल्लेरेकोनविंशस्या - र्हतो वाक्यैः प्रबुध्य च ॥
व्रतं सम्प्राप्य सम्प्राप्त - केवलः सिद्धिमाप्स्यसि ॥५०१॥

अन्वय :- एकोनविंशस्य अर्हतः मल्लेः वाक्यैः प्रबुध्य व्रतं सम्प्राप्य सम्प्राप्तकेवलः सिद्धिम् आप्स्यसि ॥५०१॥

विवरणम् :- एकोनविंशस्य अर्हतः तीर्थङ्करस्य मल्लेः नाथस्य वाक्यैः वचनैः प्रबुध्य बोधं प्राप्य व्रतं दीक्षाम् आदाय सम्प्राप्तं केवलं येन सः सम्प्राप्तकेवलः सिद्धिं मुक्तिं आप्स्यसि लप्स्यसे ॥५०१॥

सरलार्थ :- एकोनविंशस्य अर्हतः मल्लिनाथस्य वचनैः बोधं प्राप्य दीक्षां लात्वा सम्प्राप्तकेवलः मोक्षं प्राप्स्यसि ॥५०१॥

ગુજરાતી :- તથા ઓગણીસમા શ્રી મલ્લિનાથ પ્રભુના વચનો વડે પ્રતિબોધ પામીને, તથા દીક્ષા લઈને, કેવલજ્ઞાન પામ્યા બાદ તું મોક્ષે જઈશ.

हिन्दी :- तथा उन्नीसवें श्रीमल्लिनाथप्रभु के वचन से प्रतिबोध पा कर तथा दीक्षा लेकर, केवलज्ञान पाने के पश्चात् तुम मोक्ष में जाओगे ॥५०१॥

मराठी :- आणि एकोणवीसाव्या श्री मल्लिनाथप्रभूच्या वचनाने प्रतिबोध प्राप्त झाल्यानंतर तू मोक्षाला जाशील. ॥५०१॥

English :- Therfore he heard the vigilance of the nineteen Tirthankar Mallinath that he will be a priest, attain supreme knowledge and in due course attain salvation.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः प्रभृति भद्रेऽहं, मल्लिनाथेऽतिभक्तिभाक् ।।
पटस्थां प्रतिमां तस्य नित्यमाराधयाम्यतः ।।५०२।।

अन्वय :- हे भद्रे ! ततः प्रभृति मल्लिनाथे अतिभक्तिभाक् अहं तस्य पटस्थां प्रतिमां नित्यम् आराधयामि ।।५०२।।

विवरणम् :- *हे भद्रे ! हे कल्याणि ! ततः प्रभृति तस्मात् समयाद् आरभ्य मल्लिनाथे अतिशयेन भक्तिः अतिभक्तिः अतिभक्तिं भजति इति अतिभक्तिभाक् अहं तस्य मल्लिनाथस्य पटे तिष्ठति इति पटस्थां तां पटस्थां प्रतिमां बिम्बं नित्यम् अहर्निशम् आराधयामि ।।५०२।।*

संस्कृतार्थ :- हे कल्याणि! ततः प्रभृति मल्लिनाथे अतिभक्तिभाग् अहं पटस्थां तस्य प्रतिमां नित्यमाराधयामि।।५०२।।

ગુજરાતી અર્થ :- હે ભદ્રે ! ત્યારથી શ્રીમલ્લિનાથ પ્રભુ પ્રત્યે અત્યંત ભક્તિવંત બની પાટલા પર રાખેલી તેમની આ પ્રતિમાનું હું હમેશાં આરાધન કરું છું. ।।૫૦૨।।

हिन्दी :- हे भद्रे ! तब से मैं श्री मल्लिनाथ प्रभु के प्रति अत्यंत भक्तिवंत हो कर पाट पर रखी इस मूर्ति की हमेशा आराधना करता हूँ ।।५०२।।

मराठी :- हे भद्रे! तेव्हांपासून मी श्रीमल्लिनाथ प्रभूच्या प्रति अत्यंत भक्तिवंत होऊन पाटावर ठेवलेल्या त्यांच्या प्रतिमेची नेहमी आराधना करतो. ।।५०२।।

English :- So he says that from that day onwards he made himself turn wholly towards religion and began venerating towards Lord Mallinath with utmost devotion.

इति स्ववृत्तमाख्याय, साधर्मिक्यै स धार्मिकः ॥
अवोचत्तां स्ववृत्तान्ताख्यानेनानुगृहाण माम् ॥५०३॥

अन्वय :- आख्याय सः धार्मिकः साधर्मिक्यै इति स्ववृत्तमाख्याय अवोचत् - स्ववृत्तान्ताख्यानेन माम् अनुगृहाण ॥५०३॥

विवरणम् :- *इति एवं स्वस्य वृत्तं स्ववृत्तं स्ववृत्तान्तम् सः धार्मिकः वणिक् समानः धर्मः यस्याः सा साधर्मिकी तस्यै साधर्मिक्यै दमयन्त्यै आख्याय अवोचत् स्वस्य वृत्तान्तः स्ववृत्तान्तः स्ववृत्तान्तस्य आख्यानं स्ववृत्तान्ताख्यानं तेन स्ववृत्तान्ताख्यानेन स्ववृत्तान्तकथनेन माम् अनुगृहाण मयि अनुग्रहं कुरु ॥५०३॥*

सरलार्थ :- एवं स्ववृत्तान्तं कथयित्वा सः धार्मिकः वणिक् साधर्मिक्यै दमयन्त्यै अवदत् स्ववृत्तान्तकथनेन माम् अनुगृह्णीष्व ॥५०३॥

गुजराती :- એવી રીતે તે ધાર્મિક વણિકે પોતાની સાધર્મિક એવી તે દમયંતીને પોતાનું વૃત્તાંત કહીને, તેણીને કહ્યું કે, હવે તમારું વૃત્તાંત કહેવાની મારા પર કૃપા કરો. ॥૫૦૩॥

हिन्दी :- इस तरह उस धर्मनिष्ठ बनिये ने अपनी साधर्मिक दमयन्ती को अपना वृत्तांत कहकर उस से कहा कि अब तुम्हारा वृत्तांत कहेने की मुझ पर कृपा करो। ॥५०३॥

मराठी :- अश्यारीतीने त्या धार्मिक वाण्याने आपला सर्व वृत्ताव्त साधर्मिक दमयन्तीला सांगितला आणि म्हणाला- हे साधर्मिकि! आता तुझा वृत्तांत सांगण्याची माझ्यावर कृपा कर। ॥५०३॥

English :- In this way the religious tradesman blurted out his whole auto-biography and asked his co-camper Damyanti to do a favour on him by giving out her biography.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धनदेवस्तु तद्वृत्तं, यथाश्रौषीत्तदाननात् ॥
तथाख्यातिस्म निःशेषं, तस्य बाष्पप्लुतेक्षणः ॥५०४॥

अन्वय :- धनदेवः तद्वृत्तं तदाननात् यथा अश्रौषीत् तथा बाष्पप्लुतेक्षणः निःशेषं तस्य आख्याति स्म ॥५०४॥

विवरणम् :- धनदेवः सार्थेशः तस्याः दमयन्त्याः वृत्तं तद्वृत्तं तत्कथानकं तस्याः दमयन्त्या आननात् मुखात् यथा अश्रौषीत् अशृणोत् तथा बाष्पैः अश्रुभिः प्लुते व्याप्ते बाष्पप्लुते । बाष्पप्लुते ईक्षणे नयने यस्य सः बाष्पप्लुतेक्षणः अश्रुभिः व्याप्तनयनः निर्गतः शेषः यस्मिन् कर्मणि यथा स्यात् तथा निशेषम् अखिलं तस्य वणिजः तस्मै वणिजे आख्याति स्म कथयति स्म ॥५०४॥

सरलार्थ :- धनदेवः तद्वृत्तं दमयन्त्याः मुखात् यथा अशृणोत् तथा अश्रुभिः व्याप्तनयनः अखिलं तस्मै वणिजे कथयति स्म ॥५०४॥

ગુજરાતી :- પછી ધનદેવ સાર્થવાહે તે દમયંતીના મુખથી જેવું તેણીનું વૃત્તાંત સાંભળ્યું હતું, તેવું સઘળું આંખોમાં આંસુ લાવીને તે વણિક ને કહી સંભળાવ્યું. ॥૫૦૪॥

हिन्दी :- फिर धनदेव सार्थवाह ने उस दमयन्ती के मुख से उसका पूरा वृत्तांत जैसा सुना था वैसा अश्रुपूर्ण नेत्रो से वणिक को कह सुनाया ॥५०४॥

मराठी :- नंतर धनदेव सार्थवाहाने त्या दमयंतीच्या मुखातून तिचा वृत्तांत जसा ऐकला होता तसा सर्व वृत्तान्त अश्रुपूर्ण नेत्रांनी वाण्याला सांगितला. ॥५०४॥

English :- Then the chief Dhandev told the whole biography to the co-camper just as Damyanti had told him with tears in his eyes.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैमी केवलमस्रौघ-मौज्झद् दुःकर्मवत्तदा ॥
कुलीनापत्तिवत्कर्म, परिलुम्पन्ति सर्वदा ॥५०५॥

अन्वय :- तदा भैमी केवलं दुःकर्मवत् अस्रौघम् औज्झत् । कुलीनाः सर्वदा आपत्तिवत् कर्म परिलुम्पन्ति ॥५०५॥

विवरणम् :- तदा तस्मिन् समये भीमस्य अपत्यं स्त्री भैमी दमयन्ती केवलं दुष्टं च तद् कर्म च दुःकर्म इव अश्रूणाम् ओघः समूहः अस्रौघः तम् अस्रौघम् औज्झत् अत्यजत् । कुलीनाः सर्वदा सर्वस्मिन् समये आपत्तिः इव कर्म परिलुम्पन्ति ॥५०५॥

सरलार्थ :- तदा दमयन्ती केवलं दुष्टं कर्म इव अश्रुसमूहम् अत्यजत् कुलीनाः सर्वदा आपत्तिवत् कर्म परिलुम्पन्ति ॥५०५॥

ગુજરાતી :- તે વખતે દમયંતી કેવળ (પોતાના) દુષ્કર્મો માટે આંસુ સારતી હતી કેમ કે કુલીન સ્ત્રી હમેશાં આપત્તિના સમયે સહન કરીને કર્મોનો પણ નાશ કરે છે. ॥૫૦૫॥

हिन्दी :- उस वक्त दमयंती केवल अपने दुष्कर्मो के लिये आंसु बहा रही थी क्योंकि कुलीन स्त्री हमेशा आपत्ति सहकर दुष्कर्मो का भी नाश करती है ॥५०५॥

मराठी :- त्या वेळी दमयंती फक्त आपल्या दुष्कर्मासाठीच अश्रु ढाळीत होती कारण कुलीन स्त्रिया नेहमीच आपत्ति सहन करून दुष्कर्मांचा पण नाश करतात. ॥५०५॥

English :- At this time Damyanti was sheding tears by recollecting her wicked sins, because a lady from an aristrocratic and a noble descency will destroy her wicked sins by bearing up all calamitous perils.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततः सोऽपि तथावस्थ, इव तद्दुःखसङ्क्रमात् ॥
भैमीमुवाच मा शोची - र्नाभुक्तं कर्म याति यत् ॥५०६॥

अन्वय :- ततः सः अपि तद्दुःखसङ्क्रमात् तथावस्थः इव भैमीम् अुवाच-मा शोचीः। यत् अभुक्तं कर्म न याति ॥५०६॥

विवरणम् :- ततः तदनन्तरं सः वणिक् अपि तस्याः दमयन्त्या दुःखानि तद्दुःखानि। तद् दुःखानां सङ्क्रमः तद्दुःखसङ्क्रमः तस्मात् तद्दुःखसङ्क्रमात् इव तथा तादृशी अवस्था यस्य सः तथावस्थः दुःखाकुलः। भीमस्य अपत्यं स्त्री भैमी दमयन्ती तां भैमीं दमयन्तीम् उवाच अवोचत्। मा शोचीः शोकं मा कुरु। यत् न भुक्तम् अभुक्तं कर्म भोगं विना कर्म न गच्छति न याति ॥५०६॥

सरलार्थ :- तदनन्तरं सः वणिक् अपि तद्दुःखसङ्क्रमात् इव तथावस्थः दुःखावस्थः दमयन्तीम् अवदत् शोकं मा कुरु। भोगं विना कर्म न नश्यति॥५०६॥

ગુજરાતી :- પછી તે વણિક પણ, જાણે તેણીના દુઃખના સંક્રમણથી તેવું જ દુઃખ અનુભવતો દમયંતીને કહેવા લાગ્યો કે, તું જરા પણ શોક ન કર, કેમ કે કરેલું કર્મ ભોગવ્યા વિના દૂર થતું નથી. ॥૫૦૬॥

हिन्दी :- फिर वणिक भी उसके दुःख के संक्रमण से दुःखी होकर दमयंती से कहने लगा, तुम बिलकुल शोक मत करो, क्योंकि किये हुए कर्म भोगे बिना (सहे बिना) उसका नाश नहीं होता। ॥५०६॥

मराठी :- नंतर तो वाणी तिच्या दुःखाच्या संक्रमणाने दुःखी होऊन दमयंतीला म्हणाला, ''तू मुळा शोक करु नकोस, कारण केलेल्या कर्माला भोगल्याशिवाय ते दूर होत नाही.'' ॥५०६॥

English :- The trader after having heard the story of Damyanti felt sorry for her and told her not to moan about it as a man has to bear up the difficulties of life until and unless, he bears up his fate and faces desting.

तथाचलपुरप्राप्ति, सार्थे तस्थौ विदर्भजा ।।
आपृच्छय धनदेवस्तां, जगाम स्थानमीप्सितम् ।।५०७।।

अन्वय :- विदर्भजा आचलपुरप्राप्ति सार्थे तस्थौ धनदेवः ताम् आपृच्छ्य ईप्सितं स्थानं जगाम ।।५०७।।

विवरणम् :- विदर्भात् जायते विदर्भजा दमयन्ती अचलपुरस्य प्राप्तिः अचलपुरप्राप्तिः अचलपुरप्राप्तेः आ आचलपुरप्राप्ति सार्थे तस्थौ अतिष्ठत् । धनदेवः तां दमयन्तीम् आपृच्छ्य ईप्सितम् इष्टं स्थानं जगाम अगच्छत् ।।५०७।।

सरलार्थ :- दमयन्ती आचलपुरप्राप्ति सार्थे अतिष्ठत् । धनदेवः दमयन्तीम् आपृच्छ्य ईप्सितं स्थानम् अगच्छत् ।।५०७।।

गुजराती :- पछी अचलपुर आव्युं त्यां सुधी दमयंती ते सार्थमां रही. पछी ते धनदेव सार्थवाह तेणीनी रजा लईने पोताना वांछित स्थाने गयो. ।।५०७।।

हिन्दी :- फिर अचलपुर आया । तब तक दमयंती सार्थ में रही। फिर धनदेव सार्थ उसकी सम्मति लेकर अपने निश्चित स्थान की ओर गया। ।।५०७।।

मराठी :- नंतर अचलपुर आले. तोपर्यंत दमयंती सार्थासाबत होती. नंतर धनदेव सार्थ तिची संमती घेऊन आपल्या निश्चित स्थळाकडे गेला. ।।५०७।।

English :- Then when they reached Achalpur, they took Damyanti's permission and left her at Achalpur and proceeded on their journey.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वैदर्भी च पुरोपान्तवाप्यां तृष्णातुराविशत् ॥
पौरीभिर्जलदेवीव, वीक्ष्यमाणा सविस्मयम् ॥५०८॥

अन्वय :- पौरीभिः सविस्मयं जलदेवी इव वीक्ष्यमाणा तृष्णातुरा वैदर्भी पुरोपान्तवाप्याम् आविशत् ॥५०८॥

विवरणम् :- पुरे भवाः पौराः पौराणां स्त्रियः पौर्यः । पौरीभिः विस्मयेन आश्चर्येण सह यथा स्यात् तथा सविस्मयं जलस्य देवी जलदेवी इव वीक्ष्यमाणा अवलोक्यमाना तृष्णया आतुरा तृष्णातुरा तृषिता वैदर्भी दमयन्ती वाप्याम् आविशत् प्राविशत् ॥५०८॥

सरलार्थ :- पौरीभिः सविस्मयं जलदेवी इव अवलोक्यमाना तृषातुरा दमयन्ती वाप्यां प्राविशत् ॥५०८॥

ગુજરાતી :- પછી તે નગરની સ્ત્રીઓ આશ્ચર્યથી જલદેવીસમાન દમયંતીને જોવા લાગી, અને દમયંતી તૃષાતુર થવાથી નગરની પાસે રહેલી એક વાવડીમાં (જલપાન માટે) ગઈ. ॥૫૦૮॥

हिन्दी :- फिर नगर की स्त्रियाँ आश्चर्य से जलदेवी समान दिखती हुई दमयंती को देखने लगी और दमयन्ती तृषातुर होने से नगर के समीप एक छोटे तालाब में जलपान के लिये पहुंची॥५०८॥

मराठी :- नंतर नगरातील स्त्रिया आश्चर्याने जिला जलदेवीप्रमाणे पाहात आहेत. अशी तहानलेली दमयंती नगराजवळ असलेल्या एका विहिरीजवळ पाणी पिण्याकरिता दाखल झाली. ॥५०८॥

English :- The woman of the village were astonished to see the beauty and glamour of Damyanti who seemed like the Goddess of aqua when she had gone to drink some water from the well near the city as her throat was parched due to exhaustion.

तदा तस्याश्च सव्योऽघ्रि-र्जगृहे गोधया जले ।।
अबला निःसहायाश्चाभिभूयन्ते न केन वा ।।५०९।।

अन्वय :- तदा तस्याः सव्योऽघ्रिः जले गोधया जगृहे । अबला निःसहायाश्च केन न अभिभूयन्ते ।।५०९।।

विवरणम् :- तदा तस्मिन् समये तस्याः दमयन्त्याः सव्योऽघ्रिः दक्षिणपादः जले वाप्यां गोधया जलगोधया जगृह्यत । न विद्यते बलं यासां ताः अबलाः । निर्गतं सहायं याभ्यस्ताः निःसहायाः च केन न अभिभूयन्ते पराभूयन्तो निःसहायाः अबलाः सर्वो जनः पराभवति।।५०९।।

सरलार्थ :- तदा दमयन्त्याः दक्षिणपादः जले मकेरण अगृह्यत । अबलाः निःसहायाश्च केन न अभिभूयन्ते । सर्वेण अभिभूयन्ते।।५०९।।

ગુજરાતી :- તે વખતે તેણીનો જમણો પગ પાણીમાં રહેલા મગરે પકડી લીધો. કેમ કે અસહાય નિર્બલ સ્ત્રીઓનો કોણ પરાભવ કરતું નથી? ।।५०९।।

हिन्दी :- तब उसका दाँया पाँव पानी में मगरमच्छ ने पकड लिया । क्योंकि असहाय निर्बल स्त्रियों का कौन पराभव नहीं करता? ।।५०९।।

मराठी :- तेव्हा तिचा उजवा पाय पाण्यातील मगराने पकडला. कारण असहाय निर्बल स्त्रियांचा पराभव कोण करीत नाही? ।।५०९।।

English :- At that time an alligator caught hold of her right foot Everybody seems to take the advantage of helpless and lonesome women.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परमेष्ठिमहामन्त्रं, सापठत् त्रिस्ततः क्षणात् ॥
तदङ्घ्रिर्निर्ययौ गोधा - मुखतो मोचकादिव ॥५१०॥

अन्वय :- ततः सा क्षणात् त्रिः परमेष्ठिमहामन्त्रम् अपठत्। मोचकात् इव तदङ्घ्रिः गोधामुखात् निर्ययौ ॥५१०॥

विवरणम् :- *ततः तदनन्तरं सा दमयन्ती क्षणात् क्षणमात्रात् त्रिः त्रिवारं महान् चासौ मन्त्रश्च महामन्त्रः। परेमष्ठिनां महामन्त्रः तं परमेष्ठिमहामन्त्रम् अपठत् पपाठ अपाठीत्। मोचयति इति मोचकः तस्मात् मोचकात् इव तस्याः अङ्घ्रिः पादः तदङ्घ्रिः गोधायाः मुखं गोधामुखं तस्मात् गोधामुखतः निर्ययौ निरग्च्छत् ॥५१०॥*

सरलार्थ :- तदनन्तरं सा दमयन्ती क्षणात् त्रिः परमेष्ठिमहामन्त्रम् अपठत्। तेन मोचकात् इव तद्पादः गोधामुखतः निरगच्छत् ॥५१०॥

ગુજરાતી :- તે જ ક્ષણે તેણીએ પંચપરમેષ્ઠિના નમસ્કાર રુપ મહામંત્રનો ત્રણ વખત પાઠ કર્યો, કે તરત મગરના મુખમાંથી તેણીનો પગ નીકળી ગયો. ॥૫૧૦॥

हिन्दी :- उसी पल उसने पंचपरमेष्ठि के नमस्काररूप महामंत्रका तीन बार पठन किया, वैसे ही उसका पाँव मगरमच्छ के मुख से निकल गया॥ ॥५१०॥

मराठी :- त्याच क्षणी तिने पंचपरमेष्ठी नमस्काररूप महामंत्राचे तीन वेळा स्मरण केले. तितक्यात तिचा पाय मोजाप्रमाणे मगरीच्या तोंडातून निघाला. ॥५१०॥

English :- At once she repeated the sacred Navkar mantra thrice and lo! her leg just came out of its snout.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साथ तत्र पयः पीत्वा, हंसीव निरगाद्बहिः।
वापीवण्डिकायां च, निषसाद विषादिनी ॥५११॥

अन्वय :- अथ - सा तत्र पयः पीत्वा वापीवरण्डिकायां हंसी इव बहिः निरगात् विषादिनी निषसाद च ॥५११॥

विवरणम् :- अथ - सा दमयन्ती तत्र तस्यां वाप्यां पयः जलं पीत्वा वाप्याः वरण्डिका वापीवरण्डिका तस्यां वापीवरण्डिकायां हँसी इव बहिः निरगात् निरगच्छत् । विषादः खेदः अस्याः अस्ति इति विषादिनी खेदिनी च निषसाद ॥५११॥

सरलार्थ :- अथ सा दमयन्ती जलं पीत्वा वापीवरण्डिकायां हंसी इव बहिः निरगच्छत् खेदिनी च निषसाद ॥५११॥

ગુજરાતી :- પછી તે દમયંતી તે વાવડીમાંથી જલપાન કરીને હંસીની પેઠે બહાર આવી તથા ખેદ પામતી તે વાવડીની પાળ પર બેઠી. ॥૫૧૧॥

हिन्दी :- फिर वह दमयंती जलपान कर के हंसनी के समान बाहर आयी तथा दुःखी होकर बाहर किनारे पर बैठ गई ॥५११॥

मराठी :- नंतर त्या दमयंतीने तेथे जलपान केले आणि हंसीप्रमाणे बाहेर आली व खिन्न होऊन विहीरीवर बसली. ॥५११॥

English :- She than quenched her thrist and came out of the well like a beautiful swan. And then she sat on the walls of the well feeling dejected and distressed.

P.P. Ac. Gunratnasuri M.S.

ऋतुपर्णः - सपत्नाहि-सुपर्णस्तत्र भूपतिः ॥
पत्नी चन्द्रयशास्तस्य, नामतोऽप्यर्थतोऽपि च ॥५१२॥

अन्वय :- तत्र सपत्नाहिसुपर्णः ऋतुपर्णः भूपतिः अस्ति। तस्य नामतः अपि अर्थतः अपि चन्द्रयशाः पत्नी वर्तते ॥५१२॥

विवरणम् :- तत्र तस्यां नगर्यां सपत्नाः शत्रवः एव अहयः सर्पाः सपत्नाहयः। शत्रुसर्पाः। सपत्नाहीनां सुपर्णः गरुडः सपत्नाहिसुपर्णः शत्रुसर्पगरुडः शत्रुसंहारकः ऋतुपर्णः नाम भुवः पतिः भूपतिः पृथ्वीपतिः अस्ति। तस्य ऋतुपर्णस्य नामतः नाम्नः अपि अर्थतः अर्थात् अपि चन्द्रः इव यशः यस्याः सा चन्द्रयशाः नाम चन्द्रकीर्तिःनाम यथार्थनाम्नी पत्नी वर्तते ॥५१२॥

सरलार्थ :- तत्र शत्रुसर्पाणां गरुडः ऋतुपर्णः भूपतिः अस्ति। तस्य नामतः अपि अर्थाद् अपि चन्द्रयशाः नाम चन्द्रकीर्तिः यथार्थनाम्नी पत्नी वर्तते ॥५१२॥

गुजराती :- હવે તે નગરીમાં શત્રુઓરૂપી સર્પોનો નાશ કરવામાં ગરુડસરખો ઋતુપર્ણ નામે રાજા હતો, અને તેની નામથી પણ તથા ગુણથી પણ (ચંદ્રસરખા ઉજ્જ્વલ યશવાળી) ચંદ્રયશા નામની રાણી હતી. ॥૫૧૨॥

हिन्दी :- अब उस नगरी में शत्रुरूपी सर्पों का गरूड के समान नाश करनेवाला ऋतुपर्ण राजा था और उसकी नाम से तथा गुण से भी (चंद्रसमान उज्ज्वल यशवाली) चंद्रयशा नामक रानी थी। ॥५१२॥

मराठी :- त्या नगरीत शत्रुरूपी सर्पांचा नाश करण्यात गरुडासारखा ऋतुपर्ण नावाचा राजा होता आणि त्याची नावाने व गुणांनी पण चंद्रासारखी उज्ज्वल यशाची चंद्रयशा नावाची राणी होती. ॥५१२॥

English :- The king of the kingdom named Rituparne was like Garud (the king of the birds) who with his might and courage could destroy his enemies who were like mere snakes to him. And he had a queen, who with qualities and her name Chandrayasha was bright and soothing as the moon.

तद्दास्यश्च तथावस्थां, तामद्राक्षुः सुरीमिव ॥
रजोभिर्गुण्ठितो यद्वा, मणिरेव मणिर्न किम् ॥५१३॥

अन्वय :- तद्दास्यश्च तां सुरीम् इव तथावस्थाम् अद्राक्षुः । यद्वा रजोभिः गुण्ठितः मणिः एव मणिः न किम् ॥५१३॥

विवरणम् :- *तस्याः चन्द्रयशसः दास्यः तद्दास्यः च तां दमयन्तीं सुरीं देवीम् इव तथावस्थाम् अद्राक्षुः अपश्यन् । यद्वा अथवा रजोभिः रजःकणैः गुण्ठितः आच्छादितः आवृतः मणिः मणिः न किम्?॥५१३॥*

भरलार्थ :- चंद्रयशसः दास्यः दमयन्तीं देवीम् इव तथावस्थाम् अपश्यन् अथवा रजःकणैः आवृतः मणिः मणिः न किम्? ॥५१३॥

ગુજરાતી :- હવે તે રાણીની દાસીઓએ તેવી અવસ્થાવાળી તે દમયંતીને દેવીની પેઠે જોઈ. શું ધૂળથી ખરડાયેલું રત્ન રત્ન નથી રહેતું ? ॥५१३॥

हिन्दी :- अब उस रानी की दासीओं ने उस स्थिति में दमयन्ती को देवी के समान देखा। क्या धूल के कणों से आच्छादित है इसलिये मणि, मणि नही है? ॥५१३॥

मराठी :- आता त्या राणीच्या दासींनी तश्या अवस्थेत असलेल्या दमीयंतीला देवीप्रमाणे पाहिले अथवा काय धुळीने भरलेला आहे म्हणून मणी मणी नाही? ॥५१३॥

English :- Now the chambermaids of the queen happened to see Damyanti who seemed like a goddess in rags and in a pitiful state. They wondered if a sapphire covered with dirt and dust is a sapphire or not.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ताश्च विस्मयमानास्याः, स्वस्वामिन्यै न्यवेदयन् ॥
देव्येकास्ति बहिर्योषा, नगरस्येव देवता ॥५१४॥

अन्वय :- विस्मयमानास्या: ता: स्वस्वामिन्यै न्यवेदयन् हे देवि! बहि: नगरस्य देवता इव एका योषा अस्ति ॥५१४॥

विवरणम् :- विस्मयमानानि आस्यानि यासां ता: विस्मयमानास्या: स्मितमुख्य: ता: दास्य: स्वस्य निजस्य स्वामिनी स्वस्वामिनी तस्यै स्वस्वामिन्यै चन्द्रयशसे न्यवेदयन् आवेदयन् हे देवि! बहि: नगरस्य देवता इव एका योषा स्त्री अस्ति ॥५१४॥

सरलार्थ :- स्मितमुख्य: दास्य: स्वस्वामिन्यै न्यवेदयन् हे देवि । बहि: नगरस्य देवता इव एका स्त्री अस्ति ॥५१४॥

ગુજરાતી :- અને આશ્ચર્ય પામતાં મુખોવાળી એવી તે દાસીઓએ પોતાની સ્વામિની એવી તે રાણીને જણાવ્યું કે "હે દેવી! જાણે નગરની દેવી ન હોય! એવી એક સ્ત્રી બહાર બેઠેલી છે."॥५१४॥

हिन्दी :- और विस्मित होकर देखती उन दासियोंने अपनी स्वामिनी राणी को कहा कि, "हे देवी! मानो नगर की देवी ही ऐसी एक स्त्री बाहर बैठी है।"॥५१४॥

मराठी :- विस्मयचुक्त मुख असलेल्या त्या दासींनी आपली स्वामिनी असलेल्या राणीला सांगितले की, "हे देवी! नगराच्या बाहेर जणू काय देवताच अशी एक स्त्री बसली आहे."॥५१४॥

English :- And the chambermaids kept on staring at Damyanti in astonishment and amazement and went and told their queen that they had seen a beautiful lady who seemed to be a Goddess of the city.

अथ देव्या समादिष्टास्तस्या आनयनाय ताः ॥
अनुजामिव पौलोम्यास्तामानिन्युस्तदैवहि ॥५१५॥

अन्वय :- अथ तस्याः आननाय देव्या समादिष्टाः ताः पौलोम्याः अनुजाम् इव तां तदैव आनिन्युः॥५१५॥

विवरणम् :- अथ अनन्तरं तस्याः दमयन्त्याः आननाय चन्द्रयशोदेव्या समादिष्टाः आज्ञापिताः ताः दास्यः पौलोम्याः इन्द्राण्या अनुजायते इति अनुजा ताम् अनुजाम् इव तां दमयन्तीं तदैव तस्मिन्नेव समये आनिन्युः आनयन् ॥५१५॥

सरलार्थ :- अथ दमयन्त्याः आननाय चन्द्रयशसा देव्या आज्ञापिताः ताः पौलोम्या अनुजाम् इव दमयन्तीं तस्मिन्नेव समये आनयन् ॥५१५॥

ગુજરાતી :- પછી તે રાણીએ તેણીને (પોતાની પાસે) લાવવા માટે આજ્ઞા કરવાથી તે દાસીઓ, ઈન્દ્રાણીની નાની બહેન સરખી તે દમયંતીને તેજ વખતે રાણી પાસે તેડી લાવી. ॥૫૧૫॥

हिन्दी :- फिर राणीने उसे अपने पास लाने की आज्ञा करने पर वे दासियाँ इंद्राणी की छोटी बहन के समान उस दमयंती को उसी वक्त रानी के पास ले आयीं। ॥५१५॥

मराठी :- नंतर राणीने तिला आपल्या जवळ आणण्याची आज्ञा केल्यावर त्या दासींनी इंद्राणीच्या छोट्या बहिणीसारख्या दमयंतीला लगेच राणीसमोर आणले. ॥५१५॥

English :- Then with the permission of the queen they bought Damayanti to her as if she was the younger sister of Indrani, the wife of India.

सा तु चन्द्रयशा देवी, पुष्पवत्याः सहोदरा ॥
परं भैमी न जानाति, मम मातृष्वसेति ताम् ॥५१६॥

अन्वय :- सा चन्द्रयशाः तु पुष्पवत्याः सहोदरा अस्ति। परम् इयं मम मातृष्वसा इति तां भैमी न जानाति ॥५१६॥

विवरणम् :- सा चन्द्रयशाः तु पुष्पवत्याः समानं उदरं यस्याः सा सहोदरा भगिनी अस्ति। परं किन्तु इयं मम मातुः स्वसा भगिनी मातृष्वसा इति तां भीमस्य अपत्यं स्त्री भैमी दमयन्ती न जानाति न बोधति ॥५१६॥

सरलार्थ :- सा चन्द्रयशाः तु पुष्पवत्याः सहोदरा अस्ति। किन्तु इयं मम मातृष्वसा इति तां दमयन्ती न जानाति ॥५१६॥

ગુજરાતી :- હવે તે ચંદ્રયશા રાણી પુષ્પવતીની સગી બહેન થાય છે, પરંતુ આ મ્હારી માતાની બહેન (માસી) થાય છે, એમ દમયંતી જાણતી નથી.॥५१६॥

हिन्दी :- चन्द्रयशा राणी पुष्पवती की सगी बहन थी, लेकिन यह मेरी माता की बहन (मौसी) है यह दमयन्ती जानती नहीं थी॥५१६॥

मराठी :- चंद्रयशा राणी पुष्पवतीची सख्खी बहीण आहे, परंतु ही माझ्या आईची बहीण (मावशी) आहे हे दमयंतीला माहित नाही. ॥५१६॥

English :- The queen Chandryasha was the younger sister of Pushpavati (the mother of Damyanti). But Damyanti did not know that this queen was her maternal aunt and her mother's real sister.

भागिनेय्यस्ति भैमीति, वेत्ति चन्द्रयशाः पुनः ॥
सकृद् बाल्ये च दृष्टेति, नोपलक्षयितुं क्षमा ॥५१७॥

अन्वय :- भैमी इति मे भागिनेयी अस्ति इति चन्द्रयशाः वेत्ति। पुनः बाल्ये सकृत् दृष्टा इति उपलक्षयितुं न क्षमा ॥५१७॥

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी इति एवं मे मम भगिन्याः अपत्यं स्त्री भागिनेयी भगिनीसुता अस्ति इति एवं चन्द्रयशाः वेत्ति जानाति पुनः किन्तु बाल्ये सकृद् एकवारं दृष्टा अवलोकिता अतः उपलक्षयितुं न क्षमा न समर्था ॥५१७॥

सरलार्थ :- दमयन्ती इति मम भागिनेयी अस्ति एवं चन्द्रयशाः बोधति किन्तु बाल्ये एकवारं अवलोकिता इति उपलक्षयितुं न क्षमा ॥५१७॥

ગુજરાતી :- વળી દમયંતી નામની મારી બહેનની દીકરી (ભાણેજી) છે, એમ ચંદ્રયશા જાણે છે, પરંતુ બાલ્યાવસ્થામાં તેણીને એક વખત જ જોયેલી હોવાથી, તે તેને ઓળખી શકી નહીં. ॥૫૧૭॥

हिन्दी :- दमयन्ती नामक मेरी बहन की लडकी (भान्जी) है, ऐसा चंद्रयशा जानती है परंतु बाल्यावस्था में उसे एक बार ही देखा था। इसलिये उसे पहचान नही पायी। ॥५१७॥

मराठी :- दमयंती नावाची माझ्या बहिणीची मुलगी आहे ही गोष्ट चंद्रयशेला माहित आहे परंतु लहानपणी तिला एकदाच पाहिल्यामुळे ओळखू शकली नाही. ॥५१७॥

English :- Even the queen, just knew that a daughter named Damyanti was born to her sister Pushpavati, but still did not recogonise her as she had seen her only once when Damyanti was a child.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवी परमपश्यत्तामादितोऽपि सुतामिव ॥
मनः प्राग्जन्मसम्बन्धे-ऽप्यभिज्ञं किम् नैहिके ॥५१८॥

अन्वय :- परम् देवी आदितः अपि तां सुताम् इव अपश्यत्। मनः प्राग्जन्मसम्बन्धे अपि अभिज्ञं वर्तते ऐहिके किमु न? ॥५१८॥

विवरणम् :- परम् किन्तु देवी चन्द्रयशा आदितः प्रथमतः अपि तां दमयन्तीं सुताम् तनयाम् इव अपश्यत् अवालोकयत्। मनः हृदयं प्राग् च तद् जन्मच प्राग्जन्म। प्राग्जन्मनः सम्बन्धः प्राग्जन्मसम्बन्धः तस्मिन् प्राग्जन्मसम्बन्धे अपि अभिजानाति इत्यभिज्ञं वर्तते। इह भवम् ऐहिकं तस्मिन् ऐहिके किमु वक्तव्यम् ॥५१८॥

सरलार्थ :- किन्तु देवी चन्द्रयशाः प्रथमतः अपि तां दमयन्तीं तनयाम् इव अपश्यत्। मनः प्राग्जन्मसम्बन्धे अपि अभिज्ञं वर्तते इह ऐहिके किमु न भवेत्? ॥५१८॥

ગુજરાતી :- પરંતુ ચંદ્રયશા રાણી તેણીને પ્રથમથી જ પુત્રીની પેઠે જોવા લાગી, કેમ કે પૂર્વભવના સંબંધમાં પણ જ્યારે મન સાક્ષીભૂત થાય છે, તો પછી આ ભવના સંબંધમાં તે કેમ સાક્ષીભૂત ન થાય? ॥૫૧૮॥

हिन्दी :- परंतु चंद्रयशा रानी उसको पहली बार में ही बेटी समान देखने लगी, क्योंकि पूर्व भव के संबंध के बारे में मन जब साक्षीभूत होता है तो इस भव के संबंध में वह साक्षीभूत क्यों न होगा? ॥५१८॥

मराठी :- परंतु चंद्रयशा राणी तिला पहिल्या पासूनच मुलीप्रमाणे पाहू लागली. कारण मन पूर्वजन्मातील संबंधाबद्दल जाणकार असते. तर मग या जन्मातील संबंधाबद्दल जाणकार का नसेल?॥५१८॥

English :- But queen Chandrayasha began to look at Damyanti as a daughter at first sight only. If one happens to see one of his/her past life, his feelings for him will be according to his relationship of his past life. But Damyanti happens to meet her aunt of this very life, so naturally feelings of love will surely emerge and swell.

Jun Gun Aaradhak Trust

तां चन्द्रयशसं देवी, विलोक्य दमयन्त्यपि ॥
स्वमातरमिव स्नेहात्, परमां प्रीतिमासदत् ॥५१९॥

अन्वय :- दमयन्ती अपि स्वमातरम् इव ता चन्द्रयशसं देवीं विलोक्य स्नेहात् परमां प्रीतिम् आसदत् ॥५१९॥

विवरणम् :- दमयन्ती अपि स्वस्य माता जननी स्वमाता तां स्वमातरम् इव तां चन्द्रयशसं देवीं विलोक्य दृष्ट्वा स्नेहात् स्नेहवशात् परमां श्रेष्ठां प्रीतिम् आसदत् प्रापत् ॥५१९॥

सरलार्थ :- दमयन्ती अपि स्वजननीम् इव तां चन्द्रयशसं देवीं निरीक्ष्य स्नेहवशात् परमां प्रीतिं प्रापत् ॥५१९॥

ગુજરાતી :- દમયંતી પણ તે ચંદ્રયશારાણીને જોઈને સ્નેહને લીધે પોતાની માતાની પેઠે જાણી તેમના તરફ અત્યંત પ્રેમવાળી થઇ. ॥૫૧૯॥

हिन्दी :- दमयंती भी अपनी माता के समान चंद्रयशा रानी को देखकर अत्यंत प्रेमार्द्र हुई॥५१९॥

मराठी :- आपल्या मातेप्रमाणे त्या चन्द्रवशा राणीला पाहून दमयन्तीलाही प्रेमाने अतिशय आनंद झाला. ॥५१९॥

English :- Damyanti when placed her eyes on Queen Chandrayasha, she was filled with feeling of affection and tenderness when she placed the Queen as a mother.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततोमिथः सस्वजाते, राजपत्नीनलप्रिये ॥
अभेदमिव वाञ्छन्त्यौ, मनसोरिव देहयोः ॥५२०॥

अन्वय :- ततः मनसोः इव देहयोः अभेदम् इव वाञ्छन्त्यौ राजपत्नीनलप्रिये मिथः सस्वजाते॥५२०॥

विवरणम् :- ततः तदनन्तरं मनसोः इव देहयोः शरीरयोः न भेदः अभेदः तम् यथा, उभयोः मनसोः अभेदः वर्तते तथा शरीरयोः अभेदम् इव वाञ्छन्त्यौ इच्छन्त्यौ राज्ञः पत्नी राजपत्नी चन्द्रयशाः नलस्य प्रिया नलप्रिया दमयन्ती च राजपत्नी च नलप्रिया च राजपत्नीनलप्रिये मिथः परस्परं सस्वजाते आलिलिङ्गतुः॥५२०॥

सरलार्थ :- तदनन्तरं मनसोः इव शरीरयोः अभेदम् इव इच्छन्त्यौ चन्द्रवशोदमयन्त्यौ परस्परम् आलिलिङ्गतुः ॥५२०॥

ગુજરાતી :- પછી તેઓ બન્ને (પોતપોતાનાં) મનની જેમ શરીરના પણ અભેદપણાને જાણે ઇચ્છતી હોય તેમ તે રાણી તથા નલરાજાની પત્ની દમયંતી પરસ્પર ભેટી પડ્યાં. ॥૫૨૦॥

हिन्दी :- बाद में उन दोनों ने मन के समान अपने शरीर का भी ऐक्य हो इस इच्छा से एकदूसरे को आलिंगन दिया॥ ॥५२०॥

मराठी :- नंतर त्या दोघींनी मनाप्रमाणें जणू काय शरीरांचेही ऐक्य व्हावे या इच्छेने एकमेकांना मिठी मारली. आलिंगन दिले. ॥५२०॥

English :- Then they both, by not keeping any differences between the bodies as they have kept with their minds, hugged each other with utmost affection.

स्नेहाद्भैमी ततः साश्रुः, देव्याः पादाववन्दत ॥
किमुच्यते कुलीनानां विनयव्रतपालने ॥५२१॥

अन्वय :- ततः साश्रुः भैमी स्नेहात् देव्याः पादौ अवन्दत । कुलीनानां विनयव्रतपालने किम् उच्यते? ॥५२१॥

विवरणम् :- ततः तदनन्तरम् अश्रुभिः सह वर्ततेऽसौ साश्रुः भीमस्य अपत्यं स्त्री भैमी दमयन्ती स्नेहात् देव्याः चन्द्रयशसः पादौ चरणे अवन्दत प्राणमत् । कुलीनानां विनयस्य व्रतं विनयव्रतं विनयव्रतस्य पालनं विनयव्रतपालनं तस्मिन् विनयव्रतपालने किम् उच्यते? ॥५२१॥

सरलार्थ :- तदनन्तरं साश्रुः दमयन्ती स्नेहपरवशात् चन्द्रयशसः देव्याः चरणे प्राणमत् कुलीनानां विनयव्रतपालने किम् उच्यते ॥५२१॥

ગુજરાતી :-પછી દમયંતીએ પાણ આંખોમાં આંસુઓ લાવીને સ્નેહથી તે રાણીના ચરણોમાં વંદન કર્યું, કેમ કે કુલીનોને વિનયાચાર પાળવામાં શું કહેવું પડે ? ॥૫૨૧॥

हिन्दी :- फिर दमयन्तीने साश्रुनयनों से रानी के चरणों में प्रणाम किया, क्योंकि कुलीनों को विनयाचार पालने के लिये भी क्या कहना पडता है? ॥५२१॥

मराठी :- नंतर दमयंतीने डोळयात अश्रू आणून स्नेहाने राणीच्या चरणावर नमस्कार केला. कारण कुलीन मनुष्यांना विनयाचार पाळण्याकरिता काय सांगावे लागते? ॥५२१॥

English :- Then with eyes filled with tears, Damyanti touched the feet of the queen. As one shouldn't remind good manners to a person from a noble pedigree.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पृष्टा देव्याथ कासि त्वं, भैम्यवोचद्वणिक्सुता ।।
पत्या त्यक्ता महारण्ये, मातः सैषास्म्यपुण्यका ।।५२२।।

अन्वय :- अथ देव्या पृष्टा त्वं कासि? भैमी अवोचत्-हे मातः सा एषा अपुण्यका महारण्ये पत्या त्यक्ता वणिक्सुता अस्मि ।।५२२।।

विवरणम् :- *अथ देव्या चन्द्रयशसा पृष्टा त्वं का असि ? भीमस्य अपत्यं स्त्री भैमी दमयन्ती अवोचत् अवदत्-हे मातः सा एषा न विद्यते पुण्यं यस्याः सा अपुण्यका पुण्यरहिता महत्च तद् अरण्यं च महारण्यं तस्मिन् महारण्ये पत्या त्यक्ता मुक्ता वणिजः सुता वणिक्सुता अस्मि।।५२२।।*

सरलार्थ :- अथ देव्या पृष्टा त्वं का असि? दमयन्ती अवदत् हे मातः । सा एषा पुण्यरहिता महारण्ये पत्या त्यक्ता वणिजः तनया अस्मि ।।५२२।।

गुजराती :- પછી તે રાણીએ તેણીને પૂછ્યું કે "તુ કોણ છે?" ત્યારે દમયંતીએ કહ્યું કે, હું એક વણિકપુત્રી છું, તથા હે માતાજી! ભરથારે મને જંગલમાં તજી દીધી છે, અને તેથી હું પુણ્યરહિત થયેલી છું. ।।૫૨૨।।

हिन्दी :- तब रानीने उससे पूछा कि, "तुम कौन हो?" तब दमयंतीने कहा कि, मैं एक वणिकपुत्री हूँ और हे माताजी! मेरे पति ने मुझे जंगल में छोड दिया है। इसलिए मैं पुण्यरहित हूँ ।।५२२।।

मराठी :- जेव्हा राणीने तिला विचारले की, "तू कोण आहेस?" तेव्हा दमयंती म्हणाली, "हे माते! मी पतीने महारण्यात सोडून दिलेली एक अभागिनी वाण्याची मुलगी आहे." ।।५२२।।

English :- Then the queen asked her to place her identity. Then Damyanti answered that she was a daughter of a grocer and was deserted by her husband in the forest, as she had no marits to vouch for her.

ऊचे चन्द्रयशाः सार्द्र-लोचना नलवल्लभाम् ॥
वत्से! त्वं प्रथमं पुत्री ! पश्चाच्चन्द्रवती तु मे ॥५२३॥

अन्वय :- सार्द्रलोचना चन्द्रयशाः नलवल्लभाम् ऊचे-वत्से मे त्वं प्रथमं पुत्री चन्द्रवती तु पश्चात् ॥५२३॥

विवरणम् :- आर्द्रेण सहिते सार्द्रे । सार्द्रे लोचने यस्याः सा सार्द्रलोचना साश्रुनयना चन्द्रयशाः नलस्य वल्लभा नलवल्लभा तां नलवल्लभां ऊचे-अवोचत् । हे वत्से! मे मम त्वं प्रथमम् मम पुत्री चन्द्रवती तु पश्चात् ॥५२३॥

सरलार्थ :- साश्रुनयना चन्द्रयशाः नलवल्लभाम् अवदत्-हे वत्से! त्वं मम प्रथमं पुत्री असि चन्द्रवती तु पश्चात् भविष्यति ॥५२३॥

ગુજરાતી :- પછી આંખોમાં આંસુ લાવીને ચંદ્રયશા રાણીએ દમયંતીને કહ્યું કે, હે વત્સે! તુ મારી પહેલી પુત્રી છે અને આ મારી પુત્રી ચંદ્રવતી તો, તારા પછી છે. ॥૫૨૩॥

हिन्दी :- फिर आँखो में आंसु लाकर चंद्रयशा रानीने दमयन्ती से कहा कि, हे वत्से! तुम मेरी पहली बेटी हो, और मेरी बेटी चंद्रवती तो तुम्हारे बाद है ॥५२३॥

मराठी :- नंतर अश्रूपुर्ण डोळ्यांनी चंद्रयशा राणीने दमयंतीला म्हटले, "हे वत्से! प्रथम तू माझी मुलगी आहेस, आणि माझी मुलगी चंद्रवती तर, तुझ्यानंतर आहे." ॥५२३॥

English :- At this the queen bought tears in her eyes and said that she makes her as her first and elder daughter and her younger daughter Chandravanti is the second one.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अपरेद्युश्चन्द्रयशा-श्चिन्तयामास चेतसि ।।
पुत्रिकेयं गुणैः सर्वै-र्दमयन्तीव भाति मे ।।५२४।।

अन्वय :- अपरेद्युः चन्द्रयशाः चेतसि चिन्तयामास। सर्वैः गुणैः इयं पुत्रिका दमयन्ती इव मे भाति ।।५२४।।

विवरणम् :- अपरेद्युः अपरस्मिन् दिने चंद्रयशाः चेतसि मनसि चिन्तयामास अचिन्तयत्-सर्वैः गुणैः इयं पुत्रिका कन्यका दमयन्ती इव मे मम भाति ।।५२४।।

सरलार्थ :- एकस्मिन् दिने चन्द्रयशाः मनसि व्यचारयत् सर्वैः गुणैः इयं पुत्रिका दमयन्ती इव मम भाति ।।५२४।।

ગુજરાતી :- પછી એક દિવસ ચંદ્રયશા મનમાં વિચારવા લાગી કે, સઘળા ગુણો જોતાં આ પુત્રી મને તો દમયંતી જેવી લાગે છે. ।।૫૨૪।।

हिन्दी :- फिर एक दिन चंद्रयशा मन में सोचने लगी कि, "सभी गुणोंसे यह पुत्री तो मुझे दमयन्ती जैसी लग रही है।"।।५२४।।

मराठी :- नंतर एक दिवस चंद्रयशा मनांत विचार करू लागली, "सर्व गुणांनी तर ही मुलगी मला दमयंतीप्रमाणे वाटते आहे."।।५२४।।

English :- Then one day the queen thought that this daughter through her qualities seems to be Damyanti in all ways.

परं तस्याः किमेवं स्यात्, कदाप्यागमनक्रिया ॥
भरतार्धभुजः सा हि, वल्लभा नलभूभुजः ॥५२५॥

अन्वय :- परं किं कदापि तस्याः एवम् आगमनक्रिया स्यात्। सा भरतार्धभूभुजः नलभूभुजः वल्लभा अस्ति ॥५२५॥

विवरणम् :- परं परंतु किन्तु किं कदापि तस्याः दमयन्त्याः एवम् अनेन प्रकारेण आगमनस्य क्रिया आगमनक्रिया स्यात्। सा दमयन्ती भरतस्य अर्धं भरतार्धं। भरतार्धं भुनक्ति भरतार्धभुक् तस्य भरतार्धभुजः भुवं भुनक्ति भुङ्क्ते वा भूभुक्, नलश्चासौ भूभुक् च नलभूभुक् तस्य नलभूभुजः वल्लभा पत्नी अस्ति ॥५२५॥

सरलार्थ :- किन्तु कदापि दमयन्त्याः एवम् आगमनक्रिया स्यात्। सा भरतार्धभुजः नलनृपस्य पत्नी अस्ति ॥५२५॥

ગુજરાતી :- પરંતુ શું કોઈ પણ કાળે તેણીનું આવી રીતનું અહીં આગમન થાય? કેમ કે તે તો અર્ધ ભરતખંડને ભોગવનારા નલરાજાની મહારાણી છે. ॥૫૨૫॥

हिन्दी :- परंतु क्या कभी किसी प्रकार से उसका इस तरह से यहाँ आगमन हो सकता है? क्योंकि वह तो अर्धभरतखंड को भोगनेवाले नलराजा की महारानी है"॥५२५॥

मराठी :- परंतु काय कोणत्याही वेळी तिचे याप्रमाणे आगमन होऊं शकते? कारण ती तर अर्धभरतखंडाला भोगणाऱ्या नलराजाची महाराणी आहे."॥५२५॥

English :- But can this be the way of her arrival as she is the Empress of the half of Bharatschetra and a wife to the great King Nal.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुमर्थदशीशीतांशु-प्रमितैर्योजनैश्च सा ॥
स्वाराज्यमपि तद्राज्यस्पर्धामाधातुमक्षमम् ॥५२६॥

अन्वय :- सा पुमर्थदशी शीतांशु प्रमितैः योजनैः स्वाराज्यम् अपि तद्राज्यस्पर्धाम् आधातुम् अक्षमम् ॥५२६॥

विवरणम् :- *पुमर्थानां दशी पुमर्थदशी चत्वारिंशत् । शीताः अंशवः यस्य सः शीतांशुः चन्द्र एकः । पुमर्थदशी च शीतांशुश्च पुमर्थदशीशीतांशु पुमर्थदशीशीतांशु-भ्याम् प्रमितानि पुमर्थदशीशीतांशु प्रमितानि तैः पुमर्थदशीशीतांशुप्रमितैः शतं चत्वारिंशता च योजनैः वर्तते। स्वः राज्यं स्वाराज्यं स्वर्गराज्यम् अपि तस्य नलस्य राज्यं तद्राज्यं तद्राज्येन स्पर्धा तद्राज्यस्पर्धा तां तद्राज्यस्पर्धाम् आधातुं कर्तुं न क्षमं अक्षमम् अस्ति ॥५२६॥*

सरलार्थ :- सा शतं चत्वारिंशता च योजनैः वर्तते । स्वर्गराज्यम् अपि नलराज्यस्पर्धां कर्तुम् अक्षमम् ॥५२६॥

ગુજરાતી :- વળી તે તો અહીંથી એકસો ચુમ્માલીસ યોજન દૂર છે, અને દેવલોકનું રાજ્ય પણ તે નલરાજાના રાજ્યની બરોબરી કરવાને અસમર્થ છે. ॥૫૨૬॥

हिन्दी :- वह तो यहाँ से एक सौ चौवालीस योजन दूर है । और देवलोक का राज्य भी नलराजा के राज्य की स्पर्धा करने में असमर्थ है ॥५२६॥

मराठी :- तो तर येथून एकशे चवेचाळीस योजन दूर आहे, आणि स्वर्गाचे राज्य सुद्धा नलराजाच्या राज्याची बरोबरी करण्यात असमर्थ आहे. ॥५२६॥

English :- But then King Nal's kingdom is about forty four hundred yojan's from her (35,200 miles) and even the God's Eden cannot be compared to the kingdom of King Nal.

P.P. Ac. Gunratnasuri M.S.

दानशालाच तत्रास्ति, महादेव्याः पुराद्बहिः ॥
दीयते दुःस्थितादिभ्यः, प्रदानमनिवारितम् ॥५२७॥

अन्वय :- तत्र पुराद्बहिः महादेव्याः दानशाला अस्ति दुः स्थितादिभ्यः अनिवारितं प्रदानं दीयते॥५२७॥

विवरणम् :- तत्र तस्यां नगर्यां पुराद् नगराद् बहिः महती चासौ देवी च महादेवी तस्याः महादेव्याः चन्द्रयशसः दानाय शाला दानशाला अस्ति। दुःखे स्थिताः दुःस्थिताः आदौ येषां ते दुःस्थितादयः तेभ्यः दुःस्थितादिभ्यः, न निवारितं यथा स्यात् तथा अनिवारितं प्रकृष्टं दानं प्रदानं दीयते ॥५२७॥

सरलार्थ :- तत्र नगराद्बहिः चन्द्रयशसः महादेव्याः दानशाला अस्ति। तत्र दुःस्थितादिभ्यः अनिवारितं प्रदानं दीयते ॥५२७॥

ગુજરાતી :- હવે ત્યાં નગરની બહાર તે મહારાણીની એક દાનશાળા છે, કે જ્યાં દુઃખી મનુષ્યોને કોઈ પણ જાતની રોકટોક વિના દાન આપવામાં આવે છે. ॥૫૨૭॥

हिन्दी :- अब वहाँ नगर के, बाहर महाराणी की एक दानशाला है। जहाँ दुःखी आदि मनुष्यों को बिना किसी रोकटोक दान दिया जाता है ॥५२७॥

मराठी :- तेथे नगराच्या बाहेर महाराणीची एक दानशाळा आहे. जेथे दुःखी इत्यादी मनुष्यांना बिना रोकटोक दान केले जाते. ॥५२७॥

English :- Now the queen had opened a school for giving alms and charity to the poor where everybody was allowed to collect alms without and difficulty.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऊचे भैम्यन्यदा देवीमिह दानमहं ददे ।।
भोजनार्थं यदि पुनः कदाप्यायात्पतिर्मम ।।५२८।।

अन्वय :- अन्यदा भैमी देवीम् ऊचे-अहं दानं ददे। पुनः यदि इह कदापि मम पतिः भोजनार्थम् आयात् ।।५२८।।

विवरणम् :- *अन्यदा अन्यस्मिन् दिने भीमस्य अपत्यं स्त्री भैमी दमयन्ती देवीं चन्द्रयशसम् ऊचे अवदत् । अहं दानं ददे यच्छामि। पुनः यदि इह अस्मित् स्थाने कदा अपि कस्मिन् समये अपि मम पतिः भोजनार्थं भोजनाय आयात् । आगच्छेत्।।५२८।।*

सरलार्थ :- अन्यस्मिन् दिने दमयन्ती चन्द्रयशसं देवीम् उवाच-अहं दानं यच्छामि पुनः यदि इह कदापि मम पतिः भोजनार्थम् आगच्छेत् ।।५२८।।

ગુજરાતી :- પછી એક દિવસ દમયંતીએ રાણીને કહ્યું કે, આ દાનશાળામાં હું દાન આપવા બેસું ? કેમકે કદાચ ભોજન માટે મારો સ્વામી અહીં આવી જાય. ।।૫૨૮।।

हिन्दी :- फिर एक दिन दमयन्ती ने राणी से कहा, "इस दानशाला में मैं दान देने के लिये बैठुं ? क्योंकि हो सकता है शायद भोजन के लिये मेरे स्वामी भी यहीं आ जाए ।।५२८।।"

मराठी :- एके दिवशी दमयंती राणीला म्हणाली, "वा दानशाळेत दान देण्याकरिता मी बस् काय? कारण कदाचित् माझे स्वामी मुख्या भोजन करण्याकरिता येथे येतील?"।।५२८।।

English :- Then one day Damyanti asked her maternal aunt if she can sit there to give alms to the poor because, may be her husband might arrive there to collect food or alms.

देव्यादेशाद्ददातिस्म, ततः प्रभृति भीमजा ॥
स्पृह्यन्ती पतिं द्रष्टु-मनिर्विण्णा दिवानिशम् ॥५२९॥

अन्वय :- ततः प्रभृति पतिं द्रष्टुं स्पृह्यन्ती भीमजा देव्यादेशाद् अनिर्विण्णा सती दिवानिशं ददाति स्म ॥५२९॥

विवरणम् :- *तस्मात् दिनात् आरभ्य ततः प्रभृति पतिं नलं द्रष्टुम् अवलोकयितुं स्पृह्यन्ती इच्छन्ती भीमात् जायते इति भीमजा दमयन्ती देव्याः चन्द्रयशसः आदेशः देव्यादेशः तस्मात् देव्यादेशात् न निर्विण्णा अनिर्विण्णा अखिन्ना सती दिवा च निशा च एतयोः समाहारः दिवानिशम् अहोरात्रं ददाति स्म अयच्छत् ॥५२९॥*

सरलार्थ :- तस्मात् दिवसात् आरभ्य नलं निरीक्षितुम् इच्छन्ती दमयन्ती चन्द्रयशसः देव्याः आज्ञाया अखिन्ना सती प्रतिदिनम् अयच्छत् ॥५२९॥

ગુજરાતી :-પછી રાણીની આજ્ઞાથી તે દિવસથી માંડીને દમયંતી, પોતાના સ્વામીને મળવાની ઇચ્છાથી રાતદહાડો થાક્યાવિના ત્યાં રહીને દાન આપવા લાગી. ॥૫૨૯॥

हिन्दी :- फिर रानी की आज्ञा से उस दिन से दमयन्ती अपने स्वामी को प्राप्त करने की इच्छा से रातदिन बिना थके वहाँ रहकर दान देने लगी ॥५२९॥

मराठी :- नंतर राणीच्या आज्ञेनुसार त्या दिवसापासून दमयंती आपल्या स्वामीला प्राप्त करण्याच्या इच्छेने रात्रंदिवस न थकता तेथे राहून दान देऊ लागली. ॥५२९॥

English :- Then with the permission of the queen, Damyanti stayed there and gave away alms to the poor, night and day without getting tired or weary.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पप्रच्छ स्वच्छभावा च, प्रत्यहं प्रतियाचकम् ।।
कोऽपि कुत्रापि दृष्टः किमीदृशस्तादृशः पुमान् ।।५३०।।

अन्वय :- स्वच्छभावा प्रत्यहं प्रतियाचकं पप्रच्छ-कुत्रापि कः अपि ईदृशः तादृशः पुमान् दृष्टः किम्?।।५३०।।

विवरणम् :- *स्वच्छः निर्मलः भावः यस्याः सा स्वच्छभावा दमयन्ती अहनि अहनि प्रत्यहं याचकं प्रति प्रतियाचकं पप्रच्छ अपृच्छत् अप्राक्षीत्-कुत्रापि कस्मिन्नपि स्थाने कः अपि ईदृशः तादृशः पुमान् दृष्टः किम्?।।५३०।।*

सरलार्थ :- निर्मलभावा दमयन्ती प्रतिदिनं प्रतियाचकम् अपृच्छत्-कुत्रापि कः अपि ईदृशः तादृशः पुरुषः दृष्टः किम्। ।।५३०।।

गुजराती :- વળી નિર્મલ આશયવાળી દમયંતી દરેક યાચકોને હમેશાં પૂછવા લાગી કે, તમોએ શું ક્યાં ય કોઈ પણ આવા પ્રકારનો માણસ જોયેલો છે? ।।૫૩૦।।

हिन्दी :- निर्मल आशयवाली दमयन्ती हर याचक को हमेशां पूछती थी कि क्या तुमने कहीं किसी ऐसे ऐसे प्रकार के मनुष्य को देखा है? ।।५३०।।

मराठी :- निर्मळ आशय असलेली दमयंती प्रत्येक याचकाला नेहमी विचारू लागली की, तुम्ही कुठे तरी अमुक अमुक प्रकारच्या माणसाला पाहिले आहे काय? ।।५३०।।

English :- Damyanti with a serene and lucid intention used to ask the tramps and vagabonds if they have seen a man with such a description.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सान्येद्युर्दानशालास्था-ऽपश्यद् बद्धं मलिम्लुचम् ॥
नीयमानं तलारक्षैः, स्वनद्विरसडिण्डिमम् ॥५३१॥

अन्वय :- अन्येद्युः दानशालास्था सा स्वनद्विरसडिण्डिमं तलारक्षैः नीयमानं बद्धं मलिम्लुचम् अपश्यत् ॥५३१॥

विवरणम् :- अन्येद्युः अन्यस्मिन् दिने दानाय शाला दानशाला, दानशालायां तिष्ठति इति दानशालास्था सा दमयन्ती विरसश्चासौ डिण्डिमश्च विरसडिण्डिमः। स्वनन् विरसडिण्डिमः यस्मिन् कर्मणि यथा स्यात् तथा स्वनद्विरसडिण्डिमं तलस्य आरक्षकाः तलारक्षकाः तैः तलारक्षकैः नीयमानं बद्धं बन्धनग्रस्तं मलिम्लुचं स्तेनम् अपश्यत् ॥५३१॥

सरलार्थ :- अन्यस्मिन् दिवसे दानशालास्था सा दमयन्ती स्वनद्विरसडिण्डिमं तलारक्षैः नीयमानं बद्धं स्तेनम् अपश्यत् ॥५३१॥

ગુજરાતી :- પછી દાનશાળામાં રહેલી એવી દમયંતીએ એક દિવસ, પોલીસના માણસો દ્વારા બાંધીને લઈ જવાતા, તથા જેની આગળ નીરસ અવાજે ઢોલ વાગી રહ્યો હતો, એવા એક ચોરને જોયો. ॥૫૩૧॥

हिन्दी :- फिर दानशाला में रहती हुई दमयंती ने एक दिन सिपाही जिसे ले जा रहे है, और जिस के आगे निरस आवाज में ढोल बज रहा है, ऐसे एक चोर को देखा ॥५३१॥

मराठी :- मग दानशाळेत बसलेल्या दमयंतीने एके दिवशी शिपाई ज्याला घेऊन जात आहेत, आणि ज्याच्या समोर निरस आवाजात ढोल वाजत आहे अश्या एका चोराला पाहिले.॥५३१॥

English :- One day when Damyanti was seated in that school, she happened to see a robber who was handcuffed and been taken by the soldiers and a humdrum and incipid sounds of drums being played in front of them.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैमी पप्रच्छ तान् भद्राः, किमनेन विनाशितम् ॥
ईदृशी दुर्विधा वध्य-प्रक्रिया क्रियतेऽस्य यत् ॥५३२॥

अन्वय :- भैमी तान् पप्रच्छ हे भद्राः। अनेन किं विनाशितम्? यतः अस्य ईदृशी दुर्विधा वध्यप्रक्रिया क्रियते ॥५३२॥

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी दमयन्ती तान् तलरक्षकान् पप्रच्छ अपृच्छत्-हे भद्राः। अनेन चौरेण किं विनाशितं किं घातितं किम् अपराद्धम्। यत् यस्मात् अस्य स्तेनस्य ईदृशी एतादृशी दुष्टा विधा प्रकारः यस्याः सा दुर्विधा वधम् अर्हति इति वध्यः वध्यस्य प्रक्रिया वध्यप्रक्रिया क्रियते। दुर्विधया अयं किमर्थं वध्यते ॥५३२॥

सरलार्थ :- दमयन्ती तलरक्षकान् अपृच्छत् हे भद्राः। अनेन चौरेण किम् अपराद्धम्? यस्मात् अस्य एतादृशी दुष्प्रकारेण वध्यप्रक्रिया क्रियते ॥५३२॥

ગુજરાતી :- ત્યારે દમયંતીએ તે પોલીસના માણસોને પૂછ્યું કે, હે ભદ્ર પુરુષો! આ ચોરે શું ગુન્હો કર્યો છે કે જેથી એની સાથે આવો દુઃખદાયી વ્યવહાર કરો છો! ॥૫૩૨॥

हिन्दी :- तब दमयन्ती ने सिपाहीयों से पूछा, " हे भद्रपुरूषो! इस चोरने क्या गुनाह किया है? के जिससे इसकी इस तरह दुःखदायी, मार डालनेवाली क्रिया कर रहे है?"॥५३२॥

मराठी :- तेव्हा दमवंतीने शिपायांना विचारले, भल्या माणसांनो! या चोराने असा काय गुन्हा केला आहे? की ज्यामुळे याला इतक्या वाईट-रीतीने मारून टाकण्याची क्रिया करीत आहात? ॥५३२॥

English :- Then Damyanti asked the soldiers for the reason for taking the man tied up and the drums been played incipidly which just tells the people that a robber arrives, which is a very torturous insult for the robber.

तेऽप्यवोचंश्चन्द्रवत्या-श्चौरो रत्नकरण्डिकाम् ॥
जीवितादिव निर्विण्णो, जहे तेनैष हन्यते ॥५३३॥

अन्वय :- ते अपि अवोचन् - जीवितात् निर्विण्णः इव चौरः चन्द्रवत्याः रत्नकरण्डिकां जहौ तेन एषः हन्यते ॥५३३॥

विवरणम् :- *ते तलरक्षकाः अपि अवोचन् ऊचुः-जीवितात् जीवनात् निर्विण्णः निर्वेदं प्राप्तः खिन्नः इव चौरः चन्द्रवत्याः रत्नानां करण्डिका रत्नकरण्डिका तां रत्नकरण्डिकां जहे जहार। तेन कारणेन एषः चौरः हन्यते ॥५३३॥*

संस्कृतार्थ :- ते तलरक्षकाः अपि अवदन् । जीवनात् खिन्नः इव चौरः चन्द्रवत्याः रत्नकरण्डिकाम् अहरत, तेन कारणेन एषः हन्यते ॥५३३॥

गुजराती :- ત્યારે તેઓએ કહ્યું કે જાણે જીવનથી કંટાળી ગયો હોય નહીં એવા આ ચોરે ચંદ્રવતી નામની રાજકુમારીનો રત્નોનો ડાબલો ચોરી લીધો હતો, અને તેથી તેને મારી નાખવાની સજા મળી છે. ॥૫૩૩॥

हिन्दी :- तब उन्होने कहा, "जिंदगी से मानो उब गया हो ऐसे इस चोरने चंद्रवती नामक राजकुमारी का रत्नों का डिब्बा चुरा लिया था, और उसी अपराध से इसे मार डालने की सजा मिली है ॥५३३॥

मराठी :- तेव्हा ते शिपाई म्हणाले जणू जीवनाला कंटाळलेल्या या चोराने चंद्रावती नावाच्या राजकुमारीचा रत्नांचा हब्बा चोरला आहे, म्हणून या अपराधामुळे त्याला मारून टाकण्यात येत आहे. ॥५३३॥

English :- They replied that, as he was tired of his life, he had robbed a box of jewels of princess Chandravanti and so he was sentenced to death.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दीनः स्तेनोऽपि तां नत्वा-ऽवादीत् त्रायस्व देवि माम् ।।
शरणं त्वां प्रपन्नोऽस्मि, शरणागतवत्सले ।।५३४।।

अन्वय :- दीनः स्तेनः अपि तां नत्वा अवादीत् हे शरणागतवत्सले देवि। त्वां शरणं प्रपन्नोऽस्मि। मां त्रायस्व ।।५३४।।

विवरणम् :- दीनः विह्वलः स्तेनः चौरः अपि तां दमयन्तीं नत्वा प्रणम्य अवादीत् अवदत् - शरणम् आगतः शरणागतः। शरणागते वत्सला शरणागतवत्सला, तत्सम्बुद्धौ हे शरणागतवत्सले! देवि! त्वां शरणं प्रपन्नः प्राप्तः अस्मि। मां त्रायस्व रक्ष ।।५३४।।

सरलार्थ :- व्याकुलः चौरः अपि तां दमयन्तीं वन्दित्वा अवदत्-हे शरणागतवत्सले देवि। त्वां शरणं प्राप्तः अस्मि। मां रक्ष।।५३४।।

गुजराती :- पछी दैन्यपणाने प्राप्त थयेलो चोर पण तेणीने नमीने विनंती करवा लाग्यो के, हे देवी ! तमो मारुं रक्षण करो। हे शरणे आवेलानुं रक्षण करनारी देवी ! हुं तमारे शरणे आवेलो छुं. ।।५३४।।

हिन्दी :- फिर दीन होकर चोर भी उसके सामने झुक कर प्रार्थना करने लगा, "हे देवि! आप मेरा रक्षण करो। हे शरण में आये हुए प्राणी का रक्षण करनेवाली देवी! मैं आपके शरण में आया हूँ।"।।५३४।।

मराठी :- नंतर दीन होऊन चोरसुद्धा तिला वन्दन करून म्हणाला- "हे आश्रयाला आलेल्यांचे रक्षण करणाऱ्या देवी। मी आपल्याला शरण आलो आहे." माझे रक्षण करा. ।।५३४।।

English :- Then the robber turning indigent and forlorn begged to Damyanti to protect him and to harbour him by placing her auspicious refuge on him.

P.P.Ac. Gunratnasuri M.S. Jun Gyan Aradhak Trust

यमदूता इवैते मे, जीवितग्रहणोद्यताः ॥
वाताहतपताकेव, कंपते हृदयं मम ॥५३५॥

अन्वय :- यमदूताः इव एते मे जीवितग्रहणोद्यताः वाताहतपताका इव मम हृदयं कम्पते ॥५३५॥

विवरणम् :- *यमस्य दूताः यमदूताः इव एते तलरक्षकाः मे मम जीवितस्य ग्रहणं जीवितग्रहणं। जीवितग्रहणाय उद्यताः जीवितग्रहणोद्यताः सन्ति। मां हन्तुमुद्यताः सन्ति। तस्मात् कारणात् वातैः पवनैः आहता वाताहता। वाताहता चासौ पताकाच वाताहतपताका इव मम हृदयं कम्पते ॥५३५॥*

सरलार्थ :- यमदूताः इव एते तलरक्षकाः मम जीवितग्रहणोद्यताः सन्ति। अतः वाताहतपताका इव मम हृदयं कम्पते ॥५३५॥

गुजराती :- યમરાજાના દુતો સરખા આ પોલીસના માણસો મારું જીવન હરવાને માટે તૈયાર થયા છે અને તેથી વાયુના ઝપાટાથી કંપતી ધજાની પેઠે મારું હૃદય કંપ્યા કરે છે. ॥૫૩૫॥

हिन्दी :- यमराज के दूतों के समान यह सिपाही मेरा जीवन समाप्त करने को तैयार है, और पवन के झोंके से फडफडाती ध्वजा के समान मेरा हृदय काँप रहा है। ॥५३५॥

मराठी :- यमराजाच्या दूतासारखे हे शिपाई माझे जीवन समाप्त करण्यास तयार आहेत, आणि त्यामुळे हवेच्या झोक्याने फडफडणाऱ्या ध्वजेप्रमाणे माझे हृदय कापत आहे. ॥५३५॥

English :- The robber says that these soldiers who seem to be the messengers of the God of death (Yama) are out to kill him and his heart shivers with fright as the flag flutters and flaps due to the puff and the strong current of the wind.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सावदद्भद्र मा भैषी:, कृताकृत्योऽपि सम्प्रति ।।
न जीवयति किं वैद्यो, महारोगेऽपि रोगिणाम् ।।५३६।।

अन्वय :- सा अवदत्-हे भद्र ! कृताकृत्य: अपि सम्प्रति मा भैषी:। वैद्य: रोगिणां महारोगेऽपि किं न जीवयति ।।५३६।।

विवरणम् :- सा दमयन्ती अवदत् अवादीत् हे भद्र! न कृत्यम् अकृत्यम् । कृतम् अकृत्यं येन स: कृताकृत्य: अपि अकृत्यं कृतवान् अपि सम्प्रति वर्तमाने मा भैषी: मा बिभीहि। वैद्य: रोग: एषामस्ति इति रोगिण: तेषां रोगिणां महान् चासौ रोग: च महारोग: तस्मिन् महारोगे सत्यपि किं न जीवयति ।।५३६।।

सरलार्थ :- सा दमयन्ती अवदत् हे भद्र। सम्प्रति कृताकृत्य: अपि मा भैषी: । वैद्य: रोगिणां महारोगे अपि किं न जीवयति ।।५३६।।

ગુજરાતી :- ત્યારે તે દમયંતીએ ચોરને કહ્યું કે, અકાર્ય કરનારો એવો, તુ હવે ડર નહીં! કેમ કે રોગીને ભારે રોગ લાગુ પડ્યો હોય છતાં પણ વૈદ્ય શું તેને જીવાડતો નથી? ।।૫૩૬।।

हिन्दी :- तब दमयंती ने चोर से कहा, "अकार्य करनेवाले, तुम अब मत डरो। क्योंकि रोगी को कितना ही बडा रोग क्यों न हुआ हो पर क्या वैद्य उसे जीवन नही देता?"।।५३६।।

मराठी :- तेव्हा दमयंतीने चोरास म्हटले, "अकार्य करणाऱ्या पुरुषा आता तू घाबरु नकोस, कारण रोग्याचा रोग किती ही मोठा जरी असला तरी काय वैद्य रोग्याला जीवदान देत नाही?"।।५३६।।

English :- At this Damyanti asked him, by addressing him as a man who had done an unworthy deed; that he shouldn't feel afraid as there is always a physician to cure the most uncurable disease too.

इत्युक्त्वाऽकृत सा शीलप्रभावश्रावणं क्षणात् ॥
छिन्ना इव क्षुरिकया, बन्धाश्चौरस्य तुत्रुटुः ॥५३७॥

अन्वय :- इति उक्त्वा सा शीलप्रभावश्रावणम् अकृत। क्षुरिकया छिन्ना इव क्षणात् चौरस्य बन्धाः तुत्रुटुः ॥५३७॥

विवरणम् :- इति एवं उक्त्वा उदित्वा सा दमयन्ती शीलस्य प्रभावः शीलप्रभावः शीलप्रभावस्य श्रावणं शीलप्रभावश्रावणम् अकृत। शीलस्य प्रभावम् अश्रावयत्। तदा क्षुरिकया छिन्ना इव क्षणात् क्षणमात्रात् चौरस्य स्तेनस्य बन्धाः तुत्रुटुः अत्रुटयन् ॥५३७॥

सरलार्थ :- इति उक्त्वा दमयन्ती शीलप्रभावम् अश्रावयत्। ततः क्षुरिकया छिन्ना इव तस्य चोरस्य बन्धाः तत्क्षणं तुत्रुटुः। अत्रुटयन्॥५३७॥

गुजराती :- એમ કહીને તે દમયંતીએ ચોરને શીલનું માહાત્મ્ય સંભળાવ્યું, કે તુરત જ જાણે છરીથી કપાઈ ગયા હોય તેમ ચોરના બંધનો છૂટી ગયાં. ॥५३७॥

हिन्दी :- ऐसा कहकर उस दमयंतीने चोर को शील का माहात्म्य समझाया तभी तुरंत ही जैसे छुरी से काटा गया हो ऐसे चोर के बंधन टुट गये ॥५३७॥

मराठी :- असे म्हणून दमयंतीने चोराला शीलाचे माहात्म्य ऐकविले. लगेच काही जणू चाकूने कापल्यासारखे चोराचे बंधन तुटून गेले। ॥५३७॥

English :- Saying thus Damyanti explained to him the efficacy and glory of a modest and an urbane behaviour. Suddenly he was free from captivity and bondage as though his ties were cut out with a knife.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदैव विरलीभूता-स्तलारक्षा अपि द्रुतम् ॥
निशान्तेऽर्ककरास्फोटवेलायामिव तारकाः ॥५३८॥

अन्वय :- तदैव निशान्ते अर्ककरास्फोटवेलायां तारकाः इव तलरक्षाः अपि द्रुतं विरलीभूताः॥५३८॥

विवरणम् :- तदा एव तस्मिन्नेव समये निशायाः रात्र्याः अन्तः निशान्तः तस्मिन् निशान्ते। अर्कस्य सूर्यस्य कराः अर्ककराः। अर्ककराणां स्फोटः प्रादुर्भावः अर्ककरास्फोटः। अर्ककरास्फोटस्य वेला अर्ककरास्फोटवेला तस्याम् अर्ककरास्फोटवेलायाम् अरुणोदय-समये तारकाः इव तलस्य रक्षाः तलरक्षाः अपि द्रुतं झटिति न विरलाः अविरलाः अविरलाः विरलाः भूता विरलीभूताः। यथा अरुणोदयसमये तारकाः विरलीभवन्ति तथा शीलप्रभावश्रावणे तलरक्षाः अपि शीघ्रं विरलीभूताः ॥५३८॥

सरलार्थ :- तदैव यथा निशान्ते अरुणोदयसमये तारकाः द्रुतं विरलीभवन्ति। तथा तलरक्षाः अपि शीलप्रभावश्रावणे बन्धनत्रोटनात् अनंतरं विरलाः अभवन् ॥५३८॥

ગુજરાતી :- પછી તે જ વખતે, રાત્રિ વીત્યા બાદ સુર્યના કિરણો ફેલાતી વખતે જેમ તારાઓ અદશ્ય થઈ જાય છે, તેમ પોલીસના માણસો પણ તુરત અદશ્ય થઈ ગયા. ॥૫૩૮॥

हिन्दी :- उसी वक्त रात बीतने पर सूर्यकिरण आकाश में फैलते ही जैसे तारे अदृश्य होते है, वैसे सिपाही अदृश्य हो गये ॥५३८॥

मराठी :- त्याच वेळी रात्र संपल्यानंतर अरूणोदयाच्या वेळी ज्याप्रमाणे तारे अदृश्य होतात, त्याचप्रमाणे शिपाईसुद्धा लगेच अदृश्य झाले. ॥५३८॥

English :- Just as after the night has passed off and the sun rises, spreading its rays all around and makes the stars to disappear in the same way the soldiers dissappeared.

P.P. Ac Gunratnasuri M.S.

Jun Gun Aaradhak Trust

तेनाश्चर्येण राजापि तत्राहूत इवागमत् ॥
विस्मयस्मेरनेत्राब्जस्तामवादीच्च धार्मिकीम् ॥५३९॥

अन्वय :- विस्मयस्मेरनेत्राब्जः राजा अपि तेन आश्चर्येण तत्र आहूतः इव आगमत्। तां धार्मिकीम् अवादीत् च ॥५३९॥

विवरणम् :- विस्मयेन स्मेरे विकसिते विस्मयस्मेरे, नेत्रे एव अब्जे नेत्राब्जे। विस्मयस्मेरे नेत्राब्जे यस्य सः विस्मयस्मेरनेत्राब्जः। आश्चर्येण विकसितनयनकमलः राजा अपि तेन आश्चर्येण तत्र तस्मिन् स्थाने आहूतः आकारितः इव आगमत् आगच्छत् तां धार्मिकीं धर्माचरणवतीं दमयन्तीम् अवादीत् अवदत् ॥५३९॥

सरलार्थ :- विस्मयेन विकसितनयनकमलः नृपः अपि तेन आश्चर्येण तस्मिन् स्थाने आकारितः इव आगच्छत् तां धार्मिकीं दमयन्तीम् अवदत् ॥५३९॥

ગુજરાતી :- તે આશ્ચર્યે જાણે બોલાવ્યો ન હોય તેમ રાજા પણ ત્યાં આવી પહોંચ્યો, અને તે આશ્ચર્યથી વિકસીત નેત્રે ધર્મિષ્ઠ દમયંતીને જોતાં બોલ્યો કે-॥૫૩૯॥

हिन्दी :- उस आश्चर्यने मानो बुलाया न हो! ऐसे राजा भी वहाँ आ पहुँचा और उस आश्चर्य से जिसके नयनकमल विकसित हुए हैं, ऐसे उस राजाने धार्मिक दमयन्ती से कहा कि,

मराठी :- त्या आश्चर्याने जणु बोलाविलेला असा राजा पण तेथे येऊन पोहोचला आणि त्या आश्चर्याने ज्याचे नयन कमल विकसित झाले आहेत असा राजा धार्मिक दमयंतीला म्हणाला ॥५३९॥

English :- Suddenly the king arrived there which seemed that he was called there to give a testimony to this astoinishing incident, which made his eyes swell with wonder like a blooming lotus and he spoke to Damyanti

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरले न कृतंयुक्तं, चौररक्षा न युज्यते ॥
राजधर्मो ह्यसौ शिष्ट - पालनं दुष्टनिग्रहः ॥'५४०॥

अन्वय :- हे सरले! युक्तं न कृतम् । असौ चौररक्षा न युज्यते । तथाहि शिष्टपालनं दुष्टनिग्रहः राजधर्मः अस्ति ॥५४०॥

विवरणम् :- हे सरले! युक्तं योग्यं न कृतम् । असौ चौरस्य रक्षा चौररक्षा न युज्यते । योग्या नास्ति । तथा हि शिष्टानां पालनं शिष्टपालनं दुष्टानां निग्रहः दुष्टनिग्रहः च राज्ञः धर्मः राजधर्मः अस्ति ॥५४०॥

सरलार्थ :- हे सरले! त्वया युक्तं न कृतम् । असौ चौररक्षा न युज्यते । तथा हि शिष्टपालनं दुष्टनिग्रहः च राजधर्मः अस्ति ॥५४०॥

ગુજરાતી :- હે સરળસ્વભાવી ! તમોએ આ યોગ્ય કર્યું નથી, કેમ કે ચોરનું રક્ષણ ન કરવું જોઈએ. ઉત્તમનું પાલન કરવું અને દુષ્ટોનો નાશ કરવો, એ ખરેખર રાજાઓનો ધર્મ છે. ॥૫૪૦॥

हिन्दी :- "हे सरलस्वभावी! तुमने ये योग्य कार्य नहीं किया। चोर का रक्षण नही करना चाहिए, क्योंकि उत्तमों का पालन करना और दुष्टों का विनाश करना यह सचमुच राजाओं का धर्म है।"॥५४०॥

मराठी :- हे सरलस्वभाव असलेल्या देवि! तू हे योग्य केले नाही कारण चोराचे रक्षण करायला नको होते, उत्तमाचे पालन आणि दुष्टांचा विनाश करणे हे राजाचे कर्तव्य आहे. ॥५४०॥

English :- He said to Damyanti by addressing her as a soft-natured woman, that she has done an improper deed now, as it is against the law to protect a robbed and it is by virtue, the function a royal citizen to protect an innocent person or to send a person to the gallows, who has broken the law.

आत्मरक्षार्थिनो लोकाः, करं यच्छन्ति भूभुजे ।
रक्षा च जायते तेषां, तस्करादिविनिग्रहे ॥५४१॥

अन्वय :- आत्मरक्षार्थिनः लोकाः भूभुजे करं यच्छन्ति। तस्करादिविनिग्रहे तेषां रक्षा जायते ॥

विवरणम् :- *आत्मनः रक्षा आत्मरक्षा। आत्मरक्षां यन्ते इति आत्मरक्षार्थिनः आत्मरक्षाकाङ्क्षिणः लोकाः जनाः भुवं भुनक्ति भुङ्क्ते वा भूभुक् तस्मै भूभुजे नृपाय करं यच्छन्ति। तस्करः चोरः आदौ येषां ते तस्करादयः। तस्करादीनां विनिग्रहः तस्करादिविनिग्रहः तस्मिन् तस्करादिविनिग्रहे। तेषां लोकांना रक्षा जायते। तस्करादिभ्यः दण्डप्रदानेन।*

सरलार्थ :- आत्मरक्षाकाङ्क्षिणः लोकाः नृपाय करं यच्छन्ति। चौरादिविनिग्रहे तेषां लोकांना रक्षा जायते ॥५४१॥

गुजराती :- પોતાના રક્ષણને માટે જ લોકો રાજાઓને કર આપે છે, અને ચોરઆદિને શિક્ષા કરવાથી જ લોકોનું રક્ષણ થઈ શકે છે. ॥૫૪૧॥

हिन्दी :- खुद के रक्षण के लिये ही लोग राजा को कर देते है और चोर आदि को सजा दिलाने से ही लोगों का रक्षण हो सकता है ॥५४१॥

मराठी :- स्वतःच्या रक्षणाकरिता लोक राजाला कर देतात आणि चोर इत्यादींना शिक्षा दिल्यानेच लोकांचे रक्षण होऊ शकते. ॥५४१॥

English :- The people make kings in order that they are protected and to protect them from robbers by punishing them.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निगृह्यन्ते न चेच्चौरा-दयः कृतकृपैर्नृपैः ॥
स्थलेऽपि वारुणीनीति-रम्भस्यिव भवेत्तदा ॥५४२॥

अन्वय :- कृतकृपैः नृपैः चौरादयः न निगृह्यन्ते चेत् ततः स्थले अपि अम्भसि इव वारुणीनीतिः भवेद् ॥५४२॥

विवरणम् :- कृता कृपा दया यैः ते कृतकृपाः तैः कृतकृपैः व्रन् पान्ति इति नृपाः तैः नृपैः भूपैः चौरः आदौ यैषां ते चौरादयः स्तेनादयः न निगृह्यन्ते न दण्ड्यन्ते चेत्-ततः स्थले भूभ्याम् अपि अम्भसि जले इव वरुणस्य इयं वारुणी वारुणी चासौ नीतिश्च वारुणीनीतिः भवेत् । अम्भसि यथा बलवन्तः मत्स्याः अबलांन् मत्स्यान् खादन्ति परं न दण्ड्यन्ते तथा वारुणीनीतिः मत्स्यन्यायः भूतले अपि स्यात्॥५४२॥

सरलार्थ :- कृतकृपैः नृपैः स्तेनादय; न दण्ड्यन्ते चेत् ततः अम्भसि इव वारुणीनीतिः भूतले अपि स्यात् ॥५४२॥

ગુજરાતી :- રાજાઓ જો દયા લાવીને ચોર આદિને શિક્ષા ન કરે, તો મહાસાગર આદિ જલાશયોમાં 'ગલાગલમચ્છ'ની જે જલનીતિ ચાલી રહી છે, એવી જ નીતિ આ પૃથ્વી પર પણ ચાલુ થઈ જાય. ॥૫૪૨॥

हिन्दी :- राजालोग अगर चोर आदि को सजा न दें तो महासागर आदि जलाशयों मे गलागलमच्छ की चली आई नीति ही इस पृथ्वी पर भी चालू हो जायेंगी। ॥५४२॥

मराठी :- राजांनी जर दया दाखवून चोर इत्यादीनां शिक्षा दिली नाही तर महासागर इत्यादी जलाशयांमध्ये असणाऱ्या गलागल मत्स्यांची जी जलनीति चालत आली आहे. ती नीति या पृथ्वीवर ही चालू होऊन जाईल. ॥५४२॥

English :- He continues that if the king does'nt punish a robber than it will be like the fishes who eat the small ones in an ocean or in a sea and are not checked.

P.P. Ac. Gunratnasuri M.S. Jun Gyanmandir, Surat

भैम्याहाऽ न्यायिनामेव, स्यात्तात शरणार्थिता ।।
रक्ष्यतेऽत्र निजेनैव, न्यायेन न्यायिनः पुनः ।।५४३।।

अन्वय :- भैमी आह तात। अन्यायिनाम् एव शरणार्थिता स्यात्। न्यायिनः पुनः निजेन न्यायेन एव अत्र रक्ष्यन्ते ।।५४३।।

विवरणम् :- भीमस्य अपत्यं स्त्री भैमी दमयन्ती आह ब्रवीति-हे तात! न्यायः एषाम् अस्ति इति न्यायिनः। न न्यायिनः अन्यायिनः तेषाम् अन्यायिनाम्, एव शरणम् यन्ते इति शरणार्थिनः। शरणार्थिनां भावः शरणार्थिता स्यात्। न्यायिनः पुनः निजेन स्वेन न्यायेन एव अत्र रक्ष्यन्ते ।।५४३।।

सरलार्थ :- दमयन्ती ब्रवीति हे तात! अन्यायिनाम् एव शरणार्थिता स्यात्। न्यायिनः पुनः स्वन्यायेन एव अत्र रक्ष्यन्ते ।।५४३।।

ગુજરાતી :- ત્યારે દમયંતીએ કહ્યું કે, હે પિતાજી! આ જગતમાં અન્યાય કરનારાઓ જ શરણની યાચના કરે છે, અને ન્યાય કરનારાઓનું તો પોતાના ન્યાયથી જ રક્ષણ થાય છે. ।।૫૪૩।।

हिन्दी :- तब दमयंती ने कहा कि, हे पिताजी! इस जगत में अन्याय करनेवाले ही शरण की याचना करते हैं, और न्याय करनेवालों का तो खुद के न्याय से ही रक्षण हो जाता है ।।५४३।।

मराठी :- तेव्हा दमयंतीने म्हटले की, हे तात! या जगामध्ये अन्याय करणाराच आश्रयाची याचना करतो आणि न्याय करणाऱ्यांचे तर स्वत:च्या न्यायानेच रक्षण होऊन जाते.।।५४३।।

English :- Then Damyanti addressing the king as a father said to him that a person who does unlawful deeds only will appeal and plead for mercy. And a person who judges will only be able to protect such people by doing proper justice.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दयाप्रेरितया चैत-त्तात तावन्मया कृतम् ॥
तदेतस्यापराधोऽयं, तातेन क्षम्यतां मम ॥५४४॥

अन्वय :- हे तात! दयाप्रेरितया मया तावत् एतत् कृतम्। तत् मम तातेन एतस्य अयम् अपराधः क्षम्यताम् ॥५४४॥

विवरणम् :- *हे तात! दयया प्रेरिता दयाप्रेरिता, तया दयाप्रेरितया मया तावत् एतत् कृतम्। तत् मम तातेन जनकेन एतस्य चौरस्य स्तेनस्य अयम् अपराधः क्षम्यताम् ॥५४४॥*

सरलार्थ :- हे तात! दयाप्रेरितया मया तावत् एतत् कृतम्। तत् मम जनकेन एतस्य चौरस्य अयम् अपराधः क्षम्यताम् ॥५४४॥

ગુજરાતી :- હે પિતાજી! દયાથી પ્રેરાઈને મેં આ કાર્ય કર્યું છે, માટે આપ પિતાજીએ મારા આ અપરાધની ક્ષમા કરવી. ॥૫૪૪॥

हिन्दी :- हे पिताजी! दया से प्रेरित होकर मैंने यह कार्य किया है। इसलिये पिताजी आप मेरे इस अपराध को क्षमा करें ॥५४४॥

मराठी :- अहो तात! दयेने प्रभावित होऊन मी हे कार्य केले आहे. म्हणून आपण चोराच्या या अपराधाची क्षमा करावी. ॥५४४॥

English :- So she says that she was over come with pitiable feelings that has made her to do such a deed so she askes him, by addressing him as a father, to forgive this offence and delinquency of hers.

ततस्तदुपरोधेन, चौरो राज्ञाप्यमुच्यत ॥
दाक्षिणस्य प्ररूढस्य, न किञ्चिदपि दुष्करम् ॥५४५॥

अन्वय :- ततः तदुपरोधेन राज्ञा अपि चौरः अमुच्यत। प्ररूढस्य दाक्षिण्यस्य किञ्चिद् अपि दुष्करं न ॥५४५॥

विवरणम् :- *ततः तदनन्तरं तस्याः दमयन्त्याः उपरोधः आग्रहः तदुपरोधः; तेन तदुपरोधेन दमयन्त्याः आग्रहेण राज्ञा नृपेण अपि चौरः अमुच्यत। अत्यज्यत। प्रकर्षेण रूढस्य प्ररूढस्य वृद्धिङ्गतस्य दाक्षिण्यस्य औदार्यस्य किञ्चिद् अपि दुःखेन क्रियते इति दुष्करं न ॥५४५॥*

सरलार्थ :- तदनन्तरं दमयन्त्याः आग्रहेण नृपेण अपि चौरः अमुच्यत। प्ररूढस्य दाक्षिण्यस्य किञ्चिद् अपि दुष्करं न ॥५४५॥

ગુજરાતી :-પછી તે દમયંતીના કહેવાથી રાજાએ પણ ચોરને છોડી દીધો. કેમ કે વૃદ્ધિ પામેલી દાક્ષિણ્યતા ને માટે કંઈ પણ કાર્ય મુશ્કેલ નથી. ॥૫૪૫॥

हिन्दी :- फिर दमयन्ती के अनुरोध से राजाने भी चोर को छोड दिया। क्योंकि बढती हुई दाक्षिण्यता के लिये कोई भी कार्य मुश्किल नहीं है। ॥५४५॥

मराठी :- नंतर दमयंतीच्या आग्रहाने राजाने पण चोराला सोडून दिले, कारण वृद्धी पावलेल्या दाक्षिण्याला कोणते ही काम कठीण नाही. ॥५४५॥

English :- Then the king set the robber free due to Damyanti's continues yieldings. As it is not difficult for a king to do such deeds only if feelings of forgiveness and compassion is germinated in him.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तस्करोऽपि विमुक्तस्तां, वैदर्भीं प्राणदानतः ॥
जननीमिव मन्वानः, प्राणंसीत्प्रतिवासरम् ॥५४६॥

अन्वय :- विमुक्तः तस्करः अपि प्राणदानतः तां वैदर्भीं जननीम् इस मन्वानः प्रतिवासरं प्राणंसीत् ॥५४६॥

विवरणम् :- *विमुक्तः तस्करः चौरः अपि प्राणानां दानं प्राणदानं तस्मात् प्राणदानतः तां विदर्भस्य ईश्वरः वैदर्भः वैदर्भस्य अपत्यं स्त्री वैदर्भी तां वैदर्भीं दमयन्तीं जननीं मातरम् इव मन्वानः वासरे वासरे प्रतिवासरं प्रतिदिनं प्राणंसीत् प्राणमत् ॥५४६॥*

सरलार्थ :- विमुक्तः चौरः अपि जीवदानात् तां दमयंतीं मातरम् इव मन्वानः प्रतिदिनं प्राणमत् ॥५४६॥

ગુજરાતી :- પછી છૂટો થયેલા તે ચોર પણ પ્રાણદાન આપનારી તે દમયંતીને માતાની પેઠે માનતો હમેશા નમસ્કાર કરતો હતો. ॥૫૪૬॥

हिन्दी :- फिर मुक्त हुआ वह चोर भी प्राणदान (जीवनदान) देनेवाली दमयन्ती को माता के समान मानकर हमेशा प्रणाम करने लगा॥ ॥५४६॥

मराठी :- नंतर मुक्त झालेला तो चोरसुद्धा प्राण वाचविणाऱ्या दमयंतीला आई समान समजून नेहमी नमस्कार करू लागला. ॥५४६॥

English :- Then the robber who was set free, began taking Damyanti as a mother who had rescued him from the clutches of death, began saluting her and paid obeisance to her off and on.

पाटच्चरचरं भैमी, तमप्राक्षीत् परेद्यवि ।।
कोऽसि त्वं कस्य वा भद्र, कुतो वा यातवानसि ।।५४७।।

अन्वय :- परेद्यवि भैमी तं पाटच्चरचरम् अप्राक्षीत् । हे भद्र! त्वं कः असि। कस्य वा कुतः वा यातवान् असि।।५४७।।

विवरणम् :- परेद्यवि परस्मिन् दिने भीमस्य अपत्यं स्त्री भैमी दमयन्ती तं पाटच्चरचरं चौरम्-अप्राक्षीत् अपृच्छत् - हे भद्र! त्वं कः असि? कस्य वा? कुतः कस्मात् स्थानात् कुत्र यातवान् असि ।।५४७।।

सरलार्थ :- परस्मिन् दिवसे दमयन्ती तं चोरम् अपृच्छत् हे भद्र! त्वं कः असि? कस्य वा कस्मात् स्थानात् कुत्र यातवान् असि ।।५४७।।

ગુજરાતી :- પછી એક દિવસે દમયંતીએ તે ચોરને પૂછ્યું કે, હે ભદ્ર! તું કોણ છે? કોનો સંબંધી છે અને ક્યાંથી ક્યાં જાય છે? ।।५४७।।

हिन्दी :- फिर एक दिन दमयन्ती ने उस चोर से पूछा कि, "हे भद्र! तू कौन है? किस का रिश्तेदार है? तू कहाँ से कहाँ जा रहा है?"।।५४७।।

मराठी :- नंतर एके दिवशी दमयंती ने त्या चोराला विचारले- "हे भद्र! तू कोण आहे? कोणाचा (संबंधी) नातेवाईक आहे? आणि तू कोठून कोठे जात आहे?"।।५४७।।

English :- Then one day Damyanti asked the robber to give his identity or if he had any relations around and where had he decided to go from there.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽभ्यधात्तापसपुरे, तापसप्रतिबोधजे ॥
वसन्तसार्थवाहोऽस्ति, दासस्तस्यास्मि पिङ्गलः ॥५४८॥

अन्वय :- सः अभ्यधात्-तापसप्रतिबोधजे तापसपुरे वसन्तसार्थवाहः अस्ति तस्य दासः पिङ्गलः अस्मि ॥५४८॥

विवरणम् :- *सः स्तेनः अभ्यधात् अवदत्-तापसानां प्रतिबोधः तापसप्रतिबोधः । तापसप्रतिबोधात् जायते इति तापसप्रतिबोधजः, तस्मिन् तापसप्रतिबोधजे तापसपुरे-सार्थं वहति इति सार्थवाहः वसन्त-श्रासौ सार्थवाहश्च बसन्तसार्थवाहः अस्ति। तस्य वसन्तसार्थवाहस्य दासः पिङ्गलः अस्मि ॥५४८॥*

सरलार्थ :- सः चौरः अवदत् तापसप्रतिबोधजे तापसपुरे वसन्तसार्थवाहः अस्ति। तस्य दासः पिङ्गलः अस्मि ॥५४८॥

ગુજરાતી :- ત્યારે તે ચોરે કહ્યું કે, તાપસોને પ્રતિબોધવાથી વસેલા તાપસપુર નામના નગરમાં વસંત નામનો સાર્થવાહ વસે છે, અને તેનો હું પિંગલ નામનો કિંકર છું. ॥૫૪૮॥

हिन्दी :- तब उस चोरने कहा कि, "तापसों के प्रतिबोध से बसे हुए तापसपुर नामक नगर में वसंत नामक सार्थवाह रहता है और उसका मैं पिंगल नामक किंकर हूँ। (दास हूँ)॥५४८॥

मराठी :- तेव्हा तो चोर म्हणाला- "तापसाच्या प्रतिबोधाने वसलेल्या तापसपुर नावाच्या नगरामध्ये वसंत नावाचा सार्थवाह राहतो. त्याचा मी पिंगल नावाचा किंकर आहे." (दास आहे) ॥५४८॥

English :- The robber replied that he was a bondman named Pingal in a city named Tapaspur build by hermits performing religious austerities and penences, under a chief named Vasant.

द्यूतादिव्यसनासक्तः, खात्रपातेन पातकी ।।
तस्यैव स्वामिनो गेहाद् - गेहसर्वस्वमाददे ।।५४९।।

अन्वय :- द्यूतादिव्यसनासक्तः खात्रपातेन पातकी तस्यैव स्वामिनो गेहाद् गेहसर्वस्वम् आददे ।।

विवरणम् :- द्यूतम् आदौ येषां तानि द्यूतादीनि। द्यूतादीनि च तानि व्यसनानि च द्यूतादिव्यसनानि। द्यूतादिव्यसनेषु आसक्तः द्यूतादिव्यसनासक्तः, खात्रस्य पातः खात्रपातः तेन खात्रपातेन, पातकम् अस्य अस्ति इति पातकी पापी तस्य एव स्वामिनः गेहात् गृहात् सर्वं च तद् स्वं च सर्वस्वम्। गेहे सर्वस्वं गेहसर्वस्वम् । आददे अगृह्णाम् ।।५४९।।

सरलार्थ :- यूतादिव्यसनासक्तः खात्रपातेन पातकी तस्यैव स्वामिनः गृहात् गेहे सर्वस्वम् अगृह्णाम् ।।५४९।।

ગુજરાતી :- વળી હું જુગાર આદિ વ્યસનોમાં આસક્ત થઈને ખાતરો પાડીને પાપો કરતો હતો. વળી તે જ સાર્થવાહ શેઠના ઘરમાંથી મેં તેના ઘરનું સઘળું દ્રવ્ય ચોરી લીધું હતું. ।।૫૪૯।।

हिन्दी :- और मैं जुगार आदि व्यसनों में आसक्त होकर अनेक पाप करता था और वही सार्थवाह शेठ के घरमें से मैने उनका सारा द्रव्य चुरा लिया था।।५४९।।

मराठी :- आणि मी जुगार इत्यादी व्यसनांमध्ये आसक्त होऊन चोरी करण्याचे पाप करीत होतो, त्याच सार्थवाह सावकाराच्या घरातून त्याचे सर्व धन चोरले होते. ।।५४९।।

English :- He continued that he was in a habit of gambling and also had other bad vices. One day he broke into the chief Vasant's house and robbed away all his money.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

लोप्त्रहस्तस्ततो नश्यन्, मुषितः परमोषिभिः ॥
स्वामिद्रोहार्जितं द्रव्यं, भोक्तुं किमिह लभ्यते ॥५५०॥

अन्वय :- ततः लोप्त्रहस्तः नश्यन् परमोषिभिः मुषितः । स्वामिद्रोहार्जितं द्रव्यं किम् इह भोक्तुं लभ्यते ॥५५०॥

विवरणम् :- *ततः तदनन्तरं लोप्त्रं चोरितं धनं हस्ते यस्य सः लोप्त्रहस्तः चोरितं धनं गृहीत्वा नश्यन् पलायमानः अहं मुष्णन्ति इत्येवंशीलाः मोषिणः चौराः परे च ते मोषिणश्च परमोषिणः परचौराः तैः परमोषिभिः अपरैः चौरैः मुषितः चोरितः । स्वामिने द्रोहः स्वामिद्रोहः स्वामिद्रोहेण अर्जितं स्वामिद्रोहार्जितं द्रव्यं धनं किम् इह अस्मिन् भवे भोक्तुं लभ्यते प्राप्यते ॥५५०॥*

सरलार्थ :- तदनन्तरं चोरितधनहस्तः नश्यन् अपरैः चौरैः चोरितः । स्वामिद्रोहार्जित धनं किम् अस्मिन् भवे भोक्तुं लभ्यते ॥५५०॥

गुजराती :- પછી ત્યાંથી તે મુદ્દામાલસહીત નાસતો હતો, એવામાં મને બીજા લુંટારાઓએ લૂંટી લીધો. કેમકે પોતાના શેઠનું બૂરું કરીને મેળવેલું દ્રવ્ય શું આ જગતમાં ભોગવી શકાય છે? ॥૫૫૦॥

हिन्दी :- फिर वहाँ से मुद्देमालसहित भागते हुऐ दूसरे लूटेरो ने मुझे लूट लिया। क्योंकि अपने मालिक का द्वेष कर के प्राप्त किया हुए धन क्या इस जगत में कोई भोग सकता है ? ॥५५०॥

मराठी :- नंतर तेथून मुद्देमालासहित पळत असतांना दुसऱ्या लुटेऱ्यांनी मला लुटून घेतले, कारण स्वत:च्या शेठजीचे वाईट करून मिळविलेली संपत्ती काय या जगात उपभोगू शकतो? ॥५५०॥

English :- Then as he was on his way to some other city, he was robbed and looted of all his (Vasant's) money. Will a man be sucessful by robbing his masters wealth?

इहागत्य ततो मातः, प्रारेभे सेवितुं नृपम् ॥
समूलकाषं कषति, दारिद्र्याद्रिं स एव यत् ॥५५१॥

अन्वय :- ततः हे मातः! इह आगत्य नृपं सेवितुं प्रारेभे। यत् स एव दारिद्र्याद्रिं मूलकाषं-कषति।

विवरणम् :- *ततः तदनन्तरं हे मातः। इह अस्मिन् नगरे आगत्य आधाय नून् पाति इति नृपः तं नृपं सेवितुं तस्य सेवां कर्तुं प्रारेभे। यत् सः नृपः एव दारिद्र्यम् एव अद्रिः पर्वतः दारिद्र्याद्रिः तं दारिद्र्याद्रिं दारिद्र्यपर्वन्तं मूलेन सह समूलं कषति समूलकाषं कषति समूलं कषति ॥५५१॥*

सरलार्थ :- तस्मात् हे मातः। अस्मिन् नगरे आगत्य नृपं सेवितुं प्रारेभे। यत् सः नृपः एव दारिद्र्यपर्वन्तं समूलं कषति ॥५५१॥

गुजराती :- પછી હે માતાજી! અહીં આવીને હું રાજાની સેવા કરવા લાગ્યો, કેમકે રાજા (આ જગતમાં) દરિદ્રતારૂપી પર્વતને છેક મૂળમાંથી જ ઉખેડી નાખે છે. ॥૫૫૧॥

हिन्दी :- "फिर हे माताजी! यहाँ आ कर मैं राजा की सेवा करने लगा, क्योंकि राजा ही इस जगत में दरिद्रतारूपी पर्वत को जड से उखाड देता है।"॥५५१॥

मराठी :- "मंतर हे मातोश्री! येथे येऊन मी राजाची सेवा करू लागलो, कारण राजाच या जगामध्ये दारिद्र्यरूपी पर्वताला पार मूळापासूनच उपटून टाकतो.॥५५१॥

English :- Then he says that he came to the king and began serving him. As only a king who is like a mountain, can uproot poverty stricken and penurious circumstances.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्रान्यदा चन्द्रवत्या-भरणानां करण्डिका ॥
दृष्टा च चलितं चित्तं, स्वभावो बलवान् खलु ॥५५२॥

अन्वय :- तत्र अन्यदा चन्द्रवत्याभरणानां करण्डिका दृष्टा चित्तं च चलितम् । स्वभावः बलवान् अस्ति खलु ॥५५२॥

विवरणम् :- तत्र तस्मिन् स्थाने अन्यदा अन्यस्मिन् दिवसे चन्द्रावत्याः आभरणानि आभूषणानि चन्द्रावत्याभरणानि तेषां चन्द्रावत्याभरणानां करण्डिका दृष्टा अवलोकिता चित्तं मनः चलितं चञ्चलं भूतम् । स्वस्य भावः स्वभावः बलम् अस्य अस्ति इति बलवान् अस्ति खलु ॥५५२॥

सरलार्थ :- तत्र अव्यस्मिन् दिने चन्द्रवत्याभूषणानां करण्डिका अवलोकिता । मनः चञ्चलम् अभूत् । स्वभावः बलवान् अस्ति खलु ॥५५२॥

ગુજરાતી :- ત્યા એક વાર મેં ચંદ્રવતી રાજકુમારીના આભૂષણોનો ડાબલો જોયો, અને તેથી મારું મન ચલાયમાન થઈ ગયું, કેમ કે માણસને પડેલી બુરી આદત નિશ્ચયે જ બળવાન છે. ॥૫૫૨॥

हिन्दी :- "वहाँ एक बार मैंने चंद्रवती राजकुमारी के आभूषणों का (अलंकारों का) डिब्बा देखा, और उससे मेरा मन चलायमान हो गया, क्योंकि इन्सान को पडी हुई बुरी आदत निश्चित ही बलवान है।"॥५५२॥

मराठी :- "तेथे एकदा मी चंद्रवती राजकुमारीच्या दागिन्यांचा डबा पाहिला, आणि त्याने माझे मन विचलित झाले, कारण स्वभाव हा निश्चितच बलवान आहे."॥५५२॥

English :- One day, there he happened to see a case of glamourous finery belonging to Princess Chandravanti and his mind turning crafty, attained fraudulency as one's bad habits is bound to be victorious after a lapse of time.

अपाहरमहं तां च, कपिः श्रेणिकहारवत् ॥
अथ संवीतसर्वाङ्गो, निरगच्छमनुत्सुकः ॥५५३॥

अन्वय :- कपिः श्रेणिकहारवत् अहं ताम् अपाहरम् । अथ संवीतसर्वाङ्गः अनुत्सुकः निरगच्छम् ॥५५३॥

विवरणम् :- कपिः वानरः श्रेणिकस्य हारः श्रेणिकहारः तं श्रेणिकहारं यथा अपाहरत् तथा अहं तां रत्नकरण्डिकाम् अपाहरम् अचोरयम् । अथ सर्वाणि च तानि अङ्गानि च सर्वाङ्गानि । संवीतानि सर्वाङ्गानि येन सः संवीतसर्वाङ्गः आच्छादितसर्वावयवः न उत्सुकः अनुत्सुकः निरगच्छम् ॥५५३॥

सरलार्थ :- यथा वानरः श्रेणिकस्य हारम् अचोरयत् । तथा अहं तां रत्नकरण्डिकाम् अपाहरम् । अथ परिहितसर्वाङ्गः उत्सुकतारहितः निरगच्छम् ॥५५३॥

ગુજરાતી :- પછી વાનરે જેમ શ્રેણિકરાજાના હારનું હરણ કર્યું હતું, તેમ મેં તે આભૂષણોના ડાબલાનું હરણ કર્યું, પછી સઘળાં અંગોપાંગો ઢાંકીને નિર્ભય થઈને ત્યાંથી હું નીકળ્યો. ॥૫૫૩॥

हिन्दी :- "फिर बंदर ने जैसे श्रेणिकराजा का हार चुराया था, वैसे मैंने उस अलंकारों के डिब्बे का हरण किया, फिर सभी अंगोपागों को ढककर निर्भय बनकर वहाँ से मैं निकला।"॥५५३॥

मराठी :- "नंतर माकडाने जसे श्रेणिकराजाचा हार हरण केला होता. तसेच मी त्या दागिन्यांचा डबा हरण केला. नंतर सर्व अंगोपांगांना झाकून निर्भयपणाने तेथून मी निघून गेलो." ॥५५३॥

English :- Then as the monkey had robbed the necklace of king Sherinik in the same way he robbed the box of ornaments and covering himself well, gathered courage and left the place.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इङ्गिताकारविज्ञेन, विज्ञातोऽस्मि महीभुजा ।।
चतुराः किं न जानन्ति, यद्वा चातुर्यचर्यया ।।५५४।।

अन्वय :- इङ्गिताकारविज्ञेन महीभुजा विज्ञातः अस्मि । यद्वा चातुर्यचर्यया चतुराः किं न जानन्ति ।।५५४।।

विवरणम् :- *इङ्गितं च आकारश्च इङ्गिताकारौ इङ्गिताकारौ विजानाति इति इङ्गितकारविज्ञः तेन इङ्गिताकारविज्ञेन महीं भुनक्ति भुङ्क्ते वा महीभुक् तेन महीभुजा विज्ञातः अवबुद्धः अस्मि । यद्वा अथवा चातुर्यस्य चर्या चातुर्यचर्या तया चातुर्यचर्यया चतुराः किं न जानन्ति विदन्ति अर्थात् सर्वम् जानन्ति इत्यर्थः।।५५४।।*

सरलार्थ :- इङ्गिताकारविज्ञेन नृपेण अवबुद्धः अस्मि । अथवा चातुर्यचर्यया चतुराः किं न जानन्ति ।।५५४।।

गुजराती :- ચાલચલગત તથા ચહેરા આદિની પરીક્ષા કરનારા રાજાએ મને (ચોર તરીકે) જાણી લીધો, કેમ કે હોશિયાર માણસો પોતાની હોશિયારીથી શું નથી જાણી શકતા? ।।૫૫૪।।

हिन्दी :- "चाल और चेहेरा आदि की परीक्षा करनेवाले राजा ने मुझे (चोर के रुप में) पहचान लिया. क्योंकि चालाक आदमी अपनी खुद की चालाकी से, क्या नही जान सकता?"।।५५४।।

मराठी :- "अभिप्राय आणि आकार जाणणाऱ्या राजाने मला चोराप्रमाणे ओळखून घेतले, कारण हुशार मनुष्य स्वत:च्या हुशारीने काय जाणून घेत नाही?"।।५५४।।

English :- But due to his walking style and his face which were filled with scars of fright, the king suspected something fishy. A man who is sharp can of course suspect ingenuity through his sharpness.

नृपादिष्टनरैश्चाशु, कृपाणैरिव मूटकः ॥
बद्ध्वा वध्यभुवं नीय-मानस्त्वामहमैक्षिषि ॥५५५॥

अन्वय :- आशु नृपादिष्टैः नरैः मूटकः इव बद्ध्वा कृपाणैः हन्तुं वध्यभुवं नीयमानः अहं त्वाम् ऐक्षिषि ॥५५५॥

विवरणम् :- *आशु शीघ्रं नृपैः आदिष्टाः नृपादिष्टाः तैः नृपादिष्टैः नृपाज्ञप्तैः नरैः मनुष्यैः मूटकः इव काष्ठभारः इव बद्ध्वा कृपाणैः खड्गैः हन्तुं मारयितुं वधम् अर्हन्ति इति वध्याः वध्यानां भूः वध्यभूः तां वध्यभुवं नीयमानः अहं त्वाम् ऐक्षिषि॥ ऐक्षे॥५५५॥*

सरलार्थ :- शीघ्रं नृपाज्ञप्तैः नरैः काष्ठभारः इव बद्ध्वा खड्गैः हन्तुं वध्यभुवं नीयमानः अहं त्वाम् ऐक्षे ॥५५५॥

ગુજરાતી :- પછી તુરત જ રાજાની આજ્ઞાથી પોલીસના માણસોએ મને ભારાની પેઠે બાંધીને તલવારથી મારવા માટે વધ કરનાની જગાએ લઈ જતા હતા એવામાં મને તમારું દર્શન થયું. ॥૫૫૫॥

हिन्दी :- "फिर तुरन्त ही राजा की आज्ञा से शिपाही मुझे लकडियों के गट्ठे की तरह बांधकर तलवार से मारने के लिये वध करने की जगह ले जा रहे थे इतने में मुझे आप के दर्शन हुए"॥५५५॥

मराठी :- "नंतर लगेच राजाच्या आज्ञेने शिपाई मला मोळीप्रमाणे बांधून तलवारीने मारण्यासाठी वध करण्याच्या ठिकाणी घेऊन जात होते. इतक्यात मला तुमचे दर्शन घडले."॥५५५॥

English :- Then atonce, the king ordered his men to tie him up and he was tied up like a raddish and was taken to the laniary (slaughter house) to be slaughted by swords. Just then he happened to see Damyanti.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रत्यभिज्ञातवांश्च त्वां, शरणं कृतवानहम् ।।
तदा च मे मृतस्येव, जीवातुस्त्वमजायथाः ।।५५६।।

अन्वय :- हे देवि! त्वां प्रत्यभिज्ञातवान् शरणं कृतवान्। तदा मृतस्य इव मे त्वं जीवातुः अजायथाः ।।५५६।।

विवरणम् :- हे देवि! त्वां प्रत्यभिज्ञातवान् अभिज्ञातवान् शरणंच कृतवान् अकरवम्। तदा तस्मिन् समये मृतस्य पञ्चत्वं गतस्य इव मे मम त्वं जीवातुः जीवनौषधम् अजायथाः।।५५६।।

सरलार्थ :- हे देवि! अहं त्वाम् अभिज्ञातवान् शरणम् च अकरवम्। तस्मिन् समये मृतस्य इव मम त्वं जीवनौषधम् अजायथाः ।।५५६।।

ગુજરાતી :- પછી મેં તમને ઓળખી લીધા, અને તેથી મેં તમારું શરણું લીધું અને તે વખતે મૃત્યુ પામેલા જેવા મને તમે જીવનદાન આપનારા થયા. ।।५५६।।

हिन्दी :- "फिर मैनें आप को पहचान लिया और मैने आप की शरण ली और उसी वक्त मृतप्राय मुझे आपने जीवनदान दिया।"।।५५६।।

मराठी :- "नंतर मी तुम्हाला ओळखले, आणि तुम्हाला शरण आलो, तेव्हां तुम्ही मरावयास टेकलेल्या मला जीवनदान दिले."।।५५६।।

English :- And he atonce recognised her. And then she pulled him out from the clutches of death.

अन्यच्च तापसपुरात् प्रोषितायामपि त्वयि ।
वसन्तो देवि नाभुङ्क्त विरक्त इव देहतः॥५५७॥

अन्वय :- अन्यत् च हे देवि! त्वयि तापसपुरात् प्रोषितायाम् अपि देहतः विरक्तः इव वसन्तः न अभुङ्क्त ॥५५७॥

विवरणम् :- अन्यत् च अपरञ्च हे देवि! त्वयि तापसानां पुरं तापसपुरं तस्मात् तापसपुरात् प्रोषितायां प्रस्थितायां सत्याम् अपि देहतः विरक्तः इव वसन्तः सार्थेशः न अभुङ्क्त-न भुक्तवान् ॥५५७॥

सरलार्थ :- अपरञ्च हे देवि! यदा त्वं तापसपुरात् प्रस्थिता। तदा देहतः विरक्त इव वसन्तः न अभुङ्क्त न अभक्षवत् ॥५५७॥

ગુજરાતી :- વળી હે દેવી! તમોએ તે તાપસનગર છોડ્યા બાદ તે વસંત સાર્થવાહ જાણે શરીરથી વિરક્ત થયો હોય તેમ તેણે ભોજન કર્યું નહીં. ॥૫૫૭॥

हिन्दी :- और हे देवी! आप के वह तापसनगर छोडने के पश्चात वह वसंत सार्थवाह मानो शरीर से विरक्त हुआ और उसने भोजन भी नहीं किया ॥५५७॥

मराठी :- ''आणि हे देवि! तुम्ही तापसनगर सोडून गेल्यानंतर तो वसंत सार्थवाह जणू शरीराने विरक्त झाला. त्याने भोजन केले नाही.''

English :- Then he said that Vasant the chief had not eaten food a though he had lost interest in worldly attachments, after Damyanti had left.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततस्तत्रत्यलोकेन, गुरुभिश्च कथञ्चन ॥
प्रबोध्य सप्तरात्रेण, भोजितोऽष्टमवासरे ॥५५८॥

अन्वय :- ततः तत्रत्य लोकेन गुरुभिः च कथञ्चन सप्तरात्रेण प्रबोध्य अष्टमवासरे भोजितः ॥५५८॥

विवरणम् :- *ततः तदनन्तरं तत्रभवः तत्रत्यः । तत्रत्यश्चासौ लोकश्च तत्रत्यलोकः तेन तत्रत्यलोकेन जनेन गुरुभिः; च कथञ्चन सप्तानां रात्रीणां समाहारः सप्तरात्रं तेन सप्तरात्रेण प्रबोध्य बोधं प्राप्य अष्टमश्चासौ वासरश्च दिवसश्च अष्टमवासरः, तस्मिन् अष्टमवासरे अष्टमदिवसे भोजितः॥५५८॥*

सरलार्थ :- ततः तत्रत्यजनेन गुरुभिः च कथञ्चन सप्तरात्रेन प्रबोध्य अष्टमवासरे भोजितः॥५५८॥

ગુજરાતી :- પછી ત્યાંના લોકોએ અને ગુરુમહારાજે ઘણા પ્રયાસે સાત રાત્રિ બાદ સમજાવીને આઠમે દિવસે તેને ભોજન કરાવ્યું. ॥૫૫૮॥

हिन्दी :- फिर वहाँ के लोगों ने और गुरुमहाराज ने बहुत प्रयासों से सात रात्रि के पश्चात समझा बुझाकर आँठवे दिन उन्हे भोजन कराया ॥५५८॥

मराठी :- नंतर तेथील लोकांनी आणि गुरुमहाराजांनीं सात रात्री त्याला खूप समजावून सांगितले व आठव्या दिवशी त्याला जेवण करविले.

English :- Then the people and the high-priest coaxed him up for seven days and on the eight day made him to have his food.

अन्यदा समुपादाय, प्राभृतानि बहूनि सः ॥
कूबरं कोशलाधीशं, गत्वानर्च नलानुजम् ॥५५९॥

अन्वय :- अन्यदा सः बहूनि प्राभृतानि समुपादाय नलानुजं कोशलाधीशं कूबरं गत्वा आनर्च ॥५५९॥

विवरणम् :- *अन्यदा एकस्मिन् दिने सः वसन्तसार्थेशः बहूनि प्राभृतकानि उपायनानि वस्तूनि समुपादाय गृहीत्वा अनुजायते इति अनुजः। नलस्य अनुजः नलानुजः तं नलानुजम्। कोशलायाः अधीशः कोशलाधीशः तं कोशलाधीशं कूबरं गत्वा आनर्च पूजयामास ॥५५९॥*

सरलार्थ :- एकस्मिन् दिने सः वसन्तसार्थेशः बहूनि प्राभृतकानि समुपादाय नलानुजं कोशलाधीशं कूबरं गत्वा आनर्च ॥५५९॥

गुजराती :- પછી એક દિવસ ધણી ભેટો લઈને તે વસંત સાર્થવાહ કોશલા નગરના સ્વામી કૂબર રાજા પાસે જઈને નલરાજાના નાના ભાઈ એવા તેની સેવા કરવા લાગ્યો. ॥૫૫૯॥

हिन्दी :- फिर एक दिन बहुत सारी भेट-सौगाद लेकर वह वसन्त सार्थवाह कोशला नगर के स्वामी नलराजा के छोटे भाई कूबर राजा के पास जाकर उनकी सेवा करने लगा ॥५९६॥

मराठी :- नंतर एक दिवशी खूप उपहार घेऊन तो वसंत सार्थवाह कोशल नगराचा स्वामी, नलराजाचा लहान भाऊ कूबर याच्याकडे गेला व त्याने कूबराचा सत्कार केला. ॥५५८॥

English :- Then one day the chief Vasant taking many gifts along with him went to the city of Koshala and served King Kubar wholeheartedly as he was the younger brother of King Nal.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽपि तस्मै तदा तुष्ट-स्तैस्तैर्दिव्यैरुपायनैः ॥
तमेव तापसपुरे, स्थापयामास भूपतिम् ॥५६०॥

अन्वय :- तदा तैः तैः दिव्यैः उपायनैः तस्मै तुष्टः सः अपि तापसपुरे तम् एव भूपतिं स्थापयामास ॥५६०॥

विवरणम् :- *तदा तस्मिन् समये तैः तैः दिव्यैः उपायनैः प्राभृतकैः तस्मै तुष्टः प्रसन्नः सः; कूबरनृपः अपि तापसानां पुरं तापसपुरं तस्मिन् तापसपुरे तम् एव वसन्तसार्थेशम् एव भुवः पतिः भूपतिः तं भूपतिं नृपं स्थापयामास अस्थापयत् ॥५६०॥*

सरलार्थ :- तस्मिन् समये तैः तैः दिव्यैः उपहारैः तस्मै प्रसन्नः सः कूबरः अपि तापसपुरे तं वसन्तसार्थवाहम् एव नृपम् अस्थापयत्। नृपं चकार॥५६०॥

ગુજરાતી :- તે વખતે તે ઉમદા ભેટોથી ખુશી થયેલા તે કૂબરરાજાએ પણ તે વસંત સાર્થવાહને જ તે તાપસનગરમાં રાજા તરીકે સ્થાપન કર્યો. ॥५६०॥

हिन्दी :- उस वक्त दिव्य भेटों से खुश हुए उस कूबरराजा ने वसंत सार्थवाह को ही तापसनगर में राजा के रूप में स्थापित किया॥५६०॥

मराठी :- तेव्हा त्या त्या दिव्य अशा भेटवस्तूंनी तो कूबर राजा वसंत सार्थवाहावर खूप प्रसन्न झाला आणि त्याने वसंत सार्थवाहालाच तापसपुर नगरात राजा बनविले. ॥५६०॥

English :- Kubar was overjoyed as many gifts were bestowed upon him and he proclaimed, the chief Vasant, as the King of Tapaspur.

वसन्तश्रीशेखर इत्य-भिधां च स दत्तवान् ॥
उपर्युपरि लभ्यन्ते-ऽनुकूले हि विधौ श्रियः ॥५६१॥

अन्वय :- सः वसन्तश्रीशेखरः इति अभिधां च दत्तवान् । विधौ अनुकूले हि उपरि उपरि श्रियः लभ्यन्ते ॥५६१॥

विवरणम् :- सः कूबरनृपः तस्य वसन्तश्रीशेखरः इति एवं अभिधां नाम च दत्तवान् अयच्छत् । विधौ दैव अनुकूले सति हि उपरि उपरि पुनः पुनः श्रियः लक्ष्म्यः लभ्यन्ते प्राप्यन्ते ॥५६१॥

सरलार्थ :- सः कूबरनृपः तस्य वसन्तशेखरः इति अभिधाम् अयच्छत् । भाग्ये अनुकूले सति हि पुनः पुनः श्रियः प्राप्यन्ते ॥५६१॥

ગુજરાતી :- વળી તે કૂબરે તેનું વસંતશ્રીશેખર નામ આપ્યું કેમ કે નસીબ અનુકૂળ હોય તો ઉપરાઉપર લક્ષ્મી પ્રાપ્ત થાય છે. ॥५६१॥

हिन्दी :- और उस कूबर ने उसको वसंतश्रीशेखर नाम दिया क्योंकि किस्मत अनुकूल हो तो लक्ष्मी पुनः पुनः प्राप्त होती है। ॥५६१॥

मराठी :- आणि त्या कूबराने त्याचे वसंतश्रीशेखर नांव ठेवले. कारण भाग्य अनुकूल असेल तर वरच्या वर लक्ष्मी प्राप्त होते. ॥५६१॥

English :- Then Kubar named him as Vasantshrishekar. If the Goddess of destiny is pleased then one can attain ample of wealth after reaching heights.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विसृष्टः कूबरेणाथ, निजं नगरमागमत् ॥
विधत्ते तत्र राज्यं स, त्वमिवामलधर्मधीः ॥५६२॥

अन्वय :- अथ कूबरेण विसृष्टः सः त्वम् इव अमलधर्मधीः निजं नगरम् आगमत्। तत्र राज्यं विधत्ते ॥५६२॥

विवरणम् :- *अथ कूबरेण नृपेण विसृष्टः मुक्तः सः वसन्तसार्थेश; त्वम् इव (दमयन्तीम् इव) न विद्यते मलः यस्मिन् सः अमलः मलरहितः अमलश्चासौ धर्मश्च अमलधर्मः अमलधर्मे धीः यस्य सः अमलधर्मधीः निर्मलधर्मबुद्धिः निजं स्वं नगरम् आगमत् आगच्छत्। तत्र तस्मिन् नगरे राज्यं विधत्ते करोति ॥५६२॥*

सरलार्थ :- अथ कूबरेण मुक्तः सः वसन्तः त्वम् इव निर्मलधर्मबुद्धिः; स्वं नगरम् आगच्छत् तत्र राज्यं करोति ॥५६२॥

ગુજરાતી :- પછી કૂબરે વિદાય આપવાથી તે સાર્થવાહ પોતાના નગરમાં આવ્યો, અને તમારી પેઠે ધર્મમાં નિર્મલ બુદ્ધિવાળો તે ત્યાં રાજ્ય કરે છે. ॥૫૬૨॥

हिन्दी :- फिर कूबर ने बिदाई दी तब वह सार्थवाह खुद के नगर में आया और आपकी तरह धर्म में निर्मल बुद्धिवाला वह वहाँ राज्य कर रहा है। ॥५६२॥

मराठी :- नंतर कूबर ने निरोप दिला तेव्हा तो सार्थवाह स्वत:च्या नगरात आला, आणि तुमच्याप्रमाणे धर्मात निर्मळ बुद्धिमान असा तो तेथे राज्य करीत आहे. ॥५६२॥

English :- Then after Kubar had bid him farewell, he come back to his kingdom Tapaspur and like Damyanti is ruling the Kingdom in a religious and in immaculacy and serenity.

दमयन्ती तदाकर्ण्य, तमूचे वत्स पिङ्गल ॥
प्रव्रज्यानावमारुह्य, तीर्यतां दुःकृतार्णवः ॥५६३॥

अन्वय :- दमयन्ती तदाकर्ण्य तम् ऊचे-हे वत्स! पिङ्गल! प्रव्रज्यानावम् आरुह्य दुःकृतार्णवः तीर्यताम् ॥५६३॥

विवरणम् :- *दमयन्ती तद् आकर्ण्य निशम्य तं पिङ्गलम् ऊचे अवोचत्-हे वत्स पिङ्गल! प्रव्रज्या एव नौः प्रव्रज्यानौः तां प्रव्रज्यानावम् आरुह्य दुःकृतानि पापानि एव अर्णवः सागरः दुःकृतार्णवः पापसागरः तीर्यताम् ॥५६३॥*

सरलार्थ :- दमयन्ती तदश्रुत्वा तम् पिङ्गलम् अवदत्- हे वत्स पिङ्गल! संयमनावम् आरुह्य पापसागरः तीर्यताम् ॥५६३॥

ગુજરાતી :- તે સાંભળી દમયંતીએ તેને કહ્યું કે, હે વત્સ પિંગલ! તારે દીક્ષારૂપી વહાણમાં ચડીને પાપોરૂપી મહાસાગરને તરી જવાની જરુર છે. ॥५६३॥

हिन्दी :- यह सुनकर दमयंती ने उसे कहा कि, "हे वत्स पिंगल! तुझे दीक्षारूपी जहाज में सवार हो कर पाप रुपी महासागर को पार करने की जरुरत है।"॥५६३॥

मराठी :- हे ऐकून दमयंतीने त्याला म्हटले की, "हे वत्स पिंगल! तू संयमरूपी नावेत बसून पापसागराला तरून जा."॥५६३॥

English :- Then Damyanti addressing Pingal as a dear child told him that he should mount the steamer which will land him at hermitism which will help him to cross the vast ocean of sins.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽवदद्देवि भाग्यानि, किमेतावन्ति सन्ति मे ।।
लप्स्ये यदार्हतीं दीक्षां, सिद्धिसङ्गमदूतिकाम् ।।५६४।।

अन्वय :- स अवदत्- हे देवि ! किम् एतावन्ति मे भाग्यानि सन्ति? यत् सिद्धिसङ्गमदूतिकाम् आर्हतीं दीक्षां लप्स्ये ।।५६४।।

विवरणम् :- सः पिङ्गलः अवदत् । हे देवि दमयन्ति ! किम् एतावन्ति मे मम भाग्यानि सन्ति? यत् सिद्धेः मोक्षस्य सङ्गमः सिद्धिसङ्गमः । सिद्धिसङ्गमाय दूतिका सिद्धिसङ्गमदूतिका तां सिद्धिसङ्गमदूतिकाम् अर्हतः इयम् आर्हती ताम् आर्हतीं दीक्षां लप्स्ये प्राप्स्यामि। हे देवि! यया सिद्धिसङ्गमो भवति.। सा आर्हती दीक्षा मया प्राप्तुं शक्यते किम् । इत्यर्थः ।।५६४।।

सरलार्थ :- सः पिङ्गलः अवदत् हे देवि। किम् एतावन्ति मम भाग्यानि सन्ति यत् मोक्षसङ्गमदूतिकाम् आर्हतीं दीक्षाम् अहं प्राप्स्यामि ।।५६४।।

ગુજરાતી :- ત્યારે તેણે કહ્યું કે, દે દેવી! મારાં એવાં ભાગ્ય ક્યાંથી હોય? કે મોક્ષલક્ષ્મીના સંગ માટે દૂતી સરખી અરિહંત પ્રભુની દીક્ષા હું લઉં. ।।५६४।।

हिन्दी :- तब उसने कहा कि, "हे देवि! मेरे ऐसे भाग्य कहां हैं? जिससे मोक्षलक्ष्मी का संग कराने में दूतिकाके समान श्री अरिहंत प्रभुकी दीक्षा मैं प्राप्त करूं।"।।५६४।।

मराठी :- तेव्हा पिंगल म्हणाला- देवि! माझे एवढे भाग्य कोठे आहे? की मी मोक्षलक्ष्मीचा संगम घडविण्यास दूतिकेप्रमाणे असलेली जैनधर्म दीक्षा घेऊ.।।५६४।।

English :- Then Pingal replied that his destiny is not so pleased with him as to allow him to join hands with the Goddess of salvation by renouncing the world as Lord Arihant had done.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साधुसङ्घाटकस्तत्र, पर्यटन्नागतस्तदा ॥
शुद्धभैक्षं शुद्धभावा, भैमी च प्रत्यलाभयत् ॥५६५॥

अन्वय :- तदा तत्र साधुसङ्घाटकः पर्यटन् आगतः। शुद्धभावा भैमी शुद्धं भैक्षं प्रत्यलाभयत् ॥५६५॥

विवरणम् :- तदा तस्मिन् समये तत्र तस्मिन् स्थले साधुसङ्घाटकः साधुद्वयं पर्यटन् विचरन् आगत आगच्छत्। शुद्धः भावः यस्याः सा शुद्धभावा भीमस्य अपत्यं स्त्री भैमी दमयन्ती शुद्धं प्रासुकं भिक्षा एव भैक्षं प्रत्यलाभयत् प्रतिलाभम् अववात्। तदा शुद्धभावेन भैमी तस्मै साधुद्वयाय शुद्धं भैक्षं प्रत्यलाभयत् ॥५६५॥

सरलार्थ :- तदा तत्र साधुसङ्घाटकः पर्यटन् आगच्छत्। शुद्धभावा दमयन्ती तं मुनिं शुद्धं भैक्षं प्रत्यलाभयत् ॥५६५॥

ગુજરાતી :- એવામાં તેજ વખતે ત્યાં બે મુનિરાજો ફરતા ફરતા આવી પહોંચ્યા, ત્યારે શુદ્ધ ભાવવાળી દમયંતીએ તેમને શુદ્ધ ભિક્ષા આપી. ॥૫૬૫॥

हिन्दी :- इतने में उस वक्त वहाँ दो मुनिराज घूमते घूमते आये, तब शुद्ध भावयुक्त दमयंती ने उनको शुद्ध भिक्षा दी। ॥५६५॥

मराठी :- इतक्यात त्या वेळी तेथे दोन साधू फिरत फिरत आले, तेव्हा शुद्ध भाव असलेल्या दमयंतीने त्यांना शुद्ध भिक्षा दिली. ॥५६५॥

English :- Then there arrived two monks after wandering about. Damyanti then being an almonar gave alms to the monks with a pure heart.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

साभ्यधत्ताथ तौ साधू, योग्यो यद्येष पिङ्गलः ॥
भवारण्यं व्रतरथे - नैतं लङ्घयतं ततः ॥५६६॥

अन्वय :- अथ सा तौ साधू अभ्यधत्त । यदि एष पिङ्गलः योग्यः ततः एतं व्रतरथेन भवारण्यं लङ्घयतम् ॥५६६॥

विवरणम् :- अथ सा दमयन्ती तौ साधू अभ्यधत्त अवदत् अभ्यधात् यदि एष पिङ्गलः योग्यः स्यात् ततः तर्हि एतं पिङ्गलं व्रतम् एव रथः व्रतरथः तेन व्रतरथेन संयमरथेन भव एव अरण्यं भवारण्यम् लङ्घयतं पारयतम् ॥५६६॥

सरलार्थ :- अथ सा दमयन्ती तौ साधू अभ्यधात् यदि एष पिङ्गलः योग्यः तर्हि एतं पिङ्गलं व्रतरथेन भवारण्यं लङ्घयतम् ॥५६६॥

ગુજરાતી :- પછી તેણીએ તે બન્ને સાધુઓને કહ્યું કે, જો આ પિંગલ લાયક હોય, તો એને ચારિત્રરુપી રથમાં બેસાડીને આ સંસારરુપી જંગલનું ઉલ્લંઘન કરાવો. ॥૫૬૬॥

हिन्दी :- फिर दमयंती ने उन दोनो साधुओं से कहा, "जो यह पिंगल लायक हो, तो उसे चारित्ररुपी रथ में बैठाकर इस संसाररुपी जंगल से पार कराओ।"॥५६६॥

मराठी :- नंतर दमयंतीने त्या दोन साधूनां म्हटले की, "जर हा पिंगल लायक असेल तर त्याला चारित्ररूपी रथात बसवून ह्या संसाररूपी जंगलातून पार करवून या."॥५६६॥

English :- Damyanti requested the monks to help Pingal mount the chariot of monastism if they think him fit to do so, then help him cross this vast forestal eath.

ऊचतुस्तौ स योग्योऽयं, यस्यासि त्वं प्रसेदुषी ॥
ततस्तदैव चैत्यान्त-र्नीत्वा ताभ्यामदीक्षि सः ॥५६७॥

अन्वय :- तौ ऊचतुः यस्य त्वं प्रसेदुषी असि स अयं योग्यः । ततः तदा एव चैत्यान्तः नीत्वा ताभ्यां सः अदीक्षि ॥५६७॥

विवरणम् :- तौ साधू ऊचतुः अवदताम् - यस्य पिङ्गलस्य त्वं प्रसेदुषी प्रसन्ना असि । सः पिङ्गलः अयं संयमयोग्यः अस्ति ततः तदनन्तरं तदा एव तस्मिन् एव समये चैत्यस्य अन्तः चैत्यान्तः मन्दिरान्तः नीत्वा ताभ्यां मुनिवराभ्यां सः पिङ्गलः अदीक्षि ॥५६७॥

सरलार्थ :- तौ साधू अवदताम् - यस्य पिङ्गलस्य त्वं प्रसन्ना असि । सः पिङ्गलः संयमयोग्यः अस्ति। तस्मिन्नेव समये देवालयान्तः नीत्वा ताभ्यां मुनिवराभ्यां सः अदीक्षि॥५६७॥

ગુજરાતી :- ત્યારે તે બન્ને સાધુઓએ કહ્યું કે, જેના પર તમો કૃપાવંત થયા છો, તે યોગ્ય છે પછી તે જ વખતે તેઓએ તેને ચૈત્યમાં લઈ જઈને દીક્ષા આપી. ॥૫૬૭॥

हिन्दी :- तब उन दोनो साधुओने कहा, कि, "जिस पर आप कृपावंत हो, वह योग्य ही है।" फिर उसी वक्त उन्होने उसे मंदिर में ले जाकर दीक्षा दी।

मराठी :- तेव्हा ते दोन्ही साधू म्हणाले- "ज्याच्यावर तू प्रसन्न आहेस तो हा संयम घेण्याला योग्यच आहे." असे म्हणून लगेच त्यांनी त्याला देवळात नेऊन दीक्षा दिली. ॥५६७॥

English :- Then the two monks replied that if Damyanti has turned compassionate towards the man then it is proper to help him renounce the world. So they took him to the nearby temple and made him a monk.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विदर्भभूभुजान्येद्युः, कुतोऽप्यश्रावि दुःश्रवम् ॥
यथा द्यूते नलं जित्वा, कूबरो राज्यमग्रहीत् ॥५६८॥

अन्वय :- अन्येद्युः विदर्भभूभुजा कुतः अपि दुःश्रवम् अश्रावि। यथा द्यूते नलं जित्वा कूबरः राज्यम् अग्रहीत् ॥५६८॥

विवरणम् :- अन्येद्युः अन्यस्मिन् दिने भुवं भुनक्ति भुङ्क्ते वा भूभुक् विदर्भाणां भूभुक् तेन विदर्भभूभुजा भीमनृपेण कुतः अपि दुःखेन श्रूयते इति दुःश्रवम् अश्रावि अशृणोत यथा द्यूते नलं जित्वा कूबरः राज्यम् अग्रहीत् अगृह्णात् ॥५६८॥

भरलार्थ :- अन्यस्मिन् दिने विदर्भनृपभीमः कुतः अपि दुःश्रवम् अशृणोत। यथा द्यूते नलं जित्वा कूबरः राज्यम् अगृहणात् ॥५६८॥

ગુજરાતી :- પછી એક દિવસે વિદર્ભદેશના રાજા ભીમે ક્યાંકથી ન સાંભળી શકાય એવા સમાચાર સાંભળ્યા કે, જૂગારમાં નલને જીતીને કૂબરે રાજ્ય ગ્રહણ કર્યું. ॥५६८॥

हिन्दी :- फिर एक दिन विदर्भ देश के राजा भीम ने कहां से सुन न सके ऐसे समाचार सुने कि, जुगार में नल को जीतकर कूबर ने राज्य ले लिया है। ॥५६८॥

मराठी :- नंतर एके दिवशी विदर्भ देशाच्या भीम राजाने कोठून तरी ऐकल्या जाणार नाही अशी बातमी ऐकली की, द्यूतात नलराजाला जिंकून कूबराने राज्य हरण केले. ॥५६८॥

English :- Then one day the king of Vidharba heard this distressing news that Kubar has defeated King Nal in a game of dice and taken over kingdom.

नलः प्रविष्टोऽरण्यान्यां, दमयन्तीपरिच्छदः ॥
शुद्धिर्न ज्ञायतेऽप्यस्य, किं कुत्राप्यस्ति नास्त्यथ ॥५६९॥

अन्वय :- नलः दमयन्तीपरिच्छदः अरण्यान्यां प्रविष्टः। अस्य शुद्धिः न ज्ञायते। किं कुत्र अपि अस्ति अथवा नास्ति ॥५६९॥

विवरणम् :- नलः दमयन्ती परिच्छदः परिवारः यस्य सः दमयन्तीपरिच्छदः दमयन्त्या सह महत् अरण्यम् अरण्यानी तस्याम् अरण्यान्यां महारण्ये प्रविष्टः प्राविशत्। अस्य नलस्य शुध्धिः वार्ता न ज्ञायते अवबुध्यते। किं कुत्र कुतः अपि अस्ति अथवा नास्ति ॥५६९॥

सरलार्थ :- नलः दमवन्त्या सह महारण्ये प्राविशत्। अस्य नलस्य वार्ता न अवबुध्यते किं कुत्र अपि अस्ति अथवा नास्ति ॥५६९॥

ગુજરાતી :- નલરાજા તો દમયંતી સહિત જંગલમાં ચાલ્યો ગયો છે, પરંતુ તે ક્યાંક છે કે નહિ તેની ખબર પડી નથી. ॥५६९॥

हिन्दी :- नलराजा तो दमयंती के साथ जंगल मे चले गये है। किन्तु वे कहीं है या नहीं? उसकी खबर नहीं है ॥५६९॥

मराठी :- नलराजा तर दमयंतीच्या सोबत जंगलात निघून गेले आहे, परंतु ते कोठे आहेत किंवा नाही? याची माहिती नाही. ॥५६९॥

English :- King Nal was banished and had gone the jungle, along with his Damyanti and no one knows about their present whereabouts.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुष्पदन्त्यपि तत् श्रुत्वा, रुदत्यश्रूण्यमुञ्चत ॥
पुत्रीजामातृदुःखाग्नेः, शान्तिं कर्तुमना इव ॥५७०॥

अन्वय :- पुष्पदन्ती अपि तत् श्रुत्वा पुत्रीजामातृदुःखाग्नेः शान्तिं कर्तुमना इव रुदती अश्रूणि अमुञ्चत् ॥५७०॥

विवरणम् :- पुष्पदन्ती अपि तत् श्रुत्वा तदाकर्ण्य - पुत्री च जामाता च पुत्रीजामातरौ । दुःखम् एव अग्निः दुःखाग्निः पुत्रीजामात्रोः दुःखाग्निः पुत्रीजामातृदुःखाग्निः तस्य पुत्रीजामातृदुःखाग्नेः शान्तिं कर्तुं मनः यस्याः सा: कर्तुमनाः कर्तुकामा इव रुदती रोदनं कुर्वती सती अश्रूणि अमुञ्चत् ॥५७०॥

सरलार्थ :- पुष्पदन्ती अपि तदाकर्ण्य पुत्रीजामातृदुःखाग्नेः शान्तिं कर्तुकामा इव रुदती सती अश्रूणि अमुञ्चत् ॥५७०॥

ગુજરાતી :- તે સાંભળીને પુષ્પદંતી રાણી પણ રુદન કરતી જાણે પુત્રી અને જમાઇ સંબંધી દુઃખરુપી અગ્નિને શાંત કરવાની ઇચ્છા કરતી હોય તેમ અશ્રુઓ સારવા લાગી. ॥૧૭૦॥

हिन्दी :- यह सुनकर पुष्पदंती राणी भी रुदन करती हुई मानो पुत्री और जमाइ के संबंधी दुःखरुपी अग्नि को शांत करने की इच्छा करती हुअी आंसु बहाने लगी ॥५७०॥

मराठी :- हे ऐकून पुष्पदंती राणी पण रुदन करीत जणू मुलगी आणि जावयासंबंधी दुःखरुपी अग्नीला शांत करण्याच्या इच्छेने अश्रू ढाळू लागली. ॥५७०॥

English :- When the Queen Pushadanti heard about this sad plight, she broke down and shed out tears which seemed that she was washing away the fire filled with the wondering forlong faces of her daughter and son-in-law, with her over flowing sadness.

P.P.Ac. Gunratnasuri M.S. Jun Gyanmandir, Surat

ततः प्रैष्यत भीमेन, शुद्धिजिज्ञासया तयोः ॥
हरिमित्रबटुः सर्वस्वामिकार्यविधौ पटुः ॥५७१॥

अन्वय :- ततः तयोः शुद्धिजिज्ञासया भीमेन सर्वस्वामिकार्यविधौ पटुः हरिमित्रबटुः प्रैष्यत ॥५७१॥

विवरणम् :- ततः तदनन्तरं तयोः नलदमयन्त्योः ज्ञातुम् इच्छा जिज्ञासा। शुद्धेः जिज्ञासा शुद्धिजिज्ञासा तया शुद्धिजिज्ञासया। वार्ता ज्ञातुम् इच्छया भीमेन नृपेण स्वामिनः कार्याणि स्वामिकार्याणि। सर्वाणि च तानि स्वामिकार्याणि च सर्वस्वामिकार्याणि। सर्वस्वामिकार्याणां विधिः सर्वस्वामिकार्यविधिः तस्मिन् सर्वस्वामिकार्यविधौ पटुः कुशलः हरिमित्रश्चासौबटुश्च हरिमित्रबटुः प्रैष्यत प्राहीयत ॥५७१॥

सरलार्थ :- तदनन्तरं नलदमयन्त्योः वार्ता ज्ञातुम् इच्छया भीमनृपेण सर्वस्वामिकार्यविधौ कुशलः हरिमित्रबटुः प्राहीयत ॥५७१॥

ગુજરાતી :- પછી ભીમરાજાએ તેઓ બન્નેની તપાસ કરવાની ઇચ્છાથી સ્વામીના સર્વ કાર્યો કરવામાં વિચક્ષણ, એવા હરિમિત્ર નામના બટુકને મોકલ્યો. ॥૫૭૧॥

हिन्दी :- फिर भीमराजाने उन दोनों की खोज करने की इच्छा से, स्वामी के सभी कार्य करने में विचक्षण, ऐसे हरिमित्र नामके बटुक को भेजा ॥५७१॥

मराठी :- नंतर भीमराजाने त्या दोघांचा तपास करण्याच्या इच्छेने स्वामीचे सर्व कार्य करण्यात विलक्षण तरबेज अशा हरिमित्र नावाच्या बटूला पाठविले. ॥५७१॥

English :- Then in order to search them out, King Bhimrath send for drawf named Harimitre who was profoundly quixotic and stupendous.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

शोधयंश्च स सर्वत्र, ग्रामारामपुरादिषु ॥
आजगामाचलपुरे, ऋतुपर्णनृपान्तिके ॥५७२॥

अन्वय :- सः सर्वत्र ग्रामारामपुरादिषु च शोधयन् अचलपुरे ऋतुपर्णनृपान्तिके आजगाम ॥५७२॥

विवरणम् :- *सः हरिमित्रबटुः सर्वत्र सर्वस्थलेषु ग्रामाश्च आरामाश्च उद्यानानि च पुराणि नगराणिच ग्रामारामपुराणि ग्रामारामपुराणि आदौ येषां ते ग्रामारामपुरादयः तेषु ग्रामारामपुरादिषु शोधयन् अन्वेषयन् अचलपुरे ऋतुपर्णश्चासौ नृपश्च ऋतुपर्णनृपः ऋतुपर्णनृपस्य अन्तिके ऋतुपर्णनृपान्तिके ऋतुपर्णनृपसमीपे आजगाम आगच्छत् ॥५७२॥*

सरलार्थ :- सः हरिमित्रबटुः सर्वत्र ग्रामोद्यानपुरादिषु अन्वेषयन् अचलपुरे ऋतुपर्णनृपसमीपे आगच्छत् ॥५७२॥

ગુજરાતી :- પછી તે બટૂક ગામ, બગીચા તથા નગર આદિ સર્વ જગાએ શોધતો શોધતો અચલપુર નગરમાં ઋતુપર્ણ રાજાની પાસે આવ્યો. ॥૫૭૨॥

हिन्दी :- फिर वह बटूक गांव, उद्यान और नगर आदि सभी जगह खोज करता हुआ अचलपुर नगर में ऋतुपर्ण राजा के पास आया ॥५७२॥

मराठी :- नंतर तो बटु गावं, बगीचे, नगर इत्यादी सर्व ठिकाणी तपास करीत अचलपुर नावाच्या नगरात ऋतुपर्ण राजाजवळ आला. ॥५७२॥

English :- Then this drawf wandered about in every village, compound and city and at last arrived at a city named Achalaur, and to the King Ritupurna.

आचष्टेस्म बटुर्देवि, देव्याः क्षेमः स्वसुस्तव ।।
केवलं क्षेममालोच्यं, दमयन्त्या नलस्य च ।।५७४।।

अन्वय :- बटुः आचष्टे स्म हे देवि! तव स्वसुः देव्याः क्षेमः अस्ति। केवलं दमयन्त्याः नलस्य च क्षेमम् आलोच्यम् ।।५७४।।

विवरणम् :- *बटुः आचष्टे स्म अकथयत् - हे देवि! तव स्वसुः भगिन्याः देव्याः क्षेमः कुशलम् अस्ति। केवलं दमयन्त्याः नलस्य च क्षेमं कुशलम् आलोच्यं विचारणीयम् ।।५७४।।*

सरलार्थ :- बटुः अकथयत् हे देवि! तव भगिन्याः कुशलमस्ति। परं दमयन्त्याः नलस्य च क्षेमं विचारणीयमस्ति ।।५७४।।

ગુજરાતી :- ત્યારે બટુકે કહ્યું કે, હે દેવી ! તમારાં બ્હેન મહારાણી તો કુશળક્ષેમ છે, ફક્ત દમયંતી અને નલરાજાના કુશળની જ ચિંતા કરવા જેવું છે. ।।૫૭૪।।

हिन्दी :- तब बटुक ने कहा कि, "हे देवि! आपकी बहन महाराणी तो कुशलक्षेम है सिर्फ दमयंती और नलराजा के कुशलमंगल की चिंता करने जैसी है।"।।५७४।।

मराठी :- तेव्हा बटुक म्हणाला की, "हे देवी! तुमची बहीण महाराणी तर कुशल आहे फक्त दमयंती आणि नलराजा यांच्या कुशल मंगला ची चिंता करण्यासारखी आहे."।।५७४।।

English :- At this the drawf replied that Queen Puspadanti is fine, but is weeping and yearning for the welfare of her daughter Damyanti and son-in-law King Nal.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पृष्टश्चन्द्रयशादेव्या, कच्चित् क्षेमं स्वसुर्मम ।।
पुष्पदन्त्या महारा या - स्तस्या: परिजनस्य च ।।५७३।।

अन्वय :- चन्द्रयशादेव्या पृष्ट: मम स्वसु: महारा या: पुष्पदन्त्या: तस्या: परिजनस्य च क्षेमम् अस्ति कच्चित्? ।।५७३।।

विवरणम् :- *चन्द्रयशाश्चासौ देवी च चन्द्रयशादेवी तथा चन्द्रयशादेव्या पृष्ट: अपृच्छ्यता मम स्वसु: भगिन्या: महती चासौ राज्ञी च महाराज्ञी तस्या: महारा या: पुष्पदन्त्या: तस्या: परिजनस्य च क्षेमं कुशलम् अस्ति कच्चित् ।।५७३।।*

सरलार्थ :- चन्द्रयशादेव्या अपृच्छ्यत - मम भगिन्या: महारा या: पुष्पदन्त्या:, तस्या: परिजनस्य च कुशलम् अस्ति कच्चित् ।।५७३।।

ગુજરાતી :- પછી તેને ચંદ્રયશાદેવીએ પૂછ્યું કે, મારી બેન પુષ્પદંતી મહારાણી તથા તેનો પરિવાર કુશલ તો છે ને? ।।૫૭૩।।

हिन्दी :- फिर बटुक से चंद्रयशादेवीने पूछा कि, "मेरी बहन पुष्पदंती महाराणी तथा उसका परिवार कुशल तो है ना?" ।।५७३।।

मराठी :- नंतर बटूला चंद्रयशादेवीने विचारले की, "माझी बहीण पुष्पदंती महाराणी आणि तिचे परिवार तर कुशल आहे ना?" ।।५७३।।

English :- Then Queen Chandrayasha asked the drawf about the dexterity and welfare of her sister Puspadanti and her family.

किं हे बटो श्रुतिकटु, ब्रवीषीति तयोदितः ॥
प्रवासं यावदाधूता - न्नलाख्यानं शशंस सः ॥५७५॥

अन्वय :- हे बटो ! श्रुतिकटु किं ब्रवीषि इति तया उदितः सः आधूतात् प्रवासं यावत् नलाख्यानं शशंस ॥५७५॥

विवरणम् :- हे बंटो! श्रुत्योः श्रवणयोः कटु कर्कशं श्रुतिकटु कर्णकर्कशं वचनं किं ब्रवीषि? किं वदसि ! इति एवं तया चन्द्रयशसा उदितः उक्तः सः आ धूतात् धूतात् प्रभृति प्रवासं यावत् नलस्य आख्यानं नलाख्यानं शशंस अशंसत् ॥५७५॥

सरलार्थ :- हे बटो श्रवणकटु किं वदसि? एवं तया चन्द्रयशसा उदितः सः बटुः यूतात् आरभ्य प्रवासं यावत् नलाख्यानम् अशंसत् ॥५७५॥

ગુજરાતી :- હે બટુક! કાર્ણોને કડવું લાગે, એવું આ તું શું બોલે છે? એમ તેણીએ કહ્યું ત્યારે છેક જુગારથી માંડીને રાજ્ય ત્યજી નીકળવું પડ્યું, ત્યાં સુધીનું નલરાજાનું વૃત્તાંત તેણે કહી સંભળાવ્યું. ॥૫૭૫॥

हिन्दी :- हे बटुक! कानो को कटु लगे ऐसा यह तुम क्या कह रहे हो? राणीने ऐसा पूछा तब जुगार से लेकर आखिर राज्य छोड कर जाने तक का नलराजा का वृत्तांत उसने कहकर सुनाया। ॥५७५॥

मराठी :- हे बटुक! कानाला कटु लागणारे असे हे तुम्ही काय म्हणत आहात? असे राणीने म्हटले तेव्हा, जुगारापासून शेवटी राज्य सोडून जावे लागले तो पर्यंतचा नलराजाचा सर्व वृत्तांत त्याने ऐकविला. ॥५७५॥

English :- Then the Queen said that his unpleasant words seem to prick her ears. Having heard such words from Queen Chandrayasha, the drawf then set himself to tell her the whole story of King Nal, from the game of dice to his leaving his Kingdom.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत् श्रुत्वा चातिवृष्ट्येव, देव्याः शेषजनस्य च ॥
नद्योरिव दृशोः सद्यः, पयःपूरोऽवहन्महान् ॥५७६॥

अन्वय :- तत् श्रुत्वा अतिवृष्ट्या नद्योः महान् पयःपूरः इव देव्याः शेषजनस्य च दृशोः सद्यः महान् पयःपूरः अवहत् ॥५७६॥

विवरणम् :- *तत् श्रुत्वा तद् आकर्ण्य अतिशयेन वृष्टिः अतिवृष्टिः तया अतिवृष्ट्या अतिवर्षणेन नद्योः पयसां जलानां पूरः पयःपूर जलपूरः इव देव्याः चन्द्रयशसः शेषश्चासौ जनश्च शेषजनः तस्य शेषजनस्य च दृशोः दृष्ट्योः सद्यः शीघ्रं महान् पयसामश्रूणां पूरः पयःपूरः अश्रुपूरः अवहत् ॥५७६॥*

सरलार्थ :- तद् श्रुत्वा अतिवृष्ट्या नद्योः महान् पयःपूरः इव देव्याः चन्द्रयशसः शेषजनस्य च दृष्ट्योः महान् जलपूरः अवहत् ॥५७६॥

ગુજરાતી :- તે સાંભળીને અતિવૃષ્ટિથી જેમ નદીમાં પૂર આવે, તેમ તે રાણીની અને બીજા માણસોની આંખોમાંથી પણ તુરત મોટો અશ્રુજલનો પ્રવાહ વહેવા માંડ્યો. ॥૫૭૬॥

हिन्दी :- यह सुनकर अतिवृष्टि से जैसे नदी में बाढ आती है वैसे ही राणी और दूसरे जनों की आँखोमें से भी तुरंत बडे अश्रुजल का प्रवाह बहने लगा ॥५७६॥

मराठी :- हे ऐकून अतिवृष्टीने जसे नदीला पाण्याचा पुर येतो तसेच राणी आणि दुसऱ्या लोकांच्या डोळ्यातून पटकन अश्रूंचा प्रवाह वाहू लागला. ॥५७६॥

English :- Then the eyes of the Queen and the others around flooded with tears, just as the river gets flooded due to a heavy outpour of rain.

P.P. Ac. Gunratnasuri M.S. Jain Aradhak Trust

लोकः शोकार्णवि सर्व - स्तदैवाभून्निमग्नवत् ॥
क्षुधार्त्तोऽथ बटुर्भोक्तुं, दानशालामुपागमत् ॥५७७॥

अन्वय :- तदैव सर्वः लोकः शोकार्णवि निमग्नवत् अभूत्। अथ क्षुधार्त्तः बटुः भोक्तुं दानशालाम् उपागमत् ॥५७७॥

विवरणम् :- तदा एव तस्मिन्नेव समये सर्वः अखिलः लोकः जनः शोकस्य अर्णवः सागरः शोकार्णवः तस्मिन् शोकार्णवि शोकसागरे निमग्नवत् निमग्नः इव अभूत् अभवत्। अथ क्षुधया आर्त्तः पीडितः क्षुधार्त्तः बटुः भोक्तुं खादितुं दानाय शाला दानशाला तां दानशालाम् उपागमत् आगच्छत्। भोजनाय दानशालामगच्छत्॥५७७॥

सरलार्थ :- तस्मिन्नेव समये अखिलः जनः शोकसागरे निमग्नः इव अभवत्। अथ क्षुधापीडितः बटुः भोक्तुं दानशालाम् अगच्छत् ॥५७७॥

ગુજરાતી :- તે જ વખતે સઘળા લોકો શોકરુપી મહાસાગરમાં ડુબી ગયા. પછી ભૂખ્યો થયેલો બટુક ભોજન કરવા માટે દાનશાળામાં ગયો. ॥૫૭૭॥

हिन्दी :- उसी वक्त सभी लोग शोक रूपी महासागरमें डूब गये तब भूखा बटुक भोजन करने के लिये दानशाला में गया ॥५७७॥

मराठी :- त्या वेळी सर्व लोक शोक रूपी महासागरात बुडून गेले आणि भुकेला बटुक जेवण करण्याकरिता दानशाळेत गेला. ॥५७७॥

English :- Then in order to pay homage and condolence all of them entered the ocean of sadness. Then the drawf went to the charitable school, to have some food as he was famished.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रविशन्नेव तत्राग्रे, दमयन्तीमवेक्ष्य सः ॥
उपलक्ष्य प्रफुल्लाक्षः, प्रणनाम प्रमोदभाक् ॥५७८॥

अन्वय :- तत्र अग्रे प्रविशन् एव सः दमयन्तीम् अवेक्ष्य उपलक्ष्य प्रफुल्लाक्षः प्रमोदभाक् प्रणनाम ॥

विवरणम् :- तत्र तस्यां भोजनशालायाम् अग्रे प्रविशन् एव सः बटुः दमयन्तीम् अवेक्ष्य अवलोक्य उपलक्ष्य प्रफुल्ले अक्षिणी यस्य सः प्रफुल्लाक्षः विकसितनयनः प्रमोदम् आनन्दं भजति इति प्रमोदभाक् प्रणनाम प्राणमत् दमयन्तीं दृष्ट्वा विकसितनयनः सन् तां प्राणमत् ॥५७८॥

सरलार्थ :- तत्र अग्रे प्रविशन् एव सः बटुः दमयन्तीम् अवलोक्य उपलक्ष्य विकसितनयनः प्रमोदभाक् प्राणमत् ॥५७८॥

गुजराती :- ત્યાં પ્રવેશ કરતાંજ આગળના ભાગમાં દમયંતીને જોઈને, તથા ઓળખીને વિકસિત ચક્ષુઓવાળો અને હર્ષિત થયેલો તે બટુક તેણીને નમ્યો. ॥૫૭૮॥

हिन्दी :- वहाँ प्रवेश करते ही सामने दमयंती को देखकर और पहचानकर आनंद से प्रफुल्लित हुअे बटुकने उसको नमन किया ॥५७८॥

मराठी :- तेथे प्रवेश करताच समोर दमयंतीला पाहून आणि ओळखून विकस्वर डोळे असणाऱ्या आणि आनंदित झालेल्या त्या बटुकाने तिला नमन केले. ॥५७८॥

English :- Then as he entered the school, his eyes fell on Damyanti and it recognized her as it swelled up with astonishment and utter happiness and he bowed down to her.

मौलीकृत्य करौ स्माह, केयं ते देवि दुर्दशा ॥
यदेवं तुहिनक्लान्ता, नाज्ञवल्लीव दृश्यसे ॥५७९॥

अन्वय :- करौ मौलीकृत्य आह स्म - देवि! ते इयं का दुर्दशा? यद् एवं तुहिनक्लान्ता नागवल्ली इव दृश्यसे ॥५७९॥

विवरणम् :- *करौ हस्तौ मौलौ मस्तके कृत्वा मौलीकृत्य आह स्म ब्रवीति स्म। हे देवि! ते तव इयं का दुष्टा दशा दुर्दशा? यद् एवं तुहिनेन हिमेन क्लान्ता म्लाना तुहिनक्लान्ता नागवल्ली इव दृश्यसे ॥५७९॥*

सरलार्थ :- हस्तौ मस्तके कृत्वा अवदत्-हे देवि! तव इयं का दुर्दशा? यद् एवं हिमेन म्लाना नागवल्ली इव दृश्यसे ॥५७९॥

गुजराती :- પછી પોતાના હાથોને મુકુટરુપ કરીને (જોડીને) તે બોલ્યો કે, હે દેવી! તમારી આવી દુર્દશા કેમ થઇ? કે જેથી આવી રીતે હિમથી કરમાયેલી નાગવલ્લી સરખાં તમો દેખાઓ છો. ॥૫૭૯॥

हिन्दी :- फिर खुदके हाथ जोडकर वह बोला कि, "हे देवी! तुम्हारी ऐसी दुर्दशा क्यों हुई? जिससे ठंड से मुरझाई हुई नागवल्ली के समान आप दिखाई दे रही हो।"॥५७९॥

मराठी :- नंतर स्वत:चे हात जोडून तो म्हणाला की, "हे देवी! तुझी अशी दुर्दशा का झाली? की ज्यामुळे बर्फाने करपून गेलेल्या नागवल्लीप्रमाणे तू दिसत आहेस." ॥५७९॥

English :- Then joining his hands, he asked Damyanti the reason for such a forlorn state and as to why she seems to be so wittered off, like the snake-creeper dipped in ice.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अभाणीच्च हहा धिग्मां, मया यन्नोपलक्षिता ॥
त्वमसाधारणैर्वत्से, लक्षणैर्लक्षितापि हि ॥५८३॥

अन्वय :- अभाणीत् च हहा धिग्मां असाधारणैः लक्षणैः लक्षिता अपि हे वत्से ! त्वं मया न उपलक्षिता ॥५८३॥

विवरणम् :- अभाणीत् - च अवदत् च - हहा मां धिग् अस्तु । न साधारणानि असाधारणानि तैः असाधारणैः लक्षणैः चिह्नैः लक्षिता अपि हे वत्से! त्वं मया न उपलक्षिता । न अभिज्ञाता ॥५८३॥

सरलार्थ :- अवदत् च हहा! मां धिग् अस्तु । असाधारणैः चिह्नैः लक्षिता अपि हे वत्से! त्वं मया न उपलक्षिता । न ज्ञाता ॥५८३॥

ગુજરાતી :- પછી તેણીએ કહ્યું કે, અરેરે! મને ધિક્કાર છે. અસામાન્ય લક્ષણોથી જાણ્યા છતાં પણ હે વત્સે! હું ખરેખર તને ઓળખી શકી નહીં. ॥૫૮૩॥

हिन्दी :- फिर उसने कहा, "अरेरे! मुझे धिक्कार हो। असामान्य गुणों को जानते हुए भी हे वत्से! मैंने सचमुच तुम्हे पहचाना नही।"॥५८३॥

मराठी :- नंतर ती म्हणाली, "अरेरे! माझा धिक्कार असो. तुझे असामान्य गुण जाणून सुद्धा हे वत्से! मी खरोखरच तुला ओळखू शकले नाही."॥५८३॥

English :- The queen then cursed and disdained herself for not recognising the uncommon and distingwriting qualities of Damyanti.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दैवात् दुर्दशेयं चेदात्मा मे गोपितः कथम् ।।
व्यसनं स्यान्न किं चन्द्र - सूर्ययोर्दैवयोरपि ।।५८४।।

अन्वय :- दैवात् इयं दुर्दशा चेत् मे ते आत्मा कथं गोपितः। किं चन्द्रसूर्ययोः देवयोः अपि व्यसनं न स्यात् ।।५८४।।

विवरणम् :- दैवात् दैवयोगात् इयं दुष्टा दशा दुर्दशा चेत् मे मम पार्श्वे ते तव त्वया आत्मा कथं गोपितः? किं चन्द्रश्च सूर्यश्च चन्द्रसूर्यौ तयोः चन्द्रसूर्ययोः देवयोः अपि व्यसनं दुःखं न स्यात्! ।।५८४।।

सरलार्थ :- दैवयोगात् इयं दुर्दशा चेत् मम पार्श्वे त्वया आत्मा कथं गोपितः? किम् चन्द्रसूर्ययोः देवयोः अपि दुःखं न स्यात्। ।।४८४।।

ગુજરાતી :- કદાચ દૈવયોગે તારી આવી દુર્દશા થઈ, તો પણ તેં મારી પાસે તારા આત્માને શા માટે છુપાવ્યો? શું દેવ એવા ચંદ્ર અને સૂર્યને પણ દુઃખ આવી પડતું નથી?।।૫૮૪।।

हिन्दी :- शायद दैवयोग से तुम्हारी यह दुर्दशा हुई। फिर भी मेरे पास तुमने आत्मा को क्यों छुपाया? क्या देवता समान चंद्र और सूर्य को भी दुःख नही आता? ।।५८४।।

मराठी :- कदाचित् दैवयोगाने तुझी ही दुर्दशा झाली? तरी पण माझ्याजवळ तू स्वतःला का लपविले? काय चंद्र आणि सूर्य ह्या देवांना दुःख होत नाही? (येत नाही?) ।।५८४।।

English :- She then said that maybe it was destined for her to experience such a miserable and an adverse plight. Then she asked her as to why she could'nt place her sadness in front of her, and also said that the great and eminent moon and the sun too experience difficulties.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किं त्वं नलेन हा वत्से - ऽत्याजि किंवा नलस्त्वया ।।
त्यक्ता नूनं नलेनासि, पुरुषः परुषः खलु ।।५८५।।

अन्वय :- हा वत्से ! किं नलेन अत्यज्यथाः । नलः त्वया अत्याजि! नूनं नलेन त्वं त्यक्ता असि । पुरुषः परुषः खलु ।।५८५।।

विवरणम् :- हा वत्से! किं त्वं नलेन अत्यज्यथाः? किंवा अथवा नलः त्वया अत्याजि अत्यज्यत । नूनं इति उत्प्रेक्षायां नलेन त्वं व्यक्ता असि । यतः पुरुषः परुषः कठोरः खलु ।।५८५।।

सरलार्थ :- हा वत्से! किं त्वं नलेन अत्यज्यथाः नलः त्वया त्यक्तः । नूनं नलेन त्वं त्यक्ता असि यतः पुरुषः कठोरः वर्तते खलु ।।५८५।।

ગુજરાતી :- હે વત્સે! શું તને નલરાજાએ તજી દીધી છે? અથવા શું તેં નલરાજાને તજી દીધો છે? ખરેખર નલે જ તને તજી દીધી સંભવે છે, કેમકે પુરુષ ખરેખર કઠોર હૃદયના હોય છે. ।।૫૮૫।।

हिन्दी :- "हे वत्से! क्या तुम्हे नलराजाने छोड दिया है? अथवा तुमने नलराजा का त्याग किया है? सचमुच ऐसे लगता है कि नलराजाने तुम्हे त्याग दिया है, क्योंकि पुरुष सचमुच कठोर हृदय के होते हैं।"।।५८५।।

मराठी :- "हे वत्से! काय तुझा नलराजाने त्याग केला? की तू नलराजाचा त्याग केला आहेस? मला तर वाटते की नलराजानेच तुझा त्याग केला असावा, कारण पुरुष खरोखरच कठोर हृदयाचे असतात."।।५८५।।

English :- Then the queen asked her if, King Nal had deserted her or she had left him. She then says that she feels that King Nal had left her, because men are always harsh and stone-hearted.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पतिं चेद्व्यसनप्राप्तं, त्वमत्याक्षः पतिव्रते ॥
तदा रसातलं भूमिरगमिष्यन्न संशयः ॥५८६॥

अन्वय :- हे पतिव्रते! त्वं व्यसनप्राप्तं पतिम् अत्याक्षः चेत् तदा भूमिः रसातलम् अगमिष्यत् न संशयः ॥५८६॥

विवरणम् :- पतिः एव व्रतं यस्याः सा पतिव्रता तत्सम्बुद्धौ हे पतिव्रते। त्वं व्यसनं सङ्कटं प्राप्तः व्यसनप्राप्तः तं व्यसनप्राप्तं सङ्कटग्रस्तं पतिं नलम् अत्याक्ष्यः व्यमोक्ष्यः चेत् तदा भूमिः पृथ्वी रसायाः तलं रसातलं पातालं अगमिष्यत् अयास्यत् इत्यत्र न संशयः। यस्मात् पृथ्वी रसातलं न अगमत् तस्मात् त्वं पतिं न अत्यजः ॥५८६॥

सरलार्थ :- हे पतिव्रते! त्वं सङ्कटपतितं पतिम् अत्याक्ष्यः चेत् भूमिः रसातलम् अगमिष्यत् इत्यत्र न संशयः ॥५८६॥

गुजराती :- हे पतिव्रते! दुःखी पतिने जो तें तजी दीधो होय, तो आ पृथ्वी रसातलमां ज जाय, तेमां संशय नथी. ॥५८६॥

हिन्दी :- "हे पतिव्रते! संकट में पडे हुए पति को यदि तुमने छोड दिया हो तो यह पृथ्वी रसातल में गयी होती। इसमें कुछ संशय नहीं।"॥५८६॥

मराठी :- "हे पतिव्रते! कष्टाने ग्रस्त झालेल्या पतीचा जर तू त्याग केला असता तर ही पृथ्वी रसातळाला गेली असती. यात काहीही संशय नाही."॥५८६॥

English :- Then the queen addressing her as a chaste woman said that if she has deserted her husband, who hadbeen afflicted with difficulties, then this earth is bound to go into Hades.

त्यजन् गुणमयीमेतां हाहा नल न लज्जसे ॥
भारकृच्चेत्तवैषापि, नामुश्रः किं ममान्तिके ॥५८७॥

अन्वय :- हा हा नल! एतां गुणमयीं त्यजन् न लज्जसे। एषा अपि तव भारकृत् चेत् ममान्तिके किं नामुश्रः ॥५८७॥

विवरणम् :- हा हा इति खेदे हे नल! एतां गुणाः प्रचुराः अस्यां सा गुणमयी तां गुणमयीं दमयन्तीं त्यजन् मुञ्चन् न लज्जसे? न त्रपसे! एषा दमयन्ती अपि तव भारं करोति इति भारकृत् चेत् मम अन्तिके समीपे किं न अमुञ्चः अत्यजः ॥५८७॥

सरलार्थ :- हा हा नल! एतां गुणमयीं दमयन्तीं त्यजन् न लज्जसे। एषा दमयन्ती अपि तव भारकृत् चेत् मम समीपे किं न अत्यजः ॥५८७॥

ગુજરાતી :- અરેરે નલ! આ ગુણીયલ દમયંતીને તજતાં શું તું લજાયો નહીં? કદાચ તને તે ભારરૂપ થઈ, તો તેણીને મારી પાસે કેમ ન મોકલી આપી?॥५८७॥

हिन्दी :- "अरेरे नल! इस गुणवंती दमयंती का त्याग करते समय तुम्हे लज्जा नही आयी? यदि यह तुमपर बोज बनी तो इसे मेरे पास क्यों नही भेज दिया?"॥५८७॥

मराठी :- अरेरे नल! या गुणवान् दमयंतीचा त्याग करतांना तुम्हाला लाज कां वाटली नाही? कदाचित जर तुम्हाला हिचे ओझे झाले होते तर तुम्ही हिला माझ्याजवळ कां पाठविले नाही?"॥५८७॥

English :- Then the queen addressing Nal, asked him the reason for deserting Damyanti and also if she was a burden to him, as to make him do such an immeritable deed. Then she said that if ever she was a burden than why could'nt he leave Damyanti to her, in her auspicious hands.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ईदृशी दुर्दशा पुत्रि, न ते सम्भाव्यतेऽपि हि ॥
तेनोपलक्षिता नासि, क्षमेथास्तदिदं मम ॥५८८॥

अन्वय :- हे पुत्रि। ईदृशी दुर्दशा ते न सम्भाव्यते अपि। तेन उपलक्षिता नासि तद् इदं मम क्षमेथाः ॥५८८॥

विवरणम् :- हे पुत्रि! ईदृशी वुष्टा दुर्दशा ते तव न सम्भाव्यते तेन त्वं मया उपलक्षिता नासि। तद् इदं मम क्षमेथाः ॥५८८॥

सरलार्थ :- हे पुत्रि! ईदृशी दुर्दशा तव न सम्भाव्यते। तेन उपलक्षिता नासि। तद् इदं मम क्षमेथाः॥५८८॥

गुजराती :- હે પુત્રી! ખરેખર તારી આવી દુર્દશા સંભવી શકે નહીં અને તેથી હું તને જે ઓળખી શકી નહીં, તે માટે તારે મને ક્ષમા કરવી. ॥५८८॥

हिन्दी :- हे पुत्री! सचमुच तुम्हारी यह दुर्दशा तो संभव नही है और इसलिये मैं तुम्हे पहचान न पाई, इसलिये मुझें क्षमा कर दो।"॥५८८॥

मराठी :- "हे पुत्री! खरोखरच तुझी ही दुर्दशा तर कधीही संभव नाही, त्यामुळे मी तुला ओळखू शकले नाही म्हणून मला क्षमा कर."॥५८८॥

English :- Then she says that such a condition of hers was never possible, so she could'nt recognise her, So she askes Damyanti to forgive her for the same.

सहजः सततोद्योतः, क्व भालतिलकः स च ॥
ततस्तदैव तद्भालं, निष्ठ्यूतेन ममार्ज सा ॥५८९॥

अन्वय :- सहजः सततोद्योतः च सः भालतिलकः क्व? ततः तदैव सा तद्भालं निष्ठ्यूतेन ममार्ज ॥५८९॥

विवरणम् :- *सह जायते इति सहजः स्वाभाविकः सततम् उद्योतः यस्य सः सततोद्योतः अनवरतं प्रज्वलितः, च सः भाले ललाटे तिलकः भालतिलकः क्व? ततः तदनन्तरं तदा एव तस्मिन् एव समये सा चन्द्रयशाः तस्याः दमयन्त्याः भालः तद्भालः तं तद्भालं निष्ठ्यूतेन ममार्ज ॥५८९॥*

सरलार्थ :- सहजः सततोद्योतः च सः ललाटतिलकः क्व? तदनन्तरं तदा एव सा चन्द्रयशाः दमयन्त्याः ललाटं निष्ठ्यूतेन अमार्ट् ॥५८९॥

गुजराती :- વળી સ્વાભાવિક તથા હમેશાં તેજસ્વી એવું તારું તે લલાટનું તિલક ક્યાં છે? (એમ કહી) પછી તે જ વખતે તેણીએ તેનું લલાટ થૂંકથી સાફ કર્યું.॥५८९॥

हिन्दी :- "फिर स्वाभाविक और हमेशा तेजस्वी ऐसा तुम्हारे माथे पर जो तिलक था, वह तिलक कहाँ है?" ऐसा कहकर चन्द्रयशाने उसी समय दमयंती का ललाट थुंक से साफ किया॥ ॥५८९॥

मराठी :- "सहज आणि नेहमी तेजस्वी असा तुझ्या कपाळावर चमकणारा तो टिळा कोठे गेला?" असे म्हणून चन्द्रयशा राणीने तत्काल आपल्या थूंकीने दमयन्तीचे कपाळ साफ केले. ॥५८९॥

English :- Then the queen asked her about the emblem on her forhead which natural and bright as ever. At this Damyanti wiped away the dust on the emblem with a little saliva.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उत्तेजित इवादर्शः, शाणोत्तीर्ण इवांशुमान् ॥
तिलकः कान्तिकल्लोलै - र्विश्वमाप्लावयन्निव ॥५९०॥

अन्वय :- उत्तेजितः आदर्शः इव शाणोत्तीर्णः अंशुमान् इव कान्तिकल्लोलैः विश्वम् आप्लायवन् इव तिलकः आविरभूत् ॥५९०॥

विवरणम् :- *उत्तेजितः निर्मलीकृतः आदर्शः इव शाणात् उत्तीर्णः शाणोत्तीर्णः अंशुमान् सूर्यः इव कान्त्याः कल्लोलाः तरङ्गाः कान्तिकल्लोलाः तैः कान्तिकल्लोलैः विश्वं जगत् आप्लावयन् निमज्जयन् इव तिलकः आविरभूत् ॥५९०॥*

सरलार्थ :- उत्तेजित; निर्मलीकृत: आदर्श: इव शाणोत्तीर्ण: सूर्य: इव कान्तितरङ्गै: विश्वं निमज्जयन् इव तिलक: प्रकट्यभूत् ॥५९०॥

गुजराती :- त्यारे चळकता सूर्यनी पेठे, तथा सराणपर चडावीने उतारेला सूर्यनी पेठे, कांतिना मोजांओथी जाणे जगतने भींजवतुं होय एवुं तिलक प्रगट थयुं. ॥५९०॥

हिन्दी :- तभी चमकते सूर्य के समान और सराणपर से उतारे हुए सूर्य के समान, कांति की लहरों से जगत को भिगोता हुआ तिलक प्रगट हुआ ॥५९०॥

मराठी :- तेंव्हा स्वच्छ केलेल्या आरशाप्रमाणे, सहाणेवर घासून काढलेल्या सूर्यकान्त मण्याप्रमाणे आपल्या कान्तीच्या लाटांनी जणू काय सर्व विश्वाला बुडवून टाकणारा तिलक (टिळा) प्रकट झाला. ॥५९०॥

English :- The emblem shone like the sun, which seemed as though it was sharpened by the whet stone and then had attained a new and a splendourus lustre, that had wetted the earth with its glossy lustre.

अथ तां स्नपयामास, जटिलीभूतकुन्तलाम् ॥
जलैः सुगन्धिभिर्देवी, बलाद्वल्कलचीरिवत् ॥५९१॥

अन्वय :- अथ देवी जटिलीभूतकुन्तलां तां वल्कलचीरिवत् सुगन्धिभिः जलैः बलात् स्नपयामास ॥५९१॥

विवरणम् :- *अथ अनन्तरं देवी चन्द्रयशाः न जटिलाः अजटिलाः। अजटिलाः जटिलाः भूता जटिलीभूताः। जटिलीभूताः कुन्तलाः केशाः यस्याः सा जटिलीभूतकुन्तला तां जटिलीभूतकुन्तलां तां दमयन्तीं वल्कलस्य चीरिः वस्त्रं वल्कलचीरिः तां वल्कलचीरिम् इव सुष्ठुः गन्धः येषां तानि सुगन्धीनि तैः सुगन्धिभिः जलैः बलात् स्नपयामास अस्नपयत् ॥५९१॥*

सरलार्थ :- अथ चन्द्रयशाः देवी जटिलीभूतकेशां दमयन्तीं वल्कलचीरिम् इव सुगन्धिभिः जलैः बलात् अस्नपयत् ॥५९१॥

गुजराती :- પછી જટા જેવા કેશ વાળી દમયંતીને ચંદ્રયશારાણીએ વલ્કલચીરિની પેઠે પરાણે સુગંધી જલથી સ્નાન કરાવ્યું.॥૫૯૧॥

हिन्दी :- फिर जटा जैसे बालोंवाली दमयंती को चंद्रयशाराणी ने वल्कलचीरि के समान सुगंधी जलसे स्नान कराया ॥५९१॥

मराठी .- नंतर जटेसारखे केस झालेल्या दमयंतीला चंद्रयशाराणीने वल्कलचीरि सारख्या सुगंधी जलाने स्नान घातले. ॥५९१॥

English :- Then queen washed her long tresses with scented water which had become dirty and uncared, like a congregation of huns, named valkachirini who adom themselves with the bark of trees.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवदूष्ये इवादुष्ये, शेषनिर्मोकनिर्मले ॥
वस्त्रे भीमसुतां देवी, स्नेहला पर्यधापयत् ॥५९२॥

अन्वय :- स्नेहला देवी देवदूष्ये इव अदूष्ये शेषनिर्मोकनिर्मले वस्त्रे भीमसुतां पर्यधापयत् ॥५९२॥

विवरणम् :- *स्नेहला स्नेहयुक्ता देवी चन्द्रयशाः देवदूष्ये वस्त्रे इव अदूष्ये दोषरहिते शेषस्य निर्मोकः शेषनिर्मोकः, शेषनिर्मोकवत् निर्मले शेषनिर्मोकनिर्मले वस्त्रे भीमस्य सुता भीमसुता तां भीमसुतां दमयन्तीं पर्यधापयत् ॥५९२॥*

सरलार्थ :- स्नेहयुक्ता देवी देवदूष्ये इव दोषरहिते शेषनिर्मोकनिर्मले वस्त्रे दमयन्तीं पर्यधापयत् ।

गुजराती :- પછી તે પ્રેમાળ રાણીએ દેવદૂષ્ય સરખાં નિર્દોષ, તથા શેષનાગની કાંચળીસરખાં નિર્મલ વસ્ત્રો દમયંતીને પહેરાવ્યાં. ॥૫૯૨॥

हिन्दी :- फिर उस प्रेमल राणीने देवदूष्य के समान निर्दोष तथा शेषनाग की कांचली के समान निर्मल वस्त्र दमयंती को पहनाए ॥५९२॥

मराठी :- नंतर त्या प्रेमळ राणीने देवदूष्यासारखी निर्दोष तसेच शेषनागाच्या कांते सारखी निर्मल तलम वस्त्रे दमयंतीला नेसविलीं. ॥५९२॥

English :- Then the Kind - hearted queen made Damyanti to wear clothes like the clothes of the Gods which were impeccable and serene as the slough of the shesha serpent.

निर्वृत्युत्साहहर्षाद्यैः, सौविदाद्यैरिवान्विता ॥
दमयन्त्या समं देवी, नृपास्थानममण्डयत् ॥५९३॥

अन्वय :- सौविदाद्यैः इव निर्वृत्युत्साहहर्षाद्यैः अन्विता देवी दमयन्त्या समं नृपास्थानम् अमण्डयत् ॥५९३॥

विवरणम् :- *सौविदः आद्यः येषां ते सौविदाद्याः तैः सौविदाद्यैः दण्डधरचामरधराद्यैः अधिकारिभिः इव निर्वृतिश्च उत्साहश्च हर्षश्च निर्वृत्युत्साहहर्षाः तैः निर्वृत्युत्साहहर्षाद्यैः अन्विता युक्ता देवी चन्द्रयशाः दमयन्त्या समं सार्द्धं नृपस्य आस्थानं सभामण्डपं नृपास्थानम् सभामण्डपं अमण्डयत् अशोभयत् ॥५९३॥*

सरलार्थ :- दण्डधरचामरधरायैः अधिकारिभिः इव निर्वृत्युत्साहहर्षायैः युक्ता चन्द्रयशाः देवी दमयन्त्या सार्द्धं नृपसभामण्डपम् अशोभयत् ॥५९३॥

ગુજરાતી :- દંડ-ચામર ધારણ કરનારા સેવકો જેમ રાજ્યસભાને શોભાવે છે તેમ ઉત્સાહ તથા હર્ષ આદિથી યુક્ત તે રાણી દમયંતીને સાથે લઈને રાજસભાને શોભાવવા લાગી.॥૫૯૩॥

हिन्दी :- दंडधारी-चामरधारी आदि अधिकारियों से जैसी राजसभा शोभा देती है, वैसे ही सुख, उत्साह-हर्ष आदि भावों से युक्त चन्द्रयशा राणीने दमयन्ती के साथ राजसभा को शोभायमान की। ॥५९३॥

मराठी :- नंतर दंडधर, चामरधर इ. अधिकाऱ्यांनी जसी राजसभा शोभते. त्याप्रमाणे सुख-समाधान, उत्साह, हर्ष आदि गुणांनी युक्त असलेल्या चन्द्रयशाराणीने दमयन्तीसह राजसभेत जाऊन राजसभेला शोभा आणली. ॥५९३॥

English :- The queen than took Damyanti to the royal court with great pomp and style to increase the radiance and the shine of the royal court without any anxiety or sorrow but with great enthusium and merriment.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदा चास्तं गतः पूषा, गगनाङ्गणदीपकः ।।
तमः क्षुधितरक्षोव - ज्जग्रसे सकलं नभः ।।५९४।।

अन्वय :- तदा गगनाङ्गणदीपकः पूषा अस्तं गतः। क्षुधितरक्षोवत् तमः सकलं नभः जग्रसे ।।५९४।।

विवरणम् :- तदा तस्मिन् समये गगनम् एव अङ्गणं गगनाङ्गणं तस्मिन् दीपकः गगनाङ्गणदीपकः आकाशाङ्गणदीपकः पूषा सूर्यः अस्तं गतः। क्षुधा अस्य सञ्जाता इति क्षुधितम्। क्षुधितं च तत् रक्षः च क्षुधितरक्षः क्षुधितरक्षः इव तमः अन्धकारः सकलं नभः आकाशं जग्रसे अग्रसत् ।।५९४।।

सरलार्थ :- तस्मिन् समये आकाशाङ्गणदीपकः सूर्यः अस्तं गतः । बुभुक्षितः राक्षसः यथा सर्वान् ग्रसते तथा अन्धकारः अखिलं जगत् अग्रसत् ।।५९४।।

ગુજરાતી :- તે વખતે આકાશના પ્રદેશોને તેજસ્વી કરનારો સૂર્ય અસ્ત પામ્યો. તથા ક્ષુધાતુર થયેલા રાક્ષસની પેઠે અંધકાર સમસ્ત આકાશને ગળી ગયો. ।।૫૯૪।।

हिन्दी :- उसी वक्त आसमान के प्रदेश को तेजस्वी करनेवाले सूर्य का अस्त हो गया। तथा क्षुधातुर बने हुए राक्षस के समान अंधकारने समस्त आसमान को निगल लिया ।।५९४।।

मराठी :- त्याच वेळी आकाश प्रदेशाला तेजस्वी करणाऱ्या सूर्याचा अस्त झाला, आणि क्षुधातुर झालेल्या राक्षसाप्रमाणे अंधकाराने संपूर्ण आकाशाला गिळून येतले. ।।५९४।।

English :- AT that time, the sun which had bought radiance and blaze to the heavenly kingdoms, began to sink and suddenly the darkness swallowed the whole sky in one gulp which seemed like a Goblin gulping down the darkness as it was famished due to hunger.

परं तिमिरलेशोऽपि, नाविशन्नृपपर्षदि ॥
निवारित इव द्वाःस्थै वैदर्भीतिलकांशुभिः ॥५९५॥

अन्वय :- परं द्वाःस्थैः इव वैदर्भीतिलकांशुभिः निवारितः तिमिरलेशः अपि नृपपर्षदि नाविशत् ॥५९५॥

विवरणम् :- *परं किन्तु द्वारे तिष्ठन्ति इति द्वाःस्थाः तैः द्वाःस्थैः द्वारपालैः इव विदर्भस्य अपत्यंस्त्री वैदर्भी विदर्भराजपुत्री । वैदर्भ्याः तिलकः वैदर्भीतिलकः । वैदर्भीतिलकस्य अंशवः वैदर्भीतिलकांशवः तैः वैदर्भीतिलकांशुभिः किरणैः निवारितः तिमिरस्य अन्धकारस्य लेशः तिमिरलेशः अपि अन्धकारलेशः अपि नृपस्य पर्षद् नृपपर्षद् तस्यां नृपपर्षदि राजसभायांन अविशत् प्राविशत् ॥५९५॥*

सरलार्थ :- किन्तु द्वारपालैः इव दमयन्तीतिलककिरणैः निवारितः अन्धकारलेशः अपि राजसभायां न प्राविशत् ॥५९५॥

ગુજરાતી :- પરંતુ દ્વારપાલસરખા દમયંતીના તિલકના કિરણોએ જાણે અટકાવ્યો હોય તેમ અંધકાર લેશમાત્ર પણ રાજની સભામાં દાખલ થયો નહીં. ॥૫૯૫॥

हिन्दी :- परंतु द्वारपालो के समान दमयंती के तिलक से निकले हुए किरणों से मानो अटकाया गया अंधकार लेशमात्र भी राजसभा में दाखिल नहीं हुआ ॥५९५॥

मराठी :- परंतु द्वारपालाप्रमाणे दमयंतीच्या तिलकातून निघालेल्या किरणांनी अडविल्यामुळे अंधःकाराचा कण सुद्धा राजसभेत प्रवेश प्राप्त करू शकला नाही. ॥५९५॥

English :- Then just as the door-keeper obstructs a person to identify his identity, in the same way Damyanti's emblem obstructed the darkess in the royal court when she entered by even casting off every shadow.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

व्याजहार ततःक्ष्माभृ - त्तावदस्तंगतोऽर्यमा ।।
विना दीपं विनाग्निं च, कथं तेजोऽतिभास्वरम् ।।५९६।।

अन्वय :- ततः क्षमाभृत् व्याजहार-अर्यमा तावत् अस्तंगतः। दीपं विना अग्निं विना च अतिभास्वरं तेजः कथम् अस्ति ।।५९६।।

विवरणम् :- *ततः तदनन्तरं क्षमां पृथ्वीं बिभर्ति इति क्षभाभृत् नृपः व्याजहार अवदत् अर्यमा सूर्यः तावत् अस्तं गतः। दीपं दीपकं विना अग्निं विना च अतिभास्वरम् अतिप्रकाशमानं तेजः प्रकाशः कथम् अस्ति ।।५९६।।*

सरलार्थ :- तदनन्तरं नृपः अवदत्-सूर्यः तावत् अस्तंगतः । दीपं विना अग्निं विना च अतिभास्वरः प्रकाशः कथम् अस्ति ।।५९६।।

ગુજરાતી :- પછી રાજાએ કહ્યું કે, સૂર્ય તો હવે અસ્ત પામ્યો છે, તો પછી દીપક તથા અગ્નિ વિના આ અતિ ચળકાટવાળું થાનું તેજ છે?।।૫૯૬।।

हिन्दी :- फिर राजाने कहा कि, "सूर्य का तो अस्त हो गया है, फिर भी दीपक तथा अग्नि बिना चमकनेवाला यह तेज कैसा है?"।।५९६।।

मराठी :- नंतर राजा म्हणाला, "सूर्याचा तर अस्त झाला आहे, तरीसुध्दा दिव्यावाचून व अग्निशिवाय अत्यंत तेजस्वी प्रकाश कसा?"।।५९६।।

English :- Then the king asked the courtiers to findout the of this illumination which is blazing without a flame, when the sun has already been set.

ततो राज्ञ्या नरेन्द्रस्य, दर्शितः स्मेरया दृशा।
दमयन्ती ललाटार्कस्तेजोरत्नमहानिधिः॥५९७॥

अन्वय :- ततः राज्ञ्या स्मेरया दृशा तेजोरत्नमहानिधिः दमयन्ती-ललाटार्कः नरेन्द्रस्य दर्शितः ॥५९७॥

विवरणम् :- *ततः तदनन्तरं रा या चन्द्रयशसा स्मेरया विकसितया दृशा दृष्ट्या तेजांसि एव रत्नानि तेजोरत्नानि। महान् चासौ निधिश्च महानिधिः। तेजोरत्नानां महानिधिः तेजोरत्नमहानिधिः; तेजोमहानिधिः दमयन्त्याः ललाटं दमयन्तीललाटम्। दमयन्तीललाटे अर्कः सूर्यः दमयन्तीललाटार्कः नराणाम् इन्द्रः नरेन्द्रः तस्य नरेन्द्रस्य नरेन्द्राय दर्शितः ॥५९७॥*

सरलार्थ :- तदनन्तरं राज्ञ्या विकसितया दृष्ट्या तेजोमहानिधिः दमयन्तीललाटार्कः नरेन्द्रस्य दर्शितः ॥५९७॥

गुजराती :- पछी राणीए राजाने प्रफुल्लित चक्षु वडे तेजरुपी रत्नना महान भंडार सरखो दमयंतीनो तिलकरुपी सूर्य देखाडयो. ॥५९७॥

हिन्दी :- फिर रानीने राजा को प्रफुल्लित नेत्रों से तेजरुपी रत्नो के महान भंडार समान दमयंती का तिलक रूपी सूर्य दिखाया ॥५९७॥

मराठी :- नंतर राणीने प्रफुल्लित डोळ्यानी तेजस्वी रत्नांचे जणू महान भांडारच असा दमयंतीच्या कपाळावर असलेला तिलक (टिळा) रूपी सूर्य राजाला दाखविला.॥५९७॥

English :- Then the queen with eyes swollen with utmost bliss shawed the forehead of Damyanti which shone as the sun which seemed like the lustre and glamour of a pot filled with sapphires and precious stones.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्प्रभावमथ ज्ञातुं, तं नृपः पाणिना प्यधात् ॥
तदैव क्षितिपास्थानी तमःखानिरिवाभवत् ॥५९८॥

अन्वय :- अथ नृपः तत्प्रभावं ज्ञातुं पाणिना तं प्यधात् । तदैव क्षितिपास्थानी तमः खानिः इव अभवत् ॥

विवरणम् :- *अथ नॄन् पाति इति नृपः भूपः। तस्याः दमयन्त्याः प्रभावं तत्प्रभावं ज्ञातुम् अवबोद्धुं पाणिना हस्तेन तं ललाटं प्यधात् पिहितवान् । तदा एव तस्मिन् एव समये क्षितिं पाति इति क्षितिपः भूपः । क्षितिपस्य आस्थानी क्षितिपास्थानी भूपपरिषद् तमसाम् अन्धकाराणां खानिः तमःखानिः इव अभवत् अभूत् । अन्धकारमयी अभूत् ॥५९८॥*

सरलार्थ :- अथ नृपः तत्प्रभावम् बोद्धुं हस्तेन तं ललाटं प्यधात्। तदा एव भूपपरिषद् अन्धकाराणां खानिः इव अभवत् अन्धकारमयी अभूत् ॥५९८॥

ગુજરાતી :- પછી તેનું મહાત્મ્ય જાણવા માટે રાજાએ તેણીના તે તિલકને (પોતાના) હાથ વડે આચ્છાદિત કર્યું. તે જ ક્ષણે રાજસભા અંધકારની ખાણ સારખી થઈ ગઈ. ॥૫૯૮॥

हिन्दी :- फिर उसका प्रभाव जानने के लिये राजाने अपने हाथ से उसके ललाट को ढाँक दिया। उसी क्षण राजसभा अंधकार की खाई समान बन गई ॥५९८॥

मराठी :- मग दमयन्तीचा प्रभाव जाणण्याकरिता राजाने आपल्या हाताने तिचे कपाळ झाकले. त्याचक्षणी राजसभा अंधकारमय झाली.॥५९८॥

English :- Then the king in order to check the effect of the emblem, covered it up with his hand. Then atonce the royal court was swallowed by darkness, which seemed like a mine of darkness.

अपसार्य ततः पाणिं, पृष्टा भैमी महीभुजा ।।
राज्यभंशादिनिःशेषं, रुदत्याख्यन्नताननाः ।।५९९।।

अन्वय :- ततः पाणिम् अपसार्य महीभुजा पृष्टा भैमी नतानना रुदती सती राज्यभ्रंशादिनिःशेषम् आख्यत् ।।५९९।।

विवरणम् :- ततः तदनन्तरं पाणिं हस्तम् अपसार्य महीं भुङ्क्ते भुनक्ति वा महीभुक् तेन महीभुजा पृष्टा भीमस्य अपत्यं स्त्री भैमी दमयन्ती नतम् आननं यस्याः सा नतानना नतमस्तका रुदती च सती राज्यात् भ्रंशः राज्यभ्रंशः; राज्यभ्रंशः आदौ यस्य तद् राज्यभ्रंशादि निःशेषम् अखिलं वृत्तम् आख्यात् अकथयत् ।।५९९।।

सरलार्थ :- तदनन्तरं हस्तम् अपसार्य नृपेण पृष्टा दमयन्ती नतमस्तका रुदती सती राज्यभ्रंशादि अखिलम् आख्यत् ।।५९९।।

ગુજરાતી :- પછી હાથ ખસેડી લેઈને રાજાએ પૂછવાથી દમયંતીએ રાજ્યભ્રંશઆદિક સઘળો વૃત્તાંત નીચું મુખ રાખીને રડતાં રડતાં કહી સંભળાવ્યો. ।।૫૯૯।।

हिन्दी :- फिर हाथ हटा कर राजा के पूछने पर दमयंती ने राज्यभ्रंश आदि से लेकर सब वृत्तांत सिर झुकाकर रोते हुए कह सुनाया ।।५९९।।

मराठी :- नंतर हात बाजूला सारून राजाने विचारले - तेव्हा दमयंतीने राज्यभ्रंशापासून संपूर्ण वृत्तांत खाली मान घालून रडत रडत ऐकविला.।।५९९।।

English :- Then the king took off his hand and asked her about the bows and whys of her being drowned in such a crises. At this Damyanti told him the whole biography from how they lost the kingdom to how she landed here, with a drooping head and with eyes filled with tears.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रमृज्य स्वोत्तरीयेण, दृशौ राज्ञाप्यबोधि सा ॥
मारोदीः पुत्रिके दैवं, कस्मै न प्रभवत्यदः ॥६००॥

अन्वय :- राज्ञा अपि स्वोत्तरीयेण दृशौ प्रमृज्य सा अबोधि हे पुत्रिके! मारोदीः अदः दैवं कस्य न प्रभवति ॥६००॥

विवरणम् :- राज्ञा अपि नृपेण अपि स्वस्य उत्तरीयं स्वोत्तरीयं तेन स्वोत्तरीयेण वस्त्रेण दृशौ नेत्रे प्रमृज्य सा दमयन्ती अबोधि । अबोध्यत हे पुत्रिके ! मा रोदीः मा रुदिहि । अदः इदं दैवं कस्य न प्रभवति । दैवं सर्वस्यापि प्रभवति ॥६००॥

सरलार्थ :- नृपेण अपि स्वोत्तरीयेण वस्त्रेण दृशौ प्रमृज्य सा दमयन्ती अबोध्यत - हे पुत्रिके! मा रुदिहि इदं दैवं कस्य न प्रभवति ॥६००॥

ગુજરાતી :- પછી રાજાએ પણ પોતાના દુપટ્ટાવડે (ખેસીની) આંખો લુછીને પ્રતિબોધ આપ્યો કે, હે પુત્રી! તું રડ નહીં? કેમ કે દૈવ કોનો પરાભવ કરતું નથી? ॥૬૦૦॥

हिन्दी :- फिर राजाने अपने दुपट्टे से उसकी आँखे पोंछते हुए, प्रतिबोध दिया कि, "हे पुत्री! तुम रोओ मत? क्यों कि किस्मत किस का पराभव नही करती?"॥६००॥

मराठी :- नंतर राजाने आपल्या अंगावरील दुपट्ट्याने (शेल्याने) तिचे डोळे पुसत तिला बोध दिला की, "हे मुली! तूं रडू नकोस? कारण देव कोणाचा पराभव करीत नाही?"॥६००॥

English :- Then the king wipped off Damyanti weeping eyes with his long scarf and advised her to stop weeping as the Godden of dustiny does'nt accept defeat.

अत्रान्तरे सुरः कोऽपि स्वर्गादागत संसदि ॥
दमयन्तीं प्रणम्योचे मुकुटीकृतपाणिकः ॥६०१॥

अन्वय :- अत्रान्तरे कोऽपि सुरः स्वर्गात् संसदे आगत्य दमयन्तीं प्रणम्य मुकुटीकृतपाणिकः ऊचे ॥६०१॥

विवरणम् :- *अत्रान्तरे एतस्मिन् अन्तरे कोऽपि सुरः देवः स्वर्गात् देवलोकात् संसदि सभायाम् आगत्य दमयन्तीं प्रणम्य वन्दिता न मुकुटौ अमुकुटौ । अमुकुटौ मुकुटौ कृतौ मुकुटीकृतौ। मुकुटीकृतौ पाणी हस्तौ येन सः मुकुटीकृतपाणिकः मुकुटीकृतहस्तः बद्धाञ्जलिः ऊचे अभिदधे ॥६०१॥*

सरलार्थ :- अत्रान्तरे कोऽपि देवः स्वर्गात् सभावाभागतः । दमयन्तींप्रणम्य बद्धाञ्जलिः अवदत् ॥६०१॥

ગુજરાતી :-એવામાં કોઇક દેવ સ્વર્ગમાંથી સભાની અંદર આવી, દમયંતીને નમીને, તથા પોતાના બન્ને હાથોને મુકુટરુપ (જોડીને) કહેવા લાગ્યો કે, ॥૬૦૧॥

हिन्दी :- इतने में कोई देव स्वर्ग में से सभा के अंदर आया और दमयंती के सामने झुककर और अपने दोनो हाथ जोडकर कहने लगा कि,॥६०१॥

मराठी :- इतक्यात कोणी एक देव स्वर्गातून राजसभेत आला व दमयंतीला नमस्कार करून दोन्ही हात जोडून म्हणाला-॥६०१॥

English :-

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हे मातः ! पिङ्गलश्चौरः पर्यव्राज्यत यस्तया ।
पत्तनं तापसपुरं सोऽन्यदा विहरन्नगात् ॥६०२॥

अन्वय :- हे मातः? त्वया यः पिङ्गलः चौरः पर्यव्राज्यत । सः अन्यदा विहरन् तापसपुरं पत्तनम् अगात् ॥६०२॥

विवरणम् :- हे मातः! हे जननि! त्वया यः पिङ्गलः नाम चौरः स्तेनः पर्यव्राज्यत परिव्राट्कृतः । संयमं ग्राहितः । सः परिव्राट् अन्यदा एकस्मिन् समये विहरन् विहारं कुर्वन् सन् तापसपुरं नाम पत्तनम् नगरम् अगात् अयात् ॥६०२॥

सरलार्थ :- हे मातः? त्वया यः पिङ्गलः नाम चौरः प्रव्रज्यां ग्राहितः । सः एकदा विहारं कुर्वन् तापसपुरं नाम नगरम् अयात् ॥६०२॥

ગુજરાતી :- હે માતાજી! તમે જે પિંગલ નામના ચોરને દીક્ષા અપાવી હતી, તે એક વખતે વિહાર કરતો તાપસપુર નામના નગરમાં ગયો.॥૬૦૨॥

हिन्दी :- हे माताजी! आपने जिस पिंगल नामक चोर को दीक्षा दिलायी थी वह विहार करते हुए एक समय तापसपुर नामक नगरमे पहुंचा ॥६०२॥

मराठी :- हे माते! तू ज्या पिंगलनावाच्या चोराला दीक्षा दिली होती, तो एक वेळेस विहार करीत तापसपुर नावाच्या नगरात गेला.॥६०२॥

English :- Then the God addressing Damyanti as a mother said to her that the robber named Pingal whom she had bestowed the sacrament of Priesthood, one day reached the city of Tapaspur after wandering a lot.

तस्थौ बहिः प्रदेशे स तत्र पअतिमया निशि ॥
चितोत्थश्च तदा दावस्तं सेवितुमिवाभ्यगात् ॥६०३॥

अन्वय :- सः तत्र बहिः प्रदेशे निशि प्रतिमया तस्थौ । तदा चितोत्थः दावः तं सेवितुमिव अभ्यगात् ॥६०३॥

विवरणम् :- सः पिङ्गलः परिव्राट् तत्र तस्मिन् नगरे बहिः प्रदेशे बहिर्गते प्रदेशे निशि निशायां रात्रौ प्रतिमया कायोत्सर्गेण तस्थौ तस्थिवान् । तदा तस्मिन् समये चितायाः उत्तिष्ठतीति चितोत्थः दावः दावानलः तं कायोत्सर्गं स्थितं परिव्राजं सेवितुम् इव (उत्प्रेक्षायाम्) अभ्यगात् तत्समीपम् अगात् ॥६०३॥

सरलार्थ :- सः पिङ्गलः परिव्राट् तस्मिन् नगरे बाह्यप्रदेशे रात्रौ कायोत्सर्गेण अतिष्ठत् । तदा चितायाः उत्थः दावानलः तं सेवितुम् इव अभ्यगात् ॥६०३॥

ગુજરાતી :-ત્યાં રાત્રિએ બહારના ભાગમાં તે કાયોત્સર્ગ ધ્યાનમાં રહ્યો. એવામાં (કોઈક) ચિતામાંથી ઉત્પન્ન થયેલો દાવાનલ જાણે તેની સેવા કરવા માટે આવ્યો હોય તેમ નજદીક નજદીક આવ્યો. ॥૬૦૩॥

हिन्दी :- उस रात को नगर के बाहरी भाग में वह कायोत्सर्ग ध्यान में रहा था । इतने में (किसी) चिता से उत्पन्न दावानल मानो उनकी सेवा करने के लिए ही नजदीक आया॥ ॥६०३॥

मराठी :- त्या नगरात बाहेरच्या प्रदेशात रात्री तो कायोत्सर्ग ध्यानात लीन झाला. इतक्यात चितेमधून उत्पन्न झालेला दावानल जणू त्याची सेवा करण्यासाठी त्याच्या जवळ आला. ॥६०३॥

English :- Then one night when he was standing in deep mediation, at the outskirts of the city, there was fire confragation germinating from a funeral pgre, which seemed like it was proceeding him, in order to serve him.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तेन दन्दह्यमानोऽपि धर्मध्यानामृतं पिबन् ।।
अविदन्निव तत्तापं शान्तचेताः समाहितः ।।६०४।।

अन्वय :- तेन दन्दह्यमानः अपि धर्मध्यानामृतं पिबन् तत्तापम् अविदन् इव शान्तचेताः समाहितः ।।६०४।।

विवरणम् :- तेन चितोत्थदावानलेन अतिशयेन दह्यमानः दन्दह्यमानः अपि अतिशयेन ज्वलन् अपि धर्मस्य ध्यानं धर्मध्यानम् । धर्मध्यानमेव अमृतं धर्मध्यानामृतं पिबन् तस्य तापः तत्तापः, तं तत्तापं चितोत्थदावानलतापम् अविदन् अजानन् इव शान्तं चेतः मनः यस्य सः शान्तचेताः शान्तमनाः समाहितः समाधौस्थितः ।।६०४।।

सरलार्थ :- तेन दावानलेन भृशं दह्यमानः अपि धर्मध्यानामृतं पिबन् तस्य दावानलस्य तापम् अजानन् इव शान्तमनाः समाधौ स्थितः (अविमेण सम्बन्धः।) ।।६०४।।

ગુજરાતી :- તેથી દાઝ્યા છતાં પણ ધર્મધ્યાનરુપી અમૃતને પીતો એવો તે મુનિ તેના તાપને જાણે ન જાણતો હોય તેમ શાંત મનથી સમાધિભાવે રહ્યો.।।૬૦૪।।

हिन्दी :- उससे जलते हुए भी धर्मध्यानरूपी अमृत को पीते हुए वह मुनि उनके ताप को मानो न जानते हो, इसप्रकार शांत मन से समाधिपूर्वक रहे। ।।६०४।।

मराठी :- त्या वणव्याने जळत असून सुद्धा धर्मध्यान रुपी अमृताचे पान करीत तो मुनि जणू दावाअलाचा ताप न जाणताच शांत मनाने समाधीत स्थिर राहिला. ।।६०४।।

English :- So he burnt, but due to deep maditations he ignore fire and remain in "Samadhi"

स्मृतपञ्चनमस्कारः कुर्वन्नाराधनाविधिम् ॥
देहमुत्सृज्य स स्वर्गे बभूवान् भासुरः सुरः॥६०५॥

अन्वय :- स्मृतपञ्चनमस्कारः आराधनां कुर्वन् सः देहम् उत्सृज्य स्वर्गे भासुरः सुरः बभूवान् ॥६०५॥

विवरणम् :- पञ्च च ते नमस्काराः च पञ्चनमस्कासः । स्मृताः पञ्चनमस्कासः येन सः स्मृतपञ्चनमस्कारः स्मृतपञ्चपरमेष्ठिनमस्कारः आराधनायाः विधिः आराधनाविधिः तम् आराधनाविधिं कुर्वन् विदधत् सः देहं शरीरम् उत्सृज्य सन्त्यज्य सन्त्यज्य स्वर्गे भासुरः तेजस्वी सुरः देवः बभूवान् बभूव ॥६०५॥

संस्कृतार्थ :- पञ्चपरमेष्ठिनमस्कारं स्मृत्वा आराधनाविधिं कुर्वन् सः देहम् सन्त्यज्य स्वर्गे भासुरः सुरः बभूव ॥६०५॥

ગુજરાતી :- પંચપરમેષ્ઠિ-નમસ્કારનું સ્મરણ કરીને, આરાધનાની વિધિ કરતા મુનિ શરીરને ત્યજીને દેવલોકમાં દેદીપ્યમાન દેવ થયા. ॥૬૦૫॥

हिन्दी :- पंचपरमेष्ठि-नमस्कारका स्मरण कर, आराधना की विधि करते हुए, वह मुनि शरीर को त्यागकर देवलोक में दैदीप्यमान देव हुए ॥६०५॥

मराठी :- पंचपरमेष्ठींना नमस्कार करून विधिनुसार आराधना करीत तो मुनी देहाचा त्याग करून देवलोकांत तेजस्वी देव झाला. ॥६०५॥

English :- Thus the monk doing 'Panch Parmesthi Aradhna" died and become God

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ततोऽवधि प्रयोगेण ज्ञात्वा त्वामुपकारिणीम्।।
प्राग्भवे प्राणदानेन प्रव्रज्याग्राहणेन च ।।६०६।।

अन्वय :- ततः अवधिप्रयोगेण प्राग्भवे प्राणदानेन प्रव्रज्याग्राहणेन च त्वाम् उपकारिणीं ज्ञात्वा ---(अग्रिमेण सम्बन्धः) ।।६०६।।

विवरणम् :- *ततः तदनन्तरम् अवधेःज्ञानम् अवधिज्ञानम्। अवधिज्ञानस्य प्रयोगः अवधिप्रयोगः, तेन अवधिप्रयोगेण अवधिज्ञानप्रयोगेण प्राक्चासौ भवश्चप्राग्भवः तस्मिन् प्राग्भवे पूर्वभवे प्राणानां दानं प्राणदानं तेन प्राणदानेन प्रव्रज्यायाः दीक्षायाः ग्राहणं प्रव्रज्याग्राहणं तेन प्रव्रज्याग्राहणेन च ताम् उपकरोत्येवंशीला उपकारिणी, ताम् उपकारिणीं ज्ञात्वा विदित्वा---(अग्रिमेण सम्बन्धः।) ।।६०६।।*

सरलार्थ :- तदनन्तरम् अवधिज्ञानतः पूर्वभवे प्राणदानेन प्रव्रज्याग्राहणेनच त्वम् उपकारिणी असि इति ज्ञात्वा---=(अग्रिमेण सम्बन्धः।) ।।६०६।।

ગુજરાતી :- પછી અવધિજ્ઞાનના પ્રયોગથી, પૂર્વભવમાં પ્રાણ બચાવવાથી તથા દીક્ષા અપાવવાથી તમોને ઉપકારી જાણીને,।।૬૦૬।।

हिन्दी :- फिर अवधिज्ञान के प्रयोग से पूर्वभव में प्राण बचाने और दीक्षा दिलाने से आपको उपकारी जानकर,।।६०६।।

मराठी :- मग अवधिज्ञानाच्या प्रयोग करून पूर्व जन्मी माझे प्राण वाचवून मला दीक्षा दिल्यामुळे तू माझ्यावर उपकार केले आहेत. असें मी जाणले. ।।६०६।।

English :-

सोऽहमागां प्रणन्तुं त्वामधमर्णोऽस्मि तेऽनघे ।।
देवि! दिव्यर्द्धिरिषा मे सर्वाऽपि त्वत्प्रसादतः ।।६०७।।

अन्वय :- हे अनघे! सः अहं त्वां प्रणन्तुम् आगाम् । अहं ते अधमर्णः अस्मि । हे देवि! एषा सर्वा अपि मे दिव्यर्द्धिः त्वत्प्रसादतः अस्ति ।।६०७।।

विवरणम् :- न विद्यते अघं पापं यस्याः सा अनघा, तत्सम्बुद्धौ हे अनघे! हे निष्पापे! स पिङ्गलदेवः अहं त्वां प्रणन्तुम् आगाम् आयाम् । अहं ते तव अधमर्णः ऋणी अस्मि । हे देवि! एषा दृश्यमाना सर्वा अपि मे मम दिव्याचासौ ऋद्धिश्च दिव्यर्द्धिः दिव्या समृद्धिः तव प्रसादः त्वत्प्रसादः तस्मात् त्वत्प्रसादतः अस्ति वर्तते ।।६०७।।

सरलार्थ :- हे अनघे देवि! सः पिङ्गलदेवः अहं त्वां प्रणन्तुमागतः अस्मि । अहं तव ऋणी अस्मि । एषा सर्वा मम दिव्या समृद्धिः त्वत्प्रसादतः एव अस्ति ।।६०७।।

ગુજરાતી :- તે હું પિંગલદેવ તમોને નમવામાટે આવ્યો છું, હે નિર્મલ દમયંતી! હું તમારો કરજદાર છું, અને મારી આ સઘળી દેવસંબંધી સમૃદ્ધી આપની કૃપાથી જ (મને પ્રાપ્ત થઇ છે.) ।।૬૦૭।।

हिन्दी :- ऐसा मैं पिंगलदेव आपको प्रणाम करने के लिए आया हूँ, हे निर्मल दमयंती! मैं आपका कर्जदार हूँ, और मेरी ये सब दैविक समृद्धी आपकी कृपा से ही (मुझे प्राप्त हुई है।) ।।६०७।।

मराठी :- तो मी पिंगलदेव तुम्हांला नमस्कार करण्यासाठी आलो आहे. हे निर्मल दमयंती! मी तुमचा ऋणी आहे, माझी ही सगळी दिव्य समृध्दी तुमच्या कृपेनेच मला प्राप्त झाली आहे. ।।६०७।।

English :- So addressing Damyanti as a pure and a immaculate being, Pingal the god says that he had arrived there to pay his homage to Damyanti when he had known that it was due to her, intervening he had got the opportunity to attain this position of a god.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यदि नाऽबोधयिष्यस्त्यं तदा मां करुणानिधिः ।
ततो मातर्दुरात्माऽहमभ्रमिष्यं कुयोनिषु ॥६०८॥

अन्वय :- तदा करुणानिधिः त्वं मां यदि न अबोधयिष्यः ततः हे मातः! दुरात्मा अहं कुयोनिषु अभ्रमिष्यम् ॥६०८॥

विवरणम् :- हे मातः! तदा तस्मिन् समये करुणायाः निधिः करुणानिधिः दयानिधिः त्वं मां यदि न अबोधयिष्यः बोधं न अकरिष्यः ततः तर्हि दुष्टः आत्मा यस्य सः दुरात्मा अहं कुत्सिताश्च ताः योनयश्च कुयोनयः तासु कुयोनिषु तिर्यङ्नरकादियोनिषु अभ्रमिष्यम् ॥६०८॥

सरलार्थ :- हे मातः! तदा करुणानिधिः त्वं मां यदि न अबोधयिष्यः तर्हि दुरात्मा अहं कुत्सितयोनिषु अभ्रमिष्यम् ॥६०८॥

ગુજરાતી :- દયાના ભંડારરૂપ એવાં તમોએ તે વખતે મને જો પ્રતિબોધ ન આપ્યો હોત, તો હે માતા! દુષ્ટ બુદ્ધિવાળો હું નઠારી યોનિઓમાં ભમ્યો હોત. ॥૬૦૮॥

हिन्दी :- दया के भंडार आपने जो मुझे उस समय प्रतिबोधित न किया होता, तो हे माताजी! दुष्ट बुद्धिवाला मैं कुत्सित योनि में ही भ्रमण कर रहा होता॥ ॥६०८॥

मराठी :- हे दयेचासागर असलेल्या दमयन्ती माते! तू जर मला तेव्हा प्रतिबोध केला नसता तर दुष्ट मी तिर्यंच-नरक आदि कुयोनीत भटकत राहिलो असतो. ॥६०८॥

English :- **Addressing Damyanti as a mother and a repertory that overflows with humanity and compassion, Pingal said that it was due to her that he was a God and of she would"nt have intervened at that moment and givn him a picce of her mind, than he would have still been wandering about in the animal world or in hell or in the organ of generation.**

इत्युक्त्वा तत्पुरः सप्तस्वर्णकोटिप्रवर्षणात् ।
गुरुपूजामिवाधाय स्वर्ययौ पिङ्गलामरः ॥६०९॥

अन्वय :- पिङ्गलामरः इति उक्त्वा तत्पुरः सप्तस्वर्णकोटिप्रवर्षणात् गुरुपूजाम् इव आधाय स्वः ययौ ॥६०९॥

विवरणम् :- *पिङ्गलः अमरः देवः इत्रति पूर्वोक्तम् उक्त्वा भाषित्वा तस्याः दमयन्त्याः पुरः स्वर्णानां सुवर्णमुद्राणां निष्काणां कोटयः स्वर्णकोटयः सप्त च ताः स्वर्णकोटयश्च सप्तस्वर्णकोटयः । सप्तस्वर्णकोटीनां प्रवर्षणं सप्तस्वर्णकोटिप्रवर्षणं तस्मात् सप्तस्वर्णकोटिप्रवर्षणात् सप्तकोटिसुवर्णमुद्राणां वृष्टिं कृत्वा गुरोः पूजा गुरुपूजा, तां गुरुपूजाम् इव (उत्प्रेक्षायाम्) आधाय विधाय कृत्वा स्वः स्वर्गं ययौ जगाम ॥६०९॥*

सरलार्थ :- पिङ्गलामरः इति उक्त्वा दमयन्त्याः पुरः सप्तकोटिसुवर्णमुद्राः वर्षित्वा गुरुपूजाम् इव आधाय स्वर्गम् इयाय ॥६०९॥

ગુજરાતી :- એમ કહીને તેની આગળ સાત કોડ સોનામહોરોના વરસાદથી જાણે ગુરુપૂજા કરીને તે પિંગલદેવ દેવલોકમાં ગયો. ॥६०९॥

हिन्दी :- ऐसा कहकर उसके सामने सात कोटी सोनामोहर की बरसात से मानो गुरुपूजा करके वह पिंगलदेव देवलोक में गया ॥६०९॥

मराठी :- असे म्हणून त्याने तिच्या समोर सात कोटी सोनाच्या मोहोरांचा वर्षाव केला आणि जणू गुरुपूजा करून तो पिंगलदेव देवलोकात गेला. ॥६०९॥

English :- Having said thus, he showered a gift of seventy million diamonds and sapphires, in front of Damyanti. And performing the Gurupujan he returnd bak to heaven.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तत्तादृशं धर्मफलं प्रत्यक्षं वीक्ष्य विस्मितः ॥
ऋतुपर्णनरेन्द्रोऽपि जिनधर्मं प्रपेदिवान् ॥६१०॥

अन्वय :- तत् तादृशं धर्मफलं प्रत्यक्षं वीक्ष्य विस्मितः ऋतुपर्णनरेन्द्रः अपि जिनधर्मं प्रपेदिवान् ॥६१०॥

विवरणम् :- तत् तादृशं तदिव दृश्यते इति तादृशं धर्मस्य फलं धर्मफलं प्रत्यक्षं साक्षात् वीक्ष्य अवलोक्य विस्मितः आश्चर्यचकितः ऋतुपर्णः नराणामिन्द्रः नरेन्द्रः नृपः अपि जयति रागद्वेषादीन् इति जिनः रागद्वेषविजेता । जिनस्य धर्मः जिनधर्मः तं जिनधर्मं जिने नोक्तधर्मं प्रपेदिवान् प्रपेदे स्वीचकार ॥६१०॥

सरलार्थ :- तत्तादृशं देवलोकप्राप्तिसदृशं धर्मस्य फलं प्रत्यक्षं दृष्ट्वा विस्मितः ऋतुपर्णनृपः अपि जिनस्य धर्मं प्रपेदे ॥६१०॥

ગુજરાતી :- એવી રીતના તે ધર્મના ફળને પ્રત્યક્ષ જોઈને આશ્ચર્ય પામેલા ઋતુપર્ણ રાજાએ પણ જૈનધર્મનો સ્વીકાર કર્યો. ॥६१०॥

हिन्दी :- इस प्रकार धर्म के फल को प्रत्यक्ष देखकर आश्चर्यचकित ऐसे ऋतुपर्ण राजाने भी जैनधर्म का स्वीकार किया॥६१०॥

मराठी :- अशाप्रकारे धर्माचें फल प्रत्यक्ष पाहून आश्चर्यचकित झालेल्या ऋतुपर्ण राजाने पण जैनधर्माचा स्वीकार केला. ॥६१०॥

English :- Now when the king Rituparne had manifested the fruit one can obtain through religion and pious deeds he was dumbfounded. And So he embraced Jainism.

तदा च हरिमिश्रोऽपि महाराजं व्यजिज्ञपत् ।
स्वामिन्नादिश्यतां भैमी गन्तुं पितृगृहेऽधुना ॥६११॥

अन्वय :- तदा हरिमित्रः अपि महाराजं व्यजिज्ञपत् - स्वामिन् । अधुना भैमी पितृगृहे गन्तुम् आदिश्यताम् ॥६११॥

विवरणम् :- तदा हरिमित्रः अपि महान चासौ राजा च महाराजः ऋतुपर्णः तं महाराजम् ऋतुपर्णं व्यजिज्ञपत् व्यज्ञापयत् - स्वामिन्! अधुना भैमी पितुः गृहं पितृगृहं, तस्मिन् पितृगृहे गन्तुं गमनार्थम् आदिश्यताम् आज्ञाप्यताम् ॥६११॥

सरलार्थ :- तदा हरिमित्रः अपि महाराजम् ऋतुपर्णं व्याज्ञापयत् - अधुना भीमराजपुत्री दमयन्ती पितृगृहे गन्तुम् आदिश्यताम् ॥६११॥

ગુજરાતી :- પછી તે જ વખતે હરિમિત્ર બટુકે પણ તે મહારાજાને વિનંતી કરી કે, હે સ્વામી! હવે આ દમયંતીને (તેના) પિતાને ઘેર જવાની આજ્ઞા આપો! ॥૬૧૧॥

हिन्दी :- फिर उस समय हरिमित्र बटुक ने भी महाराज से बिनती कर के कहा कि हे स्वामी! अब इस दमयन्ती को (उसके) पिता के घर जानेकी आज्ञा दे। ॥६११॥

मराठी :- नंतर त्या वेळेला हरिमित्राने पण महाराजाला विनंती केली, हे स्वामी! आता या दमयन्तीला (तिच्या) वडिलांच्या घरी जाण्याची आज्ञा या. ॥६११॥

English :- Then the drauf Harimitra asked the king to permit Daymyanti, to return back to her parent's residence

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राज्ञ्यप्युवाच राजानं देव युक्तं समस्त्यदः ।
राज्ञा च प्रेषिता भैमी भूरिसेनापरिच्छदा ॥६१२॥

अन्वय :- राज्ञी अपि राजानम् उवाच देव! अदः युक्तं समस्ति । राज्ञा भूरिसेनापरिच्छदा भैमी प्रेषिता ॥६१२॥

विवरणम् :- राज्ञी अपि राजानम् उवाच - उवाद - देव! राजन् । अदःदमयन्त्या पितृगृहप्रेषणं युक्तं योग्यं समस्ति, इति । तदा राज्ञा ऋतुपर्णेन भूरिश्चासौ सेना च भूरिसेना । भूरिसेना परिच्छदः यस्याः सा भूरिसेनापरिच्छदा भूरिसेनया सह भीमस्यापत्यं स्त्री भैमी दमयन्ती प्रेषिता पितृगृहे प्रहिता ॥६१२॥

सरलार्थ :- राज्ञी अपि राजानम् अवदत् - देव! इदानीं दमयन्त्याः पितृगृहप्रेषणमेव वरम्, इति । तदा राज्ञा भूरिसेनया सह दमयन्ती पितृगृहे प्रेषिता ॥६१२॥

ગુજરાતી :- ત્યારે રાણીએ પણ રાજાને કહ્યું કે, હે સ્વામી! તેમ કરવું ઉચિત છે. પછી રાજાએ ઘણી સેનાના પરિવારસહિત દમયંતીને રવાના કરી. ॥૬૧૨॥

हिन्दी :- तब रानीने भी राजा से कहा कि, हे स्वामी! ऐसा करना उचित है। फिर राजाने बहुतसी सेना के परिवारसहित दमयन्ती को पिता के घर भेज दिया। ॥६१२॥

मराठी :- तेव्हा राणी पण राजाला म्हणाली- महाराज! दमयन्तीला तिच्या वडिलांच्या घरी पाठविणे हेच योग्य आहे. तेव्हां राजाने स्वरूप मोठे सैन्य बरोबर देऊन दमयन्तीला रवाना केले. ॥६१२॥

English :- The Queen to agreed to the drawf's plea. So the king bid Damyanti Forewell and send her off along with a huge army.

ज्ञात्वा सुतां समायान्तीं पुष्पदन्त्या समं नृपः ।
पोतः प्रभञ्जनेन प्रेम्णाऽऽकृष्टस्तदाभ्यगात् ॥६१३॥

अन्वय :- सुतां समायान्तीं ज्ञात्वा प्रभञ्जनेन पोतः इव प्रेम्णा आकृष्टः नृपः तदा पुष्पदन्त्या सह अभ्यगात् ॥६१३॥

विवरणम् :- सुतां दमयन्तीं समायान्तीम् आगच्छन्तीं ज्ञात्वा विदित्वा प्रभञ्जने न महावातेन आकृष्टः पोतः नौः इव प्रेम्णा स्नेहभरेण आकृष्टः नृपः भीमः तदा पुष्पदन्त्या सह अभ्यगात् प्रत्युदगमत् ॥६१३॥

सरलार्थ :- सुतां दमयन्तीम् आगच्छन्तीं विज्ञाय महावायुना आकृष्टः पोतः उडुपः इव प्रेम्णा आकृष्टः नृपः भीमः पुष्पदन्त्या सह प्रत्युदगच्छत् ॥६१३॥

ગુજરાતી :- પુત્રીને આવતી જાણીને, વાયુથી જેમ વહાણ પ્રેરાય, તેમ પ્રેમથી ખેંચાયેલો રાજા તે વખતે પુષ્પદન્તીસહિત સામો આવ્યો. ॥૬૧૩॥

हिन्दी :- पुत्री को आते हुए जानकर, वायु से जैसे जहाज प्रेरित होता है, उसी प्रकार प्रेमसे खींचा हुआ राजा उस समय पुष्पदन्तीसहित सामने गया॥ ॥६१३॥

मराठी :- पुत्री दमयन्ती येत आहे. असे जाणून सोसाटयाच्या वाऱ्याने नाव आकर्षिली जाते त्याप्रमाणे राजा प्रेमाने आकर्षिला गेला व पुष्पवती राणीसह सामोरा गेला. ॥६१३॥

English :- Noen when Damyanti's father received the news of her arrival, he was literally dragged by the ropes of love and tenderness, just as the ship is pulled in the ocean, by the wind. So he and his wife Pushpavati went forward to received her.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दृष्ट्वा च पितरौ भैमी तूर्णमुत्तीर्य वाहनात् ।
प्रेम्णाऽनमत्तयोः पादौ भक्त्येव गुरुपादयोः ॥६१४॥

अन्वय :- भैमी पितरौ दृष्ट्वा तूर्णं वाहनात् उत्तीर्य भक्त्या गुरुपादयोः इव प्रेम्णा तयोः पदौ अनमत् ॥६१४॥

विवरणम् :- भीमस्यापत्यं स्त्री भैमी भीमराजपुत्री दमयन्ती माता च पिता च पितरौ दृष्ट्वा विलोक्य तूर्णं झटिति वाहनात् यानात् उत्तीर्य अवतीर्य भक्त्या महताभावेन गुरोः पादौ गुरुपादौ, तयोः गुरुपादयोः इव प्रेम्णा महता स्नेहभारेण तयोः पित्रोः भीमपुष्पदन्त्योः पादौ चरणौ अनमत् अवन्दत ॥६१४॥

सरलार्थ :- दमयन्ती मातरह पितरं च दृष्ट्वा झटिति यानात् अवातरत् । यथा भक्त्या गुरोः पादौ वन्येते तथा प्रेम्णा तयोः पित्रोः पदौ अनमत् ॥६१४॥

ગુજરાતી :- પછી (પોતાના) માતાપિતાને જોઈને દમયંતી તરત વાહન પરથી નીચે ઉતરીને, ભક્તિથી જેમ ગુરૂમહારાજના ચરણોમાં નમે, તેમ તેણીએ પ્રેમપૂર્વક તેમના ચરણોમાં નમસ્કાર કર્યા. ॥૬૧૪॥

हिन्दी :- फिर (अपने) मातापिता को देखकर दमयंती उसी क्षण वाहन से नीचे उतरी और गुरूमहाराज के चरणों को भक्ति से वन्दन करते है उसीप्रकार प्रेमपूर्वक उसने मातापिता के चरणोमें प्रणाम किया॥६१४॥

मराठी :- नंतर दमयन्ती आपल्या आई-वडिलांना पाहून प्रेमभराने ताबडतोब वाहनातून खाली उतरली, व भक्तीने गुरूच्या चरणांना वन्दन करावे त्याप्रमाणे तिने आई-वडिलांच्या चरणांना नमस्कार केला. ॥६१४॥

English : Now when Damyanti sees her parents she atonce gets off from her carrier and pays her respects to her parents just as one pays his respects to a religious perceptor.

P.P. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सस्वजाते तदा नद्याविव मातृसुते मिथः ।
नयनोदकपूरेण प्लाविताशेषभूतले ॥६१५॥

अन्वय :- तदा नद्यौ इव मातृसुते मिथः सस्वजाते । नयनोदकपूरेण प्लाविताशेषभूतले अभूताम् ॥६१५॥

विवरणम् :- तदा तस्मिन् समये नद्यौ इव द्वे सरितौ इव माता च सुता च मातृसुते मिथः परस्परं सस्वजाते आलिलिङ्गतुः । नयनयोः उदकानि नयनोदकानि । नयनोदकानां पूरः नयनोदकपूरः तेन नयनोदकपूरेण अश्रुपूरेण अशेषम् अखिलं च तद् भुवः तलं भूतलं च अशेषभूतलम् । प्लावितम् आर्द्रीकृतम् अशेषभूतलं याभ्यां ते प्लाविताशेषभूतले आर्द्रीकृताशेषभुवनतले अभूताम् ॥६१५॥

सरलार्थ :- तदा नद्यौ इव ते मातृसुते परस्परमालिलिङ्गतुः । अश्रुपूरेण च भूतलमशेशं प्लावितवत्यौ ॥६१५॥

ગુજરાતી :- પછી તે વખતે બે નદીઓની પેઠે માતા અને પુત્રી પરસ્પર ભેટી પડયાં, તથા ચક્ષુઓમાંથી નીકળતા અશ્રુજલના પ્રવાહથી સમસ્ત પૃથ્વીતલને ભીંજવવા લાગ્યાં. ॥૬૧૫॥

हिन्दी :- फिर उस समय दो नदियों के सामान माता और पुत्रीने परस्पर एक दूसरे को गले लगाया। आंखोमें से निकलते हुए अश्रुजल के प्रवाह से समस्त पृथ्वीतल को भिगोया। ॥६१५॥

मराठी :- नंतर त्या वेळेला दोन नयाप्रमाणे आई आणि मुलगी परस्पर भेटल्या, आणि डोळयांतून नियत असलेल्या अश्रुजलांच्या प्रवाहांनी त्यांनी संपूर्ण पृथ्वीतळाला भिजवून टाकले. ॥६१५॥

English :- Then just as two rivers conjoin together to from a single river, in the same way, the two women, mother and daughter embrace each other that revealed an ecstatic furore of emotions.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

किञ्च भैमीं समालोक्य धारालैरश्रुभिस्तदा ।
भुवं पङ्किलामकार्षीत् पङ्किलानखिलो जनः ॥६१६॥

अन्वय :- किं च तदा अखिलः जनः भैमीं समालोक्य वर्षासु इव धारालैः अश्रुभिः भुवं पङ्किलाम् अकार्षीत् ॥६१६॥

विवरणम् :- *किं च तदा तस्मिन् समये अखिलः सर्वः जनः लोकः भीमस्यापत्यं स्त्री भैमी, तां भैमीं दमयन्तीं समालोक्य संदृश्य यथा मेघः वर्षासु धारालैः जलैः भुवं पङ्किलां पङ्कयुक्तां करोति तथा धारालैः धारावद्भिः अश्रुभिः भुवं भूमिं पङ्कः अस्या सञ्जातः इति पङ्किला, तां पङ्किलां पङ्कयुतां कर्दमयुताम् अकार्षीत् अकरोत् ॥६१६॥*

सरलार्थ :- किं च तदा अखिलः जनः अपि दमयन्तीम् अवलोक्य यथा वर्षासु मेघः धारावर्षैः भुवं पङ्किलां करोति तथा धारावद्भिः अश्रुपूरैः भूमिं कर्दमिताम् अकार्षीत् ॥६१६॥

ગુજરાતી :- વળી તે દમયંતીને જોઈને સઘળા લોકો તે વખતે, વર્ષાકાળની જેમ, ધારાબંધ વહેતાં આંસુઓ વડે જમીનને કાદવમય કરવા લાગ્યા. ॥६१६॥

हिन्दी :- फिर उस दमयंती को देखकर सब लोग उस समय, वर्षाकाल के समान लगातार बहते हुए आंसुओ से जमीन को कीचडमय करने लगे। ॥६१६॥

मराठी :- फार काय दमयन्तीला पाहून सगळया लोकांनी ज्याप्रमाणे पावसाळ्यात मेघ पाण्याच्या धारांचा वर्षाव करून जमिनीवर चिखल करतो. त्याप्रमाणे डोळ्यातील अश्रुधारांनी जमिनीवर चिखल करून टाकला. (सर्वलोक टळटळ खूप रडले.) ॥६१६॥

English :- Now when the people manifested their beloved princess Damyanti an effusion of sentiments gushed through them and compelled them to shed out made the earth slushy with their continous overflowing tears.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ निर्धौतवक्त्रैस्तैः स्नेहात् प्रादुःकृतं मिथः ।
सुखदुःखं निजं सर्वं निधानमिव सञ्चितम् ॥६१७॥

अन्वय :- अथ निर्धौतवक्त्रैः तैः स्नेहात् सञ्चितं निधानम् इव निजं सर्वं सुखं दुःखं मिथः प्रादुःकृतम् ॥६१७॥

विवरणम् :- *अथ अनन्तरं निर्धौतानि प्रक्षालितानि वक्त्राणि मुखानि यैः तैः निर्धौतवक्त्रैः प्रक्षालितमुखैः तैः स्नेहात् प्रेमभरात् सञ्चितं सञ्जहीतं निधानं द्रव्यनिधिः इव निजं सुखं च दुःखं च एतयोः समाहारः सुखदुःखं मिथः अन्योन्यं प्रादुःकृतम् आविष्कृतम् । ते सर्वे मुखानि प्रक्षाल्य परस्परं सुखदुःखम् अकथयन् ॥६१७॥*

सरलार्थ :- अनन्तरं ते सर्वे मुखानि प्रक्षाल्य प्रेम्णा परस्परं सुखदुःखम् अकथयन् ॥६१७॥

गुजराती :- પછી તેઓએ મુખ ધોઈ નાખીને સ્નેહથી પરસ્પર, એકઠાં કરી રાખેલા નિધાનની પેઠે પોતાનું સઘળું સુખદુઃખ પ્રગટ કર્યું. ॥૬૧૭॥

हिन्दी :- फिर उन सबने मुंह धोकर, परस्पर स्नेह से संचित निधान के समान सुखदुःख को प्रगट किया ॥६१७॥

मराठी :- नंतर त्या सर्वांनी तोंड धुतले आणि साठवून ठेवलेले धन जसे प्रेमाने प्रकट करावे. त्याप्रमाणे त्यांनी मोठ्या प्रेमाने आपले सुखदुःख परस्परांना सांगितले. ॥६१७॥

English :- Then after having washed their face well, they began talking to each other about their joys and woes,just as one distributes wealth(that was kept hoared) in a loving manner.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अङ्कपर्यङ्कमारोप्य पुष्पदन्त्यवदत् सुताम् ।
जागर्त्यद्यापि नः पुण्यं यज्जीवन्ती त्वमीक्षिता ॥६१८॥

अन्वय :- पुष्पदन्ती सुताम् अङ्कपर्यङ्कम् आरोप्य अवदत् । अद्यापि नः पुण्यं जागर्ति । यत् त्वं जीवन्ती ईक्षिता ॥६१८॥

विवरणम् :- पुष्पदन्ती सुतां दमयन्तीम् अङ्कः एव पर्यङ्कः अङ्कपर्यङ्कः तम् अङ्कपर्यङ्कम् आरोप्य उपवेश्य अवदत् अब्रवीत् । अद्यापि नः अस्माकं पुण्यं सुकृतं जागर्ति । यत् यतः तं जीवन्ती जीवितं दधती ईक्षिता दृष्टा ॥६१८॥

सरलार्थ :- पुष्पदन्ती दमयन्तीम् अङ्के उपवेश्य अब्रवीत् । वत्से। अद्यापि अस्माकं पुण्यं जागर्ति । यतः त्वम् अस्माभिः जीवन्ती दृष्टा ॥६१८॥

ગુજરાતી :- પછી પુષ્પદન્તીએ (પોતાની) પુત્રીને ખોળારૂપી પલંગ પર બેસાડીને કહ્યું કે, હજી પણ અમારું પુણ્ય જાગતું છે, કે તને (અમોએ) જીવતી જોઈ. ॥૬૧૮॥

हिन्दी :- फिर पुष्पदंती ने अपनी उस पुत्री को अपनी गोदीरूपी पलंगपर बिठाकर कहा कि, अभी भी हमारा पुण्य जाग रहा है कि तुझे (हमने) जीवित देखा ॥६१८॥

मराठी :- मग पुष्पदन्ती राणी दमयन्तीला मांडीवर बसवून म्हणाली- खरोखर अजूनही आमचे पुण्य जागे आहे. त्यामुळे तू आम्हांला जीवंत दिसली. ॥६१८॥

English :- Then Pushpedanti (Damyanti's mther) made her sit on her cushion - like laps and said to her that the fruits of their megitorious actions, still radiates as they had, had this golden opportunity of manifesting her alive.

तिष्ठन्त्यत्र सुखेनैव पुत्रि, स्वं द्रक्ष्यसि प्रियम् ।
चिरादपि जनो येन जीवन् भद्राणि पश्यति ॥६१९॥

अन्वय :- हे पुत्रि! अत्र एव सुखेन तिष्ठन्ती त्वं स्वं प्रियं द्रक्ष्यसि । येन चिरादपि जीवन् जनः भद्राणि पश्यति ॥६१९॥

विवरणम् :- *हे पुत्रि! अत्र एव सुखेन तिष्ठन्ती वसन्ती त्वं स्वं निजं प्रियं पतिं द्रक्ष्यसि अवलोकयिष्यसि। येन चिरात् अपि दीर्घकालात् अपि जीवन् नरः जनः भद्राणि कल्याणानि पश्यति। जीवन् नरः दीर्घकालानन्तरमपि भद्राणि पश्यति ॥६१९॥*

सरलार्थ :- हे पुत्रि। अत्र एव सुखेन वसन्ती त्वं निजं पतिं द्रक्ष्यसि । यतः जीवन् नरः चिरादपि कल्याणानि पश्यति ॥६१९॥

ગુજરાતી :- હે પુત્રી! તું અહીં સુખેથી રહીને તારા ભર્તારને જોઈ (મેળવી) શકીશ. કેમકે ઘણે કાળે પણ જીવતો મનુષ્ય કલ્યાણને જોઈ શકે છે. ॥૬૧૯॥

हिन्दी :- हे पुत्री! तु यहाँ सुखसमाधान से रहकर तेरे पति को देख (मिल) सकेगी. क्योंकि बहुत काल से जीवित मनुष्य कल्याण को देख सकता है ॥६१९॥

मराठी :- हे पुत्री! तू येथे सुखसमाधानाने राहून तुझ्या पतीला पाहू (मिळवू) शकशील. कारण की खूप काळ जीवंत राहणारा मनुष्य कल्याणाला पाहू शकतो. ॥६१९॥

English :-She then says that she can stay at her father's house without any difficulties and then meet her husband, as a person who stays alive for too long, surely has the chance to manifest happiness and prosperity.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजा पुत्र्याप्तितुष्टोऽदात् ग्रामपञ्चशतीं बटोः ।
तरूणामिव तोषस्य दानमेव फलं यतः ॥६२०॥

अन्वय :- पुत्र्याप्तितुष्टः राजा बटोः ग्रामपञ्चशतीम् अदात् । यतः तरूणाम् इव तोषस्य फलं दानम् एव अस्ति ॥६२०॥

विवरणम् :- *पुत्र्याः कन्यकायाः दमयन्त्याः आप्तिः प्राप्तिः पुत्र्याप्तिः। पुत्र्याप्त्या तुष्टः सन्तुष्टः पुत्र्याप्तितुष्टः कन्यकाप्राप्तिसन्तुष्टः राजा भीमः बटोः हरिमित्रस्य पञ्चानां शतानां समाहारः पञ्चशती । ग्रामाणां पञ्चशतीं ग्रामपञ्चशती, तां ग्रामपञ्चशतीं पञ्चशतं ग्रामान् अदात् अयच्छत् । यतः तरूणाम् वृक्षाणाम् इव तोषस्य सन्तोषस्य फलं दानमेव अस्ति । सन्तुष्टः पुरुषः सन्तोषकारिणे दानमेव ददाति ॥६२०॥*

सरलार्थ :- दमयन्त्याः प्राप्त्या सन्तुष्टः नृपः भीमः हरिप्रियाय बटवे पञ्चशतं ग्रामान् अददात् । तथाहि सन्तोषस्य फलं दानमेव अस्ति ॥६२०॥

ગુજરાતી :- પુત્રીની પ્રાપ્તિથી સંતુષ્ટ થયેલા રાજાએ તે બટુકને પાંચસો ગામો આપ્યાં, કેમકે વૃક્ષોની પેઠે સંતોષનું ફળ દાન જ છે. ॥૬૨૦॥

हिन्दी :- पुत्री की प्राप्ति से संतुष्ट हुए उस राजा ने उस बटुक को पांचसौ गाँव दिये, क्योंकि वृक्षों के समान संतोष का फल दान ही है। ॥६२०॥

मराठी :- मुलीच्या प्राप्तीमुळे संतुष्ट झालेल्या राजाने त्या हरिमित्र बटूला पांचशे गांव दानात दिले. कारण वृक्ष संतुष्ट झाला म्हणजे जसे फळें देतो तसे माणूस संतुष्ट झाला म्हणजे दान देतो. दानच संतोषाचे फळ आहे. ॥६२०॥

English :- The joy of the king knew no bovnds, So he presented the drawf, with five hundred villages because just like a tree the fruit of satifaction is disclosed by bestowing or confering rewards.

ऊचे च तं बटुं यद्यानयसे नलमप्यहो ।
तत्ते ददामि राज्यार्धं विभागमिव भागिनः ॥६२१॥

अन्वय :- तं बटुग् ऊचे । अहो! यदि त्वं नलमपि आनयसे तत् भागिनः विभागम् इव ते राज्यार्धं ददामि ॥६२१॥

विवरणम् :- ततः स नृपः बटुम् ऊचे बभाषे । अहो! यदि त्वं नलमपि आनयसे आनेष्यसि तत् तर्हि भागः अस्यास्तीति भागी, तस्य भागिनः (व्यवसाये यः भागी वर्तते तस्मै यथा विभागः दीयते) विभागम् इव ते तुभ्यं राज्यस्य अर्धं राज्यार्धं ददामि दास्यामि । त्वं नलमपि आनेष्यसि चेत् तुभ्यं व्यवसाये भागिने विभागः दीयते तथा राज्यार्धं दास्यामि ॥६२१॥

सरलार्थ :- ततः नृपः तं बटुं बभाषे । अहो! यदि त्वं जलमपि आनेष्यसि तर्हि तुभ्यं भागिने विभागमिव राज्यार्धं दास्ये ॥६२१॥

ગુજરાતી :- પછી તેણે તે બટુકને કહ્યું કે, અહો! જો તું નલને પણ લાવી આપે, તો ભાગીદારનાં ભાગની પેઠે તને અર્ધું રાજ્ય આપું ॥૬૨૧॥

हिन्दी :- फिर उसने उस बटुक से कहा कि, अरे! जो आप नल को भी ले आयेंगे तो भागीदार के भागसमान आपको आधा राज्य दुंगा ॥६२१॥

मराठी :- नंतर तो राजा हरिमित्र बटूला म्हणाला- जर तू नलराजालाही आणशील तर मी तुला भागीदाराला जसा त्याचा भाग देतात त्याप्रमाणे तुला माझे अर्धे राज्य देईन. ॥६२१॥

English :-Then the king said to the drawf that if he even bring Nal in front of him then he shall bestow upon him the right of the half of his kingdom, just as a partner is entited to his half of the share.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथ स्वदेशे सर्वत्र राज्ञा पुत्र्यागमोत्सवः ।
कार्यते स्म विशेषेणाष्टाहं देवार्चनादिकम् ॥६२२॥

अन्वय :- अथ राज्ञा स्वदेशे सर्वत्र पुत्र्यागमोत्सवः कार्यते स्म । विशेषेण अष्टाहं देवार्चनादिकम् कार्यते स्म ॥६२२॥

विवरणम् :- अथ अनन्तरं राज्ञा भीमेन स्वस्य देशः स्वदेशः तस्मिन् स्वदेशे सर्वत्र पुत्र्याः दमयन्त्याः आगमः पुत्र्यागमः । पुत्र्यागमस्य उत्सवः पुत्र्यागमोत्सवः दमयन्त्यागमनोत्सवः कार्यते स्म अकार्यत । विशेषेण विशेषत् अष्टानाम् अह्नां समाहारः अष्टाहं अष्टदिनपर्यन्तं देवस्य अर्चना देवार्चना । देवार्चना आदौ यस्य तद् देवार्चनादिकम् धर्मकृत्यम् अकार्यत ॥६२२॥

सरलार्थ :- अनन्तरं भीमः राजा स्वदेशे सर्वत्र दमयन्त्याः आगमनोत्सवम् अकारयत् । विशेषतः अष्टौ दिनानि देवार्चनादिकं धार्मिक विधिमकारयत् ॥६२२॥

ગુજરાતી :- પછી તે રાજાએ પોતાના દેશમાં સર્વ જગાએ પુત્રીના આવવાનો મહોત્સવ કરાવ્યો, તથા આઠ દિવસો સુધી વિશેષ પ્રકારે દેવપૂજાઆદિ કાર્યો કરાવ્યાં. ॥૬૨૨॥

हिन्दी :- फिर उस राजा ने अपने देश में हर जगह पर पुत्री के आगमन का महोत्सव और आठ दिन तक विशेष प्रकार से देवपूजा आदि कार्य कराये ॥६२२॥

मराठी :- नंतर त्या भीमराजाने आपल्या राज्यात सर्व ठिकाणी मुलीच्या आगमनाचा उत्सव करविला. विशेषतः आठ दिवसपर्यंत देवपूजा आदि धार्मिक उत्सव केले. (अष्टाह्निका महोत्सव केला.) ॥६२२॥

English :- Then the king held a grand festival in honours of his daughter's comeback. He also performed an eight day puja and other religioos rites on these days.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दुहितां चैवमूचे च मास्म कार्षीरनिर्वृतिम् ।
नलोऽप्यौपयिकैस्तैस्तैर्वत्से सङ्गटयिष्यते ॥६२३॥

अन्वय :- दुहितां (दुहितरं) च एवम् ऊचे । हे वत्से! अनिर्वृतिं मा कार्षीः स्म। नलः अपि तैः तैः औपयिकैः सङ्गटयिष्यते ॥

विवरणम् :- दुहितां (दुहितरं) कन्यां दमयन्तीं च ऊचे बभाषे । हे वत्से! न निर्वृतिः अनिर्वृतिः ताम् अनिर्वृतिं चिन्तां मा कार्षीः स्म । चिन्तां मा कुरु । नलः अपि तैः विविधैः औपयिकैः उपायैः त्वया सह संघटयिष्यते ॥६२३॥

सरलार्थ :- नृपः भीमः कन्यकां दमयन्तीमभाषत - वत्से! चिन्तां मा कुरूरुव । नलः अपि तैः तैः उपायैः त्वया सङ्गटयिष्यते ॥६२३॥

ગુજરાતી :- પછી તે પુત્રીને (તેણે) એમ કહ્યું કે, હે વત્સે? તારે ચિંતા કરવી નહી. જે તે ઉપયો વડે નલનો પણ તને મેળાપ થઇ જશે. ॥૬૨૩॥

हिन्दी :- फिर उसने पुत्री से कहा कि, 'हे वत्से? तू चिंता मत करो, कई प्रकार के उपायों से नल का भी मिलाप हो जायेगा ॥६२३॥

मराठी :- नंतर भीमराजा दमयन्तीला म्हणाला- तूं चिन्ता करू नकोस. नल राजालासुध्दा विविध उपायांनी मी तुला भेटवीन. ॥६२३॥

English :- Then addressing his daughter, The king asked his daughter to stop lamenting about her long last husband as the are bound to meet him by hook or crook and by all means.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

इतश्च स तदारण्ये भैमीमुत्सृज्य नैषधिः ।
भ्रमन्नपश्यदुद्यान्तीं धूम्यां वननिकुञ्जतः ॥६२४॥

अन्वय :- इतः सः नैषधिः तदा अरण्ये भैमीम् उत्सृज्य भ्रमन् वननिकुञ्जतः उद्यान्तीं धूम्याम् अपश्यत् ॥६२४॥

विवरणम् :- इतः सः निषधस्य अपत्यं पुमान् नैषधिः नलः तदा तस्मिन् समये अरण्ये विपिने भीमस्यापत्यं स्त्री भैमी, तां भैमीं भीमकन्यां दमयन्तीम् उत्सृज्य सन्त्यज्य भ्रमन् सन् वनस्य निकुञ्जः वननिकुञ्जः तस्मात् वननिकुञ्जतः उद्यान्तीम् उद्गच्छन्तीं धूमानां समूहः धूम्या तां धूम्यां धूमसमूहम् अपश्यत् अद्राक्षीत् ॥६२४॥

सरलार्थ :- इतः नलः नृपः तदा अरण्ये दमयन्तीं विसृज्य इतस्ततः भ्रमन् सन् वननिकुञ्जतः उद्गच्छन्तीं धूम्याम् धूमसमूहम् अपश्यत् ॥६२४॥

ગુજરાતી :- હવે તે વખતે તે નલરાજાએ દમયંતીને વનમાં છોડીને ભમતાં ભમતાં વનની ધરામાંથી ઉંચે ચડતા ધૂમાડાના સમૂહને જોયો. ॥૬૨૪॥

हिन्दी :- अब उस समय नलराजा ने दमयंती को वन में छोडकर घूमते हुए, वृक्षों के घने समूह में से ऊँचे ऊठते हुए धुंओ के समूह को देखा ॥६२४॥

मराठी :- इकडे नलराजा दमयन्तीला वनांत एकटीला सोडून इकडे तिकडे भटकत असतांना त्याला वनांतील लतामंडपांतून धुराचा लोळ वर जात असलेला दिसला. ॥६२४॥

English :- Now when king Nal had deserted his wife, Damyanti and was wandering about in the forest, he came across a cluster of tress. He climed them and happened to see a smoke at a distance.

वर्धमाना च सा धूम्या कालिन्दीव व्यराजत ॥
मिलनायोपसर्पन्ती सवितुः पितुरात्मनः ॥६२५॥

अन्वय :- वर्धमाना सा धूम्या आत्मनः पितुः सवितुः मिलनाय उपसर्पन्ती कालिन्दी इव व्यराजत ॥६२५॥

विवरणम् :- वर्धमाना क्षणे क्षणे वृद्धिं गच्छन्ती सा धूम्या धूमसमूहः आत्मनः स्वस्य पितुः जनकस्य सवितुः सूर्यस्य मिलनाय उपसर्पन्ती उद्गच्छन्ती कालिन्दी यमुना इव व्यराजत। यमुनायाः जलं कृष्णं वर्तते। तेन उद्गच्छन्ती सा धूम्या पितुः सूर्यस्य मिलनाय उत्सर्पन्ती कालिन्दी इव अदृश्यत ॥६२५॥

सरलार्थ :- क्षणे क्षणे वर्धमाना सा धूमततिः स्वस्य पितुः सूर्यस्य मिलानाय उद्गच्छन्ती उल्लसन्ती यमुना इव व्यराजत अशोभत ॥६२५॥

ગુજરાતી :- પછી વૃદ્ધિ પામતો એવો તે ધૂમાડાનો સમૂહ, જાણે પોતાના પિતા સૂર્યને મળવા માટે ઉંચે ચઢતો હોય તેમ યમુના નદીની પેઠે શોભતો હતો. ॥૬૨૫॥

हिन्दी :- फिर बढता हुआ धुंअे का समूह मानो अपने पिता सूर्य से मिलने के लिये ऊँचे जा रहा था और यमुना नदी के समान शोभायमान हो रहा था। ॥६२५॥

मराठी :- क्षणाक्षणाला वाढत जाणारा तो धुराचा लोळ, आपल्या पित्याला सूर्याला भेटण्यासाठी वर जात असलेल्या यमुनेप्रमाणे शोभत होता. ॥६२५॥

English :- The smoke that began rising higher and higher seamed as though it was going up to pay a visit to his father, the Sun. The rising Smoke now seemed as magnificient and radiant as the river Yamuna.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्तर्ज्वाला करालाऽपि सा पुनः क्षणात् ॥
ज्वलज्जिह्वेक्षणकचः श्यामप्रेत इवोद्व्रजन् ॥६२६॥

अन्वयः- क्षणात् पुनः अन्तर्ज्वाला कराला सा धूम्या ज्वलज्जिह्वक्षणकचः उद्व्रजन् श्यामप्रेतः इव शुशुभे ॥६२६॥

विवरणम्:- पुनः क्षणात् अन्तर्गता. ज्वालाः यस्याः सा अन्तर्ज्वाला कराला अत्तीव भीषणा सा धूम्या धूमततिः जिह्वा च ईक्षणे च कचाश्च जिह्वेक्षणकचाः। ज्वलन्तः जिह्वेक्षणकचाः यस्य सः ज्वलज्जिह्वेक्षणकचः ज्वलद्रसनानयनकेशः उद्व्रजन् उद्गच्छन् श्यामश्चासौ प्रेतश्च श्यामप्रेतः श्यामवर्णपिशाच इव शुशुभे अशोभत ॥६२६॥

सरलार्थः- पुनः क्षणात् अन्तर्ज्वाला भयानका सा धूमततिः ज्वलज्जिह्वालोचनकेशः उद्गच्छन् श्यामप्रेतः इव शुशुभे ॥६२६॥

ગુજરાતી :- વળી ક્ષણવારમાં અંદરથી નીકળતી જ્વાલાવાળો તે ભયંકર ધૂમાડો જાજ્વલ્યમાન જિવ્હા, ચક્ષુ, તથા કેશવાળા શ્યામ પ્રેતની પેઠે ઉંચે ચડતો શોભતો હતો.॥૬૨૬॥

हिन्दी :- फिर क्षणभर में अंदर से निकलती ज्वालावाला वह भयंकर धुआँ जाज्वल्यमान जिन्हा, चक्षु और केशवाले श्याम प्रेत के समान ऊपर चढता हुआ शोभा दे रहा था ॥६२६॥

मराठी :- मग क्षणात आतून निघणाऱ्या ज्वालांनी युक्त तो भयंकर धुरसमूह जाज्वल्यमान जिव्हा, डोळे आणि केश असलेला श्यामप्रेतासारखा वर वर जात असलेला शोभत होता. ॥६२६॥

English :- Then in a few moments there was a fire confraglation. The fire which was germinated seemed to be the red blazing tongue of the agress. And the black smoke which was created, seemed to be the black eyes, and the black hair of the ogren which was rising upwards.

तापार्तश्वापदाक्रन्दं प्रस्फुटवंशनि:स्वनम् ।।
तत्राश्राश्रौषीन्नलो दावानलं नि:स्वानशब्दवत् ।।६२७।।

अन्वय:- नल: तत्र तापार्तश्वापदाक्र न्दं प्रस्फुटवंशनि:स्वनं दावानलं नि:स्वानशब्दवत् अश्रौषीत् ।।६२७।।

विवरणम्:- नल: तत्र तापेन आर्ता: पीडिता: तापार्ता: । तापार्ताश्च ते श्वापदाश्च तापार्तश्वापदा: । तापार्तश्वापदानाम् आक्रन्द: यस्मिन्, तं तापार्तश्वापदाक्र न्दं ऊष्णतापीडितहिंस्राक्रोशं प्रस्फुटाश्च ते वंशाश्च प्रस्फुटवंशा:। प्रस्फुटवंशानां नि:रचना: यस्मिन् ते प्रस्फुटवंशनि: स्वनं दावस्य अनल: दावानल: तं दावानलं दावाग्निं नि:स्वानशब्दवत् मेघगर्जनध्वानेवत् अश्रौषीत् अशृणोत् ।।६२७।।

सरलार्थ:- नल: तत्र यस्मिन् अब्बो: तापेन आर्तानां श्वापदानामाक्रन्दा: प्रस्फुटतां वशांना (वेणूनाम्) नि:स्वना: च श्रूयन्ते तं दावानलं मेघगर्जनध्वनि वत् अश्रौषीत् ।।६२७।।

ગુજરાતી :- તાપથી પીડાતા જંગલમાં પશુઓના પોકારવાળા, ફાટતા વાંસના અવાજવાળા એવા દાવાનલને ત્યાં નલરાજાએ મેઘગર્જનાના નાદની પેઠે સાંભળ્યો. ।।૬૨૭।।

हिन्दी :- ताप से पीडित जंगल के पशुओं के क्रन्दन-नादसे, फटते हुए बांस की आवाज वाले ऐसे दावानल को वहाँ नलराजाने मेघगर्जना की तरह सुना। ।।६२७।।

मराठी :- नलराजाने त्या वणव्यात वणव्याच्या उष्णतेने व्याकुळ झालेल्या हिंस्त्र पशूंच्या आक्रोशाचे फटाफट फुटत असलेल्या बांबूंचे शब्द मेघगर्जनेप्रमाणे ऐकले. ।।६२७।।

English :- There King Nal heard great chaus and screams of the miserable animals and there were explosious of the bamboo reeds, being burnt due to the confraglation which seemed like the sound of thunder.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऐक्ष्वाकक्षत्रियोत्तंस विश्वविश्वाभयक्षम ।।
नल मां रक्ष रक्षेति मानुषं चाऽशृणोत्स्वरम् ।।६२८।।

अन्वय:- ऐक्ष्वाकक्षत्रियोत्तंस विश्वविश्वाभयक्षम नल मां रक्ष रक्ष इति मानुषं स्वरम् अशृणोत् ।।६२८।।

विवरणम्:- *इक्ष्वाको: गोत्रापत्यानि पुमां स: ऐक्ष्वाका: । ऐक्ष्वाकाश्च ते क्षत्रियाश्च ऐक्ष्वाकक्षत्रिया: । ऐक्ष्वाकक्षत्रियाणाम् उत्तंस: तत्सम्बुध्दौ हे ऐक्ष्वाकक्षत्रियोत्तंस इक्ष्वाकुकुलोत्पन्नक्षत्रिय शिरोभूषण! विश्वं सर्वं च तद् विश्वं च विश्वविश्वम् । विश्वविश्वाय अभयं दातुं क्षम: तत्सम्बुद्धौ हे विश्वविश्वाभयक्षम! सर्वविश्वाय अभयं दातु समर्थ! नल मां रक्ष रक्ष पाहि पाहि इति मानुषं स्वरम् अशृणोत् ।।६२८।।*

सरलार्थ:- हे इक्ष्वाकुकुलोत्पन्नक्षत्रिय शिरोमणे! सकलविश्तवत्राणक्षम! हे नल राजन्! मां पाहि पाहि इति मानुषं स्वरम् अशृणोत् ।।६२८।।

ગુજરાતી :- હે ઇક્ષ્વાકુ ક્ષત્રિઓમાં મુકુટસમાન! હે સમસ્ત જગતને અભયદાન દેવામાં સમર્થ! એવા હે નલરાજા! મારું રક્ષણ કરો? રક્ષણ કરો? એવી રીતની તેણે મનુષ્યવાણી સાંભળી. ।।૬૨૮।।

हिन्दी :- हे इक्ष्वाकु क्षत्रियों में मुकुटसमान! हे (समस्त) पूरे जगत को, अभयदान देने में समर्थ! ऐसे हे नलराजा मेरा रक्षण करो? रक्षण करो! ऐसी उसने मनुष्यवाणी सुनी। ।।६२८।।

मराठी :- नंतर हे इक्ष्वाकु क्षत्रियांमध्ये मुकुटासमान असलेल्या हे समस्त जगाला अभयदान देण्यास समर्थ नलराजा, माझे रक्षण करा, रक्षण करा, अशी त्याने मनुष्यवाणी ऐकली. ।।६२८।।

English :- Suddenly he happened to hear a human voice calling out to him, addressing him as the diadem of the Isvaku clan and a person who assures protection any safety, by pleading and appealing to protect him.

यद्युपकरोषि त्वं निरपेक्षोऽस्मि सत्तम ॥
तथाप्युपकृतं फल्गु राजन् ! मा मय्यजीगणः ॥६२९॥

अन्वयः- हे सत्तम! यदित्वम् उपकरोषि। अहं निरपेक्षः अस्मि। तथापि हे राजन्। मयि उपकृतं फल्गु मा अजीगणः ॥६२९॥

विवरणम्:- *अतिशयेन सन् हे सत्तम! यदि त्वं मयि उपकरोषि। अहं निरपेक्षः अस्मि। तथापि हे राजन्! मयि उपकृतं फल्गु निरर्थकं मा अजीगणः मा गणय ॥६२९॥*

सरलार्थः- हे सत्तम! यद्यपि त्व उपकरोषि। अहं निरपेक्षः अस्मि। तथापि हे राजन्। मयि उपकृतं फल्गु तुच्छं निरर्थकं मा गणय ॥६२९॥

गुजराती :- હે ઉત્તમ પુરુષ! જોકે તું (મારા પર) ઉપકાર કરીશ, પણ હું તેની દરકાર કરનારો નથી. તો પણ હે રાજન્ મારા પર કરેલા ઉપકારને તારે નકામો જાણવો નહીં. ॥૬૨૯॥

हिन्दी :- हे उत्तम पुरुष ! जो तू (मुझ पर) उपकार करेगा, पर मैं उसकी दरकार (चिंता) नही करुंगा तो भी हे राजन्! मुझ पर किये हुए उपकार को निरर्थक नही जानना ॥६२९॥

मराठी :- हे उत्तम पुरुष! जर तू माझ्यावर उपकार केले, तर मी त्याची दरकार (काळजी) करणार नाही, तरीपण हे राजन् माझ्यावर केलेल्या उपकाराला व्यर्थ समज् नकोस. ॥६२९॥

English :- The voice continued saying, by addressing him as an eminent being, that if he (King Nal) does this favour on him by saving him, he (voice will hardly take notice of this), but the dosing feat will not go in vain.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्वरं व्यञ्जनवत् तं चाऽनुगच्छन् कुञ्जमध्यगम् ॥
रक्ष रक्षेति जल्पन्तं दन्दशूकं ददर्श सः ॥६३०॥

अन्वयः- व्यञ्जनवत् तं स्वरम् अनुगच्छन् सः कुञ्जमध्यगं रक्ष रक्ष इति जल्पन्तं दन्दशूकं ददर्श ॥६३०॥

विवरणम्:- व्यञ्जनेन तुल्यं व्यञ्जनवत् यथा व्यञ्जनं स्वरमनुगच्छति तथा तं स्वरमनुगच्छन् अनुसरन् सः नलः कुञ्जस्य मध्यः कुञ्जमध्यः, कुञ्जमध्यं गच्छतीति कुञ्जमध्यगः तं कुञ्जमध्यगं कुञ्जमध्यस्थं रक्ष रक्ष इति जल्पन्तं वदन्तं दन्दशूकं भोगिनं सर्पं ददर्श अद्राक्षीत् ॥६३०॥

सरलार्थः- यथा व्यञ्जनं स्वरमनुगच्छति तथा तं स्वरमनुगच्छन् स नलः कुञ्जमध्यगं रक्ष रक्ष इति वदन्तं दन्दशूकं (सर्पम्) अपश्यत् ॥६३०॥

गुजराती :- વ્યંજનની પેઠે તે સ્વરની પાછળ જતા એવા તે નલે, મને બચાવ ! બચાવ ! એમ બોલતા એક સર્પને લતાના ગુચ્છામાં જોયો. ॥૬૩૦॥

हिन्दी :- व्यंजन के समान उस स्वर के पीछे जाते हुए ऐसे नल ने, मुझे बचाओ! बचाओ! ऐसे बोलते हुए एक सर्प को लताओं के गुच्छे में देखा ॥६३०॥

मराठी :- व्यंजनाप्रमाणे त्या स्वराच्या मागे जात असलेल्या नलाने मला वाचवा! वाचवा! असे बोलत असलेल्या एका सापाला वेलीच्या गुच्छामध्ये पाहिले. ॥६३०॥

English :- Just as the consanants runs after the vowels, in the same way the voice repeatedly asked King Nal for help. Suddenly king Nal happened to see a snake, wriggling ferociously in a bunch of creepers.

दध्यौ चैष कथं वेत्ति कुलं वा नाम वा मम ॥
कथं वा मानुषी भाषा सर्पस्याप्यस्य कौतुकम् ॥६३१॥

अन्वयः- सः दध्यौ । एषा मम कुलं वा नाम वा कथं वेत्ति । सर्पस्य अपि अस्य मानुषी भाषा कथम्? इति कौतुकम् ॥६३१॥

विवरणम्:- सः नलः दध्यौ। एषः मम कुलं वा नाम वा कथं वेत्ति कथं जानाति! अस्य सर्पस्य सतः अपि मानुषी भाषा कथम्? इति कौतुकम् आश्चर्यं वर्तते ॥६३१॥

सरलार्थः- सः नलः चिन्तितवान् । एष; मम कुलं नाम च कथं जानाति? अयं सर्पः अपि मनुष्यवत् कथं भाषते? एतद् आश्चर्यं वर्तते ॥६३१॥

ગુજરાતી :- પછી તેણે વિચાર્યું કે, આ સર્પ મારું કુળ અથવા નામ કેમ જાણે છે? અથવા આ સર્પને પણ મનુષ્યની ભાષા કેમ આવડે છે ? એ આશ્ચર્ય છે. ॥૬૩૧॥

हिन्दी :- फिर उसने सोचा कि यह सर्प मेरा कुल और नाम कैसे जानता है? अथवा इस सर्प को मनुष्यभाषा कैसे बोलने आती है? यह तो आश्चर्य है। ॥६३१॥

मराठी :- नंतर त्याने विचार केला की, हा साप माझे कुळ आणि माझे नाव कसे जाणतो? किंवा या सापाला मनुष्यभाषा कशी बोलता येते? हे तर आश्चर्य (नवल) आहे. ॥६३१॥

English :- Then King Nal kept wondering and was suprised, as to how the snake knew his name and his family's clan and as to how it can speak like a human being.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पृष्टः सोऽथ नलेनोचेऽवधेर्वेद्मि कुलादिकम् ॥
प्राग्जन्मनि मनुष्यत्वात् तद्भाषाभ्यासतो मम ॥६३२॥

अन्वयः- अथ नलेन पृष्टः स ऊचे-अहम् अवधेः कुलादिकं वेद्मि। प्राग्जन्मनि मनुष्यत्वात् अभ्यासतः मम तदभाषा रोचते ॥६३२॥

विवरणम्:- *अथ अनन्तरं नलेन पृष्टः सः सर्पः ऊचे बभाषे। अहम् अवधेः अवधिज्ञानतः कुलमादौ यस्यतत् कुलादिकं कुलनामादिकं वेद्मि जानामि। प्राक् च तद् जन्म च प्राग्जन्म, तस्मिन् प्राग्जन्मनि पूवभवे मनुष्यस्य भावः मनुष्यत्वं तस्मातं मनुष्वत्वात् अभ्यासतः अभ्यासात् मम तस्य मनुष्यस्य भाषा तद्भाषा रोचते ॥६३२॥*

सरलार्थः- अनन्तरं नलेन पृष्टः सर्पः अवदत् - अहम् अवधिज्ञानेन कुलादिकं जानामि। पूर्वभवे मनुष्यः आसम्। तेन अभ्यासात् मनुष्यस्य भाषां जानामि ॥६३२॥

ગુજરાતી :- પછી નલરાજાના પૂછવાથી તે સર્પે કહ્યું કે અવધિજ્ઞાનથી તમારાં કુલઆદિને હું જાણું છું, અને પૂર્વ જન્મમાં હું મનુષ્ય હોવાથી, અભ્યાસને લીધે તે મનુષ્યભાષા મને આવડે છે. ॥૬૩૨॥

हिन्दी :- फिर नलराजा के पूछने पर सर्प ने कहा कि, अवधि ज्ञान से तुम्हारे कुलआदि को मैं जानता हूं, और पूर्व जन्म में मै मनुष्य होने के कारण, अभ्यास होने से मनुष्यभाषा मुझे आती है ॥६३२॥

मराठी :- मग नलराजाने विचारल्यावर तो साप म्हणाला- मी अवधिज्ञानाने तुमचे कुळ, नाव वगैरे जाणतो आणि पूर्व जन्मात मी मनुष्य असल्यामुळे अभ्यासाने मला मनुष्यभाषा बोलता येते. ॥६३२॥

English :- On being questioned by King Nal, the snake replied that he knew about his name and clan because he had attained Avadigyan and could speak like a humanbeing because he was a human in his past life and had been a learned man.

अथानुकम्पमानस्तमाक्रष्टुं शृङ्खलामिव ।।
लतागुल्मोर्ध्वभागेन नलः सङ्ख्यानमक्षिपत् ।।६३३।।

अन्वयः- अथ अनुकम्पमानः नलः शृङ्खलामिव तम् आक्रष्टुं लतागुल्मोर्ध्वभागेन सङ्ख्यानम् अक्षिपत् ।।६३३।।

विवरणम्:- अथ अनन्तरं अनुकम्पमानः दयमानः नलः शृङ्खलाम् इव तं सर्पम् आक्रष्टुं लतानां गुल्मः लतागुल्मः। ऊर्ध्वश्चासौ भागश्च ऊर्ध्वभागः। लतागुल्मस्य ऊर्ध्वभागः लतागुल्मोर्ध्वभागः, तेन लतागल्मोर्ध्वभागेन सङ्ख्यानं हस्त म अक्षिपत् ।।६३३।।

सरलार्थः- अनन्तरं दयमानः नलः शृङ्खलाम् इव तं सर्पम् आक्रष्टुं लतागुल्मस्य ऊर्ध्वभागेन हस्तम् अक्षिपत् ।।६३३।।

ગુજરાતી :- પછી દયા આવતા નલરાજાએ સાંકળની પેઠે તે સર્પને ખેંચી લેવા માટે લતાઓ તરફ પોતાનો હાથ લંબાવ્યો.।।६३३।।

हिन्दी :- फिर दया आने पर नलराजा ने शृंखला की तरह उसे खींचने के लिए लता के गुच्छे के ऊपर अपना हाथ बढाया (लंबाया) ।।६३३।।

मराठी :- नंतर दया आल्याने नलराजाने साखळीप्रमाणे त्या सापाला खेचून काढण्याकरिता वेलीच्या गुच्छ्यावर स्वत:चा हाथ लांबविला. ।।६३३।।

English :- Then King Nal, who was overcome with feelings of sympathy, stretched out his hand to pull it out which seemed he was pulling the snake out with a chain.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

वेष्टितं भोगिना तच्च स्वभोगेन व्यराजत ।।
काचजैर्वलयैः पाणिर्भृतचूड इव स्त्रियः ।।६३४।।

अन्वयः- भोगिना स्वभोगेन वेष्टितं तद् काचजैः वलयैः भृतचूडः स्त्रियः पाणिः इव व्यराजत ।

विवरणम्:- भोगिना सर्पेण स्वस्य भोगः शरीरं स्वभोगः तेन स्वभोगेन स्वशरीरेण वेष्टितं तद् तागभल्मं काचात् जायन्ते इति काचजानि तैः काचजैः वलयढः कङ्कणैः काचकङ्कणैः भृतः चूडः यस्मिन् सः भृतचूडः स्त्रियः पाणिः हस्तः इव व्यराजत अशोभत ।।६३४।।

सरलार्थः- सर्पेण स्वशरीरेण वेष्टितं तत् लतागुल्मं काचकङ्कणैः भृतचूडः स्त्रियः हस्तः इव अशोभत ।।६३४।।

ગુજરાતી :- સર્પે પોતાના શરીરથી વીંટેલો તે ગુચ્છો કાચની બંગડીઓનો ચૂડો પહેરેલી સ્ત્રીના હાથની પેઠે શોભતો હતો. ।।૬૩૪।।

हिन्दी :- साप के शरीर से लिपटा हुआ वह लता का गुच्छ काचकी चुडिओं को पहने हुए स्त्री के हाथ के समान सुशोभित लग रहा था ।।६३४।।

मराठी :- सापाच्या शरीराने वेढलेला तो लतागुच्छ काचेच्या बांगडया घातलेल्या स्त्रीच्या हातासारखा शोभत होता.

English :- The bunch which had encircled itself around the snake, seemed like well-adorned bangles on the hands of a woman.

वेष्टितं भोगिना तच्च स्वभोगेन व्यराजत ॥
काचजैर्वलयैः पाणिभृतचूड इव स्त्रियः ॥६३४॥

अन्वयः- भोगिना स्वभोगेन वेष्टितं तद् काचजैः वलयैः भृतचूडः स्त्रियः पाणिः इव व्यराजत।

विवरणम्:- भोगिना सर्पेण स्वस्य भोगः शरीरं स्वभोगः तेन स्वभोगेन स्वशरीरेण वेष्टितं तद् तागभल्मं काचात् जायन्ते इति काचजानि तैः काचजैः वलयैः कङ्कणैः काचकङ्कणैः भृतः चूडः यस्मिन् सः भृतचूडः स्त्रियः पाणिः हस्तः इव व्यराजत अशोभत ॥६३४॥

सरलार्थः- सर्पेण स्वशरीरेण वेष्टितं तत् लतागुल्मं काचकङ्कणैः भृतचूडः स्त्रियः हस्तः इव अशोभत ॥६३४॥

गुजराती :- સર્પે પોતાના શરીરથી વીંટેલો તે ગુચ્છો કાચની બંગડીઓનો ચૂડો પહેરેલી સ્ત્રીના હાથની પેઠે શોભતો હતો. ॥६३४॥

हिन्दी :- साप के शरीर से लिपटा हुआ वह लता का गुच्छ काचकी चुडिओं को पहने हुए स्त्री के हाथ के समान सुशोभित लग रहा था ॥६३४॥

मराठी :- सापाच्या शरीराने वेढलेला तो लतागुच्छ काचेच्या बांगड्या यातलेल्या स्त्रीच्या हातासारखा शोभत होता.

English :- The bunch which had encircled itself around the snake, seemed like well-adorned bangles on the hands of a woman.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथाकृष्य कृपालुस्तं नीत्वा भूमिं च निस्तृणाम् ॥
तत्र भोक्तुमनास्तेन हस्तेऽदश्यत भोगिना ॥६३५॥

अन्वयः- अथ कृपालुः नलः तं निस्तृणां भूमिं नीत्वा तत्र मोक्तुमनाः तेन भोगिना हस्ते अदश्यत ॥६३५॥

विवरणम्:- *अथ अनन्तरं कृपालुः दयालुः नलः तं सर्पं निर्गतं तृणं यस्याः सा निस्तृणा, तां निस्तृणां तृणरहितां भूमिं नीत्वा तत्र तस्यां भूमौ मोक्तुं मनः यस्य सः मोक्तुमनाः त्यक्तुकामः सः तेन भोगः अस्यास्तीति भोगी तेन भोगिना सर्पेण हस्ते अदश्यत दष्टः ॥६३५॥*

सरलार्थः- अनन्तरं कृपालुः नलः तं सर्पं तृणरहितां भूमिं नीत्वा तत्र तं सर्पं भोक्तुकाम; सः तेन सर्पेण हस्ते दष्ट ॥६३५॥

ગુજરાતી :- પછી તે દયાળુ નલ તેને ખેંચી લઈને, ઘાસ વિનાની જમીન પર લાવીને જેવો છોડવા જાય છે તેવો જ તે સર્પે તેના હાથ પર ડંખ માર્યો. ॥૬૩૫॥

हिन्दी :- फिर वह दयालु नल उसे खींचकर बिना घास की जमीनपर छोडने का मन करता है कि उतने में ही उस साप ने उसके हाथ पर दंश दिया॥ ॥६३५॥

मराठी :- नंतर तो दयाळू नळ त्याला खेचून काढून गवत (घास) नसलेल्या जमिनिवर आणून सोडून देण्याचा विचार करीत होता, तेवढ्यातच त्या सापाने त्याच्या हातावर डंख मारला. ॥६३५॥

English :- Then King Nal having pulled out the snake from the creepers, decided to place it on the ground which has no gress. As he was looking for much a place, the snake striked him on his hand.

ततः क्षोणीतले सर्पं क्षित्वा चानिष्टवस्तुवत् ॥
उपालभत भूपालः साधू भोस्ते कृतज्ञता ॥६३६॥

अन्वयः- ततः भूपालः अनिष्टवस्तुवत् तं सर्पं क्षोणीतले क्षिप्त्वा उपालभत - भोः! ते कृतज्ञता साधु ॥६३६॥

विवरणम्:- *ततः भुवं पालयतीति भूपालः नृपः नलः न इष्टम् अनिष्टम् । अनिष्टं च तद् वस्तु च अनिष्टवस्तु । अनिष्टवस्तुना तुल्यम् अनिष्टवत् । यथा अनिष्टं वस्तु त्यज्यते तथा तं सर्पं क्षोण्याः पृथ्व्याः तलं क्षोणीतलं तस्मिन् क्षोणीतले पृथ्वीतले क्षिप्त्वा परित्यज्य तम् उपालभत अनिन्वत् । भोः! ते त्वया कृतं जानातीति कृतज्ञः । कृतज्ञस्य भावः कृतज्ञता साधु दर्शिता ॥६३६॥*

सरलार्थः- ततः नलः नृपः अनिष्टवस्तुवत् तं सर्पं भूमौ क्षित्वा उपालभत भोः! त्वया कृतज्ञता साधु सम्यक् दर्शिता ॥६३६॥

ગુજરાતી :- પછી અનિચ્છિત વસ્તુની પેઠે સર્પને પૃથ્વીતલ પર ફેંકી દઈને, નલરાજા તેને ઠપકો દેવા લાગ્યો કે, અરે! કૃતજ્ઞપણું તો તેં ભલું (દેખાડ્યું.) ॥६३६॥

हिन्दी :- फिर अनिच्छित वस्तु के समान सर्प को पृथ्वी पर फेंककर नलराजा उसे कहने लगा कि, अरे! कृतज्ञता तो अच्छी दिखायी। ॥६३६॥

मराठी :- नंतर नलराजाने अनिष्ट वस्तुप्रमाणे त्या सापाला जमिनीवर फेकले व त्याला ठपका देत म्हणाला- शाबास! चांगलाच कृतज्ञपणा दाखविला. ॥६३६॥

English :- King Nal threw away the snake as though it was a disguisting object, and asked it, if this was the way to repay his gratitude.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

उपकर्तुर्ममाऽद्य त्वं साधूपकृतवानहो ।।
यदिवा होतुरप्यग्निः किं न दाहाय जायते ।।६३७।।

अन्वयः- अहो! तम् अद्य उपकर्तुः मम साधु उपकृतवान्। यदि वा अग्निः होतुः अपि दाहाय न जायते किम्! ।।६३७।।

विवरणम्:- अहो! (इत्याश्चर्ये) त्वम् अद्य उपकरोतीति उपकर्ता तस्य उपकर्तुः उपकारकारिणः मम साधु सम्यक् उपकृतवान् उपाकरोः। यदि वा अग्निः वह्निः जुहोतीति होता तस्य होतुः हवनकर्तुः अपि दाहाय न जायते किम्! जायते एव। यथा अग्निः होतुः उपकर्तुः दाहाय जायते तथा त्वमपि मम अपकाराय जातः असि ।।६३७।।

सरलार्थः- अहो! अद्य त्वम् उपकर्तुः मम साधु उपकृतवान् असि। अथवा अग्निः होतुः दाहाय भवति ।।६३७।।

गुजराती :- અહો! તારા ઉપકારી (એવા મારા) પર ઉપકાર તો બહુ સારો કર્યો! અથવા અગ્નિ યજ્ઞ કરનારના હાથ પર દાહ નથી દેતો? ।।६३७।।

हिन्दी :- अरे! उपकार करनेवाले मुझपर तुमने आज उपकार तो बहुत अच्छा किया अथवा क्या अग्नि होम करनेवाले के हाथ को जलाता नहीं?।।६३७।।

मराठी :- अरे! आज तू उपकार करणाऱ्या माझ्यावर तर चांगलाच उपकार केला आहे. ठीक आहे. अग्नीसुद्धा होम करणाऱ्याच्या हाताला जाळतोच. उपकार करणाऱ्यावर अपकार करतो. तसा तू माझ्यावर अपकार केला आहे.।। ६३७।।

English :- King Nal says that, this was a gracious way to repay the obligation of a benefactor. Even the fire used during the fire sacrifice which is censidered to be pious and holy, can even burn one's hand if thrusted in it.

वातेनेव विषेणाथ सर्वाङ्गप्रचरिष्णुना ॥
वपुर्वलायितं जज्ञे नैषधेः शशिखण्डवत् ॥६३८॥

अन्वयः- अथ वातेन इव सर्वाङ्गप्रचरिष्णुना विषेण नैषधेः वपुः शशिखण्डवत् वलायितं जज्ञे ॥६३८॥

विवरणम्:- अनन्तरं सर्पदंशनात् अनन्तरं वातेन वायुना इव सर्वाणि च तानि अङ्गानि च सर्वाङ्गानि। सर्वाङ्गेषु प्रचरितुं शीलमस्य अस्तीति सर्वाङ्गप्रचरिष्णु, तेन सर्वाङ्गप्रचरिष्णुना सर्ववयवप्रसर्पिणा विषेण गरलेन निषधस्यापत्यं पुमान् नैषधिः तस्य नैषधेः नलराजस्य वपुः शरीरं शशिनः चन्द्रमसः खण्डः शशिखण्डः। शशिखण्डेन तुल्यं शशिखण्डवत् चन्द्रकलावत् वलयमिव कङ्कणम् इव आचरितं वलयितं कङ्कणवत् वर्तुलाकारं जज्ञे बभूव ॥६३८॥

सरलार्थः- सर्पदंशनात् अनन्तरं वातेन इव सर्वाङ्गेषु सञ्चरता विषेण नलस्य शरीरं शशिखण्डवत् वलयाकारमभवत् ॥६३८॥

ગુજરાતી :- પછી વાયુનીપેઠે વિષ તેના સર્વ શરીરમાં ફેલાઈ જવાથી, નલરાજાનું શરીર ચંદ્રના ખંડની પેઠે સંકોચાઈ ગયું. ॥६३८॥

हिन्दी :- फिर वायु के समान विष उसके सारे शरीर में फैल जाने से नलराजा का शरीर चंद्र के खंड (भाग) के समान सिकुड गया ॥६३८॥

मराठी :- नंतर सापाचे विष वाऱ्याप्रमाणे सर्व शरीरात पसरल्यावर नलराजाचे शरीर चन्द्रकलेप्रमाणे वर्तुळाकार (वाकडे) झाले. ॥६३८॥

English :- Just as the wind blows on land in the same way, the poison blew its power all over King Nal's body and his body shriveled, just as the shriveling of the moon causer the phases of the moon.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

तदा च गिरिवत् पिङ्गरोमा दन्तीव दन्तुरः ॥
जलोदरीव सूक्ष्माङ्घ्रिकरः स्थूलतमोदरः ॥६३९॥

अन्वयः- तदा गिरिवत् पिङ्गरोमा, दन्तीव दन्तुरः, जलोदरी इव सूक्ष्माङ्घ्रिकरः स्थूलतमोदरः नेषधिः घटितः ॥६३९॥

विवरणम्:- *तदा तस्मिन् समये सर्वाङ्गेषु विषप्रसरणात् गिरिणा तुल्यं गिरिवत् पिङ्गानि पीतानि रोमाणि यस्य सः पिङ्गरोमा पीतलोमा दन्तौ अस्य स्तः इति दन्ती। हस्ती इव दन्तुरः बहिर्निर्गतदन्तः, जलोदरः (रोगः) अस्थास्तीति जलोदरी जलोदररोगी इव अङ्घ्री (चरणौ)च करौ च एतेषां समाहारः अङ्घ्रिकरम् । सूक्ष्मम् अङ्घ्रिकरं यस्य सः सूक्ष्माङ्घ्रिकरः, अतिशयेन स्थूलं स्थूलतमम्। स्थूलतमम् उदरं यस्य सः स्थूलतमोदरः च नलः अभवत् ॥६३९॥*

सरलार्थः- तदा सर्वाङ्गेषु विषप्रसरणात् नलस्य रोमाणि पिङ्गानि अभवन् । दन्ताः गज इव बहिः निर्गताः । जलोदररोगिणः इव हस्तौ पादौ अतीव कृशौ उदरं च स्थूलतमम् अभवत् ॥६३९॥

ગુજરાતી :- પછી તે પર્વતની પેઠે પીળા રુંવાડાંવાળો, હાથીનીપેઠે બહાર નીકળેલા દાંતોવાળો, જલોદરના રોગીની પેઠે બારીક હાથપગવાળો, તથા મોટા પેટવાળો થઈ ગયો.

हिन्दी :- सारे शरीर में विष प्रसारण से नल राजा पर्वत के समान, पीले रोमवाले हाथी के समान, बहार निकले हुऐ दांतोवाला जलोदर के रोगी के समान (पतले) अति कृश हाथ-पैर वाला और बडे पेटवाला हो गया ॥६३९॥

मराठी :- सापाचे विष सर्व अंगांत पसरल्यामुळे नलराजाच्या शरीरावरील रोम पिवळे झाले. दात हत्तीप्रमाणे बाहेर नियाले आणि जलोदर झालेल्या रोग्याचे हात-पाय जसे बारीक होतात व पोट मोठे होते. त्याप्रमाणे नलराजाचे हातपाय बारीक झाले व पोट मोठे झाले. ॥६३९॥

English :-As the poison had spread throughout the body, which made the small hair on his body seem like the hay growing on a hill and his teeth had enlarged like the tusks of the elephant. And his stomach attained a bloating shape which seemed he had caught the disease called dropsy which causes due to unnatural collection of water in the body.

P.P. Ac. Gunratnasuri M.S.

तमोमय इव श्यामः किं बहूक्तेन नैषधिः ॥
सर्वात्मनापि सअज्ञे भङ्क्त्वेन घटितस्तदा ॥६४०॥

अन्वयः- तमोमयः इव श्यामः, बहुना उक्तेन किम्! तदा नैषधिः सर्वात्मनाऽपि भङ्क्त्वा इव घटितः॥६४०॥

विवरणम्:- तमसां विकारः तमोमयः तमोभिः अन्धकारैः निर्मितः इव श्यामः (अभूत् नलः) बहुना उक्तेन किम्! तदा निषधस्यापत्यं पुमान् नैषधिः नलराजः सर्वश्वासौ आत्मा च सर्वात्मा तेन सर्वात्मना पूर्णतया भङ्क्त्वा इव घटितः । पुनर्निर्मित इव अभवत् । यतः तस्य सर्वं शरीरमेव विपरीतमभवत् ॥६४०॥

सरलार्थः- तमोभिः निर्मितः इव श्यामः (अभूत् नलः) बहुना उक्तेन किम्। तदा नलराजः सर्वात्मना भङ्क्त्वा इव पुनर्निर्मितः अभवत् ॥६४०॥

ગુજરાતી :- વળી જાણે અંધકારમય હોય નહીં તેવો શ્યામરંગનો થઈ ગયો. વધારે શું કહેવું? જાણે ભાંગીને ફરીથી ઘડ્યો હોય નહીં તેમ નલરાજા ત્યારે સર્વ શરીરે કદ્રુપો થઈ ગયો. ॥६४०॥

हिन्दी :- फिर नलराजा मानो अंधकारमय ही उत्पन्न हुआ हो ऐसा श्याम रंग का हो गया। अधिक क्या कहना? मानो वह भागकर फिर से बनाया हुआ हो ऐसा कुरूप बन गया ॥६४०॥

मराठी :- तिषामुळे नलाराजा जणूं अंधकारानेच उत्पन्न केल्यासारखा काळाकुट्ट झाला. फार काय सांगावे जणू काय मोडून पुन्हा बनविल्यासारखा झाला. त्याचे सर्व रूपच बदलून गेले. ॥६४०॥

English :- His body seemed as though his it had attained the complexion, of darkness and gloom. Or in other words, he seemed like a household good, which was pasted back again, when it had broken into pieces. In short his body had become a mass of deformity and ugliness.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

दध्यौ चेवंविधस्यात्र जीवितं मम निष्फलम् ॥
तमहं सफलीकुर्वे प्रव्रज्य मुनिचर्यया ॥६४१॥

अन्वयः- दध्यौ च। अत्र एवंविधस्य मम जीवितं निष्फलम् अस्ति। अहं प्रव्रज्य मुनिचर्यया तं सफलीकुर्वे ॥६४१॥

विवरणम्:- *ततः नलः दध्यौ चिन्तितवान् - अत्र एवंविधस्य सर्वथा एव विपरीततां प्राप्तस्य मम जीवितं निष्फलं निरर्थकम् अस्ति। अतः अहं प्रव्रज्य दीक्षां गृहीत्वा मुनेः चर्या मुनिचर्या, तया मुनिचर्यया मुनिवत् विचरणेन मम जीवितं न सफलम् असफलम्। असफलं सफलं कुर्वे सफलीकुर्वे। सफलं करोमि ॥६४१॥*

सरलार्थः- ततः नलः चिन्तितवान - अत्र सर्वथा विपरीततां प्राप्तस्य मम जीवितं निष्फलमस्ति। अतः अहं दीक्षां गृहीत्वा मुनिवत् विचरणेन मम जीवितं सफलं करोमि ॥६४१॥

ગુજરાતી :- પછી તે વિચારવા લાગ્યો કે, આવી હાલતવાળો હું, જીવીને શું કરું ? માટે હવે દીક્ષા લઈને મુનિપણે વિચરીને હું મારું આ જીવન સફલ કરું. ॥६४१॥

हिन्दी :- तब वह विचार करने लगा कि, ऐसी स्थित में मेरा यहा जीना निरर्थक हे। इसलिऐ अब दीक्षा ग्रहण कर मुनि बनकर अपना जीवन सफल कर लुं ॥६४१॥

मराठी :- मग तो विचार करु लागला की, अश्या अवस्थेत असलेला मी, इथे माझे जगणे निरर्थक आहे म्हणून मी आता दीक्षा येऊन मुनिप्रमाणे जगून माझे जीवन सफल करतो. ॥६४१॥

English :- Then he thouht to himself that it would be meaningless to live in such a meanigless situation. So it would be proper to renounce this worldy life and become a priest.

इति चिन्ताप्रपन्नस्य नलस्याहिः स तत्क्षणात् ॥
मुक्त्वाहिवेषं नटवत् बभूवामरवेषभाक् ॥६४२॥

अन्वयः- नलस्य इति चिन्ता प्रपन्नस्य सतः स अहिः तत्क्षणात् नटवत् अहिवेषं मुक्त्वा अमरवेषभाक् बभूव ॥६४२॥

विवरणम्:- नलस्य इति चिन्तां प्रपन्नः चिन्ताप्रपन्नः तस्य चिन्ताप्रपन्नस्य चिन्तां प्राप्तस्य सतः सः अहिः सर्पः तत्क्षणादेव नटेन तुल्यं नटवत् यथा नटः एकं वेषं परित्यज्य अन्यं वेषं परिदधाति तथा सर्पः अपि अहिवेषं अहेः वेषः अहिवेषः तम्, मुक्त्वा परित्यज्य न विद्यते मरः मरणं यस्य सः अमरः देवः । अमरस्य वेषः अमरवेषः । अमरवेषं भजतीति अमरवेषभाक् अमरः बभूव ॥६४२॥

सरलार्थः- यदा नलः इति चिन्ता प्रपन्नः तदा सः सर्पः तत्क्षणात् एव नटवत् अहिवेषं मुक्त्वा अमरवेषभाक् बभूव ॥६४२॥

ગુજરાતી :- એવી રીતની ચિંતામાં નલરાજા પડેલો હતો ત્યારે તેજ ક્ષણે તે સાપ નટની પેઠે સર્પનું રુપ તજીને દેવના વેષવાળો થઇ ગયો.॥६४२॥

हिन्दी :- नलराजा इसप्रकार की चिंता में पडा हुआ था तब वह सर्प उसी क्षण सर्प का रूप छोडकर देव हो गया ॥६४२॥

गुजराती :- પછી તે કુબ્જે વસ્ત્રાદિક ગ્રહણ કર્યા, પરંતુ ગામ તો એક પણ લીધું નહીં. ત્યારે રાજાએ કહ્યું કે, હે કુબ્જા! તને બીજું પણ કંઈ આપું?॥૬૮૨॥

हिन्दी :- फिर उस कुब्ज ने वस्त्रादि ग्रहण किए लेकिन एक भी गावं ग्रहण नही किया। तब राजाने कहा कि, हे कुब्ज! तुझे और दूसरा कुछ दूँ?॥६८२॥

मराठी :- मग त्या कुब्जाने वस्त्र इत्यादि ग्रहण केले, परंतु एकही गावं घेतले नाही तेव्हा राजाने म्हटले कि, "हे कुब्जा तुला दुसरे अजून काही देऊ?"॥६८२॥

English :- King Nal then accepted the clothes and ornaments, but refused to accept the villages, At this, the King asked Nal, if he wished or desired anything else.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽवदत्तर्हि राज्ये स्वे वार्यतां मृगयाशु रे ।।
राजाऽपि तत्तथाकार्षीत् तद्वचो बहुमानतः ।।६८३।।

अन्वयः- सः अवदत् रे राजन्! तर्हि स्वे राज्ये आशु मृगया वार्यताम्। राजा अपि बहुमानतः तत् तद्वचः तथा अकार्षीत् ।।६८३।।

विवरणम्:- सः अवदत् - रे राजन् ! यदि त्वं मह्यं किञ्चिद् दातुमिच्छसि तर्हि स्वे निजे राज्ये आशु शीघ्रतरं त्वयां मृगया पापर्द्धिः वार्यताम् निवार्यताम्। राजा अपि बहुमानतः बहुमानात् तत् तस्य कुब्जस्य वचः तद्वचः तथा यथोक्तम् अकार्षीत् अकरोत् ।।६८३।।

सरलार्थः- सः कुब्जाः अवदत् - हे राजन् ! यदि त्वं मह्यम् अन्यदपि किञ्चित् दातुमिच्छसि तर्हि स्वकीयें राज्ये शीघ्रं मृगयां निवारय। राजाऽपि बहुमानात् तस्य वचनं तथैव अकरोत् ।।६८३।।

ગુજરાતી :- ત્યારે તે કુબ્જે કહ્યું કે, હે રાજન! ત્યારે તમારા રાજ્યમાંથી શિકારનું તુરંત નિવારણ કરો? ત્યારે રાજાએ પણ તેના વચનનું બહુમાન રાખીને તેમ કર્યું. ।।૬૮૩।।

हिन्दी :- तब उस कुब्जने कहा कि, हे राजन् आप अपने राज्य में शिकार का तुरंत निषेध कीजिये। तब राजाने उसके वचन का बहुमान कर, वैसा ही किया। ।।६८३।।

मराठी :- तेव्हा तो कुब्ज म्हणाला- ''हे राजा। तर मग तू तुझ्या राज्यात ताबडतोब शिकारीला बंदी कर. तेव्हा राजाने पण त्याच्या वचनाचा बहुमान ठेवून तसेच केले. शिकारीवर बंदी घातली. ।।६८३।।

English :- Nal replied that he wishes that the king should prohibit hunting for good. The king respecting Nal's wish did so.

अथापरेद्युरेकान्ते कुब्जे राजा जगाद तम् ॥
कस्त्वं भद्र! क्व वास्तव्यः कस्मादत्रागतोऽसि वा ॥६८४॥

अन्वयः- अथ अपरेद्युः एकान्ते राजा तं कुब्जं जगाद। भद्र। त्वं कः असि? क्व वास्तव्यः असि? कस्मात् अत्र आगतः असि? ॥६८४॥

विवरणम्:- अथ अनन्तरम् अपरेद्युः अपरस्मिन् दिने एकान्ते रहसि राजा दधिपर्णः तं कुब्जं जगाद जगौ। भद्र! त्वं कः असि? क्व वास्तव्यः असि? कुत्र निवससि? कस्मात् कारणात् अत्र आगतः असि ॥६८४॥

सरलार्थः- ततः अपरस्मिन् दिने राजा एकान्ते तं कुब्जमवादीत् - भद्र! त्वं कः असि? कुत्र निवससि। कस्मात् कारणात् अत्र आगतः असि ॥६८४॥

ગુજરાતી :- પછી એક દિવસે એકાંતે તે કુબ્જને રાજાએ પૂછ્યું કે, હે ભદ્ર! તુ કોણ છે? ક્યાંનો રહેવાસી છે? તથા અહીં શા માટે આવેલો છે? ॥૬૮૪॥

हिन्दी :- फिर एक दिन राजाने उस कुब्ज को एकान्त में पूछा कि, हे भद्र! तू कौन है? कहाँ का निवासी है? और यहाँ क्यों आया है?॥६८४॥

मराठी :- नंतर एके दिवशी एकांतात त्या कुब्जला राजाने म्हटले की, ''हे भद्र! तु कोण आहेस? कुठला निवासी आहे? आणि इथे कशासाठी आला आहे?''॥६८४॥

English :- Then one day the king asked Nal in private to disclose his identity and from where does he hail from and the reason for his arrival.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽवदत् कोशलापुर्यां सूपकारोऽस्मि हुण्डिकः ।।
नलस्यातिप्रियस्तेन दत्ताः सर्वाः कलाः मम ।।६८५।।

अन्वयः- सः अवदत् - अहं कोशलापुर्यां नलस्य अतिप्रियः हुण्डिकः सूपकारः अस्मि । तेन मम सर्वाः कलाः दत्ताः ।।६८५।।

विवरणम्:- *सः कुब्जः अवदत् - अहं कोशलापुर्यां कोशलायां नाम नगर्यां नलस्य अतिशयेन प्रियः अतिप्रियः हुण्डिकः नाम सूपं करोतीति सूपकारः सूदः अस्मि । तेन नलेन अतिप्रियत्वात् मम मह्यं सर्वाः कलाः दत्ताः ।।६८५।।*

सरलार्थः- सः कुब्जः अवदत् - अहं कोशलापुर्यां नलस्य अतिप्रियः हुण्डिकः नाम सूपकारः सूदः अस्मि । तेन नलेन अतिप्रियत्वात् मह्यं सकलाः कलाः दत्ताः ।।६८५।।

ગુજરાતી :- ત્યારે તેણે કહ્યું કે, કોશલા નગરીમાં હું હુંડિક નામનો નલરાજાનો અતિપ્રિય રસોઈયો છું, અને તેથી તેણે મને પોતાની સર્વ કલાઓ આપી છે. ।।૬૮૫।।

हिन्दी :- तब उसने कहा कि, "मै कौशलनगरी के राजा नल का हुंडिक नाम का अतिप्रिय रसोईया हूँ और उन्होने मुझे अपनी सभी कला दी है।" ।।६८५।।

मराठी :- तेव्हा तो म्हणाला- "कोशलानगरीत मी हुंडिक नावाचा नळराजाचा अतिप्रिय स्वयंपाकी आहे, आणि त्यांचा मी अतिशय प्रिय असल्यामुळे मला सर्व कला दिल्या आहेत. ।।६८५।।

English :- At this the hunchback replied that he was Kings Nal's favourite cook from Koshla whom king Nal had taught all the arts, named Hundick.

कूबरेणाखिलं राज्यं कैतवेन जितो नलः ॥
भैमीमायत्रपरीवारः नववासमाशिश्रियत् ॥६८६॥

अन्वयः- कूबरेण कैतवेन नलः अखिलं राज्यं जितः । भैमीमात्रपरीवारः सः वनवासम् अशिश्रियत् ॥६८६॥

विवरणम्:- कूबरेण नलस्य कनीयसा भ्रात्रा कितवस्य भावः कैतवं, तेन कैतवेन कपटेन नलः अखिलं सर्वं राज्यं जितः । अतः सः भीमस्य अपत्यं स्त्री भैमी दमयन्ती एव परीवारः परिजनः यस्य सः भैमीमात्रपरीवारः केवलया दमयन्त्या सह वने वासः वनवासः, तं वनवासम् अशिश्रियत् आश्रयत् ॥६८६॥

सरलार्थः- कूबरेण कपटेन नलस्य अखिलं राज्यं जितम् ततः नलः दमयन्त्या सह वनवासम् अश्रितवान् ॥६८६॥

ગુજરાતી :- કૂબરે કપટક્રિયાથી નલરાજાનું સઘળું રાજ્ય જીતી લીધું છે, અને તેથી તેણે ફક્ત દમયંતીને સાથે લઈને વનવાસ સ્વીકાર્યો છે. ॥६८६॥

हिन्दी :- "कूबर ने कपटलीला द्वारा नलराजा का सारा राज्य जीत लिया है, और उन्होने केवल दमयंती को साथ लेकर वनवास स्वीकारा है।"॥६८६॥

मराठी :- कूबर ने कपटाने नळराजाचे सगळे राज्य जिंकून घेतले. त्यामुळे नलराजाने दमयंन्तीसह वनवासाचा आश्रय केला. ॥६८६॥

English :- He continued saying that his brother Kubar had taken over his Kingdom by false and sly means, which made Nal and Damyanti to accept a dwelling in the forest.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रुत्वा तत्र विपन्नं तं निराशस्त्वामुपागमम् ॥
अत्याक्षमविशेषज्ञं कूबरं तं वरं शठम् ॥६८७॥

अन्वयः- तत्र तं विपन्नं श्रुत्वा निराशः अहं त्वाम् उपागमम् । अविशेषज्ञं वरं शठं तं कूबरम् अत्याक्षम् ॥६८७॥

विवरणम्:- तत्र वनवासे तं नलं विपन्नं पञ्चत्वं गतं (मृतम्) श्रुत्वा अहं त्वाम् उपागमम्। विशेषं जानातीति विशेषज्ञः । न विशेषज्ञः अविशेषज्ञः, तम् अविशेषज्ञं कस्यापि गुणविशेषमजानानं वरम् अत्यन्तं शठं धूर्तं तं कूबरं च अहम् अत्याक्षम् अत्यजम् ॥६८७॥

सरलार्थः- वनवासे तं नलं मृतं श्रुत्वा अहं त्वामुपागमम् । कस्यापि विशेषम् अजानानमतीव शठं तं कूबरमहमत्यजम् ॥६८७॥

गुजराती :- ત્યાં તે નલને મૃત્યુ પામેલો સાંભળીને નિરાશ થઈ હું તમારી પાસે આવ્યો છું, તથા મુર્ખ અને વિશેષ પ્રકારે લુચ્ચાઈવાળા તે કૂબરને મેં તજી દીધો છે. ॥૬૮૭॥

हिन्दी :- वहाँ पर नलराजा की मृत्यु का समाचार सुनकर, मैं निराश होकर आपके पास आया हूँ। मूर्ख और विशेष प्रकार के धूर्त ऐसे कूबर को मैंने त्याग दिया है। ॥६८७॥

मराठी :- तेथे नळराजा मरण पावल्याची बातमी ऐकून निराश होऊन मी तुमच्या जवळ आलो आहे, आणि नोकरांचे गुण न जाणणाऱ्या, अतिशय धूर्त असलेल्या कूबराला मी सोडून दिले आहे. ॥६८७॥

English :- He continues saying that he had come to him when he heard that Nal was dead and when he was overcome with sadness. He therfore abandoned Kubar who was wicked and foolish.

दधिपर्णः समाकर्ण्य ततस्तां नलदुर्दशाम् ॥
चिरं शुशोच को वा न दूयते महदापदि ॥६८८॥

अन्वयः- ततः दधिपर्णः तां नलदुर्दशां समाकर्ण्य चिरं शुशोच। अथवा महदापदि कः न दूयते ॥६८८॥

विवरणम्:- ततः कुब्जवचनं श्रुत्वा दधिपर्णः नृपः तां दुष्टा दशा दुर्दशा नलस्य दुर्दशा नलदुर्दशा, तां नलदुर्दशां समाकर्ण्य निशम्य चिरं चिरकालं शुशोच अशोचत्। अथवा महताम् आपद् महदापद्, तस्यां महदापदि कः; न दूयते दुःखं प्राप्नोति। महतामापदमालोक्य सर्वः जनः शोचति ॥६८८॥

सरलार्थः- ततः दधिपर्णः नृपः नलस्य तां दुर्दशां श्रुत्वा चिरं शुशोच। यतः महतामापदि कः न दूयते? सर्वः एव दूयते ॥६८८॥

ગુજરાતી :- પછી દધિપર્ણરાજા નલરાજાની તે દુર્દશા સાંભળીને ઘણો દિલગીર થવા લાગ્યો. મહાન પુરુષોની આપદાથી કોને દુઃખ થતું નથી? ॥६८८॥

हिन्दी :- दधिपर्ण राजा नलराजा की दुर्दशा सुनकर बडे लम्बे समय तक शोक करने लगा। अथवा महान पुरुषो की विपत्ति से किसे दुःख नही होता? ॥६८८॥

मराठी :- नंतर दधिपर्णराजा नळराजाची दुर्दशा ऐकून खूप वेळ शोक करु लागला, कारण महान पुरुषांच्या आपत्तीमध्ये कोण दुःखी होत नाही? ॥६८८॥

English :- Having heard such a terrible state and sitution of King Nal, King Danipaine mourned for quiet some time as every person will bewail when they hear a calamily or disaster that has fallen on any eminent personality.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्यदा दधिपर्णेन भूभुजा प्रेषितो निजः ॥
दूतः केनापि कार्येण वैदर्भीपितुरन्तिके ॥६८९॥

अन्वयः- अन्यदा दधिपर्णेन भूभुजा केनापि कार्येण निजः दूतः वैदर्भीपितुरन्तिके प्रेषितः ॥६८९॥

विवरणम्:- *अन्यदा एकस्मिन् दिने दधिपर्णेन भुवं भुनक्ति भुङ्क्ते वा भूभुक्, तेन भूभुजा नृपेण केनापि कार्येण निजः दूतः विदर्भाणामीश्वरः वैदर्भः। वैदर्भस्य अपत्यं स्त्री वैदर्भी दमयन्ती, वैदर्भ्याः पिता वैदर्भीपिता, तस्य वैदर्भीपितुः दमयन्तीजनकस्य भीमराजस्य अन्तिके समीपे प्रेषितः प्रहितः ॥६८९॥*

सरलार्थः- एकस्मिन् दिने दधिपर्णेन राज्ञा प्रयोजनवशात् निजः दूतः दमयन्त्याः पितुः भीमराजस्य समीपे प्रेषितः ॥६८९॥

ગુજરાતી :- પછી એક દિવસે દધિપર્ણ રાજાએ કોઈક કાર્યપ્રસંગે દમયંતીના પિતા પાસે પોતાનો દૂત મોકલ્યો. ॥૬૮૯॥

हिन्दी :- एक दिन दधिपर्ण राजाने किसी कार्य के लिए दमयंती के पिता के पास अपना निजी दूत भेजा॥ ॥६८९॥

मराठी :- नंतर एके दिवशी दधिपर्ण राजाने काही कामानिमित्त दमयंतीच्या वडिलांकडे स्वत:चा दूत पाठविला. ॥६८९॥

English :- One day King Daniparne send his own personal messenger on some pretext, to the father of Damyanti.

तत्र प्रभूतकालं च सोऽतिष्ठत्तस्य सौहृदात् ॥
आचख्यौ च कदाप्येतां वार्तां प्रस्तावमागताम् ॥६९०॥

अन्वयः- सः तस्य सौहृदात् तत्र प्रभूतकालम् अतिष्ठत् । कदापि प्रस्तावमागताम् एतां वार्ताम् आचख्यौ ॥६९०॥

विवरणम्:- *सः दूतः तस्य सौहृदात् सख्यात् तत्र प्रभूतश्चासौ कालश्च प्रभूतकालः, तं प्रभूतकालंम् अतिष्ठत् । कदापि कदाचित् प्रस्तावम् आगताम् एतां वार्ताम् आचख्यौ अचीकथत् ॥६९०॥*

सरलार्थः- सः दूतः तस्य सौहृदात् तत्र प्रभूतकालमतिष्ठत् । कदाचित् प्रस्तावमागताम् एतां वार्ताम् अकथयत् ॥६९०॥

ગુજરાતી :- તે દૂત તેની મિત્રતાથી ત્યાં ઘણા કાળ સુધી રહયો, અને કોઈ એક દિવસે પ્રસ્તાવ આવતાં તેણે હકીકત જાહેર કરી, ॥૬૯૦॥

हिन्दी :- वह दूत मित्रता के कारण वहाँ बहुत समय रहा। एक दिन प्रस्ताव आने पर उसने सारी हकीकत वहाँ कह सुनाई ॥६९०॥

मराठी :- तो दूत त्याच्या मित्रतेमुळे खूप दिवस तेथे राहिला आणि एके दिवशी प्रसंग आल्यावर त्याने ती हकिकत तेथे जाहीर केली. ॥६९०॥

English :- The messenger stayed there for many days with his friends and on a certain day he disclosd the whole incident and happening.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

देवास्ति मत्प्रभोः पार्श्वमागतो नलसूपकृत् ।।
नलोपदेशाऽऽनाति सूर्यपाकक्रियां च सः ।।६९१।।

अन्वयः- देव! मत्प्रभोः पार्श्व नलसूपकृत् आगतः अस्ति। सः नलोपदेशात् सूर्यपाक्रियां जानाति ।।६९१।।

विवरणम्:- *देव! मम प्रभुः मत्प्रभुः, तस्य मत्प्रभोः मम स्वामिनः दधिपर्णनृपस्य पार्श्वं समीपं सूपं करोतीति सूपकृत्। नलस्य सूपकृत् नलसूपकृत् नलस्य सूदः आगतः अस्ति। सः नलस्य उपदेशः नलोपदेशः, तस्मात् नलोपदेशात् सूर्यपाकस्य क्रिया, तां सूर्यपाकक्रियां सूर्यातपे पाकं कर्तुं जानाति वेत्ति ।।६९१।।*

सरलार्थः- देव! मम स्वामिनः दंधिपर्णराजस्य समीपे नलस्य सूपकारः आगतः अस्ति। सः नलस्य उपदेशात् सूर्यपाकक्रियां जानाति ।।६९१।।

गुजराती :- હે સ્વામી! મારા સ્વામી પાસે નલરાજાનો રસોઈયો આવેલ છે, અને નલરાજાના શીખવ્યાથી તે સૂર્યપાક રસોઈની ક્રિયા જાણે છે. ।।६९१।।

हिन्दी :- हे स्वामी! मेरे स्वामी के पास नलराजा का प्रिय रसोईया आया है। वह नलराजा द्वारा सिखाई हुई सूर्यपाक विधि (क्रिया) से रसोइ बनाना जानता है। ।।६९१।।

मराठी :- "हे स्वामी! माझ्या स्वामीजवळ नळराजाचा स्वयंपाकी आला आहे, आणि नळराजाने शिकविल्यामुळे तो सूर्यपाक स्वयंपाकाची क्रिया उत्तम रीतीने जाणतो." ।।६९१।।

English :- He said that, the favourite cook of King Nal has arrived there who prepares delicious food out of solar rays.

दमयन्ती तदाकर्ण्य तातपादान् व्यजिज्ञपत् ॥
केनापि शोध्यतां देव सूपोऽसौ नरपुङ्गवः ॥६९२॥

अन्वयः- तद् आकर्ण्य दमयन्ती तातपादान् व्यजिज्ञपत् ।देव! नरपुङ्गवः असौ सूपः केनापि शोध्यताम् ॥६९२॥

विवरणम्:- *तद् दूतस्य वचनम् आकर्ण्य श्रुत्वा दमयन्ती तातपादान् पितृचरणान् व्यजिज्ञपत् प्राथयत । देव! नरः पुङ्गवः इव नरपुङ्गवः नरश्रेष्ठः असौ सूपः सूपकारः केनापि उपायेन शोध्यताम् अन्विष्यताम् ॥६९२॥*

सरलार्थः- दूतवचनं निशम्य दमयन्ती पितरं व्यज्ञापयत् । देव। नरश्रेष्ठः असौ सूपकारः केनाऽप्युपायेन शोध्यताम् ॥६९२॥

गुजराती :- તે સાંભળી દમયંતીએ પોતાના પિતાને વિનંતી કરી કે, હે પિતાજી! કોઇ પણ ઉપાયથી ઉત્તમ પુરુષસરખા તે રસોઇયાની આપ તપાસ કરાવો. ॥૬૯૨॥

हिन्दी :- यह सुनकर दमयंतीने अपने पिताजी से कहा कि, हे पिताजी! किसी भी उपाय द्वारा उत्तम पुरुष समान उंस रसोइये की आप तलाश कराइये ॥६९२॥

मराठी :- हे ऐकून दमयंतीने तिच्या वडिलांना विनंती केली की, हे पिता! कोणत्याही उपायांनी त्या नरश्रेष्ठ स्वयंपाक्याचा तुम्ही शोध करा.॥६९२॥

English :- Having heard the words of the messenger, Damyanti urged her father to search out the cook as on eminent personality.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सूर्यपाकां रसवतीं नलादन्यो न वेत्ति यद् ॥
निह्नुतात्मा ततो देव नल एव स चेद् भवेत् ॥६९३॥

अन्वयः- यद् नलात् अन्यः सूर्यपाकां रसवतीं न वेत्ति । ततः हे देव! सः निह्नुतात्मा नलः एव भवेत् ॥६९३॥

विवरणम्:- *यतः नलात् अन्यः कः अपि सूर्यपाकां रसवतीं न वेत्ति । न जानाति । ततः हे देव! सः सूपकारः निह्नुत; आत्मा येन सः निह्नुतात्मा आवृतात्मा नलः एव भवेत् । नलः एव तत्र सूपकारत्वेन आत्मानम् आवृत्य स्थितः स्यात् ॥६९३॥*

सरलार्थः- यतः नलात् अन्यः कोऽपि सूर्यपाकां रसवतीं न जानाति । ततः नलः एव सूपकारत्वेन आत्मानमावृत्य स्थितः भवेत् ॥६९३॥

ગુજરાતી :- કેમ કે નલરાજા સિવાય બીજું કોઈપણ સૂર્યપાક રસોઈ જાણતું નથી, માટે હે પિતાજી! પોતાને છુપાવીને રહેલા એ કદાચ નલરાજા જ હોવા જોઈએ. ॥૬૯૩॥

हिन्दी :- क्यों कि नलराजा के अलावा कोई दूसरा सूर्यपाक रसोई की विधि नही जानता है। इसलिए हे पिताजी! स्वयं छिपकर रहते हुए कदाचित वह नलराजा ही होने चाहिए। ॥६९३॥

मराठी :- ''कारण की नलराजा शिवाय दूसरा कोणीही सूर्यपाक स्वयंपाक जाणत नाही त्यामुळे हे पिता। स्वयंपाक्याच्या रूपाने स्वत:ला लपवित असलेले ते कदाचित् नलराजाच असले पाहिजे. ॥६९३॥

English :- She continued saying that there was no one else other than King Nal who could prepare delicious food out of solar rays. It could only be King Nal disguised as a cook.

विप्रः प्रैषि ततो राज्ञा कुशलः कुशलाभिधः ॥
अभ्यर्णं दधिपर्णस्य सूपकारं परीक्षितुम् ॥६९४॥

अन्वयः- ततः राज्ञा कुशलः कुशलाभिधः विप्रः सूपकारं परीक्षितुं दधिपर्णस्य अभ्यर्णं प्रैषि ।

विवरणम्:- *ततः तदनन्तरं राज्ञा भीमेन कुशलः निष्णातः कुशलः अभिधा यस्य सः कुशलाभिधः कुशलनामा विप्रः ब्राह्मणः सूपं करोतीति सूपकारः, तं सूपकारं सूदं परीक्षितुं दधिपर्णस्य नृपस्य अभ्यर्णम् अन्तिकं प्रैषि प्राहीयत ॥६९४॥*

सरलार्थः- ततः राजा भीमः कुशलं कुशलनामानं विप्रं सूपकारं परीक्षितुं दधिपर्णस्य नृपस्य अन्तिकं प्राहिणोत् ॥६९४॥

ગુજરાતી :- પછી રાજાએ રસોઈયાની પરીક્ષા કરવા માટે કુશલ નામના એક ચતુર બ્રાહ્મણને દધિપર્ણ રાજાની પાસે મોકલ્યો. ॥६९४॥

हिन्दी :- फिर राजाने रसोईये की परीक्षा करने के हेतु से कुशल नामक एक कुशल ब्राम्हण को राजा दधिपर्ण के पास भेजा ॥६९४॥

मराठी :- नंतर राजाने आचारीची परीक्षा करण्यासाठी कुशलनावाच्या एका चतुर ब्राम्हणाला दधिपर्ण राजाजवळ पाठविले. ॥६९४॥

English :- Then one day in order to test the cook, the King send a man named Kushal who was a brahmin and was very dexterous and proficient and who had a good hand at conversation.

किमीदृग्रूप एवायं कृतरुपान्तरोऽथवा ॥
कश्चिद् देवो दानवो वा नलोवाऽपह्नतात्मकः ॥६९५॥

अन्वयः- अथम् ईदृग्रुपः एव किम्? अथवा कृतरुपान्तरः कश्चिद् देवः वा दानवः वा? अथवा अपह्नतात्मकः नलः अस्ति ॥६९५॥

विवरणम्:- *अथम् ईदृक् रुपं यस्य सः ईदृग्रुपः एव किम्? अथवा अन्यत् रुपं रुपान्तरं कृतं रुपान्तरं येन सः कृतरुपान्तरः विहितरुपपरिवर्तनः कश्चित् देवः वा दानवः वा अस्ति? अथवा अपह्नतः आत्मा येन सः अपह्नतात्मकः आच्छादितरुपः नलः अस्ति इति तं सूपकारं परीक्षितुं भीमः कुशलनामानं कुशलं विप्रं दधिपर्णाय प्राहिणोत् ॥६९५॥*

सरलार्थः- अथम् ईदृग्रुपः एव अस्ति । अथवा कृतरुपान्तरः देवः वा दानवः अस्ति । अथवा आवृतरुपः नलः अस्ति । इति विज्ञातुं भीमः कुशलनामानं विप्रं दधिपर्णं प्रति प्राहिणोत् ॥६९५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- શું તે એવા જ સ્વરુપવાળો છે? અથવા કોઈ દેવ કે દાનવ છે? અથવા પોતાને છુપાવીને રહેલો નલરાજા છે? ॥૬૯૫॥

हिन्दी :- क्या वह ऐसे ही रूपवाले है? अथवा कोई देव या दानव है? अथवा स्वयं को छिपाकर रहने वाले नलराजा है? ॥६९५॥

मराठी :- काय हा खरोखरच स्वयंपाकी आहे? अथवा कोणी देव किंवा दानव आहे? अथवा स्वत:ला लपविणारा नलराजा आहे? हे जाणून घेण्यासाठी भीमराजाने कुशल नावाच्या चतुर ब्राह्मणाला दर्भिपर्ण राजाकडे पाठविले. ॥६९५॥

English :- He was asked to find out if he was just a replica or if he is a superior God or an ordinary God or if he is King Nal himself in disguise.

ततः प्रवर्धितोत्साहः स ययौ शकुनैः शुभैः ॥
सुसुमारपुरे कुब्जं ददर्श विममर्श च ॥६९६॥

अन्वयः- ततः प्रवर्धितोत्साहः सः शुभैः शकुनैः सुसुमारपुरे ययौ । कुब्जं ददर्श विममर्श च ॥६९६॥

विवरणम्:- ततः प्रकर्षेण वर्धितः उत्साहः यस्य सः प्रवर्धितोत्साहः महोत्साहः सः कुशलनामा विप्रः शुभैः मङ्गलसूचकैः शकुनैः निमित्तैः सुसुमारपुरे ययौ इयाय । तत्र कुब्जं ददर्श अद्राक्षीत् । विममर्श व्यमृक्षत् च ॥६९६॥

सरलार्थः- ततः प्रकर्षेण वर्धितोत्साहः सः विप्रः शुभैः शकुनैः सुसुमारपुरे ययौ । तत्र कुब्जं ददर्श विचारयामास च ॥६९६॥

ગુજરાતી :- પછી ઉત્સાહિત એવો તે કુશલ બ્રાહ્મણ શુભ શુકનો જોઈ સુસુમારનગરમાં ગયો, ત્યાં કુબ્જને જોઈ વિચારવા લાગ્યો કે, ॥૬૯૬॥

हिन्दी :- फिर वह कुशल ब्राह्मण बडे प्रवर्धित - उत्साह से शुभ शकुन में सुसुमारनगर में पहुँचा, और वहाँ कुब्ज को देखकर विचार करने लगा कि, ॥६९६॥

मराठी :- मग अतिशय उत्साह वाढलेला तो कुशलब्राह्मण शुभ शकुनांनी सुसुमारनगरीत गेला आणि तेथे कुब्जाला पाहून विचार करू लागला की, ॥६९६॥

English :- This brahmin, Kushal reached Susurmarnagar with great enthusiam. Seeing the hunch-back he began to wonder.

नलः क्व कुब्जोऽयं क्व हंसः क्व च वायसः ॥
नूनमस्मिन्नलभ्रान्ति भैम्या विरहसम्भ्रमात् ॥६९७॥

अन्वयः- सः नलः क्व । अयं कुब्जः क्वं । हंसः क्व । वायसः क्व। नूनम् भैम्याः विरहसम्भ्रमात् अस्मिन् नलभ्रान्तिः अस्ति ॥६९७॥

विवरणम्:- सः रुपनिर्जितमन्मथः नलः क्व । अथं विद्रूपः कुब्जः क्व ।श्वेतवर्णः हंसः क्व । कृष्णवर्णः वायसः काकः क्व। नूनम् निश्चितं भीमस्य अपत्यं स्त्री भैमी भीमराजकन्या दमयन्ती, तस्याः भैम्याः दमयन्त्याः विरहेण सम्भ्रमः विरहसम्भ्रमः तस्मात् विरहसम्भ्रमात् अस्मिन् सूपकारे नलः इति भ्रान्तिः नलभ्रान्तिः नलभ्रमः अस्ति ॥६९७॥

सरलार्थः- सः नलः क्व। अयं कुब्जः क्व । हंसः क्व । वायसः (काकः) क्व । नूनं दमयन्त्याः विरहसम्भ्रमात् अस्मिन् नलभ्रान्तिः अस्ति ॥६९७॥

ગુજરાતી :- ક્યાં તે નલ? અને ક્યાં આ કૂબડો? ક્યાં હંસ? અને ક્યાં કાગડો? ખરેખર દમયંતીને વિરહના સંભ્રમથી આ કુબ્જમાં નલની ભ્રાંતિ જ થયેલી છે. ॥૬૯૭॥

हिन्दी :- कहाँ वह नल? और कहां यह कुब्ज? कहां हंस और कहां कौआ? वास्तव में दमयंती को विरह के कारण इस कुब्ज में नल का भ्रम हुआ है। ॥६९७॥

मराठी :- कुठे तो नल? आणि कुठे हा कुब्ज? कुठे हंस? आणि कुठे कावळा? खरोखर दमयंतीला विरहच्या संभ्रमाने या कुबडया स्वयंपाक्यावर नलाची भ्रांती झाली आहे. ॥६९७॥

English :- Seeing the hunchback he wondered as to where the great magestic swan King Nal is and where this ugly crow, hunchback is. He thought that, Damyanti must have gone beserk due to her seperation or estrangement with her husband.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निश्चेतुं च ततः सम्यक् तं नीत्वा राजसन्निधौ ।।
नाट्यावसरमभ्यर्थ्य प्रारेभे तत्र नाटकम् ।।६९८।।

अन्वयः- ततः तं सम्यक् निश्चेतुं राजसन्निधौ नीत्वा नाट्यावसरमभ्यर्थ्य तत्र नाटकं प्रारेभे ।।६९८।।

विवरणम्:- *ततः तदनन्तरं तं सम्यक् समीचीनतया निश्चेतुं निज्ञातुं राज्ञः सन्निधिः राजसन्निधिः तस्मिन् राजसन्निधौ राजसमीपे नीत्वा नटैः अभिनेयं नाट्यम् । नाट्यस्य अवसरः नाट्यावसरः तं नाट्यावसरं नाट्यं कर्तुमवसरम् अभ्यर्थ्य सम्प्रार्थ्य तत्र नाटकं प्रारेभे प्रारभत ।।६९८।।*

सरलार्थः- ततः तं नलं सम्यक् निश्चेतुं राजसन्निधौ नीत्वा नाट्यावसरम् अभ्यर्थ्य तत्र नाटकं कर्तुं प्रारभत ।।६९८।।

ગુજરાતી :- પછી તેનો સમ્યક્ પ્રકારે નિશ્ચય કરીને, તથા તે કુબ્જને રાજા પાસે લઈ જઈને, નાટક કરવા માટેની આજ્ઞા લઈને ત્યાં નાટકનો પ્રારંભ કર્યો. ।।૬૯૮।।

हिन्दी :- सम्यक प्रकार से निश्चय करने के हेतु से, उस कुब्ज को लेकर वह राजा के पास गया? तथा नाटक करने की आज्ञा लेकर वहाँ पर नाटक प्रारंभ किया। ।।६९८।।

मराठी :- मग त्याचा सम्यक् प्रकारे निश्चय करण्यासाठी तो त्या कुब्जाला राजाजवळ घेऊन गेला व नाटक करण्याची आज्ञा घेऊन त्याने तेथे नाटकाला प्रारंभ केला. ।।६९८।।

English :- Then in order to exactly find out the actual thing, Kushal took the hunch back to the King and taking the permission of the King, he began to act out a drama.

दधिपर्णनृपः सभ्यः सपर्णाख्यश्च मन्त्रिराट् ।।
जीवलश्च प्रतीहारः सूपकारश्च हुण्डिकः ।।६९९।।

अन्वयः- दधिपर्णनृपः सभ्यः सपर्णाख्यः मन्त्रिराट्, जीवलः प्रतीहारः हुण्डिकः सूपकारः अभवत् ।।६९९।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *दधिपर्णः नृपः सभायां साधुः सभ्यः अभवत् । सपर्णनाम्ना मन्त्रिणां राट् मन्त्रिराट् अभूत् । जीवलः प्रतीहारः द्वारपालः अभवत् ।हुण्डिकः च सूपं करोतीति सूपकारः अजायत ॥६९९॥*

सरलार्थः- दधिपर्णः नृपः सभ्यः, सपर्णः मन्त्रिराट्, जीवलः द्वारपालः, हुण्डिकः च सूपकारः अभवत् ॥६९९॥

ગુજરાતી :- દધિપર્ણ રાજા સભાસદ થયો, સપર્ણ નામે મંત્રીશ્વર થયો, જીવલ નામે પ્રતિહાર થયો, અને હુંડિક રસોઈયો થયો. ॥६९९॥

हिन्दी :- दधिपर्ण राजा सभासद बने, सपर्ण मंत्रीश्वर, जीवल प्रतिहार और हुंडिक रसोइया बना॥ ॥६९९॥

मराठी :- दधिपर्णराजा सभासद झाला, सपर्ण मंत्रीश्वर झाला, जीवल प्रतिहारी झाला आणि हुंडिक स्वयंपाकी झाला. ॥६९९॥

English :- Here the King was among the audience, Saparne became a minister, a man named Jival became the door-keeper and Hundick the cook was also among the audience.

कुशलः सूत्रधारोऽभून्नटा भैम्यादिभूमिकाः ॥
अथासीनश्चिरात्तत्र राजा स्मृत्वेदमभ्यधात् ॥७००॥

अन्वयः- कुशलः सूत्रधारः अभूत् । नटाः भैम्यादिभूमिकाः अभवत् । अथ तत्र चिरात् आसीनः नृपः (राजा) स्मृत्वा इदमभ्यधात् ॥७००॥

विवरणम्:- *कुशलः विप्रः सूत्रं धरतीति सूत्रधारः अभूत् । नटाः भीमस्यापत्यं स्त्री भैमी दमयन्ती आदौ यासां ताः भैम्यादयः । भैम्यादयः भूमिकाः येषां ते भैम्यादिभूमिकाः अभवत् । अन्ये नटाः दमयन्त्यादीनां भूमिकाः अकुर्वन् । अथ अनन्तरं तत्र चिरात् चिरकालात् आसीनः उपविष्टः राजा दधिपर्णः स्मृत्वा इदम् अभ्यधात् अवादीत् ॥७००॥*

सरलार्थः- कुशलः विप्रः सूत्रधारस्य अन्ये नटाः च दमयन्त्यादीनां भूमिकाः ह्यदधुः । अनन्तरं तत्र चिरात् उपविष्टः राजा स्मृत्वा इदम् अवादीत् ॥७००॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- કુશલ સૂત્રધાર થયો, અને બીજા નટો દમયંતી આદિક પાત્રો થયાં. પછી ત્યાં ઘણો સમય બેઠેલા રાજાએ યાદ કરી એમ કહ્યું કે, ॥૭૦૦॥

हिन्दी :- कुशल दूत सूत्रधार बना। नट, दमयंती आदि पात्र हुए। अब वहां काफी समय से बैठे राजा ने याद कर के ऐसा कहा कि, ॥७००॥

मराठी :- कुशल सुत्रधार झाला आणि बाकी नट दमवंती इत्यादि पात्रे बनले, मग तेथे खुपवेळपर्यंत बसलेल्या राजाने आठवण करुन असे म्हटले की, ॥७००॥

English :- Kushal became a chief. The other actors did the role of Damyanti and others. After some time the King suddenly spoke out.

चिरयन्ति किमद्यापि द्वास्थः रङ्गोपजीविनः ॥
द्वाःस्थस्तान् स्माह भो शीघ्रं नाट्यं प्रस्तूयतां नटाः ॥७०१॥

अन्वयः- हे द्वाःस्थ! अद्यापि रङ्गोपजीविनः किं चिरयन्ति? द्वाःस्थःतान् आह स्म भोः नटाः शीघ्रं नाट्यं प्रस्तूयताम् ॥७०१॥

विवरणम्:- हे द्वारि तिष्ठतीति द्वाःस्थः तत्सम्बुद्धौ द्वाःस्थ! द्वारपाल! अद्यापि रङ्गेन नाटयेन उपजीवन्तीति रङ्गोपजीविनः नटाः किं किमर्थं चिरयन्ति विलम्बन्ते। द्वाःस्थः तान् नटान् आह स्म ब्रवीति स्म। भो नटाः! शीघ्रं द्रुततरं नाट्यं प्रस्तूयताम् प्रारभ्यताम् ॥७०१॥

सरलार्थः- हे द्वारपाल! अद्यापि रङ्गोपजीविनः नटाः किमर्थं विलम्बन्ते? तदा द्वारपालस्तान् ब्रवीति स्म। भो नटाः। शीघ्रं नाट्यं प्रारभ्यताम् ॥७०१॥

ગુજરાતી :- અરે! દ્વારપાલ! હજુ સુધી પાત્રો કેમ વિલંબ કરે છે? ત્યારે દ્વારપાલે તે પાત્રોને કહ્યું કે, હે નટો! તમો તુરત નાટકની શરુઆત કરો. ॥૭૦૧॥

P.P. Ac. Gunratnasuri M.S.

हिन्दी :- "अरे, द्वारपाल! पात्र अब तक क्यो विलंब कर रहे हैं?" तब द्वारपाल ने उन पात्रों से कहा कि, "हे नटो! तुम शीघ्र नाटक प्रारम्भ करो!"॥७०१॥

मराठी :- "अरे! द्वारपाल! सर्व नट अजून विलंब का करीत आहेत?" तेव्हा द्वारपाल सर्व नटांना म्हणाला हे नटहो! लवकर नाटकाला सुरुवात करा.॥७०१॥

English :- At this the door-keeper was questioned by the King, as to why is is lingering and demuring about. At this the doorkeeper asked the actors to start off their show.

सूत्रधारः प्रविश्योचे नलान्वेषणनाटकम् ॥
इतोऽभिनीयते देव द्रष्टुं सावहितो भव ॥७०२॥

अन्वयः- सूत्रधारः प्रविश्य ऊचे - देव ! इतः नलान्वेषणनाटकम् अभिनीयते । द्रष्टुं सावहितो भव ॥७०२॥

विवरणम्:- सूत्रं धारयतीति सूत्रधारः प्रविश्य ऊचे बभाषे - देव! इतः नलस्य अन्वेषणं नलान्वेषणम् । नलान्वेषणस्य नाटकम् अभिनीयते। अभिनीय दर्श्यते । द्रष्टुम् अवलोकयितुम् अवहितेन चित्तैकाग्र्येण सह वर्ततेऽसौ सावहितः एकाग्रः भव ॥७०२॥

सरलार्थः- सूत्रधारः प्रविश्य बभाषे । देव! नलान्वेषणनाटकम् अभिनीय दर्श्यते । द्रष्टुं सावधानो भव ॥७०२॥

ગુજરાતી :- ત્યારે સૂત્રધારે પ્રવેશ કરીને કહ્યું કે, હે રાજન્! નલને શોધવારૂપ નાટક ભજવાય છે, તે જોવા માટે તમો સાવધાન થજો. ॥७०२॥

हिन्दी :- तब सूत्रधार ने प्रवेश करके कहा कि, "हे राजन्! नाटक में 'नल की खोज' को दर्शाया गया है। हे देव! आप देखने के लिये सावधान तो हो जाइये॥७०२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- तेव्हा सुत्रधाराने प्रवेश करुन म्हटले की, ''हे राजा। नलाला शोधण्यासाठी हे नाटक बसंविले आहे, ते पाहण्यासाठी तुम्ही सावधान व्हा?'' ॥७०२॥

English :- Then the compere entered and said that this story is named as ""In quest of Nal" He advised the King to be alert and open-eyed.

नलः स्वात्मगतं कोऽयमहमेव नलः किमु ॥
यद्वाऽपारे जगत्यस्मिन् नामसाम्यं न दुर्लभम् ॥७०३॥

विवरणम्:- नलः स्वात्मगतं स्वगतमाह ब्रवीति। कोऽयं नलः? अहमेव नलः न किमु? अथवा न विद्यते पारः यस्य तत् अपारं तस्मिन् अपारे अस्मिन् जगति नाम्नां साम्यं नामसाम्यं दुःखेन लभ्यते इति दुर्लभः नाऽस्ति ॥७०३॥

सरलार्थः- नलः स्वगतं वदति - कोऽयं नलः? अहमेव नलः न किमु। अथवा अपारे अस्मिन् जगति नामसाम्यं दुर्लभं नास्ति। बहूनि समानानि नामानि सन्ति॥७०३॥

ગુજરાતી :- ત્યારે નલ પોતાના મનમાં વિચારવા લાગ્યો કે, આ નલ કોણ હશે? હું જ શું નલ ન સંભવી શકું? અથવા આ અપાર જગતમાં નામનું સામ્યપણું કંઈ દુર્લભ નથી. ॥७०३॥

हिन्दी :- तब नल अपने मन में विचार करता है कि, यह नल कौन होगा? मैं ही नल नही हूँ? अथवा इस अपार संसार में नाम की समानता कुछ दुर्लभ नही है। ॥७०३॥

मराठी :- तेव्हा नल स्वतःच्या मनांत - कोण हा नल आहे? मीच नल आहे की आणखी दुसरा कोणीतरी नल आहे. ह्या अपार जगात नावाचा सारखेपणा काही दुर्लभ नाही. सारखी नावे पुष्कळच असतात. ॥७०३॥

English :- At this Nal wondered as to who this second Nal could be, if not himself. Then he pacified himself saying, that this world is vast and wide, and there can be another Nal.

राजोचे सावधानोऽस्मि ततः प्रस्तूयतां द्रुतम् ॥
नेपथ्येऽगीयत ततो रक्ष रक्षार्यपुत्र माम् ॥७०४॥

अन्वयः- राजा (नृपः) ऊचे सावधानः अस्मि। ततः द्रुतं प्रस्तूयताम्। ततो नेपथ्ये अगीयत - आर्यपुत्र! मां रक्ष रक्ष ॥७०४॥

विवरणम्:- *राजा नृपः ऊचे बभाषे - अहम् अवधानेन चित्तैकाग्र्येण सह वर्ततेऽसौ सावधानः अस्मि। ततः तस्मात् कारणात् द्रुतं शीघ्रं प्रस्तूयताम् प्रारभ्यताम्। ततः नृपवचनात् अनन्तरं नेपथ्ये जवनिकान्तरे अगीयत - हे आर्यपुत्र! नाथ! तां रक्ष रक्ष इति ॥७०४॥*

सरलार्थः- राजा अवदत् - अहं सावधानः अस्मि। शीघ्रं प्रारभ्यताम्। ततः नेपथ्ये अगीयत - हे आर्यपुत्र! नाथ! मां रक्ष रक्ष, इति ॥७०४॥

ગુજરાતી :- પછી રાજાએ કહ્યું કે, હું સાવધાન છું, માટે તુરત તમો નાટક ભજવો. એવામાં પડદાની અંદરથી અવાજ આવ્યો કે, હે આર્યપુત્ર! મારું રક્ષણ કરો? રક્ષણ કરો? ॥૭૦૪॥

हिन्दी :- राजाने कहा, "मै सावधान हूँ, तुम नाटक शीघ्र प्रस्तुत करो। इतने में नेपथ्य से (परदे के पीछे से) आवाज आती है कि, "हे आर्यपुत्र! मेरा रक्षण कीजिए! रक्षण किजिए ॥७०४॥

मराठी :- नंतर राजाने म्हटले की, "मी सावधान आहे, ताबडतोब नाटक सुरु करा?" इतक्यात पडद्याच्या आतून आवाज आला की, "हे आर्यपुत्र! माझे रक्षण करा? रक्षण करा? ॥७०४॥

English :- The king then replied saying that he is alert and wide-eyed so therfore to go along with the show. Just then, from the back of the curtain, a voice, that was overcome with fright, calling out to the Aaryaputra to protect him.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बिभेम्येकाकिनी व्योम्नः पतितेवावनीधृता ।।
अपारे ह्यत्र कान्तारे करालव्यालशालिनि ।।७०५।।

अन्वयः- व्योम्नः पतिता अवनीधृता इव अहम् एकाकिनी करालव्यालशालिनि अपारे अत्र कान्तारे बिभेमि ।।७०५।।

विवरणम्:- व्योम्नः आकाशात् पतिता, अवन्या पृथ्व्या धृता इव अहम् एकाकिनी करालाश्च ते व्यालाश्च करालव्यालाः। करालव्यालैः शालते इत्येवंशीलं करालव्यालशालि, तस्मिन् करालव्यालशालिनि भीषणसर्पशालिनि न विद्यते पारः यस्य तद् अपारं तस्मिन् अपारे अत्र अस्मिन् कान्तारे विपिने बिभेमि ।।७०५।।

सरलार्थः- आकाशात् पतिता, पृथ्व्या धृता इव अहमेकाकिनी करालैः भयंकरैः व्यालैः व्याप्ते अपारे अस्मिन् अरण्ये बिभेमि ।।७०५।।

ગુજરાતી :- જાણે આકાશમાંથી પડીને પૃથ્વી પર આવી હોઉં, તેમ ખરેખર ભયંકર હાથીઓ વડે અથવા સર્પો વડે શોભતા એવા આ અપાર જંગલમાં હું એકલી ભય પામું છું. ।।७०५।।

हिन्दी :- मानों आसमान से गिरकर जमीन पर आयी हुं, वैसे भयंकर हाथीयों और सर्पो से युक्त ऐसे इस अपार जंगल में, मैं अकेली डर रही हूँ। ।।७०५।।

मराठी :- जणू आकाशातून पडून पृथ्वीने झेलल्याप्रमाणे मी एकटी खरोखर भयंकर हिंस्त्र प्राण्यांनी व सापांनी व्यापलेल्या अशा या अपार जंगलात भीत आहे. ।।७०५।।

English :-The voice said that she seemed to have been dropped from sky and was encircled by many wild elephants and poisonous snakes, in the forest of the earth and so she is very frightened.

नलः स्वगतमादध्यौ किं मयेव दुरात्मना ।।
केनाप्येकाकिनी त्यक्ता प्रेयसी गहने वने ।।७०६।।

अन्वयः- नलः स्वगतम् आदध्यौ। किं मया इव हु केनापि दुरात्मना एकाकिनी प्रेयसी गहने वने त्यक्ता ।।७०६।।

विवरणम्:- *नलः स्वगतम् आत्मगतं मनासि आदध्यै चिन्तितवान्- किं मया इव केनापि दुष्टः आत्मा यस्य सः दुरात्मा, तेन दुरात्मना दुष्टेन एकाकिनी प्रेयसी पत्नी गहने सान्द्रे वने अरण्ये त्यक्ता ॥७०६॥*

सरलार्थः- नलः स्वगतं व्यचिन्तयत् - किं मया इव केनापि दुरात्मना दुष्टेन एकाकिनी प्रिया भार्या गहने वने त्यक्ता ॥७०६॥

ગુજરાતી :- ત્યારે (કુબ્જરુપ) નલરાજા પોતાના મનમાં વિચારવા લાગ્યો કે, શું મારી પેઠે કોઈપણ દુર્બુદ્ધિએ પોતાની પ્રિયતમાને એકલી ભયંકર વનમાં તજી દીધી છે? ॥७०६॥

हिन्दी :- तब कुब्ज के वेष में नलराजा अपने मन में विचार करते है कि या मेरे समान किसी दुरात्मा ने अपनी प्रियतमा को भयंकर वन में अकेले छोड दिया है? ॥७०६॥

मराठी :- तेव्हा (कुब्जरुप) नलराजा स्वत:च्या मनात विचार करु लागला की, ''काय माझ्याप्रमाणे कोणी तरी दुष्ट माणसाने आपल्या प्रिय पत्नीला एकटीलाच वनात सोडले आहे?॥७०६॥

English :- Then Nal in the form of a hunch-back wondered that, there must have been another vile and a wretched soul, like him who had the guts ot abandon his beloved.

राजावोचन्महामात्य नाट्यस्योपक्रमेऽपि हि ॥
आदावेव महत्कष्टमत्यन्तकरुणो रसः ॥७०७॥

अन्वयः- राजा अवोचत् - महामात्य! नाट्यस्य उपक्रमेऽपि आदौ एव अत्यन्तकरुणो रसः महत् कष्टम् ॥७०७॥

विवरणम्:- *राजा नृपः अवोचत् अवादीत् - महान्चासौ अमात्यश्च महामात्यः, तत्सम्बुद्धौ हे महामात्य! नाट्यस्य नाटकस्य उपक्रमे प्रारम्भे अपिः एवार्थे। एव आदौ एव अत्यन्तं करुणः रसः इति महत्कष्टं दुःखम् अस्ति ॥७०७॥*

सरलार्थः- नृपः अवादीत् - हे महामात्य! नाटकस्य प्रारम्भे एव आदौ अत्यन्तं करुणः रसः इति महत् कष्टम् अस्ति ॥७०७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે રાજાએ કહ્યું કે, હે મહામાત્ય! આ નાટક ભજવવામાં આદિમાં જ અતિ કરુણારસ પ્રગટ થયો છે તેથી ઘણું દુ:ખ થાય છે. ॥૭૦૭॥

हिन्दी :- तब राजाने कहा कि, हे महामात्य! नाटक के प्रारम्भ में ही अति करुण रस उत्पन्न हुआ है इसलिये महान् दु:ख हो रहा है। ॥७०७॥

मराठी :- तेव्हा राजा म्हणाला की हे महामात्य! या नाटकाच्या सुरवातीलाच अतिशय करूण रस प्रकट झाला आहे. त्यामुळे अतिशय दु:ख होत आहे. ॥७०७॥

English :-The king told the minister, that the whole royal court is filled with feelings of tenderness and is touched, just at the beginning of the show due to the acute difficulties the person is facing.

नेपथ्ये वक्ति गान्धार: पिङ्गलैतां तपस्विनीम् ॥
अनुकूलय येनाशु नयाम: सार्थपान्तिकम् ॥७०८॥

अन्वय:- नेपथ्ये गान्धार: वक्ति - हे पिङ्गल! एतां तपस्विनीम् अनुकूलय। येन आशुं सार्थपान्तिकं नयाम: ॥७०८॥

विवरणम्:- नेपथ्ये गान्धार: वक्ति वदति - हे पिङ्गल! त्वम् एतां तपस्विनीम् अगतिकां दयनीयाम् अनुकूलय अनुकूलां कुरु। सान्त्वय। येन वयम् एनाम् आशु शीघ्रं सार्थं पातीति सार्थप: सार्थाधिप:। सार्थपस्य अन्तिकं समीपं सार्थपान्तिकं सार्थाधिपसमीपं नयाम: ॥७०८॥

सरलार्थ:- नेपथ्ये गान्धार: वदति - हे पिङ्गल! त्वमेतां तपस्विनीम् सान्त्वय। येन वयमेतां शीघ्रं सार्थाधिपान्तिकं नयाम: ॥७०८॥

ગુજરાતી :- એવામાં પડદાની અંદરથી ગાંધાર બોલે છે કે હે પિંગલ આ બિચારીને તુ આશ્વાસન આપ કે જેથી તુરત તેણીને સાર્થવાહની પાસે લઇ જઉં.॥૭૦૮॥

हिन्दी :- इतने में नेपथ्य से गांधार कहता है कि, हे पिंगल! इस अबला को तुम आश्वासन दो, कि जिससे उसे तुरंत सार्थवाह के पास ले जा सकूं। ॥७०८॥

मराठी :- इतक्यात पडद्याच्या आतून गांधार बोलतो की, "हे पिंगला! ह्या बिचारीला तू आश्वासन दे की ज्यामुळे तुरंत मी तिला घेऊन ताबडतोब सार्थवाहाजवळ जाऊ शकेन."॥७०८॥

English :- Just than from the back of the curtain Ghandar asker Pingal to give this woman some consolation, so that he can take her atonce to the campers.

तच्छ्रुत्वा सूत्रभृद्दध्यौ यदमी रङ्गजीविनः ॥
सांरम्भन्तेऽत्र गान्धार भैमी पिङ्गलवेषिणः ॥७०९॥

अन्वयः- तद् गान्धारवचनं श्रुत्वा सूत्रकृत् दध्यौ। अमी रङ्गजीविनः गान्धारभैमीपिङ्गलवेषिणः अत्र संरंभन्ते ॥७०९॥

विवरणम्:- तद् गान्धारवचनं श्रुत्वा सूत्रं करोतीति सूत्रकृत् सूत्रधारः दध्यौ चिन्तितवान् - यद् अमी रङ्गेन जीवन्तीत्येवंशीलाः रङ्गजीविनः अभिनयोपजीविनः नटाः गान्धारश्च भैमी च पिङ्गलश्च गान्धारभैमीपिङ्गलाः। गान्धारभैमीपिङ्गलानां वेषाः एषां सन्ति इति गान्धारभैमीपिङ्गलवेषिणः अत्र नाट्यविषये सांरम्भन्ते त्वरन्ते समुद्यताः सन्ति ॥७०९॥

सरलार्थः- तद् गान्धारवचनं श्रुत्वा सूत्रधारः अचिन्तयत् - यद् अमी गान्धारभैमीपिङ्गलवेषधारिणः नटाः नाटकार्थं संरम्भन्ते त्वरन्ते। इति ॥७०९॥

ગુજરાતી :- તે સાંભળીને સૂત્રધાર વિચારવા લાગ્યો કે, ગાંધાર, દમયંતી તથા પિંગલનો વેષ લેઈને રંગભૂમિના આ પાત્રો અહીં નાટક ભજવવા માટે તૈયાર થઈ ગયાં છે. ॥७०९॥

हिन्दी :- यह सुनकर सूत्रधार सोचने लगा कि, गांधार, दमयंती और पिंगल के वेश में यह रंगभूमि के पात्र नाटक के लिए तैयार हैं। ॥७०९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- हे ऐकून सुत्रधार विचार करूं लागला की, ''गांधार, दमयंती आणि पिंगलचा वेश घेऊन रंगभुमिचे हे कलाकार नाटक करण्यासाठी तैयार झाले आहेत.''॥७०९॥

English :- Having heard thus the compere thought to himself that the charaters. are now ready to play the part of Ghander, Damyanti and Pingal.

प्रवृत्तमेव तज्ज्ञाने नाट्यं कार्यान्तरं ततः ॥
अहमप्यनुतिष्ठामि कालोचितमिहाधुना ॥७१०॥

अन्वयः- तद् नाट्यं प्रवृत्तमेव जाने। ततः अहमपि इह अधुना कालोचितं कार्यान्तरम् अनुतिष्ठामि ॥७१०॥

विवरणम्:- तत् तस्मात् नाट्यं नटैः अभिनेयं नाटकं प्रवृत्तमेव प्रारब्धमेव इति अहं जाने। ततः तस्मात् कारणात् अहमपि इह अधुना कालस्य उचितं कालोचितम् कार्यं कार्यान्तरम् अनुतिष्ठामि आचरामि ॥७१०॥

सरलार्थः- तस्मात् नाट्यं प्रवृत्तमेव इति अहं जाने। तस्मात् कारणात् अहमपि इदानीं समयोचितं कार्यान्तरम् अनुतिष्ठामि ॥७१०॥

ગુજરાતી :- માટે હું ધારું છું કે, આ નાટક ચાલું થયું છે, અને તેથી હું પણ અહીં હવે સમયને અનુસરી બીજા કાર્યમાં જોડાઈ જાઉં. ॥७१०॥

हिन्दी :- इसलिये मैं सोचता हूँ कि, यह नाटक प्रारम्भ हो गया है, जिससे मैं भी अब समयोचित दूसरे कार्य में संलग्न हो जाता हूँ। ॥७१०॥

मराठी :- मला वाटते की, आता नाटक सुरु झाले आहे. म्हणून मी आता समयोचित दूसरे काम करतो. ॥७१०॥

English :- So he thought that the climax starts now, so he better proceed to his next task.

P.P. Ac. Gunratnasuri M.S. Jun Gyanbhandar Trust

विमृश्येति स निष्क्रान्तः प्रविशन्ति ततस्तदा ॥
भैमीपिङ्गलगान्धारा भैमीं गान्धारकोऽब्रवीत् ॥७११॥

अन्वयः- इति विमृश्य सः निष्क्रान्तः । ततः तदा भैमी पिङ्गलगान्धाराः प्रविशन्ति । गान्धारकः भैमीम् अब्रवीत् ॥७११॥

विवरणम्:- इति विमृश्य विचार्य सः निष्क्रान्तः निर्गतः ततः तदनन्तरं तदा तस्मिन् समये भीमस्यापत्यं स्त्री भैमी दमयन्ती । भैमी च पिङ्गलश्च गान्धारश्च भैमीपिङ्गलगान्धाराः प्रविशन्ति । गान्धारकः भैमीं भीमराजपुत्रीं दमयन्तीम् अब्रवीत् अवदत् ॥७११॥

सरलार्थः- इति विमृश्य सूत्रधारः निष्क्रान्तः । तदा सूत्रधारनिर्गमनात् अनन्तरं भैमीपिङ्गलगान्धाराः प्रविशन्ति । गान्धारकः दमयन्तीम् अब्रवीत् ॥७११॥

ગુજરાતી :- એમ વિચારીને નીકળી ગયો, પછી તે વખતે દમયંતી, પિંગલ તથા ગાંધાર, પ્રવેશ કરે છે, અને ગાંધાર દમયંતીને કહે છે કે. ॥७११॥

हिन्दी :- ऐसा सोचकर वह निकल गया, फिर उस समय दमयंती गांधार व पिंगल ने प्रवेश किया। गांधार दमयंती से कहता है कि, ॥७११॥

मराठी :- असा विचार करुन तो निघून गेला, त्यानंतर दमयंती गांधार आणि पिंगल प्रवेश करतात आणि गांधार दमयंतीला म्हणतो कि, ॥७११॥

English :- Having thought thus the compere walked out of the stage and Damyanti entered the stage along with Gandher and Pingal. Then Ghander spoke to Damyanit.

आर्ये प्रलापैः पर्याप्तं धनदेवोऽस्ति सार्थपः ॥
यातुकामोऽचलपुरमेहि तत्तस्य सन्निधौ ॥७१२॥

अन्वयः- आर्ये! प्रलापैः पर्याप्तम् । अचलपुरं यातुकामः धनदेवः सार्थपः अस्ति । तत् तस्य सन्निधौ एहि ॥७१२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *हे आर्ये! प्रलापैः विलपनैः पर्याप्तम् अलम्। अचलपुरं यातुं गन्तुं कामः यस्य सः यातुंकामः गन्तुकामः धनदेवः नाम सार्थं पातीति सार्थपः सार्थाधिपतिः श्रेष्ठी अस्ति। तत् तस्मात् त्वं तस्य सार्थपस्य सन्निधौ सामीप्ये एहि आगच्छ ॥७१२॥*

सरलार्थः- आर्ये! विलपनैः अलम्। अचलपुरं गन्तुकामः धनदेवः नाम सार्थाधिपतिः श्रेष्ठी अस्ति। तस्य सन्निधौ गच्छ ॥७१२॥

ગુજરાતી :- હે આર્યે! હવે રડ નહિ, આ ધનદેવ સાર્થવાહ અચલપુર તરફ જવાની ઇચ્છાવાળો છે, માટે તેની પાસે તુ ચાલ. ॥૭૧૨॥

हिन्दी :- हे आर्य! रोना अब पर्याप्त हुआ। यह धनदेव सार्थवाह अचलपुर की ओर जानेवाला है। इसलिए उसके पास चलो। ॥७१२॥

मराठी :- "हे आर्य! आता रडणे पुरे. हा धनदेव सार्थवाह अचलपुरकडे जाण्याची इच्छा करीत आहे. त्याच्याकडे तू जा.

English :- Then addressing her as a respectable woman, asked her to stop weeping and join the camp belonging to Dhandev who are all proceeding to a city named Achalpur.

भैम्यूचेऽन्वेषयिष्यामि आर्य भर्तारम् आत्मनः ॥
सोऽभ्यधत्त पतिःकोऽस्ति साऽब्रवीन्नैषधिर्नलः ॥७१३॥

अन्वयः- भैमी ऊचे - आर्य! अहमात्मनः भर्तारम् अन्वेषयिष्यामि सः अभ्यधत्त - कः तव पतिः? सा अब्रवीत् - नैषधिः नलः ॥७१३॥

विवरणम्:- *भीमस्य अपत्यं स्त्री भैमी भीमराजपुत्री दमयन्ती ऊचे बभाषे - आर्य! अहम् आत्मनः स्वस्थ भर्तारं पतिम् अन्वेषयिष्यामि शोधयिष्यामि। सः गान्धारः अभ्यधत्त अभाषत - कः तव पतिः? तदा सा भैमी अब्रवीत् अवदत् - निषधस्य अपत्यं पुमान् नैषधिः निषधपुत्रः नलः मम पतिः वर्तते ॥७१३॥*

सरलार्थः- भैमी बभाषे - आर्य! अहम् आत्मनः पतिम् अन्वेषयिष्यामि। सः गान्धारः अवादीत् - तव पतिः कः अस्ति। दमयन्ती अवोचत् - निषधपुत्रः नलः मम पतिः अस्ति ॥७१३॥

ગુજરાતી :- ત્યારે દમયંતીએ કહ્યું કે, હે આર્ય! હું મારા ભર્તારની શોધ કરીશ, ત્યારે ગાંધારે કહ્યું કે, તારો ભર્તાર કોણ છે? ત્યારે તેણીએ કહ્યું કે, નિષધરાજાનો પુત્ર નલ છે. ॥૭૧૩॥

हिन्दी :- तब दमयंतीने कहा कि, "हे आर्य! मैं मेरे पति की खोज करुंगी" तब गांधार ने कहा कि, "तेरा पति कौन है?" तब उसने कहा कि, "निषध राजा का पुत्र नल है।" ॥७१३॥

मराठी :- तेव्हा दमयंतीने म्हटले की, "हे आर्ये! मी माझ्या पतिचा शोध करीन," तेव्हा गांधाराने म्हटले की, तुझा पती कोण आहे?" तेव्हा तिने म्हटले कि, "निषध राजाचा पुत्र नळ माझा पती आहे."॥७१३॥

English :- Then Damyanti said that, she desires to go in search of her husband. At this Ghander asked her about her husband. She replied t that he was son of the king of Nishad, named Nal.

नलः स्वगतमाः पाप! नल किं न विलीयसे ॥
देवी नास्ति ध्रुवं नो चेत् नाट्ये प्रतिकृतिः कथम् ॥७१४॥

अन्वयः- नलः स्वगतम् आह - आः पाप नल! किं न विलीयसे? ध्रुवं देवी नास्ति। नो चेत् नाट्ये प्रतिकृतिःकथम्? ॥७१४॥

विवरणम्:- नलः स्वगतं वदति - आः पाप! नल! त्वं किं किमर्थं न विलीयसे निलीनो भवसि। न नश्यसि। ध्रुवं निश्चितं देवी दमयन्ती न अस्ति। नो चेत् अन्यथा नाट्ये नटैः अभिनीयमाने नाटके तस्याः दमयन्त्याः प्रतिकृतिः कथम्? यस्मात् नाट्ये दमयन्त्याः प्रतिकृतिः वर्तते तस्मात् सा ध्रुवं नष्टा। अहं पुनर्जीवामि। न एतद् युक्तम्। अतः नल! त्वं किमर्थं न विलीयसे? ॥७१४॥

सरलार्थः- नलः स्वगतमवदत् - आः पाप! नल! त्वं किमर्थं न विलीयसे? ध्रुवं देवी दमयन्ती नास्ति। नष्टा। अतः नाट्ये तस्याः प्रतिकृतिः वर्तते ॥७१४॥

ગુજરાતી :- ત્યારે નલ પોતાના મનમાં વિચારવા લાગ્યો કે, અરે પાપી નલ! તું કેમ નાશ પામતો નથી? ખરેખર દમયંતી તો નથી, તો એમ નથી તો નાટકમાં તેનો વેષ શી રીતે આવ્યો? ॥૭૧૪॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- तब नल अपने मन में विचार करने लगा कि, "अरे पापी नला तेरा नाश क्यों नही होता? वास्तव में दमयंती तो नहीं? यदि वह नही तो फिर नाटक में उसका पात्र कहां से आया? ॥७१४॥

मराठी :- तेव्हा नळ मनातच म्हणाला की, "अरे पापी नला! तू का नाश पावत नाही? खरोखर दमयंती आता जगात नाही? जर असती तर नाटकात तिची भूमिका कशी आली असती!" ॥७१४॥

English :- At this, Nal began to curse a sinner in himself. Then he wondered as to how this play is being acted out, when the actoress is not Damyanti in person.

पिङ्गल: स्माह सक्रोधं किमार्येऽनार्यकर्मणा ॥
कार्यं तेन श्वपाकेन सार्थेशाभ्यर्णमेहि तत् ॥७१५॥

अन्वय:- पिङ्गल: सक्रोधम् आह स्म। आर्ये! अनार्यकर्मणा श्वपाकेन तेन किं कार्यम्? तत् सार्थेशाभ्यर्णम् एहि ॥७१५॥

विवरणम्:- *पिङ्गल: क्रोधेन सह यथा स्यात् तथा सक्रोधं आह स्म ब्रवीति स्म - आर्ये! न आर्यम् अनार्यम्। अनार्यं कर्म यस्य स: अनार्यकर्मा, तेन अनार्यकर्मणा श्वानं पचतीति श्वपाक: चाण्डाल: तेन श्वपाकेन चाण्डालेन तेन नलेन तव किं कार्यं किं प्रयोजनम्। अनार्योचितकर्मकारिणा चाण्डालेन तेन नलेन तव किं प्रयोजनम्? तत् सार्थस्य ईश: सार्थेश: । सार्थेशस्य अभ्यर्णं सार्थेशाभ्यर्णं धनदेवसमीपम् एहि आगच्छ ॥७१५॥*

सरलार्थ:- पिङ्गल: क्रोधेन सह अब्रवीत्-आर्ये! अनार्यकर्मणा चाण्डालेन तेन नलेन तव किं प्रयोजनम्? तम् सार्थपतिं धनदेवं प्रति आगच्छ ॥७१५॥

गुजराती :- ત્યારે પિંગલ તેણીને ક્રોધસહિત કહે છે કે, હે આર્યે! દુષ્ટ કાર્ય કરનારા તે ચાંડાલ જેવા નલ સાથે હવે તારે શું પ્રયોજન છે? માટે તું સાર્થપતિની પાસે ચાલ. ॥७१५॥

P.P. Gunratnasuri M.S. Jun Gurv Aaradhak Trust

हिन्दी :- तब पिंगल उसे क्रोधपूर्वक कहता है कि, "हे आर्ये! अनार्य कार्य (दुष्ट कार्य) करनेवाले चाण्डाल समान नल के साथ अब तेरा क्या प्रयोजन है? इसलिये अब तू सार्थवाह धनदेव के पास चला ॥७१५॥

मराठी :- तेव्हा पिंगल तिला क्रोधाने म्हणाला की, "हे आर्ये! अत्यंत नीच कर्म करणाऱ्या त्या चाण्डाळ नलाशी तुला काय करावयाचे आहे! तू सार्थवाह धनदेवाकडे जा." ॥७१५॥

English :-Then Pingal angrily said to Damyanti as to what can be the use and purport to live or wait for a cruel and a sinful man like Nal, so she should proceed along with the chief of the encampment, Dhandev.

राजा सहर्षमाचख्यौ साधु साधु कुशीलव ॥
स्वप्नेऽप्यदृश्यवक्त्रोऽसौ त्यक्ता येनेयमेकका ॥७१६॥

अन्वयः- राजा सहर्षम् आचख्यौ । कुशीलव! साधु साधु । येन इयम् एकका त्यक्ता । असौ स्वप्नेऽपि अदृश्यवक्त्रः अस्ति ॥७१६॥

विवरणम्:- राजा नृपः हर्षेण सह यथा स्यात् तथा सहर्षम् आचख्यौकथयामास - हे कुशीलव! नट! साधु साधु उक्तं त्वंया। येन नलेन इयम् दमयन्ती एकका एकाकिनी त्यक्ता। असौ नलः स्वप्नेऽपि द्रष्टुं योग्यं दृष्यम्। न दृश्यम् अदृश्यम्। अदृश्यं वक्त्रं मुखं यस्य सः अदृश्यवक्त्रः अस्ति। येन दमयन्ती एकाकिनी वने त्यक्ता। तस्य मुखं स्वप्नेऽपि द्रष्टुं योग्यं नास्ति ॥७१६॥

सरलार्थः- नृपः सहर्षमवादीत् - हे नट! त्वया साधु साधु उक्तम्। येन नलेन इयं साध्वी दमयन्ती एकाकिनी वने त्यक्ता। तस्य नलस्य मुखं स्वप्नेऽपि द्रष्टुं योग्यं नास्ति ॥७१६॥

ગુજરાતી :- ત્યારે રાજાએ હર્ષસહિત કહ્યું કે, હે નટ! તેં ઠીક કહ્યું, કેમ કે જેણે આ દમયંતીને એકાકી તજેલી છે, તેનું સ્વપ્નમાં પણ મુખ જોવું લાયક નથી. ॥७१६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- तब राजाने हर्षित होकर कहा कि, "हे नट! तुमने ठीक ही कहा है कि, जिसने इस दमयंती को एकाकी त्याग दिया है, उसका मुख स्वप्न में भी देखने लायक नही है।"॥७१६॥

मराठी :- तेव्हा राजाने आनंदासह म्हटले की, "हे कुशीलवा! तू ठीक ठीक म्हणाला, ज्याने त्या दमयंतीला वनांत एकटे सोडून दिले. त्याचे तोंड स्वप्नातही पाहण्या लायक नाही."॥७१६॥

English :- Then the King happily, addressing the actor said that, one should not even think of seeing that person , even in a dream who had the guts to abandon a woman as Damyanti.

नलः सरोषमस्पृश्योऽश्रव्योऽग्राह्याभिधश्च सः ॥
गान्धारः स्माह हे मुग्धे तर्हि क्वापि गवेषय ॥७१७॥

अन्वयः- गान्धारः सरोषम् आह स्मा हे मुग्धे! सः नलः अस्पृश्यः, अश्रव्यः, अग्राह्याभिधः च अस्ति। तथापि त्वमिच्छसि तर्हि क्वापि गवेषय ॥७१७॥

विवरणम्:- *गान्धारः रोषेण सह यथा स्यात् तथा सरोषं सक्रोधम् आह स्म। ब्रवीति स्मा हे मुग्धे! सः नलः स्प्रष्टुं योग्यः स्पृश्यः। न स्पृश्यः अस्पृश्यः स्प्रष्टुमपि योग्यः न अस्ति। श्रोतुं योग्यः श्रव्यः। न श्रव्यः अश्रव्यः। तस्य नाम अपि श्रोतुं योग्यं न अस्ति। ग्रहीतुं योग्या ग्राह्या। ग्राह्या अभिधा मान यस्य सः ग्राह्याभिधः ग्राह्यनामा। न ग्राह्याभिधः अग्राह्याभिधः अस्ति। तस्य नामापि उच्चारयितुं योग्यं नास्ति। एवं सत्यापि त्वं तमिच्छसि चेत् गवेषय ॥७१७॥*

सरलार्थः- गान्धारः सक्रोधमब्रवीत् - हे मुग्धे! सः नलः स्प्रष्टुं योग्यः नास्ति। तस्य नाम श्रोतुं ग्रहीतुं च योग्यं नास्ति। तथापि त्वं तमाभिलषसि तर्हि गवेषय अन्वेषय ॥७१७॥

गुजराती :- પછી ક્રોધપી ગાંધારે કહ્યું કે, અરે મુગ્ધે! તે નલ સ્પર્શ કરવા લાયક નથી, તથા તેનું નામ પણ સાંભળવું કે ઉચ્ચારવું યોગ્ય નથી, (છતાં તારી ઇચ્છા હોય તો) તેને ક્યાંક શોધ. ॥७१७॥

हिन्दी :- तब गांधार ने क्रोधित होकर कहा कि, "हे मुग्धे! यह नल अब स्पर्श करने योग्य नही है। उसका नाम भी सुनने और लेने योग्य नही है। फिर भी तेरी इच्छा हो तो, तू उसे कहीं भी खोज।"॥७१७॥

मराठी :- नंतर क्रोधानी गांधार म्हणाला कि, "अरे मुग्धे! हा नळ स्पर्श करण्यालायक नाही आणि त्याचे नाव पण ऐकण्या किंवा उच्चारण्यालायक नाही. तरी पण तुझी इच्छा असेल तर त्याला कोठेही शोध.॥७१७॥

English :- Then Ghander angrily said to Damyanti by addressing her as a damsel, that Nal is now an untouchable and his name is not fit to be heard or taken. Then to if she wishes to go in search of him, she may proceed doing so.

भैम्यूचेऽस्यां सरस्यां मे भविष्यति गतोऽम्भसे ॥
तद्‌त्रान्वेषयिष्यामि ततो गान्धार ऊचिवान् ॥७१८॥

अन्वयः- भैमी ऊचे - सः मे अम्भसे अस्यां सरस्यां गतः भविष्यति। तद् अत्र अन्वेषयिष्यामि। ततः गान्धारः ऊचिवान् ॥७१८॥

विवरणम्:- *भीमस्य अपत्यं स्त्री भैमी दमयन्ती ऊचे बभाषे - सः नलः मे मम कृते अम्भसे अम्भः जलम् आदातुम् अस्यां सरस्यां गतः भविष्यति तत् तस्मात् कारणात् अहं तं नलम् अत्र सरसि अन्वेषयिष्यामि गवेषयिष्यामि। ततः तदनन्तरं गान्धारः ऊचिवान् उवाच ॥७१८॥*

सरलार्थः- दमयन्ती अवोचत् - सः नलः मदर्थं जलमानेतुं सरसीं गतः भविष्यति। अतः अहं तं नलम् अस्यां सरस्यां अन्वेषयामि। ततः गान्धारः ऊचिवान् ॥७१८॥

गुजराती :- त्यारे दमयंती बोली के, ते मारे माटे पाणी लेवा आ तळावमां गयो हशे, माटे हुं अहीं तेनी शोध करीश. त्यारे गांधार कहेवा लाग्यो के, ॥७१८॥

हिन्दी :- तब दमयंती बोली कि, "वह मेरे लिये जल लेने इस तालाब में गया होगा। इसलिये मैं उनकी यहाँ खोज करुंगी।" तब गांधार कहने लगा ॥७१८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- तेव्हा दमयंतीने म्हटले कि, ''ते माझ्याकरीता पाणी (जल) आणण्यासाठी या तलावावर गेले असतील म्हणून मी येथे त्यांचा शोध करीन,'' तेव्हा गांधार म्हणाला, ॥७१८॥

English :- Damyanti said that, Nal had gone to bring for her some water, from a pond nearby. So she will go in search of him around there. At this Ghandar spoke to her.

बाले मूढासि यः सुप्तां त्वामुज्झति स किं शठः ॥
त्वदर्थमानयेदम्भः सोचे मैवमहो वद ॥७१९॥

अन्वयः- बाले! मूढा असि। यः सुप्तां त्वामुज्झति। सः शठः त्वदर्थम् अम्भः आनयेत् किम्? सा ऊचे - अहो! एवं मा वद ॥७१९॥

विवरणम्:- बाले! त्वं मूढा असि। यः नलः सुप्तां शयितां त्वाम् उज्झति त्यजति। सः शठः धूर्तः त्वदर्थं तव कृते अम्भः जलम् आनयेत् किम्? सा दमयन्ती ऊचे बभाषे - अहो! एवं मा वद मा वोचः ॥७१९॥

सरलार्थः- बाले! त्वं मूढा असि। यः सुप्तां त्वाम् उज्झति। सः तव कृते जलम् आनयेत् किम्? तदा साऽवोचत् - अहो। एवं मा वद। इति ॥७१९॥

ગુજરાતી :- અરે બાલે! તું તો ભોળી છે, જે તને સુતી છોડીને ચાલ્યો ગયો, તે લુચ્ચો શું તારે માટે જળ લાવશે? ત્યારે તેણીએ કહ્યું કે, અહો! તું એમ નહી બોલ. ॥૭૧૯॥

हिन्दी :- ''अरे बालिके! तू भी भोली है, (मूर्ख) जो तुम्हे सोती हुई छोडकर चला गया, वह धूर्त तेरे लिये जल क्या लायेगा? तब वह बोली कि ''ओह! ऐसा मत बोलो।'' ॥७१९॥

मराठी :- ''हे बाले! तू तर खुपच भोळी आहे. जो तुला झोपलेली असताना सोडून जातो. तो लबाड काय तुझ्यासाठी पाणी आणेल?'' तेव्हा ती म्हणाली की, ''अहो! असे बोलू नका.''॥७१९॥

English :- Ghandar said to Damyanti that she was very innocent as she could'nt understand that how can a man bring her water when he can leave her when she is fast asleep. At this Damyanti pleaded to Ghandar to stop speaking such ill about her husband.

अहमस्म्यार्यपुत्रस्य प्राणेभ्योऽप्यतिवल्लभा ॥
राजोचे त्यजनेनैव पत्युः प्रेम त्वयीरितम् ॥७२०॥

अन्वयः- अहम् आर्यपुत्रस्य प्राणेभ्यः अपि अतिवल्लभा असि। राजा ऊचे - त्यजनेन एव पत्युः त्वयि प्रेम ईरितम् ॥७२०॥

विवरणम्:- *अहम् आर्यस्य पूज्यश्वशुरस्य पुत्रः आर्यपुत्रः तस्य आर्यपुत्रस्य पत्युः प्राणेभ्यः अपि अतिशयेन वल्लभा अतिवल्लभा प्रेयसी अस्मि । तदा राजा नृपः ऊचे बभाषे - त्यजनेन तव त्यागकरणेन एव पत्युः नलस्य त्वयि प्रेम ईरितम् प्रकटीकृतम् । यस्मात् नलेन तव त्यागः कृतः तस्मात् एव तस्य त्वयि कियत् प्रेम वर्तते इति सुस्पष्टमभवत् ॥७२०॥*

सरलार्थः- अहं पत्युः अतीव वल्लभा अस्मि। राजा अवोचत्। पतिः नलः त्वाम् अत्यजत्। तेन एव तस्य त्वयि कियत् प्रेम वर्तते, तत् ज्ञातम् ॥७२०॥

ગુજરાતી :- હું તે આર્યપુત્ર નલને પ્રાણોથી પણ અધિક વ્હાલી છું. ત્યારે રાજાએ કહ્યું કે, તારા ત્યાગથી જ તારા પતિનો પ્રેમ તારે વિષે તો પ્રગટ દેખાઈ રહ્યો છે. ॥૭૨૦॥

हिन्दी :- "मैं आर्यपुत्र नल को प्राणों से अधिक प्रिय हूँ।" तब राजा कहता है कि, "तेरा त्याग करने से ही ज्ञात होता है कि तेरा पति तुम्हे कितना प्रेम करता है।"॥७२०॥

मराठी :- "मी आर्यपुत्र नळाला प्राणाहून पण अधिक प्रिय आहे," तेव्हा राजा म्हणाला की, तुझ्या पतीने तुझा त्याग केला त्यावरूनच तुझ्या पतीचे तुझ्यावर किती प्रेम आहे? ते दिसते.॥७२०॥"

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Damyanti, said that, Nal loves wholeheartedly and more than his own life. At this the King said that it is clear that Nal does'nt love Damyanti at all or he would'nt have left her in such a lurch.

ऊचे भैमी परिक्रम्य सरोऽस्तीव न किं प्रियः ।।
भवत्वेतां प्रियादन्तं प्रश्रयामि रथाङ्गिकाम् ।।७२१।।

अन्वयः- परिक्रम्य भैमी ऊचे । इदं सरः अस्ति । किन्तु प्रियः न । भवतु। एतां रथाङ्गिकां प्रियोदन्तं प्रश्रयामि ।।७२१।।

विवरणम्:- *परितः क्रमित्वा परिक्रम्य इतस्ततः किञ्चित् भ्रान्त्वा भीमस्थापत्यं स्त्री भैमी दमयन्ती ऊचे अभिदधे । इदं सरः अस्ति । किन्तु प्रियः नलः न अस्ति । भवतु । अहम् एतां रथाङ्गिकां चक्रवाकीं प्रियस्य नलस्य उदन्तं वृत्तांन्त प्रियोदन्तं नलवृत्तान्तं प्रश्रयामि पृच्छामि ।।७२१।।*

सरलार्थः- परिक्रम्य दमयन्ती अवोचत् - इदं सरः अस्ति । किन्तु प्रियः नास्ति । अस्तः एतां चक्रवाकीमेव प्रियसय वृत्तांन्त पृच्छामि ।।७२१।।

ગુજરાતી :- પછી જરા અહીં તહીં જોઈને દમયંતી કહેવા લાગી કે, આ તળાવ તો છે, પરંતુ મારા પ્રાણવલ્લભ અહીં નથી, ઠીક છે, હું આ ચક્રવાકીને મારા પ્રિયતમનું વૃત્તાંત પૂછી જોઉં. ।।૭૨૧।।

हिन्दी :- फिर जरा इधर उधर घूमकर दमयंती कहने लगी कि, "यह तालाब तो है, लेकिन प्राणेश्वर नही है। अब इस चक्रवाकी को मेरे प्रियतम का वृत्तांत पूछकर देखती हूं। ।।७२१।।

मराठी :- मग जरा आजूबाजूला वळून दमयंती म्हणाली, "हे सरोवर आहे, परंतु माझे पति नल येथे नाही, ठीक आहे, मी या चक्रवाकीला माझ्या पतीचा वृत्तांत विचारते."।।७२१।।

English :- Wandering about near the pond, Damyanti said that as her husband is no where to be seen, she might as well ask the ruddy-goose about his where-abouts.

सखि! चक्रप्रिये सद्यः प्रियं नाख्यासि किं मम ।।
प्रत्यक्षमेव ते नित्यं दुःख प्रिय वियोगजम् ।।७२२।।

अन्वयः- सखि! चक्रप्रिये! त्वं मम प्रियं सद्यः न आख्यासि किम् । प्रियवियोगजं दुःखं ते नित्यं प्रत्यक्षमेव अस्ति ।।७२२।।

विवरणम्:- हे सखि! चक्रप्रिये! चक्रवाकि त्वं मम प्रियं प्रियोदन्तं सद्यः शीघ्रं किं न कथयसि? प्रियस्य विरहः प्रियविरहः । प्रियविरहात् जायते इति प्रियविरहजं दुःखं ते तव नित्यमेव प्रत्यक्षमस्ति ।।७२२।।

सरलार्थः- हे सखि! चक्रप्रिये! त्वं मम प्रियोदन्तं शीघ्रं किं न कथयसि । प्रियविरहात् जायमानं दुःखं तु तव नित्यमेव प्रत्यक्षमस्ति ।।७२२।।

ગુજરાતી :- હે સખી ચકવાકી! મને તું મારા સ્વામીનું વૃત્તાંત કેમ તુરત કહેતી નથી? તને તો સ્વામીના વિયોગથી થતું દુઃખ હમેશાં પ્રત્યક્ષ જ (જણાયેલું) છે. ।।૭૨૨।।

हिन्दी :- "हे सखी चक्रवाकी! तू मुझे मेरे स्वामी का वृत्तांत जल्दी क्यों नही बताती? तुझे तो प्रियवियोग का दुःख हमेशा प्रत्यक्ष ही है ।।७२२।।

मराठी :- हे सखी चक्रवाकी! मला तू माझ्या स्वामीचा वृत्तांत का बरं लवकर सांगत नाही! तुला तर स्वामीच्या वियोगाने होणारे दुःख नेहमी प्रत्यक्षच आहे.''।।७२२।।

English :- Damyanti addressing the ruddy-goose as a friend asked her as to why she does'nt tell her about the whereabouts of her husband, as she was cognizable by sight to all the torments she had gone through.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैमी स्थित्वा क्षणं स्माह प्रियप्रणयगर्विता ।।
दत्ते प्रत्युत्तरं नैषा सरोषं तामथाक्षिपत् ।।७२३।।

अन्वयः- भैमी क्षणं स्थित्वा आह स्म। प्रियप्रणयगर्विता एषा प्रत्युत्तरं न दत्ते। अथ तां सरोषम् अक्षिपत् ॥७२३॥

विवरणम्:- *भीमस्य अपत्यं स्त्री भैमी दमयन्ती क्षणं स्थित्वा तूष्णीं भूता आह स्म ब्रवीति स्म। प्रियस्य प्रटः प्रियप्रणयः। प्रियप्रणयस्य प्रणयेन वा गर्वः अस्याः अस्तीति प्रियप्रणयगर्विता एषा चक्रवाकी प्रत्युत्तरं न दत्ते। अथ अनन्तरं सा दमयन्ती तां चक्रवाकीं रोषेण सह यथा स्यात् तथा सरोषं सक्रोधम् अक्षिपत् अध्यक्षिपत् ।।७२३।।*

सरलार्थः- भैमी क्षणं स्थित्वा अवोचत् - एषा प्रियप्रणयगर्विता अस्ति। अतः प्रत्युत्तरं न दत्ते। अथ सा तां चक्रवाकीं सरोषम् अध्यक्षिपत्। तिरस्कृतवती ।।७२३।।

ગુજરાતી :- પછી દમયંતી ક્ષણવાર થોભીને બોલી કે, 'પોતાના સ્વામીના પ્રેમથી ગર્વિત થયેલી આ મને પ્રત્યુત્તર આપતી નથી. તેથી તે ક્રોધસહિત તેનો તિરસ્કાર કરવા લાગી કે, ।।૭૨૩।।

हिन्दी :- फिर दमयंती क्षणभर रुककर कहती है कि, "अपने स्वामी के प्रेम से गर्वित यह मुझे जवाब नही देती।" जिससे वह उसका क्रोध सहित तिरस्कार (नफरत) करने लगी ।।७२३।।

मराठी :- नंतर दमयंती क्षणभर (थोडावेळ) थांबून म्हणाली की, स्वतःच्या पतीच्या प्रेमाने गर्वित झालेली ही चक्रवाकी मला प्रत्युत्तर देत नाही," म्हणून ती क्रोधाने तिचा तिरस्कार करू लागली, ।।७२३।।

English :- Damyanti paused for a moment and then said that the goose is lost in her thoughts of her beloved. So she began hating the goose.

हंहो स्थाङ्गिके! तेऽसौ कः प्रियप्रणयस्मयः ॥
मय्यासीत्प्रणयः पत्युर्यः स वाचामगोचरः ॥७२४॥

अन्वयः- हंहो रथाङ्गिके! ते असौ कः प्रियप्रणयस्मयः । मयि पत्युः सः प्रणयः आसीत् सः वाचामगोचरः वर्तते ॥७२४॥

विवरणम्:- *हंहो रथाङ्गिके! हे चक्रवाकि! ते तव असौ कः प्रियस्य प्रणयः प्रियप्रणयः । प्रियप्रणयस्य स्मयः प्रियप्रणयस्मयः प्रियकरप्रणयगर्वः । किमर्थं पत्युः प्रणयगर्वं वहसि? मयि पत्युः नलस्य सः प्रणयः आसीत्। सः वाचाम् वाणीनाम् न गोचरः अगोचरः वर्तते अनिर्वचनीयः अस्ति ॥७२४॥*

सरलार्थः- हे चकअवाकि! तव अयं कीदृशः प्रियप्रणयगर्वः अस्ति । मयि पत्युः यः प्रणयः आसीत् । स वाचा वक्तुं न शक्यते ॥७२४॥

गुजराती :- અરે ચકવાકી! તને તારા પ્રિયતમના પ્રેમનો આ ગર્વ આવી ગયો છે ? મારા પર મારા સ્વામીનો જે પ્રેમ હતો તે વચનથી પણ વર્ણવી શકાય તેમ નથી. ॥૭૨૪॥

हिन्दी :- "अरे चक्रवाकी! तुझे अपने प्रियतम के प्रेम का गर्व क्यों हो गया है? मुझ पर मेरे स्वामी का जो प्रेम था, उसका वर्णन वचन से नहीं किया जा सकता।"॥७२४॥

मराठी :- "अरे चक्रवाकी! तुला तुझ्या प्रियकराच्या प्रेमाचा इतका गर्व का आला आहे? माझ्यावर माझ्या स्वामीचे जे प्रेम होते त्याचे शब्दाने वर्णन करू शकत नाही."॥७२४॥

English :- Damyanti then asked the goose as to why she is so proud of her beloved's love for her. She adds that, her husband's love for her cannot be expressed by mere words.

गान्धारोऽवददार्येऽसौ किं विजानाति पक्षिणी ॥
भैम्यूचेऽन्यं ततः प्रक्ष्यामीत्यन्यान् वीक्ष्य साऽब्रवीत् ॥७२५॥

अन्वयः- गान्धारः अवदत् - आर्ये! असौ पक्षिणी किं विजानाति? भैमी ऊचे - ततः अन्यं प्रक्ष्यामि, इति सा अन्यान् वीक्ष्य अब्रवीत् ॥७२५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *गान्धारः अवदत् - आर्ये! असौ पक्षिणी चक्रवाकी किं विजानाति? भैमी ऊचे बभाषे - ततः अन्यमपरं प्रक्ष्यामि, इति सा अन्यान् वीक्ष्य अवलोक्य अब्रवीत् अवक् ॥७२५॥*

सरलार्थः- गान्धारः अवदत् - आर्ये! असौ पक्षिणी किं वेत्ति। दमयन्ती अभणत् - ततः अन्यं प्रक्ष्यामि । इति सा अन्यान् वीक्ष्य अब्रवीत् ॥७२५॥

ગુજરાતી :- ત્યારે ગાંધાર બોલ્યો કે, હે આર્યે! આ પક્ષિણી શું જાણે? ત્યારે દમયંતી બોલી કે, ત્યારે બીજાને પૂછું, એમ કહી બીજાઓને જોઈ તે બોલી, ॥૭૨૫॥

हिन्दी :- तब गांधार कहता है कि, "हे आर्ये! यह पक्षिणी क्या जान सकती है?" तब दमयंती बोली कि, "तब औरों को पूछती हूं" ऐसा कहकर वह दूसरो को देखकर कहने लगी, ॥७२५॥

मराठी :- तेव्हा गांधार म्हणाला कि, "हे आर्ये! ही पक्षिणी काय समजु शकेल?" तेव्हा दमयंती म्हणाली की, "दुसऱ्यांना विचारुन बघते मी?" असे म्हणून ती दुसऱ्यांना पाहून म्हणू लागली, ॥७२५॥

English :- At this Ghandar asked her, as to how this female-bird will understand her dialect. So Damyanti began asking the others around, regarding her beloved.

भ्रातर्बर्हिण! तातैण मातः कुञ्जरवल्लभे ॥
सद्यः प्रसद्य मे ब्रूत विहितः सैष वोऽञ्जलिः ॥७२६॥

अन्वयः- **हे भ्रातः बर्हिण ! तात एण! मातः कुञ्जरवल्लभे । सद्यः मे प्रसद्य ब्रूत । वः स एषः अञ्जलिः विहितः ॥७२६॥**

विवरणम्:- *हे भ्रातः बन्धो बर्हिण मयूर! तात मृग हरिण! मातः कुञ्जरस्य गजस्य वल्लभा कुञ्जरवल्लभा, तत्सम्बुद्धौ हे कुञ्जरवल्लभे गजप्रिये करिणि! सद्यः शिघ्रं मे मयि प्रसद्य प्रसन्नाः भूत्वा ब्रूत वदत । वः युष्माकं सः एषः अञ्जलिः विहितः कृतः । बद्धाञ्जलिः अहं युष्मान् विज्ञापयामि । मयि प्रसद्य शीघ्रं वदत ॥७२६॥*

सरलार्थः- हे भ्रातः मयूर! तात हरिण! मातः करिणि! मयि प्रसय शीघ्रं वदत। एषः युष्माकम् अञ्जलिः विहितः ॥७२६॥

ગુજરાતી :- હે મયૂર! હે મૃગ! હે હાથણી! મારા પર કૃપા કરીને તમો તુરત કહો. મેં આ તમારી પાસે મારા હાથ જોડયા છે.॥७२६॥

हिन्दी :- हे मयूर, हे मृग, हे हाथिनी! मुझ पर दया करके शीघ्र कहो। मैने तुम्हारे सामने हाथ जोडे है। ॥७२६॥

मराठी :- ''हे भाऊ मोर! अहो बाबा मृग! हे आई हत्तीणी! माझ्यावर कृपा करुन लवकर सांगा? मी तुमच्या समोर हात जोडले आहेत. ॥७२६॥

English :- Then joining her hands in benevolence, Damyanti addressed the peacock as a brother, the ostrich as a father and the female elephant as a mother and asked to tell her if they knew about Nal.

दृष्टः क्वापि वनेऽमुष्मिन् नलो भैमीं गवेषयन् ॥
सृजन्नविरलैर्बाष्पैः पङ्किलां निखिलामिलाम् ॥७२७॥

अन्वयः- युष्माभिः अमुष्मिन् वने क्व अपि भैमीं गवेषयन्, अविरलैः बाष्पैः विखिलाम् इलां पङ्किलां सृजन् नलः दृष्टः ॥७२७॥

विवरणम्:- युष्माभिः अमुष्मिन् वने निपिने क्व अपि कस्मिन्नपि देशे भीमस्यापत्यं स्त्री भैमीं, तां भैमीं भीमपुत्रीं दमयन्ती गवेषयन् शोधयन्, न विरलानि अविरलानि, तैः अविरलैः सान्द्रैः बाष्पैः अश्रुजलैः निखिलां सर्वाम् इलां पृथ्वीं पङ्किलां पङ्कयुक्तां कर्दमितां सृजन् जनयन् नलः दृष्टः अवलोकितः किम्?॥७२७॥

सरलार्थः- युष्माभिः अस्मिन् वने कस्मिन्नपि देशे दमयन्ती गवेषयन्, अविरलैः अश्रुजलैः अखिलां पृथ्वीं कर्दमितां कुर्वन् नलः दृष्टः किम् ॥७२७॥

ગુજરાતી :- તમોએ બધાયે આ વનમાં દમયંતીને શોધતા નિરંતર આંસુઓ વડે સમસ્ત પૃથ્વીને કાદવમય કરતા એવા નલને જોયો છે? ॥७२७॥

P.P. Ac. Gunratnasuri M.S.
Jain Gun Aaradhak Trust

हिन्दी :- तुमने किधर भी वनमें दमयंती को खोजते हुए निरन्तर आंसुओ द्वारा समस्त पृथ्वी को दलदलमय करते हुए नल को देखा है?॥७२७॥

मराठी :- तुम्ही वा वनात कोठेतरी दमयंतीला शोधीत निरंतर (अहोरात्र) अश्रूंनी समस्त पृथ्वीला चिखलमय करणाऱ्या नळाला पाहिले आहे काय? ॥७२७॥

English :- Damyanti asked the beings, if they have ever seen her searching for her beloved Nal, night and day, with a continous flow of tears which had made the earth muddy and slimy.

पिङ्गलः प्रोचिवानार्ये त्वक्ता त्वमसि तेन किम् ॥
सबाष्पं दमयन्त्याख्यत् दोषं जानामि नात्मनः ॥७२८॥

अन्वयः- पिङ्गलः प्रोचिवान् आर्ये! तेन त्वं किं त्यक्ता असि? तदा दमयन्ती सबाष्पम् आख्यत् - अहम् आत्मनः दोषं न जानामि ॥७२८॥

विवरणम्:- *पिङ्गलः प्रोचिवान् प्रोवाच - आर्ये! तेन नलेन त्वं किमर्थं त्यक्ता असि। तदा दमयन्ती बाष्पेण सह यथा स्यात् तथा सबाष्पं साश्रुनयनम् (साश्रुनयना वा) आख्यत् अकथयत् - अहम् आत्मनः कमपि दोषम् अपराधः न जानामि॥७२८॥*

सरलार्थः- पिङ्गलः प्रोवाच - आर्ये! तेन नलेन त्वं किमर्थं त्यक्ता? तदा दमयन्ती प्रत्यवदत् - अहमात्मनः दोषमपरावं न जानामि॥७२८॥

ગુજરાતી :- ત્યારે પિંગલે કહ્યું કે, હે આર્યે! તે નલે તને શામાટે તજી દીધી છે? ત્યારે આંસુઓ લાવી દમયંતી બોલી કે હું મારો કંઈ પણ અપરાધ જાણતી નથી.॥७२८॥

हिन्दी :- तब पिंगलने कहा कि, "हे आर्ये! इस नलने तुम्हे क्यों त्याग दिया है?" तब आंसु-सहित वह बोली कि, "मैं मेरा दोष नही जानती।"॥७२८॥

मराठी :- तेव्हा पिंगल म्हणाला की, "हे आर्ये! त्या नळाने तुला कां सोडून दिले?" तेव्हा अश्रु ढाळीत दमयंती म्हणाली की, "मला माझा कोणताही अपराध (गुन्हा) माहित नाही."॥७२८॥

English :- Then Pingal asked her the reason as to why Nal had abandon her. She replied saying, that she herself did not know the reason.

आदावेवार्पितः स्वात्मा वनंच प्रस्थिता सह ।।
स्वप्नेऽपिच पतिं नान्यं याचे त्यक्ता तथाप्यहम् ।।७२९।।

अन्वयः- आदौ एव स्वात्मा अर्पितः । तेन सह वनं प्रस्थिता । स्वप्नेऽपि अन्यं पतिं न याचे । तथापि तेन अहं त्यक्ता ।।७२९।।

विवरणम्:- *आदौ प्रथमम् एव स्वस्य आत्मा स्वात्मा । तस्मै अर्पितः समर्पितः । पश्चात् तेन सह वनं प्रस्थिता सनर्गता । स्वप्ने अपि अहम् अन्यं पतिं न याचे न अभिलषामि । तथापि तेन नलेन अहं त्यक्ता ।।७२९।।*

सरलार्थः- मया आदौ एव तस्मै स्वात्मा समर्पितः । तेन सह वनं प्रस्थिता । स्वप्नेऽपि अन्यं पतिं न अभिलषामि । तथापि तेन अहं त्यक्ता ।।७२९।।

ગુજરાતી :- પ્રથમથીજ મેં મારા આત્માને તેને સોંપી દીધો હતો, અને તેની સાથે જ મેં વનમાં પ્રયાણ કર્યું હતું. વળી સ્વપ્નમાં પણ મેં બીજા સ્વામીની ઇચ્છા કરી નથી, તો પણ મને તે તજી ગયા છે.।।७२९।।

हिन्दी :- "शुरु से ही मैंने अपनी आत्मा उन्हे सौंप दी थी और उनके साथ ही वन में प्रस्थान किया था। मैंने स्वप्न में भी दूसरे पति की इच्छा नहीं की, तो भी वह मुझे त्याग कर चले गये।"।।७२९।।

मराठी :- "प्रथमच मी माझ्या आत्मा त्यांना सोपवून दिला होता, आणि त्यांच्या सोबतच मी वनात प्रयाण केले होते, आणि स्वप्नातही मी दुसऱ्या स्वामीची इच्छा करु शकत नाही, तरीपण ते मला सोडून निघून गेले आहे."।।७२९।।

English :- She said that from the very beginning she had placed her body and soul in the hands of Nal and had never desired another man as she was a virgin even in dreams. So she still doesn't know why Nal had deserted her all of a sudden.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

यद्वापास्तमकल्याणमार्यपुत्रोऽत्यजन्न माम् ।।
किं पुनर्मद्विनोदार्थन परिहासममसौ व्यधात् ।।७३०।।

अन्वयः- यद् वा अकल्याणम् अपास्तम् । आर्यपुत्रः मां न अत्यजत् । किं पुनः? असौ मद्विनोदार्थं परिहासं व्यधात् ।।७३०।।

विवरणम्:- यद् वा न कल्याणम् अकल्याणम् अमङ्गलम् अपास्तं भवतु अपसरतु । आर्यपुत्रः नलः मां न अत्यजत् न व्यसृजत् । किं पुनः बहु उक्तेन! असौ नलः मम विनोदाय इदं मद्विनोदार्थं मम मनोविनोदनं कर्तुं वक्ष्यमाणं परिहासं नर्म व्यधात् अकरोत् ।।७३०।।

सरलार्थः- अथवा अमंगलम् अपहतं भवतु । आर्यपुत्रः मां न अत्यजत् । बहुना उक्तेन किम्? असौ मम मनोविनोदनार्थं परिहासम् अकरोत् ।।७३०।।

ગુજરાતી :- અથવા અમંગલ દૂર થાઓ ! તે આર્યપુત્ર નલે મને તજેલી જ નથી, વધારે શું કહું? ફક્ત મનનો વિનોદ કરવા માટે તેણે આ હાંસી કરેલી છે. ।।૭૩૦।।

हिन्दी :- "अथवा अमंगल दूर हो? उस आर्यपुत्र नल ने मुझे त्यागा नही है, अब अधिक क्या कहूँ? केवल परीहास के लिये ही उन्होनें मेरे साथ मजाक किया है।"।।७३०।।

मराठी :- "किंवा अमंगल दूर होवो! आर्यपुत्र नळाने मला सोडले नाही, अधिक काय सांगू? केवळ मन रमविण्यासाठी त्यांनी ही गंमत केली आहे."।।७३०।।

English :- She then wished the bad omen to pass away she then says that, maybe Nal has'nt left her but is just playing a joke on her.

लक्ष्यीकृत्य नमः समाह नाथ निर्मानुषं वनम् ।।
भीरुश्चैकाऽहमेह्येहि तदलं नर्मणाऽप्यति ।।७३१।।

अन्वयः- नभः लक्ष्यीकृत्य आह स्म । नाथ ! वनं निर्मानुषम् अस्ति । भीरुः च अहम् एका । एहि एहि । अतिनर्मणा अलम् ।।७३१।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- ततः सा दमयन्ती नभः आकाशं लक्ष्यीकृत्य आकाशे दृष्टिं दत्त्वा आह स्म ब्रवीति स्म। नाथ! वनं निर्मानुषं मनुष्यरहितं अस्ति। अहं भीरुः कातरा एका एकाकिनी च अस्मि। अतः शीघ्रम् एहि एहि आगच्छ आगच्छ। अतिशयेन नर्म अतिनर्म, तेन अतिनर्मणा अतिपरिहासेन अलम् ॥७३१॥

सरलार्थ:- ततः सा दमयन्ती अवकाशे दृष्टिं दत्त्वा ब्रवीति स्म नाथ! इदं नवं निर्मानुषमस्ति। अहमेकाकिनी भीरुः च अस्मि। अतः शीघ्रमागच्छ आगच्छ। अतिनर्मणा अलम् ॥७३१॥

ગુજરાતી :- પછી તે આકાશ તરફ દૃષ્ટિ કરીને બોલી કે, હે નાથ! આ જંગલ મનુષ્ય વિનાનું છે, અને હું અહીં એકલી ફરું છું માટે (તમો) આવો? આવો? હાંસી કરવાથી હવે છોડો.॥૭૩૧॥

हिन्दी :- फिर आकाश की ओर देखकर बोली कि, "हे नाथ यह जंगल मानवरहित है और मैं यहाँ अकेली भयभीत हो रही हूँ, इसलिये आओ! आओ! अब ज्यादा मजाक ठीक नही!"॥७३१॥

मराठी :- नंतर ती आकाशाकडे दृष्टि (नजर) करून म्हणाली की, "हे नाथ! हे जंगल निर्मनुष्य आहे, आणि मी येथे एकटी भीत आहे म्हणून (तुम्ही) या? या? आता जास्त गम्मत करू नका."॥७३१॥

English :- Then Damyanti turned towards the sky and addressing her beloved Nal, asked him to return fast, and stop playing a joke on her as this jungle is without any humanbaings and so she is very frightened of this solitary life.

श्रुत्वा प्रतिखम्भूयः आकाशे मां ब्रवीषि किम् ॥
असावहमुपैमीति रभसेन प्रधावति ॥७३२॥

अन्वयः- भूयः आकाशे प्रतिखं श्रुत्वा मां किं ब्रवीषि? असौ अहम् उपैमि इति रभसेन प्रधावति ॥७३२॥

विवरणम्:- भूयः पुनः आकाशे गगने प्रतिगतः खः प्रतिखः तं प्रतिखं प्रतिध्वनिं श्रुत्वा आकर्ण्य मां किं ब्रवीषि वदसि? असौ अहम् उपैमि उपयामि इति उक्त्वा सा रभसेन वेगेन प्रधावति ॥७३२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- भूयः आकाशे प्रतिध्वनिं श्रुत्वा मां किं ब्रवीषि? असौ अहम् उपैमि । इत्युक्त्वा सा वेगेन प्रधावति ॥७३२॥

ગુજરાતી :- વળી આકાશમાં તેનો પડઘો સાંભળીને, 'મને શું કહો છો? આ હું આવું છું.' એમ કહી તે દમયંતી એકદમ દોડવા માંડે છે. ॥૭૩૨॥

हिन्दी :- फिर आकाश में प्रतिध्वनि सुनकर कहने लगी, "क्या कह रहे हो? मै आती हूँ।' और वह एकदम दौडने लगी। ॥७३२॥

मराठी :- मग आकाशात त्याचा प्रतिध्वनी ऐकून, "काय म्हणता? मी येत आहे," असे म्हणून ती दमयंती एकदम पाव् लागली. ॥७३२॥

English :- Then she suddenly heard a sympathetic resonance coming from the sky, which said that he is coming to her, to rescue her from her sad plight. Having heard this reverberation she began to run helter-skelter in search of the voice.

गान्धारोऽवददार्येऽसौ प्रतिश्रुद्भीमजा जवात् ॥
स्थित्वाऽऽहासौ प्रतिश्रुत् किं गान्धारोऽभिदधेऽथ किम् ॥७३३॥

अन्वयः- गान्धारः अवदत् - आर्ये! असौ प्रतिश्रुत् अस्ति। भीमजा जवात् स्थित्वा आह - किम् असौ प्रतिश्रुत् ? गान्धारः अभिदधे - अथ किम् ॥७३३॥

विवरणम्:- गान्धारः अवदत् - अवोचत् - आर्ये! असौ प्रतिश्रुत् प्रतिध्वतिः अस्ति। तदा भीमात् जायतेऽसौ भीमजा दमयन्ती जवात् झटिति स्थित्वा आह - ब्रवीति - किम् असौ प्रतिश्रुत् प्रतिध्वनिः अस्ति? तदागान्धारः अभिदधे - अभाषत - अथ किम् ॥७३३॥

सरलार्थः- गान्धारः अवदत् - आर्ये! असौ प्रतिध्वनिः अस्ति । इति श्रुत्वा दमयन्ती झटिति स्थित्वा अब्रवीत् - किम् असौ प्रतिध्वनिः? गान्धारः वदतिअथ किम् ॥७३३॥

ગુજરાતી :- ત્યારે ગાંધારે કહ્યું કે, હે આર્યે! આ તો પડઘો છે, ત્યારે દમયંતી એકદમ ઉભી રહીને કહેવા લાગી કે, શું આ પડઘો છે? ત્યારે ગાંધારે કહ્યું કે, ત્યારે બીજું શું છે? ॥૭૩૩॥

हिन्दी :- तब गांधार कहता है कि, "हे आर्ये! यह तो प्रतिध्वनि है," तब दमयंती अचानक रुककर कहने लगी कि, "क्या यह प्रतिध्वनि है?" तब गांधार कहता है कि, "तो और क्या है?"॥७३३॥

मराठी :- तेव्हा गांधार म्हणाला की, "हे आर्ये! हा तर प्रतिध्वनि आहे," तेव्हा दमयंती एकदम उभी राहून म्हणाली की, "काय हा प्रतिध्वनी आहे?" तेव्हा गांधार म्हणाला की, "नाहीतर मग आणखी काय आहे?"॥७३३॥

English :- At this Ghandar told her that this was just an echo, she was running after. This made her wonder in astonishment.

स्वच्छायां भैम्यथालोक्य सहसोच्चैः स्वरं जगौ ॥
दिष्ट्या दृष्टोऽसि दृष्टोऽसि क्वेदानीं नाथ गच्छसि ॥७३४॥

अन्वयः- अथ भैमी स्वच्छायाम् आलोक्य सहसा उच्चैः स्वरं जगौदिष्ट्या दृष्टः असि। दृष्टः असि हे नाथ ! इदानीं क्व गच्छासि ॥७३४॥

विवरणम्:- अथ अनन्तरं भीमस्यापत्यं स्त्री भैमी दमयन्तीस्वस्य छाया स्वच्छाया, तां स्वच्छायाम् आलोक्य दृष्ट्वा सहसा उच्चैःस्वरं जगादा दिष्ट्या भाग्येन दृष्टः असि। दृष्टः असि। अर्थात् प्राप्तः असि। स्वच्छायामेव नलं मत्वा सा इत्थं वदति। हे नाथ! इदानीम् अधुना क्व गच्छसि? इति ॥७३४॥

सरलार्थः- अनन्तरं भैमी स्वच्छायाम् आलोक्य उच्चैःस्वरं जगादनाथ! अथ त्वं भाग्येन दृष्टः असि। इदानीं क्व गच्छसि? ॥७३४॥

ગુજરાતી :- પછી દમયંતી પોતાનો પડછાયો જોઈને એકદમ મોટા સ્વરથી બોલવા લાગી કે, સારું થયું કે, મેં મારા સ્વામીને નજરથી જોયા, જોયા, હે સ્વામી! હવે ક્યાં જાઓ છો? ॥૭૩૪॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर दमयंती अपनी परछाई देखकर ऊंचे स्वर में कहने लगी कि, "अच्छा हुआ, मैं ने अपने स्वामी को आँखो से देखा, देखा! हे स्वामी! अब कहाँ जाओगे?" ॥७३४॥

मराठी :- नंतर दमयंती स्वत:च्या सावलीला पाहून एकदम मोठ्या स्वरात म्हणाली की, "भाग्य माझे की मला तुम्ही दिसला. आता कोठे जाल?"॥७३४॥

English :- Then Damyanti happenning to see her own shadow, said in a loud voice, that she has seen her beloved with her own eyes, then she suddenly asked the shadow as to where it was heading to.

धावित्वा रभसात् भूयः स्थित्वा चाशु ससीत्कृतिः ॥
सबाष्पमूचे गान्धारं विद्धौ दर्भाङ्कुरैः पदौ ॥७३५॥

अन्वयः- भूयः रभसात् धवित्वा आशु स्थित्वा च ससीत्कृतिः सबाष्पं गान्धारम् ऊचे - दर्भाङ्कुरैः पदौ विद्धौ ॥७३५॥

विवरणम्:- भूयः पुनः रभसात् वेगात् धावित्वा पलाय्य आशु शीघ्रं स्थित्वा सीत्कृत्या सह वर्ततेऽसौ ससीत्कृतिः बाष्पैः अश्रुभिः सह यथा स्यात् तथा सबाष्पं साश्रु गान्धारम् ऊचे बभाषे - दर्भाणां कुशानाम् अङ्कुराः दर्भाङ्कुराः तैः दर्भाङ्कुरैः कुशाग्रैः पदौ पादौ विद्धौ स्तः । इति ॥७३५॥

सरलार्थः- भूयः रभसात् धावित्वा आशु स्थित्वा ससीत्कृतिः सा सबाष्पं गान्धारं बभाषे - दर्भाणामङ्कुरैः पदौ विद्धौ ॥७३५॥

ગુજરાતી :- વળી એકદમ દોડીને, તથા પાછી તુરત ઉભી રહીને ચિત્કાર સહિત આંસુઓ લાવીને તે ગાંધારને કહેવા લાગી કે, (અરેરે!) દર્ભોના કાંટાઓથી મારા તો પગ વિંધાઈ ગયા. ॥७३५॥

हिन्दी :- फिर अचानक दौडने लगी और फिर तुरंत खडी होकर चित्कार शब्द सहित आँखो में आँसु भरकर उस गांधार से कहने लगी कि, (अरेरे!) दर्भाकुरों (घांस के कांटों) से मेरे पैर छलनी हो गये। ॥७३५॥

P.P. Ac Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- मग एकदम धावून आणि पुन्हा पटकन उभी राहून सीत्कार करीत अश्रू आणून ती गांधाराला म्हणाली की, (अरेरे!) माझे पाय दर्भाच्या अंकुरांनी जखमी झाले आहेत. ॥७३५॥

English :- Then suddenly she began to run and then suddenly she stopped herself and said to Ghandar with tears welling in her eyes and groans of pain, that the thorns of the grass has pricked her feet.

तन्ममापनयाऽये तानथवा तिष्ठ तिष्ठ भोः ॥
स्वयमेवापनेष्यामि स्पृशामि न परं नरम् ॥७३६॥

अन्वयः- अये! तद् मम तान् अपनय! अथवा भोः ! तिष्ठ। तिष्ठा स्वयमेव अपनेष्यामि। यतः अहं परं नरं न स्पृशामि ॥७३६॥

विवरणम्:- अये! तद् तस्मात् मम तान् कण्टकान् अपनय अपसारय। अथवा भोः! तिष्ठ, तिष्ठ। अहं स्वयमेव कण्टकान् अपनेष्यामि अपसारयिष्यामि। यतः यस्मात् कारणात् अहं परं नरं न स्पृशामि ॥७३६॥

सरलार्थः- अये! तद् मम कण्टकान् अपनय। अथवा भोः। तिष्ठ। अहं स्वयमेव कण्टकान् अपनेष्यामि। यतः अहं परं नरं न स्पृशामि ॥७३६॥

ગુજરાતી :- અરે! મારા તે કાંટા કાઢી નાખ? અથવા અરે! થોભ! હું મારી મેળે જ તે કાઢીશ, કેમ કે હું પરપુરુષનો સ્પર્શ કરતી નથી. ॥७३६॥

हिन्दी :- "अरे! मेरे पैर में से कांटे निकाल दो!" फिर "अरे! रुको! रुको! मैं स्वयं ही निकाल लुंगी! मैं पर-पुरुष को स्पर्श नही करती!"॥७३६॥

मराठी :- "अरे! माझे ते कांटे काढुन टाक! अथवा थांब! थांब! मीच काढून टाकते, कारण मी पर-पुरुषाला स्पर्श करीत नाही."॥७३६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then she asked someone to pull out the thorn from her feet, then suddenly she asked them to stop, as she does'nt allow a any other man to touch her, other than her husband.

राजा रभसयोत्थाय तां सतीति नमस्यति ।।
जीवलः किमिदं देव! स्वसिंहासनमास्यताम् ।।७३७।।

अन्वयः- राजा सरभसया उत्थाय सतीं इति तां नमस्यति। जीवलः देव! इदं किम्? स्वसिंहासनमास्यताम् ।।७३७।।

विवरणम्:- राजा नृपः सरभसया सत्वरम् उत्थाय इयं सती पतिव्रता इति मत्वा तां नमस्यति प्रणमति । तदा जीवलः प्रतीहारः वदतिदेव! इदं किम्? भवता स्वस्य सिंहासनं स्वसिंहासनम् आस्थताम् उपविश्यताम् भवता अस्यै नमस्करणमयुक्तम् इति ।।७३७।।

सरलार्थः- नृपः सरभसमुत्थाय पतिव्रता इति तां नमस्यति । तदा जीवलः प्रतीहारः वदति - देव! इदं किम्? भवता स्वसिंहासनम् अध्यास्यताम् ।।७३७।।

ગુજરાતી :- (તે સમયે) રાજા એકદમ ઉઠીને તેણીને સતી માનીને નમવા જાય છે, ત્યારે જીવલ પ્રતિહાર કહે છે કે, હે દેવ! આ શું કરો છો? આપ આપના સિંહાસન પર બેસી રહો. ।।૭૩૭।।

हिन्दी :- (उसी समय) राजा एकदम से उठकर उसे सती समझकर झुकने जाता है, कि तभी जीवल प्रतिहारी कहता है कि, "हे देव! यह आप क्या कर रहे है? आप अपने सिंहासन पर ही बिराजमान रहिए।"।।७३७।।

मराठी :- (त्या वेळेला) राजा एकदम उठून तिला सती मानून नमस्कार करतो तेव्हा जीवल द्वारपाल म्हणतो महाराज! तुम्ही हे काय करीत आहात? तुम्ही तुमच्या सिंहासनावर बसा.।।७३७।।

English :- At this, suddenly the king stood and began to bow at the woman, playing the part of Damyanti, taking her as a chaste woman. At this the compere asked the king what he was doing and asked him to be seated on his throne.

नटानां घटनैवैषाऽथास्ते राजा त्रपानतः ॥
नलः सदुःखं स्वगतं चिन्तयामास साश्रुदृक् ॥७३८॥

अन्वयः- एषा नटानां घटना एव । अथ राजा त्रपानतः आस्ते । साश्रुदृक् नलः सदुःखं स्वगतं चिन्तयामास ॥७३८॥

विवरणम्:- *एषा नटानां घटना एव अस्ति । एषोऽखिलः नटानां प्रपञ्चः अस्ति। अथ अनन्तरं राजा नृपः त्रपया लज्जया नतः त्रपानतः आस्ते । अश्रुभिः सह वर्तते इति साश्रु। साश्रु दृशौ यस्य सः साश्रुदृक् साश्रुनयनः नलः दुःखेन सह यथा स्यात् तथा सदुःखं स्वगतं मनसि चिन्तयामास ॥७३८॥*

सरलार्थः- एषः अखिलः नटानां प्रपञ्चः अस्ति ।इति मत्वा नृपः त्रपानतः आस्ते । नलः साश्रुनयनः दुःखेन स्वगतं चिन्तयामास ॥७३८॥

ગુજરાતી :- કેમ કે આ તો સઘળો નટોનો પ્રપંચ છે, પછી રાજા શરમાઈને બેસી ગયો. ત્યારે નલરાજા દુઃખી થઈને આંખોમાં આંસુઓ લાવી પોતાના મનમાં વિચારવા લાગ્યા કે, ॥૭૩૮॥

हिन्दी :- "यह सब तो नटों का प्रपंच है।" फिर राजा शरमाकर बैठ गया। तब नलराजा दुःखी हो कर आँखो में आसु भरकर अपने मन में विचार करते हैं कि,॥७३८॥

मराठी :- हा सगळा नटांचा प्रपंच आहे, मग राजा लाजून बसला. तेव्हा नळराजा दुःखी होऊन होळ्यात अश्रू आणून स्वतःच्या मनात विचार करु लागला की, ॥७३८॥

English :- At this the compere said that this was just a creation and copiousness of the actors. The King than sat down feeling ashamed. This incident, bought tears in the eyes of Nal and he began to wonder.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

बाधिर्यं बिभ्रतां कर्णावन्धत्वं च दृशौ यथा ॥
रुदितं न शृणोम्यस्याः पश्यामि च न दुर्दशाम् ॥७३९॥

अन्वयः- कर्णौ बाधिर्यं बिभृताम्। दृशौ अन्धत्वं बिभृताम्। येन अहम् अस्याः रुदितं न शृणोमि दुर्दशां च न पश्यामि ॥७३९॥

विवरणम्:- कर्णौ बधिरस्य भावः बाधिर्यं बधिरत्वं बिभृताम् हे कर्णौ! युवां बाधिरौ भवतम् ।दृशौ अन्धत्वं बिभृताम्। (हे दृशौ!) युवां अन्धे भवतम् ।येन अहम् अस्याः दमयन्त्याः रुदितं रोदनं न शृणोमि अस्याः दुष्टा चासौ दशाच दुर्दशा, तां दुर्दशां दुरवस्थां न पश्यामि ॥७३९॥

सरलार्थः- कर्णौ बधिरत्वं बिभृताम्। दृशौ अन्धत्वं बिभृताम्। येन अहम् अस्याः रुदितं न शृणोमि। दुर्दशां च न पश्यामि ॥७३९॥

गुजराती :- હે કર્ણો! તમે બહેરા થઈ જાઓ તથા હે આંખો તમો અંધપણું ધારણ કરો કે જેથી હું આનું રુદન સાંભળી શકું નહીં, તેમ તેણીની દુર્દશા જોઈ શકું નહીં. ॥७३९॥

हिन्दी :- "हे कर्ण! तुम बहरे हो जाओ और हे नेत्र! तुम अंधत्व धारण कर लो! कि जिस से मैं उसका रुदन न सुन सकूं और उसकी दुर्दशा भी न देख सकूं।"॥७३९॥

मराठी :- "हे कानांनो! तुम्ही बहिरे होऊन जा! होळयांनो! तुम्ही अंधपणा धारण करा कि ज्यामुळे मी तिचे रुदन ऐकू शकणार नाही व तिची दुर्दशा सुद्धा पाहू शकणार नाही.॥७३९॥

English :- Nal then asked the ear become deaf and asked the eyes to attain blindness so that also he will not be able to hear her wailing and will also not be able to see her calamitous plight.

गान्धारः सासमूचे क्ष्मां देवि! दैववशादसौ ॥
पादचारेण यान्ती किं विध्यते दर्भसूचिभिः ॥७४०॥

अन्वयः- गान्धारः क्ष्मां सासम् ऊचे - देवि! दैववशात् पादचारेण यान्ती असौ दर्भसूचिभिः किं विध्यते? ॥७४०॥

विवरणम्:- *गान्धारः क्षमां पृथ्वीम् अश्रूणां समूहः आसम्। आस्रेण अश्रुसमूहेन सह यथा स्यात् तथा सास्रम् ऊचे बभाषे - हे देवि पृथ्वि! दैववशात दुर्दैवप्रभावात् पादाभ्यां चारः पादचारः, तेन पादचारेण यान्ती गच्छन्ती (विना पावत्राणाभ्यां गच्छन्ती) असौ भैमी दमयन्ती दर्भाणां सूचयः अग्राणि दर्भसूचयः, ताभिः दर्भसूचिभिः कुशाग्रैः किं विध्यते किम् आहन्यते? ॥७४०॥*

सरलार्थः- गान्धारः पृथ्वीं सास्रमवदत् - हे देवि पृथ्वि! दुर्दैववशाज् पादत्राणाभ्यां विना पादाभ्यां विचरन्ती असौ दमयन्ती दर्भाग्रैः किं विध्यते?॥७४०॥

ગુજરાતી :- ત્યારે ગાંધારે આંસુઓ લાવી પૃથ્વીને કહ્યું કે, હે દેવી! કર્મયોગે આ દમયંતી પગે ચાલતી જાય છે, તેણીને દર્ભોના કાંટાઓથી તું શા માટે વીંધે છે? ॥૭૪૦॥

हिन्दी :- तब गांधार ने आंसु भरकर पृथ्वी से कहा कि, "हे देवी! कर्म के योग से यह दमयंती पैदल चल रही है, उसको तू दर्भो के काँटो से क्यों छेद रही है?" ॥७४०॥

मराठी :- तेव्हा गांधार डोळयात अश्रू आणून पृथ्वीला म्हणाला, हे देवी! दमयन्ती दुर्दैवाने अनवाणी चालत जात आहे. तिला बिचारीला दर्भाच्या अंकुरांनी का जखमी करीत आहेस? ॥७४०॥

English :- Then Ghandar said to the mother earth with tears swelling in his eyes, that Damyanti has to walk bare-foot on the ground, due to her past, sown deeds. So he asked the earth not to a pierce her with such thorns.

स्त्रीणामापदि कर्तुंते साहाय्यमुचितं स्त्रियः ॥
नैषधिः क्षितिपः कुर्यात् पारुष्यं पुरुषः स हि ॥७४१॥

अन्वयः- स्त्रीणाम् आपदि ते स्त्रियः साहाय्यं कर्तुम् उचितम्। नैषधिः क्षितिपः पारुष्यं कुर्यात्। तथाहि सः पुरुषः अस्ति ॥७४१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- स्त्रीणां नारीणाम् आपदि विपत्तौ ते तव स्त्रियाः नार्याः साहाय्यं कर्तुम् उचितम् अस्ति। यतः हे पृथ्वि! त्वमपि स्त्री असि। निषधस्य अपत्यं पुमान् पैषधिः नलः क्षितिं धातीति क्षितिपः भूपः पुरुषस्य भावः पारुष्यं कठोरत्वं कुर्यात् विदध्यात्। तथाहि सः पुरुषः अस्ति। पुरुषस्य नारीं प्रति पारुष्यं कदाचित् युज्यते। परं स्त्रियाः स्त्रीं प्रति पारुष्यं न युज्यते।

सरलार्थः- हे पृथ्वि! स्त्रीणामापदि तव साहाय्यं कर्तुमुचितमस्ति। यतः त्वमपि स्त्री असि। नलः राजा पारुष्यं कुर्यात्। तथाहि सः पुरुषः अस्ति ॥७४१॥

ગુજરાતી :- સ્ત્રીઓની પીડા સમયે તારે સ્ત્રીને સહાય કરવી ઉચિત છે, નલરાજા જ કઠોરપણું આચરી શકે, કેમ કે તે પુરુષ છે. ॥७४१॥

हिन्दी :- "स्त्रियों के दुःख में, तुम स्त्री हो इसलिये, स्त्री को सहायता करना उचित है। नलराजा कठोरता धारण कर सकते है क्यों कि वह पुरुष है।"॥७४१॥

मराठी :- "स्त्रीयांच्या दुःखाच्या वेळी स्त्रीला मदत करणं तुला उचित आहे, नळराजा कठोर बनू शकतो कारण तो पुरुष आहे."॥७४१॥

English :- He continued saying that only woman can understand the problems and afflictions of a another woman. So he askes her to protect and help Damyanti as only a mother can attain tenderness and king Nal being a man can attain harshness and rigidity.

मन्त्री सरोषमुत्थाय आः कुशीलवपांसन ॥
तमपि क्षितिपं ब्रूषे यस्तत्याज पतिव्रताम् ॥७४२॥

अन्वयः- मन्त्री सरोषम् उत्थाय ब्रूते - आः! कुशीलवपांसन! तम् अपि क्षितिपं ब्रूषे। यः पतिव्रतां तत्याज ॥७४२॥

विवरणम्:- *मन्त्री अमात्यः रोषण सह यथा स्यात् तथा सरोषं ब्रूते वदति आः। कुशीलवानां नटानां पांसनः कुशीलव पांसनः तत्सम्बुद्धौ हे कुशीलवपांसन नटापसद! तमपि त्वं क्षितिं पातीतिक्षितिपः तं क्षितिपं भूपं ब्रूषे वदसि। यः नलः पतिव्रतां तत्याज अत्यजत् ॥७४२॥*

सरलार्थः- मन्त्री सरोषम् अब्रवीत् - रे नटापसद! यः पतिव्रतां तत्याज तमपि नलं त्वं क्षितिपं वदसि ॥७४२॥

ગુજરાતી :- (તે સાંભળી) ક્રોધ સહિત મંત્રી ઊઠીને કહેવા લાગ્યો કે, અરે! દુષ્ટ કુશીલવ! જેણે પતિવ્રતા સ્ત્રીનો ત્યાગ કર્યો, તેને તું રાજા કહે છે!॥૭૪૨॥

हिन्दी :- (ऐसा सुनकर) क्रोधसहित मंत्री उठ कर कहता है कि, "अरे! दुष्ट कुशीलव! जिसने पतिव्रता स्त्री का त्याग किया है, उसे तू राजा कह रहा है?"॥७४२॥

मराठी :- (हे ऐकून) मंत्री रागाने म्हणाला की, "अरे! दुष्ट कुशीलवा! ज्याने पतिव्रता स्त्रीचा त्याग केला आहे, त्याला तू राजा म्हणतोस?"॥७४२॥

English :- At this the minister questioned the actor playing the role of Ghandar, angrily, as to how he can call a man as Nal, a king, who had the presence of mind to abandon a charte woman as Damyanti.

राजाऽवदद्भव स्वस्थोऽमात्येदं ननु नाटकम् ॥
आस्तेऽमात्योऽथ सव्रीडं नलोऽथ क्षितिपं प्रति ॥७४३॥

अन्वयः- राजा अवदत् - अमात्य! स्वस्थः भव! ननु इदं नाटकं वर्तते। अथ अमात्यः सव्रीडम् आस्ते। अथनलः क्षितिपं प्रतिब्रूते ॥७४३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- राजा नृपः अवदत् - अवोचत् - अमात्य! स्वस्थः भव। ननु इदं नाटकं वर्तते। अथ नृपस्य वचनं श्रुत्वा अमात्यः मन्त्री व्रीडया सहयथा स्यात् तथा सव्रीडम् आस्ते तिष्ठति। अथ तदनन्तरं नलः क्षितिं पातीति क्षितिपः, तं क्षितिपं राजानं पअति ब्रूते ॥७४३॥

सरलार्थः- ततः नृपः अवदत् - अमात्य! स्वस्थो भव। ननु इदं नाटकमस्ति। अथ अमात्यः सव्रीडम् आस्ते। ततः नलः राजानं वदति ॥७४३॥

ગુજરાતી :- ત્યારે રાજાએ કહ્યું કે, મંત્રી! તું શાંત થા? કેમકે આતો માત્ર નાટક છે. (તે સંભાળી) મંત્રી લજ્જિત બની બેસી ગયો. પછી નલે રાજાને કહ્યું કે, ॥૭૪૩॥

हिन्दी :- तब राजा ने कहा कि, "हे मंत्री! तुम चुप हो जाओ। यह तो एक नाटक है।" यह सुनकर मंत्री लज्जित होकर बैठ गया। फिर नलने राजा से कहा कि, ॥७४३॥

मराठी :- तेव्हा राजा म्हणाला, "हे मंत्री! शांत व्हा कारण हे नाटक आहे. (हे ऐकून) मंत्री लज्जातुर (लाजून) होऊन बसला. नंतर नळ राजाला म्हणाला की, ॥७४३॥

English :- The king then suddenly asked the minister to calm down and relax, as this was only a play. This action of the king made the minister to occupy his seat in shame. Then the king spoke to king Nal.

वने त्यक्तवतोऽप्येतां राजन्! दोषो न नैषधेः ॥
राज्ञोचे तर्हि किं तेषां येऽस्याः पश्यन्ति दुर्दशाम् ॥७४४॥

अन्वयः- हे राजन्! एतां वने त्यक्तवतः अपि नैषधेः दोषः न। राज्ञा ऊचे - तर्हि किं ये अस्याः दुर्दशां पश्यन्ति तेषां दोषः अस्ति ॥७४४॥

P.P. Ac. Gunratnasuri M.S. Jun Gunaradhana Trust

विवरणम्:- हे राजन्! एतां भैमीं वने त्यक्तवतः विसृजतः अपि निषधस्यापत्यं पुमान् नैषधिः, तस्य नैषधेः नलस्य दोषः न अस्ति। तदा राजा ऊचे बभाषे - तर्हि किं ये अस्याः भैम्याः दुष्टा दशा दुर्दशा, तां दुर्दशां दुरवस्थां पश्यन्ति, तेषां दोषः अस्ति? ॥७४४॥

सरलार्थः- राजन्! एतां भैमीं वने त्यक्तवतः अपि नलस्य दोषः नास्ति। तदा राजा अवदत् - तर्हि किं वै अस्याः दुर्दशां पश्यन्ति, तेषां दोषः अस्ति ॥७४४॥

ગુજરાતી :- હે રાજન્ તેણીને વનમાં તજનારા નલરાજાનો કંઈ દોષ નથી. ત્યારે રાજાએ કહ્યું કે, ત્યારે શું તેઓનો દોષ છે કે જેઓ તેણીની દુર્દશા નજરે જુએ છે. ॥૭૪૪॥

हिन्दी :- "हे राजन्! उसको वन में त्याग करनेवाले नलराजा का कोई दोष नही है।" तब राजाने कहा कि, "तो क्या उनका दोष है, जो उसकी दुर्दशा आँखो से देख रहे हैं?"॥७४४॥

मराठी :- "महाराज! दमयन्तीला वनात सोडणाऱ्या नळराजाचा त्यात काही दोष नाही." तेव्हा राजा म्हणाला, "तर मग काय जे दमयन्तीची दुर्दशा पाहात आहेत. त्यांचा दोष आहे।"॥७४४॥

English :- Then Nal said that it was not the fault of King Nal who has deserted Damyanti. At this the king asked him as to why his feels it was the fault of if not Nal's. Then was it the peoples fault who had seen her miserable plight.

नलोऽवादीन्न किं तेषां लोकपानां न वैरयम् ॥
अकारि कर्मचाण्डालस्तदानीमेव भस्मसात् ॥७४५॥

अन्वयः- नलः अवादीत् - किं तेषां लोकपानाम् अयं दोषः न? यैः एषः कर्मचाण्डालः तदानीमेव भस्मसात् न अकारि ॥७४५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- नलः अवादीत् - अवोचत् - किं तेषां लोकान् पान्तीति लोकपाः तेषां लोकपानां लोकपालानामिन्द्रादीनाम् अयं दोषः न? यैः लोकपालैः एषः कर्मभिः चाण्डालः कर्मचाण्डालः चाण्डालवत् क्रूरकर्मकारी नलः तदानीमेव तस्मिन् एव समये भस्मनः अधीनं भस्मसात् (तदधीने सात्) न अकारि न अक्रियता (नृपः लोकपालानामंहीः जायते इति कथ्यते। अतः यदि नृपः क्रूरकर्म कुर्यात् तर्हि लोकपालैः एव सः दण्डयितव्यः। यस्मात् लोकपालैः स न दण्डितः तस्मात् स तेषा दोषः किं नास्ति? इति भावः।) ॥७४५॥

सरलार्थः- नलः अवदत् - यैः लोकपालैः एषः कर्मचाण्हालः तदानीमेव भस्मसात् न अकारि। तेषां लोकपालानामेषः दोषः न किम्?॥७४५॥

ગુજરાતી :- ત્યારે નલ બોલ્યો કે, તે લોકપાલોનો કેમ દોષ ન કહેવાય કે જેઓએ તે કર્મચાંડાલ નલને તે જ વખતે ભસ્મીભૂત ન કર્યો.॥७४५॥

हिन्दी :- तब नल कहता है कि, "उन लोकपालों का क्या दोष नहीं है, जिन्हों ने उस कर्मचांडाल नल को उसी क्षण भस्मसात् न कर दिया॥ ॥७४५॥

मराठी :- तेव्हा नळ म्हणाला की, ज्या लोकपालांनी चांडाळाप्रमाणे क्रूर कर्म करणाऱ्या त्या नलराजाला त्याच वेळी भस्म केले नाही. काय त्या लोकपालांचा काहींच दोष नाही?"॥७४५॥

English :- Nal then replied that it was the fault of those innocent Lokpals, who had spared Nal, by not burning him aline who had done, such a scavengerous deed.

राजा सरोषमाचख्यौ वृथा हुण्डिक लोकपान् ॥
त्वमुपालभसे यत्ते न पश्यन्त्यपि पापिनम् ॥७४६॥

अन्वयः- राजा सरोषम् आचख्यौ - हुण्डिका त्वं लोकपान् वृथा उपालभसे। यत् ते पापिनं न पश्यन्ति अपि ॥७४६॥

विवरणम्:- *राजा नृपः रोषेण सह यथा स्यात् तथा सरोषं सक्रोधम् आचख्यौ कथयामास - हुण्डिक! त्वं लोकान् पान्तीति लोकपाः तान् लोकपान् लोकपालान् वृथा उपालभसे निन्दसि। यत् यतः ते लोकपालाः पापम् अस्यास्तीति पापी तं पापिनं पापकारिणं न पश्यन्ति एव। (अपिः एवार्थे) ॥७४६॥*

सरलार्थः- नृपः सरोषम् अकथयत् - हुण्डिक! त्वं लोकपालान् वृथा उपालभसे। यतः ते लोकपालः पापिनं न पश्यन्त्येव ॥७४६॥

गुजराती :- ત્યારે રાજાએ કોપથી કહ્યું કે, અરે! હુંડિક તું લોકપાલને નાહક ઠપકો આપે છે, કેમ કે તેઓ પાપીની સામું પણ જોતા નથી. ॥७४६॥

हिन्दी :- तब राजा ने क्रोधित होकर कहा कि, "अरे हुंडिक! तूं लोकपाल को व्यर्थ ही दोष दे रहा है, क्यों कि वे तो पापी के सामने देखते भी नहीं हैं।"॥७४६॥

मराठी :- तेव्हा राजा क्रोधानी म्हणाला, "अरे! हुडिंका तू लोकपालांना काही कारण नसतांना ठपका (दोष) देत आहेस कारण ते तर पापी माणसाकडे पाहातसुध्दा नाहीत."॥७४६॥

English :- The King than said to Hundick that it cannot be the fault of the Lokpals as they dont even see the faces of sinners.

पिङ्गलः सास्रमार्येऽसौ न पापीयान् पतिस्तव ॥
किन्त्वेषां ते प्रतिच्छाया दमयन्ती ततोऽवदत् ॥७४७॥

अन्वयः- पिङ्गलः सास्रमाह - आर्ये! असौ तव पापीयान् पतिः न। किन्तु एषा ते प्रतिच्छाया अस्ति। ततः दमयन्ती अवदत् ॥७४७॥

विवरणम्:- *पिङ्गलः आसेण अश्रुसमूहेन सह सास्रमाह ब्रवीति - आर्ये! असौ तव अतिशयेन पापः पापीयान् पतिः न अस्ति। किन्तु एषा ते तव प्रतिच्छाया अस्ति। तदा दमयन्ती अवदत् ॥७४७॥*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- पिङ्गलः सास्रम् अवदत् - आर्ये! असौ तव पापीयान् पतिः न अस्ति । किन्तु एषा तव प्रतिच्छाया वर्तते । तदा दमयन्ती अवदत् ॥७४७॥

ગુજરાતી :- પછી પિંગલે આંસુઓ સહિત કહ્યું કે, હે આર્યે! આ તારો પાપી પતિ નથી, પરંતુ તે તારો પડછાયો છે, ત્યારે દમયંતી બોલી કે,॥७४७॥

हिन्दी :- फिर पिंगल आंसुसहित कहता है कि, "हे आर्ये! यह तेरा पापी पति नही है, बल्कि यह तो तेरी परछांइ है।" तब दमयंती कहती है कि, ॥७४७॥

मराठी :- नंतर पिंगल डोळयात अश्रू आणून म्हणाला, "हे आर्ये! हा तुझा पापी पति नाही, परंतु ही तुझी सावली आहे," तेव्हा दमयंती म्हणाली.॥७४७॥

English :- Then Pingal, with tears in his eyes, said to Damyanti that it was only her shadow and not her husband who is a sinner of the last order.

आर्यच्छायैव किं मे सा वार्यपुत्रः पुनर्नहि ॥
सत्यं त्यक्तैव तर्ह्यस्मि स्वमलोक्य ततोऽभ्यधात् ॥७४८॥

अन्वयः- आर्य! किं सा मे छाया एव वर्तते । आर्यपुत्रः पुनः न अस्ति । तर्हि सत्यं त्यक्ता एव अस्मि। ततः स्वमालोक्य अभ्यधात् ॥७४८॥

विवरणम्:- आर्य! किं सा मे-मम छाया एव वर्तते। आर्यपुत्रः नास्ति । तर्हि सत्यम् अहं त्यक्ता एव अस्मि । ततः स्वम् आलोक्य पृष्ट्वा दमयन्ती अभ्यधात् अवादीत् ॥७४८॥

सरलार्थः- आर्य! किं सा मे छाया एव वर्तते । आर्यपुत्रः नास्ति । तर्हि अहं त्यक्ता एव अस्मि । ततः स्वम् आलोक्य दमयन्ती अवदत् ॥७४८॥

ગુજરાતી :- હે આર્ય! શું આ મારો પડછાયો જ છે, આર્યપુત્ર નથી? ત્યારે ખરેખર તેમણે મને તજી દીધી છે. પછી પોતાને જોઈને તેણે કહ્યું કે,॥૭૪૮॥

हिन्दी :- "हे आर्य! क्या यह मेरी परछांई है? आर्यपुत्र नहीं है! तब तो सचमुच ही उन्होंने मुझे त्याग दिया है।" फिर स्वयं को देखकर कहती है कि,॥७४८॥

मराठी :- "हे आर्य! काय ही माझी सावलीच आहे? आणि आर्यपुत्र नाही? तर मग खरोखर त्यांनी मला सोडून दिले आहे." मग स्वत:ला पाहून ती म्हणाली ॥७४८॥

English :- Then she says that Nal had actually abandoned her, when she understood that it was her own shadow's reflection and not Nal.

विहारः क्रियतां हार मा पुष्पापीड पीडय ॥
नलं विना हि शृङ्गरः सर्वोऽप्यङ्गखन्मम ॥७४९॥

अन्वयः- हार! विहारः क्रियताम्। पुष्पापीड मा पीडय। तथाहि नलं विना मम सर्वः अपि शृङ्गरः अङ्गखत् अस्ति ॥७४९॥

विवरणम्:- हे हार! त्वया विहारः क्रियताम् त्वं विहारं कुरुष्व। दूरमपसर। हे पुष्पपीड! हे धम्मिलपुष्पभूषण! मा पीडय। मां मा तुद। तथाहि-नलं विना नलात् ऋते मम सर्वः अपि शृङ्गरः अङ्गरिण तुल्यः अङ्गरवत् दाहकः अस्ति ॥७४९॥

सरलार्थः- हे हार! दूरमपसर। हे पुष्पापीड! मां मा पीडय। तथाहि-नलं विना मम सर्वः अपि शृङ्गरः अङ्गारवत् दाहकः अस्ति॥७४९॥

ગુજરાતી :- અરે હાર! તું ચાલ્યો જા અને હે પુષ્પવેણી! તુ મને પીડ નહીં. નલ વિના આ સઘળો શૃંગાર મારે મન અંગારા સમાન જ છે.॥૭૪૯॥

हिन्दी :- "अरे हार! तू चला जा और हे पुष्पवेणी तू भी मुझे पीडा न दे! नल के बिना यह श्रृंगार मेरे लिए अग्नि के समान दाहक है।"॥७४९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- "अरे हारा! तू चालता हो! हे पुष्पवेणी! तू पण मला पीडा देऊ नकोस! नलावाचून हा सगळा शृंगार मला निश्चयाने अंगारासमान (विस्तवासमान) आहे."॥७४९॥

English :- She then askes the necklace to leave her and also askes her braid of flowers to stop troubling her as this adornment is like a fire scorching her, without Nal.

राजोचे सहसोत्थाय पतिव्रते पतिव्रते ॥
प्राणयेऽविशरारुणि प्रेमाणीह शरीरिणाम् ॥७५०॥

अन्वयः- राजा सहसा उत्थाय ऊचे । पतिव्रते! वतिव्रते! अहम् इह शरीरिणाम् अविशरारुणि प्रेमाणि प्राणये ॥७५०॥

विवरणम्:- *राजा नृपः सहसा अकस्मात् एव उत्थाय ऊचे-बभाषे-पतिरेव व्रतं यस्याः सा पतिव्रता, तत्सम्बुद्धौ हे पतिव्रते! हे पतिव्रते! अहम् इह अस्मिन् जगति शरीरमेषामस्तीति शरीरिणः तेषां शरीरिणां प्राणिनांन विशरारुणि भङ्गुराणि अविशरारुणि अभङ्गुराणि प्रेमाणि प्राणये प्रशंसामि ॥७५०॥*

सरलार्थः- नृपः सहसा उत्थाय बभाषे - हे पतिव्रते! अहम् अस्मिन् प्राणिनामभङ्गुराणि प्रेमाणि प्रशंसामि ॥७५०॥

ગુજરાતી :- ત્યારે રાજા એકદમ ઊઠીને કહેવા લાગ્યો કે, હે પતિવ્રતે! હે પતિવ્રતે! હું આ જગતમાં પ્રાણીઓના અવિચલ પ્રેમની પ્રશંસા કરું છું.॥७५०॥

हिन्दी :- तब राजा एकदम खडे होकर कहने लगा कि, "हे पतिव्रते! हे पतिव्रते! मैं इस संसार में प्राणियों के अविचल प्रेम की प्रशंसा करता हूं।"॥७५०॥

मराठी :- तेव्हा राजा एकदम (अचानक) उठून म्हणाला कि, "हे पतिव्रते! हे पतिव्रते! मी या जगात प्राण्यांच्या अविचल प्रेमाची प्रशंसा करीत आहे."॥७५०॥

English :- Then the king stood up atonce and said to the chaste woman that he wishes to extol the unserving love of all the living-beings of this earth.

विशेषतस्तु ते पत्युरन्वेष्यालममुं ततः ॥
उपेह्यत्र त्वमस्माकं तुसा माताऽथ देवता ॥७५१॥

अन्वयः- विशेषतः ते पत्युः प्रेम प्रशंसामि। ततः अमुम् अन्वेष्य अलम्। त्वम् अत्र उपेहि। त्वम् अस्माकं सुता आत्मजा, माता अथ देवता असि ॥७५१॥

विवरणम्:- *विशेषतः ते तव पत्युः पतिविषयकं प्रेम प्रशंसामि। ततः अमुं नलम् अन्वेष्य गवेषयित्वा अलम्। अतःपरं नलस्यान्वेषणं मा कुरु। त्वम् अत्र उपेहि आगच्छ। त्वम् अस्माकं पुत्री, माता अथ देवता असि ॥७५१॥*

सरलार्थः- विशेषतः तव पत्यौ वर्तमानं प्रेम अहं प्रशंसामि। अतः परं नलम् अन्वेष्य अलम्। त्वमत्र उपेहि। त्वमस्माकं पुत्री माता अथ देवता असि ॥७५१॥

गुजराती :- હવે વધારે વખત તારા પતિની શોધ કરવાથી સર્યું, માટે તું અહીં આવ. તું અમારી પુત્રી, માતા તથા દેવતા છે.॥७५१॥

हिन्दी :- "अब तेरे स्वामी की खोज करना समाप्त कर। इसलिये तू यहाँ आ। तू हमारी पुत्री, माता और देवता है।"

मराठी :- मी तुझ्या पतीवर असलेल्या प्रेमाची विशेष प्रशंसा करतो. यापुढे नलराजाचा शोध करणे बंद कर. तू येथे ये. तू आमची पुत्री, माता व देवता आहेस.''॥७५१॥

English :- He continued saying that, she should cease her quest for Nal and come to him as she is like a daughter, a mother and a God to him.

सपर्णः स्माह किं देवा व्यामोहोऽयं पुनः पुनः ॥
ननु देवाय विज्ञप्तमियं नटबिभीषिका ॥७५२॥

अन्वयः- सपर्णः आह स्म - देव! किम् अथं पुनः पुनः व्यामोहः। ननु देवाय विज्ञप्तम्। इथयं नटबिभीषिका अस्ति ॥७५२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *सपर्णः आह स्म अब्रवीत् - देव! किं अयं पुनः पुनः व्यामोहः भ्रमः भवति। ननु मया देवाय विज्ञप्तं कथितम् इयं नटानां बीभीषिका नटबिभीषिका नटप्रपञ्चः अस्ति ॥७५२॥*

सरलार्थः- सपर्णः अवदत् - देव! कोऽयं पुनः पुनः व्यामोहः। मया देवाय विज्ञप्तमस्ति। यद् एषः अखिलः नटानां प्रपञ्चः अस्ति।

गुजराती :- ત્યારે સપર્ણ મંત્રીએ કહ્યું કે, હે દેવ! આ આપને ભ્રાંતિ શાની થાય છે? કેમ કે આપને મેં કહ્યું છે કે આ તો નટલોકોનો તમાશો છે.॥૭૫૨॥

हिन्दी :- तब सपर्ण मंत्री कहता है कि, "हे देव! आपको यह बार-बार भ्रम क्यों हो रहा है? मैंने आप को कहा था कि यह तो नटों का तमाशा है।"॥७५२॥

मराठी :- तेव्हा सपर्ण मंत्री म्हणाला की, "हे देवा! हा तुम्हाला पुन्हा भ्रम का होत आहे? मी तुम्हाला सांगितले आहे की, हे तर नाटक आहे."॥७५२॥

English :- The ministers then asked the king as to why does he have this false notion every now and then that this is a real happening in reality. He adds that he had told him that this was just a play being acted by actors.

तदअलङ्क्रियतां देव, देवेन हरिविष्टरः ॥
राजा सलज्जमास्तेऽथ नलोदध्यौ विषादवान् ॥७५३॥

अन्वयः- तद् देव! देवेन हरिविष्टरः अलङ्क्रियताम्। अथ राजा सलज्जमास्ते। ततः विषादवान् नलः दध्यौ ॥७५३॥

विवरणम्:- *तत् तस्मात् कारणात् हे देव! देवेन महाराजेन हरेः विष्णोः (इन्द्रस्य वा) विष्टरः आसनं हरिविष्टरः विष्णोः आसनं राजसिंहासनम् अलङ्क्रियताम्। (राज्ञः विष्णोरंशत्वात् राजसिंहासनं हरिविष्टरः इति कथितम्।) राजसिंहासने उपविश्यताम् अथवा हरिः सिंहः विष्टरः आसनं हरिविष्टरः सिंहासनमुपविश्यतादस्यात् तथा सलज्जम् आस्ते। उपविशति। ततः विषादः अस्यास्तीति विषादवान् नलः दध्यौ चिन्तयामास॥७५३॥*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- तस्मात् हे देव! भवता राजसिंहासनम् अलङ्क्रियताम्। ततः राजा सलज्जम् उपविशति। ततः विषादवान् नलः अचिन्तयत् ॥७५३॥

ગુજરાતી :- માટે હે સ્વામી ! આપ પાછા સિંહાસન પર બિરાજો. ત્યારે રાજા લજ્જિત થઈ બેસી ગયો, પછી નલરાજા ખેદ પામતો વિચારવા લાગ્યો કે, ॥૭૫૩॥

हिन्दी :- "इसलिये हे स्वामी आप फिर सिंहासन पर बीराजो?" तब राजा लज्जातुर होकर बैठ गया, फिर नलराजा खेद से विचार करने लगा कि, ॥७५३॥

मराठी :- "म्हणून हे स्वामी तुम्ही पुन्हा सिंहासनावर बसा?" तेव्हा राजा लज्जातुर होऊन बसला, नंतर नलराजा दुःखी होऊन विचार करू लागला,॥७५३॥

English :- So he askes the king to take his seat on his throne. At this the king sat down feeling ashamed. Then king Nal, who was overcome with dolour and gloom, began to wonder.

पृथ्वि प्रसीद! पातालयायिनं विवरं दिश ॥
फणीन्द्रविषमूर्च्छालो न किञ्चिच्चेतये यथा ॥७५४॥

अन्वयः- हे पृथ्वि! प्रसीद! पातालयायिनं विवरं दिश। यथा फणीन्द्रविषमूर्च्छालः किञ्चित् न चेतये ॥७५४॥

विवरणम्:- हे पृथ्वि! मयि प्रसीद कृपां कुरु। पातालं यातीत्येवं शीलः पातालयायी, तं पातालयायिनं रसातलगामिनं विवरं बिलं मार्गं दिश दर्शय। यथा फणिनामिन्द्रः फणीन्द्रः शेषनागः। फणीन्द्रस्य विषंगरलं फणीन्द्रविषम्। फणीन्द्रविषेण मूर्च्छालः फणीन्द्रविषमूर्च्छालः शेषनागगरलमूर्च्छितः न किञ्चित् चेतये॥७५४॥

सरलार्थः- हे पृथ्वि! मयि प्रसीद। पातालगामिनं मार्गं दर्शय। येन शेषनागविषेण मूर्च्छायुक्तः अहं किञ्चिदपि न चेतये ॥७५४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- હે પૃથ્વી! મારા પર તુ કૃપા કર અને મને પાતાલમાં પેસી જવાને માર્ગ બતાવ કે જેથી શેષનાગના ઝેરથી મૂર્છિત થઈ ચેતનાવિહિન બની જાઉં. ॥૭૫૪॥

हिन्दी :- "हे पृथ्वी! तुम मुझपर कृपा करो! मुझे पाताल में जाने का मार्ग बताओ! जिससे शेष्नाग के जहर से मूर्छित होकर मैं जरा भी चेतनावाला न रहूं!"॥७५४॥

मराठी :- "हे पृथ्वी! माझ्यावर कृपा कर? आणि मला पाताळात जाण्याचा मार्ग दाखव की, ज्यामुळे शेषनागाच्या विषाने बेशुद्ध होऊन मी चेतनारहित होऊन जाईन."॥७५४॥

English :- Nal then begged to the earth to do a favour on him, by showing him the way to hadɔs, where he can loose his conciousenss and never regain it back.

भैमी किञ्चित् परिक्रम्य ही ललाटे तपो रविः॥
न शक्नोमितपे गन्तुमूर्ध्वं वीक्ष्याऽब्रवीत् ततः ॥७५५॥

अन्वयः- भैमी किञ्चित् परिक्रम्य ऊर्ध्वं वीक्ष्य अब्रवीत् - ललाटे तपः रविः। ततः आतपे गन्तुं न शक्नोमि ॥७५५॥

विवरणमः- भीमस्यापत्यं स्त्री भैमी दमयन्ती किञ्चित् परिक्रत्य गत्वा ऊर्ध्वमुच्चैः वीक्ष्य वृष्ट्वा अब्रवीत् - अवोचत् - ललाटे तपतीति तपः रविः सूर्यः। सूर्यः प्रखरेणातपेन ललाटं तपति। ततः तस्मात् अहम् आतपे गन्तुं न शक्नोमि ॥७५५॥

सरलार्थः- दमवन्ती किञ्चित् परिक्रत्य ऊर्ध्वमवलोक्य अब्रवीत् - सूर्यः ललाटं तपति। तेन अहमातपे गन्तुं न शक्नोमि ॥७५५॥

ગુજરાતી :- પછી દમયંતી કંઈક ચાલીને, તથા ઊંચુ જોઈને બોલી કે, અરેરે! લલાટને તપાવે એવો સૂર્ય તપે છે, માટે તડકામાં હું ચાલી શકતી નથી.॥૭૫૫॥

हिन्दी :- फिर दमयंती कुछ दूर चलकर, ऊँचा देखती है और कहती है कि, "अरेरे! ललाट गरम हो जाये ऐसा सुरज तप रहा है, जिससे मैं धूप में नही चल सकती।"॥७५५॥

मराठी :- नंतर दमयंती काही से चालून आणि उंच पाहून म्हणाली की ''अरेरे! सूर्य डोक्यावर तापत आहे. म्हणून मी उन्हात चालू शकत नाही.''॥७५५॥

English :- Then Damyanti walked a little ahead and said looking high that the heat of the sun, which has made her forehead scorched with heat has made it difficult for her to walk ahead.

हा किं दहसि मां सूर्य देहदाहकरैः करैः ॥
नैषधिश्चेदकारुण्यस्ततस्त्वमपि किं तथा ॥७५६॥

अन्वयः- हा हे सूर्य! त्वं मां देहदाहकरैः करैः किं दहसि। नैषधिः अकारुण्यः चेत् ततः त्वमपि तथा अकारुण्यः किम् ॥७५६॥

विवरणम्:- हा हे सूर्य! त्वं मां देहस्य दाहः देहदाहः। देहदाहं कुर्वन्तीति देहदाहकराः, तैः देहदाहकरैः देहं ज्वलयद्भिः करैः किरणैः किं दहसि किं ज्वलयसि? निषधस्य अपत्यं पुमान् नैषधिः नलः करुणस्य भावः कारुण्यम्। न विद्यते कारुण्यं यस्य सः अकारुण्यः निर्दयः कठोरः चेत् ततः त्वमपि तथा अकारुण्यः कठोर किं भवसि? ॥७५६॥

सरलार्थः- हे सूर्य! त्वं देहदाहकरैः किरणैः मां किं दहसि? नैषधिः नलः यद्यपि अकरुणः कठोरः अस्ति तथापि त्वमपि तथा अकरुण्यः किं भवसि ॥७५६॥

ગુજરાતી :- હે સૂર્ય! તારા કિરણો વડે મને તું કેમ બાળે છે, નલરાજા દયાહીન થયા, તેથી શું તુ પણ તેવો થયો? ॥७५६॥

हिन्दी :- ''हे सूर्य! शरीर को जलानेवाली किरणों द्वारा तू मुझे क्यों जला रहा है। जिसप्रकार नलराजा दयाहीन हो गये इसलिये क्या तू भी वैसा दयाहीन हो गया है।''॥७५६॥

मराठी :- ''हे सूर्या! शरीराला जाळणाऱ्या किरणांनी तू मला का जाळत आहे? जरी नळराजा दयाहीन झाला तरी तू पण तसा दयाहीन (निर्दय) का होतोस?''॥७५६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Damyanti asked the sun, as to why it intends to burn her alive with its rays that are capable to burn a person alive. She asks him, if he too has become heartless, as King Nal.

राज्ञोचे रभसाद् भैमी हे स्त्रीरत्न पतिव्रते ।।
तस्य पापीयसः पत्युर्मा मा नामाऽग्रहीर्मुहुः ।।७५७।।

अन्वयः- राज्ञा रभसात् भैमी ऊचे - हे स्त्रीरत्न! पतिव्रते! त्वं तस्य पापीयसः पत्युः नाम मुहुः मा ग्रहीः ।।७५७।।

विवरणम्:- राज्ञा नृपेण रभसात् भीमस्यापत्यं स्त्री भैमी दमयन्ती ऊचे बभाषे - हे स्त्रीणां रत्न स्त्रीरत्न! पतिः एव व्रतं यस्याः सा पतिव्रता तत्सम्बुद्धौ हे पतिव्रते! त्वं तस्य अतिशयेन पापः पापीयान्, तस्य पापीयसः पत्युः नलस्य नाम मुहुः वारंवारं मा मा ग्रहीः मा गृहाण ।।७५७।।

सरलार्थः- नृपः रभसात् दमयन्तीमवोचत् - हे स्त्रीरत्न पतिव्रते! त्वं तस्य पापीयसः पत्युः नाम पुनः पुनः मा गृहाण ।।७५७।।

ગુજરાતી :- પછી રાજાએ એકદમ દમયંતીને કહ્યું કે, હે સ્ત્રીરત્ન! હે પતિવ્રતે! તુ તારા પાપી પતિનું વારંવાર નામ ગ્રહણ ન કર. ।।૭૫૭।।

हिन्दी :- फिर राजा ने अचानक दमयंती से कहा कि, "हे स्त्रीरत्न! हे पतिव्रता! तू अपने पापी पति का नाम बारबार मत ग्रहण कर।"।।७५७।।

मराठी :- नंतर राजाने एकदम दमयंतीला म्हटले की, "हे स्त्रीरत्न! हे पतिव्रते! तुझ्या पापी पतीचे नांव तू वारंवार घेऊ नकोस."।।७५७।।

English :- The King suddenly asked Damyanti, by addressing her as a gem amonst woman and a chaste woman, that she should'nt mention the name of Nal, who is a sinner, every now and then.

तन्नाम श्रवणाद्येन वयं पर्षत्कुशीलवाः ॥
हुण्डिकश्चैष पापेन लिप्यन्ते सर्व एव हि ॥७५८॥

अन्वयः- येन तन्नामश्रवणात्त वयं पर्षत् कुशीलवाः एषः हुण्डिकः च सर्व एव पापेन लिप्यन्ते ॥७५८॥

विवरणम्:- येन तस्य नाम तन्नामा तन्नाम्नः श्रवणं तन्नमश्रवणं तस्मात् तन्नामश्रवणात् नलनामश्रवणात् वयं पर्षत् - सभा, कुशीलवाः नटाः, एषः हुण्डिकः च सर्वे एव पापेन लिप्यन्ते ॥७५८॥

सरलार्थः- यतः तस्य नलस्य नामश्रवणात् वयं, पर्षत्, कुशीलवाः (नटाः) एषः हुण्डिकः च सर्वे एव पापेन लिप्यन्ते पापयुक्ताः भवन्ति ॥७५८॥

ગુજરાતી :- કેમ કે તેનું નામ સાંભળવાથી, અમો આ પર્ષદા, કુશીલવ તથા આ હુંડિક, એમ સઘળા ખરેખર પાપથી ખરડાઈએ છીએ. ॥७५८॥

हिन्दी :- "क्यों कि, उसका नाम सुनकर हम पर्षदा, कुशीलव, और यह हुंडिकल, सब सचमुच पाप से लिप्त हो जाते हैं।"॥७५८॥

मराठी :- कारण त्या नलाचे नाव ऐकल्याने ही सभा, कुशीलव (नट) आणि हा हुंडिक, अशा सर्वांना खरोखर पाप लागते. ॥७५८॥

English :- Then addressing Hundick, the king said that hearing the name of Nal, he becomes a cruel-hearted person and an actor, as they all feel that they have been smeared with his sins.

नलः सरोषं किमिदमज्ञातं वक्ति भूपतिः ॥
महाक्रूरः नलः सोऽस्मि यो देवीमत्यजत्तदा ॥७५९॥

अन्वयः- तदा नलः सरोषमवदत् - भूपतिः इदम् अज्ञातं किं वक्ति? सः महाक्रूरः नलः अहमस्मि। यः तदा देवीम् अत्यजत् ॥७५९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- तदा नलः रोषेण सह यथा स्यात् तथा सरोषम् अवतद् - भुवः पतिः भूपतिः नृपः इदम् न ज्ञातम् अज्ञातं किं वक्ति? किं ब्रवीति? सः महान् चासौ क्रूरश्च महाक्रूरः नलः अहम् अस्मि यः नलः तदा देवीम् भैमीम् अत्यजत् ॥७५९॥

सरलार्थः- तदा नलः सरोषमाह - नृपः इदमज्ञातं किं वक्ति? तदा यः देवीं दमयन्तीम् अत्यजत् सः नलः अहम् अस्मि ॥७५९॥

ગુજરાતી :- ત્યારે નલે કોપ સહિત કહ્યું કે, આ અજ્ઞાનવાળું રાજા શું કહે છે? તે મહાદુષ્ટ નલ હું જ છું, કે જેણે તે વખતે દમયંતીને તજી હતી.॥७५९॥

हिन्दी :- तब नल क्रोधित होकर कहता है कि, "यह अज्ञानी राजा क्या कह रहा है? वह महादुष्ट नल मैं ही हूँ। जिसने उस समय दमयंती को त्याग दिया था।"॥७५९॥

मराठी :- तेव्हा नल क्रोधाने म्हणाला, "हा अज्ञानी राजा हे काय म्हणतो आहे? तो महादुष्ट नल मीच आहे. ज्याने त्या वेळेस दमयंतीला सोडून दिले."॥७५९॥

English :- This made Nal wild with rage and he said that this sensdess king does not know what he is saying. He then reveals that he is the same, cruel of the fruelest, Nal who had abandoned his Damyanti.

राजोचे सम्भ्रमात् कस्त्वमध्यासीत् स्वगतं नलः ॥
कथं विषादमूर्च्छालेनात्मा प्रकटितो मया ॥७६०॥

अन्वयः- राजा सम्भ्रमात् ऊचे - त्वं कः असि? तदा नलः स्वगतम् अध्यासीत् - विषादमूर्च्छालेन मया आत्मा कथं प्रकटितः ॥७६०॥

विवरणम्:- राजा भूपः सम्भ्रमात् ऊचे बभाषे - त्वं कः असि? तदा नलः स्वगतं मनसि अध्यासीत् अचिन्तयत् - विषादेन दुःखेनः मूर्च्छालः मूर्च्छावान्, तेन विषादमूर्च्छालेन दुःखेन मूर्च्छावता मया आत्मा कथं प्रकटितः प्रकाशितः ॥७६०॥

सरलार्थः- राजा सम्भ्रमात् अवदत् - त्वं कः असि? तदा नलः स्वगतम् अचिन्तयत् - विषादमूर्च्छालेन मया आत्मा कथं प्रकटितः?॥७६०॥

ગુજરાતી :- રાજાએ સંભ્રમથી કહ્યું કે, તુ કોણ છે? ત્યારે નલ પોતાના મનમાં વિચારવા લાગ્યો કે, અરે! શોકમાં મૂર્છિત થયેલા એવા મેં મારા આત્માને કેમ પ્રગટ કર્યો?॥७६०॥

हिन्दी :- तब राजा ने भ्रमित होकर कहा कि, "तू कौन है?" तब नल अपने मन में विचार करने लगा कि, "अरे! शोक-मग्न होकर मैंने अपनी आत्मा को प्रगट क्यों किया?"॥७६०॥

मराठी :- तेव्हा राजा संभ्रमाने म्हणाला की, "तू कोण आहेस?" तेव्हा नल स्वत:च्या मनात विचार करू लागला की, "अरे! शोकाने मूर्च्छित होऊन मी, स्वत:ला कसे बरे प्रकट केले?"॥७६०॥

English :- At this the king, who was overcome with doubts regarding. Hundick, asked Hundick to place his identity. Then Nal began to repent for having disclosed his actual self.

अस्तु प्रकाशमूचे सः सूपकारोऽस्मि हुण्डिकः ॥
राजावोचत्ततः किं भो नलोऽस्मीत्युक्तवानसि ॥७६१॥

अन्वयः- अस्तु। सः प्रकाशम् ऊचे - अहं हुण्डिकः सूपकारः अस्मि। ततः राजा अवोचत् - तर्हि अहं नलः अस्मि इति किम् उक्तवान् असि॥७६१॥

विवरणम्:- अस्तु भवतु। सः प्रकाशं स्पष्टम् ऊचे बभाषे - अहं हुण्डिकः नाम सूपं करोतीति सूपकारः सूदः अस्मि। ततः राजा अवोचत् - तर्हि अहं नलः अस्मि इति किं किमर्थम् उक्तवान् असि?॥७६१॥

सरलार्थः- अस्तु। सः प्रकाशम् अवदत् - अहं हुण्डिकः नाम सूपकारः अस्मि। तदा नृपः अवोचत् - तर्हि अहं नलः अस्मि, इति किमर्थम् उक्तवानसि॥७६१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ઠીક છે, એમ કહી પછી તેણે જાહેરમાં કહ્યું કે, હું તો હુંડિક નામનો રસોઈયો છું, ત્યારે રાજાએ કહ્યું કે, અરે! ત્યારે હું નલ છું, એમ તેં કેમ કહ્યું? ॥૭૬૧॥

हिन्दी :- "ठीक है।" ऐसा विचार कर फिर उसने स्पष्ट किया कि, "मैं तो हुंडिक नामक रसोईया हूँ।" तब राजा ने कहा कि, "अरे! तब मैं नल हूँ, ऐसा तुने क्यों कहा?"॥७६१॥

मराठी :- "ठीक आहे?" असे म्हणून तो प्रकटपणे म्हणाला, "मी तर हुंडिक नावाचा स्वयंपाकी आह." तेव्हा राजा म्हणाला की, अरे! तेव्हा मी नल आहे असे तू कां म्हटले?"॥७६१॥

English :- Nal replied that he was a cook named Hundick. At this the King asked him, as to why he had said earlier that he was king Nal himself.

नलोऽवदन्मयेत्युक्तमुतानुक्तेऽपि भूभुजा ॥
एवं नाट्यरसावेशादश्रावीत्यत्र संशयः ॥७६२॥

अन्वयः- नलः अवदत् - मया इति उक्तमुत अनुक्तेऽपि भूभुजा नाट्यरसावेशात् एवम् अश्रावि। इति अत्र संशयः ॥७६२॥

विवरणम्:- नलः अवदत् - मया इति न उक्तम् अनुक्तम्, तस्मिन् अनुक्ते अपि उक्तम् इति भूभुजा नृपेण नाट्यस्य रसः नाट्यरसः। नाट्यरसस्य आवेशः नाट्यरसावेशः तस्मात् नाट्यरसावेशात् अश्रावि अश्रूयत। अतः अत्र संशयः अस्ति ॥७६२॥

सरलार्थः- नलः अवदत् - मया इति अनुक्तेऽपि उक्तम् इति नृपेण नाट्यरसावेशात् अश्रूयत। अतः अत्र संशयः अस्ति ॥७६२॥

ગુજરાતી :- ત્યારે નલે કહ્યું કે, મેં તેમ ન કહ્યા છતાં પણ, મેં તેમ કહ્યું, એમ નાટ્યરસના આવેશથી રાજાએ સાંભળ્યુ લાગે છે, અને તેથી તેને તેમાં શંકા થયેલી છે.॥૭૬૨॥

हिन्दी :- तब नल ने कहा कि, "मैंने वैसा न कहते हुए भी मैंने वैसा कहा, ऐसा नाट्यरस के आवेश से राजाने सुना हो, ऐसा लगता है, और इस लिये इस में उन्हे शंका हुई है।"॥७६२॥

मराठी :- तेव्हा नल म्हणाला की, ''मी तसे बोललो अथवा न बोलता सुद्धा राजाने नाट्यरसाच्या आवेशात तसे ऐकले याबद्दल संशय आहे.''॥७६२॥

English :- Nal replied that he did not say what he actually meant to say. He adds that the King had taken the literal of the statement due to the dramatical exitement. So seeds of doubts had been sown.

राजोचेऽस्मि ध्रुवं भ्रान्तोऽन्यथा मूर्त इव स्मरः ॥
क्व नरेन्द्रो नलः क्वैष सर्वाङ्गविकृताकृतिः ॥७६३॥

अन्वयः- राजा ऊचे - ध्रुवमहं भ्रान्तः अस्मि। अन्यथा मूर्तः स्मरः इव नरेन्द्रः नलः क्व? एषः सर्वाङ्ग विकृताकृतिः हुण्डिकः क्व? ॥७६३॥

विवरणम्:- नृपः बभाषे - ध्रुवं निश्चितम् अहं भ्रान्तः अस्मि। अन्यथा मूर्तः मूर्तिमान् स्मरः मदनः इव नरेन्द्रः नलः क्व! एषः सर्वाणि च तानि अङ्गनि च सर्वाङ्गेषु विकृता आकृतिः यस्य सः सर्वाङ्गविकृताकृतिः हुण्डिकः क्व! उभयोः समुद्रपल्वलयोरिव अन्तरमस्ति ॥७६३॥

सरलार्थः- नृपः अवोचत् - नूनमहं भ्रान्तः अस्मि। नो चेत् मूर्तः मदनः इव राजा नलः क्व! सर्वाङ्गविकृताकृतिः कुरुपः हुण्डिकः क्व! ॥७६३॥

ગુજરાતી :- ત્યારે રાજાએ કહ્યું કે, ખરેખર મને ભ્રાંતિ જ થઈ છે, કેમ કે જો એમ ન હોય તો મૂર્તિવંત કામદેવ સરખો નલરાજા ક્યાં અને સર્વ શરીરે વિકારવાળી આકૃતિવાળો આ હુંડિક ક્યાં? ॥७६३॥

हिन्दी :- तब राजाने कहा कि, ''सचमुच मुझे भ्रम हुआ है, क्यों कि जो ऐसा न होता तो कहाँ साक्षात कामदेवसमान नलराजा और कहाँ शरीर से कुरूप आकृतिवाला यह हुंडिक।''॥७६३॥

मराठी :- तेव्हा राजा म्हणाला, खरोखर मला भ्रमच झाला आहे, कारण की जर असे नसते तर मूर्तिमंत कामदेवासारखा नलराजा कुठे? आणि सर्व शरीरांनी कुरूप आकृतीचा तो हुंडिक कुठे?॥७६३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then the king replied that for a moment he had tendered the sapling of doubt. Then on the thought of comparision of Nal who is like cupid in all ways and Hundick who is a hunch-back, he shirked it off.

दध्यौ नलोऽथ वीक्ष्यार्कं युगान्तार्को भवार्क मे ॥
स्यामहं भस्मसाद् येन मत्पापं भविताऽन्यथा ॥७६४॥

अन्वयः- अथ अर्कं वीक्ष्य नलः दध्यौ - हे अर्का त्व मे युगान्तार्कः भवा येन अहं भस्मसात् सयाम्। मत्पापम् अन्यथाभविता ॥७६४॥

विवरणम्:- *अथ अनन्तरं अर्कं सूर्यं वीक्ष्य नलः दध्यौ अध्यासीत् - हे अर्क सूर्य! त्व मे ममकृते युगस्य अन्तः युगान्तः प्रलयकालः। युगान्तस्य प्रलयकालस्य अर्कः सूर्यः भव। येन अहं भस्मसात् भस्मीभूतः स्याम्। मम पापं मत्पापम् अन्यथा भविता विनङ्क्ष्यति ॥७६४॥*

सरलार्थः- अथ सूर्यं विलोक्य नलः व्यचिन्तयत् - भो सूर्य! त्वं ममकृते युगान्तस्य सूर्यः भव। येन अहं भस्मीभूतः स्याम् मम पापं च विनङ्क्ष्यति ॥७६४॥

ગુજરાતી :- પછી સૂર્યને જોઈને નલ વિચારવા લાગ્યો કે, હે સૂર્ય! તું મારા પ્રત્યે પ્રલયકાળના સૂર્ય સરખો થા કે જેથી હું ભસ્મીભૂત થાઉં અને મારું પાપ નષ્ટ થાય.॥૭૬૪॥

हिन्दी :- फिर सूर्य को देखकर नल सोचता है कि, "हे सूर्य! तू मेरे लिये प्रलयकाल के सूर्य के समान बन जा, जिससे मैं भस्मीभूत हो जाऊं और मेरे पाप नष्ट हो जाए। ॥७६४॥

मराठी :- नंतर सूर्याला पाहून नलराजा विचार करु लागला की, "हे सूर्या! तू माझ्यासाठी प्रलय काळचा सूर्य हो. त्यामुळे मी भस्मीभूत होऊन जाईन व माझे पाप नष्ट होईल."॥७६४॥

English :- Then Nal looking at the sun asked it to attain the the deadly form that it will be attoining during the period of the final destruction of the universe so that he will be veduced into ashes and his sins will be anhililated.

पिङ्गलोऽथालपद्भद्रे बाधितार्ककरैर्यदि ।।
सहकारनिकुञ्जेऽत्र ततः प्रविश शीतले ।।७६५।।

अन्वयः- अथ पिङ्गलः अलपत् - भद्रे! यदि अर्ककरैः बाधिता। ततः अत्र शीतले सहकारनिकुञ्जे प्रविश ।।७६५।।

विवरणम्:- *अथ अनन्तरं पिङ्गलः अलपत् - भद्रे! यदि अर्कस्य रवेः करैः किरणैः अर्ककरैः रविकिरणैः बाधिता पीडिता सन्त्रस्ता असि। तर्हि अत्र अस्मिन् शीतले शीते सहकाराणामाम्रवृक्षाणां निकुञ्जः सहकार निकुञ्जः तस्मिन् सहकारनिकुञ्जे आम्रवृक्षनिवहे प्रविश ।।७६५।।*

सरलार्थः- अनन्तरं पिङ्गलः आह - भद्रे! यदि त्वं प्रखरैः सूर्यकिरणैः पीडिता असि तर्हि अस्मिन् शीतले आम्रतरुनिकुञ्जे प्रविश्य विश्राम्य ।।७६५।।

ગુજરાતી :- પછી પિંગલે દમયંતીને કહ્યું કે, હે ભદ્રે! જો સૂર્યના કિરણોથી તું પીડિત થાય છે, તો આ આમ્રવૃક્ષોની શીતલ ઝાડીમાં પ્રવેશ કર.।।૭૬૫।।

हिन्दी :- फिर पिंगल ने दमयंती से कहा कि, "हे भद्रे! यदि तुम्हें सूर्य की प्रखर किरणों से कष्ट होता है, तो आम के पेड़ो की शीतल छाया में प्रवेश करो"।।७६५।।

मराठी :- मग पिंगल दमयंतीला म्हणाला, "हे भद्रे! जर सूर्याच्या किरणांनी तू पीडित झाली असशील तर या आम्रवृक्षाच्या शीतल झाडीत प्रवेश करून तू विश्रान्ती घे."।।७६५।।

English :- Then Pingal asked Damyanti to enter the pleasant shade of the mango tree, if the suns rays are tormenting and harrassing her.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पुरो भूत्वाह गान्धार आर्ये इत इतस्ततः ॥
सर्वे क्रामन्ति गान्धारो विलोक्य न्यवृतद्भयात् ॥७६६॥

अन्वयः- ततः गान्धारः पुरः भूत्वा आह - आर्ये! इतः इतः । सर्वे क्रामन्ति । गान्धारः विलोक्य भयात् न्यवृतत् ॥७६६॥

विवरणम्:- ततः गान्धारः पुरः अग्रे भूत्वा आह ब्रवीति - आर्ये! इतः इतः आगच्छ । सर्वे क्रामन्ति चलन्ति । गान्धारः विलोक्य दृष्ट्वा भयात् न्यवृतत् न्यवर्तत ॥७६६॥

सरलार्थः- ततः गान्धारः पुरः भूत्वा वदति - आर्ये! इतः इतः आगच्छ। सर्वे गच्छन्ति । गान्धारः विलोक्यं भयात् न्यवर्तत॥७६६॥

ગુજરાતી :- પછી ગાંધાર આગળ ચાલીને કહેવા લાગ્યો કે હે આર્યે! તમો આ બાજુ આવો? આ બાજુ આવો? પછી સઘળા તે બાજુ જાય છે, એવામાં ગાંધાર ત્યાં જોઈને ભયથી પાછો વળ્યો.॥૭૬૬॥

हिन्दी :- फिर गांधार आगे चलकर कहने लगा कि, "हे आर्ये! तुम इधर आओ! इस ओर आओ!" फिर सब उस ओर आते हैं। इतने में गांधार वहाँ देखकर भय से पीछे हट गया॥ ॥७६६॥

मराठी :- नंतर गांधार पुढे येऊन म्हणाला की, "हे आर्ये! दमयन्ती! इकडून इकडून ये." नंतर सगळे त्या बाजूला जातात. पण गांधार पुढे पाहून भीतीने मागे फिरला.॥७६६॥

English :- Then Ghandar told them to come on to his side. When they go to his side, Ghandar is suddenly overcome with fright and he moves aback.

ऊचे चार्ये निवर्तस्व निवर्तस्व द्रुतं द्रुतम् ॥
क्षुत्क्षामकुक्षिरुत्तालः करालः केसरी पुरः ॥७६७॥

अन्वयः- ऊचे च । आर्ये! द्रुतं निवर्तस्व । द्रुतं निवर्तस्व। पुरः क्षुत्क्षामकुक्षिः उत्तालः करालः केसरी वर्तते ॥७६७॥

विवरणम्:- *ऊचे बभाषे च - आर्ये! द्रुतं शीघ्रं निवर्तस्य द्रुतं निवर्तस्व। पुरः अग्रे क्षुधा क्षामा क्षुत्क्षामा! क्षुत्क्षामा कुक्षिः यस्य सः क्षुत्क्षामकुक्षिः बुभुक्षाकृशोदरः उत्तालः विकरालः, करालः भयङ्करः, केसराः अस्य सन्तीति केसरी सिंहः वर्तते ॥७६७॥*

सरलार्थः- उवाच च - आर्ये! द्रुतं निवर्तस्व। द्रुतं निवर्तस्व। अग्रे क्षुधया कृशोदरः विकरालः भयङ्करः सिंहः वर्तते ॥७६७॥

ગુજરાતી :- અને કહેવા લાગ્યો કે, હે આર્યે! તું તરત પાછી વળ કેમ કે આગળના ભાગમાં ક્ષુધાથી પીડિત ઉદરવાળો, વિકરાળ અને ભયંકર સિંહ છે.॥૭૬૭॥

हिन्दी :- और कहने लगे की, "हे आर्ये! तुम तुरंत पीछे हो जाओ! क्यों कि आगे की ओर क्षुधा से पीडित, विकराल और भयंकर सिंह है।"॥७६७॥

मराठी :- आणि म्हणाला की, "हे आर्ये! तू लवकर परत फिर? कारण की, समोरच भुकेने क्षाम उदराचा विक्राल आणि भयंकर केसरी सिंह बसलेला आहे."॥७६७॥

English :- Ghandar tells the people to move aback as there is a saffron coloured fearful hon, who is rumbling in hunger.

भैमी स्माहार्य मध्येऽस्ति सिंहो दिष्ट्या करिष्यति ॥
नूनं दुःखविमोक्षं मे पिङ्गलो वीक्ष्य नष्टवान् ॥७६८॥

अन्वयः- भैमी आह स्म - आर्य! दिष्ट्या मध्ये सिंहः अस्ति। नूनं सः मे दुःखविमोक्षं करिष्यति। पिङ्गलः वीक्ष्य नष्टवान् ॥७६८॥

विवरणम्:- *भीमस्यापत्यं स्त्री भैमी दमयन्ती आहस्म - आर्य! दिष्ट्या भाग्येन मध्ये अन्तरा सिंहः अस्ति। नूनं निश्चितं सः सिंहः मे मम दुःखात् विमोक्षः दुःखविमोक्षः तं दुःखविमोक्षं करिष्यति। पिङ्गलः सिंह वीक्ष्य अवलोक्य नष्टवान् पलायत ॥७६८॥*

सरलार्थः- भैमी आह - आर्य! मध्ये सिंहः वर्तते एतत्मे भाग्यं वर्तते। ध्रुवं सः मम दुःखात् विमोक्षं करिष्यति। पिङ्गलः तु सिंह दृष्ट्वा पलायत ॥७६८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે દમયંતી બોલી કે, હે આર્ય ઠીક થયું કે અંદર સિંહ છે, કેમ કે તે ખરેખર મને દુઃખથી મુક્ત કરશે. પછી પિંગલ તો તે સિંહને જોઈને નાસી ગયો. ॥૭૬૮॥

हिन्दी :- तब दमयंती कहने लगी कि, "हे आर्य! यह अच्छा हुआ कि अंदर सिंह है, अब वह मुझे सचमुच दुःख-मुक्त करेगा" फिर पिंगल तो उस सिंह को देखकर भाग गया॥७६८॥

मराठी :- तेव्हा दमयंती म्हणाली की, "हे आर्य! बरे झाले की मध्येच सिंह आहे खरोखर आता सिंह मला दुःखातून मुक्त करील." पिंगल तर त्या सिंहाला पाहून पळून गेला. ॥७६८॥

English :- Damyanti says that she is glad that a lion has arrived to make he free from the bondages of dolours. Then Pingal who was overcome with fright took up to hisheels.

भैमी तु तमुपासर्पन्नलो दृष्ट्वा ससम्भ्रमम् ॥
दध्यौ सिंहः कथं देवीं व्यापादयितुमुद्यतः ॥७६९॥

अन्वयः- भैमी तु तम् उपासर्पत् नलः दृष्ट्वा ससम्भ्रमं दध्यौ । कथं सिंहः देवीं व्यापादयितुम् उद्यतः ॥७६९॥

विवरणम्:- भीमस्यापत्यं स्त्री भैमी दमयन्ती तु तं सिंहम् उपासर्वत् । तद् दृष्ट्वा नलः सम्भ्रमेण सह यथा स्यात् तथा ससम्भ्रमं दध्यौ व्यचिन्तयत् - कथं सिंहः देवीं भैमीम् व्यापादयितुं हन्तुमुद्यतः व्यवसितः ॥७६९॥

सरलार्थः- किन्तु दमयन्ती तं सिंहम् उपासर्पत् । तद् दृष्ट्वा नलः व्यचिन्तयत्। कथं सिंहः दमयन्तीं व्यापादयितुम् उद्यतः व्यवसितः ॥७६९॥

ગુજરાતી :- દમયંતી તો તે સિંહની સામે ચાલવા લાગી, તે જોઈને નલ ભ્રમ સહિત વિચારવા લાગ્યો કે, અરે! શું આ સિંહ દેવીને મારવાને તૈયાર થયો છે? ॥૭૬૯॥

हिन्दी :- दमयंती तो उस सिंह के सामने चलने लगी, यह देखकर नल भ्रमसहित सोचने लगा कि, "अरे! क्या यह सिंह देवी को मारने के लिए तैयार हुआ है?"॥७६९॥

मराठी :- दमवंती त्वा सिंहाच्या समोर चाल् लागली, हे पाहून नल संभ्रम सहित विचार करू लागला की, "अरे! काय हा सिंह देवीला मारण्यासाठी तयार झाला आहे?"॥७६९॥

English :- Damyanti began to walk towards the lion. This made Nal (who was now confused and perplexed) to think, if the lion has prepared to devour Damyanti.

हा हतोऽस्मि पुनर्दध्यावसौ वीराग्रणीः खलु ॥
साम्नाऽमुं तन्निषेधामीत्युत्थायासौ तमूचिवान् ॥७७०॥

अन्वयः- हा हतः अस्मि। पुनः दध्यौ। असौ वीराग्रणीः खलु। तद् अमुं साम्ना विषेधामि। इति उत्थाय असौ तमूचिवान् ॥७७०॥

विवरणम्:- हा! हतः अस्मि! इत्युक्त्वा पुनः दध्यौ चिन्तितवान् - यद् असौ सिंहः वीराणामग्रणीः वीराग्रणीः वीरश्रेष्ठः अस्ति खलु। तत् तस्मात् कारणात् अहम् अमुं सिंहं साम्ना सामोपचारेण निषेधामि। इति विचिन्त्य उत्थाय असौ नलः तं सिंहम् उचिवान् उवाच ॥७७०॥

सरलार्थः- हा! हतः अस्मि। इत्युक्त्वा नलः पुनः दध्यौ। असौ सिंहः वीराग्रणीः वर्तते। अतः अहममुं सिंहं सामोपचारेण निषेधामि। इति विचिन्त्य उत्थाय असौ नलः तं सिंहम् उवाच ॥७७०॥

ગુજરાતી :- અરે! હું તો હણાઈ ગયો! (એમ કહી) નલ ફરી વિચારવા લાગ્યો કે આ સિંહ ખરેખર શૂરવીરોમાં અગ્રેસર છે, માટે હું તેને શાંત વચનથી અટકાવું, એમ વિચારી ઊઠીને તે તેને કહેવા લાગ્યો. ॥७७०॥

हिन्दी :- "अरे! मैं तो मारा गया!" ऐसा कहकर नल फिर से विचार करने लगा कि यह सिंह तो सचमुच शूरवीरो में अग्रसर है, इसलिये मै उसे शांत वचन से रोकता हूँ।" ऐसा सोचकर उठकर उसे कहने लगा कि, ॥७७०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- "अरे! ठार झालो मी!" असे म्हणून नल पुन्हा विचार करू लागला की, "हा सिंह खरोखर शूरवीरात अग्रेसर आहे. म्हणून मी त्याला सामोपचाराने अडवितो." असा विचार करून उठून तो त्याला म्हणू लागला ॥७७०॥

English :- Nal began to wonder that this lion was capable enough to devour the brave of the bravest persons. So the only way to stop him is to use peaceful and pleasant words. Having thought thus he stood up and spoke.

एकाकिन्यबला मार्गश्रान्ता क्षामा वियोगिनी ॥
घातेऽस्यास्तव किं सिंह! शौर्यं को वा क्षुधः क्षयः ॥७७१॥

अन्वयः- हे सिंह! एकाकिनी अबला मार्गश्रान्ता क्षामा वियोगिनी अस्ति । अस्याः घाते तव किं शौर्यम्? कः वा क्षुधः क्षयः ॥७७१॥

विवरणम्:- हे सिंह! इयं न विद्यते बलं यस्याः सा अबला निर्बला, मार्गे श्रान्ता परिश्रमेण क्लान्ता, क्षामा कृशा, वियोगः अस्याः अस्तीति वियोगिनी अबला अस्ति। अस्याः घाते विनाशे तव किं शौर्यं शूरत्वम्? कः वा क्षुधः बुभुक्षायाः क्षयः उपशमः स्यात् ॥७७१॥

सरलार्थः- हे सिंह! इयम् अबला, मार्गश्रान्ता, कृशा वियोगिनी च अस्ति । अस्याः स्त्रियः घाते तव किं शौर्यम्? कः वा क्षुधायाः उपशमः स्यात्॥७७१॥

ગુજરાતી :- હે સિંહ! આ તો અબલા એકલી, માર્ગમાં થાકેલી, ક્ષીણ થયેલી, તથા વિયોગિની છે, તેને મારવાથી શું તારું શૂરવીરપણું હણાશે નહિ અથવા શું તારી ભૂખ ભાંગશે? ॥७७१॥

हिन्दी :- "हे सिंह! यह तो अबला, एकाकी, मार्ग में थकी, क्षीण, वियोगिनी है। ऐसी स्त्री को मारने में ही क्या तेरा शौर्य है? अथवा क्या तेरी क्षुधा शांत होगी?"॥७७१॥

मराठी :- ''हे सिंहा! ही तर अबला, एकटी मार्गात थकलेली क्षीण झालेली तसेच वियोगिनी आहे, तिला मारण्यात तुझा कोणता शूरपणा आहे? अथवा काय तुझी भूख शांत होणार आहे?''॥७७१॥

English :- Nal asked the lion if his hunger will be calmed and he will be called as, the courageous, for having killed a woman, who is exausted and enfebled by her solitude and who has been deserted by her beloved husband.

अवलोक्या कथं साम्ना हरिः न विरमत्यसौ ॥
ततस्तं दानयोगेने देवीरक्षार्थमूचिवान् ॥७७२॥

अन्वयः- अवलोक्य कथमसौ हरिः साम्ना न विरमति। ततः तं दानयोगेन देवीरक्षार्थम् ऊचिवान् ॥७७२॥

विवरणम्:- अवलोक्य दृष्ट्वा ववति - कथमसौ हरिः सिंहः साम्ना सामोपचरेण न विरमति। तर्हि तं दानस्य योगः दानयोगः तेन दानयोगेन देव्याः रक्षा देवीरक्षा। देवीरक्षायै इदं देवीरक्षार्थं दमयन्तीरक्षणार्थम् ऊचिवान् उवाच ॥७७२॥

सरलार्थः- अवलोक्य सः नलः वदति - असौ सिंहः सामोपचारेण न विरमति। अतः दानयोगेन तं सिंहं देवीरक्षणार्थं स उवाच ॥७७२॥

ગુજરાતી :- પછી, 'અરે આ સિંહ શાંત વચનથી તો અટકાતો નથી,' એ જોઈ દાનના યોગથી દમયંતીનું રક્ષણ કરવા માટે તેણે કહ્યું- ॥७७२॥

हिन्दी :- फिर देखकर, ''अरे! यह सिंह तो शांत वचन से रुकता ही नही है।'' दानयोग से दमयंती का रक्षण करने के लिये उसे कहता है ॥७७२॥

मराठी :- नंतर पाहून ''अरे हा सिंह सामोपचाराने तर थांबत नाही,'' म्हणून दानाच्या योगाने दमयंतीचे रक्षण करण्यासाठी तो त्याला म्हणाला ॥७७२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- When Nal sees that his pleasant words are not playing the trick, he then speals out, on the pretext to save Damyanti.

हरे तीव्रक्षुधाक्षामः किञ्चित् चेतयसे न चेत् ।।
मुञ्चैतां तर्हि मां भुङ्क्ष्व पतितोऽस्मि तवाग्रतः ।।७७३।।

अन्वयः- हे हरे! तीव्रक्षुधाक्षामः त्वं किञ्चित् न चेतयसे चेत् तर्हि एतां मुञ्च। मां भुङ्क्ष्व। अहं तव अग्रतः पतितः अस्मि ।।७७३।।

विवरणम्:- हे हरे! हे सिंह! तीव्रा चासौ क्षुधा च तीव्रक्षुधा। तीव्रक्षुधया क्षामः तीव्रक्षुधाक्षामः तीव्रतरबुभुक्षाकृशः त्वं किञ्चित् न चेतयसे न विचारयसि तर्हि एताम् अबलां मुञ्च। मां भुङ्क्ष्व भक्षय। अहं तव अग्रतः पुरतः पतितः अस्मि ।।७७३।।

सरलार्थः- हे सिंह! तीव्रतरक्षुधया व्याकुलः त्वं यदि न चेतयसे तर्हि एतामबलां मुञ्च। मां भुङ्क्ष्व। अहं तव पुरतः पतितः अस्मि ।।७७३।।

ગુજરાતી :- હે સિંહ! અત્યંત ક્ષુધાથી ક્ષીણ થયેલા એવા તને જ્યારે કંઈ વિચાર થતો નથી, તો આ દમયંતીને તું છોડી દે અને મારું ભક્ષણ કર ! આ તારી પાસે હું પડ્યો છું. ।।७७३।।

हिन्दी :- "हे सिंह! तीव्र क्षुधा से व्याकुल तुझे जब कुछ भी विचार नही होता है, तो इस दमयंती को छोड दे और मेरा भक्षण कर। मैं तेरे पास ही पडा हूँ।"।।७७३।।

मराठी :- "हे सिंह! अतिशय भुकेने क्षीण झाल्यामुळे तू जर काही विचार करीत नसशील तर तू दमयंतीला सोडून दे व मला खा. हा मी तुझ्यापुढे पडलो आहे."।।७७३।।

English :- He tells the lion that he has no brains to think, when he is captured by hunger, so he asks him to cast away the thought of devouring her and have him instead.

इत्युदित्वा नलो रङ्गभूमौ पतितुमिच्छति ।।
राजोचे सम्भ्रमेणालं नाट्यं हुण्डिक खाल्विदम् ।।७७४।।

अन्वयः- इति उदित्वा नलः रङ्गभूमौ पतितुमिच्छति। राजा ऊचेसम्भ्रेण अलम्। हुण्डिका इदं नाट्यं खलु ।।७७४।।

विवरणम्:- *इति उदित्वा उक्त्वा नलः रङ्गस्य भूमिः रङ्गभूमिः, तस्यां रङ्गभूमौ पतितुमिच्छति पिपतिषति। तदा राजा नृपः ऊचे अभिदधे। सम्भ्रमेण त्वरया अलम्। हे हुण्डिका! इदं नाट्यं वर्तते खलु ।।७७४।।*

सरलार्थः- इत्युक्त्वा नलः रङ्गभूमौ पतितुमिच्छति। तदा राजा ब्रूतेसम्भ्रमेण अलम्। हे हुण्डिका! इदं नाट्यं वर्तते खलु ।।७७४।।

गुजराती :- એમ કહીને નલ રંગભૂમિ પર પડવા ઇચ્છે છે, એવામાં રાજાએ કહ્યું કે હે હુંડિક! સંભ્રમ કરવાથી સર્યું. આ તો નાટક છે.।।७७४।।

हिन्दी :- ऐसा कहकर नल रंगभूमि पर जैसे ही गिरने के लिये तैयार होता है, इतने में राजा कहते है, "हे हुंडिका! अब भ्रमित होना छोड दो, यह तो नाटक है।"।।७७४।।

मराठी :- असे म्हणून नलराजा रंगभूमीवर पहण्याची इच्छा करीत आहे तेवढ्यात राजा त्याला म्हणाला, "हे हुंडिका! घाई करू नकोस. हे तर नाटक आहे."।।७७४।।

English :- As Nal got ready to place himself as a bait instead of Damyanti, the king atonce intervened and said to him to cast away all which as this was only a play being acted.

नलः सलज्जं दध्यौ किं चक्रे शोकादिदं मया ।।
प्रकाशं नृप नन्वेतत्कारुण्यातिशयोर्जितम् ।।७७५।।

अन्वयः- नलः सलज्जं दध्यौ। मया शोकात् इदं किं चक्रे। ततः प्रकाशं ब्रूते - हे नृप! ननु एतत् कारुण्यातिशयोर्जितमस्ति ।।७७५।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- नलः लज्जया सह यथा स्यात् तथा सलज्जं त्रपया दध्यौ चिन्तयामास। मया शोकात् शोकप्रभावात् इदं किं चक्रे विदधे। ततः प्रकाशं ब्रूते - हे नृप! ननु एतत् करुणस्य भावः कारुण्यम्। कारुण्यस्य अतिशयः कारुण्यातिशयः। कारुण्यातिशयस्य ऊर्जितं कारुण्यातिशयोर्जितं करुणारसातिशयस्य प्रभावः अस्ति ॥७७५॥

सरलार्थः- नलः लज्जया व्यचिन्तयत् - मया शोकातिशयात् इदं किं चक्रे । ततः प्रकाशम् अब्रवीत् - हे नृप! ननु एतत् करुणारसातिशयप्रभावात् सञ्जातम् ॥७७५॥

ગુજરાતી :- પછી નલ શરમાઈને વિચારવા લાગ્યો કે, શોકને લીધે મેં આ શું કરી નાખ્યું? પછી તે મુખથી બોલ્યો કે, હે રાજન! આ બનાવ તો ખરેખર કરુણરસના અતિશયપણાથી બનવા પામ્યો.॥૭૭૫॥

हिन्दी :- फिर नल शरमाकर विचार करने लगा कि, "शोक में मैंने यह क्या किया?' फिर वह कहने लगा कि, "हे राजन्! यह घटना तो वास्तव में करुणारस के अतिरेक से बन गई है।"॥७७५॥

मराठी :- नंतर नलराजा लाजून विचार करू लागला की, "अतिशय शोकामुळे मी हे काय केले? नंतर तो उघडपणे म्हणाला, "महाराज! हा प्रसंग तर खरोखर करुणारसाच्या अत्यंत प्रभावाने पहला आहे.॥७७५॥

English :- Then Nal, feeling ashamed, began to wonder that he was letting out his sorrowful imaginations a bit to far so he tells the king that this play was filled with a mixture of emotions that brings feelings of tenderness and compassion in all.

तमुपस्थाय भैम्यूचे हरे प्रथय मे प्रियम् ॥
दृष्टः स क्वापि नो चेन्मां भुक्त्वा स्वस्य कुरु प्रियम् ॥७७६॥

अन्वयः- भैमी तमुपस्थाय ऊचे - हरे! सः क्व अपि दृष्टः चेत् मे प्रियं प्रथय। नो चेत् मां भुक्त्वा स्वस्य प्रियं कुरु ॥७७६॥

विवरणम्:- भीमस्यापत्यं स्त्री भैमी द्यन्ती तं सिंहम् उपस्थाय उपसृत्य ऊचे उवाच - हे हरे सिंह! त्वं मम प्रियं नलं प्रथय प्रकटय। सः क्व अपि कस्मिंश्चिदपि स्थाने दृष्टः अवलोकितः अस्ति चेत्। नो दृष्टः चेत् मां भुक्त्वा भक्षयित्वा स्वस्य प्रियं कुरु स्वां क्षुधां शमय ॥७७६॥

सरलार्थः- दमयन्ती तं सिंहमुपसृत्य अब्रवीत् - हे हरे! त्वया मम प्रियः नलः क्वापि दृष्टः चेत् तं प्रकटय। नो चेत् मां भुक्त्वा स्वं प्रियं कुरु ॥७७६॥

ગુજરાતી :- પછી દમયંતીએ તેની પાસે આવીને કહ્યું કે, હે સિંહ! મારા સ્વામીને જો ક્યાંય તેં જોયો હોય, તો મને કહે. નહીં તો મારું ભક્ષણ કરીને તારું હિત કર. ॥७७६॥

हिन्दी :- फिर दमयंती उसके समीप जा कर कहने लगी कि, "हे सिंह यदि तूने मेरे स्वामी को देखा हो तो मुझे बता। नही तो मेरा भक्षण कर के अपना हित कर। ॥७७६॥

मराठी :- मग दमयंतीने त्याच्याजवळ येऊन म्हटले की, "हे सिंहा! जर तू माझ्या स्वामीला कुठे तरी पाहिले असेल तर मला कळव? नाही तर माझे भक्षण करुन तुझे हित कर."॥७७६॥

English :- Then Damyanti going closer to the lion appeals to him to tell her if he knows of the whereabouts of her nal, if not then to please devour her.

एवमुक्तोऽपि वैदर्भ्या स कण्ठीखपुङ्गवः ॥
सद्यः पराङ्मुखीभूत स्तीव्रानुशयतत्परः ॥७७७॥

अन्वयः- वैदर्भ्या एवमुक्तः अपि सः कण्ठीखपुङ्गवः तीव्रानुशयतत्परः सद्यः पराङ्मुखीभूतः ॥७७७॥

विवरणम्:- वैदर्भस्यापत्यं स्त्री वैदर्भी तया वैदर्भ्या विदर्भराजपुत्र्या दमयन्त्या एवम् उक्तः उदितः अपि सः कण्ठीखाणां पुङ्गवः कण्ठीखः पुङ्गवः इव वा - कण्ठीखपुङ्गवः सिंहश्रेष्ठः, तीव्रश्चासौ अनुशयश्च तीव्रानुशयः, तीव्रानुशये तत्परः तीव्रानुशयतत्परः तीव्रपश्चात्तापनिरतः सद्यः तत्क्षणे एव पराक् मुखं यस्य सः पराङ्मुखीभूतः पराङ्मुखः अभवत् ॥७७७॥

सरलार्थः- दमयन्त्या एवमुक्तः अपि सः सिंहश्रेष्ठः तीव्रपश्चात्तापाकुलः सद्यः एव पराङ्मुखः अभवत् ॥७७७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- દમયંતીએ એમ કહ્યું છતાં પણ, તે સિંહ તો બહુ પશ્ચાતાપમાં પડીને તુરત જ ઉલટા મુખવાળો થઇ ગયો.॥૭૭૭॥

हिन्दी :- दमयंती के इस प्रकार से कहने पर भी, वह शेर तो बहुत पश्चाताप करते हुए तुरंत उल्टे मुखवाला हो गया॥ ॥७७७॥

मराठी :- दमयंतीने असे म्हणताच तो श्रेष्ठ सिंह अतिशय पश्चाताप करू लागला व तेथून पराङ्मुख झाला. मागे वळला. ॥७७७॥

English :- When Damyanti said such words the lion atonce left ashamed of himself and walked away.

राजाऽवोचन्निवृत्तोऽयं केशरी हुण्डिक स्वयम् ॥
पतिव्रताव्रतेनैव प्रदीपेनाऽन्धकारवत् ॥७७८॥

अन्वयः- राजा अवोचत् - हे हुण्डिक! पअदीपेन अन्धकारवत् पतिव्रताव्रतेन एव अथं केशरी स्वयं निवृत्तः ॥७७८॥

विवरणम्:- राजा नृपः अवोचत् अब्रवीत् - हे हुण्डिक! प्रदीपेन दीपकेन अन्धकारः इव (यथा प्रदीपेन अन्धकारः स्वयमेव निवर्तते तथा) पतिः एव व्रतं यस्याः सा पतिव्रता। पतिव्रतायाः व्रतं पतिव्रताव्रतं तेन पतिव्रताव्रतेन दमयन्त्याः पातिव्रत्येन एव अयं केशराः अस्य सन्तीति केशरी सिंहः स्वयमेव निवृत्तः परावृत्तः ॥७७८॥

सरलार्थः- राजा अवदत् - हे हुण्डिक! प्रदीपेन यथा अन्धकारः स्वयमेव निवर्तते तथा पतिव्रतायाः व्रतेन एव अयं सिंहः स्वयं निवृत्तः अस्ति ॥७७८॥

ગુજરાતી :- ત્યારે રાજા બોલ્યો કે, હે હુંડિક ! આ સિંહ તો પતિવ્રતાના વ્રતને લીધે પોતાની મેળે જ, દીપકથી અંધકારની જેમ પાછો હઠી ગયો છે. ॥૭૭૮॥

हिन्दी :- तब राजा कहने लगा कि, "हे हुंडिक! यह सिंह तो पतिव्रता के व्रत के द्वारा स्वयं ही, दीपक द्वारा अंधकार के समान पीछे हट गया है।" ॥७७८॥

P.P.Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

मराठी :- तेव्हा राजा म्हणाला की, ''हे हुंडिका! जसा दिव्याने अंधकार स्वत:च निघून जातो. त्याप्रमाणे हा सिंह पण दमयन्तीच्या पतिव्रत्याच्या प्रभावाने स्वत:च मागे फिरला आहे. (निघून गेला आहे.)''॥७७८॥

English :- The King than said to Hundick that the lion was compelled to turn a back, due to the chase regulations of a chaste woman just as darkness walks away, as light and brightness makes its magestic entry.

दध्यौ नलोऽभवद्भव्यं यदरिष्टं ययौ स्वयम् ॥
मा देव्याः श्रौषमश्रव्यमित्युत्थायाऽथ सोऽभ्यधात् ॥७७९॥

अन्वयः- नलः दध्यौ। यद् अरिष्टं स्वयं ययौ। तद् भव्यम् अभवत्। देव्याः अश्रव्यं मा श्रौषम्। इति उत्थाय सः अभ्यधात् ॥७७९॥

विवरणम्:- नलः दध्यौ ध्यायति स्म। अरिष्टं सङ्कटं स्वयं ययौ इयाय। तद् भव्यं शोभनम् अभवत्। यतः अहं देव्याः दमयन्त्याः श्रोतुमयोग्यम् अश्रव्यं मरणं मा श्रौषम् न अशृणवम्। इति उत्थाय सः अभ्यधात् ॥७७९॥

सरलार्थः- नलः ध्यायति स्म - यद् अरिष्टं स्वयमेव अगात्। तद् भव्यं शोभनम् अभवत्। यतः अहं दमयन्त्याः विषये अश्रव्यं मरणं न अशृणवम् ॥७७९॥

ગુજરાતી :- પછી નલે વિચાર્યું કે સારું થયું, આ વિઘ્ન પોતાની મેળે જ નષ્ટ થયું, નહીં સાંભળી શકાય એવું દમયંતીનું મૃત્યુ મારે સાંભળવું નથી. પછી ઉભો થઈને તે કહેવા લાગ્યો, ॥७७९॥

हिन्दी :- तब नल विचार करता है कि, ''अच्छा हुआ, यह विघ्न (संकट) अपने आप टल गया। कान से सुनने अयोग्य ऐसा दमयंती की मृत्यु का समाचार मुझे नही सुनना पडा'' ऐसा सोचकर वह खडा होकर कहने लगा। ॥७७९॥

मराठी :- मग नलाने विचार केला की, ''हे विघ्न आपोआप नष्ट झाले. हे चांगले झाले. कारण मला कानाने ऐकू नये असे दमयन्तीचे मरण ऐकावे लागले नाही.'' असे तो उभा राहून म्हणाला, ॥७७९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then Nal wondered that he does'nt find it pleasant to the ears to hear the death of Damyanti in this way. So he stood up and spoke.

नटाः सत्त्वं कियत् कृत्त्वं संसदग्रे स्फुरिष्यति ।।
तत्र नाट्यं यतो द्रष्टुं नार्हन्ति स्त्रीवधं नृपाः ।।७८०।।

अन्वयः- हे नटा! संसदग्रे कियत् सत्त्वं कृत्त्वं स्फुरिष्यति। तत् न नाट्यम्। यतः नृपाः स्त्रीवधं द्रष्टुं न अर्हन्ति ।।७८०।।

विवरणम्:- हे नटाः! संसदः पर्षदः अग्रे संसदग्रे कियत् सत्त्वं कृन्ततीतिकृत्। कृतःभावः कृत्त्वं स्फुरिष्यति। तद् न नाट्यं। नटैः न अभिनेयम्। (यदा संसदः अग्रे सत्त्वकृत्प्रसङ्गः प्रसज्येत तदा नटैः सः न अभिनेयः) यतः नृन् पान्तीति नृपाः राजानः स्त्रियः वधं स्त्रीवधं द्रष्टुं न अर्हन्ति ।।७८०।।

सरलार्थः- हे नटाः! संसदः अग्रे कियत् सत्त्वं कुत्त्वं (सत्त्ववधप्रसङ्गः) स्फुरिष्यति। तदा नटैः स न अभिनेयः। यतः नृपाः स्त्रीवधं द्रष्टुं नार्हन्ति ।।७८०।।

ગુજરાતી :- હે નટો! આ સભામાં આવું નાટક કરવું નહીં, કેમ કે રાજાઓએ સ્ત્રી હત્યા જોવી યોગ્ય નથી. ।।७८०।।

हिन्दी :- हे नटो! सभा में किसी प्राणीका वध करनेका प्रसंग हो, तो ऐसा नाटक नही करना चाहिए, क्यों कि राजाओं के लिये स्त्री हत्या देखना योग्य नही है।''।।७८०।।

मराठी :- ''हे नटांनो। सभेसमोर एकाया प्राण्याचा वध करण्याचा प्रसंग आला तर नटांनी त्याचा अभिनय करू नये. कारण राजांनी स्त्रीहत्या पाहणे योग्य नाही.''।।७८०।।

English :- Then Nal addressing th eactors, said that in this arsembly many incidents of the existence of courage will be manifested. So such plays should not be acted out as kings should not see women being murdered.

मन्त्र्यूचे हुण्डिकैषा किं भूयो भूयः स्वविस्मृतिः ।।
साक्षान्मा नाट्यमप्येतन्मंस्थाः स्वस्थानमास्यताम् ।।७८१।।

अन्वयः- मन्त्री ऊचे - हुण्डिक! एषा भूयः भूयः स्वविस्मृतिः किम्? नाट्यमपि एतत् साक्षात् मा मंस्थाः। स्वस्थानमास्यताम् ।।७८१।।

विवरणम्:- *मन्त्री ऊचे अभिदधे - हुण्डिक! तव एषा भूयः भूयः पुनः पुनः स्वस्य विस्मृतिः विस्मरणं स्वविस्मृतिः स्वविस्मरणं किम्! एतत् नाट्यं नाटकं वर्तते एतत् साक्षात् सत्यं मा मंस्थाः मा मन्यस्व । स्वस्थ स्थानं स्वस्थानम् आस्यताम् उपविश्यताम्।।७८१।।*

सरलार्थः- मन्त्री अब्रवीत् - हुण्डिक! तव एषा भूयः भूयः स्व विस्मृतिः कथम्? एतद् नाटकं साक्षात् मा मंस्थाः । स्वस्थानम् आस्यताम् ।।७८१।।

ગુજરાતી :- ત્યારે મંત્રી બોલ્યો કે, હે હુંડિક! આ તને વારંવાર શું વિસ્મૃતિ થાય છે? આ નાટકને તું સાક્ષાત નહીં માન અને તારાં સ્થાન પર તું બેસી જા.।।७८१।।

हिन्दी :- तब मंत्री कहता है कि, "हे हुंडिक! तुझे यह बार-बार क्या विस्मृति हो रही है? इस नाटक को तू हकीकत मत समझ और अपने स्थान पर बैठ जा।"।।७८१।।

मराठी :- तेव्हा मंत्री म्हणाला की, "हे हुंडिका! तुला स्वत:ची पुन्हा पुन्हा विस्मृति का होत आहे? हे नाटक आहे. खरे आहे असे समज् जको. तुझ्या जागेवर बैस."।।७८१।।

English :- At this the minister stood up and asked Hundick as to why does he forget that this is only a play and not a real life happening so he asks Hundick to take his seat and be quiet.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैम्यूचे कथमेषोऽपि दुःखमोक्षं न मेऽकृत ॥
सहकारे तदस्मिन् स्वं भवाम्युद्बध्य निर्वृता ॥७८२॥

अन्वयः- भैमी ऊचे - कथम् एषः अपि मे दुःखमोक्षं न अकृता तद् अस्मिन् सहकारे स्वम् उद्बध्य निर्वृता भवामि ॥७८२॥

विवरणम्:- भीयस्यापत्यं स्त्री भैमी दमयन्ती ऊचे बभाषे - कथम् एषः सिंहः अपि मे मम दुःखात् मोक्षः दुःखमोक्षः, तं दुःखमोक्षं न अकृता एषः सिंहः अपि मां दुःखात् न अमोचयत्। तद् तस्मात् कारणात् अस्मिन् सहकारे आम्रवृक्षे स्वमात्मानम् उद्बध्य ऊर्ध्वम् बद्ध्वा निवृता सुखिनी भवामि ॥७८२॥

सरलार्थः- दमयन्ती अभाषत - एषः सिंहः अपि मम दुःखमोक्षं न अकरोत्। अतः अहमस्मिन् आम्रवृक्षे स्वमूर्ध्वं बद्ध्वा निर्वृता भवामि ॥७८२॥

ગુજરાતી :- પછી દમયંતી બોલી કે, અરે આ સિંહે પણ મને દુઃખમાંથી કેમ ન છોડાવી? માટે આ આંબાના વૃક્ષ પરથી ગળે ફાંસો **ખાઈને હું આપઘાત કરું.॥७८२॥**

हिन्दी :- फिर दमयंती बोली कि, "अरे इस सिंह ने भी मुझे दुःख में से क्यों नही छुडाया? इस लिये अब मैं इस आम्रवृक्ष पर गले को फांसी लगाकर आत्महत्या करती हूँ"॥७८२॥

मराठी :- मग दमयंती म्हणाली की "अरे या सिंहाने पण मला दुःखातून का सोडविले नाही? म्हणून आता या आंब्याच्या वृक्षावर गळ्याला फास लावून मी सुखी होते (अपघात करून घेते) ॥७८२॥"

English :- Damyanti then lamented because the lion too did not make her free from all her a gony by devouring her up, so she disides to commit suicide by hanging herself from the mango-tree.

दिशोऽवलोक्य हा आर्यपुत्रेयमकृपालुना ॥
त्यक्ता त्वया विना दोषमशरण्या विपद्यते ॥७८३॥

अन्वयः- दिशः अवलोक्य हा आर्यपुत्र! अकृपालुना त्वयात्यक्ता इयम् दोषं विना अशरण्या विपद्यते ॥७८३॥

विवरणम्:- *दिशः अवलोक्य दृष्टा हा इति खेदे आर्यपुत्र! कृपा अस्यास्तीति कृपालुः। न कृपालुः अकृपालुः, तेन अकृपालुना दयारहितेन त्वया दोष विना अपराध विना त्यक्ता इयं दमयन्ती अरण्ये साधुः शरण्यः। न विद्यते शरण्यः यस्याः सा अशरण्या अनाथा विपद्यते म्रियते ॥७८३॥*

सरलार्थः- दिशः अवलोक्य ब्रूते - हा आर्यपुत्र! दयारहितेन त्वया दोषं विना त्यक्ता इयं दमयन्ती अशरण्वा (अनाथा) विपद्यते ॥७८३॥

ગુજરાતી :- પછી બધી દિશાઓ તરફ જોઈને (તે બોલી કે) હે આર્યપુત્ર! તમોએ નિર્દય થઈને દોષ વિના જ મને તજી છે, અને તેથી નિરાધાર એવી હું આપઘાત કરું છું.॥૭૮૩॥

हिन्दी :- फिर दिशाओ की ओर देखकर कहती है कि, "हे आर्यपुत्र! आपने निर्दयी बन कर बिना किसी दोष के मुझे त्याग दिया है। इस से मैं निराधार हो कर आत्महत्या करती हूँ।"॥७८३॥

मराठी :- मग इकडे तिकडे पाहून दमयन्ती म्हणाली नाथ! निर्दय अशा तुम्ही माझा काहीही दोष नसतांना त्याग केला. म्हणून आता निराधार अनाथ झालेली मी प्राणत्याग करते."॥७८३॥

English :- Then taking a look in all directions, she thought aloud, by addressing Nal, that he had been cruel and thoughtless when he had decided to desert her, so now as she is without any support, to hang on, has decided to commit sucide.

वनदेव्यः कथयेयुरार्यपुत्राय मत्क्रियाम् ॥
तथा हे तात! हे मातः, मां जानीतात्मनः सुताम् ॥७८४॥

अन्वयः- वनदेव्यः आर्यपुत्राय मत्क्रियां कथयेयुः। हे तात! हे मातः। माम् आत्मनः सुतां जानीत ॥७८४॥

विवरणम्:- *वनस्य देव्यः वनदेव्यः आर्यपुत्राय पत्ये नलाय मम क्रिया मत्क्रिया, तां मत्क्रियां (सहकारेवृक्षे शरीरस्योद्बन्धनक्रियाम्) कथयेयुः निवेदयेयुः। तथा हे तात पितः। हे मातः माम् आत्मनः सुतामात्मजां जानीत वित्त॥७८४॥*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- वनदेव्यः आर्यपुत्राय मम आत्मघातात्मिकामिमां क्रियां कथयेयुः। हे पितः। हे मातः। मामात्मनः सुतां जानीत ॥७८४॥

ગુજરાતી :- હે વનદેવીઓ! આર્યપુત્ર નલને મારી આ ક્રિયા કહેજો તથા હે પિતાજી! હે માતાજી! મને તમારી પુત્રી જાણજો ! ॥७८४॥

हिन्दी :- "हे वनदेवीयों! आर्यपुत्र नल को मेरी आत्महत्या की यह क्रिया बताना तथा हे पिताजी! हे माताजी! मुझे तुम्हारी पुत्री समझना।"॥७८४॥

मराठी :- "हे वनदेवीनों! आर्यपुत्र नलाला माझी ही आत्महत्येची क्रिया सांगा? तसेच बाबा! हे आई! मला तुमची मुलगी समजा."॥७८४॥

English :- So addressing the forest's Goddesses and Gods, she asked them to tell Nal of this deed of committing sucide and also asked them to take her as their daughter.

इत्युक्त्वाश्रूणि मुञ्चन्ती लतापाशं गले ददौ ॥
राजोत्थाय ससरम्भमूर्ध्वपाणिरभाषत ॥७८५॥

अन्वयः- इति उक्ता अश्रूणि मुञ्चन्ती सा गले लतापाशं ददौ। राजा ससम्भ्रममुत्थाय ऊर्ध्वपाणिः अभाषत ॥७८५॥

विवरणम्:- इति अनन्तरोक्तम् उक्त्वा अश्रूणि मुञ्चन्ती सा दमयन्ती गले लतायाः पाशः लतापाशः, तं लतापाशं ददौ। तदा राजा नृपः संभ्रमेण त्वरया सह यथा स्यात् तथा ससंभ्रमं सत्वरम् उत्थाय ऊर्ध्वपाणी करै यस्य सः ऊर्ध्व पाणिः ऊर्ध्वबाहुः अभाषत अवदत् ॥७८५॥

सरलार्थः- इति उक्त्वा नेत्राभ्यामश्रूणि मुञ्चन्ती दमयन्ती गले लतापाश अददात्। तदा नृपः ससंभ्रममुत्थाय ऊर्ध्वबाहुः अभाषत ॥७८५॥

ગુજરાતી :- એમ કહીને આંસુઓ પાડતાં તેણીએ પોતાના ગળામાં ફાંસો નાખ્યો, ત્યારે રાજાએ એકદમ ઊઠીને હાથ ઉંચો કરી કહ્યું કે,॥૭૮૫॥

हिन्दी :- ऐसा कहकर आँसु गिराती हुई, दमयन्ती ने अपने गले में लतापाश का फांसा डाला। तब राजाने अचानक उठकर हाथ उपर कर कहा- ॥७८५॥

मराठी :- असे म्हणून अश्रु ढाळीत तिने स्वत:च्या गळ्यात फासा टाकला, तेव्हा राजा एकदम उठून हात उंच करून म्हणाला. ॥७८५॥

English :- So saying thus, Damyanti, with eyes swollen with tears, put the noose around her neck. At this the king, stood up and putting up his hand spoke out.

अलमलं निहत्य स्वं महासति महासति ॥
सपर्णोऽप्यभिधत्ते स्म किमिदं किमिदं शुभे ॥७८६॥

अन्वय:- हे महासति! हे महासति! स्व निहत्य अलम् । स्व निहत्य अलम् ।अपर्ण: अपि अभिधत्ते स्म। हे शुभे! इदं किम् इदं किम् ॥७८६॥

विवरणम्:- महती चासौ सती च महासती, तत्सम्बुद्धौ हे महासति! हे महापतिव्रते! हे महासति! स्वमात्मानं निहत्य अलम् आत्मघातं मा कुरु। सपर्ण: अपि अभिधत्ते स्म अभ्यधत्त - हे शुभे ! हे कल्याणि। इदं किम् । इदं किम्! त्वमिदमनुचितं कर्म; किमर्थं करोषि? इति ॥७८६॥

सरलार्थ:- हे महासति! आत्मानं निहत्य अलम् । आत्मघातं मा कुरु । सपर्ण: अपि अवदत् - हे कल्याणि ? त्वमिदमनुचितं कर्म किं कुरुषे ॥७८६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- હે મહાસતી ! હે મહાસતી ! અપઘાત કરવાથી સર્યું, સર્યું, પછી સપર્ણ મંત્રીએ પણ કહ્યું કે, શુભે ! આ શું? આ શું? ॥૭૮૬॥

हिन्दी :- "हे महासती! हे महासती! आत्महत्या करना छोड दो, छोड दो। फिर सपर्ण मंत्री भी बोला कि, "शुभे! यह क्या? यह क्या?"॥७८६॥

मराठी :- "हे महासती! हे महासती! आत्महत्या करणे पुरे झाले. (आत्महत्या करू नकोस) सपर्ण मंत्रीही म्हणाला हे कल्याणि! अग हे काय? हे भलतेच काय करतेस?"॥७८६॥

English :- The King addressing her as a ghaste woman said to her to stop such an improper deed of hers. Then even the minister asked her to cease.

जीवलोऽप्यूचिवानार्ये मा मात्याक्षीरसून् वृथा ॥
नलोऽप्युत्थाय सपदि प्रोवाचोच्चैः ससंभ्रमः ॥७८७॥

अन्वयः- जीवलः अपि ऊचिवान् - आर्ये! असून् वृथा मा मा त्याक्षीः । नलः अपि सपदि उत्थाय ससंभ्रमः उच्चैः प्रोवाच ॥७८७॥

विवरणम्:- *जीवलः अपि ऊचिवान् उक्तवान् - आर्ये! असून प्राणान् वृथा मुधा मा मा त्याक्षीः । मा त्यजा मा मा त्यज । नलः अपि सपदि द्रुतम् उत्थाय संभ्रमेण त्वरया सह वर्ततेऽसौ ससंभ्रमः सत्वरः उच्चैः प्रोवाच ॥७८७॥*

सरलार्थः- जीवलः अपि उक्तवान् - आर्ये! वृथा प्राणान् मा त्यज । नलः अपि द्रुतमुत्थाय ससंभ्रमम् उच्चैः अब्रवीत् ॥७८७॥

ગુજરાતી :- જીવલ પ્રતિહાર પણ બોલ્યો કે, હે આર્યે ! તું નિરર્થક પ્રાણોને તજી નહી દે. ત્યારે નલે પણ સંભ્રમ સહિત તુરત ઊઠીને મોટા સ્વરથી કહ્યું ॥૭૮૭॥

हिन्दी :- जीवल प्रतिहार भी कहने लगे कि, "हे आर्ये! तू व्यर्थ में अपने प्राणो का त्याग मत कर। त्याग मत कर।" तब नल भी भ्रमित होकर तुरंत खडे हो कर ऊंचे स्वर में कहने लगा ॥७८७॥

P.P. Ac. Gunratnasuri M.S.

मराठी :- जीवल द्वारपाल पण म्हणाला ''हे आर्ये! तू निरर्थक प्राणाचा त्याग करू नकोस? प्राण देऊ नकोस? तेव्हा नलराजा संभ्रम सहित पटकन उठून मोठ्या आवाजाने म्हणाला।।७८७।।

English :- Even the lifes door-keeper named Jichal asked her not to waste her life by sacrificing it. At this even Nal stood up and spoke up.

अलं देवि अलं देवि कार्षीर्मा माऽतिसाहसम् ।।
पापिनः पापसंरंभं मा विधाः स्ववधान्मम ।।७८८।।

अन्वयः- हे देवि! अलम्। हे देवि! अलम् अतिसाहसं मा मा कार्षीः। स्ववधात् मम पापिनः पापकसंरंभं मा विधाः ।।७८८।।

विवरणम्:- हे देवि! अलम् आत्मघातेन अलम्! हे देवि! आत्मघातेन अलम्। अतिशयेन साहसम् अतिसाहसं मा मा कार्षीः मा मा कुरुष्व। स्वस्य वधः स्ववधः तस्मात् स्ववधात् मम पापिनः पापानां संरम्भः पापसंरम्भः, तं पापसंरम्भं मा विधाः मा कुरु ।।७८८।।

सरलार्थः- हे देवि! अलम्। आत्मघातेन अलम्। अतिसाहसं मा कुरुष्व। स्वस्यवधात् पापिनः मम पापसंरम्भं मा विधेहि ।।७८८।।

ગુજરાતી :- હે દેવી! સર્યું, હે દેવી! સર્યું. અતિ સાહસ ન કર ન કર! તારા આપઘાતથી મને પાપીને પાપોના આરંભવાળો ન કર!।।७८८।।

हिन्दी :- "हे देवी! अब साहस समाप्त हुआ, हे देवी! समाप्त हुआ। अति साहस मत कर मत कर। अभी आत्महत्या द्वारा मुझ पापी को पापों का प्रारंभवाला मत कर?"।।७८८।।

मराठी :- 'हे देवी ! आता साहस संपल आहे, हे देवी ! संपल आहे. अति साहस करू नको, करू नको ! आता आत्महत्या करून मला पापी माणसाला पापांचा आरंभवाला करू नकोस !'' ।।७८८।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- asked her not to gather courage to do such a sinful act, so as to make him the foremost among sinness.

निर्मर्यादस्य पापस्य पत्याभासस्य मे कृते ।।
सतीचक्रावतंस स्वं व्यापादयसि किं वृथा ।।७८९।।

अन्वयः- निर्मर्यादस्य पापस्य पत्याभासस्य मे कृते हे सतीचक्रावतंस! स्वं वृथा किं व्यापादयसि ।।७८९।।

विवरणम्:- निर्गता मर्यादा यस्मात् सः निर्मर्यादः, तस्य निर्मर्यादस्य मर्यादरहितस्य, पापस्य पापिनः, पतिरिव आभासतेऽसौ पत्याभासः, तस्य पत्याभासस्य मे मम कृते - सतीनां पतिव्रतानां चक्रं वृन्दं सतीचक्रम् । सतीचक्रस्य अवतंसः शिरोभूषणं सतीचक्रावतंसः, तत्सम्बुद्धौ हे सतीचक्रावतंस पतिव्रतावृन्दशिरोभूषण हे दमयन्ति! स्वमात्मानं वृथा किं व्यापादयसि घातयसि ।।७८९।।

सरलार्थः- मर्यादारहितस्य, पापिनः, पत्याभासस्य मम कृते हे पतिव्रतावृन्दशिरोभूषण दमयन्ति! त्वम् आत्मानं वृथा मुधा किं घातयसि ।।७८९।।

ગુજરાતી :- મર્યાદા વિનાના પાપી અને પતિના આભાસ સરખા એવા મારે માટે હે સતી ! મંડલમાં મુકુટ સમાન દમયંતી! ફોકટ તારા આત્માનો તું શા માટે ઘાત કરે છે ? ।।७८९।।

हिन्दी :- "अमर्यादित पापी और पति के समान आभासमान ऐसे मेरे लिए, हे सतीमंडल में मुकुटसमान दमयंती! तू क्यों व्यर्थ में ही अपनी आत्मा का घात कर रही हो"।।७८९।।

मराठी :- हे पतिव्रतांना शिरोभूषण असलेल्या दमयन्ती? मर्यादा सोडलेल्या, पापी व पतीप्रमाणे भासणाऱ्या माझ्यासाठी विनाकारण स्वतःचा घात का करतेस? ।।७८९।।

English :- Nal then addressin Damyanti (whose husband had gone far beyond the told limits) that she is just having a fantasm of her husband, being somewhere around. So she should'nt slaughter or ambuscade her soul for ineffectual and otiose reasons.

गान्धारः स्माह तां वीक्ष्य सद्यः सभयसम्भ्रमम् ।।
श्वसित्यद्याप्यसौ यावदये पिङ्गलपिङ्गल ।।७९०।।
छिन्द्धि छिन्द्धि लतापाशं पिङ्गलो रभसादथ ।।
धावित्वा छेदयेत्पाशं वैदर्भी मूर्च्छिताऽपतत् ।।७९१।।

अन्वयः- तां वीक्ष्य गान्धारः सद्यः सभयसम्भ्रमः आह स्म - हे पिङ्गल! हे पिङ्गल! अद्यापि असौ यासव् श्वसिति(७९०) तावत् लतापाशं छिन्द्धि छिन्द्धि। अथ पिङ्गलः रभसात् धावित्वा यावत् पाशं छेदयेत् तावत् वैदर्भी मूर्च्छिता अपतत् ।।७९१।।

विवरणम्:- *तां दमयन्तीं वीक्ष्य गान्धारः सद्यः एव भयं च सम्भ्रमश्च भयसम्भ्रमौ । भयसम्भ्रमाभ्यां सह सभयसम्भ्रमः आह स्म - ब्रवीति स्म। हे पिङ्गल! हे पिङ्गल! अद्यापि असौ दमयन्ती यावत् श्वसिति तावत् (७९०) त्वं लतायाः पाशः लतापाशः, तं लतापाशं छिन्द्धि। त्वरया अथ अनन्तरं पिङ्गलः रभसात् वेगात् धावित्वा यावत् पाशं छेदयति तावत् - वैदर्भस्यापत्यं स्त्री विदर्भराजपुत्री दमयन्ती मूर्च्छा अस्याः सञ्जाता इति मूर्च्छिता सती अपतत् ।।७९१।।*

सरलार्थः- तां दमवन्तीं वीक्ष्य गान्धारः भयसम्भ्रमाभ्यां सह सद्यः अब्रवीत् - हे पिङ्गल! अद्यापि असौ दमवन्ती यावत् श्वसिति ।।७९०।।तावदेव त्वं त्वरया लताकाशं छिन्द्धि। ततः पिङ्गलः वेगेन धावित्वा यावत् लतापाशं छेदयति तावत् विदर्भराजपुत्री मूर्च्छिता सती भूमौ अपतत् ।।७९१।।

ગુજરાતી :- તેણીને જોઈને ગાંધાર પણ તુરત ભય અને સંભ્રમથી બોલ્યો કે, હે પિંગલ! હે પિંગલ! હજુ પણ જ્યાં સુધી આ શ્વાસ લે છે ત્યાં સુધી ।।७९०।। આ લતાપાશને તોડી નાખ ... તોડી નાખ. પછી પિંગલે પણ એકદમ દોડીને તે પાશ તોડી નાખ્યો. ત્યારે દમયંતી મૂર્છા પામીને પડી ગઈ. ।।७९१।। युग्मं ।।

हिन्दी :- उसको देखकर गांधार भी तुरंत भय और भ्रम से बोला कि, "हे पिंगला! हे पिंगला! अभी भी जहाँ तक श्वासोच्छवास है, वहाँ तक लतापाश को तोड डाला तोड डाला! फिर पिंगलने भी जल्दी दौडकर उस पाश को तोड डाला। तब दमयंती मूर्छित होकर गिर पडी।।७९१।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- तिला पाहुन गांधार पण लगेच भीतीने आणि संभ्रमाने म्हणाला की, ''हे पिंगल! हे पिंगल! अजून पण जोपर्यंत श्वासोच्छवास आहे तोपर्यंत हे लतापाश तोडून टाक! तोडून टाक! मग पिंगलने पण एकदम धावत जाऊन ते पाश तोडून टाकले तेव्हा दमयंती मूर्च्छित होऊन जमिनीवर पडली.''॥७९१॥

English :- Seeing this Ghandar screamed at Pingal in fright asking him to run and cut of the creeper till her life still respires for breath. Them Pingal ran and cut of the creeper. Damyanti thus fell down unconscious.

गान्धारः स्माह नन्वेषा पिङ्गल प्रियमात्मनः ॥
विपत्स्यते ह्यपश्यन्ती तत्सार्थपतयेऽधुना ॥७९२॥
अर्प्यतेऽसौ समुत्पाद्य येनाप्नोतीप्सितं क्रमात् ॥
इत्युक्त्वा तौ तथा कृत्वा निष्क्रान्तौ रङ्गभूमितः ॥७९३॥

अन्वयः- गान्धारः आह स्म - हे पिङ्गल! ननु एषा आत्मनः प्रियम् अपश्यन्ती विपत्स्यते। तद् अधुना सार्थपतये --(७९२)
असौ समुत्पाद्य अर्प्यते। येन क्रमात् ईप्सितम् आप्नोति। ईत्युक्त्वा तौ तथा कृत्वा रङ्गभूमितः निष्क्रान्तौ ॥७९३॥

विवरणम्:- गान्धारः आह स्म - ब्रवीति स्म। हे पिङ्गल! ननु एषा दमयन्ती आत्मनः प्रियं नलं न पश्यन्ती अपश्यन्ती विपत्स्यते मरिष्यति। तत् तस्मात् कारणात् अधुनना इदानीम् (७९२) असौ दमयन्ती समुत्पाद्य सार्थस्य पतिः सार्थपतिः, तस्मै सार्थपतये अर्प्यते दीयते। येन क्रमात् आनुपूर्व्यमीप्सितमाप्नोति लभते। इति इत्थमुक्त्वा तौ गान्धारपिङ्गलौ तथा कृत्वा दमयन्तीं समुत्पाद्य सार्थपतये रङ्गस्य भूमिः, रङ्गभूमिः, तस्याः रङ्गभूमेः निष्क्रान्तौ अपक्रान्तौ ॥७९३॥

ગુજરાતી :- ત્યારે ગાંધારે કહ્યું કે હે પિંગલ! આ દમયંતી ખરેખર પોતાના સ્વામીને નહીં જોવાથી મરણ પામશે, માટે હવે આને ઉપાડીને સાર્થપતિને સોંપીએ કે જેથી તે અનુક્રમે પોતાનું વાંછિત મેળવશે. એમ કહી તેઓ તેમ કરી રંગભૂમિમાંથી નીકળી ગયા. ॥૯૨॥ ॥૯૩॥ યુગ્મં ॥

हिन्दी :- तब गांधार ने कहा कि, "हे पिंगल! यह दमयंती सचमुच अपने स्वामी को नही देखने से मर जाएगी। इस लिये अब इस को उठा कर सार्थवाह को सौंप दिया जाय, जिस से वह क्रम से अपना इच्छित (वांछित) प्राप्त करेगी।" ऐसा कहकर वे लोग वैसा कर के रंगमंच से निकल गये॥७९३॥

मराठी :- तेव्हा गांधार म्हणाले की, "हे पिंगल! ही दमयंती खरोखर स्वत:च्या स्वामीला न पाहिल्यामुळे मरून जाईल, म्हणून आता हिला उचलून सार्थपतिकडे सोपवून देऊ की ज्यामुळे ती अनुक्रमे स्वत:चे वाञ्छित प्राप्त करील," असे म्हणून ते दोघे तसे करण्यासाठी रंगभूमीमधून निघून गेले॥७९३॥

English :- Then Ghandar said to Pingal that this chaste woman will certainly die for the want of her husband so he should therfore pick her up and place her along with the campers, so that she can fulfil her desires one by one saying thus he walked out of the stage.

राजाथोर्ध्वं समालोक्य कथमस्त गतो रवि: ॥
रसातिरेकादस्माभिर्विधि: सान्ध्योपि लङ्घित: ॥७९४॥

अन्वय:- अथ राजा ऊर्ध्वं समालोक्य आह - कथं रवि: अस्तं गत: । रसातिरेकात् अस्माभि: सान्ध्य: विधि: अपि लङ्घित: ॥७९४॥

विवरणम्:- अथ अनन्तरं राजा नृप: ऊर्ध्वं समालोक्य दृष्ट्वा आह्कथं रवि: सूर्य: अस्तं गत: गतवान्। रसस्य अतिरेक: रसातिरेक: तस्मात् रसातिरेकात् रसातिशयात् अस्माभि: सन्ध्यायां भव: सान्ध्य: विधि: अपि लङ्घित: अतिक्रान्त: ।।७९४॥

सरलार्थ:- अनन्तरं नृप: ऊर्ध्वं विलोक्य आह-किं सूर्य: अस्तं गत: । रसातिशयात् अस्माभि: सन्ध्याकालीन: विधि: अपि लङ्घित: ॥७९४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- એવામાં રાજાએ ઉંચે જોઈને કહ્યું કે, શું સૂર્ય અસ્ત પામ્યો? રસના અતિશયપણાથી આપણે સંધ્યાકાળની ક્રિયાને પણ ઉલ્લંઘી ગયા.॥७९४॥

हिन्दी :- इतने में राजा ने ऊपर देखकर कहा कि, "क्या सूरज अस्त हो गया? रस के अतिरेक से हम संध्याकर्म को भी भूल गये।"॥७९४॥

मराठी :- इतक्यात राजा वर पाहून म्हणाला की, "काय सूर्यास्त झाला? रसाच्या अतिरेकामुळे आम्ही संध्याकाळची क्रिया करणे पण विसरून गेलो?॥७९४॥

English :- Just then the King asked if the sun has set. He added saying that they we so much dipped in the aqua of entertainment, to have forgotten the twilight period.

पुरश्चालोक्य कुशलं कुशलं नाट्यकर्मसु ॥
सपर्णामात्यमादिक्षद् भोस्त्वमेतं कृतार्थय ॥७९५॥

अन्वयः- नाट्यकर्मसु कुशलं कुशलं पुरः आलोक्य सपर्णामात्यम् आदिक्षत् - भोः ! त्वम् एतं कृतार्थय ॥७९५॥

विवरणम्:- नटैः अभिनेयं नाट्यम् । नाट्यस्य कर्माणि नेपथ्यादीनि नाट्यकर्माणि तेषु नाट्यकर्मसु नेपथ्यादिषु कुशलं निष्णातं कुशलं भीमराजेन प्रेषितं दूतं (विप्रम्) पूरः अग्रे आलोक्य दृष्ट्वा राजा नृपः सपर्णं नाम अमात्यं सपर्णामात्यं सपर्णमन्त्रिणम् आदिक्षत् - आदिशत् त- भो मन्त्रिन् ! त्वम् एतं कुशलं कृतार्थय कृतार्थं कुरु ॥७९५॥

सरलार्थः- नाट्यकर्मसु कुशलं कुशलं नामभीमराजदूतं पुरतः आलोक्य नृपः सुपर्णं नाम अमात्यम् आदिशंत् - भोः अमात्य! त्वमेतं कुशलं कृतार्थं कुरू ॥७९५॥

ગુજરાતી :- પછી નાટ્યકાર્યમાં વિચક્ષણ એવા કુશલને આગળના ભાગમાં ઉભેલો જોઈને (રાજાએ) સપર્ણ નામના મંત્રીને કહ્યું કે, હે મંત્રી! તું આ કુશલને કૃતાર્થ કરજે?॥७९५॥

हिन्दी :- फिर नाट्यकार्य में दक्ष, ऐसे कुशल को सामने की ओर खडा देखकर राजाने सपर्ण मंत्री से कहा कि, "हे मंत्री! तुम इस कुशल को कृतार्थ करो।"॥७९५॥

मराठी :- मग नाट्यकार्यात विलक्षण अशा कुशल नावाच्या राजदूताला समोरच उभा असलेला पाहून राजाने सपर्ण नावाच्या मंत्र्याला आज्ञा केली, "हे मंत्री! तू या कुशल ब्राह्मणाला कृतार्थ कर?"॥७९५॥

English :- Then standing up and addressing the minister, asked him to reward Kushal generously, who was standing ahead of all actors.

वय युगादिदेवस्य पूजां सायन्तनीं पुनः ॥
यामोऽधुना कर्तुमिति निष्क्रान्ताः सर्व एव हि ॥७९६॥

अन्वयः- वयं पुनः अधुना युगादिदेवस्य सायन्तनीं पूजां कर्तुं यामः । इति सर्वे एव निष्क्रान्ताः ॥७९६॥

विवरणम्:- वयं पुनः अधुना इदानीं आदिश्चासौ देश्च आदिदेवः युगस्य आदिदेवः युगादिदेवः, रस्य युगादिदेवस्य आदिनातऋषभदेवस्य सायं भवा सायन्तनी, तां सायन्तनीं सायंकालीनां पूजामर्चां कर्तुं विधातुं यामः गच्छामः । इति उक्त्वा सर्वे एव निष्क्रान्ताः निर्गताः ॥७९६॥

सरलार्थः- वयं पुनः इदानीं युगादिदेवस्य भगवतः ऋषभनाथस्य सायन्तनीं पूजां कर्तुं गच्छामः । इत्युक्त्वा सर्वे एव निष्क्रान्ताः ॥७९६॥

ગુજરાતી :- અમો તો શ્રી યુગાદિદેવની સંધ્યાકાળની પૂજા કરવા જઈએ છીએ, એમ કહી સઘળાં પાત્રો (રંગભૂમિ પરથી) નીકળી ગયાં.॥७९६॥

हिन्दी :- "हम तो श्री युगादिदेव की संध्याकाल की पूजा करने के लिये अभी जा रहे हैं।" ऐसा कहकर सभी पात्र (रंगभूमि पर से) निकल गये॥७९६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- ''आम्ही तर श्री युगादिदेवाची संध्याकाळची पूजा करण्यासाठी आता जात आहो,'' असे म्हणून सगळे पात्र (रंगभूमीवरुन) निघून गेले.॥७९६॥

English :- He added that he was going to do the evening puja to Yugadidev. Then all the characters of the play walked out of the stage.

कुशलो हुण्डिकमथाप्राक्षीन्नाट्यान्तरे भवान् ॥
यत्तथा भो नलोऽस्मीति प्रोचे चातः स्फुटं नलः ॥७९७॥

अन्वयः- अथ कुशलः हुण्डिकम् अप्राक्षीत् - भवान् नाट्यान्तरे तथा भोः नलः अस्मीति यत् प्रोचे । अतः स्फुटं नलः असि ॥७९७॥

विवरणम्:- अथ अनन्तरं कुशलः हुण्डिकम् अप्राक्षीत् अपृच्छत् - भवान् नाट्यस्य अन्तरे नाट्यान्तरे नाट्यमध्ये भोः! अहं नलः अस्मि '' इति यत् प्रोचे उक्तवान् । अतः स्फुटं त्वं नलः असि ॥७९७॥

सरलार्थः- अनन्तरं कुशलः हुण्डिकम् अपृच्छत् - नाट्यमध्ये भवान् 'अहं नलः अस्मि इति यद् उक्तवान् । तेन त्वं स्फुटतया: नलः असि' ॥७९७॥

ગુજરાતી :- પછી તે કુશલે હુંડિકને પૂછ્યું કે, તેં નાટકની અંદર જે એમ કહ્યું કે હું નલ છું માટે તું ખરેખર નલ જ છો.॥७९७॥

हिन्दी :- फिर उस कुशल ने हुंडिक से कहा कि, ''तूने नाटक के मध्य में ऐसा कहा था कि, मैं नल हूं, इसलिये तू वास्तव में नल ही हो।''॥७९७॥

मराठी :- मग त्या कुशलाने हुंडिकाला विचारले की, ''तू नाटकात असे सांगितले होते की, तो नल मीच आहे म्हणूनच तू खरोखर नलच आहे.''॥७९७॥

English :- Then Kushal turning to Nal, said to him that as he had said during the play that he was Nal, so he has to be Nal in reality.

किंच त्वं भीमभूपस्यावेदितः सूर्यपाकवित् ॥
दधिपर्णविशिष्टेन ततोऽपि त्वं स्फुटं नलः ॥७९८॥

अन्वयः- किं च त्वं सूर्यपाकवित् इति दधिपर्णविशिष्टेन भीमभूपस्य आवेदितः । ततः अपि त्वं स्फुटं नलः असि ॥७९८॥

विवरणम्:- *किं च त्वं सूर्यातपे पाकः सूर्यपाकः । सूर्यपाकं वेत्ति इति सूर्यपाकविद् सूर्यपाकरसवतीज्ञः असि, इति दधिपर्णस्य विशिष्टः दूतः दधिपर्णविशिष्टः, तेन दधिपर्णविशिष्टेन दधिपर्णप्रेषितेने विशिष्टदूतेन भीमश्चासौ भूपश्च भीमभूपः, तस्य भीमभूपस्य भीमराजस्य आवेदितः निवेदितः असि। ततः तस्मादपि त्वं स्फुटं नलः असि ॥७९८॥*

सरलार्थः- किं च त्वं सूर्यपाकरसवतीं जानासि इति दधिपणस्य विशिष्टदूतेन भीमभूपः आवेदितः अस्ति । तस्मादपि त्वं स्फुटं नलः असि ॥७९८॥

ગુજરાતી :- વળી તું સૂર્યપાક રસોઈ કરી જાણે છે, એમ દધિપર્ણ રાજાએ ભીમરાજાને જણાવેલું છે, તેથી પણ, તું ખરેખર નલ જ છો.॥७९८॥

हिन्दी :- "फिर तुम सूर्यपाक रसोइ बनाना जानते हो, ऐसी जानकारी दधिपर्ण राजाने भीमराजा को दी है। जिस से तुम वास्तव में नल ही हो।"॥७९८॥

मराठी :- "मग तू सूर्यपाक स्वयंपाक करण्याचे जाणतो आहे असे दधिपर्ण राजाने पाठविलेल्या विशिष्ट दूताने भीमराजाला सांगितले आहे. त्यामुळे तू खरोखर नलच आहे."॥७९८॥

English :- He added that as he knew the method of cooking delicous food out of solas raij so he only can be Nal in reality as king Dadiparne had handed over this valvable knowledge to Bhimraj and then it had come to him.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भैम्याभ्यर्थ्य नृपं भद्र! द्रष्टुं त्वां प्रेषितस्य मे ।।
मार्गेऽनुकूलैः शकुनैराख्यातस्त्वं स्फुटं नलः ।।७९९।।

अन्वयः- हे भद्र! भैम्या नृपम् अभ्यर्थ्य त्वां द्रष्टुं प्रषितस्य मे मार्गे अनुकूलैः शकुनैः त्वं स्फुटं नलः आख्यातः ।।७९९।।

विवरणम्:- हे भद्र! भीमस्यापत्यं स्त्री भैमी, तया भैम्या भीमपुत्र्या दमयन्त्या ब्रन् पातीति नृपः तं नृपम् अभ्यर्थ्य सम्प्रार्थ्य त्वां द्रष्टुम् आलोकितुं प्रेषितस्य प्रहितस्य मे मम मार्गे अनुकूलैः शकुनैः निमित्तैः त्वं स्फुटं नलः आख्यातः । यदा अहं त्वां द्रष्टुं निर्गतस्तदा मार्गे अनुकूलाः शकुनाः अभवन् । तेनापि ज्ञातं त्वं नलः असि इति ।।७९९।।

सरलार्थः- हे भद्र! दमयन्त्या नृपं सम्प्रार्थ्य त्वां द्रष्टुमहमत्र प्रेषितः। तदा मार्गे अनुकूलाः शकुनाः शुभानि निमिथानि अभवन्। तेनापि ज्ञायते - त्वं स्फुटं नलः असि, इति।।७९९।।

ગુજરાતી :- હે ભદ્ર! દમયંતીએ રાજાને સમજાવીને તમને જોવા માટે મોકલેલા એવા મને માર્ગમાં અનુકૂળ શુકનો થવાથી જણાયું છે કે, તું પ્રગટ રીતે નલ છો.।।७९९।।

हिन्दी :- "हे भद्र! दमयंती ने राजा को समझाकर तुम्हें देखने के लिये मुझे भेजा। मुझे रास्ते में शुभ शकुन होने से मैं यह जानता हूँ कि, तुम प्रगट रूप से नल ही हो।"।।७९९।।

मराठी :- "हे भद्र! दमयंतीने राजाला विनंती करून तुला पाहण्याकरिता मला येथे पाठविले. मी येथे येत असतांना मला शुभ शकुन झाले. त्यावरून तू नलच आहेस. हे मी जाणले."।।७९९।।

English :- He continued saying that Damyanti had explained to the King about this, so he was sent here. He then says that he had to be King Nal in that form.

विसंवदति भो कुब्ज! केवलं रुपमेव ते ।।
नलस्येवातिशायिन्यः कलास्तु सकलाः तव ।।८००।।

अन्वयः- भो कुब्ज! केवलं ते रुपमेव विसंवदति । तव नलस्य इव सकलाः अतिशायिन्यः कलाः तु सन्ति ।।८००।।

विवरणम्:- भो कुब्ज हुण्डिक! केवलं ते तव रूपमेव विसंवदति प्रतिकूलं भाति। नलस्य इव तव सकलाः अतिशेरते इत्येवंशीलाः अतिशायिन्यः अतिशयवत्यः प्रभावशालिन्यः कलाः तु सन्ति। किन्तु तव रूपमेव केवलं विपरीतं वर्तते ॥८००॥

सरलार्थः- भो कुब्ज! तव रुपमेव केवलं नलरुपं विसंवदति। नलरुपात् विपरीतं कुरुपमस्ति। किन्तु तव सकलाः कलाः नलस्य कलाः इव अतिशायिन्य प्रभाविन्यः सन्ति ॥८००॥

ગુજરાતી :- હે કુબ્જ! ફક્ત તારા રુપમાં જ તફાવત જણાય છે, અને કલાઓ તો સઘળી નલની પેઠે જ તારામાં પ્રભાવવાળી દેખાય છે.॥८००॥

हिन्दी :- "हे कुब्ज ! सिर्फ तुम्हारे रुप में ही असामानता दिखती है, बाकि सभी कलां तो नल के समान ही तुझमें प्रभावशाली दिखाई दे रही है।"॥८००॥

मराठी :- "हे कुब्ज! केवळ तुझ्या रुपातच फरक आढळत आहे आणि कला तर सगळ्या नळाप्रमाणे तुझ्यातही प्रभावशाली दिसत आहेत."॥८००॥

English :- He then continued saying that he cannot be Nal as a hunchback, but in all other ways, in skillful arts and tatents, he is Nal in all ways.

कुब्जः स्माह नलः कुत्र स तादृक् क्वाहमीदृशः ॥
नाट्ये पुनर्न कस्कोऽभूद्रसेन परवांस्तदा ॥८०१॥

अन्वयः- कुब्जः आह स्म - सः तादृक् नलः कुत्र? अहम् इदृशः क्व! नाट्ये पुनः तदा रसेन कः कः परवान् न अभूत् ॥८०१॥

विवरणम्:- कुब्जः आह स्म। सः तादृक् सूपसम्पन्नः नलः कुत्र। ईदृशः कुब्जः कुरुपश्च अहं क्व? आवयोः समुद्रपल्वलयोः इव महदन्तरमस्ति। नाट्ये पुनः तदा तस्मिन् समये रसेन रसावेशात् कः कः परवान् पराधीनः परतन्त्रः न अभूत् ॥८०१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- कुब्जः आह स्म- सः तादृक् रूपसम्पन्नः नलः क्व। इदृशः कुब्जः कुरूपः च अहं क्व। नाट्ये पुनः तदा रसावेशात् कः कः परवान् परतन्त्रः न अभूत् ॥८०१॥

ગુજરાતી :- ત્યારે કુબ્જ બોલ્યો કે, ક્યાં તે નલ અને ક્યાં હું આવો કુબ્જ? અને નાટકમાં તો તે વખતે રસને લીધે કોણ કોણ પરવશ નહોતું થયું? ॥८०१॥

हिन्दी :- तब कुब्ज बोला कि- कहाँ वह रुपसंपन्न नल और कहां मैं कुरूप कुब्ज? और नाटक में तो उस समय रस के कारण कौन - कौन परवश नही हुआ था''॥८०१॥

मराठी :- ''तेव्हा कुब्ज म्हणाला कि, कोठे तो नल? कोठे मी असा कुरूप चेहऱ्याचा कुब्ज? आणि नाटकात तर त्या वेळेला रसयुक्त दृश्यामुळे कोण - कोण परवश झाला नव्हते.''॥८०१॥

English :- At this the hunch-back replied that one cannot compare him, who is shapeless and ugly to the most handsome Nal. He added saying that he was so engrassed in the play, that was a mixture of all emotions, that had made him to blurt out the impossible.

इत्यालप्य गृहे नीत्वाऽपृच्छद्भैमीकथां मुहुः ॥
वस्त्रालङ्करणाद्यैस्तं देवीस्नेहादतूतुषत् ॥८०२॥

अन्वयः- इति आलप्य तं गृहे नीत्वा मुहुः भैमीकथाम् अपृच्छत्। देवीस्नेहात् तं वस्त्रालङ्करणाद्यैः अतूतुषत् ॥८०२॥

विवरणम्:- इति तं कुशलम् आलप्य आभाष्य तं गृहे नीत्वा मुहुः वारंवारं भैम्याः दमयन्त्याः कथा तां भैमीकथां दमयन्तीकथाम् अपृच्छत् अप्राक्षीत्। देव्यां देव्याः वा स्नेहः देवीस्नेहः, तस्मात् देवीस्नेहात् दमयन्तीस्नेहात तं कुशलं वस्त्राणि च अलङ्करणानि च वस्त्रालङ्करणानि। वस्त्रालङ्करणानि आद्यानि येषां तानि वस्त्रालङ्करणाद्यानि तैः वस्त्रालङ्करणाद्यैः अतूतुषत् अतोषयत् ॥८०२॥

सरलार्थः- इति कुशलमालप्य तं गृहे नीत्वा पुनः पुनः दमयन्त्याः कथाम् अपृच्छत् । दमयन्तीस्नेहात् च तं वस्त्रालङ्करणादिभिः अतोषयत् ॥८०२॥

ગુજરાતી :- એમ કહીને (હુંડિકે તે કુશલને) ઘેર તેડી જઈને વારંવાર દમયંતીની કથા પૂછી, તથા દમયંતીના સ્નેહથી વસ્ત્રો તથા આભૂષણો આદિથી તેને સંતુષ્ટ કર્યો. ॥८०२॥

हिन्दी :- ऐसा कहकर हुंडिक ने उस कुशल को अपने घर ले जाकर बार - बार दमयंती की कहानी पूछी और दमयंती के स्नेह के कारण वस्त्रों और आभूषणों इत्यादी से उसे संतुष्ट किया ॥८०२॥

मराठी :- असे म्हणून हुंडिकाने त्या कुशलाला घरी नेऊन पुन्हा पुन्हा दमयंतीची कथा विचारली आणि दमयंतीच्या स्नेहामुळे वस्त्र तसेच दागिने इत्यादींनी त्याला संतुष्ट केले.॥८०२॥

English :- Having said such, he took Kushal to his house and repeatedly asked Kushal the story of Damyanti and because of his everflowing love for her, rewarded him profusely and made him contented and satisfied.

यतः अस्ति प्रयोजनं यत्र दिशस्तस्याः समागतः ॥
काकोऽपि कुरुते हर्षं किं पुनः प्रेषितो नरः ॥८०३॥

अन्वयः- यत्र प्रयोजनम् अस्ति । तस्याः दिशः समागतः काकः अपि हर्षं कुरुते । प्रेषितः नरः किं पुनः? ॥८०३॥

विवरणम्:- यत्र प्रयोजनं किमपि कार्यमस्ति । तस्याः दिशः समागतः काकः वायसः अपि हर्षं आनन्दं कुरुते । तर्हि प्रेषितः नरः हर्षं कुर्यात् इति किं पुनः वक्तव्यम् ॥८०३॥

सरलार्थः- यत्र प्रयोजनम् अस्ति । तस्याः दिशः समागतः काकः अपि हर्षं करोति। तर्हि प्रेषितः नरः आगतः चेत् हर्षं कुर्यात् इति किमु वक्तव्यम् ॥८०३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- કહ્યું છે કે, જ્યાં પ્રયોજન હોય, તે દિશામાંથી આવેલો કાગડો પણ હર્ષ ઉપજાવે છે, ત્યારે ત્યાંથી મોકલેલા પુરુષ માટે તો કહેવું જ શું? ॥૮૦૩॥

हिन्दी :- कहते हैं कि जहाँ प्रयोजन है, उस दिशा से आने वाले कौए का समागम भी हर्षित करता है, तो फिर वहाँ से भेजे हुए मनुष्य के लिए तो कहना ही क्या? ॥८०३॥

मराठी :- म्हणतात कि जेथे प्रयोजन असते, त्या दिशेमधून आलेला कावळा पण हर्ष उत्पन्न करतो. तर मग तेथून पाठविलेल्या पुरुषांबदल काय सांगावे? तो तर आनंद देणारच ॥८०३॥

English :- As it is said that even crows are welcomed from the place, from where, one tenders a special interest and purport. So if crows can be welcomed than what can one say of human-beings?

जगाम कुशलेनाथ कुशलः कुण्डिनम्पुरम् ॥
सर्वं भीमाय कुब्जस्य स्वरुपं च न्यरुपयत् ॥८०४॥

अन्वयः- अथ कुशलः कुशलेन कुण्डिनं पुरं जगाम। कुब्जस्य सर्वं स्वरुपं च भीमाय न्यरुपयत् ॥८०४॥

विवरणम्:- अथ अनन्तरं कुशलः कुशलेन क्षेमेण सुखेन कुण्डिनं पुरं जगाम ययौ। कुब्जस्य सर्वं स्वरुपं वृत्तान्तं भीमाय वैदर्भाय न्यरुपयत् न्यवेदयत् ॥८०४॥

सरलार्थः- अनन्तरं कुशलः कुशलेन क्षेमेण कुण्डिनं नगरं जगाम। तत्र कुब्जस्य सर्वं वृत्तं भीमाय नृपाय न्यवेदयत् ॥८०४॥

ગુજરાતી :- પછી તે કુશલ ક્ષેમકુશળ કુંડિનપુર ગયો, તથા તેણે તે કુબ્જનું સઘળું વૃત્તાંત ભીમરાજાને જણાવ્યું. ॥८०४॥

हिन्दी :- फिर वह कुशल कुशलपूर्वक कुंडिनपुर गया। उसने भीमराजा को उस कुब्ज का सब - वृत्तांत कह सुनाया॥८०४॥

मराठी :- नंतर तो कुशल सुखरूप कुंडिनपुरला गेला आणि त्याने त्या कुब्जाचा सगळा वृत्तांत भीमराजाला सांगितला. ॥८०४॥

English :- Then Kushal left for his city with utmost happiness and dexterity. On reaching he nassated to King Bhim the whole biography of the hunch-back.

Jun Gun Aaradhak Trust

सुवर्णशृङ्खलां टङ्कलक्षमाभरणादि च ॥
ऐक्षयत कुब्जदत्तानि नाट्यलीलायितं च तत् ॥८०५॥

अन्वयः- सुवर्ण शृङ्खलां टङ्कलक्षम् आभरणादि कुब्जदत्तानि ऐक्षयत । तद नाट्यलीलायितं च अश्रावयत् ॥८०५॥

विवरणम्:- सः कुशलः सुवर्णस्य शृङ्खला सुवर्णशृङ्खला, तां सुवर्णशृङ्खलां, टङ्कानां निष्काणां लक्षं टङ्कलक्षं निष्कलक्षं आभरणादि अलङ्करणादि कुब्जेन दत्तानि कुब्जदत्तानि वस्तूनि ऐक्षयत अदर्शयत् । तद् नाट्यस्य नाटकस्य लीलायितं लीलावत् आचारितं वृत्तमपि अश्रावयत् ॥८०५॥

सरलार्थः- सः कुशलः भीमाय राज्ञे सुवर्णशृङ्खलां, टङ्कलक्षं, आभरणादिकं च कुब्जदत्तानि वस्तूनि अदर्शयत् । नाट्यवृत्तं च अश्रावयत् ॥८०५॥

ગુજરાતી :- પછી તેણે કુબ્જે આપેલાં સુવર્ણની સાંકળ, એક લાખ ટંક તથા (બીજા) આભૂષણો દેખાડ્યા, તથા તે નાટકનો વૃત્તાંત પણ (કહી સંભળાવ્યો.)॥८०५॥

हिन्दी :- फिर उसने कुब्ज द्वारा दी गयी सुवर्ण - सांकली, एक लाख टंक और दुसरे आभूषण दिखाये और उस नाटक का वृत्तांत भी कह सुनाया ॥८०५॥

मराठी :- मग त्याने कुब्जाने दिलेली सुवर्णाची साकळी, एक लाख मोहरा आणि अलंकार वगैरे सर्व वस्तू दाखविल्या आणि त्या नाटकाचा वृत्तांत पण ऐकविला. ॥८०५॥

English :- Then Kushal showed the king the golden chain, one lakh gold coins and other ornaments that the hunch back had offered him. Then he narrated the whole narration of the play, that was dramotizes in the royal court-room.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दमयन्त्यवदत्तात नलो नून स किं पुनः ॥
तादृक्कुतोऽप्यभूद् दोषादाहारस्याथ कर्मणः ॥८०६॥

अन्वयः- अथ दमयन्ती अवदत् - तात! नूनं सः नलः अस्ति। किं पुनः सः आहारस्य अथवा कर्मणः दोषात् कुतः अपि तादृक् अभूत् ॥८०६॥

विवरणम्:- *अथ अनन्तरं दमयन्ती अवदत् - तात! नूनं ध्रुवं सः नलः अस्ति। किन्तु सः आहारस्य दोषात् दूषिताहारात् अथवा कर्मणः दोषात् दुष्कर्मवशात् कुतः अपि दोषात् तादृक् कुब्जः कुरुपः च अभूत् ॥८०६॥*

सरलार्थः- अनन्तरं दमयन्ती अवदत् - तात! नूनं सः नलः एवास्ति। आहारस्य दोषात् दुष्कर्मप्रभावात् वा कुताश्चित् दोषात् सः तादृक् कुब्जः कुरूपश्च अभूत् ॥८०६॥

ગુજરાતી :- ત્યારે દમયંતી બોલી કે, હે પિતાજી! ખરેખર તે નલરાજા છે, વધારે શું કહું? કોઈક આહારના દોષથી અથવા કર્મયોગે તે તેવાં કુબ્જ સ્વરૂપવાળો થયેલો છે.॥८०६॥

हिन्दी :- तब दमयंती बोली कि, "हे पिताजी! सचमुच वह नल ही है, अब अधिक क्या कहना? किसी आहार-दोष से या कर्म-संयोग से वह कुब्ज स्वरूपवाला हो गया है।"॥८०६॥

मराठी :- तेव्हा दमयंती म्हणाली की, बाबा! खरोखर तो नलच आहे, आता जास्त काय म्हणायचे? आहाराच्या दोषाने अथवा कर्मयोगाने तो कुब्ज व कुरूप झाला असेल.॥८०६॥

English :- Then Damyanti atonce said that the hunch-bock has to be Nal at all costs who may have attained this misfortunate form due to some nutriment or pabulum or a sin or disordess of the humours of the body or for some disrespectful deed.

सूर्यपास्य सामर्थ्यं हस्तिशिक्षणनैपुण्यम् ॥
दानमत्यद्भुतं चेदं नान्तरेण नलं भवेत् ॥८०७॥

अन्वयः- सूर्यपाकस्य सामर्थ्यं हस्तिशिक्षणनैपुणम्, अत्यद्भुतमिदं दानं नलम् अन्तरेण न भवेत् ॥८०७॥

विवरणम्:- सूर्यातपे पाककरणस्य सामर्थ्यं, हस्तिनः शिक्षणं हस्तिशिक्षणम्। हस्तिशिक्षणे निपुणस्य भावः नैपुणं हस्तिशिक्षण नैपुणं, इदम् अद्भुतं दानञ्च नलम् अन्तरेण विना न भवेत् न सम्भवेत् ॥८०७॥

सरलार्थः- सूर्यपाकस्य सामर्थ्यं, हस्तिशिक्षानैपुण्वं, अद्भुतं दानं च नलं विना नैव संभवेत् ॥८०७॥

ગુજરાતી :- સૂર્યપાક રસોઈનું સામર્થ, હસ્તિશિક્ષાનું કુશલપણું તથા આવું આશ્ચર્યકારક દાન નલ વિના સંભવી શકે નહીં. ॥८०७॥

हिन्दी :- "सूर्य-पाक रसोई का सामर्थ्य, हस्ति-शिक्षा में निपुणता और ऐसा अद्भुत दान 'नल' के बिना संभव नही है।"॥८०७॥

मराठी :- सूर्यपाक स्वयंपाकाचे सामर्थ्य, हस्तिशिक्षेची कुशलता आणि असे आश्चर्यकारक दान नलविना संभवत नाही.॥८०७॥

English :- Damyanti then continues saying that, it cannot be anyone else other than Nal, to have mastered the arts of preparing food from solar rays, or to domesticate a wild elephant or being so extremely charitable and munificent.

आनायय ततस्तात कथञ्चित्कुब्जमत्र तम् ॥
येनाहं तस्य भावज्ञा परीक्षे तं तथा तथा ॥८०८॥

अन्वयः- ततः हे तात! तं कुब्जम् अत्र कथञ्चित् आनायय। येन तस्य भावज्ञा अहं तं तथा तथा परीक्षे ॥८०८॥

विवरणम्:- ततः तस्मात् कारणात् हे तात! पितः। तं कुब्जम् अत्र कथञ्चित् केनापि प्रकारेण आनायय सेवकैः। येन तस्य कुब्जस्य भावं जानातीति भावज्ञा अहं तं तथा तथा विविधैः प्रकारैः उपायैः परीक्षे॥८०८॥

सरलार्थः- तस्मात् कारणात् हे पितः। तं कुब्जं केनापि प्रकारेण अत्र आनायय। येन तस्य भावज्ञा अहं तं विविधैः उपायैः परीक्षे॥८०८॥

ગુજરાતી :- તેથી હે પિતાજી! કોઇ પણ પ્રકારે તે કુબ્જને અહીં તેડાવો? કે જેથી તેના ભાવને જાણીને હું તે રીતે તેની પરીક્ષા કરું. ॥८०८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- इसलिये हे पिताजी! किसी भी उपाय से उस कुब्ज को यहाँ बुलवाओ! जिस से उसके भावों को जानकर मैं उसकी विविध प्रकार से परीक्षा कर सकूं। ॥८०८॥

मराठी :- म्हणून बाबा! कोणत्याही प्रकारे त्या कुब्जाला येथे आणा? म्हणजे त्याच्या मनोभावनांना जाणणारी मी त्याची त्या त्या प्रकारे परीक्षा करीन.॥८०८॥

English :- So she asks her father to call him here at all costs so she can understand his emotiones and test his identity.

भीमः प्रोवाच हे वत्से! सुसुमारपुरेश्वरम् ॥
उपक्रम्य तवालीकस्वयंवरमिहाह्वये ॥८०९॥

अन्वयः- भीमः प्रोवाच - हे वत्से! इह तव अलीकं स्वयंवरम् उपक्रम्य सुसुमारपुरेश्वरम् आह्वये।

विवरणम्:- भीमः विदर्भेश्वरः प्रोवाच जगाद - हे वत्से! इह अस्मिन् पुरे तव अलीकं मिथ्या स्वयंवरम् उपक्रम्य विरचय्य सुसुमारपुरस्य ईश्वरः सुसुमारपुरेश्वरः तं सुसुमारपुरेश्वरं दधिपर्णनृपम् आह्वये आकारये॥८०९॥

सरलार्थः- भीमः जगाद - हे वत्से! अहम् अस्मिन् नगरे तव अलीकं स्वयंवरं विरचय्य सुसुमारपुरेश्वरं दधिपर्णम् अत्र आह्वये ॥८०९॥

ગુજરાતી :- ત્યારે ભીમરાજાએ કહ્યું કે, હે વત્સે! તારો જૂઠો સ્વયંવર રચીને અહીં તે સુસુમારનગરના રાજાને બોલાવું છું.॥८०९॥

हिन्दी :- तब भीमराजाने कहा कि, "हे वत्से! तेरा झुठा स्वयंवर रचकर, उसमें सुसुमारपुर के राजा दधिपर्ण को आमंत्रित करता हूँ।"॥८०९॥

मराठी :- तेव्हा भीमराजा म्हणाला, हे वत्से! तुझे खोटे स्वयंवर रचून येथे त्या सुसुमारनगराच्या दधिपर्ण राजाला बोलवितो.॥८०९॥

English :- So her father replied that they shall arrange for an artficial swayawar and inuit the king Dadiparne of Susumapur.

सोऽनुरक्तः पुराप्यासीत् त्वयि विष्णुरिव श्रियाम् ॥
इदानीमेष्यति क्षिप्रं तवाकर्ण्य स्वयंवरम् ॥८१०॥

अन्वयः- विष्णुः श्रियामिव सः पुरा अपि त्वयि अनुरक्तः आसीत् । इदानीं तव स्वयंवरमाकर्ण्य क्षिप्रम् एष्यति ॥८१०॥

विवरणम्:- यथा विष्णुः श्रियां लक्ष्यम्याम् अनुरक्तः वर्तते । तथा सः सुसुमारपुरेश्वरः दधिपर्णः पुरा अपि त्वयि अनुरक्तः आसीत् । अतः इदानीम् अधुना तव स्वयंवरं स्वयंवरवार्तम् आकर्ण्य श्रुत्वा सः क्षिप्रम् झटितरम् अत्र एष्यति आगमिष्यति ॥८१०॥

सरलार्थः- यथा विष्णुः तक्ष्म्याम् अनुरक्तः अस्ति । तथा सः दधिपर्णः पुरा त्वयि अनुरक्तः अभवत् । अतः इदानीं तव स्वयंवरवार्तां श्रुत्वा सः क्षिप्रमत्र आगमिष्यति ॥८१०॥

ગુજરાતી :- તે રાજા પૂર્વે પણ લક્ષ્મી પ્રત્યે જેમ વિષ્ણુ, તેમ તારામાં અનુરક્ત હતો, અને તેથી તારો સ્વયંવર સાંભાળીને તે તુરત અહીં આવશે.॥૮૧૦॥

हिन्दी :- "वह राजा पहले भी जैसे लक्ष्मी के प्रति विष्णु वैसे ही तुझ में अनुरक्त था। इसलिये तेरे स्वयंवर की बात सुनकर वह यहाँ शीघ्र ही आयेगा।"॥८१०॥

मराठी :- तो दधिपर्ण राजा पूर्वी पण लक्ष्मीच्या प्रति जसा विष्णु तसा तो तुझ्यात अनुरक्त होता आणि त्यामुळे तुझे स्वयंवर ऐकून तो ताबडतोब येथे येईल. ॥८१०॥

English :- He added saying that just as Vishnu had fallen for Laxmi in the same way he had fallen for her in the heginning. So he will certainly attend the swayawar.

सार्धं तेनैव कुब्जोऽपि नूनमत्र समेष्यति ॥
भूयः स्वयंवरं ते स नलश्चेन्न सहिष्यते ॥८११॥

अन्वयः- नूनं तेन सार्धमेव कुब्जः अपि अत्र समेष्यति । सः नलः चेत् तव भूयः स्वयंवरं न सहिष्यते ॥८११॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *नूनं ध्रुवं तेन सुसुमारपुरेश्वरेण सार्धं सह कुब्जः अपि अत्र समेयति आगमिष्यति। सः कुब्जः नलः चेत् यदि नलः स्यात् तर्हि तव भूयः पुनरपि स्वयंवरं न सहिष्यते ॥८११॥*

सरलार्थः- नूनं तेन दधिपर्णेन सार्धं सः कुब्जः अपि अत्र आगमिष्यति सः यदि नलः भवेत् तर्हि तव भूयः स्वयंवरं न सहिष्यते॥८११॥

ગુજરાતી :- તેની સાથે કુબ્જ પણ ખરેખર અહીં આવશે, કેમ કે જો તે નલરાજા હશે તો તારા ફરીને થનારા સ્વયંવરને સહન કરી શકશે નહીં.॥८११॥

हिन्दी :- "और उसके साथ कुब्ज भी यहाँ आयेगा। यदि वह वास्तव में नल होगा तो वह तेरा दोबारा होने वाला स्वयंवर सहन नही कर सकेगा।"॥८११॥

मराठी :- आणि त्याच्या सोबत कुब्ज पण खरोखर येथे येईल. जर तो नलराजा असेल तर तो तुझ्या पुन्हा होणाऱ्या स्वयंवराला सहन करु शकणार नाही. ॥८११॥

English :- He then continued saying that if that hunchback is Nal in that form, then he will certainly not be able to bear this swayawar and will certainly come here to put up an objection.

नलोऽश्वहृदयज्ञोऽस्ति तस्य प्रेरणया हयाः ॥
धावन्ति स्पर्धया स्वामि - मनसा सह रंहसा ॥८१२॥

अन्वयः- नलः अश्वहृदयज्ञः अस्ति। तस्य प्रेरणया तयाः स्वामिमनसा सह स्पर्धया इव रंहसा धानन्ति ॥८१२॥

विवरणम्:- *नलः अश्वस्य हृदयम् अश्वहृदयं जानातीति अश्वहृदयज्ञः अश्वहृयदविद् अस्ति। तस्य नलस्य प्रेरणया अश्वाः स्वामिनः मनः स्वामिमनः, तेन स्वामिमनसा सह स्पर्धया इव रंहसा वेगेन धावन्ति। नलस्य प्रेरणया अश्वाः स्वामिमनसा सह स्पर्धां कृत्वा इव महता वेगेन धावन्ति। मनसः अपि अधिकतरवेगेन धावन्ति ॥८१२॥*

सरलार्थः- नलः अश्वस्य हृदयं जानाति। तेन नलस्य प्रेरणया अश्वाः स्वामिनः मनसा सह स्पर्धांकृत्वा इव महता वेगेन धावन्ति ॥८१२॥

ગુજરાતી :- વળી નલરાજા ઘોડાઓના હૃદયને જાણનારો છે, અને તેની પ્રેરણાથી ઘોડાઓ સ્વામીના મનની સાથે સ્પર્ધાપૂર્વક દોડી શકે એમ છે.॥૮૧૨॥

हिन्दी :- "फिर नलराजा अश्वों के हृदय को जानता है, जिस से नल की प्रेरणा से घोडे स्वामी के मन की साथ स्पर्धा के वेग से दौड सकते है। ॥८१२॥

मराठी :- तसेच नलराजा तर घोड्याच्या हृदयाला जाणणारा आहे. त्याने हाकललेले घोडे जणू स्वामीच्या मनाशी स्पर्धा करीत अतिशय वेगाने धावतात. ॥८१२॥

English :- And Nal who understands the feelings and imotions of the hores, will make the horses to run a race with his will and intentions.

प्रातः स्वयंवरो भावीत्यद्याख्यातेऽपि चेत्ततः ॥
आगन्ता प्रातरेवाऽत्र ज्ञेयस्तन्नल एव सः ॥८१३॥

अन्वयः- प्रातः स्वयंवरः भावी इति अद्य आख्यातेऽपि चेत् प्रातः एव अत्र आगन्ता चेत् ततः सः नलः एव ज्ञेयः ॥८१३॥

विवरणम्:- प्रातः स्वयंवरः भावी भविष्यति इति अद्य आख्याते कथिते सत्यपि प्रातः एव अत्र आगन्ता आगमिष्यति चेत् ततः सः नलः एव ज्ञेयः ज्ञातव्यः। अल्पीयसा कालेन अत्र इयत् दूरम आगन्तुं नलं विना अन्यः कोऽपि न समर्थः ॥८१३॥

सरलार्थः- प्रातः स्वयंवरः भावी इति यद्यपि अद्य आख्यातं तथापि प्रातः एव सः अत्र आगन्ता चेत् सः नलः एव विज्ञेयः ॥८१३॥

ગુજરાતી :- પ્રભાતમાં સ્વયંવર થશે, ઇત્યાદિ કહેવાથી પણ જો ત્યાંથી પ્રભાતમાં જ તે અહીં આવી પહોંચશે, તો જાણવું કે, તે નલ જ છે. ॥૮૧૩॥

हिन्दी :- "सुबह स्वयंवर होगा, इत्यादि कहने से यदि वह सुबह में ही यहाँ आ पहुंचेगा तो समझना कि वह नल ही है।"॥८१३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- सकाळी स्वयंवर होईल, असे जरी आज सांगितले तरी सकाळीच तो येथे येऊन पोहोचला तर जाणावे की, तो नलच आहे.॥८१३॥

English :- They decided to have the swayawar the next day at dawn and if they auine there, before the said time then he is bound to be Nal.

अथ भीमनरेन्द्रेण दूतस्तत्र नियोजितः ॥
चैत्रे चतुर्थ्यां शुद्धायां सुसुमारपुरं ययौ ॥८१४॥

अन्वयः- अथ भीमनरेन्द्रेण तत्र दूतः नियोजितः । सः चैत्रे शुद्धायां चतुर्थ्यां सुसुमारपुरं ययौ ॥८१४॥

विवरणम्:- अथ अनन्तरं भीमश्चासं नराणामिन्द्रश्च भीमनरेन्द्रः तेन भीमनरेन्द्रेण भीमराजेन तत्र सुसुमारपुरे दूतः नियोजितः प्रहितः । सः चैत्रे चैत्रमासे शुद्धायां चतुर्थ्यां तिथौ सुसुमारपुरं ययौ जगाम ॥८१४॥

सरलार्थः- अनन्तरं भीमराजेन सुसुमारपुरे नियोजितः दूतः चैत्रमासे शुक्लपक्षे चतुर्थ्यां तिथौ सुसुमारपुरं जगाम ॥८१४॥

ગુજરાતી :- પછી ભીમરાજાએ ત્યાં દૂતને મોકલ્યો, અને તે દૂત પણ ચૈત્ર માસની સુદી ચોથને દિવસે સુસુમારનગરમાં ગયો.॥८१४॥

हिन्दी :- फिर भीमराजा ने वहाँ दूत भेजा और वह दूत चैत्र मास की शुक्ल पक्ष की चतुर्थी के दिन सुसुमारपुर गया॥८१४॥

मराठी :- नंतर भीमराजाने तेथे दूत पाठविला. तो दूत चैत्र महिन्याच्या शुद्ध चतुर्थीच्या दिवशी सुसुमार नगरात गेला. ॥८१४॥

English :- Then King Bhim sent a messenger to that place and the messenger entered susumarpur on the fourth day of the bright half of the first lunar month.

गत्वा तदैव चास्थाने दधिपर्णं व्यजिज्ञपत् ॥
पुनः स्वयंवरो देव भैम्याः प्रातर्भविष्यति ॥८१५॥

अन्वयः- तदा एव आस्थाने गत्वा दधिपर्णं व्यजिज्ञपत् - हे देव! प्रातः भैम्याः पुनः स्वयंवरः भविष्यति ॥८१५॥

विवरणम्:- *तदा तस्मिन् एव समये आस्थाने राजसभायां गत्वा सः दूतः दधिपर्णं व्यजिज्ञपत् व्यज्ञापयत् - हे देव! प्रातः प्रातःकाले प्रभाते भीमस्यापत्यं स्त्री भैमी, तस्या भैम्याः दमयन्त्याः पुनः स्वयंवरः भविष्यति ॥८१५॥*

सरलार्थः- तदा तस्मिन्नेव समये राजसभां गत्वा सः दूतः दधिपर्णं व्यज्ञापयत् - राजन्! श्वः प्रभाते दमयन्त्याः पुनः स्वयंवरः भविष्यति ॥८१५॥

ગુજરાતી :- પછી તેજ વખતે રાજસભામાં જઈને તેણે દધિપર્ણ રાજાને કહ્યું કે, હે દેવ! કાલે સવારે દમયંતીનો સ્વયંવર થવાનો છે. ॥८१५॥

हिन्दी :- फिर उसी समय राजसभा में जाकर उसने दधिपर्ण राजा से कहा कि, "हे देव! सुबह में ही दमयंती का पुनः स्वयंवर होनेवाला है।"॥८१५॥

मराठी :- नंतर त्याच वेळेला राजसभेत जाऊन त्याने दधिपर्ण राजाला सांगितले की, महाराज सकाळीच दमयंतीचे पुन्हा स्वयंवर होणार आहे.॥८१५॥

English :- **The messenger then entered the royal court of King Dadipame and told him that the very next mornig, there will be a second swayawar, in honour of Damyanti.**

सोऽचिन्तयत्तदाकर्ण्य भैमी मेऽतिमनीषिता ॥
श्वः कथं तत्र गन्तास्मि चेत्पक्षी स्यामयेय तत् ॥८१६॥

अन्वयः- तद् आकर्ण्या सः अचिन्तयत् - भैमी मे अतिमनीषिता। परं श्वः तत्र कथं गन्तास्मि। पक्ष स्यां चेत् तद अयेय ॥८१६॥

विवरणम्:- *तद् दूतस्य वचनम् मे मम अतिमनीषिता अतिवल्ला अस्ति। परम् अहं श्वः तत्र कथं गन्तास्मि गमिष्यामि। इयता अल्पीयसा कालेन इयत् दूरं गन्तुं नितरामशक्यं वर्तते। यदि अहं पक्षी स्वगः स्याम् भवेय, तत् तर्हि अयेय गच्छेयम्। अन्यथा न। इति ॥८१६॥*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- तद् दूतस्य वचनमाकर्ण्य दधिपर्णः अचिन्तयत् - दमयन्ती मम अतीव प्रिया अस्ति। परमहं प्रभाते तत्र कथ गमिष्यमि? पक्षी भवेयं चेत् गच्छेयम् ॥८१६॥

ગુજરાતી :- તે સાંભળી તેણે વિચાર્યું કે, દમયંતી તો મને અત્યંત વ્હાલી છે, પરંતુ આવતી કાલે સવારે હું ત્યાં શી રીતે જઈ શકીશ? જો હું પક્ષી હોઉં તો ત્યાં જઈ શકું.॥८१६॥

हिन्दी :- यह सुनकर उसने विचार किया कि, दमयंती तो मुझे अत्यंत प्रिय है, लेकिन कल प्रभात में ही मैं वहाँ किसप्रकार जा सकूंगा? यदि मैं पक्षी होता तो वहाँ जा सकता ॥८१६॥

मराठी :- ते दूताचे वचन ऐकून त्याने विचार केला की, दमयंती तर मला अत्यंत प्रिय आहे, परंतु उया सकाळीच मी तेथे कसा जाऊ शकेन. मी जर पक्षी झालो तर तेथे जाऊ शकेन.

English :- Then the king began to wonder that its no doubt that he loves Damyanti profusely, but how could he reach his destination by dawn as he was not a bird who could fly to its destination.

तध्यौ कुब्जोऽपि वैदर्भी न स्वशीलं विलुम्पति ॥
अपि मुञ्चन्ति मर्यादां चेद् युगान्तेपि वार्धयः ॥८१७॥

अन्वयः- कुब्जः अपि दध्यौ - वार्धयः अपि युगान्ते मर्यादां मुञ्चन्ति चेत् वैदर्भी स्वशीलं न विलुम्पति ॥८१७॥

विवरणम्:- कुब्जः अपि दध्यौ चिन्तयामास - वार्धयः सागराः अपि कदाचित् युगस्य अन्तः युगान्तः, तस्मिन् युगान्ते प्रलयकाले मर्यादां मुञ्चन्ति त्यजन्ति। परं वैदर्भस्यापत्यं स्त्री वैदर्भी विदर्भराजपुत्री दमयन्ती स्वस्य शीलं स्वशीलं कदापि न विलुम्पति ॥८१७॥

सरलार्थः- कुब्जः अपि व्यचारयत् - कदाचित् प्रलयकाले सागराः अपि मर्यादां त्यजेयुः। परं विदर्भराजपुत्री दमयन्ती कदापि स्वशीलं न विलुम्पेत् ॥८१७॥

ગુજરાતી :- હવે તે કુબ્જે પણ વિચાર્યું કે, કદાચ યુગાંત મહાસાગર પણ મર્યાદા મૂકે, પરંતુ દમયંતી પોતાના શીલનો લોપ કરે નહીં.॥૮૧૭॥

हिन्दी :- कुब्ज भी विचार करता है कि, "प्रलयकाल में शायद महासागर भी अपनी मर्यादा छोड दे परंतु दमयंती अपने शील को छोड नही सकती।"॥८१७॥

मराठी :- आता तो कुब्ज पण विचार करू लागला की, प्रलयकाळाच्यावेळी महासागर पण मर्यादा सोडतात. परंतु दमयंती स्वतःच्या शीलाचा लोप करणार नाही. ॥८१७॥

English :- The hunch-back thought to himself saying that the ocean might forget its limits during the final annihilation of the universe, but Damyanti will never let go her natural disposition and her well behaved urbane virtues.

अथासम्भाव्यपि भवेद्भैम्या अपि चलेन्मनः ॥
तामादातुमलं कोऽन्यस्तथापि मयि जीवति ॥८१८॥

अन्वयः- अथ भैम्या अपि मनः चलेत् । असम्भावी अपि भवेत् । तथापि मयि जीवति सति तामादातुम् अन्यः कः अलम् अस्ति ॥८१८॥

विवरणम्:- अथ कदाचित् भीमस्यापत्यं स्त्री भैमी, तस्याः भैम्याः दमयन्त्याः अपि मनः चलेन् विचलेन् । तेन असम्भावि सम्भवितुमशक्यः देव्याः स्वयंवररोऽपि भवेत् । तथापि मयि जीवति सति यावद् अहं जीवामि तावत् तां दमयन्तीम् आदानुं ग्रहीतुम् अन्यः कः अलं समर्थः अस्ति । मां विना अन्यः कः अपि तामादातुं न शक्नुयात् ॥८१८॥

सरलार्थः- कदाचित् भैम्याः अपि मन; प्रचलेत् । तेन असम्भावी स्वयंवरः अपि भवेत् । परन्तु मयि जीवति सति तामादातुं मदन्यः कः समर्थः अस्ति ॥८१८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- હવે કદાચ દમયંતીનું મન પણ ચલાયમાન થાય, અને તેવું અસંભવિત પણ બને, પરંતુ મારા જીવતાં તેણીને લેવાને કોણ બીજો સમર્થ છે? ॥૮૧૮॥

हिन्दी :- "अब कदाचित् दमयंती का मन भी चलायमान हो गया हो, और ऐसा असंभवित भी हो, लेकिन मेरे जीते जी उसको ग्रहण करने में दूसरा कौन समर्थ है?"॥८१८॥

मराठी :- आता कदाचित दमयंतीचे मन पण चलायमान होईल, आणि असंभाव्य स्वयंवर होईल. तरी पण मी जिवंत असेपर्यंत तिला स्वीकार करण्यास दुसरा कोण समर्थ आहे? ॥८१८॥

English :- He continues that, even if her mind has gone bererk and wavery, he will never allow anyone to obtain her, come what may.

तन्निश्येव ततस्तत्र दधिपर्णं नयाम्यहम् ॥
साधं तेनैव यानं यन्ममापि स्यात् प्रसङ्गतः ॥८१९॥

अन्वयः- तत् अहं निशि एव दधिपर्णं तत्र नयामि। ततः प्रसंगतः तेन एव सार्धं मम अपि तत्र यानं स्यात् ॥८१९॥

विवरणम्:- तत् तस्मात् कारणात् अहं निशि एव रात्रौ एव दधिपर्णं नृपं तत्र विदर्भराजधान्यां नयामि। ततः प्रसंगतः तेन दधिपर्णेन एव सार्धं सह मम अपि तत्र राजधान्यां स्वयंवरमण्डपे यानं गमनं स्यात् ॥८१९॥

सरलार्थः- ततः अहं रात्रौ एव दधिपर्णं तत्र नयामि। तेन प्रसंगात् दधिपर्णेन सह मम अपि तत्र गमनं स्यात् ॥८१९॥

ગુજરાતી :- માટે રાત દરમ્યાન જ હું ત્યાં દધિપર્ણ રાજાને લઈ જઉં અને તે પ્રસંગથી તેની સાથે મારું પણ ત્યાં જવાનું થશે.॥૮૧૯॥

हिन्दी :- इसलिये रात्रि में ही मैं राजा दधिपर्ण को लेकर वहाँ जाऊंगा और इस प्रसंग से उनके साथ मेरा भी वहां जाना हो पाएगा॥८१९॥

मराठी :- म्हणून मी रात्रीच दधिपर्ण राजाला तेथे घेऊन जातो. या निमित्ताने याच्यासोबत माझे पण जाणे होईल. ॥८१९॥

English :- So he decides to take king Dadiparne there so that be too will be able to reach his final destination-Damyanti.

अथोचे तं स मा क्लेशीर्निदानं वद भूपते ।।
स्थगितानां हि मुक्तानां मूल्यं कर्तुं न शक्यते ।।८२०।।

अन्वयः- अथ सः तम् ऊचे - हे भूपते! मा क्लेशीः । निदानं वद । तथाहि स्थगितानां मुक्तानां मूल्यं कर्तुं न शक्यते ।।८२०।।

विवरणम्:- अथ अनन्तरं सः कुब्जः तं दधिपर्णम् ऊचे अब्रवीत् - हे भूपते! मा क्लेशीः मा क्लिशान । निदानं मूलकारणं वदा तव दुःखस्य मूलं वद । तथाहि स्थगितानामाच्छादितानां मुक्तानां मुक्ताफलानां मूल्यं कर्तुं न शक्यते । यथा आच्छादितानां मुक्ताफलानां मूल्यं कर्तुं न शक्यते । तथैव अन्तर्मनसि स्थितानां क्लेशानां निराकरणोपायः अपि कर्तुं न शक्यते । तथैव अन्तर्मनसि स्थितानां क्लेशानां निराकरणोपायः अपि कर्तुं न शक्यते । तथैव अन्तर्मनसि स्थितानां क्लेनां निराकरणोपायः अपि कर्तुं न शक्यते । तथाऽन्तःस्थितानां क्लेशानां प्रतीकारः कर्तुं न शक्यते ।।८२०।।

सरलार्थः- अनन्तरं स कुब्जः तं दधिपर्णमवदत् - राजन् । मा विलशान । तव क्लेशस्य निदानं कारणं वद । तथाहि । आच्छादितानां मुक्ताफलानां मूल्यं कर्तुं न शक्यते । तथा अन्तः स्थितानां क्लेशानां प्रतिकारः कर्तुं न शक्यते ।।८२०।।

ગુજરાતી :- પછી તેણે તે દધિપર્ણ રાજાને કહ્યું કે, હે રાજન ! તમો ખેદ કરો નહીં. તમારા ખેદનું કારણ કહો. કેમ કે ઢાંકી રાખેલાં મોતીઓનું મૂલ્ય કરી શકાય નહીં.।।૮૨૦।।

हिन्दी :- फिर उसने दधिपर्ण राजा से कहा कि, हे राजन! आप खेद न करो। आपके खेद का कारण कहिये? क्यों कि ढक कर रखे हुए मोतीयों का मूल्य नही किया जा सकता। ।।८२०।।

मराठी :- मग त्याने त्या दधिपर्ण राजाला म्हटले की, हे राजा! तुम्ही खेद करु नका? तुमच्या खेदाचे कारण सांगा? कारण झाकून ठेवलेल्या मोत्यांचे मूल्य केले जाऊ शकत नाही. त्याप्रमाणेच मनात असलेल्या दुःखांचे निवारण केले जाऊ शकत नाही. ।।८२०।।

English :- Then he askes Dadiparne the cause for his gloominess and dolour so that he may be able to anhililate it. Then he quotes saying that one cannot estimate the value of concealed pearls, unless it is bought out in the open.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राजोचे यन्नल: स्वर्गप्रवेशे कृतमङ्गल: ॥
पुन: स्वयंवरो भावी भैम्या: श्वस्तेन खेदवान् ॥८२१॥

अन्वय:- राजा ऊचे - यत् नल: स्वर्गप्रवेशे कृतमङ्गल: अस्ति। तेन श्व: भैम्या: पुन: स्वयंवरो भावी। तेन अहं खेदवान् ॥८२१॥

विवरणम्:- *राजा ऊचे अभिदधे - यत् नल: स्वर्गे प्रवेश: स्वर्गप्रवेश: तस्मिन् स्वर्गप्रवेशे कृतं मङ्गलं येन स: कृतमङ्गल: अस्ति। तेन श्व: प्रभाते भीमस्थापत्यं स्त्री भैमी, तस्या: भैम्या: विदर्भराजपुत्र्या: दमयन्त्या: पुन: भूय: स्वयंवरो भावी भविष्यति। तेन अहं खेद: अस्यास्तीति खेदवान् अस्मि ॥८२१॥*

सरलार्थ:- राजा अवदत् - नल: स्वर्गप्रवेशे कृतमङ्गल: अस्ति। तेन श्व: प्रभाते दमयन्त्या: पुन: स्वयंवर: भविष्यति। तेन अहं खेदवान् अस्मि ॥८२१॥

ગુજરાતી :- ત્યારે રાજાએ કહ્યું કે, નલરાજાએ તો સ્વર્ગમાં જવા માટે મંગળ પ્રયાણ કર્યું છે. અને તેથી આવતી કાલે (પ્રભાતમાં જ) દમયંતીનો ફરીને સ્વયંવર થવાનો છે, અને તેથી હું ખેદ પામું છું. ॥૮૨૧॥

हिन्दी :- तब राजाने कहा कि "नलराजाने तो स्वर्ग में जाने के लिये मंगल प्रयाण किया है, और वहाँ कल सुबह दमयंती का फिर से स्वयंवर होनेवाला है इस कारण मैं दु:खित हूँ।" ॥८२१॥

मराठी :- तेव्हा राजा म्हणाला की, नलराजाने तर स्वर्गात मंगल प्रवेश केला आहे. त्यामुळे उया सकाळीच दमयंतीचे पुन्हा स्वयंवर होणार आहे, त्यामुळे मी दु:खित आहे. ॥८२१॥

English :- At this the King replied that Nal had already made his auspiuous departure to heaven and Damyanti here has deaded to have her swayawar to take place at dawn.

कालः स्तोकः प्रभूतोऽध्वा दूतोऽप्यागाद्दिनैर्घनैः ॥
तत्कथं तत्र यातास्मि भैम्यर्थं खिद्यते मनः ॥८२२॥

अन्वय:- काल: स्तोक: अस्ति। अध्वा प्रभूत: वर्तते। दूत: अपि घने: दिनै: आगात्। तत् कथं तत्र यातास्मि। भैम्यर्थं मे मन: खिद्यते॥८२२॥

विवरणम्:- *कालः समयः स्तोकः अल्पः अस्ति। अध्वा मार्गः प्रभूतः दूरतरः द्राघिष्ठः वर्तते। दूतः अपि धनैः बहुभिः दिनैः दिवसैः आगात् अगात्। तत् तस्मात् एतावता अल्पीयसा कालेन अहं तत्र कथं यातास्मि यास्यामि। भैम्यर्थः भैम्याः कृते मे मनः खिद्यते विषीदति ॥८२२॥*

सरलार्थः- कालः अल्पः अस्ति। मार्गः द्राघिष्ठः वर्तते। दूतः अपि बहुभिदिनैः आगतः अस्ति। अहं तत्र कथं यास्यामि। भैम्याः कृते मे मनः खिद्यते॥८२२॥

ગુજરાતી :- સમય થોડો છે, અને માર્ગ ઘણો દૂર છે. તેમ દૂત પણ ઘણે દિવસે આવ્યો, માટે ત્યાં હું કેમ જઈ શકીશ? અને દમયંતીને મેળવવા માટે મારું મન ખેદ પામે છે. ॥૮૨૨॥

हिन्दी :- "समय थोडा है, और मार्ग बहुत लम्बा है, और दूत भी बहूत दिनों के बाद आया है। तो वहाँ मैं किस प्रकार जा सकता हूँ? और दमयंती को प्राप्त करने के लिये मेरा मन व्याकुल हो रहा है।"॥८२२॥

मराठी :- वेळ कमी आहे, आणि मार्ग खूप दूरचा आहे, तसेच दूत पण खूप दिवसांनी आला आहे. त्यामुळे अल्प अवधीत मी तेथे कसा जाऊ शकतो? दमयंतीसाठी माझे मन खेद पावत आहे. ॥८२२॥

English :- He continued saying that the time was less and the wall to be travelled was a long way and even the ambassador had come very late to inform and he had already began installing seeds of loke and of aquising her.

ऊचे कुब्जः क्लिशित्वाऽलं त्वरितं त्वां महीपते ॥
नेतास्मि कुण्डिनं प्रातः साश्वमर्पय मे रथम् ॥८२३॥

अन्वयः- **कुब्जः ऊचे - हे महीपते! क्लिशित्वा अलम्। अहं त्वां त्वरितं प्रातः कुण्डिनं नेतास्मि। मह्यं साश्वं सयमर्पय ॥८२३॥**

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *कुब्ज; ऊचे आह - मह्या: पति: महीपति:, तत्सम्बुद्धौ हे महीपते! राजन्! क्लिशित्वा क्लेशेन अलम्। अहं त्वां त्वरितं शीघ्रं प्रात: प्रभाते कुण्डिनं पुरं नेतास्मि। मह्यम् अश्वै: सह वर्ततेऽसौ साश्व:, तं साश्वम् अश्वसहितं रथम अर्पय देहि॥८२३॥*

सरलार्थ:- कुब्ज: अवदत् - राजन्! क्लेशेन अलम्। अहं त्वां शीघ्रं प्रात: कुण्डिनं पुरं प्रापयिष्यामि। मह्यं अश्वसहितं रथमर्पय ॥८२३॥

ગુજરાતી :- ત્યારે કુબ્જે કહ્યું કે, ક્લેશ પામવાથી સર્યું, હે રાજન્! હું તમોને તુરત પ્રભાતમાં જ કુંડિનપુર લઇ જઈશ માટે મને ઘોડાઓ સહિત રથ આપો.॥૮૨૩॥

हिन्दी :- तब कुब्ज ने कहा कि, "अब क्लेश करना छोड दीजिये। हे राजन्! मैं आप को शीघ्र ही (सुबह) प्रात: ही कुंडिनपुर ले जाऊंगा। इसलिये मुझे आप घोडो सहित रथ दीजिये। ॥८२३॥

मराठी :- तेव्हा कुब्ज म्हणाला की, "महाराज! आता क्लेश करणे पुरे. मी तुम्हाला लवकरच सकाळी कुंडिनपुराला पोहोचवीन यासाठी मला घोड्यासहित रथ या?"॥८२३॥

English :- Then the hunch back replied that he should throw aside all his harrassing thoughts as he will be taking him to Kundinpur by dawn. He then asked the king to give him a charist with horses.

देवो विद्याधरो वापि न सामान्य: पुमानयम् ॥
विमृश्योति नृपस्तस्मै यथोक्तं रथमार्पयत् ॥८२४॥

अन्वय:- अयं देवो वा विद्याधरो वा अस्ति। सामान्य: पुमान् ना इति विमृश्य नृप: तस्मै यथोक्तं रथमार्पयत् ॥८२४॥

विवरणम्:- *अयं देव: वा विद्याधर: वा अस्ति। सामान्य: साधारण: पुमान् पुरुष: न अस्ति। इति विमृश्य ज्ञात्वा पातीति नृप: दधिपर्ण: राजा तस्मै कुब्जाय उक्तमनतिक्रम्य यथोक्तं साश्वं रथम् अर्पयत् अददात् ॥८२४॥*

सरलार्थः- अयं देवः वा विद्याधरः वा अस्ति। सामान्यः पुरुषः न अस्ति। इति विचार्य नृपः तस्मै कुब्जाय अश्वसहितं रथम् अर्पयत् ॥८२४॥

ગુજરાતી :- આ માણસ સાધારણ નથી, કોઈ દેવ અથવા વિદ્યાધર હોવો જોઈએ, એમ વિચારી રાજાએ તેને ઉપર જણાવ્યા મુજબ રથ આપ્યો.॥८२४॥

हिन्दी :- यह मनुष्य साधारण नही, कोइ देव अथवा विद्याधर होना चाहिये। ऐसा सोच कर राजाने उसे अश्वसहित रथ दे दिया॥ ॥८२४॥

मराठी :- हा साधारण मनुष्य नाही कोणी देव अथवा विद्याधर असला पाहिजे असा विचार करुन राजाने त्याला घोड्यासह रथ दिला.॥८२४॥

English :- Then King then thoughts that this man should either be a God or a ogre. He then gave him the chauot.

कुब्जोपि प्रगुणीकृत्य रथं जात्याश्वसंयुतम् ॥
ऊचे नृपमिहारोह कुण्डिने ते दिनोद्गमः ॥८२५॥

अन्वयः- कुब्जः अपि जात्याश्वसंयुतं रथं प्रगुणीकृत्य नृपम् ऊचे - इह आरोह। कुण्डिने ते दिनोद्गमः भविता ॥८२५॥

विवरणम्:- कुब्जः अपि जातौ भवाः जात्याः। जात्याः च ते अश्वाः च जात्याश्वाः जात्याश्वैः संयुतं जात्याश्वसंयुतं जातिमदश्वयुतं रथं न प्रगुणः अप्रगुणः। अप्रगुणं प्रगुणं कृत्वा प्रगुणीकृत्य सज्जीकृत्य नृपं वधिपर्णम् ऊचे उवाच - राजन्! इह अस्मिन् रथे आरोह। कुण्डिने कुण्डिनपुरे ते तव दिनस्य उद्गमः दिनोद्गम; दिनोदयः सूर्योदयः भविष्यति। सूर्योदयसमये त्वं कुण्डिनं प्राप्स्यसि ॥८२५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- कुब्जः अपि जात्याश्वसंयुतं रथं सज्जीकृत्य नृपमाह - राजन्! अस्मिन् रथे आरोह। कुण्डिनपुरे तव सूर्योदयः भविता ॥८२५॥

ગુજરાતી :- પછી કુબ્જે પણ ઉત્તમ જાતિવંત ઘોડાઓવાળો રથ તૈયાર કરીને રાજાને કહ્યું કે, આ રથમાં તમો સ્વાર થાઓ, કુંડિનપુરમાં તમારા દિવસનો ઉદય થશે. ॥૮૨૫॥

हिन्दी :- फिर कुब्जने भी उत्तम जातिवंत घोडेवाला रथ तैयार कर राजा से कहा कि, इस रथ में आप सवार हो जाओ। कुंडिनपुर में ही आपका सुर्योदय होगा॥८२५॥

मराठी :- नंतर कुब्ज पण उत्तम जातिवंत घोड्याचा रथ तयार करून राजाला म्हणाला की, महाराज! या रथात बसा. सकाळी कुंडिनपुरात सूर्योदय होईल. सूर्योदयाला तुम्ही कुंडिनपुरात पोहोचाल.॥८२५॥

English :- Then choosing the best breed of horses, the hunchback asked the King to mount the chariot and told him that he will experience, sunrise at Kundinpur.

स्थगीभृच्छत्रभृद्भूभृद् द्वौ च चामरधारिणौ ॥
आरोहन्ति स्म पञ्चेति रथे षष्ठश्च कुब्जकः ॥८२६॥

अन्वयः- स्थगीभृत, छत्रभृत्, भूभृत्, द्वौ चामरधारिणौ च इति पञ्च षष्ठः कुब्जकश्च रथे आरोहन्ति स्म ॥८२६॥

विवरणम्:- स्थगीं दण्डं बिभर्तीति स्थगीभृत् दण्डधारी, छत्रं बिभर्तीति छत्रभृत् छत्रधारी, भुवं बिभर्तीति भूभृत् भूपः, द्वौ, चामरौ धरतः इत्येवंशीलौ चामरधारिणौ च इति पञ्च षष्ठः कुब्जकः च इत्येवं षटपुरुषा रथे आरोहन्ति स्म आरोहन् ॥८२६॥

सरलार्थः- दण्डभृत्, छत्रधरः, भूभृत् (नृपः) द्वौ चामरधारिणौ इत्येवं पञ्च षष्ठः कुब्जः च तस्मिन् रथे आरोहन् ॥८२६॥

ગુજરાતી :- છડીદાર, છત્ર ધરનારો, રાજા, તથા બે ચામર વીંઝનારા એ રીતે તે પાંચ, અને છઠ્ઠો કુબ્જ, એમ છ માણસો રથમાં સ્વાર થયા.॥૮૨૬॥

हिन्दी :- छडीदार, छत्र धरनेवाला, राजा और दो चामर धरनेवाले इसप्रकार वे पांच और छठ्ठा कुब्ज इतने आदमी रथ में स्वार हो गये ॥८२६॥

मराठी :- छडीदार, छत्र धारी राजा आणि दोन चामर हलविणारे असे ते पांच आणि सहावा कुब्ज असे सहा जण त्या रथात स्वार झाले. ॥८२६॥

English :- Then the King, the two mace-beares, two fanners and the hunch-back mounted the chariot.

पद्य (हय) कट्यामथाबध्य ते श्रीफलकरण्डके ॥
रथ्यानखेटयत् कुब्जः कृतदेवगुरुस्मृतिः ॥८२७॥

अन्वयः- अथ पद्य (हय) कट्याम् ते श्रीफलकरण्डके आबध्य कृत देव गुरुस्मृतिः कुब्जः रथ्यान् अखेटयत्॥८२७॥

विवरणम्:- अथ अनन्तरं पद्यानां (हयानां) कटिः पद्य कटिः, तस्या पद्यकटयाम् अश्वकट्यां द्वे श्रीफलस्य करण्डके श्रीफलकरण्डके आबध्य देवश्च गुरुश्च देवगुरु देवगुर्वोः स्मृतिः देवगुरुस्मृतिः। कृता देवगुरुस्मृतिः येन सः कृतदेवगुरुस्मृतिः देवं गुरुं च स्मृत्वा कुब्जः रथं वाहन्तीति रथ्याः, तान् रथ्यान् अश्वान् अखेटयत् अनुदत् ॥८२७॥

सरलार्थः- अनन्तरं अश्वकट्यां द्वे श्रीफलकरण्डके आबध्य देवं गुरुं च स्मृत्वा कुब्जः रथस्य अश्वान् अनोदयत् ॥८२७॥

ગુજરાતી :- પછી ઘોડાઓની કેડે શ્રીફલના ડાબલાઓ બાંધીને કુબ્જે દેવગુરુનું સ્મરણ કરીને ઘોડાઓને હંકારવા માંડ્યા.॥८२७॥

हिन्दी :- फिर घोडों की कमर पर श्रीफळ के दो डब्बे बांधकर कुब्ज देवगुरु का स्मरण कर घोडो को हांकने लगा ॥८२७॥

मराठी :- नंतर योद्याच्या कमरेला श्रीफळाचे दोन करण्डे बांधून कुब्ज देवगुरूंचे स्मरण करुन योद्यांना हाक् लागला.॥८२७॥

English :- Then the hunchback tied two boxes of wood-apples on the horses backs and memorizing the name of God, began to urge the horses to speed off.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नलेन प्रेरितैरश्वैरश्वरूपैः सुरैरिव।
आकृष्टः प्रावृतत् गन्तुं रथः क्ष्मामस्पृशन्निव ॥८२८॥

अन्वयः- अथ अश्वरूपैः सुरैः इव नलेन प्रेरितैः अश्वैः आकृष्टः रथः क्षाम् अस्पृशन् इव गन्तुं प्रावृतत् ॥८२८॥

विवरणम्:- अथ अनन्तरम् अश्वस्य रुपमिव येषां ते अश्वरुपाः तैः अश्वरुपै. अश्वरुपधारिभिः सुरैः देवैः इव (उत्प्रेक्षायाम्) नलेन प्रेरितैः नोदितैः अश्वैः हयैः आकृष्टः सः रथः क्ष्मां पृथ्वीम् न स्पृशन अस्पृशन् इव गन्तुं प्रावृतत् प्रावर्तत॥८२८॥

सरलार्थः- अनन्तरम् अश्वरुपधरैः देवैः इव नलेन प्रेरितैः अश्वैः आकृष्टः सः रथः भूमिम् अस्पृष्ट्वा इव गन्तुं प्रावर्तत ॥८२८॥

ગુજરાતી :- પછી ઘોડાઓનું રુપ ધરનારા જાણે દેવો હોય એમ તે નલે હંકારેલા ઘોડાઓ વડે ખેંચાતો તે રથ, જાણે પૃથ્વીને પણ સ્પર્શ ન કરતો હોય તેમ દોડવા લાગ્યો.॥૮૨૮॥

हिन्दी :- फिर घोडों का रुप धारण करनेवाले मानो देव न हो! ऐसे वह नल के द्वारा हांके हुए घोडो के साथ खिंचता हुआ वह रथ, मानो पृथ्वी को स्पर्श न करता हो वैसे दोडने लगा॥८२८॥

मराठी :- मग घोड्यांचे रुप धारण करणारे जणू देवच अशा त्या नळाने प्रेरित केलेल्या घोड्यांकडून ओढला जाणारा रथ जणू पृथ्वीला स्पर्श न करताच चालू लागला. ॥८२८॥

English :- Then it seemed that the Gods had actvally taken the forms. of the horses, who had made the chariot fly off, with the wind.

दधिपर्णस्य संज्यानं रथे यात्यतिरंहसा ॥
लुण्टाकेनेव मरुताच्छोटितं न्यपतत् तदा ॥८२९॥

अन्वयः- तदा अतिरंहसा रथे याति सति रुण्टाकेन इव मरुता आच्छोटितं दधिपर्णस्य संज्यानं न्यपतत् ॥८२९॥

विवरणम्:- *तदा तस्मिन् समये अतिशयेन रहं: अतिरंहा, तेन अतिरंहसा महता वेगेन रथे याति गच्छति सति लुण्टतीति लुण्टाकः तेन लुण्टाकेन इव (उत्प्रेक्षायाम्) मरुता वायुना आच्छोटितम् उड्डायितं दधिपर्णस्य नृपस्य संव्यानम् उत्तरीयं न्यपतत् रथात् अधः अपतत् ॥८२९॥*

सरलार्थः- तदा अतिमहता वेगेन रथे चलति सति लुण्टाकेन इव वायुना दधिपर्णस्य उत्तरीयम् उड्डावितम्। तद् रथात् न्यपतत् ॥८२९॥

गुजराती :- તે રથ અતિ વેગથી દોડતો હતો ત્યારે લુંટારા સરખા વાયુથી ઉડેલો દધિપર્ણ રાજાનો દુપટ્ટો નીચે પડી ગયો.॥८२९॥

हिन्दी :- उस समय वह रथ अति वेगसे दौडता था तब लुटेरे के समान वायु के द्वारा उडाया गया दधिपर्ण राजा का दुपट्टा नीचे गिर पडा ॥८२९॥

मराठी :- त्या वेळेला तो रथ अति वेगानी धावत असतांना लुटारू प्रमाणे वायूने उडविलेला दधिपर्ण राजाचा दुपट्टा खाली पडला. ॥८२९॥

English :- Then the chariot that had now experienced utmost velocity, suddenly experienced that the wind had plundered the long scarf of the king.

दधिपर्णोऽवदत्कुब्ज! मरुतापहृतां पटीम् ॥
आनाययाम्यहं यावद् रथं तावद् विलम्बय ॥८३०॥

अन्वयः- दधिपर्णः अवदत् - कुब्ज! अहं मरुता अपहृतां पटीं यावत् आनाययामि तावत् रथं विलम्बस्य ॥८३०॥

विवरणम्:- *दधिपर्णः नृपः अवदत् - अवोचत् -कुब्ज! अहं मरुता वायुना अपहृताम् आच्छोटितां पटीं यावत् आनाययामि। तावत् रथं विलम्वस्व स्थापय ॥८३०॥*

सरलार्थः- दधिपर्णः सवदत् - कुब्ज! मदीयमुत्तरीयं महता मरुता अपहृतमस्ति। अतः यावत् अहं तद् आनाययामि तावत् रथं स्थापय ॥८३०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે દધિપર્ણ રાજાએ કહ્યું કે, હે કુબ્જા! વાયુથી નીચે પડી ગયેલો મારો દુપટ્ટો હું મગાવી લઉં, ત્યાં સુધી તું રથને થોભાવ.॥૮૩૦॥

हिन्दी :- तब दधिपर्ण राजा ने कहा कि, "हे कुब्ज हवा से नीचे गिरा हुआ मेरा दुपट्टा मैं मंगवाता हूँ, तब तक तुम रथ को रोको।

मराठी :- तेव्हा दधिपर्ण राजा म्हणाला, हे कुब्जा। वायूने उडविलेला खाली पडलेला माझा दुपट्टा मी आणावयास सांगतो तोपर्यंत तू रथ थांबव. ॥८३०॥

English :- At this the King asked the hunch back to stop the chariot, so that he can get back his scarf.

सोऽवदन्मे पटीवार्ता यावताऽख्यायि भोस्त्वया ॥
तावतैष रथो यातः पञ्चविंशतियोजनीम् ॥८३१॥

अन्वयः- सः अवदत् - भोः! यावता त्वया मे पटीवार्ता अख्यामि तावता एषः रथः पञ्चविंशति योजनीं यातः ॥८३१॥

विवरणमः- सः कुब्जः अवदत् - अब्रवीत्। भो राजन्! यावता समयेन त्वया मे मह्यं पट्याः वार्ता पटीवार्ता उत्तरीयाच्छोटनवार्ता अख्यायि कथितातावता समयेन एषः रथः पञ्चाधिका विंशतिः पञ्चविंशतिः। पञ्चविंशतेः योजनानां समाहारः पञ्चविंशतियोजनी, तां पञ्चविंशतियोजनीं यातः। पञ्चविंशति योजन प्रमाणं मार्गम् अतिक्रान्तः ॥८३१॥

सरलार्थः- सः कुब्जः अवदत् - भोः राजन्! यावता समयेनं त्वया मह्यं पटीवार्ता कथिता। तावतां समयेन रथः पञ्चविंशति योजनीम् अतिक्रान्तः ॥८३१॥

ગુજરાતી :- પછી તેણે કહ્યું કે, હે રાજન! જેટલામાં તમોએ મને દુપટ્ટાની વાત કરી, તેટલામાં તો આ રથ પચીસ જોજન આગળ નીકળી ગયો છે.॥૮૩૧॥

हिन्दी :- तब कुब्जने कहा, "हे राजन! आपने जितनी देर में मुझे दुपट्टे की बात कही, उतनी देर में तो यह रथ पच्चीस योजन आगे निकल गया है।"॥८३१॥

मराठी :- तेव्हा कुब्ज म्हणाला- महाराज! जितक्या वेळात तुम्ही मला दुपट्याची गोष्ट सांगितली, तितक्या वेळात हा रथ पंचवीस योजन पुढे निघून गेला आहे. ॥८३१॥

English :- The hunchback replied that, it was impossible to get it back now becouse the chariot had travelled twenty five yojans (220 miles) ahead, as the King finished of his stalement of requesting the hunchback to stop the chariot.

मध्यमा एव चैतऽश्वाः सत्तमाः स्युः पुनर्यदि ॥
कालेनैतावता यायुस्ते तद्द्विगुणमप्यहो ॥८३२॥

अन्वयः- एते अश्वाः मध्यमाः एव । यदि पुनः सत्तताः स्युः । तर्हि एतावता कालेन ते तद्द्विगुणमपि यायुः ॥८३२॥

विवरणम्:- एते अश्वाः मध्यमाः मध्यमगतयः एव भवन्ति । यदि पुनः अतिशयेन सन्तः सत्तमाः उत्कृष्टगतयः स्युः । तर्हि एतावता कालेन ते तस्य द्विगुणं तद्द्विगुणम् अपि मार्गं यायुः गच्छेयुः ॥८३२॥

सरलार्थः- तऐ अश्वा: मध्यमा: एव सन्ति । यदि पुनः सत्तमाः स्युः अभाविष्यन् तर्हि एतावता कालेन तस्य द्विगुणं मार्गम् अयास्यन् ॥८३२॥

ગુજરાતી :- વળી આ ઘોડાઓ તો હજુ મધ્યમ જાતિના જ છે, પરંતુ જો ઉત્તમ જાતિના હોત, તો આટલા સમયમાં તો તેઓ તેથી બમણો પંથ પણ વટાવી જાત. ॥८३२॥

हिन्दी :- ये घोडे मध्यम जाति के है। यदि ये उत्तम जाति के होते तो इतने समय में तो वे दुगुना पथ काट लेते॥८३२॥

मराठी :- तरीपण हे घोडे मध्यम जातीचे आहे. परंतु जर हे उत्तम जातीचे असते, तर इतक्या वेळांत ते त्याहून दुपट्ट मार्ग चालले गेले असते. ॥८३२॥

English :- He continued saying that as these horses were of a mediwm qvality breed so it had travelled only twenty fine yojans, if it had been of the best breed, it would have travelled doule this by now.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अक्षं फलितमालोक्य दूरात् कुब्जं नृपोऽवदत् ॥
फलसंख्यां तवाख्यास्याम्यमुष्याऽगणयन्नपि ॥८३३॥

अन्वयः- अक्षं दूरात् फलितम् आलोक्य नृपः कुब्जम् अवदत् - अहम् अगणयन् अपि तव अमुष्य फलसंख्याम् आख्यास्यामि ॥८३३॥

विवरणम्:- अक्षं रुद्राक्षं दूरात् फलानि अस्य सञ्जातानि इति फलितः, तं फलितं फलयुक्तम् आलोक्य दृष्ट्वा नृप: दधिपर्णः कुब्जम् अवदत् - अब्रवीत् - अहम् न गणयन् अगणयन् अपि तव तुभ्यं अमुल्य रुद्राक्षस्य फलानां संख्या फलसंख्या, तां फलसंख्याम् आख्यास्यामि कथयिष्यामि ॥८३३॥

सरलार्थः- मार्गे रुद्राक्षं दूरात् फलितम् आलोक्य नृपः कुब्जम् अवदत् अहममुष्य वृक्षस्य फलानि न गणयित्वा अपि तुभ्यं फलसंख्याम आख्यास्यामि ॥८३३॥

ગુજરાતી :- (માર્ગમાં) રુદ્રાક્ષના વૃક્ષને દૂરથી ફળરૂપ થયેલું જોઈને રાજાએ કુબ્જને કહ્યું કે, (આ વૃક્ષના) ફળની સંખ્યા ગણ્યાવિના પણ તને કહી શકીશ. ॥८३३॥

हिन्दी :- (रास्ते में) रुद्राक्ष वृक्ष को दूर से फलो से लदा देखकर राजाने कुब्ज से कहा कि, (इस वृक्ष के) फलो की संख्या बिना गिने भी तुझे कह सकता हूँ। ॥८३३॥

मराठी :- रस्त्यात दूरूनच एक फळांनी बहरलेला रुद्राक्ष वृक्ष पाहून दधिपर्ण राजा कुब्जाला म्हणाला- मी न मोजताच या झाडावरील फळांची संख्या तुला सांगतो. ॥८३३॥

English :- The King then seen a Eleocarpus ganitrus tru (Rudraksh) and said to the hunch-back that he can tell him the number of fruits that are on the tree.

व्यावृत्तैः परमेतत्ते कौतुकं दर्शयिष्यते ॥
स्वयंवरोऽधुना कालविलम्बं क्षमते न हि ॥८३४॥

अन्वयः- परं व्यावृत्तैः एतत् कौतुकं ते दर्शयिष्यते । अधुना स्वयंवरः कालविलम्बं न क्षमते॥८३४॥

विवरणम्:- *परं परन्तु व्यावृत्तैः कुण्डिनपुरा परावृत्तैः अस्माभिः एतत् कौतुकम् आश्चर्यं ते तुभ्यं दर्शयिष्यते । अधुना स्वयंवरः कालस्य विलम्बः कालविलम्बः, तं कालविलम्बं कालक्षेपं न सहते म क्षमते ॥८३४॥*

सरलार्थः- किन्तु स्वयंवरात् परावृत्तैः अस्माभिः एंतत् कौतुकं तुभ्यं दर्शयिष्यते । अधुना स्वयंवरः कालक्षेपं न क्षमते॥८३४॥

ગુજરાતી :- પરંતુ પાછા વળતી વખતે હું તને આ કૌતુક દેખાડીશ, કેમકે હમણાં આ સ્વયંવર સમયનો વિલંબ સહન કરી શકાય તેમ નથી. ॥८३४॥

हिन्दी :- लेकिन फिर वापस आते समय मैं तुम्हे यह कौतुक दिखाऊंगा, क्यों कि अभी यह स्वयंवर समय का विलंब सहन कर सकुं ऐसा नही है। ॥८३४॥

मराठी :- नंतर परत येतांना मी तुला हे कौतुक दाखविन. कारण आता उशीर झाला तर स्वयंवराची वेळ टळून जाईल.॥८३४॥

English :- The king then said that he will show this frolic spectale on his return as now he cannot bear the tardy procrastination of the swayawar

कुब्जो जगाद मा भैषीः राजन् कालविलम्बतः ॥
न दूरे कुण्डिनं पुरं सारथ्यं मयि कुर्वति ॥८३५॥

अन्वयः- कुब्जः जगाद । राजन्! कालविलम्बतः मा भैषीः । मयि सारथ्यं कुर्वति कुण्डिनं पुरं दूरे न ॥८३५॥

विवरणम्:- *कुब्जः जगादं जगौ - राजन्! कालस्य विलम्बः कालविलम्बः तस्मात् कालविलम्बतः मा भैषीः । भयेन अलम् । यावत् अहं सारथेः कर्म सारथ्यं करोमि तावत (मयि सारथ्यं कुर्वति सति) कुण्डिनं पुरं दूरे न वर्तते ॥८३५॥*

सरलार्थः- कुब्जः अवोचत् - राजन्! कालविम्बात् मा बिभीहि । यावत् अहं सारथ्यं करोमि तावत् कुण्डिनं पुरं दूरे न वर्तते ॥८३५॥

ગુજરાતી :- ત્યારે કુબ્જે કહ્યું કે, હે રાજન્! સમયનાં વિલંબ માટે તમો ડરો નહીં. મારા સારથિપણામાં કુંડિનપુર દૂર નથી.॥८३५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- तब कुब्जने कहा कि, "हे राजन! समय के विलंब के लिये आप डरीये नहीं। मैं सारथी होते हुए कुंडिनपुर दूर नहीं।"॥८३५॥

मराठी :- तेव्हा कुब्जं म्हणाला की, महाराज! उशीर होईल म्हणून तुम्ही भिऊ नका मी सारथी असतांना तुम्हाला कुंडिनपुर दूर नाही. ॥८३५॥

English :- At this the hunch-back replied that the King should not feel afraid of reaching late for the swayawar, when he has him, for a charioteer as Kundinpur is not far now.

सर्वाण्यपि फलान्यस्य पातयिष्यमि तेऽग्रतः ॥
मुष्टिमात्रप्रहारेण विश्वभूतिकपित्थवत् ॥८३६॥

अन्वयः- अहम् अस्य सर्वाणि अपि फलानि विश्वभूतिकपित्थवत् मुष्टिमात्रप्रहारेण ते अग्रतः पातयिष्यामि ॥८३६॥

विवरणम्:- अहं अस्य वृक्षस्य सर्वाणि अपि फलानि विश्वभूतेः कपित्थानि विश्वभूतिकपित्थानि। विश्वभूतिकपित्थैः तुल्यं विश्वभूतिकपित्थवत् विश्वभूतिना पातितानि कपित्थफलानि इव मुष्टिः एव मुष्टिमात्रम्। मुष्टिमात्रेण प्रहारः मुष्टिमात्रप्रहारः, तेन मुष्टीमात्रप्रहारेण केवलमुष्टिप्रहारेण ते अग्रतः पुरतः पातयिष्यमि ॥८३६॥

सरलार्थः- अहम् अस्य वृक्षस्य सर्वाणि फलानि विश्वभूतीना पातितानि कपित्थफलानि इव मुष्टिमात्रप्रहारेण तव पुरतः पातयिष्यामि ॥८३६॥

ગુજરાતી :- આ વૃક્ષનાં સઘળાં ફળને હું વિશ્વભૂતિએ તોડી પાડેલાં ફળની પેઠે, ફક્ત એક મૂઠીના પ્રહારથી જ તારી પાસે તોડી પાડીશ. ॥८३६॥

हिन्दी :- इस वृक्ष के सभी फलों को मैं विश्वभूति के द्वारा तोडे हुए फलों के समान, केवल एक मुट्ठी के प्रहार से ही आपके पास गिराऊंगा॥८३६॥

मराठी :- मी विश्वभूतीप्रमाणे एका मुठीच्या प्रहाराने त्या झाडावरील सर्व फळे तुमच्या पुढे पाडीन. ॥८३६॥

English :- Then the hunch-back told the King that he can blow down the fruits with just one blow of his fist, just as Vishwabhuti had done rarlier.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

दधिपर्णोऽवदत्तर्हि किं वलम्बेन पात्यताम् ॥
अष्टादश सहस्राणि सन्त्येतानि न संशय: ॥८३७॥

अन्वय:- दधिपर्ण: अवदत् - तर्हि विलम्बेन किम्? पात्यताम्। एतानि अष्टादश सहस्राणि सन्ति। न संशय: ॥८३७॥

विवरणम्:- दधिपर्ण: अवदत् - अवोचत् - तर्हि विलम्बेन किम्? किमर्थं विलम्बते। सत्वरं पात्यताम्। एतानि सर्वाणि फलानि अष्टादश सहस्राणि सन्ति। अत्र संशय: नास्ति ॥८३७॥

सरलार्थ:- दधिपर्ण: अवदत् - तर्हि विलम्बेन किम्? सत्वरं पात्यताम्। एतानि सर्वाणि अष्टादश सहस्राणि सन्ति। अत्र संशय: नास्ति ॥८३७॥

ગુજરાતી :- ત્યારે દધિપર્ણે કહ્યું કે, તો પછી વિલંબની શી જરુર છે? તોડી પાડ. આ અઢાર હજાર ફળો છે, તેમાં સંદેહ નથી.॥८३७॥

हिन्दी :- तब दधिपर्ण राजा ने कहा, "तो फिर देर किस बात की है? तोड डाला ये अठारह हजार फल हैं, इसमें संदेह नही।"॥८३७॥

मराठी :- तेव्हा दधिपर्ण म्हणाला की, तर मग विलंब का? ही सर्व फळे अठरा हजार आहेत, यात काही संशय (शंका) नाही. ॥८३७॥

English :- Then King Dadiparne askes the hunchback to drop down all the lighteen thousand fruits. He adds that there is no doubt about the tree tendering eighteen thousand fruits.

कुब्जोऽथापातयत्तानि नीरद: करकानिव ॥
गणयामास च क्ष्माभृद्यथोक्तान्येव चाभवन् ॥८३८॥

अन्वय:- अथ नीरद: करकान् इव कुब्ज: तानि अपातयत्। क्ष्माभृत् गणयामास। यथरोक्तानि एव अभवन्॥८३८॥

विवरणम्:- अथ अनन्तरं नीरं जलं ददातीति नीरद: जलद: करकान् हिमखण्डान् इव कुब्ज: तानि फलानि अपातयत्। क्ष्मां विभर्तीति क्ष्माभृत् भूभृत् नृप: गणयामास अजीगणत्। यथा उक्तानि तथा एव अष्टादश सहस्राणि अभवन्॥८३८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- अनन्तरं जलदः यथा करकान् पातयति। तथा कुब्जः तानि फलानि अपातयत्। नृपः तानि अगणयत्। तानि यथा उक्तानि तथा एव अष्टादश सहस्राणि अभवन् ॥८३८॥

ગુજરાતી :- પછી મેઘ જેમ કરાઓને પાડે, તેમ કુબ્જે તે ફલો પાડ્યાં, અને રાજાએ તે ગણ્યાં, એટલે કહ્યા મુજબ (અઠાર હજાર) થયા.॥८३८॥

हिन्दी :- फिर मेघ जिसप्रकार ओले गिराता है उसी प्रकार कुब्ज ने फल गिराये और राजा ने वह फल गिने, जो उनके कहे अनुसार अठारह हजार थे। ॥८३८॥

मराठी :- मग मेघ जसा गारांचा वर्षाव करतो. त्याप्रमाणे कुब्जाने मुठीचा प्रहार करून झाडावरील सर्व फळे पाडली. राजाने ती फळे मोजली. तेव्हा राजाने सांगितल्याप्रमाणे ती फळे अठरा हजार होती.॥८३८॥

English :- Then just as the clouds blow down hail storms in the same way the hunchback blows down the fruits with just a blow of the fist. Then the King counts them which in turn as he had said counted to be exactly eighteen thousand.

अश्वविद्यामदात् कुब्जो याचमानाय भूभुजे ॥
फलसंख्यानविद्यां च गृह्णाति स्म ततः स्वयम् ॥८३९॥

अन्वयः- कुब्जः याचमानाय भूभुजे अश्वविद्याम् अददात् स्वयं च ततः फलसङ्ख्यानविद्यां गृह्णाति स्म ॥८३९॥

विवरणम्:- कुब्जः याचमानाय वन्वानाय भुवं भुनक्ति भुङ्क्ते वा भूभुक्, तस्मै भूभुजे भूपतये अश्वानां विद्या अश्वविद्या, ताम् अश्वविद्याम् अददात् व्यतरत्। स्वयं च ततः नृपात् फलानां सङ्ख्यानं फलसङ्ख्यानम् फलसङ्ख्यानस्य विद्या फलसङ्ख्यानविद्या, तां फलसङ्ख्यानविद्यां फलसङ्ख्यनवद्यां गृह्णाति स्म अगृह्णात् ॥८३९॥

सरलार्थः- कुब्जः याचमानाय नृपाय अश्वविद्याम् अददात्। स्वयं च नृपात् फलसङ्ख्यानविद्याम् अगृह्णात् ॥८३९॥

ગુજરાતી :- પછી રાજાએ માગણી કર્યાથી કુબ્જે તેને અશ્વવિદ્યા આપી, અને તેની પાસેથી તેણે ફલસંખ્યાની વિદ્યા ગ્રહણ કરી.॥૮૩૯॥

हिन्दी :- फिर राजा द्वारा अश्वविद्या की मांग करने से कुब्ज ने उनको अश्वविद्या दी और उनके पास से उसने फल संख्या की विद्या प्राप्त की॥८३९॥

मराठी :- मग राजाने मागणी केल्याने कुब्जने त्यांना अश्वविद्या दिली, आणि राजाकडून त्याने फळसंख्येची विद्या ग्रहण केली.॥८३९॥

English :- Then on the request of the King the hunch-back gave him the knowledge of horcemanohip and in turn attained the knowledge of the fruit numerology.

भानावुदयिनि प्राप्तः कुण्डिनं निकषा रथः ॥
दधिपर्णोऽपि तद्वीक्ष्य भैमीप्राप्त्येव हृष्टवान् ॥८४०॥

अन्वयः- भानौ उदयनिनि सत्येव रथः कुण्डिनं निकषा प्राप्तः। तद्वीक्ष्य दधिपर्णः अपि भैमीप्राप्त्या इव हृष्टवान्॥८४०॥

विवरणम्:- भानौ सूर्ये उदयः अस्यास्तीति उदयी, तस्मिन् उदयिनि उदयवति सति एव रथः कुण्डिनं पूरं निकषा समीपे प्राप्तः आगतवान्। तद् वीक्ष्य अवलोक्य दधिपर्णः नृपः अपि भीमस्यापत्यं स्त्री भैमी भीमराजपुत्री। भैम्याः दमयन्त्याः प्राप्तीः भैमीप्राप्तिः तया भैमीप्राप्त्या दमयन्तीलाभेन इव हृष्टवान् अहृष्यत् हृष्टः ॥८४०॥

सरलार्थः- सूर्योदये एव रथः कुण्डिनपुरसमीपम् आगतः। तद् अवलोक्य नृपः दधिपर्णः दमयन्तीप्राप्त्या इव अहृष्यत् ॥८४०॥

ગુજરાતી :- સૂર્યનો ઉદય થતાં જ રથ કુંડિનપુર પાસે આવી પહોંચ્યો. દધિપર્ણરાજા પણ તે જોઈને જાણે દમયંતીની પ્રાપ્તિ થઈ હોય નહીં! તેમ ખુશી થયો.॥૮૪૦॥

हिन्दी :- सूर्योदय होते ही रथ कुंडिनपुर जा पहुंचा। दधिपर्ण राजा यह देखकर उसी प्रकार खुश हुआ मानो दमयंती की प्राप्ति हो गई हो॥८४०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- सूर्योदय होताच रथ कुंडिनपुराजवळ येऊन पोहचला, दधिपर्ण राजा पण वेड्यासारखा जणू दमयंतीची प्राप्ति झाली अशाप्रकारे खुष झाला.॥८४०॥

English :- At down, the chariot reached the gates of Kundinpur. This made the king so overjoyed that it seemed as though he had already made Damyanti his own.

तदा च स्वपितुः स्वप्नपाठकस्येव भीमजा ॥
स्वप्नमावेदयामास निशाशेषावलोकितम् ॥८४१॥

अन्वयः- तदा भीमजा नशाशेषावलोकितं स्वप्नं स्वप्नपाठकस्य इव स्वपितुः आवेदयामास ॥८४१॥

विवरणम्:- तदा तस्मिन् समये भीमात् जायते इति भीमजा भीमपुत्री दमयन्ती निशायाः रजन्याः शेषः निशाशेषः । निशाशेष अवलोकितः निशाशेषावलोकितः, तं निशाशेषावलोकितं रात्रिशेषे अवलोकितं स्वप्नं स्वप्नस्य पाठकः स्वप्नपाठकः, तस्य स्वप्नपाठकस्य इव पितुः जनकस्य भीमराजस्य आवेदयामास अचीकथत् ॥८४१॥

सरलार्थः- तदा दमयन्ती रात्रिशेषे अवलोकितं स्वप्नं स्वप्नपाठकस्य इव पितुः जनकस्य भीमराजस्य आवेदयामास कथयामास ॥८४१॥

गुजराती :- હવે તે વખતે દમયન્તીએ પાછલી રાત્રિએ જોયેલું સ્વપ્ન જેમ સ્વપ્નપાઠકને કહી સંભળાવે, તેમ પોતાના પિતાજીને કહી સંભળાવ્યું. ॥८४१॥

हिन्दी :- अब उस समय दमयंतीने पिछली रात को देखा स्वप्न जैसे स्वप्नपाठक को कह सुनाते हैं उसीप्रकार अपने पिताजी को कह सुनाया॥ ॥८४१॥

मराठी :- तेव्हा दमयंतीने मागच्या रात्री पाहिलेले स्वप्न ज्याप्रमाणे स्वप्न पाठकाला सांगतो त्याप्रमाणे स्वतःच्या वडिलांना सांगितले. ॥८४१॥

English :- At that time, the previous night, Damyanti had a dream. She began telling her father about the dream just as one tells a on eirocritic.

साक्षादिव मया तात स्वप्नेऽद्याडदर्शि निर्वृतिः ॥
तया च कोशलोद्यानमत्रानीतं गृहाङ्गणे ॥८४२॥

अन्वयः- हे तात! अद्य मया स्वप्ने साक्षात् इव निर्वृतिः अदर्शि। तया च अत्र गृहाङ्गळे कोशलोद्यानम् आनातम् ॥८४२॥

विवरणम्:- *हे तात! अद्य मया स्वप्ने साक्षात् इव निर्वृतिः नाम देवी अदर्शि। तया अत्र गृहस्य अङ्गणं गृहाङ्गणे तस्मिन् गृहाङ्गणे कोशलायाः उद्यानम् उपवनं कोशलोद्यानं कोशलोपवनम् आनीतम् इति अदर्शि॥८४२॥*

सरलार्थः- हे तात! अद्य मया स्वप्ने साक्षात् निर्वृतिः अदर्शि। तया च अत्र गृहाङ्गणे कोशलायाः उद्यानं समानीतम्, इति अदर्शि॥८४२॥

गुजराती :- હે પિતાજી! મેં આજે સ્વપ્નમાં જાણે સાક્ષાત્ નિર્વૃતિ નામની દેવીને જોયાં, અને તેણીએ કોશલા નગરીનું ઉદ્યાન અહીંજ ઘરના આંગણામાં લાવીને મૂક્યું.॥८४२॥

हिन्दी :- हे पिताजी! मैंने आज सपने में मानो साक्षात् निवृति नामक देवी को देखा, और उन्होने कोशला नगरी का उद्यान यहीं घर के आंगण में लाकर रखा॥८४२॥

मराठी :- बाबा! मी आज स्वप्नात जणू काही साक्षात् निवृति नावाच्या देवीला पाहिले आणि तिने कोशला नगरीचे उद्यान येथे घराच्या अंगणात आणले. असे पाहिले. ॥८४२॥

English :- She says that, sht happened to see a Goddess named Nivruti, who had bought the garden from the city of Koshala, in their courtyard.

तन्मण्डनं च माकन्दमध्यारुढास्मि तद्गिरा॥
कमलाया निवासार्हं कमलं चार्पयन्मम ॥८४३॥

अन्वयः- तद्गिरा अहं तन्मण्डनं माकन्दम् आरुढा अस्मि। सा मम कमलाया निवासार्हं कमलम् आर्पयत् ॥८४३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *तस्याः निर्वृतेः गीः तद्गीः, तया तद्गिरा निर्वृतिवचनेन अहं तस्य उद्यानस्य मण्डनं तन्मण्डनं तदुद्यानाभरणं माकन्दम् आम्रवृक्षम् आरुढा अस्मि। सा निर्वृतिदेवी मम मह्यं कमलायाः लक्ष्म्याः निवासाय अर्हं योग्य निवासार्हं कमलम् आर्पयत् अददात् ॥८४३॥*

सरलार्थः- तस्याः निर्वृतिदेव्याः वचनेन अहं तदुद्यानविभूषणं माकन्दमारुढा। सा निर्वृतिदेवी मह्यं लक्ष्मीनिवासयोग्यं कमलम् आर्पयत् ॥८४३॥

ગુજરાતી :- તેણીના કહેવાથી તે ઉદ્યાનનાં મંડનરુપ આમ્રવૃક્ષ પર હું ચઢી, અને તેણીએ મને લક્ષ્મીના વાસસમ્ કમલ અર્પણ કર્યું.॥८४३॥

हिन्दी :- उनके कहने से मैं उस उद्यान के मंडनरूप आम्रवृक्ष पर चढी और उन्होने मुझे लक्ष्मी के निवास-योग्य कमल अर्पण किया॥८४३॥

मराठी :- त्या निर्वृति देवीच्या म्हणण्याप्रमाणे त्या उद्यानाला मंडनरूप असलेल्या आम्रवृक्षावर मी चढली तेव्हा तिने मला लक्ष्मीच्या निवासास योग्य असे कमळ अर्पण केले. ॥८४३॥

English :- Then she climbed on the mango tree, that had increased the splendour of the garden and then Goddess Laxmi gave her a lotus which was fit for herself to reside in it.

पूर्वारुढो विहङ्गश्च पक्कपत्रमिवापतत् ॥
तदाकर्ण्याऽवदद्भीमः स्वप्नस्ते पुत्रि सत्फलः ॥८४४॥

अन्वयः- पूर्वारुढः विहङ्गः च पक्कपत्रम् इव अपतत्। तद् आकर्ण्य भीमः अवदत् - हे पुत्रि! ते स्वप्नः सत्फलः ॥८४४॥

विवरणम्:- *पूर्वमारुढः पूर्वारुढः विहङ्गः पक्षी पक्कं च तत् पत्रं च पक्कपत्रम् इव अपतत्। तद् आकर्ण्य निशम्य भीमः अवदत् - अवोचत् - हे पुत्रि! ते तव स्वप्नः सत् सुचारु फलं यस्य सः सत्फलः सुचारुफलः भवेत्, इति ॥८४४॥*

सरलार्थः- पूर्वमारुढः पक्षी पक्वफलवत् अपतत्। तद् आकर्ण्य भीमः अवदत् - हे पुत्रि! तव स्वप्नः सुचारुफलः भवेत् ॥८४४॥

ગુજરાતી :- પછી પૂર્વે ચડેલું પક્ષી પાકાં પાંદડાંની પેઠે તે પરથી પડી ગયું, તે સાંભળીને ભીમરાજાએ કહ્યું કે, હે પુત્રી! આ તારું સ્વપ્ન ઉત્તમ ફલ (આપનારું) છે. ॥૮૪૪॥

हिन्दी :- फिर पहले से बैठा हुआ पक्षी पके हुए पत्तों के समान वहां से गिर पडा, यह सुनकर भीमराजा ने कहा कि, "हे पुत्री! तेरा यह स्वप्न उत्तम फल देनेवाला है।"॥८४४॥

मराठी :- मग त्या वृक्षावर अगोदरच चढलेला पक्षी पिकलेल्या पानाप्रमाणे खाली पडला, हे ऐकून भीमराजाने म्हटले की, "हे मुली! हे तुझे स्वप्न उत्तम फळ देणारे आहे. ॥८४४॥

English :- She continued saying that a bird who was sitting on the branch of the tree earlier fell off like an over-riped leaf. Hearing this dream of Damyanti, King Bhim said that this dream of hess will surely give her an illustrious and an eminent fruit.

तत्र या निवृतिर्देवी पुण्यराशिः स तेऽद्भुतः ॥
कोशलैश्वर्यलाभाय कोशलोद्यानदर्शनम् ॥८४५॥

अन्वयः- तत्र तस्मिन् स्वप्ने या निर्वृतिः देवी सः ते अद्भुतः पुण्यराशिः अस्ति। कोशलैश्वर्यलाभाय कोशलोद्यानदर्शनमस्ति ॥८४५॥

विवरणम्:- तत्र तस्मिन् स्वप्ने या निर्वृतिः देवी अस्ति। सः ते तव अद्भुतः आश्चर्यकारकः पुण्यानां राशिः पुण्यराशिः सुकृतराशिः अस्ति। कोशलायाः ऐश्वर्यं कोशलैश्वर्यम्। कोशलैश्वर्यस्य लाभः कोशलैश्वर्यलाभः तस्मै कोशलैश्वर्यलाभाय कोशलावअभवप्राप्तये कोशलायाः उद्यानं कोशलोद्यानम्। कोशलोद्यानस्य कोशलावैभवप्राप्तये कोशलायाः उद्यानं कोशलोद्यानम्। कोशलोद्यानस्य दर्शनं कोशलोद्यानदर्शनं कोशलोपवनदर्शनम् अस्ति॥८४५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- तस्मिन् स्वप्ने या निर्वृतिः देवी सः तव अद्भुतः पुण्यराशिः अस्ति। कोशलायाः उद्यानस्य दर्शनं कोशलायाः ऐश्वर्यप्राप्तिं द्योतयति॥८४५॥

ગુજરાતી :- તેમાં જે નિવૃતિદેવી (દીઠી) તે તારા અદ્‌ભુત પુણ્યોનો સમૂહ જાણ, તથા કોશલા નગરીની સમૃદ્ધિની પ્રાપ્તિ માટે કોશલા નગરીના ઉદ્યાનનું દર્શન જાણવું.॥૮૪૫॥

हिन्दी :- उसमें तुमने जो निवृत्तिदेवी (देखी) वह तेरे अद्‌भुत पुण्य का समूह समझ और कोशला नगरी के उद्यान का दर्शन कोशला नगरी की समृद्धि प्राप्ति के लिये समझा ॥८४५॥

मराठी :- त्यात तु ज्या निवृत्तदेवीला (पाहीले) ते तुझ्या अद्‌भुत पुण्याचा समूह जाणावे, आणि कोशला नगरीच्या समृध्दिच्या प्राप्तिकरिता कोशला नगरीच्या उद्यानाचे दर्शन जाणावे.

English :- He continued saying that her glimose of Goddess Nivruti, shows her marvellous and uncanny, assemblage of meritorious virtues and the glimpse of the garden of the city of Koshala shows the future attainment of profuse and exuberant prosperity of the Koshala Kingdom.

माकन्दारोहणं चैतन्नलसङ्गमकारणम् ॥
विशिष्टाम्भोजलाभश्च राज्यार्हतनयप्रदः ॥८४६॥

अन्वयः- एतद् माकन्दारोहणं नलसङ्गमकारणमस्ति। विशिष्टाम्भोजलाभः च राज्यार्हतनयप्रदः अस्ति ॥८४६॥

विवरणम्:- एतद् माकन्दे आम्रवृक्षे आरोहणम् माकन्दारोहणम् आम्रवृक्षारोहणं नलस्य नलेन वा सङ्गमः नलसङ्गमः। नलसङ्गमस्य कारणं नलसङ्गमकारणम् अस्ति। माकन्दारोहणं नलसङ्गमं सूचयति। अम्भसि जायते इति अम्भोजं कमलम्। विशिष्टं च तद् अम्भोजं च विशिष्टाम्भोजं विशिष्ट कमलम्। विशिष्टाम्भोजस्य लाभः विशिष्टाम्भोजलाभः राज्यमर्हतीति राज्यार्हः। राज्ययोगः। राजर्हश्चासौ तनयश्च राज्यार्हतनयः। राज्यार्हतनयं प्रददातीति राज्यार्हतनयप्रदः अस्ति। विशिष्टकमललाभः राज्ययोग्यतनयं सूचयति ॥८४६॥

सरलार्थः- माकन्दारोहणं नलसङ्गमस्य कारणमस्ति । विशिष्टकमललाभः राज्ययोग्यपुत्रप्रदः अस्ति ॥८४६॥

ગુજરાતી :- વળી તારું જે આમ્રવૃક્ષ પર ચડવું થયું, તેને નલરાજાના સમાગમના કારણરુપ જાણવું, તથા ઉત્તમ કમલની પ્રાપ્તિને રાજ્યલાયક પુત્રને આપનારી જાણવી.॥८४६॥

हिन्दी :- फिर तेरा जो आम्रवृक्ष पर चढना हुआ उसे नलराजा के समागम का कारण समझ और उत्तम कमल की प्राप्ति को राज्यलायक पुत्र की प्राप्ति समझा ॥८४६॥

मराठी :- नंतर तुझे जे आम्रवृक्षावर चढणे नलराजाच्या समागमाचे कारण आहे. असे समज आणि उत्तम कमळाची प्राप्ति राज्याला लायक पुत्राची प्राप्ती समज.॥८४६॥

English :- He continued that her climb on the mango trce signifies her union with King Nal and the attainment of the auspicious lotus rignifies the atainment of an eminent son capable of a kingdom.

विहङ्गपतनं राज्याद्-विभ्रंशः कूबरस्य तु ॥
मिलिष्यति नलोऽद्यैव प्रगेच स्वप्नदर्शनात् ॥८४७॥

अन्वयः- विहङ्गपतनं तु कूबरस्य राज्यात् विभ्रंशः । प्रगे स्वप्नदर्शनात् नलः अद्य एव मिलिष्यति ॥८४७॥

विवरणम्:- विहङ्गस्य पक्षिणः पतनं विहङ्गपतनं पक्षिपतनं तु कूबरस्य राज्यात् विभ्रंशः विभ्रंशनमस्ति । प्रगे प्रभाते स्वप्नस्य दर्शनं स्वप्नदर्शनं तस्मात् स्वप्नदर्शनात् नलः अद्य एव मिलिष्यति ॥८४७॥

सरलार्थः- विहङ्गस्य पतनं तु कूबरस्य राज्यात् विभ्रंशः अस्ति । प्रभाते स्वप्नदर्शनात् नलः अय एव मिलिष्यति ॥८४७॥

ગુજરાતી :- પક્ષીનું જે પડવું થયું, તેને રાજ્ય પરથી કૂબરનો ભ્રંશ જાણવો. વળી પ્રભાતમાં સ્વપ્ન જોવાથી તને આજે જ નલનો મેળાપ થશે.॥८४७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- पक्षी का जो गिरना हुआ, उसे राज्य परसे कूबर का भ्रंश जानना, और प्रभात में सपना देखने के कारण तेरा आज ही नल के साथ मिलाप होगा ॥८४७॥

मराठी :- पक्ष्याचे झाडावरून पडणे कूबराचा राज्यभ्रंश समज आणि पहाटेच्या वेळी स्वप्न पाहिले असल्याने आजच नलराजा तुला भेटेल. ॥८४७॥

English :- The fall of the bird signefies the destruction of the Kubar and the dream which is seen at dawn signifies that the revnion of Nal will take place on that very day.

उपगोपुरमायासीत् दधिपर्णरथयस्तदा ॥
मङ्गलाख्यः पुमानाख्यत् भीमाय तदुपागमम् ॥८४८॥

अन्वयः- तदा दधिपर्णः रथः उपगोपुरम् आयासीत् । मङ्गलाख्यः पुमान् भीमाय तदुपागमम् आख्यत् ॥८४८॥

विवरणम्:- *तदा दधिपर्णस्य रथः दधिपर्णरथः गोपुरस्य पुरद्वारस्य समीपम् उपगोपुरम् पुरद्वारसमीपम् आयासीत् आगच्छत् । मङ्गलः आख्या यस्य सः मङ्गलाख्यः मङ्गलनामा पुमान् पुरुषः भीमाय भीमराजाय तस्य उपागमः तदुपागमः, तं तदुपागमं तस्य समीपमागमनम् आख्यत् अकथयत् ॥८४८॥*

सरलार्थः- तदा दधिपर्णः पुरद्वारसमीपमागच्छत् । मङ्गलनामा पुरुषः भीमाय तस्य उपागमनम् अचीकथत् ॥८४८॥

ગુજરાતી :- તે જ વખતે દધિપાર્ણ રાજાનો રથ નગરના દરવાજા પાસે આવી પહોંચ્યો, અને મંગલ નામના પુરુષે ભીમરાજાને તેના આવવાના સમાચાર કહ્યા.॥८४८॥

हिन्दी :- उसी समय दधिपर्ण राजा का रथ नगर के दरवाजे के पास आ पहुँचा, और मंगलनामक पुरुष ने भीमराजा को उनके आगमन का समाचार सुनाया ॥८४८॥

मराठी :- त्याच वेळेला दधिपर्ण राजाचा रथ नगराच्या दरवाजा जवळ येऊन पोहचला आणि मंगल नावाच्या पुरुषाने भीमराजाला त्याच्या येण्याचा समाचार सांगितला.॥८४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org
Shri Gun Aaradhak Trust

English :- At that moment, the chariot of King Dadiparna reached the gates of the city. Then a man named Mangal went to the King Bhim, to give him, the news of the arrival.

भीमोऽप्यभिमुखं गत्वा तमाश्लिष्य वयस्यवत् ॥
आवासादिकमातिथ्यं कृत्वा तस्यातिथेस्तथा ॥८४९॥

अन्वयः- भीमः अपि अभिमुखं गत्वा वयस्यवत् तमाश्लिष्य तथा तस्य अतिथेः आवासादिकम् आतिथ्यं कृत्वा ॥८४९॥

विवरणम्:- *भीमः अपि अभिमुखं सम्मुखं गत्वा यात्वा वयस्येन मित्रेण तुल्यं वयस्यवत् मित्रवत् तम् दधिपर्णम् आश्लिष्य आलिङ्ग्य तथा तस्य न विघने तिथिः यस्य सः अतिथिः तस्य अतिथेः प्राघुर्णिकस्य दधिपर्णस्य आवासः आदौ यस्य तद् आवासादिकम् आतिथ्यमतिथि सत्कारं कृत्वा विधाय···॥८४९॥*

सरलार्थः- भीमराजः अपि अभिमुखं गत्वा मित्रवत् तं दधिपर्णमाश्लिष्यत् आलिङ्गत्। तस्य अतिथेः आवासादिकम् अतिथिसत्कारमकरोत् ॥८४८॥

ગુજરાતી :- ત્યારે ભીમરાજાએ પણ તેની સન્મુખ જઈને, તથા મિત્રની પેઠે તેને આલિંગન કરીને, તેમનો સત્કાર કરીને આવાસ વગેરેનો પ્રબંધ કર્યો. ॥८४९॥

हिन्दी :- तब भीमराजा ने भी उनके सम्मुख जाकर, मित्र के समान उनको आलिंगन किया और उन अतिथियों के लिये आवास आदि का प्रबंध किया॥८४९॥

मराठी :- तेव्हा भीमराजाने पण त्यांना सामोरे जाऊन मित्राप्रमाणे आलिंगन दिले आणि त्या पाहुण्यांच्या निवासादिकाची व्यवस्था करून सत्कार केला.॥८४९॥

English :- Then King Bhim went to them and clasped them in a warm embrace and welcoming them, made arrangements for their comfortable stay, in his kingdom.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऊचे भीमोऽस्ति कुब्जस्ते सूपकृत् सूर्यपाकवित् ।।
अस्त्याश्चर्याय सा वार्ताऽप्यधुनाकारयाशु तम् ।।८५०।।

अन्वयः- भीमः ऊचे - सूर्यपाकवित् कुब्जः ते सूपकृत् अस्ति । सा वार्ता अपि आश्चर्याय अस्ति । अधुना तम् आशु आकारय ।।८५०।।

विवरणम्:- भीमः ऊचे जगाद - सूर्यपाकं वेत्तीति सूर्यपाकवित् कुब्जः ते तव सूपं करोतीति सूपकृत् सूदः अस्ति। सा वार्ता अपि आश्चर्याय विस्मयाय अस्ति। अधुना इदानीं तमाशु शीघ्रम् आकारय आह्वय ।।८५०।।

सरलार्थः- भीमः अवदत् - सूर्यपावित् कुब्जः तव सूपकाः अस्ति । इति वार्ताऽपि विस्मयं जनयति । अधुना तं शीघ्रम् आह्वय ।।८५०।।

ગુજરાતી :- પછી તેને કહ્યું કે, સૂર્યપાક રસોઈ જાણનારો કુબ્જ, જે તમારો રસોઈઓ છે, તે હકીકત આશ્ચર્યકારક છે, માટે તેને તુરત (અહીં) બોલાવો. ।।८५०।।

हिन्दी :- फिर भीमराजा ने कहा कि, सूर्यपाक रसोई जाननेवाला कुब्ज जो तुम्हारा रसोइया है, वह हकीकत आश्चर्यजनक है, इसलिये तुम (उसे) तुरंत बुलाओ । ।८५०।।

मराठी :- भीम राजा म्हणाला, सूर्यपाक जाणणारा कुब्ज तुझा स्वयंपाकी आहे. ही बातमी आश्चर्यकारक आहे. आता तू त्याला लवकर बोलावून ये.।।८५०।।

English :- Then King Bhim asked the King Dadipame to call the hunch-back, who can prepare delicious food from solar rays which makes him amazing and marvelous.

दधिपर्णगिरा तत्र चक्रे कुब्जोपि तत्क्षणात्।।
सूर्यपाकां रसवतीं सुधारसमयीमिव ।।८५१।।

अन्वयः- तत्र कुब्जः अपि दधिपर्णगिरा तत्क्षणात् सुधारसमयीमिव सूर्यपाकां रसवतीं चक्रे ।।८५१।।

विवरणम्:- तत्र कुब्जः अपि दधिपर्णस्य गिरा वचनेन तत्क्षणात् सुधायाः रसः सुधारसः । सुदारसस्य विकारः सुधारसमयी, तां सुधारसमयीम् इव सूर्ये पाकः यस्याः सा सूर्यपाका, तां सूर्यपाकां रसाः मधुराम्लादयः षड्रसाः अस्यां सन्तीति रसवती, तां रसवतीं चक्रे ॥८५१॥

सरलार्थः- तत्र कुब्जः अपि दधिपर्णस्य वचनेन तत्क्षणात् सुधारसमयीं रसवतीं चकार ॥८५१॥

ગુજરાતી :- પછી ત્યાં કુબ્જે પણ તેજ ક્ષણે દધિપર્ણ રાજાના કહેવાથી અમૃતરસમય સૂર્યપાક રસોઇ બનાવી.॥८५१॥

हिन्दी :- फिर वहाँ कुब्ज ने उसी क्षण दधिपर्ण राजा के कहने से अमृतरस समान सूर्यपाक रसोइ बनाई ॥८५१॥

मराठी :- नंतर तेथे कुब्जाने त्याच क्षणी दधिपर्ण राजाच्या म्हणण्याप्रमाणे जणू अमृत रसाने परिपूर्ण सूर्यपाक स्वयंपाक बनविला. ॥८५१॥

English :- Then on the request of king Dadiparne the hunchback, prepared delicious food from solar says, which tasted like ambrosia.

दधिपर्णस्ततो भीमभूभुजं सपरिच्छदम् ॥
भोजयामास तैर्भोज्यैर्देवानामपि दुर्लभैः ॥८५२॥

अन्वयः- ततः दधिपर्णः देवानामपि दुर्लभैः भोज्यैः सपरिच्छदं भीमभूमुजं भोजयामास ॥८५२॥

विवरणम्:- ततः तदनन्तरं दधिपर्णः नृपः देवानाम् सुराणाम् अपि दुःखेन लभ्यन्ते इति दुर्लभानि, तैः दुर्लभैः भोक्तुं योग्यामि भोज्यानि, तैः भोज्यैः भोज्यपदार्थैः परिच्छदेन सह वर्ततेऽसौ सपरिच्छदः, तं सपरिच्छदं सपरिवारं भुवं भुनक्ति भुङ्क्ते वा भूभुक् । भीमः एव भूभुक् - भीमभूभुक्, तं भीमभूभुजं भोजयामास ॥८५२॥

सरलार्थः- तदनन्तरं दधिपर्णः नृपः देवानामपि दुर्लभैः तैः भोज्यपदार्थैः सपरिवारं भीमनृपं भोजयामास ॥८५२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- પછી દધિપર્ણરાજાએ દેવોને પણ દુર્લભ એવાં તે ભોજનો વડે પરિવાર સહિત ભીમરાજાને ભોજન કરાવ્યું. ॥૮૫૨॥

हिन्दी :- फिर दधिपर्ण राजाने देवो को भी दुर्लभ ऐसे उस भोजन से परिवारसहित भीमराजा को भोजन कराया॥ ॥८५२॥

मराठी :- नंतर दधिपर्ण राजाने देवाला पण दुर्लभ अशा भोज्य पदार्थांनी कुटुंबासहित भीमराजाला जेवण करविले. ॥८५२॥

English :- Then King Dadiparne fed the whole family of King Bhim such delicious food, that was difficult to be attained even by the Gods.

भैम्यप्यानाय्य भोज्यानि भुक्त्वा सर्वाणि तान्यापि ॥
प्राग्भुक्तरससंवादान्निश्चिनोति स्म तं नलम् ॥८५३॥

अन्वयः- भैमी अपि तानि सर्वाणि अपि भोज्यानि आनाय्य भुक्त्वा प्रागभुक्तरससंवादात् तं नलं निश्चिनोति स्म ॥८५३॥

विवरणम्:- भीमस्य अपत्यं स्त्री भैमी भीमकन्या दमयन्ती अपि तानि सर्वाणि भोज्यानि दासीभिः आनाय्य भुक्त्वा आस्वाद्य प्राक्पूर्वं भुक्तश्चासौ रसश्च भुक्तरसः । भुक्तरसेन संवादः भुक्तरससंवादात् भुक्तरसानुकूल्यात् तं नलं निश्चिनोति स्म । सः नलः अस्ति इति निरचिनोत् ॥८५३॥

सरलार्थः- दमयन्ती अपि दासीभिः तानि सर्वाणि भोज्यानि आनाय्य अभुङ्क्त। पूर्वं भुक्तरसानकिल्यात् तं नलं निरचिनोत् ॥८५३॥

ગુજરાતી :- પછી દમયંતીએ પણ તે ભોજનો મગાવીને, તથા તે ખાઈને, પૂર્વે ખાધેલા રસ સાથે સરખામણીથી તે નલરાજા જ છે, એવો નિશ્ચય કર્યો.॥૮૫૩॥

हिन्दी :- फिर दमयंती ने भी दासी द्वारा वह भोजन मंगवाया और वह खाकर पहले खाये हुए भोजन के साथ तुलना कर के यह निश्चय किया कि वह नलराजा ही है। ॥८५३॥

मराठी :- नंतर दमयंतीने पण ते जेवण तिच्या दासीद्वारा मागवून ते खाऊन । पहाण केले, पूर्वी खाल्लेल्या रसाशी तुलना करून तो नळराजाच आहे. असा निश्चय केला.॥८५३॥

English :- Then Damyanti sent her chamber maid to bring the food in her room. Then after having it, she compared it with the food she had eaten earlier and came to a dicision that it was none other than King Nal who has prepared such tasty and delicious food.

अथोचे नल एवाऽयं ज्ञानिनाऽख्यायि यत्पुरा ।।
नलं विना सूर्यपाकं भरतेवेत्ति नापरः ।।८५४।।

अन्वयः- अथ ऊचे - अयं नलः एव अस्ति । यत् पुरा ज्ञानिना आख्यायि अकथ्यत। भरते नलं विना अपरः सूर्यपाकं न वेत्ति ।।८५४।।

विवरणम्:- अथ अनन्तरं दमयन्ती ऊचे बभाषे - अयं नलः एव अस्ति । यत् पुरा ज्ञानमस्यास्तीति ज्ञानी तेन ज्ञानिना आख्यायि आख्यातम् । भरते क्षेत्रे नलं विना अपरः अन्यः कश्चन सूर्यपाकं न वेत्ति न जानाति ।।८५४।।

सरलार्थः- अनन्तरं दमयन्ती अभाषत - अयं नलः एव अस्ति । यतः पुरा ज्ञानिना आख्यातम् यत् भरते नलं विना अपरः कः अपि सूर्यपाकं न जानाति ।।८५४।।

ગુજરાતી :- પછી તેણીએ કહ્યું કે, ખરેખર આ નલ રાજા જ છે, કેમ કે પૂર્વ જ્ઞાનીએ કહ્યું છે કે, આ ભરતક્ષેત્રમાં નલ સિવાય બીજો કોઈપણ સૂર્યપાક રસોઈ જાણતો નથી. ।।८५४।।

हिन्दी :- फिर उसने कहा कि, "सचमुच यह नलराजा ही है, क्यों कि पहले ज्ञानियों ने कहा है कि, इस भरतक्षेत्र में नल के बिना कोई भी सूर्यपाक रसोई जानता नही है। ।।८५४।।

मराठी :- नंतर दमयन्ती म्हणाली, हा नलराजाच आहे. कारण पूर्वी एका ज्ञानी पुरूषाने सांगितले होते की, या भरतक्षेत्रात नलराजाशिवाय दुसरा कोणीही सूर्यपाक विया जाणत नाही. ।।८५४।।

English :- Then she said that it has to be King Nal because the learned man of the past has always said that only King Nal can prepare such delicious food from solar says.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

क्रीडया व्रीडया वापि मन्त्रतस्तन्मतोऽथवा ॥
असौ चक्रेऽङ्गवैकृत्यं नल एव न संशयः ॥८५५॥

अन्वयः- असौ क्रीडया व्रीडया वा मन्त्रतः तन्त्रतः वा अङ्गवैकृत्यं चक्रे । असौ नलः एव अस्ति । न संशयः ॥८५५॥

विवरणम्:- असौ क्रीडया वा व्रीडया लज्जया वा मन्त्रतः मन्त्रैः, तन्त्रतः तन्त्रैः अङ्गानामवयवानां वैकृत्यं अङ्गवैकृत्यम् अवयवविकारित्वं चक्रे। असौ नलः एव अस्ति । इत्यत्र संशयः न वर्तते ॥८५५॥

सरलार्थः- असौ क्रीडया वा लज्जया वा मन्त्रैः वा तन्त्रैः वा स्वानि अङ्गानि विकृतानि अकरोत् । असौ नलः एव अस्ति । अत्र संशयः न वर्तते॥८५५॥

ગુજરાતી :- ક્રીડાથી અથવા લજ્જાથી, મંત્રથી અથવા તન્ત્રથી તેણે આખા શરીરનો ત્યાગ કર્યો છે, માટે તે નલ જ છે, એમાં સંદેહ નથી. ॥८५५॥

हिन्दी :- क्रीडा से अथवा लज्जा से, मंत्र से अथवा तंत्र से उसने अपने पूर्ण शरीर को विकृत किया है। वह नल ही है इसमें कोई संदेह नही है। ॥८५५॥

मराठी :- क्रिडा म्हणून अथवा लाजेने मंत्र तंत्राच्या द्वारा याने आपले सर्व शरीर विकृत केले आहे. हा नलच आहे यांत काही संशय नाही.॥८५५॥

English :- King Nal has, due to some fun and frolic or some shameful deed or due to some magic incantation or some enchantment, has attained such an uncommon and an unnatural appearance.

नलाङ्गुल्याऽप्यहं स्पृष्टा सद्यः पुलकमावटे ॥
अस्याङ्गुल्यापि चेत् स्पृष्टा स्यां तथा सौ ततो नलः ॥८५६॥

अन्वयः- अहं नलाङ्गुल्या अपि स्पृष्टा सद्यः पुलकम् आवहे । अस्य अङ्गुल्या अपि स्पृष्टा तथा स्यां चेत् ततः असौ नलः ॥८५६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aradhak Trust

विवरणम्:- अहं नलस्य अङ्गुलिः नलाङ्गुलिः, तया नलाङ्गुल्या अपि स्पृष्टा स्पर्शं प्राप्ता सती सद्यः पुलकं रोमाञ्चम् आवहे आदधामि । अतः अस्य कुब्जस्य अङ्गुल्या अपि स्पृष्टा सती तथा पुलकिता स्यां भवेयम् चेत् ततः असौ नलः एव वेदितव्यः ॥८५६॥

सरलार्थः- अहं नलस्य अङ्गुल्याः स्पर्शेन एव पुलकं दधामि । अतः अस्य कुब्जस्य अङ्गुलिस्पर्शेन अहं यदि पुलकिता स्याम् तर्हि असौ नलः एव इति ज्ञातव्यम् ॥८५६॥

ગુજરાતી :- નલરાજાની આંગળીના સ્પર્શથી પણ હું તરત રોમાંચને ધારણ કરું છું માટે આ કુબ્જની આંગળીના સ્પર્શથી પણ જો હું રોમાંચને ધારણ કરું, તો એમ જાણવું કે તે ખરેખર નલ જ છે.॥८५६॥

हिन्दी :- "नलराजा की उंगली के स्पर्श से भी मै तुरंत रोमांचित हो जाती हुं। इसलिये यदि इस कुब्ज की उंगली के स्पर्श से भी जो मैं रोमांचित हो जाऊं तो ऐसा समझना कि वह सचमुच नल ही है। ॥८५६॥

मराठी :- नलराजाच्या बोटांच्या स्पर्शाने मुळा माझ्या शरीरावर रोमांच उत्पन्न होतात. म्हणून या कुब्जाच्या बोटांच्या स्पर्शाने जर माझ्या शरीरावर रोमांच उत्पन्न झाले. तर हा नलच आहे. असे नक्की समजा. ॥८५६॥

English :- She then says that, she exeriences horripilation just by the touch of Nal and so if she eeriences the same felking just by this hunch-back's touch, then this junchback had to be king Nal.

पृष्टः सोऽथ हसित्वोचे राजमार्गेऽपि वो भ्रमः ॥
नलो वासवः साक्षात् क्व चाऽहं नारकाकृतिः ॥८५७॥

अन्वयः- अथ पृष्टः सः हसित्वा ऊचे । राजमार्गेऽपि वः भ्रमः । साक्षात् वासवः नलः क्व। नारकाकृतिः अहं च क्व ॥८५७॥

विवरणम्:- अथ अनन्तरं पृष्टः सः कुब्जः हसित्वा विहस्य ऊचे बभाषे मार्गाणां राजा राजमार्गः तस्मिन् राजमार्गे अपि प्रथिते मार्गे अपि वः युष्माकं भ्रमः वर्तते । साथात् वासवः इन्द्रः इव नलः क्व। नारकस्य आकृतिः इव आकृतिः यस्य सः नारकाकृतिः अहं क्व ॥ आवयोः समुद्रपल्वलयोः इव महदन्तरम् अस्ति ॥८५७॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- अनन्तरं पृष्टः स कुब्ज विहस्य अवदत् - युष्माकं राजमार्गेऽपि भ्रमः भवति। साक्षात् वासवः इन्द्रः इव नलः क्व। नारकाकृतिः अहं च क्व ॥८५७॥

ગુજરાતી :- પછી તેને પૂછવાથી તે હસીને બોલ્યો કે, હે રાજન્! આ સીધા ચોખ્ખા રાજમાર્ગમાં પણ તમોને (કેમ) ભ્રમ થાય છે? સાક્ષાત ઈન્દ્ર સરખો નલ ક્યાં અને નારકી સરખી આકૃતિવાળો હું ક્યાં?॥૮૫૭॥

हिन्दी :- फिर उसे पूछने पर वह हँसकर बोला कि हे राजन! इस सीधे राजमार्ग में भी आप को (कैसा) भ्रम हो रहा है? साक्षात इन्द्र जैसा नल कहाँ? और नारकी जैसी आकृतिवाला मैं कहां? ॥८५७॥

मराठी :- मग त्याला विचारल्यानंतर तो हसून म्हणाला की, प्रसिद्ध अशा राजमार्गातही तुम्हांला भ्रम होत आहे. साक्षात् इन्द्राप्रमाणे असलेला नलराजा कोठे? आणि नारकी जीवाप्रमाणे आकृती असलेला मी कोठे? ॥८५७॥

English :- When the hunchback was questioned, he laughed it off asking the king as to why in his wildest of dreams did he ever imagine to compare him, who is a shaelen being who is fitto go to hell to Nal who is like India in all ways.

तथाप्यत्सुपरुद्धस्तद्वक्षोऽङ्गुल्याथ सोऽस्पृशत् ॥
अतिलाघवतो दृष्टेरिवान्तःस्थं तृणं हरन् ॥८५८॥

अन्वयः- अम तथापि अति उपरुद्धः सः अतिलाघवतः दृष्टेः अन्तःस्थं तृणं हरन् इव अङ्गुल्या तद्वक्षः अस्पृशत् ॥८५८॥

विवरणम्:- अथ अनन्तरं तथापि अतिशयेन उपरुद्धः अत्युपरुद्धः सः कुब्जः अतिलाघवतः अतिलाघवेन दृष्टेः नयनस्य अन्तः तिष्ठतीति अन्तःस्थं तृणं हरन् इव अतिलाघवतः अङ्गुल्या तस्याः दमयन्त्याः वक्षः उरः तद्वक्षः दमयन्त्याः उरः अस्पृशत् ॥८५८॥

सरलार्थः- तथापि अत्युपरुद्धः सः कुब्जः अनन्तरं अतिलाघवेन दृष्टेः अन्तःस्थं तृणं हरन् इव अङ्गुल्या दमयन्त्याः वक्षःस्थलम् अस्पृशत् ॥८५८॥

ગુજરાતી :- તો પણ અતિ રોકી રાખવાથી અત્યન્ત લાઘવતાથી આંખના ખૂણામાં રહેલાં તૃણને જેમ કાઢે, તેમ તેણે પોતાની આંગળીથી તેણીના વક્ષસ્થલને સ્પર્શ કર્યો.॥૮૫૮॥

हिन्दी :- तो भी अतिशय आग्रह करने पर अत्यंत कुशलता से आँखो में रहे हुए तृण को जैसे निकालते हैं उस प्रकार से उसने अपनी उंगली से उसके वक्षस्थलको स्पर्श किया॥८५८॥

मराठी :- तरीपण अतिशय आग्रह केल्यामुळे त्या कुब्जाने डोळयात गेलेला गवताचा कण काढावा. त्याप्रमाणे अतिशय हलक्या हाताने दमयन्तीच्या वक्षःस्थळाला (छातीला) स्पर्श केला.॥८५८॥

English :- Then just as one delicately taken off particle from the eye, in the same way, Damyanti gets herself touched by the huynch-back. Then just as the greenery increases and shoots, shoot out with the commecement of the monsoons in the same way, she experienced horripilation.

तस्य तावत्यपि स्पर्शे तनुर्भैम्याः क्षणादभूत् ॥
जीमूतजलसम्पर्कान्नवोद्भिन्नाङ्कुरेव भूः ॥८५९॥

अन्वयः- तस्य तावति स्पर्शे अपि भैम्याः तनुः क्षणात् जीमूतजलसमपर्कात् नवोद्भिन्नाङ्कुरा भूः इव अभूत् ॥८५९॥

विवरणम्:- *तस्य कुब्जस्य तावति अत्यल्पीयसि स्पर्शे सति अपि भीमस्यापत्यं स्त्री भैमी भीमतनुजा, तस्याः भैम्याः भीमतनुजायाः दमयन्त्याः तनुः शरीरं क्षणात् वारीणां वाहकः जीमूतः मेघः । जीमूतस्य जलं जीमूतजलम् । जीमूतजलस्य सम्पर्कः जीमूतजलसम्पर्कः, तस्मात् जीमूतजलसम्पर्कात् मेघोदकसंस्पर्शात् नवाः उद्भिन्नाः अङ्कुराः यस्यां सा नवोद्भिन्ननवाङ्कुरा भूः भूमिः इव समुद्भिन्नपुलका अभूत् ॥८५९॥*

सरलार्थः- तस्य कुब्जस्य अङ्गुल्या अत्यल्पीयसि स्पर्शे सत्यपि दमयन्त्याः शरीरं मेघजलस्पर्शेत अद्भिन्नवाङ्कुरा भूमिरिव समुद्भिन्नपुलकं (रोमाञ्चितम्) अभूत् ॥८५९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- તેનો તેટલો પણ સ્પર્શ થતાં જ ક્ષણવારમાં વરસાદના જલના સંયોગથી જેમ નવા ઉગેલા અંકુરાવાળી પૃથ્વી થાય, તેમ દમયન્તીનું શરીર (રોમાંચિત) થયું.॥૮૫૯॥

हिन्दी :- उसका उतना स्पर्श होते ही क्षणभर में बरसात के जल के संयोग से जैसे नये उगनेवाले अंकुरोवाली पृथ्वी होती है, उसीप्रकार दमयंती का शरीर रोमांचित हुआ ॥८५९॥

मराठी :- त्याचा तेवढा अतिशय हलका स्पर्श होताच क्षणभरात पावसाळ्याच्या पाण्याच्या संयोगाने जसे नव्या उगवणाऱ्या अंकुरांनी पृथ्वी रोमांचित होते, त्याप्रमाणे दमयंतीचे शरीर रोमांचित झाले. ॥८५९॥

English :- With just a light touch of Nal she exerienced horripilation, just as the fresh showers, accidently waters, sprouts and offshoots, whichin turn shoots out on every corner of the earth, as ifbeing horripilated, by the touch of nian.

प्रसुप्तां मां तदा त्याक्षीश्चिराद् दृष्टोऽसि वल्लभ ॥
क्काधुना यास्यसीत्युक्त्वा धृत्वा नीतो गृहान्तरे ॥८६०॥

अन्वयः- हे वल्लभ! तदा त्वं प्रसुप्तां माम् अत्याक्षीः। चिरात् दृष्टः असि। अधुना क्क यास्यसि, इति उक्त्वा धृत्वा गृहान्तरे नीतः ॥८६०॥

विवरणम्:- हे वल्लभ! हे प्रिय! तदा त्वं प्रसुप्तां शयितां माम् अत्याक्षीः अत्यजः। चिरात् बहोः कालात् अनन्तरं दृष्टः असि। अधुना क्क यास्यसि गमिष्यसि? इति उक्त्वा दृत्वा च सः गृहस्य अन्तरे - गृहान्तरे नीतः। इत्युक्त्वा तं कुब्जं धृत्वा दमयन्ती गृहान्तरे अनयत् ॥८६०॥

सरलार्थः- हे वल्लभ! दता त्वं सुप्तां माम् अत्यजः। अधुना चिरात् दृष्टः असि। इदानीं क्क वास्यसि। इति उक्त्वा दमयन्ती तं गृहीत्वा गृहान्तरे अनयत् ॥८६०॥

ગુજરાતી :- 'હે સ્વામી! તે વખતે તમો મને સૂતી છોડીને ચાલ્યા ગયા હતા, અને હવે ઘણે સમયે તમોને મેં જોયા છે, હવે ક્યાં જવાના છો?' એમ કહીને તે કુબ્જને પકડીને ઘરની અંદર લઈ ગઈ. ॥૮૬૦॥

हिन्दी :- हे स्वामी! उस समय आप मुझे सोती हुंई छोडकर चले गये थे, और अब बहुत समय के बाद मैंने तुम्हे देखा है, अब कहाँ जाओगे? ऐसा कहकर उस कुब्जको पकडकर दमयंती घर के अंदर ले गयी। ॥८६०॥

मराठी :- स्वामी! तेव्हा तुम्ही मी झोपली असतांना मला एकटीला सोडून गेला आता खूप दिवसानंतर दिसले आहात. आता कोठे जाल! असे म्हणून त्या कुब्जाला धरून दमयंतीने घरात नेले. ॥८६०॥

English :- Then Damyanti addresion Nal has her master said to him that, she has been him after so long time, nince he had left her in the forest saying thus, she caught hold of him and took him in her room.

वैदर्भ्याऽभ्यर्थितोऽत्यर्थं कुब्जो विल्वकरण्डकात् ॥
वस्त्राद्याकृष्य संवीय स्वरुपस्योऽभवन्नलः ॥८६१॥

अन्वयः- वैदर्भ्या अत्यर्थम् अभ्यर्थितः कुब्ज विल्वकरण्डकात् वस्त्रादि आकृष्य संवीय स्वरुपस्यः नलः अभवत् ॥८६१॥

विवरणम्:- विदर्भाणामीश्वरः वैदर्भः। वैदर्भस्यापत्यं स्त्री वैदर्भी, तया वैदर्भ्या दमयन्त्या अत्यर्थं भृशम् अभ्यर्थितः सम्प्रार्थितः कुब्जः विल्वस्य करण्डकः विल्वकरण्डकः, तस्मात् विल्वकरण्डकात् वस्त्रमादौ यस्य तद् वस्त्रादि आकृष्य संवीय परिधाय च स्वरुपे तिष्ठतीति स्वरुपस्यः नलः अभवत् ॥८६१॥

सरलार्थः- दमयन्त्या भृशं प्रार्थितः कुब्जः बिल्वकरण्डकात् वस्त्रादिकम् आकृष्य परिधाय च स्वरुपस्थः नलः अभवत् ॥८६१॥

ગુજરાતી :- પછી દમયંતીએ અત્યંત પ્રાર્થના કરવાથી તે કુબ્જ બિલ્વફળ તથા ડાબડામાંથી વસ્ત્રઆદિ કાઢીને, તથા તે પહેરીને સત્ય સ્વરુપવાળો નલરાજા પ્રગટ થયો.॥૮૬૧॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- फिर दमयंती के अत्यंत प्रार्थना करने से उस कुब्जने बिलिफल और पेटीमें से वस्त्र आदि निकाले और पहनकर वह सत्य स्वरूपवाला नलराजा प्रगट हुआ॥८६१॥

मराठी :- नंतर दमयंतीने अत्यंत प्रार्थना केल्यानंतर त्या कुब्जाने बेलफळातून व करंडयातून वस्त्र, अलंकार वगैरे काढून परिधान केले सुंदर रूप असलेला खरा नलराजा प्रकट झाला.॥८६१॥

English :- Then due to the contnes petitions off Damyanti, he took of the wood-apple and the celestial gesment from his box and wearing it came in his original form.

तथास्थं वीक्ष्य त भैमी प्रेमपूरादिवातुरा।
लतेव पादपं गाढमवगूढा स्ववल्लभम् ॥८६२॥

अन्वयः- तथास्थं तं वीक्ष्य प्रेमपुरात् इव आतुरा भैमी लता पादपम् इव स्ववल्लभं गाढम् अवगूढा ॥८६२॥

विवरणम्:- तथा स्वरुपेण तिष्ठतीति तथास्थः तं तथास्थं स्वरुपेण तिष्ठन्तं तं नलं वीक्ष्य अवलोक्य प्रेम्णः पूरः प्रेमपूरः, तस्मात् प्रेमपूरात् इव आतुरा उत्सुका भीमस्यापत्यं स्त्री भैमी भीमकन्या दमयन्ती यथा लता पादैः पिवतीति पादवः, तं पादपं वृक्षं गाढमालिङ्गति तथा स्वस्यवल्लभः स्ववल्लभः तं स्ववल्लभं स्वप्रियं नलं गाढम् अवगूढा आलिङ्गितवती ॥८६२॥

सरलार्थः- स्वरुपस्थं तं दृष्ट्वा प्रेमपूरात् इव आतुरा दमयन्ती लता वृक्षं यथा गाढमालिङ्गति तथा स्ववल्लभं नलं गाढम् आलिङ्गितवती ॥८६२॥

ગુજરાતી :- સત્ય સ્વરુપમાં રહેલા તે નલરાજાને જોઈને દમયંતી જાણે પ્રેમના ઉભરાથી ઉત્સુક થઈ વૃક્ષ ને વેલડીની પેઠે પોતાના તે સ્વામીને વળગી પડી. ॥८६२॥

हिन्दी :- असली स्वरूप में आये हुए नलराजा को देखकर दमयंती प्रेम के आवेग से उत्सुक होकर वृक्ष की लताओं के समान अपने स्वामी से लिपट गई॥८६२॥

मराठी :- खऱ्या स्वरुपात असलेल्या त्या रूपसंपन्न नलराजाला पाहून जणू प्रेम उसळून आल्यामुळे अतिशय आतुर झालेल्या दमयन्तीने लता जशी वृक्षाला आलिंगन देते तसे आपल्या पतीला नलराजाला गाढ आलिंगन दिले. (गाढ मिठी मारली) ॥८६२॥

English :- Seeing the true form of Nal, Damyanti who was overcome with feelings of love and orgasm, embrased Nal, just as the creapers clasp a true.

अथायातं बहिर्मध्यात् उपलक्ष्य नलं क्षणात् ॥
भीमः सिंहासने सौवेऽध्यासयद्भरतार्धपम् ॥८६३॥

अन्वयः- अथ मध्यात् बहिः आयातं नलं क्षणात् उपलक्ष्य भीमः भरतार्धपं सौवे सिंहासने अध्यासयत् ॥८६३॥

विवरणम्:- *अथ अनन्तरं मध्यात् गृहमध्यात् बहिः आगतं नलं क्षणात् उपलक्ष्य भीमः नृपः भरतस्य अर्धं भरतार्धम्। भरतार्धं पाति इति भरतार्धपः, तं भरतार्धपं भरतार्धाधिपं सौवे स्वकीये सिंहासने अध्यायत् उपावेशयत् ॥८६३॥*

सरलार्थः- अनन्तरं गृहमध्यात् बहिः आगतं नलम् उपलक्ष्य भीमः अर्धभरतस्यापिपतिं तं स्वीये सिंहासने उपावेशयत् ॥८६३॥

ગુજરાતી :- પછી અંદરથી બહાર આવેલા નલરાજાને ક્ષણવારમાં ઓળખી કાઢીને ભીમરાજાએ તે ભરતાર્ધના સ્વામીને પોતાના સિંહાસન પર બેસાડ્યા.॥८६३॥

हिन्दी :- घर के बहार आये हुए नलराजा को क्षणभर में पहंचान कर भीमराजा ने उस अर्धभरतखंड के स्वामी को अपने सिंहासन पर बैठाया॥८६३॥

मराठी :- नंतर आतून बाहेर आलेल्या नलराजाला क्षणभरात ओळखून भीमराजांने त्या भरतार्धाच्या स्वामीला स्वत:च्या सिंहासनावर बसविले.॥८६३॥

English :- King Bhim had recognised king Nal who was the king of the half of the Bharatkshetra, When he had arrived earies and made him sit on the throne next to him.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ऊचे च सार्वभौमस्त्वं परवन्तो वयं तव ॥
तत्कृत्येषु नियुङ्क्ष्वास्मानादेश्यानिव नैषधे ॥८६४॥

अन्वयः- ऊचे चा हे नैषधे! त्वं सार्वभौमः असि ।वयं तव परवन्तः स्मः । तद् अस्मान् आदेश्यान् इव कृत्येषु नियुङ्क्ष्व ॥८६४॥

विवरणम्:- ऊचे बभाषे च - हे नैषधे! त्वं सर्वाचासौ भूमिश्च सर्वभूमिः । सर्वभूमेः ईश्वरः सार्वभौमः असि । वयं तव परवन्तः पराधीनाः स्मः। तस्मात् कारणात् त्वम् अस्मान् आदेष्टुं योग्यान् आदेश्यान् सेवकान् इव कृत्येषु कार्येषु नियुङ्क्ष्व नियोजय ॥८६४॥

सरलार्थः- उवाच च । हे नैषधे नल! त्वं सर्वभूमेः स्वामी सार्वभौमः असि । वयं तव पराधीनाः स्म। तत् त्वं सेवकान् इव अस्मान् कार्येषु नियुङ्क्ष्व ॥८६४॥

ગુજરાતી :- પછી તેણે (નલરાજાને) કહ્યું કે, હે રાજન્! આપ તો ચક્રવર્તી છો, અને અમે તો તમને સ્વાધીન છીએ, માટે અમોને નોકરોની પેઠે કોઈ કાર્યોમાં જોડો. ॥८६४॥

हिन्दी :- फिर उन्हों ने (नलराजा से) कहा कि, हे राजन्! आप तो चक्रवर्ती है, और हम तो आपके अधीन है, इसलिये हमें दास के समान किसी कार्य में संलग्न कीजिए ॥८६४॥

मराठी :- व भीमराजा नलराजाला म्हणाला, हे राजन्! तुम्ही तर सर्व भूमीचे स्वामी चक्रवर्ती आहात. आम्ही तुमच्या स्वाधीन आहोत, त्यामुळे आम्हाला नोकराप्रमाणे काही काम सांगावे.॥८६४॥

English :- Then king Bhim addresing king Nal as an universal monarch, said to him that he was just a small fry under his majesty's thumb and should therfore engage him with a task befitting a servant.

दधिपर्णोऽपि तं प्रह्वः प्रणिपत्य व्यजिज्ञपत् ॥
यदज्ञानावज्ञातः स्वाम्यपि त्वं क्षमस्व तत् ॥८६५॥

अन्वयः- दधिपर्णः अपि प्रह्वः तं प्रणिपत्य व्यजिज्ञपत् - यत् त्वं स्वामी अपि अज्ञानात् अवज्ञातः तत् क्षमस्व ॥८६५॥

विवरणम्:- दधिपर्णः अपि प्रह्वः नम्रः सन् तं नलं प्रणिपत्य प्रणम्य व्यजिज्ञपत् व्यज्ञापयत् - यत् त्वं स्वामी अपि अज्ञानात् अज्ञानवशात् अवज्ञातः अवमतः, तत् क्षमस्व ॥८६५॥

सरलार्थ :- दधिपर्णः अपि नम्रः सन् तं नलं प्रणम्य व्यज्ञापयत् - यत् त्वं स्वामी अपि अस्माभिः अज्ञानवशात् अवज्ञातः । तत्क्षमस्व ॥८६५॥

ગુજરાતી :- દધિપર્ણ રાજા પણ ખુશ થઈને, તથા તેને નમીને વિનંતી કરવા લાગ્યો કે, હે સ્વામી! અજ્ઞાનને લીધે અમે સ્વામીની જે અવજ્ઞા કરી છે, તે માટે આપ માફ કરજો.॥८६५॥

हिन्दी :- दधिपर्ण राजा भी खुश हो कर, और झुक कर विनंती करने लगे कि, हे स्वामी! अज्ञान के कारण स्वामी की जो अवज्ञा की है, उसके लिये आप क्षमा कीजिए ॥८६५॥

मराठी :- दधिपर्ण राजाने पण नम्र होऊन व नमस्कार करून नलराजाला विनंती केली की, हे स्वामी! अज्ञानामुळे आमच्या कडून आपली जी अवज्ञा झाली त्याबद्दल क्षमा करा?॥८६५॥

English :- Even king Dadeparne bowed down and appealed to King Nal to fove him for his ignorance and insensibility for having treated him with despite and disregard.

पूर्णेऽथाभिग्रहे भैमी प्रियसङ्गाज्जिनोशितुः ॥
कृत्वा स्नात्राङ्गरागालङ्कारपुष्पांशुकार्चनम् ॥८६६॥

अन्वयः- अथ प्रियसङ्गात् अभिग्रहे पूर्णे सति भैमी जिनेशितुः स्नात्राङ्गरागालङ्कारपुष्पांशुकार्चनं कृत्वा ---॥८६६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- *अथ अनन्तरं प्रियस्य प्रियेण वा सङ्गः प्रियसङ्गः तस्मात् प्रियसङ्गात् अभिग्रहे नियमे पूर्णे सति भीमस्यापत्यं स्त्री भैमी भीमात्मजा दमयन्ती जिनानाम् ईशिता जिनेशिता, तस्य जिनेशितुः जिनेश्वरस्य स्नात्रं च अङ्गराजश्चाऽलङ्काराश्च पुष्पाणि च अंशुकानि वस्त्राणि च स्नात्राऽङ्गरागालङ्कारपुष्पांशुकानि तैः स्नात्राऽङ्गरागाऽलङ्कारपुष्पांशुकैः अर्चनं पूजनम् अकरोत् ॥८६६॥*

सरलार्थः- अनन्तरं प्रियस्य सङ्गात् अभिग्रहे पूर्णे जाते दमयन्ती स्नात्राङ्गरागाऽलङ्कारपुष्पवस्त्रैः भगवतः जिनेश्वरस्य पूजनम् अकरोत् ॥कृत्वा ॥८६६॥

ગુજરાતી :- **પછી સ્વામીના સમાગમથી પોતાનો અભિગ્રહ સંપૂર્ણ થયા બાદ દમયંતી સ્નાત્ર, અંગવિલેપન, અલંકાર, પુષ્પ, તથા વસ્ત્ર વડે શ્રીજિનેશ્વરપ્રભુનું પૂજન કરીને, ॥८६६॥**

हिन्दी :- फिर स्वामी के समागम से अपना अभिग्रह पूरा होने पर दमयंतीने स्नात्र, अंगविलेपन, अलंकार, पुष्प और वस्त्रों से श्री जिनेश्वर प्रभु की पूजा की॥८६६॥

मराठी :- नंतर स्वामीच्या समागमनाने स्वत:चा अभिग्रह पूर्ण झाल्यावर दमयंतीने स्नात्र, अंगविलेपन, अलंकार, पुष्प आणि वस्त्रांनी श्री जिनेश्वरप्रभूचे पूजन केले. ॥८६६॥

English :- **Then Damyanti did a puja to Lord Jineshwar of the Snatras, applied sandelwood, decked herse with ornaments of flowers and garments as her solemn vow and resolution, had bee.. fulfilled.**

विकृतीश्च पुरोन्यस्य पत्रपूगीफलादि च ॥
स्वीचकार स्वयं यस्मादार्हतानामियं स्थितिः ॥८६७॥

अन्वयः- पुरः विकृतीः पत्रपूगीफलादि च न्यस्य स्वयं स्वीचकार। यस्मात् आर्हतानाम् इयं स्थितिः अस्ति ॥८६७॥

विवरणम्:- जिनेश्वरपूजनात् अनन्तरं पुरः पुरतः घृतादि विकृतीः, पत्रं च पूगीफलानि च पत्रपूगीफलानि। पत्रपूगीफलानि आदौ यस्य तत् पत्रपूगीफलादि च न्यस्य स्थापयित्वा (निधाय) स्वयं स्वीचकार, अङ्गीचकार। यतमान् अर्हतः इमे आर्हताः, तेषामार्हतानां जैनानाम् इयं स्थितिः रीतिः अस्ति ॥८६७॥

सरलार्थः- जिनेश्वरस्य पूजनात् अनन्तरं पुरः घृतादिविकृतीः पत्रपूगीफलादि च निधाय स्वयं स्वीचकार। यतः जैनानामियं रीतिः वर्तते ॥८६७॥

ગુજરાતી :- તથા તેમની પાસે (ઘૃત આદિ) વિગઈ, તેમ જ પાન તથા સોપારી આદિ ફલ વિગેરે મૂકીને, પોતે તેમનો સ્વીકાર કર્યો, કેમ કે જૈનોની એવી જ રીતિ છે. ॥८६७॥

हिन्दी :- और उनके पास (घृत आदि) विगई और पान-सुपारी आदिक फल वगैरह रखकर स्वयं उनका स्वीकार किया, क्योंकि जैनो की ऐसी ही रीत है। ॥८६७॥

मराठी :- नंतर जिनेश्वर प्रभू पुढे तूप वगैरे विगई आणि पत्र, फळ, सुपारी वगैरे ठेवून स्वतः त्याचा स्वीकार केला. कारण जैनांची अशीच पद्धत (रीति) आहे.॥८६७॥

English :- Then she kept milk, cords, ghee, oil, jaggery and fried stuffs, leaf, betel not and fruits near the Lord. And then accepted it from him as this is the custom and vogue of the jains.

आगाद्यथा प्रवृत्त्यैव धनदेवो नृपान्तिकम्॥
भैम्याः पूर्वोपकारीति गाढं गौरवितस्तदा ॥८६८॥

अन्वयः- धनदेवः यथाप्रवृत्त्या एव नृपान्तिकम् आगात्। तदा भैम्याः पूर्वोपकारी इति गाढं गौरवितः ॥८६८॥

विवरणम्:- धनदेवः सार्थवाहः यथा प्रवृत्त्या एव नृपस्य अन्तिकं नृपान्तिकम् आगात् आजगाम। तदा भीमस्यापत्यं स्त्री भैमी, तस्याः भैम्याः भीमाङ्गजायाः दमयन्त्याः पूर्वञ्चासौ उपकारी च पूर्वोपकारी पूर्वमुपकारं कृतवान् इति गाढम् अत्यन्तं गौरवितः

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सम्मानितः ॥८६८॥

सरलार्थः- धनदेवः सार्थवाहः वृत्तान्तं विज्ञाय नृपसमीपमागच्छात्। तदा अयं दमयन्त्याः पूर्वोपकारी वर्तते इति कृत्वा भृशं सम्मानितः ॥८६८॥

ગુજરાતી :- પછી તે સમાચાર મળવાથી ધનદેવ સાર્થવાહ પણ રાજા પાસે આવ્યો, તથા દમયંતીનો તે પૂર્વનો ઉપકારી હોવાથી, તે સમયે તેમણે તેનો ઘણો જ સત્કાર કર્યો. ॥८६८॥

हिन्दी :- फिर यह समाचार मिलने पर धनदेव सार्थवाह भी राजा के पास आया, वह दमयंती का पहला उपकारी होने से, उस समय दमयन्तीने उसका बहुत ही सत्कार किया॥८६८॥

मराठी :- नंतर ती बातमी मिळताच धनदेव सार्थवाह पण राजाजवळ आला, आणि दमयंतीचा तो पूर्वीचा उपकारी असल्याने त्या वेळेला त्याचा सत्कार करण्यात आला. ॥८६८॥

English :- Then the chef of the encampment, Dhandev, arived there, as he had received the good news and wholeheartedly felicitated Nal as he was obligated to Damyanti.

ऋतुपर्णनृपं देव्या सुतया च समन्वितम् ॥
तं तापसपुराध्यक्षं वासन्ताख्यं च सार्थपम् ॥८६९॥
प्रस्थाप्यात्मपितुः पार्श्वात् दूतानाजूहवत् तदा ॥
भीमभूस्तत्कृतैस्तैस्तैरुपकारैरिवेरिता ॥८७०॥(युग्मम्)

अन्वयः- तदा तत्कृतैः तैः तैः उपकारैः इव इरिता भीमभूः आत्मपितुः पार्श्वात् दूतान् प्रस्थाप्य देव्या सुतया च समान्वितं ऋतुपर्णनृपं, तापसपुराध्यक्षं वासन्ताख्यं तं सार्थपम् अजूहवत् ॥८७०॥

विवरणम्:- तदा तैः कृताः तत्कृताः, तैः तत्कृतैः (ऋतुपर्णादिकृतैः) तैः तैः नानाविधैः उपकारैः ईरिता प्रेरिता इव भीमात् भवतीति भीमभूः भीमात्मजा दमयन्ती आत्मनः पिता आत्मपिता, तस्य आत्मपितुः स्वजनकस्य पार्श्वात् दूतान् प्रस्थाप्य ॥८७०॥ देव्या रा या सुतया कन्यया च समन्वित युक्तं ऋतुपर्णनृपम्, तथा तापसपुरस्य अध्यक्षं तापसपुराध्यक्षं वसन्ताख्यं

(वसन्तः आख्या यस्य सः, तम्) वसन्तनामानं सार्थं पातीति सार्थपः, तं सार्थपं सार्थवाहम् अजूहवत् आह्वाययत् ॥८७०॥

सरलार्थः- तदा तैः कृतैः तैः तैः उपकारैः प्रेरिता इव दमयन्ती पितुः पार्श्वात् दूतान प्रस्थाप्य रा वा कन्यया च युक्तं ऋतुपर्णनृपं, तापसपुराध्यक्षं वसन्तनामानं तं सार्थवाहं च अजूहवत् ॥८७०॥

गुजराती :- पछी राणी तथा पुत्री सहित ऋतुपर्ण राजाने, तथा तापसपुरना अधिपति एवा ते वसंत नामना सार्थवाहने, दमयंतीએ પોતાના પિતા મારફતે દૂતો મોકલીને, તેઓએ કરેલા ઉપકારોને યાદ કરી તે વખતે ત્યાં બોલાવ્યા. ॥८७०॥

हिन्दी :- फिर रानी और पुत्रीसहित ऋतुपर्ण राजा को, और तापसपुर के अधिपती वसंत नामक सार्थवाहक को, ॥८६९॥ दमयंतीने अपने पिता द्वारा दूतों को भेजकर मानो उंनके द्वारा किये गये उपकारो याद कर उन्हें उस समय वहाँ बुलाया॥ ॥८७०॥

मराठी :- नंतर त्या त्या लोकांनी केलेल्या अनेक प्रकारच्या उपकारांनी जर्णकाय प्रेरित केलेल्या दमयन्तीने वडिलांकडून दूतांना पाठवून राणी व कन्येसह ऋतुपर्णराजाला व तापसपुराचा अधिपति असलेल्या वसंत सार्थवाहाला तेथे बोलाविले.॥८७०॥

English :- Then Damyanti, in order to repay the kindnen bestowed on her double fold called king Ritupame, his wife and daughter and the chef of Tapaspur, Vasant called them.

अथायातांश्च तन्नित्यं सच्चक्रे भीमभूपतिः ॥
कृतोपकारान् वत्सायास्तद्वात्सल्यवशंवदः ॥८७१॥

अन्वयः- अथतद्वात्सल्यवशंवदः भीमभूपतिः आयातान् वत्सायाः कृतोपकारान् तान् नित्यं सच्चक्रे॥८७१॥

विवरणम्ः- अथ अनन्तरं तस्यां दमयन्त्यां वात्सल्यं तद्वात्सल्यम्। तद्वात्सल्यस्य वशंवदः तद्वात्सल्यवशंवदः तनयावात्सल्यवशः भुवः पतिः भूपतिः। भीमः भूपतिः भीमभूपतिः भीमराजः आयातान् आगतान् वत्सायाः दमयन्त्याः कृतः उपकारः यैः ते कृतोपकाराः, तान् कृतोपकारान् विहितोपकारान् तान् ऋतुपर्णादीन् नित्यं सच्चक्रे सम्मानयामास॥८७१॥

सरलार्थः- अनन्तरं भीमराजः तनयावात्सल्यवशो भूत्वा आगतान् तान् दमयन्त्यां कृतोपकाशन् सर्वान् नित्यं सम्मानयामास ॥८७१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- પછી ભીમરાજાએ પોતાની પુત્રી પરના પ્રેમને વશ થઈને, તે પર ઉપકાર કરનારા અને ત્યાં આવેલા એવા તેઓ બધાંનો સત્કાર કર્યો.॥૮૭૧॥

हिन्दी :- फिर भीमराजाने अपनी पुत्री पर प्रेम-वश होकर, उसपर उपकार करनेवालों का और वहाँ आए हुए सभी लोगों का सत्कार किया॥ ॥८७१॥

मराठी :- नंतर भीमराजाने स्वत:च्या पुत्रीवरच्या प्रेमाला वश होऊन, तिच्यावर उपकार करणाऱ्या आणि तेथे आलेल्या सर्वांचा सत्कार केला.॥८७१॥

English :- Then Kind Bhim, felicitated all the people who had taken care of his beloved daughter and the others who had gathered there.

अपरेद्युः पुनस्तेषां भीमास्थाने निषेदुषाम् ॥
प्रातर्द्वितीयवत् भास्वान् कोऽप्यागात् भास्वरः सुरः ॥८७२॥

अन्वयः- अपरेद्युः पुनः तेषां भीमास्थाने निषेदुषां प्रातः द्वितीयः भास्वान् इव कोऽपि भासुरः सुरः आगात् ॥८७२॥

विवरणम्:- अपरस्मिन् दिने अपरेद्युः पुनः तेषां भीमस्या आस्थानं भीमास्थानं तस्मिन् भीमास्थाने भीमस्य सभामण्डपे निषेदुषां सतां उपविष्टवतां सतां प्रातः प्रभाते द्वितीयः भास्वान् सूर्यः इव कः अपि भासुरः तेजस्वी सुरः देवः तत्र आगात् आयात्॥८७२॥

सरलार्थः- अपरस्मिन् दिने यदा ते सर्वे भीमस्य आस्थाने उपविष्टाः आसन् तदा प्रभाते द्वितीयः सूर्यः इव भासुरः कोऽपि सुरः तत्र आगात् ॥८७२॥

ગુજરાતી :- પછી એક દિવસ તેઓ સઘળા ભીમરાજાની સભામાં બેઠા છે, એવામાં બીજા સૂર્ય સરખો કોઈક તેજસ્વી દેવ પ્રભાતમાં ત્યાં આવ્યો.॥૮૭૨॥

हिन्दी :- फिर एक दिन वह सब भीमराजा की सभा में बैठे हैं, इतने में दूसरे सूरज समान कोई तेजस्वी देव प्रभात में वहाँ आये। ॥८७२॥

मराठी :- नंतर एके दिवशी ते सगळे भीमराजाच्या सभेत बसले असतांना सूर्यासमान तेजस्वी कोणी देव सकाळीच तेथे आला.॥८७२॥

English :- Then one day when all were reated in the royal court of king Bhim, a radiant and a lustrous God arrived there at dawn, whose brightness and gloss reminded everyone there of a second sun.

भिमीमूचेऽअलिं बद्ध्वा त्वया गिरिदरीस्थया ॥
यः प्रबोध्यार्हतं धर्मं ग्राहितस्तापसाभिधः ॥८७३॥
सोऽहं विपद्य सौधर्मे जिनधर्मप्रभावतः ॥
श्रीकेशरविमानेशः केशराढ्यः सुरोऽभवम् ॥८७४युग्मम्॥

अन्वयः- अअलिं बद्ध्वा भैमीम् ऊचे - गिरिदरीस्थया त्वया प्रबोध्य यः आर्हतं धर्मं ग्राहितः, सः तापसाभिधः अहं विपद्य जिनधर्मप्रभावतः सौधर्मे श्रीकेशरविमानेशः केशराढ्यः सुरः अभवम्॥८७४॥

विवरणम्:- *अअलिं बद्ध्वा बद्धाञ्जलिः भीमस्य अपत्यं स्त्री भैमी, तां भैमीं भीमपुत्रीं दमयन्तीम् ऊचे - बभाषे । गिरेः दरी गिरिदरी । गिरिदर्यां तिष्ठतीति गिरिदरीस्था, तया गिरिदरीस्थया पर्वतगुहास्थितया त्वया प्रबोध्य बोधं कृत्वा यः अर्हतः अयम् आर्हतः, तम् आर्हतं जैनं धर्मं ग्राहितः सः तापसः अभिधा यस्य सः तापसाभिधः तापसनामा अहं विपद्य मृत्वा जिनस्य धर्मः जिनधर्मः । जिनधर्मस्य प्रभावः जिनधर्मप्रभावः, तस्मात् जिनधर्मप्रभावतः साधर्मे देवलोके*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीकेशरविमानस्य ईशः केशरः आख्या नाम यस्य सः केशराख्यः केशरनामा सुरः देवः अभवम् ॥८७४॥

सरलार्थः- सः अञ्जलिं बद्ध्वा दमयन्ती मुवाच। गिरिगुहास्थितया त्वया प्रबोध्य यः जैनधर्मं ग्राहितः । सः तापसनामा अहं मृता जिनधर्मप्रभावत् सौधर्मे देवलोके श्रीकेशरविमानस्य ईशः केशरनामा देवः अभूवम् ॥८७४॥

ગુજરાતી :- પછી તે હાથ જોડીને દમયંતીને કહેવા લાગ્યો કે, પર્વતની ગુફામાં રહેલા એવા તમે પ્રતિબોધ પમાડીને જે તાપસ નામના માણસને જૈનધર્મ પમાડયો હતો, તે હું મરણ પામીને જિનધર્મના પ્રભાવથી સૌધર્મ દેવલોકમાં શ્રીકેશર નામના વિમાનનો સ્વામી કેશર નામનો દેવ ઉત્પન્ન થયો છું.॥૮૭૪॥

हिन्दी :- फिर वह हाथ जोडकर दमयंती से कहने लगे कि, पर्वत की गूफा में रहते हुए आपने प्रतिबोध देकर जिस तापस नामक आदमी को जैनधर्म प्रदान किया था वह मैं मृत्यु पाकर जिनधर्म के प्रभाव से सौधर्म देवलोक में श्री केशर नामक विमान का स्वामी केशर नामक देव उत्पन्न हुआ हूँ। ॥८७४॥

मराठी :- नंतर तो हाथ जोडून दमयंतीला म्हणाला की, पर्वताच्या गुहेत राहात असतांना तुम्ही प्रतिबोध देवून ज्या तापस नावाच्या माणसाला जैन धर्माची दीक्षा दिली होती. तो मी मृत्यु पावून, जैन धर्माच्या प्रभावाने सौधर्मनावाच्या देवलोकात श्रीकेशर नावाच्या विमानाचा स्वामी केशर नावाचा देव उत्पन्न झालो.॥८७४॥

English :- The God goining hands towards Damyanti said to her, that he was a man named Tapas who lived in a cave carved in a mount and whose vigilance and knowledge had granted him the jain religion and when in due-course, he died he became a chef named Kesar of an aeroplane named Kesar, in a heaven named Sadharme and all due to the majestic influence and magnanimity of the jain religion.

इत्युक्त्वाऽभ्यर्च्य तत्पादौ सप्तभिः स्वर्णकोटिभिः ॥
कृतज्ञत्वं प्रकाश्याऽथ स सुरोऽन्तर्दधे ततः ॥८७५॥

अन्वयः- इत्युक्त्वा तत्पदौ अभ्यर्च्य सप्तभिः स्वर्णकोटिभिः कृतज्ञत्वं प्रकाश्य अथ सः सुरः ततः अन्तर्दधे ॥८७५॥

विवरणम्:- *इति उक्त्वा तस्याः दमयन्त्याः पादौ तत्पादौ दमयन्तीचरणौ अभ्यर्च्य पूजायित्वा सप्तभिः स्वर्णानां सुवर्णमुद्राणां कोटिभिः स्वर्णकोटिभिः सप्तकोटिभिः सुवर्णमुद्राभिः कृतं जानातीति कृतज्ञः । कृतज्ञस्य भावः कृतज्ञत्वं प्रकाश्य प्रकटीकृत्य अथ अनन्तरं सः सुरः देवः ततः भीमस्यास्थानमण्डपात् अन्तर्दधे तिरोदधे ॥८७५॥*

सरलार्थः- इति उक्त्वा तस्याः दमयन्त्याः पादौ पूजयित्वा सप्तकोटिभिः सुवर्णमुद्राभिः कृतज्ञतां प्रकटीकृत्य सः देवः ततः अन्तर्दधे ॥८७५॥

ગુજરાતી :- એમ કહીને, તથા તેણીના ચરણો પૂજીને સાત કોડ સોનામહોરો વડે પોતાનું કૃતજ્ઞપણું જાહેર કરીને પછી તે દેવ ત્યાંથી અદૃશ્ય થયો. ॥૮૭૫॥

हिन्दी :- ऐसा कहकर, उसने उस के (दमयंती) चरण पूजकर सात करोड सोने की मोहोरों से अपनी कृतज्ञता प्रगट की। फिर वह देव वहाँ से अदृश्य हो गये। ॥८७५॥

मराठी :- असे म्हणून दमयन्तीच्या चरणाची पूजा करून सात कोटी सोन्याच्या मोहोरांनी आपली कृतज्ञता प्रकट करुन तो देव तेथून अदृश्य झाला.॥८७५॥

English :- Then saying thus, he worshipped the feet of Damyanti and presented her with seven crore gold coins to show his gratitude to her and then vanished.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

राज्ञा भीमरथेनाथ दधिपर्णादिभिः समम् ॥
भूरिभूपतिसामन्त्यान् नलो राज्येऽभ्यषिच्यत ॥८७६॥

अन्वयः- अथ राज्ञा भीमरथेन दधिपर्णादिभिः समं भूरिभूपतिसामन्त्यात् नलः राज्ये अभ्यषिच्यत ॥८७६॥

विवरणम्:- अथ अनन्तरं राज्ञा नृपेण भीमरथेन दधिपर्णः आदौ येषां ते दधिपर्णादयः, तैः दधिपर्णादिभिः समं भूरयश्चते भूपतयश्च भूरिभूपतयः महानृपाः । भूरिभूपतीनां सामन्त्य भूरिभूपतिसामन्त्य, तस्मात् भूरिभूपतिसामन्त्यात् महानृपाणां सम्मत्या नलः राज्ये अभ्यषिच्यत अभिषिक्तः । भीमरथः दधिपर्णादिभिः भूरिभूपतिभिः विमृश्य नलं राज्ये अभ्यषिञ्चत् ॥८७६॥

सरलार्थः- अनन्तरं भीमः नृपः दधिपर्णादिभिः भूरिभूपतिभिः सम्मन्त्य नलं राज्ये अभ्यषिञ्चत् ॥८७६॥

ગુજરાતી :- પછી ભીમરથરાજાએ દધિપર્ણ આદિની સાથે મળીને ઘણા રાજાની સંમતિથી નલરાજાનો રાજ્યાભિષેક કર્યો.

हिन्दी :- फिर भीमरथ राजाने दधिपर्ण आदि के साथ मिलकर बहुत से राजाओंकी संमति से नलराजा का राज्याभिषेक किया॥८७६॥

मराठी :- नंतर भीमरथराजाने दधिपर्ण इत्यादी अनेक राजांशी विचार विनिमय करून त्यांच्या संमतीने नलराजाला राज्यभिषेक केला.॥८७६॥

English :- Then King Bhim and King Dadiparne with the approval of many other kings coronated Nal as King.

नलादेशादमेल्यन्त तदानीं तैर्महानृपैः ॥
विपक्षक्षोभकारिण्योऽक्षोहिण्यः क्षुण्णभूतलाः ॥८७७॥

अन्वयः- तदानीं नलादेशात् तैः महानृपैः विपक्षक्षोभकारिण्यः क्षुण्णभूतलाः अक्षोहिण्यः अमेल्यन्त॥८७७॥

विवरणम्:- *तदानीं नलस्य आदेशः नलादेशः, तस्मात् नलादेशात् तत्काले तैः महान्तश्च ते नृपाश्च महानृपाः, तैः महानृपैः महाराजभिः विरुद्धः पक्षः विपक्षः । विपक्षस्य क्षोभः विपक्षक्षोभः । विपक्षक्षोभं कुर्वन्तीत्येवंशीलाः विपक्षक्षोभकारिण्यः विपक्षं क्षुब्धं कुर्वत्यः क्षुण्णंचूर्णितं भूतलं याभिः ताः क्षुण्णभूतलाः चूर्णितपृथ्वीतलाः अक्षौहिण्यः सेनाः अमेल्यन्त समचीयन्त ॥८७७॥*

सरलार्थः- तदानीं नलस्य आदेशात् तैः महानृपैः विपक्षस्य क्षोभं जनयन्त्यः भूमिं चूर्णयन्त्यः सेनाः संगृहीताः ॥८७७॥

गुजराती :- પછી નલની આજ્ઞાથી તે વખતે જ તે મોટા રાજાઓએ શત્રુઓને ક્ષોભ પમાડનારી, તથા પૃથ્વીને ધૂજાવનારી સેનાઓ એકઠી કરી.॥८७७॥

हिन्दी :- फिर नल की आज्ञा से उसी समय बडे राजाओं ने शत्रुओं को क्षोभ करानेवाली और पृथ्वी को कंपायमान करनेवाली सेना को जमा किया॥ ॥८७७॥

मराठी :- नंतर नलाच्या आज्ञाने त्याच वेळेला मोठ्या राजांनी शत्रूला क्षोभ उत्पन्न करणाऱ्या आणि पृथ्वीला कंपित करणाऱ्या सेना जमा केल्या. ॥८७७॥

English :- Then on the order and behest of King Nal all the big king formed an army that could destroy and spread disaster in an enemy and that could termulate the earth by its presence.

नलस्तैः सह भूपालैरचालीत् कोशलां प्रति ॥
कूबरेणाहृतां शाठ्यात् प्रत्याहर्तुं निजां श्रियम् ॥८७८॥

अन्वयः- नलः तैः भूपालैः सह कूबरेण शाठ्यात् आहृतां निजां श्रियं प्रत्याहर्तुं कोशलां प्रति अचालीत् ॥८७८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- नलः तैः भुवं पालयन्तीति भूपालाः, तैः भूपालैः नृपैः सह कूबरेण कनीयसा भ्रात्रा शठस्य भावः शाठ्यं, तस्मात् शाठ्यात् कपटात् आहृताम् अपहृतां गृहीतां निजां श्रियं राज्यलक्ष्मीं प्रत्याहर्तुं प्रयाणेतुं कोशलां नगरीं प्रति अचालीत् अगमत् ॥८७८॥

सरलार्थः- नलः तैः नृपैः सह कूबरेण शाठ्यात् अपहृतां स्वां श्रियं प्रत्याहर्तुं कोशलां प्रति अचालीत् ॥८७८॥

ગુજરાતી :- પછી નલરાજાએ, કૂબરે લુચ્ચાઈ કરીને હરી લીધેલી પોતાની લક્ષ્મીને પાછી મેળવવા માટે તે રાજાઓ સહિત કોશલાનગરી તરફ પ્રયાણ કર્યું. ॥૮૭૮॥

हिन्दी :- फिर नलराजा ने कुबर द्वारा कपट से हरण की हुई अपनी राजलक्ष्मी को वापस प्राप्त करने के लिये उन राजाओं सहित कोशलानगरी की ओर प्रयाण किया ॥८७८॥

मराठी :- नंतर नलराजाने कूबराने कपट करून हरण केलेली, स्वत:ची राज्यलक्ष्मी परत मिळविण्यासाठी त्या राजांसह कोशला नगरीकडे प्रयाण केले.॥८७८॥

English :- Then King Nal proceeded towards the city of Koshala along with the other kings in order to teach Kubar and lesson, who had shatched away his Kingdom using unjust and illegal means.

कैश्चित् प्रयाणकैः पृथ्वीं छादयन्निव सैनिकैः ॥
नलः कौशलमुद्यानं रतिवल्लभमावसत् ॥८७९॥

अन्वयः- नलः कैश्चित् प्रयाणकैः सैनिकैः पृथ्वीं छादयन् इव कौशलं रतिवल्लभम् उद्यानम् आवसत् ॥८७९॥

विवरणम्:- नलः कैश्चित् प्रयाणकैः सैनिकैः पृथ्वीं भूमिं छादयन् उपवनम् आवसत् । सेनानिवेशम् अकारयत् ॥८७९॥

सरलार्थः- नलः कैश्चित् प्रयाणकैः सैनिकैः पृथ्वीं छादयन् (आवृण्वन्) इव कोशलायाः रतिवल्लभं नाम उपवनम् आवसत् ॥८७९॥

ગુજરાતી :- પછી કેટલેક પ્રયાણે સૈનિકો વડે જાણે પૃથ્વીને આચ્છાદિત કરતો હોય તેમ નલરાજા કોશલાનગરીના રતિવલ્લભ

નામના ઉદ્યાનમાં આવી પહોંચ્યો.॥૮૭૯॥

हिन्दी :- फिर कितने ही प्रयाणों से सैनिको द्वारा मानो पृथ्वी को आच्छादित करता हुआ वह नलराजा कोशलानगरी के रतिवल्लभ उद्यान में आकर वहाँ सेना के साथ रहा॥ ॥८७९॥

मराठी :- नंतर कित्येक प्रयाण करून सैनिकांनीं पृथ्वीला झाकून टाकीत नलराजाने कोशला नगरीच्या रतिवल्लभ नावाच्या उद्यानात तळ ठोकला. ॥८७९॥

English :- Then King Nal with his huge army which sumed that it had covered the whole earth, made an encaimpment in a garden named Rativallab, in the kingdom of Koshala.

नलमायातमाकर्ण्य बलाक्रान्तमहीतलम् ॥
चकम्पे कूबरो मृत्युदन्तयन्त्रमिवागतः ॥८८०॥

अन्वयः- बलाक्रान्तमहीतलं नलम् आयातमाकर्ण्य कूबरः मृत्युदन्तयन्त्रम् आगतः इव चकम्पे ॥८८०॥

विवरणम्:- बलेन पराक्रमेण आक्रान्तं महीतलं पृथ्वीतलं येन सः बलाक्रान्तमहीतलः, तं बलाक्रान्तमहीतलं पराक्रमाक्रान्तभूतलं नलम् आयातम् आगतम् आकर्ण्य श्रुत्वा कूबरः, दन्तानां यन्त्रं दन्तयन्तम्। मृत्योः यमस्य दन्तयन्त्रं मृत्युदन्तयन्त्रम् मृत्युमुखम् आगतः इव चकम्पे अकम्पत॥८८०॥

सरलार्थः- पराक्रमेण पृथ्वीतलम् आक्रान्तवन्तं नलम् आगतं श्रुत्वा कूबरः मृत्युदन्तयन्त्रम् आगतः इव अकम्पत॥८८०॥

ગુજરાતી :- લશ્કરથી દબાવેલ છે પૃથ્વીતલ જેણે એવા નલરાજાને આવેલા જાણીને, કૂબર જાણે મૃત્યુરુપી સૂડી વચ્ચે આવ્યો હોય તેમ કંપવા લાગ્યો.॥૮૮૦॥

हिन्दी :- लश्करों से दबाया है पृथ्वीतल जिसने ऐसे नलराजा को आये हुए जानकर, कूबर मानो मृत्युरुपी सरोते के बीच आया नही हो वैसे काँपने लगा॥ ॥८८०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- पराक्रमाने व सैन्याने सर्व पृथ्वीला व्यापून टाकणारा नलराजा आला आहे. असे जाणून कूबर मृत्यूच्या जबड्यात सापडल्यासारखा थरथर कापूं लागला. ॥८८०॥

English :- When Kubar recieved the message that Nal had arrived woth a huge army that had pressed down, the earth by its weight, began to tramour, asthough he was standing inbetween a huteracker, which can crack him to death anytime.

देवनैवेव दुध्यस्वेत्यूचे दूतेन तं नलः ॥
शस्त्राशस्त्रि न नौ युक्ता मिथः सोदरयोः पुनः ॥८८१॥

अन्वयः- देवनैः एव युध्यस्व। इति नलः दूतेन तम् ऊचे। सोदरयोः नौ मिथः शस्त्राशस्त्रि न युक्ता ॥८८१॥

विवरणम्:- देवनैः पाशैः एव युध्यस्व। इति नलः दूतेन तं कूबरम् ऊचे। समानमुदरं ययोः तौ सोदरौ, तयोः सोदरयोः भ्रात्रोः नौ आवयोः मिथः परस्परं शस्त्रैः शस्त्रैः प्रहृत्य प्रवृतं युद्धं शस्त्राशस्त्रि न युक्ता न युज्यते॥८८१॥

सरलार्थः- पाशैः एव युध्यस्व। इति नलः स्वदूतेन तं नलम् अवदत् - सोदरयोः आवयोः परस्परं शस्त्राशस्त्रि युद्धं कर्तुं न युज्यते ॥८८१॥

ગુજરાતી :- પાસઓ વડે જ (મારી સાથે) તું યુદ્ધ કર. એમ નલરાજાએ દૂત મારફતે તેને કહેવડાવ્યું, કેમ કે પરસ્પર સગા ભાઈ એવા આપણી વચ્ચે શસ્ત્રોનું યુદ્ધ યોગ્ય નથી. ॥૮૮૧॥

हिन्दी :- "पासों द्वारा तुम मेरे साथ युद्ध करो।" ऐसा नलराजा ने दूत द्वारा उसे संदेशा भिजवाया। क्यों कि परस्पर सगे भाईओ में शस्त्र-युद्ध योग्य नहीं। ॥८८१॥

मराठी :- फासे टाकूनच युद्ध कर असे नलराजाने दूतामार्फत कूबराला कळविले कारण आपल्या दोघा भावांत परस्परात शस्त्राशस्त्री युद्ध योग्य नाही.॥८८१॥

English :- King Nal send a menage to Kubar asking him to fight him, in a game of diue, as it is not proper to fight with weapon, with a brother, who is having the same blood running through his veins.

कूबरो जीवितम्मन्यः संयुगाभाववार्तया ।।
सद्यो देवितुमारेभे पुनरीप्सन् नलश्रियम् ।।८८२।।

अन्वयः- संयुगाभाववार्तया जीवितमन्यः पुनः नलश्रियम् ईप्सन् कूबरः सद्यः देवितुमारेभे।।८८२।।

विवरणम्:- संयुगस्य युद्धस्य अभावः संयुगाभावः। संयुगाभावस्य वार्ता संयुगाभाववार्ता, तया संयुगाभाववार्तया आत्मानं जीवितं मन्यतेऽसौ जीवितम्मन्यः, पुनः पुनरपि नलस्य श्रीः नलश्रीः, तां नलश्रियं नलस्य राज्यलक्ष्मीं आप्तुम् इच्छन् ईप्सन् लिप्सन् कूबरः सद्यः तत्क्षणमेव देवितुं पाशैः क्रीडितुम् आरेभे आरभत ।।८८२।।

सरलार्थः- युद्धाभाववार्तया आत्मानं जीवितं मन्यमानः कूबरः पुनः नलस्य राज्यलक्ष्मीम् आप्तुमिच्छया झटिति देवितुमारब्धः ।।८८२।।

ગુજરાતી :- લડાઈ ન કરવાની વાતથી પોતાને જીવતો રહેલો માનીને કૂબર તુરત નલની લક્ષ્મીને ફરીથી મેળવવાની ઈચ્છા કરતો પાસાઓ વડે રમવા લાગ્યો. ।।८८२।।

हिन्दी :- लडाई न करने की बात से अपने को जीवित रहा हुआ मान कर, कूबर नल की लक्ष्मी को फिर से प्राप्त करने की इच्छा से पासों से खेलने लगा ।।८८२।।

मराठी :- युद्ध न करण्याच्या गोष्टीने स्वत:ला जिवंत राहिलेला मानून ताबडतोब कूबर नलाची राज्यलक्ष्मी पुन्हा मिळविण्याच्या इच्छेने फासे टाकून खेळू लागला.।।८८२।।

English :- When Kubar heard that Nal is'nt going fight with him, he began germinating seeds of happiness and ways to aquire Nal's weakth back, in him. So he began playing the game of dice.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

नलो भिदेलिमाऽभाग्यः पचेलिमशुभोदयः ॥
सर्वं तदाऽजयत्तस्मात् भाग्यं हेतुर्जयाय यत् ॥८८३॥

अन्वयः- तदा भिदेलिमाऽभाग्यः पचेलिमशुभोदयः नलः तदा तस्मात् सर्वम् अजयत्। यत् भाग्यं जयाय हेतुः भवति ॥८८३॥

विवरणम्:- तदा भिदेलिमं भिन्नं न भाग्यमभाग्यम्। भिदेलिममभाग्यं यस्य सः भिदेलिमाभाग्य संभिन्नदुर्भाग्यः, पचेलिमः पक्वः शुभस्य उदयः यस्य सः पचेलिमशुभोदयः पक्वशुभोदयः नलः तदा तस्मात् कूबरात् सर्वम् अजयत्। यत् यतः भाग्यं दैवं जयाय विजयाय हेतुः कारण भवति। दैवायत्तो विजयः, इत्यर्थः ॥ अधुना दुष्कर्मणो विनाशात् शुभकर्मणश्चोदयात् नलः जयं लेभे ॥८८३॥

सरलार्थः- दुर्भाग्यस्य विनाशात् शुभकर्मश्राश्च उदयात् नलः कूबरात् सर्वमजयत्। तथाहि भाग्यं जयाय हेतुः भवति॥८८३॥

ગુજરાતી :- જેનું દુર્ભાગ્ય નષ્ટ થયું છે, તથા જેના શુભનો ઉદય પરિપક્વ થયેલો છે, એવા નલરાજાએ તેની પાસેથી સઘળું રાજ્ય તે જ વખતે જીતી લીધું, કેમ કે જીત માટે ઉત્તમ ભાગ્ય જ કારણભૂત છે.॥૮૮૩॥

हिन्दी :- जिस का दुर्भाग्य नष्ट हुआ है, और जिस के शुभ का उदयकाल परिपक्व हुआ है, ऐसे नलराजा ने उसके पास से सब राज्य उसी समय जीत लिया, क्यों कि जीत के लिये उत्तम भाग्य ही कारणभूत है। ॥८८३॥

मराठी :- दुर्भाग्याचा नाश झाल्यामुळे व शुभ कर्माचा उदय झाल्याने नलराजाने कूबराजवळून सर्व राज्य जिंकून येतले. कारण भाग्यच जयाला कारण असते.॥८८३॥

English :- Nal's calamitious ill-luck was now destroyed and the day of auspicious omens dawned, so Nal won back everything. What can one do against a man if the Godders of desting is smiling upon him ?

P.P. Gunratnasuri M.S. Jun Gun Aaradhak Trust

निजं राज्यमलञ्चक्रे शक्रेणाऽप्यथ दुर्जयः ॥
नलो भैम्याश्रितश्रीकः स्त्रीरत्नेनेव चक्रभृत् ॥८८४॥

अन्वयः- अथ शक्रेण अपि दुर्जयः, स्त्रीरत्नेन चक्रभृत् इव भैम्या आश्रितश्रीकः नलः निजं राज्यम् अलञ्चक्रे॥८८४॥

विवरणम्:- अथ अनन्तरं शक्रेण इन्द्रेण अपि दुःखेन जीयतेऽसौ दुर्जयः जेतुमशक्यः, यथा स्त्रीरत्नेन चक्रं बिभर्तीति चक्रभृत् चक्रवर्ती आश्रितश्रीकः भवति तथा भीमस्यापत्यं स्त्री भैमी, तया भैम्या भीमराजपुत्र्या दयन्त्या आश्रिता श्रीः यं सः आश्रितश्रीकः आश्रित-लक्ष्मीकः नलः निजं स्वं राज्यम् अलञ्चक्रे भूषयाञ्चकार ॥८८४॥

सरलार्थः- अनन्तरं इन्द्रेण अपि जेतुमशक्यः नलः यथा चक्रवर्ती स्त्रीरत्नेन श्रीमान् भवति तथा, दमयन्त्या आश्रितश्रीकः अभवत् स्वं राज्यं च अलञ्चक्रे ॥८८४॥

ગુજરાતી :- પછી ઇંદ્રથી પણ ન જીતાય એવો નલરાજા, સ્ત્રીરત્નથી આશ્રિત થયેલા ચક્રની પેઠે દમયંતીથી શોભાયુક્ત થઈ પોતાનાં રાજ્યને શોભાવવા લાગ્યો.॥८८४॥

हिन्दी :- फिर इंद्र से भी न जीता जा सके ऐसा नलराजा, स्त्रीरत्न से आश्रित ऐसे चक्र के समान दमयंती से शोभायुक्त होते हुए अपने राज्य को सुशोभित करने लगे। ॥८८४॥

मराठी :- नंतर इंद्राला सुद्धा जिंकता येणे अशक्य असलेला नलराजा स्त्रीरत्नाने चक्रवर्तीप्रमाणे दमयंतीमुळे राज्यलक्ष्मी प्राप्त करून स्वत:च्या राज्याला भूषवू लागला.॥८८४॥

English :- Then Nal, (who could'nt be defeated even by Indra) began to increase the glory and splendour of the Kiongdom along with his magestic wife, who was a diadem among women, just as one increase the glory and refulgent with his discuss.

P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

उपेन्द्र स्व सर्वैः स नलः स्फूर्जद्भुजाबलः ॥
ढौकितोपायनै रेजे भरतार्धगतैर्नृपैः ॥८८५॥

अन्वयः- स्फूर्जद्भुजाबलः स नलः भरतार्धगतैः ढौकितोपायतैः सर्वैः नृपैः उपेन्दः इव रेजे ॥८८५॥

विवरणम्:- *भुजयोः बलं भुजाबलम् । स्फूर्जत् भुजाबलं यस्य सः स्फूर्जद्भुजाबलः देदीप्यमानबाहुबलः सः नृप ढौकितानि पुरःस्थापितानि उपायनानि प्राभृतकानि यैः ते ढौकितोपायानाः, तैः ढौकितोपायनैः पुरःस्थापितप्राभृतकैः, भरतस्यार्धं भरतार्धम् । भरतार्धं गताः भरतार्धगताः, तैः भरतार्धगतैः भरतार्धे वर्तमानैः सर्वैः व्रन् पान्तीति नृपाः, तैः नृपैः राजभिः उपेन्द्र विष्णुः इव रेजे शुशुभे॥८८५॥*

सरलार्थः- स्फुरद्बाहुबलः सः नलः पुरः उपायनानि स्थापयद्भिः भरतार्धक्षेत्रे वर्तमानैः सर्वैः नृपैः उपेन्द्रः इव रराज ॥८८५॥

ગુજરાતી :- જાજ્વલ્યમાન છે ભુજાબળ જેનું એવો તે નલરાજા, અર્ધભરતના ભેટસોગાદો લઈ પધારેલા એ રાજાઓ વચ્ચે વિષ્ણુની પેઠે શોભવા લાગ્યો.॥૮૮૫॥

हिन्दी :- स्फूर्तिदायक है भुजाबल जिसका, ऐसा वह नलराजा, भेट किए हैं उपहार जिन्होंने ऐसे अर्धभरत के सभी राजाओं से विष्णु के समान शोभने लगा ॥८८५॥

मराठी :- बाहुबळ स्फुरणपावत असलेला नलराजा आपल्या समोर अनेक नजराणे ठेवणाऱ्या, अर्धभरतक्षेत्रातील राजांनी विष्णूप्रमाणे शोभू लागला. ॥८८५॥

English :- Then Nal was seemed like Vishnu among the kings who had gifted him with different things, had increased the own fulgent and radiance with his own muscular strength.

दानसम्मानसम्भाषैरासतामाश्रितास्तदा ॥
द्विषोऽपि तोषयामास सौजन्यातिशयान्नलः ॥८८६॥

अन्वयः- तदा नलः आश्रिताः आसताम् । सौजन्यातिशयात् द्विषः अपि दान सम्मान सम्भाषैः तोषयामास ॥८८६॥

विवरणम्:- *तदा तस्मिन् समये नलः आश्रिताः आसताम् दूरे तिष्ठन्तु । सुजनस्य भावः सौजन्यम् । सौजन्यस्य अतिशयः सौजन्यातिशयः, तस्मात् सौजन्यातिशयात् अतीव सुजनत्वात् द्विषः शत्रून् अपि दानं च सम्मानश्च सम्भाषः च तैः दांनसम्मानसम्भाषैः दानेन संभानेन मधुरवचनेन च तोषयामास समतोषयत् । नलः आश्रितान् इव शत्रूनपि अतोषयत् ॥८८६॥*

सरलार्थः- तदा नलः आश्रिताः तु दूरे तिष्ठन्तु आश्रितान् अतोषयत् एव परं दानेन संमानेन मधुरभाषणेन च शत्रूनपि अतोषयत् ॥८८६॥

गुजराती :- તે વખતે નલરાજાએ, પોતાના આશ્રિતો તો એક બાજુ રહ્યા, પરંતુ પોતાની અતિ સજ્જનતાથી શત્રુઓને પણ દાન, સન્માન તથા મીઠાં વચનોથી સંતુષ્ટ કર્યા.॥८८६॥

हिन्दी :- उस समय नलराजाने अपने आश्रितो को तो छोडो लेकिन अपनी अति सज्जनता से शत्रुओं को भी दान, सन्मान और मीठे वचन से संतुष्ट किया॥ ॥८८६॥

मराठी :- तेव्हा नलराजाने आपल्या आश्रितांना तर दान, सन्मान आणि मधुर वचनांनी संतुष्ट केले. पण शत्रूनां सुध्दा दान, सन्मान आणि मधुर वचनाने संतुष्ट केले. ॥८८६॥

English :- At that time Nal not only spoke kind words, distrubuted wealth and gave utmost respect and love, to his own supporters adn well-wishers, but also to his enemies.

किमुच्यतेऽस्य सौजन्यमसामान्या वदान्यता ॥
कूबरोऽपि कृतो येन पूर्ववत् यौवराज्यभाक् ॥८८७॥

अन्वयः- अस्य सौजन्यम् असामान्या वदान्यता च किमुच्यते । येन कूबरः अपि पूर्ववत् यौवराज्यभाक् कृतः ।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- अस्य नलस्य सुजनस्य भावः सौजन्यं सुजनता, न सामान्या असामान्या अलौकिकी वदान्यस्य भावः वदान्यता दातृता उदारता, किम् उच्यते? तेन नलेन कूबरः अपि कपटेन स्व राज्यमपहरन् अपि पूर्ववत् यथापूर्वं युवा चासौ राजा च युवराजः। युवराजस्य भावः कर्म वा यौवराज्यम्। यौवराज्यं भजतीति यौवराज्यभाक् कृतः युवराजः कृतः। अपकारिणि अपि उपकारी नलः ॥८८७॥

सरलार्थ:- नलस्य सुजनता अलौकिकोदारता च किम् उच्यते। नलेन शाठ्येन स्वं राज्यमपहरन् अपकारी कूबरः अपि युवराजः कृतः ॥८८७॥

ગુજરાતી :- તેની સજ્જનતા માટે તથા તેના અનુપમ ઉદારપણા માટે (વધારે) શું કહેવું ? કે જેણે કૂબરને પણ પૂર્વની પેઠે પાછો યુવરાજ કર્યો. ॥८८७॥

हिन्दी :- उनकी सज्जनता के लिये और उनकी अनुपम उदारता के लिये और अधिक क्या कहना? कि जिसने कूबर को भी पूर्ववत् फिर युवराज बनाया॥ ॥८८७॥

मराठी :- नलराजाचा सज्जनपणा व असामान्य दातृता काय वर्णावी। त्याने कपटाने राज्य हरण करणाऱ्या कूबरालाही पुन्हा युवराज बनविले.॥८८७॥

English :- King Nal's gantlemanilers and civilityand ulmost generosity, knew no barriers, as he even forgave his brother Kubar and made hima heir-apparent (Crown-prince)

धर्मोद्भिभूतिः सर्वेति कृतज्ञस्तं प्रवर्धयन् ॥
नलो भैम्या समं तत्र प्रीत्या चैत्यान्यवन्दत ॥८८८॥

अन्वयः- धर्मात् सर्वा विभूतिः इति कृतज्ञः नलः भैम्या सह तं प्रवर्धयन् तत्र प्रीत्या चैत्यानि अवन्दत ॥८८८॥

विवरणम्:- धर्मात् सर्वा विभूतिः ऐश्वर्यं भवति इति मत्वा कृतं जानाति इति कृतज्ञः नलः भीमस्यापत्यं स्त्री भैमी दमयन्ती, तया भैम्या दमयन्त्या सह तं धर्मं प्रवर्धयन् वृद्धिं प्रापयन् तत्र निजे राज्ये प्रीत्या प्रेम्णा चैत्यानि मन्दिराणि अवन्दत ॥८८८॥

सरलार्थः- धर्मात् सर्वम् ऐश्वर्यं प्राप्यते इति मत्वा कृतज्ञः नलः भैम्या सह तं धर्मं प्रवर्धयन् स्वराज्ये चैत्यानि अवन्दत ॥८८८॥

गुजराती :- ધર્મથી સઘળો વૈભવ પ્રાપ્ત થાય છે, એમ માનીને કૃતજ્ઞ નલરાજાએ દમયંતી સહિત તે ધર્મની વૃદ્ધિ કરતાં પોતાના રાજ્યમાંના જિનમંદિરોનું હર્ષથી વંદન કર્યું.॥८८८॥

हिन्दी :- धर्म से सभी वैभव प्राप्त होते हैं, ऐसा मानकर कृतज्ञ नलराजाने दमयंती सहित उस धर्म की वृद्धि करते हुए राज्य के जिन मंदिरों को हर्ष से प्रणाम किया॥८८८॥

मराठी :- धर्माने सगळे वैभव प्राप्त होते असे मानून कृतज्ञ नलराजाने दमयंतीसमवेत धर्माची वृध्दि करीत राज्यातील जिनमंदिरांना आनंदाने नमस्कार केले.॥८८८॥

English :- The utmost grateful, belived that one attains all frandear and glory if only he practices his religion in an appropriate way. So Nal along with his wife Danyanti began increasing the esplendoyr and grace of the jain religion and thankfully bowed down to all the jain temples in their kingdom.

रथयात्रां पवित्रात्मा कारयामास चार्हताम्॥
गुरुणां गुणिनां नित्यं वरिवस्यां व्यधत्त च ॥८८९॥

अन्वयः- पवित्रात्मा अर्हतां रथयात्रां कारयामास। गुरुणां गुणिनां च नित्यं वरिवस्यां व्यधत्त ॥८८९॥

विवरणम्:- पवित्रः आत्मा यस्य सः पवित्रात्मा नलः अर्हतां तीर्थकराणां रथैः यात्रा रथयात्रा, तां रथयात्रां कारयामास। गुरुणां गुणाः ऐषां सन्तीति गुणिनः, तेषां गुणिनां च वरिवस्यां सेवां व्यधत्त अकृत ॥८८९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- पवित्रात्मा नलः तीर्थकराणां नलयात्रां कारयामास। तथा गुरुणां गुणिनां च सेवाम् अकरोत् ॥८८९॥

गुजराती :- વળી પવિત્ર આત્માવાળા નલરાજાએ તીર્થકરોની રથયાત્રા કરી, તેમ ગુરુમહારાજોની તથા ગુણીજનોની હમેશાં સેવા કરી. ॥८८९॥

हिन्दी :- फिर पवित्र आत्मावाले नलराजाने तीर्थंकरों की रथयात्रा की वैसे गुरुमहाराजाओं की और गुणीजनों की हमेशा सेवा की। ॥८८९॥

मराठी :- नंतर पवित्र आत्मा असलेल्या नलराजाने तीर्थंकरांची रथयात्रा केली, तसेच गुरु महाराजांची आणि गुणी लोकांची नेहमी सेवा केली.॥८८९॥

English :- Then this pious soul, King Nal, went on a pilgrimage on his chariot to all sacred spots. He used to always, serve priest and virtous and meritorious men wholehearstedly.

श्रावकाणां च वात्सल्यमतुल्यं विदधेऽनिशम् ॥
सर्वत्राऽप्यकरोन्मान्यमार्हतं स्वं च शासनम् ॥८९०॥

अन्वयः- अनिशं श्रावकाणाम् अतुल्यं वात्सल्यं विदधे। सर्वत्र आर्हतं शासनं स्वं शासनं च मान्यम् अकरोत् ॥८९०॥

विवरणम्:- *न विद्यते निशा यस्मिन् कर्मणि यथा स्यात् तथा अनिशं सततं श्रावकाणाम् न विद्यते तुल्यं यस्य तद् अतुल्यं निरुपमं वत्सलस्य भावः वात्सल्यं विदधे चक्रे। सर्वत्र अर्हतामिदम् आर्हतं जैनं शासनं स्वं शासनं च मान्यम् अकरोत्॥८९०॥*

सरलार्थः- सः नलः सततं श्रावकाणां वात्सल्यमकरोत्। तथा सर्वत्र आर्हतं शासनं स्वशासनं च मान्यम् अकरोत् ॥८९०॥

गुजराती :- વળી તેણે હમેશાં શ્રાવકોનું અનુપમ વાત્સલ્ય કરવા માંડયું, અને સર્વ જગાએ તીર્થંકર પ્રભુઓનું તથા પોતાનું પણ શાસન માન્ય કરાવ્યું.॥८९०॥

हिन्दी :- फिर वह हमेशा श्रावकों का अनुपम वात्सल्य करने लगे और सभी जगह उन्होने तीर्थंकर प्रभु का और अपना शासन भी मान्य कराया॥ ॥८९०॥

मराठी :- नंतर तो नेहमी श्रावकांचे अनुपम वात्सल्य करू लागला आणि त्यानें सर्व ठिकाणी तीर्थकर प्रभूंचे आणि स्वत:चे शासन त्याने मान्य करावयास लावले. ॥८९०॥

English :- King Nal began treating his subjects with foundness and parental love. He also began worshipping the Trithankars of every sacred spot and also made his law and order, known around.

पुष्कराख्यः सुतो भैम्या जातोऽध्यैताखिलाः कलाः ॥
प्राप्तोऽथ यौवनावस्थां राज्यश्रीवरणोचिताम् ॥८९१॥

अन्वयः- भैम्याः पुष्कराख्यः सुतः जातः। सः अखिलाः कलाः अध्यैत। अथ राज्यश्रीवरणोचितां यौवनावस्थां प्राप ॥८९१॥

विवरणम्:- *भीमस्यापत्यं स्त्री भैमी, तस्याः भैम्याः भीमराजपुत्र्याः दमयन्त्याः पुष्करः आख्या यस्य सः पुष्कराख्यः पुष्करनामा सुतः पुत्रः जातः अजायत। सः अखिलाः कलाः अध्यैत अशिक्षत। अथ अनन्तरं राज्यस्य श्रीः राज्यश्रीः। राज्यश्रियाः वरणं राज्यश्रीवरणम्। राज्यश्रीवरणस्य उचिता राज्यश्रीवरणोचिता, तां राज्यश्रीवरणोचितां यूनःभावः यौवनम्। यौवनस्य अवस्था यौवनावस्था, तां यौवनावस्थां प्राप्तः, प्राप्ताम् ॥८९१॥*

सरलार्थः- अथ दमयन्त्याः पुष्करनामा पुत्रः अजायत। स सकलाः कलाः अपठत्। राज्यश्रीवरणानुकूलां यौवनावस्थां च प्राप्नोत् ॥८९१॥

ગુજરાતી :- પછી દમયંતીને પુષ્કર નામનો પુત્ર થયો, તથા તેણે સર્વ કલાઓનો અભ્યાસ કર્યો અને તે રાજ્યલક્ષ્મી ભોગવવાને ઉચિત એવું યૌવન પામ્યો.॥८९१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- (फिर दमयंती को पुष्कर नामक पुत्र हुआ, तथा उसने सभी कलाओं का अभ्यास किया, और वह राज्यलक्ष्मी का भोग करने के लिये उचित यौवन वय को प्राप्त हुआ ॥८९१॥

मराठी :- नंतर दमयंतीला पुष्कर नावाचा पुत्र झाला, त्याने सर्व कलांचा अभ्यास केला आणि राज्यलक्ष्मीचा उपभोग घेण्यासाठी उचित अशा यौवनवयात प्रवेश केला. ॥८९१॥

English :- Then Damyanti had sun named Pushkar, who mastered up all the arsts and also studied about the kingdoms administration and then in due course attained adolesence.

एवं वर्षसहस्राणि साम्राज्यमभजन्नलः ॥
अन्येद्युस्तत्पिता देवस्तमुपेत्य प्रत्यबोधयत् ॥८९२॥

अन्वयः- नलः एवं वर्षसहस्राणि साम्राज्यमभजत्। अन्येद्युः तत्पिता देवः तम् उपेत्य प्रत्यबोधयत् ॥८९२॥

विवरणम्:- नलः एवं वर्षाणां सहस्राणि वर्षसहस्राणि साम्राज्यम् अभजत्। अन्यस्मिन् दिने अन्येद्युः तस्य पिता तत्पिता देवः तं नलम् उपेत्य प्रत्यबोधयत् प्रतिबोधम् अकरोत् ॥८९२॥

सरलार्थः- नलः एवं सहस्रं वर्षाणि साम्राज्यमसेवत। ततः एकस्मित् तत्पिता देवः नलमुपसृत्य तं प्रत्यबोधयत् ॥८९२॥

ગુજરાતી :- એવી રીતે નલરાજાએ એક હજાર વર્ષો સુધી રાજ્ય ભોગવ્યું. પછી એક દિવસે દેવ થયેલા તેના પિતાએ તેની પાસે આવીને તેને પ્રતિબોધ આપ્યો કે,॥८९२॥

हिन्दी :- इस प्रकार नलराजाने एक हजार वर्ष तक राज्य भोगा। फिर एक दिन देव बने हुए उनके पिता ने उनके पास आकर उन्हे प्रतिबोध दिया ॥८९२॥

मराठी :- अश्याप्रकारे नळराजानी एक हजार वर्षापर्यंत राज्य भोगले नंतर एके दिवशी देव असलेल्या त्याच्या वडिलांनी नलराजाजवळ येऊन त्याला प्रतिबोध केला. ॥८९२॥

P.P. Ac. Gunratnasuri M.S.

English :- In this way King Nal ruled the Kingdom for a thousand years and one lay his father who was a God came to him.

वत्स त्वमसि किं राजा यद्विवेकमहाधनम् ॥
एतैस्तैर्विषयस्तेनैर्मुष्यते पश्यतस्तव ॥८९३॥

अन्वयः- वत्स! किं त्वं राजा असि! यत् तव पश्यतः सतः एतैः तैः विषयस्तेनैः विवेकमहाधनं मुष्यते ॥८९३॥

विवरणम्:- *हे वत्स! किं त्वं राजा असि? यत् तव पश्यतः सतः अपि त्वाम् अनादृत्य एतैः तैः विषयाः शब्दादयः एव स्तेनाः चोराः विषयस्तेनाः विषयचोराः तैः विषयस्तेनैः विषयचोरैः, महत् च तद् धनं च महाधनम्। विवेकः एव महाधनं विवेकमहाधनं मुष्यते चोर्यते। यद्यपि त्वं पश्यसि तथापि त्वाम् अनादृत्य विषयचौरैः तव विवेकमहाधनं मुष्यते तर्हि त्वं कीदृशः राजा असि ॥८९३॥*

सरलार्थः- हे वत्स! त्वं किदृशः राजा असि! यत् तव पश्यतः सतः एते विषयचोराः तव विवेकमहाधनं मुष्णन्ति॥८९३॥

ગુજરાતી :- હે વત્સ! તું રાજા શાનો છે ? કેમ કે તારાં વિવેકરુપી ધનને આ વિષયોરુપી ચોરો તારાં દેખતાં જ લુટી રહ્યા છે. ॥८९३॥

हिन्दी :- "हे वत्स! तू राजा किस का है? क्यों कि, तेरे विवेकरूपी धन को तो ये विषय रुपी चोर तेरे देखते हुए लूट रहे हैं।"॥८९३॥

मराठी :- "वत्स! तू काय राजा आहेस? तू पाहात असतांना तुझ्या डोळयादेखत हे विषयरूपी चोर तुझे विवेकरूपी धन चोरून नेत आहेत."॥८९३॥

English :- He asked his son Nal as to what type of a king is he, was cannot control the bandits in him of sezual desired who are just looking away his waith of intelligence and presence of mind.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

प्रतिपन्नं मयाऽस्तिते व्रतावसरवेदनम् ।।
स एषोऽवसरः पुत्र चारित्राय तवाधुना ।।८९४।।

अन्वयः- हे पुत्र! मं त; व्रतावसरवेदनं प्रतिपन्नमस्ति। अधुना तव चारित्राय स एषः अवसरः अस्ति ।।८९४।।

विवरणम्:- हे पुत्र! मया ते तव व्रतस्य अवसरः व्रतावसरः। व्रतावसरस्य वेदनं व्रतावसरवेदनं व्रतावसरस्य ज्ञापनं प्रतिपन्नं स्वीकृतसास्ति। अधुना तव चारित्राय चारित्रग्रहणाय एषः अवसरः समयः अस्ति।। इदानीं त्वं चारित्रं गृहाण ।।८९४।।

सरलार्थः- हे पुत्र! मया तव व्रतस्यावसर ज्ञापनं स्वीकृतमस्ति। अधुना तव चारित्रग्रहणाय अवसरः अस्ति।।८९४।।

ગુજરાતી :- હે પુત્ર! તને ચારિત્ર લેવાનો સમય જણાવવાનું મેં કબૂલ કર્યું છે, અને હવે તને પરલોકનું સાધન કરવા માટેનો આ અવસર છે.।।८९४।।

हिन्दी :- हे पुत्र! तुझे चारित्र लेने का समय बताने का मैंने स्वीकार किया था, और अब परलोक की साधना करने के लिये यह समय उचित है। ।।८९४।।

मराठी :- ''हे मुला! तुला मी चारित्र्य येण्याची वेळ कळविण्याचे कबूल केले होते, आता ही वेळच तुला चरित्र ग्रहण करण्यास योग्य आहे.''।।८९४।।

English :- He continves saying that he had accepted the task to tell him that eats time for him to renounce the world and become a priest, to prepare the kay to open the lock of the other world.

इत्यावेद्यागमदेवोऽथावधिज्ञानवानपि ।।
आगान्निरवधिज्ञानो जिनसेनाभिधो गुरुः ।।८९५।।

अन्वयः- इति आवेद्य अवधिज्ञानवान् अपि देवः अगमत्। अथ निरवधिज्ञानो जिनसेनाभिधः गुरुः आगात्।

विवरणम्:- इति आवेद्य निवेद्य कथयित्वा अवधिज्ञानमस्यास्तीति अवधिज्ञानवान् देवः अपि अगमत् अगात्। अथ तदनन्तरं निरवधि ज्ञानं यस्य सः निरवधिज्ञानः असीमज्ञानवान् जिनसेनः अभिधा यस्य सः जिनसेनाभिधः जिनसेननामा गुरुः आगात् आगमत् ॥८९५॥

सरलार्थः- इति कथयित्वा अवधिज्ञानवान् देवः अगच्छत्। अथ निरवधिज्ञानः जिनसेननामा गुरुः आगच्छत् ॥८९५॥

ગુજરાતી :- એમ કહીને તે અવધિજ્ઞાનવાળા દેવ પણ ચાલ્યા ગયા અને અથાગ જ્ઞાનવાળા જિનસેન નામના ગુરુમહારાજ ત્યાં પધાર્યા. ॥८९५॥

हिन्दी :- ऐसा कहकर वह अवधि ज्ञानवाला देव भी चला गया, और अथाग ज्ञानवाले जिनसेन नामक गुरुमहाराज वहाँ पधारें॥८९५॥

मराठी :- असे म्हणून अवधिज्ञानवान तो देव पण निघून गेला आणि अथांग ज्ञान असलेले जिनसेना नावाचे गुरुमहाराज तेथे आले. ॥८९५॥

English :- Saying thus even the God with a knowledge which can be periaved beyond the senses, left off and a priest named Jin with an abyss of vigilance arrived there.

ततो नलः समं भैम्या गत्वा भक्त्याऽनमद् गुरुम्॥
शुश्राव देशनां तस्या ऽ प्राक्षीदवसरे च तम् ॥८९६॥

अन्वयः- ततो नलः भैम्या समं गत्वा भक्त्या गुरुम् अनमत्। तस्य देशनां शुश्राव। अवसरे च तम् अप्राक्षीत् ॥८९६॥

विवरणम्:- ततः नलः भीमस्यापत्यं स्त्री, तया भैम्या दमयन्त्या समं साकं गत्वा भक्त्या प्रेम्णा गुरुम् अनमत् अवन्दत। तस्य गुरोः देशनाम् उपदेशं शुश्राव आकर्णयामास। अवसरे च तम् अप्राक्षीत् अपृच्छत् ॥८९६॥

सरलार्थः- ततः नलः दमयन्त्या सह गत्वा भक्त्या गुरुं प्राणमत्। तस्य देशनाम् अशृणोत्। अवसरे च तमपृच्छत् ॥८९६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે નલરાજા દમયંતી સહિત ત્યાં જઈને ગુરુમહારાજને ભક્તિથી નમ્યા તથા તેમની ધર્મદેશના સાંભળી પછી અવસરે તેઓએ તે ગુરુમહારાજને પૂછયું કે, ॥८९६॥

हिन्दी :- तब नलराजा ने दमयंती सहित वहाँ जाकर गुरुमहाराज को भक्ति से नमन किया और उनकी धर्मदेशना सुनने के बाद फिर अवसर पाकर उन्होने उन गुरुमहाराज से पूछा - ॥८९६॥

मराठी :- तेव्हा नलराजाने दमयंतीसह तेथे जाऊन गुरुमहाराजांना भक्तिभावाने नमस्कार केला. त्यांचा धर्मोपदेश ऐकला व नंतर संधी साधून त्यांना विचारले. ॥८९६॥

English :- Then King Nal along with his wife Damyanti went to him and wholeheastedly served him, then heard the sermon given by him, then they spoke to him.

भगवान्! किं मया पूर्वभवे कर्म व्यधीयत ॥
राज्यं यदीदृशं लब्ध्वा हारितं पुनराप्यत ॥८९७॥

अन्वयः- भगवन्! मया पूर्वभवे किं कर्म व्यधीयत। यत् ईदृशं राज्यं लबक्ध्वा हारितं पुनः आप्यत।

विवरणम्:- *हे भगवन्! मया पूर्वश्रासौ भवश्च पूर्वभवः, तस्मिन् पूर्वभवे पूर्वजन्मनि किं कर्म व्यधीयत अक्रियत। यद् ईदृशं समृद्धं राज्यं लब्ध्वा द्यूते हारितम् गमितम्। ततः पुनः आप्यत अलभ्यत ॥८९७॥*

सरलार्थः- हे भगवन्! मया पूर्वभवे किं कर्म कृतम्। येन ईदृशं समृद्धं राज्यं लब्ध्वा तद् यूते हारितम्। ततः पुनः लब्धम् ॥८९७॥

ગુજરાતી :- હે ભગવાન! પૂર્વભવમાં મેં શું કર્મ બાંધ્યું છે કે જેથી આવું રાજ્ય મેળવીને હું હારી ગયો, અને પાછું મેં તે રાજ્ય મેળવ્યું.॥८९७॥

हिन्दी :- "हे भगवान! पूर्वभव में मैंने ऐसे कौन सें कर्म बांधे थे कि जिससे मैं ऐसा राज्य पाकर भी हार गया, और फिर मैंने यह राज्य प्राप्त किया"॥८९७॥

P.P. Ac. Gunratnasuri M.S.

मराठी :- हे भगवन्! पूर्वजन्मी मी असे कोणते कर्म केले? की ज्यामुळे मी असे समृद्ध राज्य मिळवून हरलो, आणि नंतर पुन्हा ते राज्य मिळविले. ।।८९७।।

English :- King Nal asked him as to what immeritable deed he had commited in his past life to have lost this kingdom after achieving it, then again achieved it.

गुरुरुचे शृणुक्ष्माभृत! जम्बूद्वीपेऽत्र भारते ।।
अष्टापदगिरीन्द्रस्य महातीर्थस्य संनिधौ ।।८९८।।
अस्त्यनालोकितारातिसङ्गरं सङ्गरं पुरम् ।।
मम्मणस्तत्र भूमिभृत् देवी वीरमती प्रिया ।।८९९।।

अन्वयः- गुरुः ऊचे - हे क्ष्माभृत्! शृणु। अत्र जम्बूद्वीपे भारते अष्टापदगिरीन्द्रस्य महातीर्थस्य सन्निधौ ।।८९८।।

अन्वयः- अनालोकितारातिसङ्गरं सङ्गरं पुरमस्ति। तत्र मम्मणः भूमिभृत् अस्ति। तस्य वीरमती प्रिया देवी अस्ति ।।८९९।।

विवरणम्:- *गुरुः ऊचे बभाषे - हे क्ष्मां बिभर्तीति क्ष्माभृत! नृप! शृणु - आकर्णय। अत्र अस्मिन् जम्बूद्वीपे भारते देशे गिरीणामिन्द्रः गिरीन्द्रः। अष्टापदश्चासौ गिरीन्द्रश्च अष्टापदगिरीन्द्रः, गिरीणामिन्द्रः गिरीन्द्रः। अष्टापदश्चासौ गिरीन्द्रश्च अष्टापदगिरीन्द्रः, तस्य अष्टापदगिरीन्द्रस्य महातीर्थस्य सन्निधौ समीपे - अरातीनां शत्रूणां सङ्गरः अराति सङ्गरः। अनालोकितः आरातिसङ्गरः यस्मिन् येन वा तत् - अनालोकितारातिसङ्गरम् अदृष्टशत्रुयुद्धं सङ्गरं नाम पुरमस्ति। तत्र मम्मणः नाम भूमिभृत् नृपः अस्ति। तस्य वीरवती नाम प्रियादेवी वर्तते ।।८९९।।*

सरलार्थः- गुरुः बभाषे - राजन्! शृणु। अस्मिन् जम्बूद्वीपे भारते अष्टापदगिरीन्द्रस्य महातीर्थस्य समीपे संगरं नाम नगरमस्ति। तत्र अरातीनां युद्धं नाऽवलोकितम्। तत्र मम्मणः नृपः अस्ति। तस्य वीरवती नाम प्रिया देवी वर्तते ।।८९९।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- ત્યારે ગુરુ મહારાજને કહ્યું કે, હે રાજન્! તમો સાંભળો. આ જંબૂદ્વિપના ભરતક્ષેત્રમાં મહાન્ તીર્થરુપ અષ્ટાપદ તીર્થની પાસે જેણે શત્રુઓનો રાગસંગ્રામ જોયો નથી, એવું સંગર નામનું નગર છે. અને ત્યાં મમ્માણ નામે રાજા હતો, તથા તેની વીરમતી નામની પ્રાણપ્રિય રાણી હતી.॥૮૯૯॥

हिंदी :- तब गुरु महाराजने कहा कि - सुनो राजन् ! इस जंबूद्विप के भरतक्षेत्र में महान तीर्थरूप अष्टापद तीर्थ के पास कभी भी शत्रुओंका युद्ध देखा नही है, ऐसा संगर नाम का नगर है । वहां मम्मण नाम का राजा है, और उसकी वीरमती नाम की प्राणप्रिय रानी है । ॥८९९॥

मराठी :- गुरू म्हणाले- राजा! ऐक या जम्बूद्वीपात भरतखंडात महान तीर्थरूप अष्टापद नावाच्या पर्वताजवळ कधीही शत्रूंचे युद्ध न पाहिलेले संगर नावाचे नगर आहे तेथे मम्मण नावाचा राजा आहे. त्याची वीरमती नावाची प्रिय राणी आहे. ॥८९८-९९॥

English :- The priest than asked them to listen sarefully. He said that, in this Jamnudueep and in this Bharatschetra and near the sacred mount of Ashthapad, there used to be a uity named Sangar, which had never tasted was and bloodshed. This city was reled by asking named Mammann and who had a wife named Uirmati, whom he loved wholeheartedly.

अन्येद्युस्तेन पापद्ध्यैं सभार्येण पुरात् बहिः ॥
गच्छता सार्थमध्यस्थः साधुरेको विलोकितः ॥९००॥

अन्वयः- अन्येद्यु पापद्ध्यैं सभार्येण पुरात् बहिः गच्छता तेन सार्थमध्यस्थः एकः साधुः विलोकितः ॥९००॥

विवरणम्:- *अन्येद्युः एकस्मिन् दिवसे पापद्ध्यैं मृगयाया भार्यया सह वर्ततेऽसौ सभार्यः तेन सभार्येण भार्यया सह पुरात् नगरात् बहिः गच्छता तेन मम्मणेन सार्थस्य मध्यः सार्थमध्यः । सार्थमध्ये तिष्ठतीति सार्थमध्यस्थः सार्थे वर्तमानः एकः साधुः विलोकितः दृष्टः ॥९००॥*

सरलार्थः- एकस्मिन् दिने मृगयायां भार्यया सह नगरात् बहिः गच्छता तेन सार्थमध्ये वर्तमानः एकः साधुः दृष्टः ॥९००॥

गुजराती :- પછી એક દિવસે રાણી સહિત તે રાજા શિકાર કરવાને નગરીની બહાર ગયો, એવામાં તેણે સાર્થની અંદર રહેલા એક મુનિરાજને જોયા. ॥૯૦૦॥

हिन्दी :- एक समय रानी के साथ शिकार के लिये राजा नगर के बाहर गया। इतने में सार्थ के बीच में उसने एक मुनिराज को देखा ॥९००॥

मराठी :- एकदा तो राणीसह शिकारीसाठी नगराच्या बाहेर निघाला असता त्याला सार्थामध्ये एक साधू दिसला. ॥९००॥

English :- Then one day he along with his wife went for a hunt, on the outskirts of the city. The he happened to see an ascetic in a camp.

सोऽथ क्षुद्राशयो राजा सार्थात्तं मुनिसत्तमम् ॥
यूथात् कपिमिवादाय खेलनाय न्यवर्तत ॥९०१॥

अन्वयः- अथ क्षुद्राशयः स राजा यूथात् कपिमिव सार्थात् खेलनाय तं मुनिसत्तमं आदाय न्यवर्तत ॥९०१॥

विवरणम्:- *अथ अनन्तरं क्षुद्रः आशयः यस्य सः क्षुद्राशयः क्षुद्रमनाः सः राजा यूथात् कपिं वानरमिव सार्थात् खेलनाय तं मुनिसत्तमम् आदाय गृहीत्वा न्यवर्तत ॥९०१॥*

सरलार्थः- अनन्तरं क्षुद्राशयः सः नृपः यूथात् कपिम् इव सार्थात् तं मुनिसत्तमं खेलनाय गृहीत्वा न्यवर्तत ॥९०१॥

गुजराती :- પછી દુષ્ટ આશયવાળો તે રાજા, ટોળામાંથી જેમ વાંદરાને ઊંચકે તેમ સાર્થમાંથી ગમ્મત માટે તે મુનિરાજને લઈને પાછો વળ્યો.॥૯૦૧॥

हिन्दी :- फिर दुष्ट आशयवाले उस राजा ने टोलीमें से जैसे बंदर को, वैसे सार्थमें से परिहास के लिए उस मुनिराज को उठाकर वापस लौट आया॥९०१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- नंतर तो दुष्टबुद्धी असलेला राजा जसे वानराला खेळण्यासाठी कळपातून वेगळे करावे. तसे त्या मुनीला खेळण्यासाठी सार्थातून ओढून आणून मागे फिरला.॥९०१॥

English :- The King with a cruel intention lifted up the priest as one lifts up a monkey from a group of monkeys and walked away and laughed about the mather.

सकलत्रोऽपि भूपस्तं क्षमाश्रमणपुङ्गवम् ॥
खेदयामास दौरात्म्याद् यावद् द्वादश नाडिकाः ॥९०२॥

अन्वयः- सकलत्रः अपि भूपः तं क्षमाश्रमणपुङ्गवं दौरात्म्यात् द्वादश नाडिकाः यावत् खेदयामास ॥९०२॥

विवरणम्:- *कलत्रेण वह वर्ततेऽसौ सकलत्रः सभार्यः अपि भुवं पार्तांति भूपः नृपः तं क्षमाश्रमणपुङ्गवं क्षमाश्रमणश्रेष्ठं दुष्टः आत्मा यस्य सः दुरात्मा। दुरात्मनः भावः दौरात्म्यं तस्मात् दौरात्म्यात् दुष्टबुद्धित्वात् द्वादश नाडिकाः घटिकाः यावत् पर्यन्तं खेदयामास तोदयामास ॥९०२॥*

सरलार्थः- भार्यया सह सः नृपः तं क्षमाश्रमणश्रेष्ठं दुष्टबुद्धित्वात् द्वादश घटिकापर्यन्तं खेदयामास ॥९०२॥

ગુજરાતી :- દુષ્ટ બુદ્ધિપણાથી રાણી સહિત તે રાજાએ તે મુનિમહારાજને બાર ઘડી સુધી પરેશાન કર્યા. ॥૯૦૨॥

हिन्दी :- दुष्ट बुद्धि से रानी सहित उस राजा ने उस मुनिराज को बारह घडी तक परेशान किया॥ ॥९०२॥

मराठी :- नंतर राजाने राणीसह दुष्टपणाने त्या श्रेष्ठ मुनिराजाला बारा घटकापर्यंत खूप त्रास दिला.॥९०२॥

English :- Along with his evil-minded wife, the king harrassed the priest for twelve hours.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अथोयच्छलितकारुण्यौ दम्पती तमपृच्छताम् ॥
प्रस्थितस्त्वं कुतः स्थानात् यियासुः कुत्र वा वद ॥९०३॥

अन्वयः- अथ उच्छलितकारुण्यौ दम्पती तम् अपृच्छताम् - त्वं कुतः स्थानात् प्रस्थितः। कुत्र यियासुः असि। वद॥९०३॥

विवरणम्:- *अथ अनन्तरं उच्छलितं कारुण्यं ययोः तौ उच्छलितकारुण्यौ समुत्पन्नकरुणौ। जाया च पतिश्च दम्पती पतिपत्न्यौ तं साधुवरम् अपृच्छताम् अप्राष्टाम् - त्व कुतः कस्मात् स्थानात् प्रस्थितः निर्गतः। कुत्र कस्मिन् स्थाने यातुमिच्छुः यियासुः जिगमिषुः असि वद् कथय ॥९०३॥*

सरलार्थः- अनन्तरं तयोः दम्प्त्योः तस्मिन् मुनिवरे दया समुत्पन्ना। तौ तमपृच्छताम् - त्वं कुतः आगतः असि। कुत्र गन्तुमिच्छसि? वद ॥९०३॥

ગુજરાતી :- પછી દયા આવવાથી તે સ્ત્રીભરથારે તે મુનિરાજને પૂછયું કે કહો તમો ક્યાંથી આવ્યા છો અથવા ક્યાં જવાના છો? ॥૯૦૩॥

हिन्दी :- फिर दया आने से उस स्त्री-भर्तारने ने उस मुनिराज से पूछा कि, "कहो तुम कहाँ से आये हो और कहा जानेवाले हो?"॥९०३॥

मराठी :- नंतर त्या पति-पत्नीला मुनिराजाची दया आली व त्यांनी मुनिराजाला विचारले की, "तुम्ही कोठून आले आहात? आणि तुम्हाला कुठे जायचे आहे? सांगा." ॥९०३॥

English :- Then his wife feeling pity for him asked him as to where he had come from and where is he heading to.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सोऽवदत् प्रास्थिषि स्थानादहं रोहितकाऽभिधात् ॥
अष्टापदगिरिं गन्तुमिच्छुस्तीर्थं विवन्दिषुः ॥९०४॥

अन्वयः- सः अवदत् - अहं रोहितकाभिधात् स्थानात् प्रास्थिषि। अष्टापदगिरिं तीर्थं विवन्दिषुः गन्तुमिच्छुः अस्मि ॥९०४॥

विवरणम्:- सः मुनिवरः अवदत् - अहं रोहितकम् अभिधा यस्य तद रोहितकाभिधं, तस्मात् रोहितकाभिधात् रोहितकनाम्नः स्थानात् प्रास्थिषि प्रातिष्ठे। अष्टापपगिरिं तीर्थं वन्दितुमिच्छुः विवन्दिषुः गन्तुम इच्छुः अस्मि ॥९०४॥

सरलार्थः- सः मुनिवरः अवदत् - अहं रोहितकनाम्नः स्थानात् प्रस्तितः अस्मि। अष्टापदगिरिं नाम तीर्थं वन्दितुं तत्र गन्तुमिच्छामि ॥९०४॥

ગુજરાતી :- પછી તે સાધુએ કહ્યું કે, હું રોહિતક નામના સ્થાનથી આવું છું, તથા તીર્થવંદન કરવાની ઇચ્છાથી અષ્ટાપદ પર્વત પર જાઉં છું. ॥૯૦૪॥

हिन्दी :- फिर उस साधु ने कहा कि, मैं रोहितक नामक स्थान से आया हूँ, और तीर्थवंदना करने की इच्छा से अष्टापद पर्वत पर जा रहा हूं॥९०४॥

मराठी :- नंतर त्या साधूने म्हटले की, मी रोहितक नावाच्या स्थानावरून आलो आहे, आणि तीर्थवंदन करण्याच्या इच्छेने अष्टापद पर्वतावर जात आहे. ॥९०४॥

English :- Then the priest replied that he had come from a place called Rohitak and was heading for the sared mount of Ashtapad, in order to worship that spot.

परं व्ययोजयेतां मां भवन्तौ सार्थतस्ततः त ॥
ततो मे नाऽभवद्यात्रा श्रेयो हि बहुविघ्नकम् ॥९०५॥

अन्वयः- परं भवन्तौ मां सार्थतः व्ययोजयेताम्। ततः मे यात्रा न अभवत्। तथाहि श्रेयः बहुविघ्नकं भवति ॥९०५॥

विवरणम्:- *परं किन्तु भवन्तौ मां ततः तस्मात् सार्थात् व्ययोजयेताम् वियुक्तमकुरुताम्। ततः तस्मात् कारणात् मे मम यात्रा न अभवत्। तथाहि - श्रेयः कल्याणं बहवः विघ्नाः यस्मिन् तद् बहुविघ्नकं प्रत्युवायबहुलं भवति ॥९०५॥*

सरलार्थः- किन्तु भवन्तौ मां तस्मात् सार्थात् वियुक्त मकुरुताम्। तेन मम यात्रा न अभवत्। यतः श्रेयसि बहवः निघ्नाः अन्तरायाः भवन्ति ॥९०५॥

ગુજરાતી :- **પરંતુ તમોએ મને તે સાર્થમાંથી વિયોગ પડાવ્યો, અને તેથી મારી યાત્રા થઇ નહી. કેમકે શુભ કાર્યોમાં ઘણાં વિઘ્નો આણિ પડે છે.॥૯૦૫॥**

हिन्दी - लेकिन तुमने मुझे उस सार्थ में से अलग कर दिया जिससे मेरी यात्रा नही हो सकी, क्यों कि शुभ कार्य में बहुत विघ्न आते है। ॥९०५॥

मराठी :- परंतु तुम्ही मला त्या सार्थतून अलग केले. त्यामुळे माझी यात्रा झाली नाही. कारण की शुभकार्यात बरीच विघ्न येत असतात. ॥९०५॥

English :- But, he said that he could'nt proceed now to the mount as they had separated him from the camp and bought an obstacle in an auspicious and propitious deed.

वाचं वाचंयमस्यैतां शृण्वतोर्यन्त्रवत्तयोः ॥
ततो विगलितः कोपे विषं विषभृतामिव ॥९०६॥

अन्वयः- ततः वाचंयमस्य एतां वाचं मन्त्रवत् शृण्वतोः तयोः विषभृतां विषमिव कोपः विगलितः ॥९०६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विवरणम्:- ततः तदनन्तरं वाचं यच्छति इति वाचम्यः, तस्य वाचंयमस्य मितभाषिणः तस्य महामुनेः एतामनन्तरोक्तां वाचं वाणीं शृण्वतोः आकर्णयतोः तयोः दम्पतोः "विषं गरलं बिभ्रतीति विषभृतः, तेषां विषभृतां सर्पाणां विषमिव गरलमिव" कोपः क्रोधः विगलितः नष्टः ॥९०६॥

सरलार्थः- . ततः मितभाषिणः तस्य साधोः अनन्तरोक्तां वाचम् श्रुत्वा सर्पाणां विषमिव तयोः दम्पत्योः क्रोधः विगलितः ॥९०६॥

ગુજરાતી :- પછી મુનિરાજની મંત્ર સરખી તે વાણી સાંભળતાં જ ઝેરી જીવોનાં ઝેરની પેઠે તેઓનો કોધ ગળી ગયો. ॥૯૦૬॥

हिन्दी :- फिर मुनिराज की मंत्र जैसी वाणी सुनकर जहरीले जीवों के जहर समान उनका क्रोध गल गया॥ ॥९०६॥

मराठी :- नंतर मुनिराजाची मंत्रासारखी ती वाणी ऐकून, विषारी सापांच्या विषाप्रमाणे त्यांचा क्रोध गळून पडला.॥९०६॥

English :- Hearing the speech of the ascetic that seemed to be a holy chant, the anger of theirs which was like the deadly poision of a being, melted away.

अथ सार्द्रदृशौ वीक्ष्य तयोर्विज्ञाय योग्यताम् ॥
आर्हतं धर्ममाचख्यौ दयामुखं विचक्षणः ॥९०७॥

अन्वयः- अथ सार्द्रदृशौ वीक्ष्य तयोः योग्यतां विज्ञाय विचक्षणः दयामुखम् आर्हतं धर्ममाचख्यौ ॥९०७॥

विवरणम्:- अथ मुनिवचनश्रवणात् अनन्तरं सार्द्रे अश्रुभिः आर्द्रे सार्द्रे। सार्द्रे च ते दृशौच सार्द्रेदृशौ वीक्ष्य निरीक्ष्य तयोः दृशौ अश्रुभिः परिछुते दृष्ट्वा, तयोः दम्पतोः योग्यतां पात्रतां विज्ञाय विचक्षणः विद्वान् मुनिवरः दया करुणा मुखं यस्य सः दयामुखः, तं दयामुखं करुणाप्रधानम् अर्हतः जिनस्यायम् आर्हतः, तमार्हतं जैनं धर्मम् आचख्यौ कथयामास ॥९०७॥

सरलार्थः- मुनिवचनश्रवणात् अनन्तरं तयोः दम्पत्योः दृशौ अश्रुभिः प्लुते अवलोक्य तंयोः योग्यतां विज्ञाय विचक्षणः मुनिः दयाप्रधानं जैनं धर्मम् अकथयत् ॥९०७॥

ગુજરાતી :- પછી તેઓ બન્નેને અશ્રુજલથી ભીની આંખોવાળા જોઈને, તથા તેઓની યોગ્યતા જાણીને તે વિચક્ષણ મુનિરાજે તેઓને દયાપ્રધાન જૈનધર્મ કહી સંભળાવ્યો.॥૯૦૭॥

हिन्दी :- फिर उन दोनों की अश्रुजल से गीली आँखे देख कर, और उनकी योग्यता जानकर उस विलक्षण मुनिराज ने उनको दयाप्रधान जैनधर्म कहकर सुनाया॥ ॥૯૦૭॥

मराठी :- नंतर त्या दोघांचे होळे अश्रूंनी हबडबलेले पाहून हे धर्मोपदेशास योग्य आहेत. असे जाणून त्या मुनिराजाने त्यां दोघांना दयाप्रधान जैन धर्माचा उपदेश केला.॥૯૦૭॥

English :- Both of them had turn of repentance trickling down their eyes. Seeing this and understanding their calibre this profound and grotesque ascetie forgave them and spoke to them about the Jain religion.

तमश्रुतचरं श्रुत्वा धर्मं तत्र शुभाशयौ ॥
दम्पती तावरज्येतां को ह्यपूर्वे न रज्यते ॥૯૦૮॥

अन्वयः- तत्र तमश्रुतचरं धर्मं श्रुत्वा शुभाशयौ तौ दम्पती तत्र अरज्येताम्। तथाहि अपूर्वे कः न रज्यते ॥૯૦૮॥

विवरणम्:- तत्र तम् अश्रुतचरम् अश्रुतपूर्वं पूर्वं कदापि न श्रुतं धर्मं श्रुत्वा शुभः आशयः ययोः तौ शुभाशयौ तौ जाया च पतिः च दम्पती नृपः राज्ञी च तत्र तस्मिन् धर्मे अरज्येताम् अनुरक्तौ अभवताम्। तथाहि अपूर्वे कः न रज्यते अनुरागं न कुरुते ॥૯૦૮॥

सरलार्थः- तं पूर्वं कदापि न श्रुतं धर्मं श्रुत्वा शुभाशयौ तौ दम्पती नृपः राज्ञी च तस्मिन् धर्मे अनुरक्तौ अभूताम् ॥૯૦૮॥

ગુજરાતી :- પૂર્વે કોઈપણ વખતે નહી સાંભળેલા એવા તે ધર્મને સાંભળીને મનોહર આશયવાળા એવા તે બન્ને તે પ્રત્યે આદરવાળા થયા, કેમ કે અપૂર્વ પ્રત્યે કોણ ખુશી થાય નહી? ॥૯૦૮॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- पहले किसी समय न सुना ऐसे उस धर्म को सुनकर मनोहर आशयवाले वह दोनों पति-पत्नी उनके प्रति आदरवाले हुए, क्यों कि अपूर्व के प्रति किसे खुशी नही होती? ॥९०८॥

मराठी :- पूर्वी कधीही न ऐकलेला धर्म ऐकून त्या पति-पत्नीचे मन शुध्द झाले व ते दोघेही त्या धर्मात रमून गेले कारण अपूर्व गोष्टीत कोण रमत नाही?॥९०८॥

English :- They had never heard such a serman in all their lives, which made their hearts overflow with feeling of elegance and comeliness and feelies of respect for the priest. who will no feel happy to hear unprecedented and unparalleled words that had never been heard before?

तं प्रत्यलाभयेतां च निर्दोषैरनादिभिः ॥
कियन्तमपि कालं चाऽस्थापयेतामुपास्तये ॥९०९॥

अन्वयः- निर्दोशैः अशनादिभिः तं प्रत्यलाभयेताम्। कियन्तं कालं च उपास्तये अस्थापयेताम् ॥९०९॥

विवरणम्:- निर्गतः दोषः येभ्यस्तानि निर्दोषाणि दोषरहितानि, तैः निर्दोषैः दोषरहितैः अशनमादौ येषां तानि अशनादीनि, तैः अशनादिभिः प्रत्यलाभयेताम्। कियन्तं कालं च उपास्तये सेवायै तत्र अस्थापयेताम्। निर्दोषैः आहारैः तं प्रत्यलाभयेताम्। तस्य सेवां कर्तुं तं कियन्तं कालं तत्र अस्थापयेताम् ॥९०९॥

सरलार्थः- तौ निर्दोषैः आहारैः तं प्रत्यलाभयेताम्। तस्य सेवां कर्तुं तं कियन्तं कालं तत्र अस्थापयेताम् ॥९०९॥

ગુજરાતી :- વળી દૂષણરહિત આહાર આદિ વડે તેઓએ તેને પ્રતિલાભ્યા અને તેમની વૈયાવચ્ચ (સેવા) કરવા માટે તેમને કેટલાક વખત સુધી ત્યાં રાખ્યા.॥૯૦૯॥

हिन्दी :- फिर दूषणरहित आहार आदि का उन्होने मुनि को दान दिया, और उनकी वैयावच्च (सेवा) करने के लिये उनको बहुत समय तक वहाँ रोका ॥९०९॥

मराठी :- नंतर त्या दोघांनी साधूचि निर्दोष आहार देऊन त्याला प्रतिलाभ दिला आणि सेवा करण्यासाठी काही काळ तेथेच ठेवून घेतले.॥९०९॥

English :- They then offered him food and charity without any flow or calumny. They then stayed there for a long time in order to serve him truthfully.

अज्ञानतिमिरच्छन्ने धर्मध्याअनेन सः ॥
तद्दृशौ निर्मलीकृत्य ययावष्टापदं मुनिः ॥९१०॥

अन्वयः- अज्ञानतिमिरच्छन्ने तद्दृशौ धर्मध्यानाअनेन निर्मलीकृत्य सः मुनिः अष्टापदं ययौ.॥९१०॥

विवरणम्:- अज्ञानमेव तिमिरम् अज्ञानतिमिरम्। अज्ञानतिमिरेण छन्ने आच्छादिते अज्ञानतिमिरच्छन्ने अज्ञानान्धकारावृते तयोः दम्पत्योः दृशौ तद्दृशौ धर्मस्य ध्यानं धर्मध्यानम्। धर्मध्यानमेव अञ्जनं धर्मध्याअनं, तेन धर्मध्यानाअनेन न निर्मले अनिर्मले। अनिर्मले निर्मले कृत्वा निर्मलीकृत्य सः मुनिः अष्टापदं गिरिं ययौ जगाम ॥९१०॥

सरलार्थः- अज्ञानान्धकारेण आवृते तयोः दृशो धर्मध्यानस्य अञ्जनेन निर्मलीकृत्य सः मुनिः अष्टापदं पर्वतं जगाम ॥९१०॥

ગુજરાતી :- અજ્ઞાનરુપી અંધકારથી છવાયેલી તેઓની આંખોને ધર્મધ્યાનરુપી અંજનથી નિર્મલ કરીને તે મુનિરાજ અષ્ટાપદ પર્વત પર ગયા.॥૯૧૦॥

हिन्दी :- अज्ञानरुपी अंधकार से युक्त उनकी आँखो को धर्मध्यानरुपी अंजन से निर्मल कर के वह मुनिराज अष्टापद पर्वत पर गये॥९१०॥

मराठी :- अज्ञानरुपी अंधकारांनी युक्त अशा डोळ्यांना धर्मध्यानरुपी काजळांनी निर्मल करुन ते मुनिराज अष्टापद पर्वतावर गेले.॥९१०॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- The priest then went to the sacred mount of Ashapad after the darkness of ignorance was lit by the collyrium of religion which was applied in the eyes.

तदा श्रावकधर्मो यः सम्प्राप्तः साधुसङ्गमात् ।।
तमेवापालयेतां तावत्यन्ताभीष्टपुत्रवत् ।।९११।।

अन्वयः- तदा साधुसङ्गमात् यः श्रावकधर्मः सम्प्राप्तः। तौ तमेव अत्यन्त अभीष्टपुत्रवत् अपालयेताम् ।।९११।।

विवरणम्:- तदा तस्मिन् समये साधोः सङ्गमः साधुसङ्गमः, तस्मात् साधुसङ्गमात् यः श्रावकस्य धर्मः श्रावकधर्मः सम्प्राप्तः अधिगतः। तमेव श्रावकधर्मं तौ अत्यन्तमभीष्टः अत्यन्ताभीष्टः। अत्यन्ताभीष्टश्चासौ पुत्रश्च अत्यन्ताभीष्टपुत्रः। अत्यन्ताभीष्टपुत्रेण तुल्यमत्यन्ताभीष्टपुत्रवत् अपालयेताम् अरक्षताम्। यथा अत्यन्ताभीष्टं पुत्रं पालयन्ति तथा तौ तं श्रावकधर्मम् अपालयेताम् ।।९११।।

सरलार्थः- तदा साधोः सङ्गमात् सम्प्राप्तं श्रावकधर्मं तौ अत्यन्ताभीष्टपुत्रवत् अपालयेताम् ।।९११।।

ગુજરાતી :- પછી તે વખતે મુનિરાજના સંગથી તેઓને જે શ્રાવકધર્મ પ્રાપ્ત થયો, તેને જ તેઓ અત્યંત વ્હાલા પુત્રની પેઠે પાળવા લાગ્યા.।।૯૧૧।।

हिन्दी :- फिर उस समय मुनिराज के संगत से उनको जो श्रावकधर्म प्राप्त हुआ उसे ही वे दोनो अत्यंत प्रेमी पुत्र की तरह पालने लगे। ।।९११।।

मराठी :- नंतर त्या वेळेला मुनिराजाच्या सोबतीत त्यांना जो श्रावकधर्म प्राप्त झाला, त्यालाच ते अत्यंत प्रेमी पुत्रासारखे पाळू लागले.।।९११।।

English :- Then due to the harmoniow league with the priest they attained the religion of Jainisum and rules of a Jain lay man which they tendered lovingly as a child.

अपरे-धुर्दृढीकर्तुं धर्मे शासनदेवता ॥
निन्ये वीरमतीं राज्ञी मष्टापदमहागिरिम् ॥९१२॥

अन्वयः- अपरेद्युः वीरमतीं राज्ञी धर्मे दृढीकर्तुं शासनदेवता अष्टापदमहागिरिं निन्ये ॥९१२॥

विवरणम्:- अपरस्मिन् दिने अपरेद्युः वीरमतीं राज्ञीं देवीं धर्मे न दृढा अदृढा। अदृढा दृढां कर्तुं दृढीकर्तुं शासनस्य देवता शासनदेवता अष्टापदश्चासौ महांश्चासौ गिरिश्च अष्टापदमहागिरिः, तमष्टापदमहागिरिं अष्टापदपर्वतं निन्ये निनाय ॥९१२॥

सरलार्थः- अपरस्मिन् दिने वीरमतीं राज्ञीं धर्मे दृढां कर्तुं शासनदेवता अष्टापदं गिरिं निनाय ॥९१२॥

ગુજરાતી :- પછી એક દિવસે વીરમતી રાણીને ધર્મમાં દૃઢ કરવા માટે શાસનદેવી અષ્ટાપદ પર્વત પર લઈ ગયા.॥૯૧૨॥

हिन्दी :- फिर एक दिन वीरमती रानी को धर्म में दृढ करने के लिये शासन देवी अष्टापद पर्वत पर ले गयी॥९१२॥

मराठी :- नंतर एके दिवशी वीरमती राणीला धर्मात दृढ करण्यासाठी शासनदेवी अष्टापद पर्वतावर येऊन गेली.॥९१२॥

English :- Then one day the queen Virmati was taken to the mount Ashtapad by the Godden of discipline and control, in order to make her faith in religion more resolute and stringent.

तत्तद्वर्णप्रमाणार्हद्बिम्बानां तत्र दर्शने ॥
सानन्दं कं तमप्याप न यः स्यात् गोचरे गिराम् ॥९१३॥

अन्वयः- तत्र तत्तद्वर्णप्रमाणार्हद्बिम्बानां दर्शने सा तं कमपि आनन्दमाप। यः गिरां गोचरे न स्यात् ॥९१३॥

विवरणम्:- तत्र वर्णश्च प्रमाणं च वर्णप्रमाणे। ते ते वर्णप्रमाणे येषां तानि तत्तद्वर्णप्रमाणानि। अर्हतां बिम्बानि अर्हद्बिम्बानि। च तानि अर्हद्बिम्बानि च तत्तद्वर्णप्रमाणार्हद्बिम्बानि, तेषां तत्तद्वर्णप्रमाणार्हद् बिम्बानां दर्शने सा वीरमती तं कमपि आनन्दमाप। यः गिरां वाचां गोचरे विषये न स्यात। सा अवर्णनीयमानन्दम् आप।९१३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- तत्र तत्तद्वर्णप्रमाणार्हद्बिम्बानां दर्शने वीरमती तं कमपि आनन्दमाप। यः वाचां गोचरे न स्यात् ॥९१३॥

ગુજરાતી :- તે તે વર્ણ તથા પ્રમાણવાળી જિનપ્રતિમાઓના ત્યાં દર્શન કરવાથી તે કોઇક નવા આનંદને પામી, કે જે વચનથી કહી પણ શકાય નહીં.॥९१३॥

हिन्दी :- उस वर्ण और प्रमाणवाली जिनप्रतिमाओं का वहाँ दर्शन करने से उसे कोई ऐसे आनंद की अनुभुति हुई कि जिसे वचन से नही कहा जा सकता। ॥९१३॥

मराठी :- त्या, त्या निरनिराळ्या रंगांच्या व प्रमाणांच्या जिनप्रतिमांचे दर्शन घेऊन वीरमतीला इतका आनंद झाला की, त्याचे शब्दांनी वर्णन करणे शक्य नाही. ॥९१३॥

English :- She had no words to expres her happiness and utmost satisfaction, when she went to worship the jain idols of respective has and heights.

श्रद्धालुस्तत्र वन्दित्वा चतुर्विंशतीमर्हताम् ॥
उत्थिता स्वपुरं देव्या प्राप्यते स्म तदैव सा ॥९१४॥

अन्वयः- तत्र अर्हतां चतुर्विंशतीं वन्दित्वा उत्थिता श्रद्धालुः सा तदा एव स्वपुरं प्राप्यते स्म ॥९१४॥

विवरणम्:- तत्र अष्टापदपर्वते अर्हतां जिनानां चतुर्विंशतीं वन्दित्वा नत्वा उत्थिता श्रद्धालुः श्रद्धामी सा वीरमती तदा एव तस्मिन्नेव समये शासनदेवतया स्वपुरं प्राप्यते स्म ॥९१४॥

सरलार्थः- तत्र अष्टापदपर्वते चतुर्विंशतिं जिनान् वन्दित्वा उत्थिता श्रद्धालुः सा वीरमती तस्मिन्नेव समये शासनदेवंतया स्वपुरं प्राप्यते स्म ॥९१४॥

ગુજરાતી :- શ્રદ્ધાળુ એવી તે રાણી ત્યાં ચોવીસ તીર્થંકરોને વાંદીને જ્યારે ઊઠી, ત્યારે તે જ વખતે શાસનદેવીએ તેણીને તેના નગરમાં મૂકી દીધી.॥९१४॥

हिन्दी :- श्रद्धालु ऐसी रानी वहाँ चौबीस तीर्थंकरो को प्रणाम कर के जब उठी, तब उसी समय शासनदेवी ने उसे उसके नगर में पहुंचा दिया। ॥९१४॥

मराठी :- अष्टापद पर्वतावर चोवीस तीर्थंकरांना वन्दन करून उठलेल्या त्या श्रद्धाळू राणीला शासनदेवतेने त्याच क्षणी तिच्या नगरात पोहोचविले.॥९१४॥

English :- The queen who had now aquired utmost faith in the jain religion, was taken back to the city by the Godden of discipline and control, after she had worshiped in devotion; twenty four Trithankars.

मयाऽवन्दि महातीर्थमिति श्रद्धातिरेकतः ॥
चक्रे प्रतिजिनं वीरमत्या चाचाम्लविंशतिः ॥९१५॥

अन्वयः- मयां महातीर्थम् अवन्दि, इति श्रद्धातिरेकतः वीरमत्या प्रतिजिनं आचाम्लविंशतिः चक्रे॥९१५॥

विवरणम्:- मया महत् च तत् तीर्थं च महातीर्थम् अवन्दि अवन्द्यता इति मत्त्वा श्रद्धायाः अतिरेकः श्रद्धातिरेकः तस्मात् श्रद्धातिरेकतः वीरमत्या जिने जिने प्रतिजिनं आचाम्लानां विंशतिः चक्रे। प्रतिजिनं विंशतिः आचाम्लानि कृतानि ॥९१५॥

सरलार्थः- मया महातीर्थम् अवन्द्यता। इति मत्वा श्रद्धातिरेकात् वीरमती प्रतिजिनं विंशतिमाचाम्लानि चकार ॥९१५॥

ગુજરાતી :- મેં મહાન તીર્થને વંદન કર્યું છે, એમ વિચારી અત્યંત શ્રદ્ધાથી તે વીરમતી રાણીએ દરેક જિનેશ્વરને અપેક્ષીને વીસ આયંબિલો કર્યાં.॥૯૧૫॥

हिन्दी :- मैंने महान तीर्थ को प्रणाम किया है, ऐसा विचार कर के अत्यंत श्रद्धा से उस वीरमती रानी ने हर एक जिनेश्वर की अपेक्षा से बीस आयंबिल तप किये। ॥९१५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- मी महातीर्थाला वंदन केले. असे मानून वीरमतीने अतिशय श्रद्धेने प्रत्येक जिनाला उद्देशून वीस आयंबिल तप केले. ॥९१५॥

English :- Having satisfied herself after bowing to the sacred spot, the queen Virmati keeping all the jain dieetes in mind did twenty Aayambhils. (intake of food without oil and salt)

उपर्यासीनमाणिक्यांस्तिलकान् सा हिरण्मयान् ॥
उच्छलत्कान्ति कल्लोलानर्हदर्थमचीकरत् ॥९१६॥

अन्वयः- सा उपरि आसीनमाणिक्यान् उच्छलत्कान्तिकल्लोलान् हिरण्मयान् तिलकान् अर्हदर्थम् अचीकरत् ॥९१६॥

विवरणम्:- सा वीरमती उपरि आसीनानि जडितानि माणिक्यानि रत्नानि येषां ते आसीनमाणिक्याः तान् आसीनमाणिक्यान् उपरि निविष्टरत्नान् कान्तेः कल्लोलाः तरङ्गाः तान् कान्तिकल्लोलान्। उच्छलन्तः उल्लसन्तः कान्तिकल्लोलाः येषां ते उच्छलत्कान्तिकल्लोलाः तान् उच्छलत्कान्तिकल्लोलान् उल्लसत्कान्तितरङ्गान् हिरण्यस्य विकाराः हिरण्मयाः तान् हिरण्मयान् सुवर्णमयान् तिलकान् अर्हद्भ्यः इदम् अर्हदर्थं जिनानां कृते अचीकरत् अकारयत् ॥९१६॥

सरलार्थः- सा वीरमती जिनेश्वराणां कृते उपरिभागे रत्नखचितान् उल्लसत्कान्तितरङ्गान् देदीप्यमानान् सौवर्णान् तिलकान् अकारयत् ॥९१६॥

ગુજરાતી :- વળી તેણીએ ઉપરના ભાગમાં માણેક જડેલાં, તથા વિસ્તાર પામતી કાંતિના મોજાઓવાળા સુવર્ણના તિલકો તીર્થંકર પ્રભુઓની પ્રતિમા માટે કરાવ્યાં. ॥૯૧૬॥

हिन्दी :- फिर उस वीरमतीने तीर्थंकर प्रभुओं की प्रतिमाओं के लिये माणिक्यों से जडे हुए,. देदीप्यमान, सोने के तिलक करवाये। ॥९१६॥

मराठी :- नंतर वीरमतीने ज्यातून कान्तीचे किरण उसळत आहेत. असे देदीप्यमान रत्नांनी जडविलेले (सोन्याचे तिलक (टिळे) जिनेश्वर भगवंताच्या प्रतिमेसाठी तयार करविले. ॥९१६॥

PP Am Gunratnasuri MS Collection Digitized by eGangotri

English :- She prepared an emblem for the forehead for the Trithankar, whose top part were studden with carbuncles (fiery red jewels) and theremaining part was spread with the waves of the lustre of gold.

अन्यदाऽष्टापदे गत्वा राज्ञी राजसमन्विता ॥
स्नपयित्वा स्वयं सर्वाण्यर्हद् बिम्बान्यपूपुजत् ॥९१७॥

अन्वयः- अन्यदा राज्ञी राजसमन्विता अष्टापदे गत्वा स्वयं सर्वाणि अर्हद्बिम्बानि स्नपयित्वा अपूपुजत् ॥९१७॥

विवरणम्:- *अन्यदा एकस्मिन् दिवसे, राज्ञी वीरमती राज्ञा समन्विता राजसमन्विता राज्ञा सह अष्टापदे गिरौ गत्वा स्वयं सर्वाणि अर्हतां बिम्बानि अर्हद्बिम्बानि जिनप्रतिमाः स्नापयित्वा अपूपुजत् अपूजयत् ॥९१७॥*

सरलार्थः- एकस्मिन् दिने राज्ञी वीरमती राज्ञा सह अष्टापदे गिरौ गत्वा सर्वाणि अर्हद्बिम्बानि स्नापयित्वा स्वयम् अपूजयत् ॥९१७॥

ગુજરાતી :- પછી એક દિવસે રાજા સહિત રાણીએ અષ્ટાપદ પર્વત પર જઈને પોતે જ સઘળાં તીર્થંકરોની પ્રતિમાઓનું સ્નાત્ર કરીને પૂજન કર્યું. ॥૯૧૭॥

हिन्दी :- फिर एक दिन राजासहित रानीने अष्टापद पर्वत पर जा कर स्वयं सभी तीर्थंकरों की प्रतिमाओं का स्नात्र सहित पूजन किया ॥९१७॥

मराठी :- नंतर एके दिवशी राजासहित राणीने अष्टापद पर्वतावर जाऊन स्वत: सगळ्या तीर्थंकरांच्या प्रतिमांचे स्नात्र करुन पूजन केली. ॥९१७॥

English :- Then one day, the queen along with the king went to the sared mount of Ashtapad and one their own prepared the sanatra's of each and ever Trithankar and then worshipped it with utmost devotion.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

Note - Sanatra - When a Tritankar is born, the ordnasy Gods and indra descend down to earth. They then take the child to the mount of Meru and celebrate the birthday with great pomp, by giving him a bath. This means Sanatra pujan.

तेषां सा जिनबिम्बानां भालेषु तिलकान्न्यधात् ॥
तत्कालोत्पन्न पुण्यद्रुप्रफुल्लकुसुमोपमान् ॥९१८॥

अन्वयः- सा तेषां जिनबिम्बानां भालेषु तत्कालोत्पन्न पुण्यद्रुप्रफुल्लकुसुमोपमान् त्रिलकान् न्यधात् ॥९१८॥

विवरणम्:- *सा वीरमती तेषां जिनानां बिम्बानि जिनबिम्बानि तेषां जिनबिम्बानां जिनप्रतिमानां भालेषु ललाटेषु स चासौ कालश्च तत्कालः। तत्काले उत्पन्नानि तत्कालोत्पन्नानि। पुण्यमेव द्रुः पुण्यद्रुः प्रफुल्लानि च तानि कुसुमानि च प्रफुल्लकुसुमानि। पुण्यद्रोः प्रफुल्लकुसुमानि पुण्यद्रुप्रफुल्लकुसुमानि तत्कालोत्पन्नानि च तानि पुण्यद्रुप्रफुल्लकुसुमानि च उपमा येषां ते तत्कालोत्पन्न पुण्यद्रु प्रफुल्लकुसुमोपमाः तान् .....कुसुमोपमान् तिलकान् न्यधात् निहितवती ॥९१८॥*

सरलार्थः- सा वीरमती तेषामर्हद्बिम्बानां ललाटेणु तत्कालोत्पन्नपुण्यद्रु - प्रफुल्लकुसुमोपमान् पुण्यवृक्षस्य प्रफुलानि कुसुमानि इव तिलकान् न्यधात् ॥९१८॥

ગુજરાતી :- તે જિનપ્રતિમાઓના લલાટમાં તેણીએ તત્કાળ ઉત્પન્ન થયેલાં પુણ્યરુપી વૃક્ષનાં પ્રફુલ્લિત પુષ્પો સરખાં તિલકો લગાડ્યાં. ॥૯૧૮॥

हिन्दी :- उन जिनप्रतिमाओं के ललाट में उसने तत्काल उत्पन्न हुए पुण्यरुपी वृक्ष के प्रफुल्लित पुष्पसमान तिलक लगाये॥९१८॥

मराठी :- त्या वीरमतीने जिनप्रतिमांच्या कपाळावर तत्काळ उत्पन्न झालेल्या पुण्यरुपी वृक्षाच्या प्रफुल्लित पुष्पासारखे तिलक (टिळे) धारण केले. (लावले)॥९१८॥

English :- She instantly bred an emblem on the forehead of the Jain deities which shown like a blossomed flower (meritorious ded) on a true.

तीर्थयात्रार्थमायातान् साध्वादीन् प्रत्यलाभयत् ।।
तस्यैवं तपसश्चक्रे सा तदोद्यापनव्रतम् ।।९१९।।

अन्वयः- सा तीर्थयात्रार्थ मायातान् साध्वादीन् प्रत्यलाभयत्। एवं सा तदा तस्य तपसः उद्यापनव्रतं चक्रे ।।९१९।।

विवरणम्:- *सा तीर्थाय यात्रा तीर्थयात्रा। तीर्थयात्रायै इदं तीर्थयात्रार्थम् आयातान् आगतान् साधवः आदौ येषां ते साध्वादयः तान् साध्वादीन् निर्दोषैः आहारैः प्रत्यलाभयत्। एवं सा तदा तस्य आचाम्लतपसः; उद्यापनस्य व्रतं उद्यापनव्रतं चक्रे। उद्यापन चकारा।९१९।।*

सरलार्थः- सा तीर्थयात्रायै आगतान् साध्वादीन् निर्दोषैः आहारैः प्रत्यलाभयत्। एवं तस्य कृताचाम्लतपसः उद्यापनमहोत्सवमिष चक्रे ।।९१९।।

ગુજરાતી :- વળી તીર્થયાત્રા માટે આવેલા સાધુઆદિને તેણીએ પ્રતિલાભ્યા, એવી રીતે તે તપના ઉજમણાનો મહોત્સવ કર્યો. ।।૯૧૯।।

हिन्दी :- फिर तीर्थयात्रा के लिए आये हुए साधु आदि को उसने दान दिया। इसप्रकार उस तप के उद्यापन का महोत्सव किया। ।।९१९।।

मराठी :- आणि तीर्थयात्रेसाठी आलेल्या साधु-साध्वी वर्गेरेंना दान दिले. अशा रीतीने त्या वीरमतीने केलेल्या आयंबिल तपाचे उद्यापन केले. ।।९१९।।

English :- They then generously distributed alms to the priests who were pilgrims there. They then had a grand ceremony, on the completion of the religious observance.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

धन्या पुण्यासि देवि त्वमिति राज्ञा जनेन च ॥
स्तूयमाना मुहुर्वीरमती स्वपुरमागमत् ॥९२०॥

अन्वयः- हे देवि! त्वं धन्या असि। पुण्या असि। इति राज्ञा जनेन च मुहुः स्तूयमाना वीरमती स्वपुरमागमत् ॥९२०॥

विवरणम्:- *हे देवि! त्वं धन्या असि। त्वं पुण्या असि। इति एवंप्रकारेण राज्ञा ग्म्मणेन् जनेन च मुहुः वारं वारं स्तूयमाना प्रशस्यमाना वीरमती राज्ञी स्वस्य पुरं स्वपुरम् आगमत् आयात् ॥९२०॥*

सरलार्थः- हे देवि! त्वं धन्या असि। त्वं पुण्या पुण्यदर्शना असि। इति राज्ञा मम्मणेन जनेन च पुनः पुनः प्रशस्यमाना वीरमती स्वपुरम् आगमत् ॥९२०॥

गुजराती :- હે દેવી! તને ધન્ય છે, તું પુણ્યશાલી છે, એમ રાજા વડે તથા લોકો વડે વારંવાર સ્તુતિ કરાતી એવી વીરમતી રાણી પોતાના નગરમાં આવી.॥૯૨૦॥

हिन्दी :- "हे देवी! तुझे धन्य है, तू पुण्यशाली है," इसप्रकार राजा से और लोगों से बार बार जिसकी स्तुति की गयी ऐसी वीरमती राणी अपने नगर में आयी। ॥९२०॥

मराठी :- हे देवी! तू धन्य आहेस. तू पुण्यशाली आहेस, अशी राजाने आणि लोकांनी वारंवार स्तुती केलेली अशी वीरमति राणी स्वत:च्या नगरात आली.॥९२०॥

English :- Queen Virmati entered the gates of the city only to hear continues praises of her meritorious deed and that she is cirtuous, from her husband and her nuhjects.

ताभ्यां तन्वेव भिन्नाभ्या मभिन्नाभ्यां तु चेतसा ॥
धर्मकर्मनिलीनाभ्यां निन्ये कालः कियानपि ॥९२१॥

अन्वयः- तन्वा इव भिन्नाभ्यां चेतसा तु अभिन्नाभ्यां धर्मकर्मनिलीनाभ्यां ताभ्यां कियानपि कालः निन्ये ॥९२१॥

विवरणम्:- तन्वा शरीरेण इव भिन्नाभ्यां किन्तु चेतसा मनसा न भिन्नाभ्याम् अभिन्नाभ्यां धर्मस्य कर्माणि धर्मकर्माणि। धर्मकर्मसु निलीनाभ्यां धर्मकर्मनिलीनाभ्यां धर्मकर्मनिरताभ्यां ताभ्यां दम्पतिभ्यां राज्ञा मम्मणेन रा या वीरमत्या च कियानपि कालः निन्ये यापितः॥९२१॥

सरलार्थः- शरीरेण भिन्नाभ्यां किन्तु मनसा एकरुपाभ्यां ताभ्यां धर्मकर्मसु निलीनाभ्यां कियान् अपि कालः यापितः ॥९२१॥

ગુજરાતી :- ફક્ત શરીરથી જ જુદા પરંતુ મનથી એક અને ધર્મકાર્યોમાં આસક્ત થયેલા એવા તે બન્નેએ કેટલોક સમય વ્યતીત કર્યો.॥૯૨૧॥

हिन्दी :- केवल शरीर से ही अलग, लेकिन मन से अलग नही और धर्मकार्य में आसक्त हुए ऐसे उन दोनों पति-पत्नी ने बहुत समय व्यतीत किया॥ ॥९२१॥

मराठी :- केवळ शरीराने भिन्न (अलग) पण मनाने मात्र एकरूप अशा, राजा मम्मण व राणी वीरमतीने या जोडप्याने धर्मकार्यात लीन राहून बराच काळ यालविला.॥९२१॥

English :- Both the husband and wife, who were just seperated in body, not in mind, became so pregmatic and immersed in the fire of religion. They thus lived a life of chantity and holiners.

कालधर्मं ततः प्राप्य तुल्येनैव समाधिना ॥
देवलोकेऽप्यभूतां तौ देवौ दाम्पत्यशालिनौ ॥९२२॥

अन्वयः- ततः तुल्येन एव समाधिना कालधर्मं प्राप्य तौ देवलोकेऽपि दाम्पत्यशालिनौ देवौ अभूताम् ॥९२२॥

विवरणम्:- ततः तदनन्तरं तुल्येन समेन एव समाधिता कालस्य धर्मः कालधर्मं मृत्युं प्राप्य समाधिमरणं मृत्वा तौ द्वावपि देवस्य लोकः देवलोकः, तस्मिन् देवलोके अपि जाया च पतिश्च दम्पती। दम्पत्योः भावः दाम्पत्यम्। दाम्पत्यम्। दाम्पत्येन शालेते इत्येवंशीले दाम्पत्यशालिनौ पति-पत्नीभावेन शोभमानौ देवौ (देवः श्च देवी च देवौ) अभूताम् ॥९२२॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- ततः तौ द्वावपि तुल्येन समाधिना मृत्युं प्राप्तौ। ततः च देवलोके दाम्पत्यरुपेण देवौ अभवताम् ॥९२२॥

ગુજરાતી :- પછી સરખી જ સમાધિપૂર્વક કાલધર્મ પામીને સ્ત્રીભરથારપણે શોભતા એવા તેઓ બન્ને દેવલોકમાં પણ દેવો થયા.॥૯૨૨॥

हिन्दी :- फिर समान समाधिपूर्वक कालधर्म पाकर, वे दोनो देवलोक में भी दम्पति समान देव-देवी बने। ॥९२२॥

मराठी :- नंतर दोघेही समान समाधानाने (शान्तीने) मरण पावले आणि देवलोकात पण पति-पत्नी रूपानेच उत्पन्न झाले. ॥९२२॥

English :- Then together they took up to a deep meditation to death (Samadhi) and in due-course became a God and a Goddess as husband and wife.

मम्मणात्मा ततश्च्युत्वा द्वीपस्याद्यस्य भारते ॥
बहलीविषयोत्तसं भूते पोतनपत्तने ॥९२३॥
आभीरो धम्मिलो व्याख्यः पत्नी तस्य च रेणुका॥
आसीत्तयोर्धन्य इति तनयो बिनयोज्ज्वलः ॥९२४॥

अन्वयः- मम्मणात्मा ततः च्युत्वा आद्यस्य द्वीपस्य भारते बहलीविषयोत्तंसभूते पोतनपत्तने धम्मिलो व्याख्यः आभीरः अभूत्। तस्य पत्नी रेणुका आसीत्। तयोः विनयोज्ज्वलः धन्यः इति तनयः अभवत् ॥९२४॥

विवरणम्:- *मम्मणस्य आत्मा ततः देवलोकात् च्युत्वा आदौ भवः आद्यः प्रथमः द्वीपः जम्बूद्वीपः तस्य जम्बूद्वीपस्य, भारते बहली नाम विषयः बहलीविषयः। बहलीविषयस्य उत्तंसभूते शिरोभूषणभूते पोत्तननाम्नि पत्तने धम्मिलः विशेषेण आख्या यस्य सः व्याख्यः धम्मिलनामा आभीरः गोपः अभूत्। तस्य रेणुका नाम पत्नी अभूत्। तयोः धम्मिलरेणुकयोः विनयेन उज्ज्वलः विनयोज्ज्वलः धन्यः इति नाम तनयः पुत्रः अभवत् ॥९२४॥*

सरलार्थः- मम्मणस्य आत्मा ततः देवलोकात् च्युत्वा जम्बूद्वीपस्य भारते देशे बहलीदेशभूषणभूते पोतनपत्तने आभीरयोः धम्मिलरेणुकयोः विनयोज्ज्वलः धन्यः नाम पुत्रः अभवत् ॥९२४॥

ગુજરાતી :- પછી મમ્મણનો જીવ ત્યાંથી ચ્યવીને પહેલા દ્વીપના જંબુદ્વીપના ભરતક્ષેત્રમાં બહલી નામના દેશના મુકુટ સમાન પોતન નામના નગરમાં ભરવાડ થયો. તેની રેણુકા નામની સ્ત્રી તથા તેઓનો વિનયથી નિર્મલ એવો ધન્ય નામે પુત્ર થયો.॥૯૨૪॥

हिन्दी :- फिर मम्मण का जीव वहाँ से आयुष्य पूर्ण कर के पहले द्वीप के (जंबूद्वीप के) भरतक्षेत्र में बहली नामक देश के मुकुट समान पोतन नामक नगर में, धम्मिल नामक चरवाह हुआ। और उसकी रेणुका नामक स्त्री तथा उनका विनय से निर्मल ऐसा धन्य नामक पुत्र हुआ॥ ॥९२४॥

मराठी :- नंतर मम्मणचा जीव देवलोकातून च्युत होऊन जम्बूद्वीपात भरतक्षेत्रात बहली देशाला भूषणभूत असलेल्या पोतनपुर नावाच्या नगरात धम्मिल नावाचा गवळी उत्पन्न झाला. त्याची रेणुका नावाची पत्नी त्या दोघांचा विनयाने निर्मळ धन्य नावाचा मुलगा झाला.॥९२४॥

English :- Then the soul of Mamann, after finishing its life-time as a God was born in the first Tambudueep, in Bharatschetra, in a state named Behali and in a city named Patan which was a diadem of Behali, as Dhammil, who was a shepherd. He had a wife named Renuka, who gave birth to a son named Dhany.

वीरमत्याः पुनर्जीवः प्राग्जन्म प्रीतिबन्धतः ॥
दिवश्च्युत्वा धूसरीति धन्यस्यैवाभवद्गृही ॥९२५॥

अन्वयः- वीरमत्याः जीवः पुनः दिवः च्युत्वा प्राग्जन्मप्रीतिबन्धतः धन्यस्य एव धूसरी इति गृही अभवत् ॥९२५॥

विवरणम्:- *वीरमत्याः जीवः पुनः दिवः स्वर्गात् च्युत्वा प्राक् चं तद् जन्म च प्राग्जन्मा प्राग्जन्मनः प्रीतिः प्राग्जन्मप्रीतिः। प्राग्जन्मप्रीतेः बन्धः, तस्मात् प्राग्जन्मप्रीतिबन्धतः पूर्वभवप्रेमबन्धनात् धन्यस्य एव धूसरी इति नाम्नी गृही पत्नी अभवत् ॥९२५॥*

सरलार्थः- वीरमत्याः जीवः पुनः देवलोकात् च्युत्वा पूर्वजन्मन; प्रेमबन्धनात् धन्यस्य एव धूसरीनाम्नी पत्नी अभवत् ॥९२५॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- વળી વીરમતીનો જીવ પણ પૂર્વ જન્મની પ્રીતિના બંધથી દેવલોકથી ચ્યવીને તે ધન્યની જ ધૂસરી નામે સ્ત્રી થઈ. ॥૯૨૫॥

हिन्दी :- फिर वीरमती का जीव भी पूर्वजन्म की प्रीति के बंध से देवलोक में से आयुष्यपूर्ण कर धन्य की ही धूसरी नामक स्त्री हुई। ॥९२५॥

मराठी :- नंतर वीरमतीचा जीव पण देवलोकातून च्युत होऊन पूर्व जन्मातील प्रेमाच्या बंधनामुळे धन्याची धूसरी नावाची पत्नी झाली. ॥९२५॥

English :- Vermati, after finishing her life-time and due to the merits of her pravious life, became a wife to Dhany, named Dhusari.

धन्यो नित्यमरण्ये चा चारयन् महिषीर्निजा: ॥
आभीराणामसावेवाजीवमाजीविका यत: ॥९२६॥

अन्वय:- धन्य: नित्यम् अरण्य निजा: महिषी: अचारयत् । यत: असौ एव आभीराणाम् आजीवम् आरजीविका भवति ॥९२६॥

विवरणम्:- धन्य: नित्यं सततम् अरण्ये विपिने निजा: स्वा: महिषी: अचारयत्। यत: असौ एव महिषीचारणमेव आभीराणां गोपानां जीवात् आ आजीवं यावत् जीवति तावत् आजीविका उपजीविका भवति। महिषीचारणमेव आभीराणां जीवनोपाय: भवति ॥९२६॥

सरलार्थ:- धन्य: नित्यं वने आत्मन: महिषी: अचारयत्। यत: महिषीचारणमेव आभीराणाम् आजीवं जीवनोपाय: भवति ॥९२६॥

ગુજરાતી :- હવે તે ધન્ય તો હમેશાં જંગલમાં પોતાની ભેંસોને ચરાવતો હતો, કેમ કે ભરવાડોની જિંદગીપર્યંત એ જ આજીવિકા હોય છે.॥૯૨૬॥

हिन्दी :- अब वह 'धन्य' तो हमेशां जंगल में अपनी भैंसो को चराता था, क्यों कि चरवाहों की जीवनपर्यंत यही आजीविका होती है। ॥९२६॥

मराठी :- आता तो 'धन्य' नेहमी जंगलात स्वत:च्या म्हशी चारत होता, कारण म्हशी चारणे हाच गवळ्यांचा जन्मभराचा धंदा (उपजीविकाचे साधन) आहे.॥९२६॥

English :- Dhany used to always take his buffuwes to graze inthe forests as this was the only type of, means of livelihood, for a shepherd, till he is alive.

कुर्वन् द्यां दुर्दिनैर्नीलोत्तरीयेणावृतामिव ॥
गर्जिव्याजाच्चिरापातं लोके सम्भाषयन्निव ॥९२७॥

अन्वय:- दुर्दिनै: द्यां नीलोत्तरीयेण आवृतामिव कुर्वन्, गर्जिव्याजात् लोके चिरापातं सम्भाषयन् इव .... वर्षारात्र: समन्तत: अवतीर्ण: ॥९२७॥

विवरणम्:- *मेघच्छन्नै: दिनै: दुर्दिनै: (मेघच्छन्नेऽह्नि दुर्दिनम्।) द्याम् आकाशं नीलं च तद् उत्तरीयं च नीलोत्तरीयं तेन नीलोत्तरीयेण आवृताम् अच्छादितामिव कुर्वन् तथा गर्जिव्याजात् गर्जनमिषात् लोके आत्मन: चिरं चिरकालम् आपात: आपतनं चिरापात:, तं चिरापातं चिरकालं यावत् आसमन्तात् पतनं सम्भाषयन् कथयन् इव (गर्जनमिषात् चिरकालं वृष्टिर्भाविष्यति इति सूचयन् इव ....वर्षारात्र: अवतीर्ण: ॥९२७॥*

सरलार्थ:- मेघाच्छादितै: दिनै: आकाशं नीलोत्तरीयेण आच्छादयन् इव गर्जनमिषात् च चिरकालं वृष्टि: भविष्यति, इति आवेदयन् इव..... वर्षारात्र: समन्तत: अवतीर्ण: ॥९२७॥

ગુજરાતી :- મેઘથી છવાયેલું આકાશ એવું લાગતું હતું, જાણે શ્યામ રંગની સાડી પહેરી હોય...ગડગડાટ કરતા વાદળો પોતાના આગમનની છડી પોકારતા હતા.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- मेघोंसे आच्छादित आकाश ऐसा लग रहा था मानो श्याम रंग की [illegible] पहनी हो। बहुत समय तक गडगडाहट करते हुए बादल मानो अपना बरसना लोगों को कह नहीं रहे हो ॥९२७॥

मराठी :- मेघाच्छादित दिवसांनी जणू आकाशाला नील वस्त्राने झाकून टाकणारा व गडगडाट्या दहाण्याने चिरकालपर्यंत वृष्टि होईल. असेच जणू सांगत असलेला वर्षाऋत् चोहोकडून अवतीर्ण झाला. ॥९२७॥

English :- The monsoon chouds had patched up the sky, which seemed as though, the sky had worn a blue-black coloured saree. For quiet some-time the rain gnarled in the sky, which seemed, as thouh, the clouds wanted its showers to be identified and know.

क्षीरोज्ज्वलजलासारैस्तन्वन्निव निजं यशः ॥
भुवं नवाङ्कुरैरात्मसङ्गात् पुलकयन्निव ॥९२८॥

अन्वयः- क्षीरोज्ज्वल जलासारैः निजं यशः तन्वन् इव, आत्मसङ्गात् भुवं नवाङ्कुरैः पुलकयन् इव.... वर्षाराम्रः ॥९२८॥

विवरणम्:- क्षीरवत् उज्ज्वलाः क्षीरोज्ज्वलाः। क्षीरोज्ज्वलाश्च ते जलासाराश्च क्षीरोज्ज्वलजलासाराः, तैः क्षीरोज्ज्वल जलासारैः दुग्धवत् उज्ज्वलाभि जलधाराभिः स्वं निजं यशः तन्वन् विस्तारयन् इव (इमाः जलधाराः न किन्तु वर्षाराम्रस्य उज्ज्वलं यशः इव इति निवेदयन्) तथा आत्मनः संगात् आत्मसंगात् नवाश्च ते अङ्कुराश्च नवाङ्कुराः तैः नवाङ्कुरैः भुवं पुलकयन् पुलकितां कुर्वन् इव....वर्षाराम्रः अवतीर्णः ॥९२८॥

सरलार्थः- दुग्धवत् उज्ज्वलाभिः जलधाराभिः स्व यशः तन्वन् इव तथा आत्मसंगात् नवाङ्कुरैः भुवं पुलकितां कुर्वन् इव.... वर्षाराम्रः ॥९२८॥

ગુજરાતી :- દૂધ સરખાં ઉજ્જવલ જલકણો વડે જાણે પોતાનો યશ વિસ્તારતો હોય ! નવા અંકુરાઓ વડે પોતાના સમાગમથી પૃથ્વીને જાણે રોમાંચિત કરતો હોય એવો વર્ષા ઋતુની રાત્રિનો સમય આવ્યો

हिन्दी :- दूध जैसे उज्ज्वल जलकणों से मानो अपना यश फैलाता हुआ और नये अंकुरो द्वारा अपने समागम से पृथ्वी को मानो रोमांचित करता हुआ वर्षाऋतुकी रात्रि का समय आया ॥९२८॥

मराठी :- दूधासारख्या उज्ज्वल पाण्याच्या धारांनी जणू स्वत:चे यश विस्तारीत करणारा असा नव्या अंकुरांनी स्वत:च्या समागमनाने पृथ्वीला जणू रोमांचित करीत असावा! असा, वर्षाऋत् आला. ॥९२८॥

English :- Just as it seems that the milk, by its each lota of aqva, wishes to spread its own radiance and fulgent, in the same way, with the reunion of the earth and the monoons, its seems as though the earth has decked itself with new ornaments of shoots and scrubs bushes as it has been horipilated.

केकारावैः पठ्यमानो मागधैरिव केकिभिः ॥
विद्युज्झलत्कृतिव्याजात् तेभ्यः स्वर्णमिवोत्सृजन् ॥९२९॥

अन्वयः- मागधैः इव केकिभिः केकारावैः पठ्यमानः, विद्युज्झलत्कृतिव्याजात् तेभ्यः स्वर्णम् उत्सृजन् इव ....॥९२९॥

विवरणम्:- *मागधैः बन्दिभिः स्तुतिपाठकैः इव केकाः एषां सन्ति इति केकिनः, तैः केकिभिः मयूरैः केकारवैः पठ्यमानः स्तूयमानः, विद्युतः झलत्कृतिः विद्युज्झलत्कृतिः। विद्युज्झलत्कृतेः व्याजः मिषं तस्मात् विद्युज्झलत्कृतिव्याजात् विद्युच्चकासनमिषात् तेभ्यः केकिभ्यः स्वर्णम् उत्सृजन् ददत् इव....वर्षारात्रः अवतीर्णः ॥९२९॥*

सरलार्थ:- स्तुतिपाठकैः इव मयूरैः केकारवैः स्तूयमानः, विद्युच्चकासनमिषात् तेभ्यः स्तुतिपाठकेभ्यः मयूरेभ्यः स्वर्णम् ददत् इव ॥९२९॥

ગુજરાતી :- અનુચરો સરખા મયૂરો વડે તેમના કેકારવોથી સ્તુતિ કરાતો, વીજળીઓના ઝબકારથી જાણે તેઓને સુવર્ણનું દાન આપતો.॥૯૨૯॥

हिन्दी :- स्तुति पाठक के समान मयूरों के केकारव द्वारा स्तुति किया गया, बिजली के चमकने के बहाने मानो उनको स्वर्णदान देता हुआ वर्षाऋतुकी रात्रिका समय आया ॥९२९॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- स्तुतिपाठकाप्रमाणे मोराकडून केकारवांनी स्तुति केला जात असलेला व विजेच्या चमचमाटाच्या रूपाने जणू त्या मोरांना सोन्याचे दान करीत असलेला वर्षाऋत् आला.॥९२९॥

English :- The peacocks elance to wail out praisen of the forthwoming monsoons and the lightentings shell out striks of gold to reward it.

शक्रकोदण्डभृल्लुप्तविश्वतेजस्विमण्डलः ॥
अथाऽन्यदाऽवतीर्णोत्र वर्षरात्रः समन्ततः ॥९३०॥

अन्वयः- अथ अन्यदा अत्र शक्रकोदण्डभृत् लुप्तविश्वतेजस्विमण्डलः वर्षरात्रः समन्ततः अवतीर्णः।

विवरणम्:- अथअनन्तरम् एकदा अत्र पोतनपत्तने शक्रस्य इन्द्रस्य कोदण्डं धनुः शक्रकोदण्डम् इन्द्रधनुः। शक्रकोदण्डं बिभतीति शक्रकेदण्डभृत् इन्द्रधनुर्भृत्, तेजास्विनां मण्डलानि तेजस्विमण्डलानि। विश्वानि सर्वाणि च तानि तेजस्विमण्डलानि च विश्वतेजस्विमण्डलानि। लुप्तानि विश्वतेजस्विमण्डलानि यस्मिन सः लुप्तविश्व तेजस्विमण्डलः वर्षारात्रः समन्ततः अवतीर्णः अवातरत् ॥९३०॥

सरलार्थः- अनन्तरमेकदा पोतनपत्तने इन्द्रधनुर्भृत्, सर्वाणि तेजस्विनां मण्डलानि लोपयन् वर्षारात्रः समन्ततः अवातरत् ॥९३०॥

ગુજરાતી :- ઈન્દ્રધનુષ્યને ધારણ કરતો, તથા લુપ્ત કરેલ છે સર્વ તેજસ્વી મંડલો જેણે એવો, વર્ષાઋતુનો સમય એકી વખતે ત્યાં ચોતરફથી ઉતરી આવ્યો.॥૯૩૦॥

हिन्दी :- इंद्रधनुष्य को धारण करती हुई और सभी तेजस्वी मंडलों को लोप करनेवाली वर्षाऋतु उस समय चारों ओर से उतर आयी ॥९३०॥

P.P. Ac. Gunratnasuri M.S. Jun Gyan Aradhak Trust

मराठी :- इंद्रधनुष्याला धारण करणारा आणि सर्व तेजस्वी मंडलांना तुप्त करणारा वर्षाऋतु चोहोबाजूंनी अवतीर्ण झाला. ॥९३०॥

English :- The monsoons has maintained the rainbow which has snatched and concealed the splendour of the glorious and effulgent path of the heavenly bodies and it has spreed itself on all four sides with its strong showers.

क्षुन्दानः पङ्कमाजानु कुलाल इव मृत्तिकाम् ॥
वर्षत्यपि घनेधन्यो महिषीचारको व्रजन् ॥९३१॥

अन्वयः- घने वर्षति अपि महिषीचारको धन्यः कुलालः मृत्तिकाम् इव आजानु पङ्कं क्षुन्दानः व्रजन् ॥९३१॥

विवरणम्:- घने मेघे वर्षति सति अपि महिषीं चारयतीति महिषीचारकः धन्यः कुलालः कुम्भकारः मृत्तिकाम् इव जानुक्याम् आ आजानु जानुपर्यन्तं पङ्कं कर्दमं क्षुन्दानः पादाभ्यां चूर्णयन् ...व्रजन् (अवजत्) ॥९३१॥

सरलार्थः- मेघे वर्षति सति अपि महिषीः चारयन् धन्यः कुलालः मृत्तिकाम् इव आजानु कर्दमं पादाभ्यां क्षुन्दानः चूर्णयन्.... व्रजन् ॥९३१॥

ગુજરાતી :- કુંભાર જેમ માટીને ખુંદે, તેમ છેક ઘુંટણ સુધીનો કાદવ ખુંદતો અને વરસાદમાં પણ ભેંસોને ચરાવવા માટે જતો એવો તે ધન્ય.॥૯૩૧॥

हिन्दी :- कुंभार जैसे मिट्टी को रौंदता है, वैसे घुटनों तक के कीचड़ को रौंदता हुआ धन्य बरसात बरस रही थी तो भी भैंसो को चराने के लिए जाता है ॥९३१॥

मराठी :- कुंभार जसा घट बनविण्यासाठी पायांनी माती तुडवितो. त्याप्रमाणे तो धन्य मुखा मुसळधार पाऊस पडत असतांना मुखा म्हशीला चारीत चालला होता. ॥९३१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पतदम्भ:परिरम्भ रोधकं छत्रकं दधत् ॥
परितः परिबभ्राम महिषीः स्वाः स चारयन् ॥९३२॥युग्मम्॥

अन्वयः- पतदम्भः परिरम्भरोधकं छत्रकं दधत्, स्वाः महिषीः चारयन् सः परितः परिबभ्राम ॥९३२॥

विवरणम्:- *पतत् च तद् अम्भः च पतदम्भः। पतदम्भसः परिरम्भः पतदम्भः परिरम्भः। पतदम्भः परिरम्भस्य रोधकं पतदम्भः परिरम्भरोधकं निपतज्जलाश्लेषरोधकं छत्रं दधत् धारयन्, स्वाः निजाः महिषीः चारयन् सः धन्यः परितः आसमन्तात् परिबभ्राम ॥९३२॥*

सरलार्थः- निपतज्जलसंरभरोधकं छत्रं धारयन्, स्वाः महिषीः चारयन् सः धन्यः आसमन्तात् परिबभ्राम ॥९३२॥

ગુજરાતી :- પડતા મેઘજળને અટકાવનારા છત્રને ધારણ કરી પોતાની ભેંસોને ચરાવતો ચોતરફ ભ્રમણ કરવા લાગ્યો.॥९३२॥

हिन्दी :- गिरते हुऐ मेघजल को रोकनेवाले छत्र को धारण करते हुए अपनी भैंसो को चराते हुऐ वह चारो ओर घूमने लगा॥९३२॥

मराठी :- पडत असलेल्या मेघजलाला रोकण्वासाठी होक्यावर छत्री धारण करून स्वतःच्या म्हशी चारीत तो चारही बाजूस भ्रमण करू लागला. ॥९३२॥

English :- He holds a sturdy umbrella in his hands, which can shelter him from the strongest of showers and roaming about, invited his buffses to lunch on the juicy meadows.

P.P. Ac. Gunratnasuri M.S.

तपस्तपनसन्ताप शोषिताशेषधातुकम् ॥
झंझावातोप सन्तापपद्मनालीकृताङ्गकम् ॥९३३॥

अन्वयः- सः तपस्तपनसंताप शोषिताशेषधातुकं झंझावातोपसन्ताप पद्मनालीकृताङ्गकं मुनिं ददर्श ॥९३३॥

विवरणम्:- *सः धन्यः तपः एव तपनः सूर्यः तपस्तपनः। तपस्तपनस्य सन्तापः तपस्तपनसंतापः। तपस्तपनसंतापेन शोषिताः अशेषाः सकलाः धातवः यस्य सः, तं तपस्तपनसंताप शोषिताः शेषधातुकं तपः सूयोष्मशोषिताखिलधातुकं झंझावातस्य सवृष्टिकवायोःउपसन्तापः झञ्झावातोपसन्तापः। झञ्झावातोपसन्तापेन पद्मनालवत् भङ्गुराणि कृतानि अङ्गानि यस्य सः, तं झंझावातोपसन्तापपद्मनालीकृताङ्गकं झंझावातोपस्पर्शनिन पद्मनालवत् भङ्गुराङ्गकमेकं मुनिं ददर्श ॥९३३॥*

सरलार्थः- सः धन्यः यस्य अशेषाः शरीरधातवः तपः सूर्योष्मणा शोषिताः सन्ति। सकलानि अङ्गानि च झंझावातस्पर्शेन कमलनालवत् भङ्गुराणि जातानि। तादृकामेकं मुनिं ददर्श ॥९३३॥

ગુજરાતી :- તપરુપી સૂર્યના તાપથી સૂકાઇ ગયેલ છે સઘળી ધાતુઓ જેની એવા, ઝપાટાબંધ વાતા વાયુના સ્પર્શથી કમલનાલની પેઠે વળી ગયેલું છે શરીર જેનું, એવા એક મુનિને ધન્યએ જોયા.

हिन्दी :- जिसने तपरुपी सूर्य के ताप से शरीर की सब धातुओं को सूखा दिया है और जिस के सारे अवयव तपश्चर्यारूप तूफान की वायुसे क्षणभंगुर हुए है ऐसे एक मुनिको धन्यने देखा ॥९३३॥

मराठी :- ज्याने तपरुपी सूर्याच्या तापाने शरीरातील सर्व धातू सुकवून टाकले आहेत. झंझावाताने कमलनाल जसे क्षणभंगुर होतात. त्याप्रमाणे तपश्चर्येच्या झंझावाताने ज्याचे सर्व अवयव भंगुर झाले आहेत. असा एक मुनि त्या धन्याला दिसला. ॥९३३॥

English :- The scorching heat of the sun, had dried up all the constituent elements of the body, which itself seemed like a dire penece. And the touch of the celocious speed of the wind seemed that the body had withered like a stock of the lotus.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

गिरीन्द्रामिव निःकम्पमेकपादिकया स्थितम् ॥
अटवीं पर्यटन् धन्यो मुनिमेकं ददर्श सः ॥९३४॥ युग्मम्॥

अन्वयः- अटवीं पर्यटन् सः धन्यः एकपादिकया गिरीन्द्रमिव निःकम्पं स्थितम् एकं मुनिं ददर्श ॥९३४॥

विवरणम्:- *अटवीमरण्यं पर्यटन् भ्रमन् सः धन्यः एकः पादः यस्यां क्रियायां सा एकपादिका, तया एकपादिकया एकपादेन गिरीणामिन्द्रः, तं गिरीन्द्रं मेरुपर्वतमिव निर्गतः कम्पः यस्मिन् कर्मणि यथा स्यात् तथा निःकम्पं कम्परहितं स्थितम् एकं मुनिं ददर्श अद्राक्षीत् ॥९३४॥*

मरलार्थः- अटवीं भ्रमन् सः धन्यः एकपादेन मेरुपर्वतमिव निष्कम्पं स्थितमेकं मुनिम् अद्राक्षीत् ॥९३४॥

गुजराती :- મેરુ પર્વતની પેઠે નિષ્કંપપણે એકપગે ઉભેલા એક મુનિરાજને જંગલમાં ભટકતાં એવા તે ધન્યે જોયા. ॥૯૩૪॥

हिन्दी :- मेरु पर्वत के समान अडिग एक पैर पर खडे ऐसे एक मुनिराज को जंगल मे भटकते हुए उस धन्य ने देखा॥ ॥९३४॥

मराठी :- अरण्यात भटकत असलेल्या त्या धन्य गवळयाला मेरु पर्वताप्रमाणे एका पायावर निष्कंप उभा असलेला एक मुनि दिसला.॥९३४॥

English :- When, one day as Dhany was wandering about in the forest, he happened to see an ascetic deep and still in medition on one leg, as the mount of meru.

दृष्ट्वा वारिजवत्क्लान्तं तं जाताद्भुतभक्तिकः ॥
छत्रधर इवेशस्य छत्रं तस्य शिरस्यधात् ॥९३५॥

अन्वयः- वारिजवत् क्लान्तं तं दृष्ट्वा जाताद्भुतभक्तिकः ईशस्य छत्रधरः इव तस्य शिरसि छत्रम् अधात् ॥९३५॥

विवरणम्:- *वारिणि जायते इति वारिजं कमलम्। वारिजेन तुल्यं वारिजवत् क्लान्तं म्लानं तं मुनिं दृष्ट्वा अवलोक्य अद्भुता चासौ भक्तिः च अद्भुतभक्तिः। जाता अद्भुतभक्तिः यस्य सः जाताद्भुतभक्तिकः सः धन्यः इशस्य स्वामिनः नृपस्य छत्रं धरतीति छत्रधरः इव तस्य मुनेः शिरसि मस्तके छत्रम् अधात् अधारयत् ॥९३५॥*

P.P. Ac. Gunaratnasuri M.S.

सरलार्थः- कमलमिव वलान्तं तं मुनिमवलोक्य धन्यस्य मनसि अद्भुता भक्तिः समुदपद्यत सः छत्रधरः यथा नृपस्य शिरसि छत्रं दधाति तथा तस्य मुनेः मस्तके छत्रम् अधारयत् ॥९३५॥

ગુજરાતી :- કમલની પેઠે કરમાઈ ગયેલા એવા તે મુનિરાજને જોઈને અદ્‌ભુત ભક્તિભાવપૂર્ણ બનેલો ધન્ય રાજાના છત્રધરની પેઠે તેના મસ્તક પર છત્ર ધારણ કરી રહ્યો.॥૯૩૫॥

हिन्दी :- कमल के समान मुरझाये हुए मुनिराज को देखकर धन्य के मन में अद्‌भुत भक्तिभाव उत्पन्न हुआ और उस धन्य ने राजा के छत्रधर के समान उनके मस्तक पर छत्र धारण किया॥९३५॥

मराठी :- कमलाप्रमाणे म्लान झालेल्या त्या मुनिराजाला पाहून धन्याच्या मनात अतिशय भक्ति उत्पन्न झाली व छत्रधारी नोकर जसा राजाच्या डोक्यावर छत्र धरतो. त्याप्रमाणे त्या धन्याने त्या मुनिराजाच्या डोक्यावर छत्री धारण केली. ॥९३५॥

English :- Seeing the monk who seemed like a wittered and wizen lotus, Dhany with utmost devotion held up his umberella fo the monk as the one who holds the umberalla for a king.

न व्यरंसीद्घनो वृष्टेरतित्यागीव दानतः ॥
धन्यस्यापि परिणामः स तथा तं मुनिं प्रति ॥९३६॥

अन्वयः- अतित्यागी दानतः इव घनः वृष्टेः न व्यरंसीत्। तथा धन्यस्य अपि तं मुनिं प्रति सः परिणामः नव्यरंसीत् ॥९३६॥

विवरणम्:- *अतिशयेन त्यागः अस्यास्ति इति अतित्यागी यथा दानतः दानात् न विरमति। तथा मेघः घनः अपि वृष्टेः वर्षणात् न व्यरंसीत् न व्यरमत्। तथा धन्यस्यापि तं मुनिं प्रति समुतन्नः शुभः परिणामः न व्यरंसीत् न व्यरमत् ॥९३६॥*

सरलार्थः- अतित्यागी यथा दानात् न विरमति । तथा घनः वृष्टेः न व्यरमत्। एकमेव धन्यस्यापि तं मुनिं प्रति समुत्पन्नः शुभः परिणामः न व्यरंसीत् ॥९३६॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- (તે સમયે) અતિ ઉદાર માણસની પેઠે વરસાદ વૃષ્ટિદાનથી અટક્યો નહીં, અને તે ધન્યનો તે મુનિ પ્રત્યેનો શુભ ભાવ પણ તેવી જ રીતે અટક્યો નહીં.॥૯૩૬॥

हिन्दी :- (उस समय) अति उदार आदमी के समान मेघ वृष्टिदान से रुके नही, और उस धन्य का शुभ परिणाम भी उसी तरह उस मुनि के प्रति रुका नही॥९३६॥

मराठी :- तेव्हा अतिशय दान करणारा त्यागी जसा दान करणे थांबवीत नाही. त्याप्रमाणे मेघानेही पाऊस पाडणे थांबविले नाही. त्याप्रमाणे धन्याच्या मनात त्या मुनिराजाबद्दल उत्पन्न झालेला शुभ परिणामही थांबला नाही.॥९३६॥

English :- The rain, just as a very generous man, generously kept on showering its cision of showers on the earth. But this did not hamper Danyeis pious desire of holding the umberlla for the meditating ascetic.

निर्विण्ण इव मेघोऽथ क्रमाद् वृष्टेर्न्यवर्तत ॥
आवृष्टि प्रतिपन्नाच्च कायोत्सर्गात् पुनर्मुनिः ॥९३७॥

अन्वयः- अथ मेघः निर्विण्णः इव क्रमात् वृष्टेः न्यवर्तत। मुनिः पुनः आवृष्टिं प्रतिपन्नात् कायोत्सर्गात् न्यवर्तत ॥९३७॥

विवरणम्:- अथ अनन्तरं मेघः घनः निर्विण्णः इव खिन्न इव क्रमात् वृष्टेः वर्षणात् न्यवर्तत व्यरमत्। मुनिः पुनः वृष्टेः आ आवृष्टिं वृष्टिपर्यन्तं प्रतिपन्नात् स्वीकृतात् कायस्य शरीरस्य उत्सर्गः कायोत्सर्गः तस्मात् कायोत्सर्गात् व्यरमत् ॥९३७॥

सरलार्थः- अनन्तरं मेघः खिन्नः इव वृष्टेः न्यवर्तत। मुनिः पुनः यावत् वृष्टिः भवति तावत् स्वीकृतात् कायोत्सर्गात् व्यरमत् ॥९३७॥

ગુજરાતી :- પછી તે વરસાદ જાણે થાકી ગયો હોય તેમ અટકી ગયો અને તે મુનિ પણ વૃષ્ટિ સુધીના અભિગ્રહવાળા કાયોત્સર્ગથી નિવૃત્ત થયા. (અર્થાત્ તેમણે કાયોત્સર્ગ પાર્યો.) ॥૯૩૭॥

हिन्दी :- फिर वह बरसात मानो थक न गयी हो वैसे बरसती हुई आखिर रुक गयी, और वह मुनि भी वृष्टि तक के अभिग्रहवाले कार्योत्सर्ग से निवृत्त हुए॥९३७॥

मराठी :- नंतर मेघाने जणूकाय खिन्न होऊन वृष्टि करणे थांबविले आणि त्या मुनीनेही पाऊस बंद होई पर्यंत स्वीकारलेले कायोत्सर्ग ध्यान थांबविले.॥९३७॥

English :- Then the rain stopped its enthusistic showers which seemed that it was weary and tired now. This also bought the priest bodily penences to a standstill.

धन्यम्मन्यस्ततो धन्यस्तं नमस्कृत्य कृत्यवित् ॥
मुहुः संवाहयत्पादौ स्वच्छः पप्रच्छ वत्सलः ॥९३८॥

अन्वयः- ततः धन्यम्मन्यः कृत्यविद् धन्यः तं नमस्कृत्य मुहुः पादौ संवाहयत्। स्वच्छः वत्सलः पप्रच्छ ॥९३८॥

विवरणम्:- ततः तदनन्तरं आत्मानं धन्यं मन्यतेऽसौ धन्यम्मन्यः कृत्यं वेत्तीति कृत्यविद् कार्यविद् धन्यः तं मुनि नमस्कृत्य वन्दित्वा मुहुः वारंवारं पादौ परणौ समवाहयत्। तदा स्वच्छः निर्मलः वत्सलः च सः तं मुनिं पप्रच्छ अप्राक्षीत् ॥९३८॥

सरलार्थः- तदनन्तरं आत्मानं धन्यं मन्यमानः कार्यविद् धन्यः तं मुनिं नमस्कृत्य मुहुः पादौ समवाहयत्। स्वच्छः वत्सलः च तं मुनिं पप्रच्छ ॥९३८॥

ગુજરાતી :- પછી પોતાને ધન્ય માનતો, નિર્મલ હૃદયનો અને માયાળુ તથા કાર્યને જાણનારો એવો તે ધન્ય (તે મુનિરાજના) ચરણોને વારંવાર ચાંપતો તેમને નમીને પૂછવા લાગ્યો કે -॥૯૩૮॥

हिन्दी :- फिर अपने को धन्य मानता, निर्मल हृदय का और कार्य को जाननेवाला वह धन्य उस मुनिराज के चरणो को बारबार दबाते हुए उन को झुककर पूछने लगा ॥९३८॥

मराठी :- नंतर स्वत:ला धन्य समजणाऱ्या, निर्मळ हृदयाचा आणि मायाळु व काय करावे ते जाणणाऱ्या त्या धन्याने त्या मुनीला नमस्कार केला. व स्वच्छ आणि वत्सल अशा त्या धन्याने मुनीचे पाय दाबीत त्या मुनीला विचारले.॥९३८॥

English :- Dhany began estimating himself as a fortunate and a blest being. The Dhany, who was a tender-hearted man who know the meaning of religious medition, bowed down to the priest, devoutly and spoke to him as he prenedthe priests feet.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

कथं मे मस्तके न्यस्ताविति पङ्केन कोपतः ॥
धृतौ किलेति नोद्धर्तुं शक्यतेऽही मुनेऽधुना ॥९३९॥

अन्वयः- हे मुने! कथं मे मस्तके न्यस्तौ इति कोपतः पङ्केन धृतौ अंही अधुना उद्धर्तुं न शक्येते किल ॥९३९॥

विवरणम्:- *हे मुने! कथं मे मम मस्तके पादौ न्यस्तौ निहितौ इति कोपतः कोपात् पङ्केन कर्दमेन धृतौ गृहीतौ अङ्घ्री चरणौ अधुना उद्धर्तुं न शक्येते किल ॥९३९॥ कर्दमः कुपित इव मम पादौ अगृह्णात्। तेन अहं पादौ उद्धर्तुं न शक्नोमि ॥९३९॥*

सरलार्थः- हे मुने! कथं मम मस्तके पादौ न्यस्तौ इति कोपात् इव पङ्केन धृतौ पादौ अधुना उद्धर्तुम् उत्थापयितुं न शक्येते। कर्दमेन जडीभूतत्वात् ॥९३९॥

ગુજરાતી :- હે મુનિરાજ! મારા મસ્તક પર તમોએ પગ કેમ મુક્યા? એવા કાદવના કોપથી જાણે તેમાં મૂકેલા પગ હમણા ઉંચકી શકાતા નથી. ॥९३९॥

हिन्दी :- "हे मुनिराज! मेरे मस्तक पर आपने पैर क्यों रखा? ऐसा कहकर मानों कोप से ही कीचडने मेरे दोनों पैर पकड़े। अब मैं उनको उठा सकता नहीं"॥९३९॥

मराठी :- "हे मुनिराज! माझ्या मस्तकावर तुम्ही पाय का ठेवला? असे म्हणून जणू काय रागानेच चिखलाने धरलेले पाय आता उचल् शकत नाही.॥९३९॥

English :- He asked the priest, as to why he had kept his feet on his head and is not able to lift it up which seems like, as if he cought in a sinking sand and is unable to lift his foot up because of the fiery wrath of the sinking sand.

तदद्यात्र महर्षे त्वं किमुड्डीय समागतः ॥
किं तपस्तन्त्रमन्त्रोत्थशक्त्या व्योमचरोऽसि वा ॥९४०॥

अन्वयः- तद् हे महर्षे! अद्य अत्र त्वं किम् उड्डीय समागतः। अथवा तपस्तन्त्रमन्त्रोत्थशक्त्या व्योमचरः असि ॥९४०॥

विवरणम्:- तद् तस्मात् हे महर्षे! अद्य अत्र अस्मिन् स्थाने त्वं किम् उड्डीय समागतः असि। अथवा तपश्च तन्त्रं च मन्त्रश्च तपस्तन्त्रमन्त्राः। तपस्तन्त्रमन्त्रेभ्यः उत्तिष्ठति इति तपस्तन्त्रमन्त्रोत्था। तपस्तन्त्रमन्त्रोत्था चासौ शक्तिः च, तया तपस्तन्त्रमन्त्रोत्थशक्त्या तपस्तन्त्रादिभ्यः समुत्पन्नया शक्त्या व्योम्नि चरतीति व्योमचरः आकाशगामी विद्याधरः असि ॥९४०॥

सरलार्थः- तस्मात् हे महर्षे! अय त्वमत्र उड्डीय समागतः किम्। अथवा तपस्तन्त्रमन्त्रेभ्यः समुत्पन्नया शक्त्या व्योमचरः असि ॥९४०॥

ગુજરાતી :- માટે હે મહર્ષિ તમો શું આજે અહીં ઉડીને આવ્યા છો? અથવા શું તમે તંત્ર કે મંત્રની શક્તિથી આકાશગામી છો? ॥૯૪૦॥

हिन्दी :- "इसलिये हे महर्षि! आप आज यहां उड कर आये हो अथवा क्या तप, तंत्र के मंत्र की शक्ति से आप आकाशगामी विद्याधर हो?"॥९४०॥

मराठी :- म्हणून हे महर्षे तुम्ही येथे उड्डून आला आहात काय? अथवा तप, तंत्र की मंत्राच्या शक्तीने युक्त असे आकाशात विहार करणारे आकाशगामी विद्याधर आहात। ॥९४०॥

English :- So he says that the priest must have flown from some where and arrived there as it is not a joke to do such dire penences with some chants and charms unlem he is some sprit.

अचीकथन्मुनिस्तस्य पाण्डुदेशादिहागमम् ॥
लङ्कापुरीं गमिष्यामि नन्तुं तत्रागतान् गुरुन् ॥९४१॥

अन्वयः- मुनिः तस्य अचीकथत् - अहं पाण्डुदेशात् इह आगमम्। तत्र आगतान् गुरुन् नन्तुं लङ्कापुरीं गमिष्यामि ॥९४१॥

विवरणम्:- मुनिः तस्य तस्मै धन्याय अचीकथत् अकथयत् - अहं पाण्डोः देशः पाण्डुदेशः, तस्मात् पाण्डुदेशात् इह अत्र आगमम् आगाम्। अधुना तत्र लङ्कापुर्यां समागतान् गुरुन् नन्तुं वन्दितुं लङ्कापुरि गमिष्यामि ॥९४१॥

सरलार्थः- मुनिः तस्मै धन्याय अकथयत् - अहं पाण्डुदेशात् अत्र आगच्छम्। गुरुन् वन्दितुं लङ्कापुर्यां गमिष्यामि ॥९४१॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- પછી મુનિરાજે તેને કહ્યું કે, હું પાંડુદેશમાંથી અહીં આવું છું, અને લંકાનગરીમાં આવેલા ગુરુમહારાજને વાંદવા માટે ત્યાં જવાનો છું.॥૯૪૧॥

हिन्दी :- फिर मुनिराज ने कहा कि, "मैं पांडुदेश में से यहाँ आया हूँ, और लंकानगरी में आये हुए गुरुमहाराज को प्रणाम करने के लिये जानेवाला हूँ।"॥९४१॥

मराठी :- नंतर मुनिराजाने म्हटले की, "मी पांडुदेशामधून येथे आलो आहे, आणि लंकानगरीत आलेल्या गुरुमहाराजांना नमस्कार करण्यासाठी जाणार आहे."॥९४१॥

English :- At this the priest replied the he has arrived from a state named Pandu to worship a great priest and perceptor who hails from a city named Lankan.

अत्रायातश्च जीमूतैः प्राप्तश्चौरैरिवाध्वनि ॥
वृष्टौ सत्यां हि साधूनां गमनं न हि कल्पते ॥९४२॥

अन्वयः- अत्र आयातः अहम् अध्वनि चौरै इव जीमूतैः प्राप्तः। वृष्टौ सत्यां साधूनां गमनं न कल्पते ॥९४२॥

विवरणम्:- अत्र आयातः आगतः अहम् अध्वनि मार्गे चौरैः स्तेनैः इव वारीणां वाहकाः जीमूताः, तै जीमूतैः वारिवाहैः मेघैः प्राप्तः गृहीतः। वृष्टौ सत्यां यदा वृष्टिर्भवति तदा साधूनां गमनं न कल्पते॥९४२॥

सरलार्थः- अत्र आगतः अहम् मार्गे चौरैः इव मेघैः गृहीतः। यदा वृष्टिः भवति तदा साधूनां गमनं न कल्पते। निषिध्यते इत्यर्थः ॥९४२॥

ગુજરાતી :- અહીં હું જેવો આવ્યો, તેવામાં જ ચોરોની પેઠે માર્ગમાં વરસાદ આવી લાગ્યો અને વરસાદમાં સાધુઓને વિહાર કરવો કલ્પે નહીં.॥૯૪૨॥

हिन्दी :- "मै यहाँ जब आया, तब चोरों के समान रास्ते में बरसात आने लगी और बरसात में साधुओं को विहार करना कल्पता नहीं"॥९४२॥

मराठी :- ''मी येथे जेव्हा आलो, तेव्हा चोरांप्रमाणे मार्गात पावसाने मला घेरले. आणि पाऊस पडत असतांना साधूला विहार करणे चालत नाही. (निषिद्ध आहे.)''॥९४२॥

English :- He continued saying that, when he had arrived there, the showers had began showering itself on these lonely roads that appeared to be like robbers, then. And it is against the rules of a priest to comply these stubbarn showers and walk about in the rain.

आवृष्टधभिगृहीतेन सप्ताहमिह तस्थिवान् ॥
तद्याम्युपाश्रये क्वापि सम्पूर्णाभिग्रहोऽधुना ॥९४३॥

अन्वयः- आवृष्टि अभिगृहीतेन इह सप्ताहं तस्थिवान्। तद् सम्पूर्णाभिग्रहः अहमधुना क्वापि उपाश्रये यामि ॥९४३॥

विवरणम्:- *वृष्टेः आ आवृष्टि यावत् वृष्टिर्वर्तते तावत् विहारं न करोमि इति अभिग्रहः निगमः मया कृतः आसीत् - तेन अभिगृहीतेन अभिग्रहेण अहम् इह सप्तानामह्नां समाहारः सप्ताहं तस्थिवान् स्थितवान्। तत् तस्मात् अधुना संपूर्णः अभिग्रहः यस्य सः सम्पूर्णाभिग्रहः पारपूर्णानियमः अहं क्वापि कस्मिन्नपि उपाश्रये यामि गच्छामि ॥९४३॥*

सरलार्थः- यावत् वृष्टिः भवति तावद् विहारं न करोमि इति अभिग्रहात् अहं सप्ताहमत्र स्थितः। अधुना अभिग्रहः सम्पूर्णः। अतः अहं कस्मिन्नपि उपाश्रये यामि ॥९४३॥

ગુજરાતી :- વરસાદ વડે ત્યાં સુધી વિહાર નહીં કરવાનો મેં અભિગ્રહ લીધેલો હોવાથી હું સાત દિવસો સુધી અહીં રહ્યો છું, હવે તે અભિગ્રહ પૂરો થવાથી હું કોઇ પણ ઉપાશ્રયમાં જવાનો છું.॥૯૪૩॥

हिन्दी :- ''बरसात हो तबतक विहार न करने का मेरा अभिग्रह होने के कारण मैं सात दिन से यहीं रहा हूँ। अब अभिग्रह पूरा हो जाने के पश्चात मैं किसी भी उपाश्रयमें चला जाऊंगा।''॥९४३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- "पाऊस पडेल तोपर्यंत विहार करावयाचा नाही असा मी अभिग्रह घेतल्याने सात दिवसपर्यंत येथे राहिलो, आता अभिग्रह पूर्ण झाल्याने मी कोणत्यातरी उपाश्रयात जात आहे." ॥९४३॥

English :- Due to this rule, he could'nt walk about in these showers, which compelled him to remain there for seven days. And now as the rains have stopped and has controlled its stubbornity, he has decided to go and reside in dwellings meant for priests. (Upeshray)

धन्यस्ततोऽभ्यधात् साधुं धात्री कर्दमदुर्गमा ॥
इमं महिषमारुह्य प्रभोन्तःपुरमेहि तत् ॥९४४॥

अन्वयः- ततः धन्यः साधुम् अभ्यधात्। धात्री ककर्दमदुर्गमा अस्ति। तद् हे प्रभो! इमं महिषम् आरुह्य अन्तःपुरम् एहि ॥९४४॥

विवरणम्:- *ततः तदनन्तरं धन्यः साधुम् अभ्यधात् - अवादीत् - धात्री पृथ्वी कर्दमेन पङ्केन दुःखेन गम्यते इति कर्दमदुर्गमा पङ्कदुर्गमा अस्ति। इतस्ततः सर्वत्र कर्दमः प्रसृतः अस्ति तस्मात् गन्तुं न शक्यते। तस्मात् हे प्रभो! इमं महिषम् आरुह्य उपविश्य पुरस्य अन्तः अन्तःपुरम् एहि आगच्छ ॥९४४॥*

सरलार्थः- ततः धन्यः साधुम् अवदत् - प्रभो! धरित्री पङ्केन दुर्गमा अस्ति। अतः इमम् महिषम् आरुह्य पुरस्य अन्तः आगच्छ, इति ॥९४४॥

ગુજરાતી :- ત્યારે તે ધન્યે તે સાધુને કહ્યું કે, (આ સમયે) પૃથ્વી કાદવને લીધે વિહાર કરી શકાય એવી નથી, માટે હે પ્રભો! તમો આ પાડા પર બેસીને નગરની અંદર પધારો.॥૯૪૪॥

हिन्दी :- तब उस धन्य ने उस साधु से कहा कि, (इस समय) "पृथ्वी कीचड के कारण विहार करने लायक नही है, इसलिये हे प्रभो! आप इस भैंसे पर बैठ कर नगर के अंदर पधारो?" ॥९४४॥

मराठी :- तेव्हा तो धन्य त्या मुनीला म्हणाला, "प्रभो! जमीन चिखलाने दुर्गम झाली आहे. म्हणून माझ्या ह्या रेड्यावर बसून आपण नगरात प्रवेश करावा." ॥९४४॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- At this Dhany appealed to the priest to first enter the city, by mounting his buffo as the slimy and sludgy ground is now not fit for jauntries.

स उवाच न साधूनां युक्तं यानेऽधिरोहणम् ॥
तत्र यत्प्राणिपीडा स्यात् सा च तैः सर्वथोज्झिता ॥९४५॥

अन्वयः- स उवाच - याने अधिरोहणं साधूनां न युक्तम्। यत् तत्र प्राणिपीडा स्यात्। सा तैः सर्वथा उज्झिता अस्ति ॥९४५॥

विवरणम्:- *सः साधुः उवाच अवोचन् - याने वाहने अधिरोहण मुपवेशनं साधूनां न युक्तं न कल्पते। यत् तत्र यानाधिरोहणे प्राणिनां पीडा प्राणिपीडा स्यात्। सा प्राणिपीडा तैः साधुभिः सर्वथा मनोवाक्काययोगेन उज्झिता त्यक्ता अस्ति। साधवः मनसा वचसा कायेन च कमपि न अन्ति ॥९४५॥*

सरलार्थः- साधुः उवाच - याने अधिरोहणं साधूनां न कल्पते। यतः तत्र प्राणिपीडा भवति। सा साधुभिः सर्वथा त्यक्ता अस्ति ॥९४५॥

ગુજરાતી :- ત્યારે તે મુનિએ કહ્યું કે, મુનિઓને વાહન પર બેસવું લાયક નથી. કેમ કે તેથી પ્રાણીને જે પીડા થાય, તે ઉપજાવવાનો તેઓએ સર્વથા પ્રકારે ત્યાગ કરેલો છે.॥૯૪૫॥

हिन्दी :- तब उस मुनिने कहा कि, "मुनिओं को वाहन पर बैठना कल्पता नही। क्यों कि उससे प्राणिओं को जो पीडा होती है, उसका मुनियोंने सर्व प्रकार से त्याग किया हुआ है।"॥९४५॥

मराठी :- तेव्हा त्या साधुने म्हटले की, "साधुंना वाहनावर बसणे योग्य नाही, कारण की, त्यामुळे प्राण्यांना पीडा (त्रास) होते. साधूंनी प्राणपीडेचा सर्वप्रकारे त्याग केलेला आहे."॥९४५॥

English :- At this the monk replied that it is against the rule of the monk to mount an animal as the wright of the human hurts them moreover, it is against the rule of a monk to practice, the use of any type of a vechile.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

पदचङ्क्रमणैसेव भवितव्यं महर्षिभिः ॥
ततः शनैः समं तेन यतिरन्तःपुरं गतः ॥९४६॥

अन्वयः- **महर्षिभिः पदचङ्क्रमणैः एव भवितव्यम्। ततः शनैः तेन समं यतिः अन्तः पुरं गतः ॥९४६॥**

विवरणम्:- महान्तश्च ते ऋषयश्च महर्षयः तैः महर्षिभिः महासाधुभिः पदाभ्यां चक्रम्यन्ते इति पदचङ्क्रमणाः; तैः पदचंक्रमणैः पादविहारिभिः एव भवितव्यम्। इत्युक्त्वा शनैः शनैः तेन धन्येन समं यतिः साधुः पुरस्य अन्त अन्तः पुरं गतः यातः ॥९४६॥

सरलार्थः- महर्षिभिः पादचारैः एव भवितव्यम्। इत्युक्त्वा ततः मुनिः तेन धन्येन सह शनैः पुरस्य अन्तः गतः॥९४६॥

ગુજરાતી :- માટે મુનિરાજોએ પગે ચાલીને જ વિહાર કરવો જોઈએ. પછી ધીમે ધીમે તે મુનિ તે ધન્યની સાથે જ નગરની અંદર ગયા.॥૯૪૬॥

हिन्दी :- इस लिये मुनिओं को पैदल चलकर ही विहार करना चाहिए। फिर धीरे धीरे वह मुनि उस धन्य के साथ ही नगर के अंदर गये॥९४६॥

मराठी :- म्हणुन मुनिराजांनी पायीच विहार केला पाहिजे. असे म्हणून नंतर हळू हळू ते मुनिराज त्या धन्या बरोबर नगरात गेले.॥९४६॥

English :- So a monk has to only use his two feet to wander abou, saying thus, the monk, along with Dhany, slowly walked on and in due-cours entered the city.

तेन चात्मगृहद्वारमागतो मुनिपुङ्गवः ॥
नीतो गृहाङ्गणेऽभ्यर्च्य प्रतिलाभयितुं मुदा ॥९४७॥

अन्वयः- **तेन आत्मगृहद्वारमागतः मुनिपुङ्गवः अभ्यर्च्य प्रतिलाभयितुं मुदा गृहाङ्गणे नीतः ॥९४७॥**

विवरणम्:- *तेन धन्येन आत्मनः गृहमात्मगृहम्। आत्मगृहस्य द्वारमात्मगृहद्वारम् आगतः आयातः मुनिपुङ्गवः मुनिश्रेष्ठः अभ्यर्च्य सम्पूज्य प्रतिलाभयितुं भिक्षां दातुं मुदा हर्षेण गृहस्य अङ्गणं गृहाङ्गणं तस्मिन् गृहाङ्गणे नीतः ॥९४७॥*

सरलार्थः- तेन धन्येन यदा मुनिपुङ्गवः स्वगृहद्वारमागतः तदा सम्पूज्य प्रतिलाभयितुं हर्षेण गृहाङ्गणे नीतः ॥९४७॥

गुजराती :- પછી પોતાના ઘરના બારણા આગળ આવેલા મુનિરાજને પ્રાર્થનાપૂર્વક હર્ષથી પ્રતિલાભવા માટે તે પોતાના ઘરના આંગણામાં લઈ ગયો.॥૯૪૭॥

हिन्दी :- फिर अपने घर के सामने आये हुए मुनिराज को प्रार्थनापूर्वक हर्ष से (अन्नदान देने) प्रतिलाभने के लिऐ वह धन्य घर के आंगन में ले गया॥९४७॥

मराठी :- नंतर मुनिराज जेव्हा आपल्या घराच्या दाराशी आले. तेव्हा धन्याने त्याला भिक्षा येण्याची विनंती केली व मोठया आनंदाने तो त्यांना घराच्या अंगणात घेऊन गेला.॥९४७॥

English :- Then Dhany invited the monk, in his courtyard, in order to offer him food.

धन्यस्तं क्षीरकुम्भेनाकारयत् पारणं ततः ॥
कुम्भेनेक्षुरसस्येव श्रेयांसः प्रथमं जिनम् ॥९४८॥

अन्वयः- ततः श्रेयांसः इक्षुरसस्यः कुम्भेन प्रथमं जिनम् इव धन्यः क्षीरकुम्भ्रेन तं पारणम् अकारयत् ॥९४८॥

विवरणम्:- *ततः तदनन्तरं यथा श्रेयांसः नृपः इक्षोः रसः इक्षुरसः। तस्य इक्षुरसस्य कुम्भेन प्रथमं जिनं ऋषभनाथं पारणमकारयत्। तथा धन्यः क्षीरस्य दुग्धस्य कुम्भः क्षीरकुम्भः, तेन क्षीरकुम्भेन दुग्धघटेन तं महामुनिं पारणम् अकारयत् व्यधापयत् ॥९४८॥*

सरलार्थः- तदनन्तरं यथा श्रेयांसः नृपः इक्षुरसेन प्रथमं जिनेन्द्रं पारणमकारयत्। तथा धन्यः दुग्धकुम्भेन तं मुनिं पारणम् अकारयत् ॥९४८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ગુજરાતી :- પછી શ્રેયાંસે જેમ આદિનાથપ્રભુને શેરડીના રસના ઘડાથી પારણું કરાવ્યું હતું, તેમ ધન્યે તે મુનિરાજને દૂધના ભરેલા ઘડાથી પારણું કરાવ્યું.॥૯૪૮॥

हिन्दी :- फिर श्रेयांसने जिस प्रकार आदिनाथप्रभु को गन्ने के रस के, घडे से पारणा कराया था, उसीप्रकार धन्य ने उस मुनिराज को दूध के भरे हुए घडे से पारणा कराया॥ ॥९४८॥

मराठी :- नंतर श्रेयांस राजाने ज्याप्रमाणे आदिनाथ प्रभूला उसाच्या रसाने उपापन करविले होते. त्याप्रकारे धन्याने त्या मुनिराजला दुधाने भरलेल्या घटाने उपापन करविले.॥९४८॥

English :- Then just as Shreyas had made Lord Adinath to break his fast, with a pot of sugarcan juice, in the same way Dhany made the monk break his fast with a pot of milk.

पत्तने सोऽथ तत्रैव निर्वाह्य प्रावृषं मुनिः ॥
अनन्तरं गतः साधुचर्यया गुरुमन्निधौ ॥९४९॥

अन्वयः- अथ सः मुनिः तत्र एव पत्तने प्रावृषं निर्वाह्य अनन्तरं साधुचर्यया गुरुसन्निधौ गतः ॥९४९॥

विवरणम्:- *अथ अनन्तरं सः मुनिः तत्र तस्मिन् एव पत्तने प्रावृषं वर्षाकालं निर्वाह्य अतिवाह्य अनन्तरं साधोः चर्या साधुचर्या तया साधुचर्यया पादविहारेण गुरोः सन्निधिः गुरुसन्निधिः तस्मिन् गुरुसन्निधौ गुरुसमीपे गतः अगच्छत् ॥९४९॥*

सरलार्थः- अनन्तरं सः मुनिः तस्मिन् पत्तने वर्षाकालम् अतिबाह्य साधुचर्यया गुरुसन्निधौ जगाम ॥९४९॥

ગુજરાતી :- પછી તે મુનિરાજ તે જ નગરમાં ચાતુર્માસ કરીને, પછીથી સાધુવિહારની વિધિપૂર્વક (પોતાના) ગુરુમહારાજ પાસે ગયા.॥૯૪૯॥

हिन्दी :- फिर मुनिराजने उसी नगरमें चातुर्मास किया। फिर विधिपूर्वक विहार कर के अपने गुरुमहाराज के पास गए ॥९४९॥

मराठी :- नंतर त्या मुनिराजाने त्याच नगरात चातुर्मास केला. त्यानंतर ते मुनिराज साधु विहाराच्या विधीनुसार - विहार करून गुरुमहाराजा जवळ गेले.॥९४९॥

P.P. Ac. Gunratnasuri M.S.

Jain Education International For Private & Personal Use Only

English :- The monk then stayed there for the five mouths of the rainy-season. Then when the monsoons were ocer, the monk after performing the required ceremonial avocations, set off to meet his teacher and perceptor.

तौ पुनर्धूसरीधन्यौ तत्पार्श्वान्मगृहिव्रतौ ॥
पालितोज्ज्वलसम्यक्त्वौ कृत्वा द्रव्यस्तवं चिरम् ॥९५०॥

अन्वयः- तत्पार्श्वान्मगृहिव्रतौ तौ धूसरीधन्यौ पुनः पालितोज्ज्वलसम्यक्त्वौ चिरं द्रव्यस्तवं कृत्वा ॥९५०॥

विवरणम्:- *तस्य पार्श्वः तत्पार्श्वः। तत्पार्श्वात् आत्तं गृहिणः व्रतं याभ्यां तौ तत्पार्श्वान्मगृहिव्रतौ तस्य मुनेः पार्श्वात् गृहिव्रतं श्रावकव्रतमादाय तौ धूसरी च धन्यश्च धूसरीधन्यौ पुनः उज्ज्वलं च तत्सम्यक्त्वं च उज्ज्वलसम्यक्त्वम् पालितम् उज्ज्वलसम्यक्त्वं याभ्यां तौ पालितोज्ज्वसम्यक्त्वौ उज्ज्वलं सम्यक्त्वं पालयित्वा चिरं चिरकालं द्रव्यस्तवं द्रव्यस्तुतिं कृत्वा ॥९५०॥*

सरलार्थः- तौ धूसरीधन्यौ तस्य मुनेः पार्श्वात् गृहिव्रतमादाय उज्ज्वलसम्यक्त्वं च पालयित्वा चिरकालं द्रव्यस्तुतिं कृत्वा ॥९५०॥

गुजराती :- **તે મુનિ પાસેથી ધૂસરી અને ધન્યે શ્રાવકના વ્રત ગ્રહણ કર્યા હતા, તેઓ નિર્મલ સમકીત પામીને, તથા ઘણા કાળ સુધી (જિનેશ્વર પ્રભુની) દ્રવ્યસ્તુતિ કરીને,॥૯૫૦॥**

हिन्दी :- उन मुनि से श्रावक धर्मको पाकर धूसरी और धन्य उज्ज्वल समकित का पालन कर के और प्रभु की द्रव्य स्तुति कर के- ॥९५०॥

मराठी :- **त्या मुनिराजाजवळ श्रावकाचे व्रत घेऊन धूसरी आणि धन्य निर्मल समकित पाळून चिरकाल जिनेश्वरप्रभूची द्रव्यस्तुति करून.॥९५०॥**

English :- Then both, Dhany and Dhusari took the vows of a lay-person and maintained it wholeheartedly and even praised Lord Jineshwar emotionally for a long time to coma.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

समये च समासाद्य साधुधर्ममुभावपि ॥
प्रतिपाल्य समाः सप्त व्यपद्येतां समाधिना ॥९५१॥

अन्वयः- उभौ अपि समये साधुधर्मं समासाद्य सप्त समाः च प्रतिपाल्य समाधिना व्यपद्येताम् ॥९५१॥

विवरणम्:- *उभौ धूसरीधन्यौ अपि समये योग्यावसरे साधोः धर्मः साधुधर्मः, तं साधुधर्मं सामसाद्य सम्प्राप्य सप्त समाः वर्षाणि साधुधर्मं प्रतिपाल्य समाधिना व्यपद्येताम् अम्रियेताम् ॥९५१॥*

सरलार्थः- धूसरीधन्यौ उभावपि समये साधुधर्मं समासाद्य सप्त वर्षाणि साधुधर्मं प्रपाल्य समाधिना अम्रियेताम् ॥९५१॥

गुजराती :- અને અવસરે સાધુધર્મ સ્વીકારીને તેઓ બન્ને તેને સાત વર્ષો સુધી પાળીને સમાધિપૂર્વક કાળધર્મ પામ્યા.॥૯૫૧॥

हिन्दी :- और साधुधर्म स्वीकार कर के, उन दोनों ने सात बरस तक उस का पालन कर समाधिपूर्वक कालधर्म पाया॥९५१॥

मराठी :- योग्य वेळी साधुधर्म स्वीकारुन त्या दोघांनी सात वर्षापर्यंत साधुधर्माचे पालन केले आणि नंतर ते दोघे समाधिपूर्वक मरण पावले.॥९५१॥

English :- Then they both accepted monasticism and lived through it for seven years, then taking up to complete abstination (Samadhi), they embraced death in due-course.

पात्रसात्कृतदुग्धस्य प्रभावाद्भावनापरौ ॥
क्षेत्रे हैमवतेऽभूतां तौ द्वौ युगलधार्मिकौ ॥९५२॥

अन्वयः- पात्रसात्कृतदुग्धस्य प्रभावात् भावनापरौ तौ द्वौ हैमवते क्षेत्रे युगलधार्मिकौ अभूताम् ॥९५२॥

विवरणम्:- *पात्रसात् पात्राधीनं कृतं च तद् दुग्धं च कृतदुग्धं तस्य कृतदुग्धस्य पात्रे कृतदुग्धदानस्य प्रभावात् सामर्थ्यात् भावनायां परौ भावनापरौ शुभभावनावन्तौ तौ द्वौ धूसरीधन्यौ हैमवते क्षेत्रे युगलधार्मिकौ युगलिनौ अभूताम् ॥९५२॥*

सरलार्थः- सत्पात्रे दुग्धस्य दानं कृतम्। तत्प्रभावात् शुभभावनायुतौ तौ द्वावपि धूसरीधन्यौ हैमवते क्षेत्रे युगलित्वेन समुत्पन्नौ ॥९५२॥

ગુજરાતી :- અને સુપાત્રે આપેલાં દૂધના દાનથી શુભ ભાવનાવાળા એવા તેઓ બન્ને હેમવંત ક્ષેત્રમાં યુગલીયાં રૂપે ઉત્પન્ન થયા.॥૯૫૨॥

हिन्दी :- सुपात्रे दूध का जो दान दिया था, उस के प्रभाव से शुभभावना युक्त वे दोनो हेमवंत क्षेत्र में युगलीया के रुप में उत्पन्न हुए ॥९५२॥

मराठी :- सत्पात्री केलेल्या दुग्धदानाच्या प्रभावाने शुभ भावाने युक्त झालेले ते दोघेही (दूसरी व धन्य) हैमवत क्षेत्रात युगलीक म्हणून उत्पन्न झाले.॥९५२॥

English :- Then just because they had offered the priest a pot-full of milk with a pure heart, they were reincarnated in the Hemvant Schetra.

मृत्वा ततोऽपि तौ स्वर्गे सुधर्माख्ये सुरोत्तमौ ॥
जातौ जायापतित्वेन क्षीरडिण्डिरनामकौ ॥९५३॥

अन्वयः- तौ मृत्वा ततः अपि सुधर्माख्ये स्वर्गे जायापतित्वेन क्षीरडिण्डिरनामकौ सुरोत्तमौ जातौ ॥९५३॥

विवरणम्:- तौ मृत्वा मरणं प्राप्य ततः हैमवतात् क्षेत्रात् सुधर्मः आख्या यस्य सः सुधर्माख्यः, तस्मिन् सुधर्माख्ये सुधर्मनाम्नि स्वर्गे जायात पतिश्च जायापती। जायापत्योः भावः जायापतित्वं, तेन जायापतित्वेन दम्पतित्वेन क्षीरडिण्डिरौ नामनी ययोः तौ क्षीरडिण्डिमनामकौ सुरोत्तमौ सुरेषुउत्तमौ सुरोत्तमौ देवोत्तमौ जातौ अजायेताम् ॥९५३॥

सरलार्थः- तौ मृत्वा ततः हैमवतात् क्षेत्रात् सुधर्मनाम्नि स्वर्गे जायापतित्वेन क्षीरडिण्डिनामकौ सुरोत्तमौ जातौ ॥९५३॥

ગુજરાતી :- ત્યાંથી મૃત્યુ પામીને પણ તેઓ સૌધર્મ દેવલોકમાં ક્ષીર અને ડિંડિર નામના દંપતી રૂપે બે ઉત્તમ દેવો થયા.॥૯૫૩॥

हिन्दी :- वहाँ से मृत्यु पा कर वे दोनो सौधर्म देवलोक में क्षीर और डिण्डिर नामक दंपत्ती रूप में उत्तम देव हुए ॥९५३॥

मराठी :- तेथून मृत्यु पावून ते दोघे सौधर्म देवलोकात क्षीर आणि डिण्डिर नावाचे पतीपत्नी रुपांने उत्तम देव झाले.॥९५३॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- Then in due-course, when they died, they were born again in the Saudharme devlok as man and wife, named Kshir and Dindir respecticely.

धन्यजीवस्ततश्च्युत्वा सोऽभूत्त्वं नैषधिर्नलः ॥
स पुनधूसरीजीन दमयन्ती तव प्रिया ॥९५४॥

अन्वयः- सः धन्यजीवः ततः च्युत्वा त्वं नैषधिः नलः अभूत्। सः पुनः धूसरीजीवः तव प्रिया दमयन्ती अभवत् ॥९५४॥

विवरणम्:- सः धन्यस्य जीवः ततः सौधर्मदेवलोकात् च्युत्वा निषधस्य अपत्यं पुमान् नैषधिः नलः त्वं अभूत् अभूः। सः पुनः धूसर्या जीवः तव प्रिया पत्नी दमयन्ती अभवत् ॥९५४॥

सरलार्थः- सः धन्यस्य जीवः ततः देवलोकात् च्युत्वा नैषधेः नलस्य रूपेण त्वं जातः । सः धूसर्याः जीवः तव प्रिया दमयन्ती अभूत ॥९५४॥

ગુજરાતી :- પછી તે ધન્યનો જીવ ત્યાંથી ચ્યવીને તુ નિષધરાજાનો નલ નામે પુત્ર થયો, અને તે ધૂસરીનો જીવ દમયંતી નામની તારી આ સ્ત્રી થઇ. ॥૯૫૪॥

हिन्दी :- फिर उस धन्य का जीव वहाँ से आयुष्य पूर्ण कर के निषध राजा के यहां तू नल नामक पुत्र हुआ और धूसरी का जीव दमयंती नामक तेरी पत्नी हुई ॥९५४॥

मराठी :- नंतर त्या धन्याचा जीव तेथून च्युत होऊन निषध राजाचा नल नावाचा पुत्र झाला आणि धूसरीचा जीव दमयंती नावाची तुझी पत्नी झाली.॥९५४॥

English :- Then the soul of Danyes, after finishing his life-time, was born to King Nishad as Nal and his wife Dhusari was born as Damyanti.

P.P. Ac. Gunratnasuri M.S.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र यत्प्राग्भवे राजंस्तप उद्यापनोत्सवे ॥
त्वया त चव पत्न्या च तीर्थेऽष्टापदनामनि ॥९५५॥

अन्वयः- हे राजन्! तत्र प्राग्भवे अष्टापदनामनि तीर्थे तपउद्यापनोत्सवे त्वया च तव पत्न्या च .... (अग्रिमेण सम्बन्धः) ॥९५५॥

विवरणम्:- *हे राजन्! तत्र तस्मिन् प्राक् चासौ भवश्च प्राग्भवः, तस्मिन् प्राग्भवे धन्यधूसरीभवे अष्टापदं नाम यस्य तद् अष्टापदनाम तस्मिन् अष्टापदनामनि तीर्थे तपसः (आचाम्लस्य) उद्यापनं तप उद्यापनम्। तपउद्यापनस्य उत्सवः तपउद्यापनोत्सवः, तस्मिन् तपउद्यापनोत्सवे त्वया (धन्येन) तव पत्न्या (धूसर्या) च..... (अग्रिमेण सम्बन्धः) ॥९५५॥*

सरलार्थः- हे राजन्! प्राग्भवे अष्टापदनामनि तीर्थे तपसः उद्यापनोत्सवे त्वया तव पत्न्या च ..... (अग्रिमेण सम्बन्धः) ॥९५५॥

ગુજરાતી:-- હે રાજન્! તે પૂર્વભવમાં તપના ઉજમણાના મહોત્સવ સમયે તેં અને તારી પત્નીએ અષ્ટાપદ નામના તીર્થમાં॥૯૫૫॥

हिन्दी :- "हे राजन्! पूर्वभव में तप के उद्यापनोत्सव के समय तू और तेरी पत्नी ने अष्टापद नामक तीर्थ में,"॥९५५॥

मराठी :- "हे राजा! पूर्वजन्मांत तपाच्या उद्यापन महोत्सवाच्या वेळी तू आणि तुझ्या पत्नीने अष्टापदनावाच्या तीर्थात,"॥९५५॥

English :- The monk continved saying that, in his past life, he and his wife, on the completion of an observance, on the mount of Ashtapad ....

चक्रे तीर्थकृतां पूजा विधिना कुसुमादिभिः ॥
तदार्जितं च तत्पुण्यमुदियाय भवेऽत्र च ॥९५६॥

अन्वयः- कुसुमादिभिः विधिना तीर्थकृतां पूजा चक्रे। तदा अर्जितं तत्पुण्यम् अत्र भवे उदियाय ॥९५६॥

विवरणम्:- *कुसुमानि आदौ येषां तानि कुसुमादीनि तैः कुसुमादिभिः उपकरणैः विधिना विधिवत् तीर्थंकुर्वन्तीति तीर्थकृतः, तेषां तीर्थकृतां तीर्थंकराणां पूजा अर्चा चक्रे। तदा अर्जितम् उपार्जितं तत् पुण्यं सुकृतम् अत्र अस्मिन् भवे जन्मनि उदियाय उदितमभूत् ॥९५६॥*

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

सरलार्थः- कुसुमादिभिः विधिना तीर्थकृतां पूजा विहिता। तेन तदा उपार्जित पुण्यम् अस्मिन् भवे उदितमभवत् ॥९५६॥

ગુજરાતી :- તીર્થંકરોની પુષ્પાદિ વડે વિધિપૂર્વક પૂજા કરીને જે પુણ્ય ઉપાર્જન કર્યું તે પુણ્ય આ ભવમાં તમો બન્નેને ઉદયમાં આવ્યું.॥૯૫૬॥

हिन्दी :- तीर्थकरों की पुष्पादि से विधिपूर्वक पूजा करके जो पुण्य उपार्जित किया था वह पुण्य इस भवमें तुम दोनों का उदय में आया है। ॥९५६॥

मराठी :- तीर्थकरांची फुलांनी विधिपूर्वक पूजा करुन जे पुण्य मिळविले होते. ते तुम्हा दोघांचे पुण्य या जन्मात उदयास आले आहे. ॥९५६॥

English :- .... had worshipeed the Trithankars with flowers etc and according the auspicious rites. Due to the meritorious deeds, they had attained this glorious life.

तत्प्रभावादिदं राज्यं भवद्भ्यां प्राप्यताद्भुतम् ॥
अर्हतां तिलकाधानात् भालेऽस्यास्तिलकः पुनः ॥९५७॥

अन्वयः- तत्प्रभावात् भवद्भ्याम् इदम् अद्भुतं राज्यं प्राप्यता अर्हतां तिलकाधानात् अस्याः भाले तिलकः अस्ति ॥९५७॥

विवरणम्:- तस्य पुण्यस्य प्रभावः तत्प्रभावः, तस्मात् तत्पुण्यप्रभावत् तत्पुण्यसामर्थ्यात् भवद्भ्यां युवाभ्याम् इदम् अद्भुतं राज्यं प्राप्याता अलभ्यता अर्हतां जिनेश्वराणां ललाटेषु तिलकानाम् आधानात् निक्षेपात् अस्याः दमयन्त्याः भाले ललाटे तिलकः अस्ति ॥९५७॥

सरलार्थः- तस्य पुण्यस्य प्रभावात् युवाभ्याम् इदम् अद्भुतं राज्यं प्राप्तम् । तीर्थकराणां ललाटेषु तिलकाधानात् अस्याः दमयन्त्याः भाले ललाटे तिलकः अस्ति ॥९५७॥

ગુજરાતી :-- અને તે પુણ્યના પ્રભાવથી તમોને આ અદ્‌ભૂત રાજ્ય પ્રાપ્ત થયું છે, તથા તીર્થંકરપ્રભુઓને તિલકો ચડાવવાથી આ દમયંતીના લલાટમાં તિલક થયેલું છે. ॥૯૫૭॥

हिन्दी :- और इस पुण्य के प्रभाव से तुम्हे यह अद्‌भुत राज्य प्राप्त हुआ है, और तीर्थंकर प्रभुओं को तिलक चढाने से इस दमयंती के ललाट में तिलक हुआ है॥९५७॥

मराठी :- त्या पुण्याच्या प्रभावाने तुम्हाला हे अद्‌भुत राज्य प्राप्त झाले आणि तीर्थंकर प्रभूला टिळा चढविल्याने दमयंतीच्या कपाळावर टिळा प्राप्त झाला.॥९५७॥

English :- Due to his meritrious deeds, Nal had attained this splendocrous kingdom and Damyanti, had attained that emblem on her forehead beacuse she had made wonderful emblems for all the Trithankars.

घटिका द्वादश तदा यच्च साधुः कदर्थितः ॥
राज्यभ्रंशो वियोगश्च ततोऽभूद् द्वादशाब्दिकः ॥९५८॥

अन्वयः- तदा यद् द्वादश घटिकाः साधुः कदर्थितः। ततः द्वादशाब्दिकः राज्यभ्रंशः वियोग च अभूत् ॥९५८॥

विवरणम्:- तदा तस्मिन् काले यद् द्वादश घटिकाः साधुः कदर्थितः, तिरस्कृतः। ततः तस्मात् कारणात् द्वादशसु अब्देषु भवः द्वादशाब्दिकः राज्यात् भ्रंशः राज्यभ्रंशः वियोगः च अभूत्। द्वादश घटिकाः साधोः कृत कदर्थनत्वात् द्वादशवर्षपर्यन्तं राज्यभ्रंशः अभवत्। दमयन्त्या सह वियोगश्च अभूत् ॥९५८॥

सरलार्थः- तस्मिन् समये द्वादशघटिकापर्यन्तं साधोः कदर्थना कृता। तस्मात् कारणात् द्वादशवर्षपर्यन्तं राज्यभ्रंशः दमयन्त्या वियोगः च अभूत् ॥९५८॥

ગુજરાતી :- વળી તે વખતે બાર ઘડી સુધી સાધુને જે કદર્થના કરી, તેથી બાર વર્ષો સુધી રાજ્યથી ભ્રંશ તથા તમો બન્ને વચ્ચે વિયોગ થયો.॥૯૫૮॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

हिन्दी :- उस समय बारह घडी तक साधु की जो कदर्थना की थी उससे बारह साल तक राज्य से भ्रंश और तुम दोनों के बीच वियोग हुआ ॥९५८॥

मराठी :- नंतर त्या वेळेला बारा तासपर्यंत साधुंची जी अवहेलना केली, त्यामुळे बारा वर्षापर्यंत राज्यभ्रंश आणि दमयन्तीचा वियोग झाला.॥९५८॥

English :- In their past life as the had harransed the priest for twelve hours, they had to forfiet the kingdom and remain seperated for twelve year.

इत्याकर्ण्य नलः क्ष्माभृत् धर्मरङ्गतरङ्गितः ॥
भैमीकुक्षिसरोहंसं राज्ये पुष्परमासयत् ॥९५९॥

अन्वयः- इति आकर्ण्य धर्मरङ्गतरङ्गितः क्ष्माभृत् नलः भैमीकुक्षिसरोहंसं पुष्करं राज्ये आसयत् ॥९५९॥

विवरणम्:- *इति आकर्ण्य श्रुत्वा धर्मस्य रङ्गः धर्मरङ्गः। धर्मरङ्गस्य तरङ्गः अस्मिन् सञ्जाताः धर्मरङ्गतरङ्गितः धर्मरङ्गतरङ्गवान् क्ष्मां पृथ्वीं बिकभर्तीति क्ष्माभृत् नृपः नलः भीमस्यापत्यं स्त्री भैमी भीमराजपुत्री दमयन्ती। भैम्याः कुक्षिः उदरमेव सरः सरोवरं भैमीकक्षिसरः भैम्युदरसरोवरम्। भैमीकुक्षिसरसि हंसः इव भैमीकुक्षिसरोहंसः, तं भैमीकुक्षिसरोहंसं भैमीकुक्षिजातं पुष्करं राज्ये आसयत् उपावेशयत् ॥९५९॥*

सरलार्थः- इति वचनं श्रुत्वा धर्मरङ्गतरङ्गवान् नलः नृपः भैमीकुक्षिसरसि हंसमिव स्थितं पुष्करं राज्ये न्यवेशयत् ॥९५९॥

ગુજરાતી :- તે સાંભળીને નલરાજાએ ધર્મના રંગથી ઉત્સુક થઈને દમયંતીના ઉદરરુપી તલાવમાંથી ઉત્પન્ન થયેલા હંસસરખા પુષ્કરકુમારને રાજ્યાસન પર સ્થાપન કર્યો.॥૯૫૯॥

हिन्दी :- वह सुनकर नलराजा धर्म के रंग से उत्सुक होकर दमयंती के उदररूपी तालाब में हंस जैसे पुष्कर कुमार को राज्य पर स्थापित किया ॥९५९॥

P.P. Ac. Gunratnasuri M.S.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मराठी :- हे ऐकून नलराजा धर्माच्या रंगात रंगून गेला आणि दमयंतीच्या उदररूपी सरोवरात हंसा प्रमाणे उत्पन्न झालेल्या पुष्कर नावाच्या मुलास त्याने राज्यावर बसविले.॥९५९॥

English :- Then Nal who was now so fasinated with the hue of religion, placed the swan, his son Pushpakumar on the throne, whome Damyanti had hursed for twelve months in the pond of her womb.

ततो नलः समं भैम्या प्रव्रज्य गुरुसन्निधौ ॥
विजहार श्रुतं गृह्णन् विषहंश्च परीषहान् ॥९६०॥

अन्वयः- ततः नलः भैम्या समं गुरुसन्निधौ प्रव्रज्य श्रुतं गृह्णन् पहीषहान् विषहन् च विजहार ॥९६०॥

विवरणम्:- ततः नलः भीमस्यापत्यं स्त्री भैमी, तया भैम्या दमयन्त्या समं सह गुरोः सन्निधौ गुरुसन्निधौ गुरुपार्श्वे प्रव्रज्य दीक्षां गृहीत्वा श्रुतं शास्त्रं गृह्णन् अभ्यस्थन्, परीषहान् उपद्रवान् विषहन् विषहमाणः च विजहार विहारं चकार ॥९६०॥

सरलार्थः- ततः नलः दमयन्त्या सह गुरोः पार्श्वे दीक्षां गृहीत्वा शास्त्रम् अभ्यस्यन् परीषहान् सहमानश्च विहार चकार ॥९६०॥

ગુજરાતી :- પછી નલરાજા દમયંતી સહિત ગુરુમહારાજ પાસે દીક્ષા લઈને, શાસ્ત્રાભ્યાસ કરતા તથા પરિષહોને સહન કરતા વિચરવા લાગ્યા.॥૯૬૦॥

हिन्दी :- फिर नलराजा दमयंतीसहित गुरुमहाराज के पास दीक्षा लेकर शास्त्राभ्यास करते हुए और परीषहों को सहन करते हुए विचरने लगे॥ ॥९६०॥

मराठी :- नंतर नलराजा दमयंतीसह गुरुमहाराजाजवळ दीक्षा घेऊन शास्त्राभ्यास करीत व कष्टांना सहन करीत विहार करु लागला.॥९६०॥

English :- Then Nal along with his wife Damyanti tookup to monasticism with the help of the high-priest, and studied the literatures of religion. Then bearing up all the torments and difficulties of the priestly life, they began wandering about.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

अन्यदा कर्मवैचित्र्यात् दुर्जयत्वात् स्मरस्य च ।।
कथंचिन्नलराजर्षि र्भैमीं रन्तुं मनोऽकरोत् ।।९६१।।

अन्वयः- अन्यदा कर्मवैचित्र्यात् स्मरस्य दुर्जयत्वात् च नलराजर्षिः कथंचित् भैमीं रन्तुं मनः अकरोत् ।।९६१।।

विवरणम्:- *अन्यदा एकस्मिन् दिने विचित्रस्य भावः वैचित्र्यम्। कर्मणां वैचित्र्यं कर्मवैचित्र्यं, तस्मात् कर्मवैचित्र्यात् स्मरस्य कामस्य च दुःखेन जीयते इति दुर्जयः, दुर्जयस्य भावः दुर्जयत्वं तस्मात् दुर्जयत्वात् जेतुमशक्यत्वात् च राजा चासौ ऋषिः च राजर्षिः। नलश्चासौ राजर्षिः च नलराजर्षिः कथञ्चित् भीमस्यापत्यं स्त्री भैमी तां भैमीं दमयन्ती रन्तुं मनः अकरोत्। (एकदा नलराजर्षिः दमयन्त्या सह रन्तुं मनः अकरोत्।)।।९६१।।*

सरलार्थः- एकदा कर्मणां वैचित्र्यात् कामस्य च जेतुमशक्यत्वात् नलः राजर्षिः दमयन्त्या सह रन्तुं मनः अकरोत् ।।९६१।।

ગુજરાતી :- પછી એક વખત કર્મોની વિચિત્રતાથી, તથા કામને જીતવાની મુશ્કેલીથી નલરાજા મુનિ કોઇ પણ પ્રકારે દમયંતી સાથે વિલાસ કરવાની મનમાં ઇચ્છા કરવા લાગ્યા.।।૯૬૧।।

हिन्दी :- फिर एक समय कर्मों की विचित्रता से और काम को जीतना कठिन होने से नलराजा को किसी भी प्रकार से दमयंती के साथ विलास करने की मनमें इच्छा हुई ।।९६१।।

मराठी :- नंतर एकदा कर्माच्या विचित्रतेमुळे व काम विकाराला जिंकणे अतिशय कठिण असल्यामुळे नलराजाला दमयंतीबरोबर रमण्याची (विलास करण्याची) इच्छा झाली.।।९६१।।

English :- Then one day, Nal, due to his past deeds, and not being able control his passions, began germinating seeds of havings a sexual intercourse with Damyanti.

P.P. Ac. Gunratnasuri M.S.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुस्तमथ राजर्षिर्वाक्येर्मधुरशीतलैः ॥
भाविस्थूभद्रादिदृष्टान्तैः प्रत्यबोधयत् ॥९६२॥

अन्वयः- अथ गुरुः तं राजर्षिं मधुरशीतलै वाक्यैः भाविस्थूलभद्रादिदृष्टान्तैः प्रत्यबोधयत् ॥९६२॥

विवरणम्:- अथ अनन्तरं गुरुः तं राजा चासौ ऋषिः च राजर्षिः, तं राजर्षिं नलं मधुराणि च तानि शीतलानि च मधुरशीतलानि, तैः मधुरशीतलैः वाक्यैः, स्थलभद्रः आदौ येषां ते स्थलभद्रादयः। भाविनः च ते श्रीस्थूलभद्रादयश्च भाविश्रीस्थूलभद्रादयः। भाविश्रीस्थूलभद्रादीनां दृष्टान्ताः, तैः भाविश्रीस्थूलभद्रादिदृष्टान्तैः प्रत्यबोधयत् प्रतिबोधमकरोत् ॥९६२॥

सरलार्थः- अनन्तरं गुरुः तं राजर्षिं नलं मधुरशीतलैः वाक्यैः भाविनां श्रीस्थूलभद्रादीनां दृष्टान्तैः प्रत्यबोधयन् ॥९६२॥

ગુજરાતી :- ત્યારે ગુરુમહારાજે તે નલરાજર્ષિને ભવિષ્યમાં થનારા શ્રીસ્થૂલભદ્ર આદિના દૃષ્ટાંતોથી મધુર અને શીતલ વચનો વડે પ્રતિબોધ આપ્યો.॥૯૬૨॥

हिन्दी :- तब गुरुमहाराजने उस नलराजर्षि को भविष्य में होनेवाले श्रीस्थूलभद्र आदि के दृष्टांत से मधुर और शीतल वचनो से प्रतिबोधित किया॥९६२॥

मराठी :- तेव्हा गुरुमहाराजांनी त्या नलराजर्षिला भविष्यात होणाऱ्या श्रीस्थूलभद्रआदीच्या दृष्टांतांनी मधुर आणि शीतल वचनांनी प्रतिबोध केला.॥९६२॥

English :- At this the high priest with melodioua and mellifluous words, explained to Nal about the future birth of Stulbadra and the other priests.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

परं नाककबोध्यतस्त्यक्तः पित्रागत्याथ बोधितः ॥
स्वीचक्रेऽनशनं सद्यस्त्रप्यमाणस्ततो नलः ॥९६३॥

अन्वयः- परं न अवबोधि। अतः त्यक्तः। अथ पित्रा आगत्य बोधितः। ततः त्रप्यमाणः नलः सद्यः अनशनं स्वीचक्रे ॥९६३॥

विवरणम्:- *परं परन्तु सः नलः न अबोधि न अबुध्यता अथः गुरुणा त्यक्तः। अथ अनन्तरं पित्रा देवेन आगत्य एत्य बोधितः ज्ञापितः। ततः तदनन्तरं त्रप्यमाणः लज्जमानः नलः सद्यः तत्कालं न अशनम् अनशनं स्वीचक्रे - अङ्गीचक्रे ॥९६३॥*

सरलार्थः- परन्तुं सः नलः न अबुध्यत। अतः गुरुणा त्यक्तः। अनन्तरं पित्रा आगत्य बोधितः। ततः लज्जमानः नलः सद्यः अनशनं स्वीचक्रे ॥९६३॥

गुजराती :- પરંતુ તે પ્રતિબોધ પામ્યો નહીં, તેથી (ગુરુએ) તેને તજી દીધો, એવામાં દેવરુપ તેના પિતાએ આવીને પ્રતિબોધવાથી લજ્જાતુર થઈને પછી નલરાજાર્ષિએ તુરત અનશન ગ્રહણ કર્યું.॥૯૬૩॥

हिन्दी :- लेकिन वह प्रतिबोध पाया नही, जिससे (गुरुने) उसे छोड दिया, उसके बाद देवरूप पिताने आकर उनको प्रतिबोधित किया जिससे लज्जित होकर नलराजर्षिने तुरंत अनशन ग्रहण किया॥९६३॥

मराठी :- परंतु तो प्रतिबोध पावला नाही. त्यामुळे गुरुंनी त्याला सोडून दिले. म्हणून देवरुप त्याच्या वडिलांनी येऊन त्याला प्रतिबोध केला. त्यामुळे लज्जित होऊन नलराजर्षीने तत्काळ उपोषण (अनशन) तप सुरू केले.॥९६३॥

English :- These words were not accepted by Nal, so the priest left them. Then the father of Nal, who was a God appeared in front of them, and exlained to them Nal, feeling ashamed at his deed at once to up to a fast into death.

P.P. Ac. Gunratnasuri M.S.

चक्रे नलानुरागेण दमयन्त्यपि तत्तपः ॥
नलो मृत्वा कुबरोऽभूद्दमयन्ती तु तत्प्रिया ॥९६४॥

अन्वयः- अथ दमयन्ती अपि नलानुरागेण तत् तपः चक्रे। नलः मृत्वा कूबरः अभूत् दमयन्ती तु तत्प्रिया अभवत् ॥९६४॥

विवरणम्:- अथ अनन्तरं दमयन्ती अपि नले अनुरागः नलानुरागः, तेन नलानुरागेण नलस्नेहेन तत् अनशनं तपः चक्रे विदधे। नलः मृत्वा कूबरः अभूत्। दमयन्ती तु तस्य कूबरस्य प्रिया तत्प्रिया कूबरभार्या अभवत् ॥९६४॥

सरलार्थः- अनन्तरं दमयन्ती अपि नलानुरागेण अनशनतपः अकरोत् । नलः मृत्वा कूबरः अभूत्। दमयन्ती तस्य कूबरस्य प्रिया पत्नी अभवत् ।

ગુજરાતી :- પછી નલ પ્રત્યેના પ્રેમભાવથી દમયંતીએ પણ તેજ તપ એટલે અનશન કર્યું. પંછી નલ કાળધર્મ પામીને કૂબર દેવ થયો, અને દમયંતી પણ તેની સ્ત્રી થઈ.॥૯૬૪॥

हिन्दी :- फिर नल के प्रति प्रेमभाव से दमयंती ने भी वही तप याने अनशन ग्रहण किया फिर नल कालधर्म पाकर कुबर देव हुए और दमयंती उन की पत्नी हुई ॥९६४॥

मराठी :- नंतर नलराजावरील प्रेमामुळे दमयंतीनेही अनशन तप करावयास सुरूवात केली. नलराजा मरण पावल्यावर कुबर नावाचा देव झाला व दमयंती त्याची पत्नी झाली. ॥९६४॥

English :- Due to Damyanti's utmost love for Nal, she too took up to a fast unto death for which when Nal died, was born as a God named Kuber and Damyanti became his wife.

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

भूयस्यपि कृते धर्मे किंचिद् व्रतविराधनात् ।।
नीचैः सुरस्वरुपं तत् तयोः फलमजायत् ।।९६५।।

अन्वयः- भूयसि अपि धर्मेकृते किञ्चित् व्रतविराधनात् तयोः नीचैः सुरस्वरुपं तत् फलम् अजायत ।।९६५।।

विवरणम्:- भूयसि बहुले धर्मे कृते अपि किञ्चित् व्रतस्य चारित्रस्य विराधनं व्रतविरोधनं, तस्मात् व्रतविराधनात् चारित्रविराधनात् तयोः नलदमयन्त्योः नीचैः सुरस्य स्वरुपं सुरस्वरुपं तत्फलं चारित्रविराधनफलं अजायत अभवत् ।।९६५।।

सरलार्थः- बहुले धर्मे कृते सत्यपि किञ्चित् चारित्रविराधनात् तयोः नलदमयन्त्योः नीचैः देवस्वरुपं तत्फलम् अजायत ।।९६५।।

ગુજરાતી :- ઘણું ધર્મકાર્ય કર્યા છતાં પણ ચારિત્રમાં જરાક વિરાધના કરવાથી, તેના ફળરૂપ નીચા દેવનું સ્વરુપ તેઓને પ્રાપ્ત થયું.।।૯૬૫।।

हिन्दी :- बहुत धर्म कार्य करने के बाद भी चारित्र में किंचित विराधना करने के फलस्वरूप निम्न कोटि के देव का स्वरूप उन्हे प्राप्त हुआ ।।९६५।।

मराठी :- पुष्कळ धर्मकार्य करुन सुद्धा चारित्र्यात किंचित विराधना केल्याने त्याचे फळ म्हणून नीच देवाचे स्वरुप त्यांना प्राप्त झाले.।।९६५।।

English :- Now even after performing tough penences and austeries, they were only able to inherit for themselves a very low position among the God's, as they were not able to retain complete and absolute celibacy.

P.P. Ac. Gunratnasuri M.S.

Jun Gyan Bhandar, Surat

अथ प्राप्य मनुष्यत्वं लब्ध्वा चारित्रमुज्ज्वलम् ॥
निर्धूयाशेषकर्माणि गतौ सिद्धिमुभावपि ॥९६६॥

अन्वयः- अथ मनुष्यत्वं प्राप्य उज्ज्वलं चारित्रं लब्ध्वा अशेषकर्माणि निर्धूय उभावपि सिद्धिं गतौ ॥९६६॥

विवरणम्:- *अथ अनन्तरं मनुष्यस्य भावः मनुष्यत्वं मनुष्यजन्म प्राप्य उज्ज्वलं चारित्रं लब्धा अधिगम्य अशेषाणि च तानि कर्माणि च अशेषकर्माणि घात्यघातिसकलकर्माणि निर्धूय क्षपयित्वा उभौ अपि नलदमयन्त्यौ सिद्धिं मोक्षं गतौ ॥९६६॥*

सरलार्थः- अनन्तरं मनुष्यजन्म प्राप्य उज्ज्वलं चारित्रं लब्ध्वा घात्यघातिसकलकर्माणि क्षपयित्वा तौ उभौ अपि सिद्धिं गतौ ॥९६६॥

गुजराती :- પછી મનુષ્યપણું પામીને તથા નિર્મલ ચારિત્ર લઈને તે બન્ને સર્વ કર્મો ખપાવીને મોક્ષે ગયા.॥९६६॥

हिन्दी :- फिर मनुष्यजन्म पाकर और निर्मल चारित्र (संयम) ग्रहण कर के वे दोनों सभी कर्म का क्षय कर के मोक्ष में गये॥९६६॥

मराठी :- नंतर मनुष्यजन्म व निर्मल चारित्र प्राप्त करून ते दोघे घाती - अघाती सर्व कर्माचा क्षय करुन मोक्षाला गेले. ॥९६६॥

English :- **Then when they were born as human being they again renounced the worldly life and took up to a pure priently life, anhilated all the light Karman and then in due-course attained Salvation (Moksh)**

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

घप्राग्जन्मनिर्मितजीनेश्वरदिव्यपूजैः सम्पआप्तमुत्तममिदम्भरतार्धराज्यम् ।।
राज्ञा नलेन सह भीमनरेन्द्रपुत्र्या जन्मान्तरे पुनरनन्तसुखश्च मोक्षः ।।९६७।।

अन्वयः- प्राग्जन्मनिर्मितजिनेश्वरदिव्यपूजैः भीमनरेन्द्रपुत्र्या सह नलेन राज्ञा इदम् उत्तमं भरतार्धराज्यं सम्प्राप्तम् । जन्मान्तरे पुनः अनन्तसुखः मोक्षः प्राप्तः ।।९६७।।

विवरणम्:- *प्राक् च तद् जन्म च प्राग्जन्मा प्राग्जन्मनि निर्मिताः प्राग्जन्मनिर्मिताः। जिनानामिश्वराः जिनेश्वरः। दिव्याश्च ताः पूजाः च दिव्यपूजाः। जिनेश्वराणां दिव्यपूजाः जिनेश्वरदिव्यपूजाः। प्राग्जन्मनिर्मिताश्च ताः जिनेश्वरदिव्यपूजाश्च, ताभिः प्राग्जन्मनिर्मितजिनेश्वरदिव्यपूजाभिः पूर्वभवे कृताभिः जिनेश्वराणां दिव्यपूजाभिः, भीमश्चासौ नरेन्द्रश्च भीमनरेन्द्रः। भीमनरेन्दस्य पुत्री, तया भीमनरेन्द्रपुत्र्या दमयन्त्या सह नलेन राज्ञा इदम् उत्तमम् उत्कृष्टं भरतार्धस्य राज्यं भरतार्धराज्यं सम्प्राप्तम्। अन्यत् जन्म जन्मान्तरं तस्मिन् जन्मान्तरे पुनः न विद्यते अन्तः यस्य तद् अनन्तम्। अनन्तं सुखं यस्मिन् सः अनन्तसुखः मोक्षः च सम्प्राप्तः ।।९६७।।*

सरलार्थः- दमयन्त्या सह नलेन राज्ञा पूर्वजन्मानि कृताभिः जिनेश्वराणांदिव्यपूजाभिः उत्तमं भरतार्धराज्यं सम्प्राप्तम् । जन्मान्तरे च अनन्तसुखः मोक्षः सम्प्राप्तः ।।९६७।।

ગુજરાતી :- પૂર્વજન્મમાં કરેલી જિનેશ્વરપ્રભુની મનોહર પૂજાથી દમયંતી સહિત નલરાજાએ આ અર્ધ ભરતક્ષેત્રનું રાજ્ય મેળવ્યું તથા બીજા જન્મમાં અનંત સુખદાયી મોક્ષ મેળવ્યું.।।૯૬૭।।

हिन्दी :- पूर्वजन्म में की हुई जिनेश्वर की मनोहर पूजा से दमयंतीसहित नलराजा ने यह उत्तम (श्रेष्ठ) अर्ध भरतक्षेत्र का राज्य प्राप्त किया था और दूसरे जन्म में अनंत सुखवाला मोक्ष प्राप्त किया।।९६७।।

मराठी :- पूर्व जन्मात केलेल्या जिनेश्वराच्या मनोहर पुजेमुळे दमयंतीसहित नलराजाला हे उत्तम असे अर्ध भरतक्षेत्राचे राज्य मिळाले आणि दुसऱ्या जन्मात अनंत सुख देणारे मोक्ष प्राप्त झाले.।।९६७।।

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

English :- As they had worshepped the idol of Lord Jineshwar with a pure heart, they both in their first life attained the kingship and queenship of the half of the Bharatschetra and then attained salvation in their second life.

ततोभवन्तोऽपि भवन्तु सज्जाः सदैव तीर्थेश्वरपूजनेषु ॥
यन्मुष्टिमध्ये भवतामपीह स्यादैहिकामुष्किसौख्य योगः ॥९६८॥

अन्वयः- ततः भवन्तः अपि सदैव तीर्थेश्वरपूजनेषु सज्जाः भवन्तु । यत् भवतामपि इह ऐहिकामुष्कि सौख्ययोगः मुष्टिमध्ये स्यात् ॥९६८॥

विवरणम्:- *ततः तस्मात् कारणात् भवन्तः यूयम् अपि सदा एव सर्वदा एव तीर्थानामीश्वराः तीर्थेश्वराः जिनाः। तीर्थेश्वराणां पूजनानि तीर्थेश्वरपूजनानि, तेषु तीर्थेश्वरपूजनेषु जिनपूजनेषु सज्जाः उद्यताः भवतु भवत। यद् येन भवताम् अपि युष्माकम् अपि इह भवम् ऐहिकम्। अमुष्मिन् भवम् आमुष्मिकम्। सुखमेव सौख्यम्। ऐहिकं च तद् आमुष्मिकं च ऐहिकामुष्मिकम्। ऐहिकामुष्मिकं च तत् सौख्यं च ऐहिकामुष्किसौख्यम्। ऐहिकामुष्मिकसौख्यस्य योगः मुष्टेः मध्यः मुष्टिमध्यः, तस्मिन् मुष्टिमध्ये स्यात्। ऐहिकमामुष्मिकं च सुखं युष्माकं मुष्टिमध्ये स्यात्॥९६८॥*

सरलार्थः- तस्मात् कारणात् यूयमपि तीर्थंकरपूजनेषु सज्जाः भवत। तेन ऐहिकमामुष्मिकं च सुखं युष्माकमपि करतलगतं स्यात् ॥९६८॥

ગુજરાતી :- માટે (હે ભવ્ય લોકો!) તમો પણ હમેશાં જિનેશ્વરપ્રભુના પૂજન માટે તૈયાર થાઓ કે જેથી તમને પણ અહીં આ ભવ તથા પરભવસંબંધી સુખનો યોગ પ્રાપ્ત થાય.॥૯૬૮॥

हिन्दी :- इसलिये (हे भव्य जीवो!) तुम भी हमेशा जिनेश्वर प्रभु की पूजा करने के लिये तैयार रहो। जिससे इस भव और परभव के सारे सुख तुम्हारी मुट्ठीमें आ जायेंगे। ॥९६८॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मराठी :- ''म्हणून (हे भव्य जीवांनो।) तुम्ही नेहमी जिनेश्वर प्रभूच्या पूजेकरिता सज्ज रहा. त्यामुळे या जन्मातील आणि पुढच्या जन्मातील सर्व सुखें तुमच्या मुठीत येतील.''॥९६८॥

English :- So ""O mortals, you too should worship Lord Jineshwara wholeheartedly so that you may capture and captiatave the blins of this birth and our next birth, in our fists."

॥इति प्राग्जन्मकृत देवपूजाफले नलदमयन्ती कथा॥श्रीअस्तु॥

P.P. Ac. Gunratnasuri M.S.